॥ श्रीमद्वनुमद्भीममध्वान्तर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवाय नमः ॥

श्रीमज्जयतीर्थयतिकृता

श्रीमन्न्यायसुधा

परिमळाद्युपेता

सम्पुटम् – १५ – द्वितीयाध्यायः

प्रकाशनम्

श्रीगुरुसार्वभौमसंस्कृतविद्यापीठम्

श्रीमन्मध्वाचार्यमूलमहासंस्थानम्, श्रीराघवेन्द्रस्वामिमठः, मन्त्रालयः

॥ श्रीमद्धनुमद्भीममध्वान्तर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवाय नमः ॥

श्रीमज्जयतीर्थयतिकृता

श्रीमन्न्यायसुधा

परिमळाद्युपेता

सम्पुटम् – १५

द्वितीयाध्यायस्य प्रथमपादे

वैशेषिकाधिकरणम्

प्रकाशनम्

श्रीगुरुसार्वभौमसंस्कृतविद्यापीठम्

श्रीमन्मध्वाचार्यमूलमहासंस्थानम्

श्रीराघवेन्द्रस्वामिमठः, मन्त्रालयः

श्रीमन्न्यायसुधा
परिमळाद्युपेता

सम्पुटम् – १५

प्रथमं मुद्रणम् - ई.सन् २००७

Śrīman-Nyāyasudhā
Parimaḷādyupetā

Volume - 15

First Edition -2007 A.D.

सर्वजित् संवत्सरम्, शके १९२९, भाद्रपद शुक्ल पौर्णिमा, बुधवासरः

मन्त्रालयम्

Published by :

Śrī Gurusārvabhauma Saṁskṛt Vidyāpīṭham
Śrīman Madvāchārya Mūla Mahāsamsthāna
Śrī Rāghavendra Swāmy Mutt
Mantrālayam - 518 345
India.

* *मुद्रकः* *

धनंजयाचार्य बाळाचार्य वरखेडकरः

सुधा मुद्रणम्
शंकरपुरम्, बेंगळूर - ५६० ००४
दूरवाणी– २६७२ ३१०७, ६५६० २८३६

SUDHA MUDRANA
Shankarpuram, Bangalore - 560 004
Phone : 2672 3107, 6560 2836

समर्पणपत्रिका

श्रीमत्परमहंसपरिव्राजकाचार्यत्वाद्यमन्दबिरुदवृन्दविभूषित-
सर्वतन्त्रस्वतन्त्र-श्रीमद्वैष्णवसिद्धान्तस्थापनाचार्य-
षड्दर्शनाचार्यवर्य-नास्तिकदर्शननिराकरणधुरन्धर-
आस्तिकदर्शनमहाचार्य-
श्रीमन्मूलरघुपतिवेदव्यासदेवदिव्यश्रीपादपद्माराधक-

श्रीमन्मध्वाचार्यसमलङ्कृतमूलमहासंस्थानाधिष्ठितानां

श्रीमद्द्वैतसाम्राज्यदिग्विजयविद्यासिंहासनाधीश्वराणां
परमपूज्यानां कामधेनुकल्पवृक्षसदृशानां

श्रीश्रीमद्राघवेन्द्रतीर्थगुरुसार्वभौमानां

हृत्कमलनिवासि-

श्रीरामकृष्णवेदव्यासाभिन्न-

श्रीमूलरघुपतिपादकमलयोः

समर्पितोऽयं ग्रन्थः ॥

सुजयीन्द्रकृपापूर्णसुशमीन्द्रयतीश्वरैः ।
श्रीमन्न्यायसुधाग्रन्थ अर्पितोऽयं मुदा हरेः ॥

॥ श्रीमन्मूलरामो विजयते ॥

श्रीमद्धंसनामकपरमात्मसमारब्धपरम्परागत-श्रीमत्परमहंसेत्यादिबिरुदभूषित-

श्रीमदानन्दतीर्थभगवत्पादाचार्य-मूलमहासंस्थानाधीश्वर-

श्रीमद्राघवेन्द्रगुरुसार्वभौम-

वेदान्तसाम्राज्यदिग्विजयविद्यासिंहासनाधीश्वर-

श्रीमत्सुयमीन्द्रतीर्थश्रीपादकरकमलसञ्जात-श्रीमत्सुजयीन्द्रतीर्थश्रीपादवरकुमारक-

श्री श्रीमत्सुशमीन्द्रतीर्थश्रीपादानाम्

तथा तेषामुत्तराधिकारिणां

श्री श्रीमत्सुयतीन्द्रतीर्थश्रीपादानाम्

अनुग्रहवचनम्

अस्मत्प्रियशिष्यान् तथैव अस्मन्मठीयान् नैकान् आस्थानविद्वज्जनान् वयम् अस्मद्गुरुवराणां श्रीमत्सुजयीन्द्रतीर्थश्रीमच्चरणानामाज्ञामनुरुध्य परिमलादि-बहुटिप्पणीभिर्युक्तां श्रीमन्न्यायसुधां संशोध्य प्रकाशयितुमादिष्टवन्तः स्मः।

अस्मदादेशमनुरुध्य ग्रन्थमिमं संशोध्य मुद्रणप्रतिमपि संशोधितवद्भ्यः प्रधानसम्पादकेभ्यः वैकुण्ठवासिभ्यः साणूरु भीमभट्टेभ्यः तथा ग्रन्थमिमं प्रकाशितवद्भ्यः श्रीगुरुसार्वभौमसंस्कृत-विद्यापीठीयेभ्यः एवं ग्रन्थसंशोधने तथा मुद्रणप्रतिसंशोधने च सहायमाचरितवद्भ्यः अस्मद्विद्यापीठा-ध्यापकेभ्यः, तथाऽन्येभ्यो विद्वद्भ्यः, एवमल्पकाले सुष्ठु मुद्रणं कृतवद्भ्यः 'सुधा मुद्रण'नेतृभ्यः धनंजयाचार्येभ्यः तथा सर्वेभ्यः एतद्ग्रन्थाध्ययन-अध्यापनादिकर्तृभ्यः अस्मदुपास्यः श्री श्रीमद्राघवेन्द्र-तीर्थगुर्वन्तर्गत-श्रीभारतीरमण-मुख्यप्राणान्तर्गत-श्रीसीतापति-श्रीमूलरामचन्द्रदेवः इतोऽप्यतिशयित-आयुरारोग्यैश्वर्यादीनि, ज्ञानभक्तिवैराग्यादीनि च दत्वा अनुगृह्णातु इत्याशास्महे ।

इति नारायणस्मृतिः।

मन्त्रालयक्षेत्रम्,
सर्वजित् संवत्सरम्, शके १९२९, भाद्रपद शुक्ल पौर्णिमा।

श्रीमन्मध्वाचार्यमूलमहासंस्थान-श्रीराघवेन्द्रस्वामिमठाधीशानां

श्री श्री सुजयीन्द्रतीर्थश्रीपादानां वरकुमारकाणां

श्री श्री सुशमीन्द्रतीर्थश्रीपादानां

परमानुग्रहेण सम्पादितोऽयं ग्रन्थः ।

सम्पादकविद्वन्मण्डली

प्रधानसम्पादकाः

वैकुण्ठवासिनः श्री आचार्य साणूरु भीमभट्टाः

आस्थानविद्वांसः, श्रीराघवेन्द्रस्वामिमठः, मन्त्रालयः

सम्पादकाः

विद्वान् श्री कुर्डि सुशीलेन्द्राचार्याः

विद्वान् श्री कडप राघवेन्द्राचार्याः, *प्रांशुपालाः श्री गु.सं.वि., मन्त्रालयः*

विद्वान् श्री पुराणिक सुब्रह्मण्याचार्याः

विद्वान् आहिताग्नि श्री वरखेडकर भीमसेनाचार्याः

निर्वाहकाः

श्रीपादपुत्राः राजा एस्. राजगोपालाचार्याः

श्री श्री सुशमीन्द्रतीर्थश्रीपादानाम् आप्तकार्यदर्शिनः,
श्रीमन्मध्वाचार्यमूलमहासंस्थानम् - श्रीराघवेन्द्रस्वामिमठः,
मन्त्रालयम्

श्रीमन्न्यायसुधा – परिमळाद्युपेता

टिप्पणीनां क्रमः तथा सङ्क्षिप्तनामानि

क्र.सं.	कर्तृनाम	टिप्पणीनाम	सङ्क्षिप्तनाम
१	श्री विजयीन्द्रतीर्थाः	न्यायसुधाबिन्दुः	बिन्दुः—
२	श्री राघवेन्द्रतीर्थाः	परिमळः	परि०—
३	श्री श्रीपादराजतीर्थाः	वाग्वज्रः	वाग्वज्रः—
४	श्री वादिराजतीर्थाः	गुर्वर्थदीपिका	गु०दी०—
५	श्री यदुपत्याचार्याः	टिप्पणी	यादु०—
६	श्री वंशपल्ली श्रीनिवासाचार्याः	वाक्यार्थविवृतिः	वं०प०—
७	श्री गलगली नरसिंहाचार्याः	आनन्दः	आनन्दः—
८	श्री कंबालूरु रामचन्द्रतीर्थाः	विवृतिः	कं०रा०—
९	श्री श्रीनिधितीर्थाः	टिप्पणी	श्रीनिधि०—
१०	श्री विद्याधीशतीर्थाः	वाक्यार्थचन्द्रिका	वा०चं०—
११	श्री पाण्डुरङ्गि केशवाचार्याः	शेषवाक्यार्थचन्द्रिका	शे०चं०—
१२	श्री पाण्डुरङ्गि नरसिंहाचार्याः	वाक्यार्थरत्नमाला	वा०र०—
१३	श्री सत्यव्रततीर्थाः	सुधाविवृतिः	स०व्र०—
१४	श्री कुण्डलगिरिआचार्याः	रसकूलङ्कषः	कुण्डल०—
१५	श्री सत्यनाथतीर्थाः	दुर्घटवाक्यार्थविचारः	स०ना०—
१६	श्री विट्ठलभट्टाः	टिप्पणी	विट्ठ०—
१७	श्री विष्णुतीर्थाः	रसरञ्जनी	रस०—
१८	श्री अडवी कृष्णाचार्याः	लघुरसरञ्जनी	ल०र०—
१९	श्री मन्नारी कृष्णाचार्याः	चषकः	चषकः—
२०	श्री एरी बाळाचार्याः	उपस्पर्शः	ए०बा०—
२१	श्री काशी आचार्याः	काशी टिप्पणी	काशी०—
२२	श्री गूढकर्तृकाचार्याः	गूढकर्तृका	गूढ०—
२३	श्री प्रदीपकाराः	प्रदीपः	प्रदीपः—
२४	श्री पांग्री श्रीनिवासाचार्याः	टिप्पणी	पांग्री०—
२५	श्री कल्लापूर सत्याधिराजाचार्याः	हुग्गि	हुग्गि०—

टिप्पणीविषये स्पष्टीकरणम्

श्रीमज्जयतीर्थविरचितं महामेरुतुल्यं श्रीमन्न्यायसुधाग्रन्थमनेके व्याचख्युः। साम्प्रतमस्माभिः, उपलब्धाः श्रीमन्न्यायसुधाव्याख्याः सङ्गृह्यैकत्र मुद्रापयितव्याः इत्येकमात्रोद्देशेन अनेकव्याख्यासहिततया श्रीमन्न्यायसुधाग्रन्थः मुद्रापितः।

श्रीमद्विजयीन्द्रतीर्थश्रीपादानां श्रीमद्राघवेन्द्रतीर्थश्रीपादानां च सुधाव्याख्यानयोः इदानीं मुद्रापितायां यस्यां कस्याञ्चित् सुधाव्याख्यायां यस्मिन् कस्मिंश्चिद्विषये भिन्नाभिप्राये सति (विरुद्धाभिप्राये सति) सः तद्व्याख्यातृणामभिप्राय एव। सः श्रीमद्विजयीन्द्रतीर्थश्रीपादानां वा परिमलकाराणां वा सम्पादकानां वा प्रकाशकानां वा सम्मत इति न मन्तव्यमिति एतन्मूलकतया स्पष्टीकुर्मः।

इत्थम्

सम्पादकाः

॥ श्रीमन्मूलरामो विजयते ॥

प्रकाशकीयम्

द्वापरे श्रीगौतममहर्षिभिः शप्तेषु साधुजनेषु व्याकुलीभूतेषु श्रीब्रह्मरुद्रेन्द्रादिभिः प्रार्थितो भगवान्नारायणः श्रीवेदव्यासत्वेनावतीर्य राशीभूतान् वेदान् विभज्य, वेदार्थनिर्णायकानि चतुःषष्टयधिकपञ्चशत(५६४)ब्रह्मसूत्राणि व्यरचयत्।

एषां ब्रह्मसूत्राणां श्रीवाय्ववतारिणः सर्वज्ञाः श्रीमदानन्दतीर्थभगवत्पादाः भाष्यम्, श्रीमदनुव्याख्यानम्, न्यायविवरणम्, अणुभाष्यं चेति ग्रन्थचतुष्टयं विरचय्य महदुपाकुर्वन्।

श्रीमदाचार्याणां प्रियान्तेवासिनां श्रीत्रिविक्रमपण्डिताचार्याणां "व्यक्ततर्कततिं कुरु" इति प्रार्थनामनुरुध्य श्रीमदाचार्याः उपर्युक्तग्रन्थेष्वन्यतमं श्रीमदनुव्याख्यानग्रन्थं रचयामासुः।

अनुव्याख्यानस्यास्य इन्द्रांशसंभूताः श्रीमज्जयतीर्थश्रीमच्चरणाः श्रीमन्न्यायसुधानाम्नीं मेरुतुल्यामनुपमां टीकां व्यरचयन्।

ग्रन्थोऽयं चित्रपदपुञ्जमण्डितः, महागाम्भीर्यवान् महापण्डितवरेण्यानामपि महान्तं गर्वपर्वतं खण्डयितुं दक्षश्चकास्ति।

अस्यामोघस्य ग्रन्थस्य महत्त्वम् एतद्ग्रन्थस्य एतदीयानामनेकासां व्याख्यानां सङ्ख्चैव व्यञ्जयति।

	व्याख्यातारो महाभागाः	**व्याख्यानस्य नाम**
१)	श्री श्रीपादराजतीर्थाः	वाग्वज्रम्
२)	श्री विजयीन्द्रतीर्थाः	न्यायसुधाबिन्दुः
३)	श्री वादिराजतीर्थाः	गुर्वर्थदीपिका
४)	श्री राघवेन्द्रतीर्थाः	परिमलः
५)	श्री यदुपत्याचार्याः	टिप्पणी
६)	श्री वंशपल्ली श्रीनिवासाचार्याः	वाक्यार्थविवृतिः
७)	श्री गलगली नरसिंहाचार्याः	आनन्दः
८)	श्री कंबालूरु रामचन्द्रतीर्थाः	विवृतिः

९)	श्री श्रीनिधितीर्थाः	टिप्पणी
१०)	श्री विद्याधीशतीर्थाः	वाक्यार्थचन्द्रिका
११)	श्री पाण्डुरङ्गि नरसिंहाचार्याः	वाक्यार्थरत्नमाला
१२)	श्री पाण्डुरङ्गि केशवाचार्याः	शेषवाक्यार्थचन्द्रिका
१३)	श्री कुण्डलगिरि आचार्याः	रसकूलङ्कषः
१४)	श्री सत्यव्रततीर्थाः	सुधाविवृतिः
१५)	श्री सत्यनाथतीर्थाः	दुर्घटवाक्यार्थविचारः
१६)	श्री विट्ठलभट्टाः	टिप्पणी
१७)	श्री कल्लापूर सत्याधिराजाचार्याः	हुग्गि
१८)	श्री विष्णुतीर्थाः	रसरञ्जनी
१९)	श्री अडवि कृष्णाचार्याः	लघुरसरञ्जनी
२०)	श्री मन्नारि कृष्णाचार्याः	चषकः
२१)	श्री एरी बाळाचार्याः	उपस्पर्शः
२२)	श्री काशी तिम्मण्णाचार्याः	काशी टिप्पणी
२३)	श्री गूढकर्तृकटिप्पणीकाराः	टिप्पणी
२४)	श्री प्रदीपकाराः	प्रदीपः
२५)	श्री पांध्री श्रीनिवासाचार्याः	टिप्पणी
२६)	श्री रोट्टि वेङ्कटभट्टाः	सुधाविवृतिः
२७)	श्री ताम्रपर्णी आचार्याः	टिप्पणी
२८)	श्री उमर्जी प्रह्लादकृष्णाचार्याः	उमर्जी
२९)	श्री व्यासतत्त्वज्ञतीर्थाः	कुलिशम्
३०)	श्री महेश्वरसूरिः	टिप्पणी
३१)	श्री पुट्ट तंबि आचार्याः	टिप्पणी
३२)	श्री रत्नगर्भ ओडेयर्	टिप्पणी
३३)	श्री अनन्तभट्टाः	टिप्पणी
३४)	श्री सत्यनाथाचार्याः	टिप्पणी
३५)	श्री जयवेङ्कटाचार्याः	टिप्पणी
३६)	श्री गूढकर्तृकाचार्याः	सुधासारसङ्ग्रहः
३७)	श्री गलगली गोविन्दाचार्याः	पञ्चरत्नस्तबकः

३८)	श्री श्रीमुष्णाचार्याः	पञ्चाधिकरणी
३९)	श्री लिङ्गेरि श्रीनिवासाचार्याः	सिद्धान्तप्रभा
४०)	श्री पाण्डुरङ्गि केशवाचार्याः	सुधावाक्यार्थविनोदः
४१)	श्री उडुपि राघवेन्द्रतीर्थाः (पुत्तिगे मठः)	टिप्पणी
४२)	श्री सत्यनाथाः	न्यायसुधापरशुः
४३)	श्री सुमतीन्द्रतीर्थाः	भावरत्नकोशः
४४)	श्री पाण्डुरङ्गि केशवाचार्याः	मञ्जरी
४५)	श्री व्यासतत्त्वज्ञतीर्थाः	लघुरसरञ्जनी
४६)	श्री व्यासतत्त्वज्ञतीर्थाः	गुरुरसरञ्जनी
४७)	श्री भीमराव् कुलकर्णी कुम्बारगेरी	टिप्पणी
४८)	श्री सत्यपराक्रमतीर्थाः	सुधाफक्किका
४९)	श्री हुलिगि श्रीपत्याचार्याः	टिप्पणी
५०)	श्री अहोबिलाचार्याः	टिप्पणी
५१)	श्री सत्यप्रज्ञतीर्थाः	टिप्पणी

एतादृशस्य अत्युत्तमग्रन्थस्य मुद्रणकार्यं श्रीमत्परमपूज्यानां प्रातःस्मरणीयानां श्रीमत्सुजयीन्द्रतीर्थ-श्रीमच्चरणानामादेशं सदिच्छां चानुरुध्य सम्प्रति श्रीराघवेन्द्रस्वामिमठीयपीठाधीश्वराः पूज्याः श्री १००८ श्रीमत्सुशमीन्द्रतीर्थश्रीपादाः कारयन्तीति अस्माकं परमं प्रमोदस्थानम् ।

अस्य ग्रन्थस्य संशोधनकार्ये अस्मद्विद्यापीठीयप्राच्यग्रन्थालयस्थाः अधोनिर्दिष्टाः टिप्पण्यः हस्तप्रति-कृतयोऽपि उपयोजिता इति निवेदयितुं नितान्तं तुष्यामः ।

ग्रन्थस्यास्य प्रकाशनार्थं श्रीसुधाव्याख्यानं विट्ठलभट्टीयं हस्तलिखितं अनुगृहीतवद्भ्यः परमपूज्येभ्यः श्रीउत्तरादिमठाधीश्वरेभ्यः सभक्ति प्रणामगणं समर्पयामः । संशोधनादिकार्येष्वनुकूलयितुं श्रीसुधाव्याख्यानं श्रीनिधितीर्थीयं तालपत्रस्थं अनुगृहीतवद्भ्यः परमपूज्येभ्यः श्रीपुत्तिगेमठाधीश्वरेभ्यः सभक्ति प्रणामगणं समर्प-यामः । एवमेव मुद्रणकार्येऽस्मिन् साक्षाद्वा परोक्षे वा सहकृतवद्भ्यः परमपूज्येभ्यः श्रीमठाधीश्वरेभ्यः सर्वेभ्यः सभक्तिप्रणामगणं कार्तज्ञ्यमाविष्कुर्मः । श्रीनिधितीर्थीयं व्याख्यानं तालपत्रस्थं तौलवलिपिगतं देवनागरिलिपिगतं कृतवतः विद्वान् श्री साणूरु भीमभट्टतनूजः श्री कृष्णमूर्ति महाशयान् सन्दर्भेऽस्मिन् सप्रश्रयं स्मरामः ।

ग्रन्थस्यास्य प्रधानसम्पादकेभ्यः विद्वद्भ्यः वैकुण्ठवासिभ्यः श्री आचार्य साणूरु भीमभट्टमहाशयेभ्यः तथा एतद्ग्रन्थसम्पादकेभ्यः विद्वद्भ्यः श्री कडप राघवेन्द्राचार्येभ्यः, विद्वद्भ्यः श्री पुराणिक सुब्रह्मण्याचार्येभ्यः, तथा

विद्वद्भ्यः आहिताग्नि श्री वरखेडकर भीमसेनाचार्येभ्यः, एवं विठ्ठलभट्टीयां टिप्पणीं तथा एरी बाळाचार्याणां टिप्पणीं दत्तवद्भ्यः विद्वद्भ्यः श्री व्यासनकेरे प्रभञ्जनाचार्येभ्यः, तथा पांघ्री श्रीनिवासाचार्याणां टिप्पणीं दत्तवद्भ्यः विद्वद्भ्यः श्री पांघ्री लक्ष्मणाचार्येभ्यः, तथा वाक्यार्थरत्नमालाख्यां टिप्पणीं, सत्यनाथतीर्थीयां टिप्पणीं, हुग्गिनामकटिप्पणीं च दत्वा उपकृतवद्भ्यः पंढरपुरीय पूर्णप्रज्ञमतोन्नाहिनीपाठशालाप्रांशुपालेभ्यः विद्वद्भ्यः श्री वरखेडकर भीमसेनाचार्येभ्यः, तथा वाक्यार्थरत्नमालाटिप्पण्याः प्रतिकृत्यन्तरं दत्तवद्भ्यः विद्वद्भ्यः श्री के. टि. पाण्डुरङ्गि महाशयेभ्यः एवमेव प्रदीपटिप्पणीं दत्तवद्भ्यः मद्रपुरसर्वकारीयग्रन्थालयव्यवस्थापकेभ्यः श्रीमद्भ्यः, श्रीमन्न्यायसुधाबिन्दुनाम्नीं टिप्पणीं दत्तवद्भ्यः श्रीमद्भ्यः केरलराज्यीय तिरुवाङ्कूरु ग्रन्थभाण्डारव्यवस्थापकेभ्यः, तथा रसरञ्जनी-लघुरसरञ्जनी इति व्याख्यानद्वयं दत्तवद्भ्यः विद्वद्भ्यः श्री गंगूरु हनुमेशाचार्येभ्यः, एवं ग्रन्थस्यास्य प्रतिकृति-संशोधने श्रीमद्भिः सम्पादकैः सहकृतवद्भ्यः विद्वद्भ्यः श्री कुर्डि सुशीलेन्द्राचार्येभ्यः, विद्वद्भ्यः श्री कडप राघवेन्द्राचार्येभ्यः, विद्वद्भ्यः श्री पुराणिक सुब्रह्मण्याचार्येभ्यः, विद्वद्भ्यः श्री एन् राघवेन्द्राचार्येभ्यः, विद्वद्भ्यः श्री वरखेडकर भीमसेनाचार्येभ्यः, विद्वद्भ्यः श्री गंगूरु हनुमेशाचार्येभ्यः, विद्वद्भ्यः श्री के. वेङ्कटेशाचार्येभ्यः, विद्वद्भ्यः श्री ओडेयर् कनकाचलाचार्येभ्यः, विद्वद्भ्यः श्री पु. वंशी कृष्णाचार्येभ्यः, विद्वद्भ्यः श्री उंडारु पांडुरंग श्रीनिवासमूर्ती आचार्येभ्यः, एवं विशेषतः अल्पीयस्येव काले महता परिश्रमेण सश्रद्धं ग्रन्थानां प्रतिकृतिसंशोधने श्रीमद्भिः सम्पादकैः सहकृतवद्भ्यः तथा सर्वाङ्गसौन्दर्येण मुद्राप्य दत्तवद्भ्यः 'सुधा मुद्रण'नेतृभ्यः विद्वद्भ्यः श्री वरखेडकर धनंजयाचार्येभ्यः, तथा ग्रन्थस्यास्य अध्ययनाध्यापनादिकर्तृभ्यः सर्वेभ्यः श्रीभगवान् सीताजानिः श्रीमूल-रघुपतिवेदव्यासः आयुरारोग्यैश्वर्यादीनि चानुगृह्य संरक्षत्विति अनन्यया भक्त्या सम्प्रार्थयामहे।

अत्र मुद्रापितासु टिप्पणीषु काश्चन टिप्पण्यः प्राचीनहस्तप्रतिरूपेण शिथिलाः मध्ये मध्ये त्रुटिताः कदाचिदसमग्रा अपि तेनैव रूपेण पण्डितैः संशोध्य मुद्रापिताः। अत्र प्रकाशितभागे यदि कुत्रचित् स्खलितानि प्राज्ञैर्विद्वद्भिः विलोकितानि चेत् ते अस्मान्प्रति संसूचयेयुः। तेन वयं शुद्धिपत्रिकायाम् अग्रिमसम्पुटेषु वा तत्सर्वं समीकृत्य विदुषां पुरः उपस्थापयितुं शक्ष्यामः। येषां समीपे अस्माभिरमुद्रितटिप्पण्यः उपलभ्यन्ते ते कृपया तान् ग्रन्थान् अस्मभ्यं प्रेषयन्ति चेत् तत्सर्वमागामिसम्पुटेषु वयं सम्यक् संशोध्य मुद्रापयितुं महता सन्तोषेण स्वीकुर्मः।

इत्थम्।

भवदीयम्

श्रीगुरुसार्वभौमसंस्कृतविद्यापीठम्,
श्रीराघवेन्द्रस्वामिमठः, मन्त्रालयः

* * *

॥ श्रीमन्मूलरामो विजयते ॥

प्रस्तावना

यत्पदं वेदसंवेद्यं कटाक्षेणापि वीक्षितुम् ।
न क्षमन्ते विमतयः तमुपासे श्रियःपतिम् ॥

भूर्भुवस्स्वरादिचतुर्दशभुवनात्मकसङ्घातिगब्रह्माण्डकोटीः रोमकूपे सन्निवेश्य सकललोकजनन्या श्रिया सह सर्पतल्पे शयानेन भगवता सृष्टेषु भूलोकखण्डेष्वन्यतमेऽस्मिन् भरतखण्डे जनिमतामस्माकं महद्भागधेयमिदं यदत्र भगवान् तत्तद्युगेष्ववतीर्य बलकार्यं ज्ञानकार्यं च सम्पाद्य स्वभक्तानन्वग्रहीत् । तत्रापीदमतिशयितं वक्तव्येष्वाद्यं वचनं यदत्र तद्भक्ताग्रणीः पावनः पवमानः अनेकधाऽवतीर्य तत्रापि तृतीयेऽवतारे श्रीमध्वनाम्नाऽत्र प्रकटीभूय सज्जनानुददीधरत् । तदीयभक्तानुग्रहकार्येषु आचन्द्रार्कं दीप्यमानानि बहूनि कार्याणि यद्यपि वक्तव्यानि सन्ति तथाऽपि समस्तशास्त्रार्थसारभूतानां श्रीबादरायणसंज्ञकेन श्रीवेदव्यासमहर्षिणा निर्मितानां ब्रह्मसूत्राणां भाष्य-अणुभाष्य-अनुभाष्य-न्यायविवरण-ग्रन्थानां निर्माणमतितरां सर्वैरपि अध्यात्मविद्यारसिकैः विचारविमर्शकैः प्रशंसनीयं सर्वदा स्मरणीयं कार्यमिति निश्चप्रचं दृढतरं वयं वक्तुं शक्नुमः ।

तत्र च सूत्रसंबन्धिग्रन्थचतुष्टये ब्रह्मसूत्र-अनुव्याख्यान-ग्रन्थराजः नभसि नक्षत्रपुञ्जमध्ये चन्द्रमा इव चकास्ति । तस्यास्य ग्रन्थराजस्य इन्द्रावतारभूतैः प्रातःस्मरणीयैः परमपूज्यश्रीजयतीर्थमस्करिवरैः रचितम् अनुव्याख्यानव्याख्यानं न्यायसुधानामकं नैकाभिष्टिप्पणीभिः समलंकृतं श्रीराघवेन्द्रतीर्थगुरुवर्याणां प्रेरणया अनुग्रहेण च इदानीं सम्प्रकाश्य हरिगुरुभक्तानां करकमलयोः समर्पयितुं मोमुद्यते अस्माकं चेतः ।

उपनिषत्प्रस्थान-गीताप्रस्थान-सूत्रप्रस्थाननामकप्रस्थानत्रये सूत्रप्रस्थानमेव अन्तिमं निर्णायकं समस्तैः शिरसा धारणीयं च भवति । किं बहुना समस्तेषु वेदेषु समस्तेषु पुराणेष्वन्यत्राप्यभ्यर्हणीयवैदिकवाङ्मयेषु च उक्तानामर्थानां निर्णयाय सूत्राण्येव अस्माकमवलम्बभूतानि महार्णवे तरतामाधारभूतनौकास्थानीयानि । तेषां सूत्राणां व्याख्यानभूतानुव्याख्यानस्य व्याख्यानरूपा इयं सुधा देवलोकीयसुधातोऽप्यभ्यर्हिततमा जन्ममृत्यु-जरादिकं सर्वमपहृत्य स्वरूपानन्दाविर्भावरूपं मोक्षं दापयितुं समर्था । अस्य ग्रन्थस्य प्रशंसा कथं कार्या, कियती कार्या इत्यादिविषयाः आलोच्यमानाः अस्माकं जिह्वां पुरःसर्तुमेव न मुञ्चन्ति । यतो हि ग्रन्थकाराः श्रीमज्जयतीर्थश्रीमच्चरणाः पूर्वाश्रमे नाममात्रेण गृहस्थाश्रमप्रवेशं लब्ध्वा केनापि अनालोचनीयेन केवलं भगवता क्लृप्तेन घटनाविशेषेण संसारमिमं तुच्छीकृत्य स्वीये तरुणे वयसि संन्यासाश्रमं प्रविश्य स्वगुरूणां विद्यारण्यारण्यच्छेदकानां श्रीमदक्षोभ्यतीर्थगुरुवर्याणां सविधे शुकवत् शिक्षिता भूत्वा स्वीयया अलौकिकप्रज्ञया आचार्याणां अनेकग्रन्थानां टीकाः विरचय्य प्रायः अन्ते इमां न्यायसुधां भक्तेभ्यः नाकीन्द्रः सुधां इव प्रादुः । अस्य ग्रन्थस्य माहात्म्यं शेषोऽपि वर्णयितुं नालम् । बाल्यादारभ्य यौवनपर्यन्तं प्रायः संस्कृतभाषायाः वेदादिशास्त्राणां च परिचयहीना अपि केवलं

गुर्वनुग्रहेण शास्त्राण्यभ्यस्य अनन्तरं किञ्चित्समयपर्यन्तं सरस्वतीं संसेव्य तदनुग्रहेण घण्टां (लेखनीं) पूगं च लब्ध्वा लेखनकार्यं प्रारभन्त जयतीर्थश्रीमच्चरणाः। तत्रापि गुहाया अन्तरुपविश्य पञ्चषशिष्यान् पाठयन्तः स्वयमेव वाणीकृपया लब्धया लेखन्या आचार्याणां ग्रन्थान् व्याख्यान्तः, अनन्तरं तदुपरि पूगेन सम्मार्जनमात्रेण तत्सर्वं त्रुटिलेशरहितं भगवत्कृपया आविर्भावयन्तः ते लोके टीकाचार्याः इत्येव निरुपपदगौरवनाम्ना प्रथिताः बभूवुः।

महानुभावाः जयतीर्थश्रीमच्चरणाः मठीयवैभवादीन् हित्वा शिष्यैः भिक्षया आनीतेन यावनालान्नेन (भक्करि) जीवनं निरवहन्।

महानुभावाः जयतीर्थश्रीमच्चरणाः गुरुभक्तिविषये अन्यादृशम् आदर्शम् अस्माकं पुरतः उपस्थापयामासुः। तद्यथा—

न शब्दाब्धौ गाढा न च निगमचर्चासु चतुरा
न च न्याये प्रौढा न च विदितवेद्या अपि वयम्।
परं श्रीमत्पूर्णप्रमतिगुरुकारुण्यसरणिं
प्रपन्ना मान्याः स्मः किमपि च वदन्तोऽपि महताम्॥

अनेन श्लोकेन प्रदर्शितः विनयः अनन्यसाधारणः लोकातिशायी सहृदयान् जिज्ञासून् रोमाञ्चयति। एतदपेक्षया अधिकः गुरुप्रवणः गुरोः दासानुदासः लोके यत्र कुत्रापि नोपलभ्येत इत्येवं सर्वैः सर्वथा अनुभूयते एव।

अल्पीयसा अनेहसा स्वकीयप्रखरबुद्धिवैभवेन निर्मितस्य अस्य सुधाग्रन्थस्य वैशिष्ट्यं वर्णयितुं सहस्रवदनः शेषोऽपि नालम्, किमुत अल्पप्रज्ञाः तृणकल्पाः वयम्। एतदीयग्रन्थस्य माहात्म्यं संवर्णयन् कविरेकः एवमुद्गिरति स्म। यथा—

आमूलाग्रनिबद्धतर्कजटिलं शब्दैकजीवातुकं
मीमांसानुनयं च शङ्करवचो हुङ्कारभङ्गप्रदम्।
शास्त्रं तन्त्रचतुष्टयात्मकमिदं निस्स्वप्रतन्त्रान्तराः
व्याख्यास्यन्ति पठन्ति वा कथमहो किं वा कलौ दुर्घटम्॥

'अध्यात्मविद्या विद्यानाम्' इति श्रीकृष्णोक्त्यनुसारेण अद्वितीयाध्यात्मविद्याख्य-सूत्रव्याख्यानरूपा इयं न्यायसुधा नैकाभिष्टिप्पणीभिः सह संयोज्य, संशोध्य, संमुद्रय अत्र प्रकाशं नीयते। महदिदं साहसकार्यं महापुरुषोत्तमस्य श्रीहरेः अविच्छिन्नभक्ताग्रेसर-श्रीमन्मुख्यप्राणावताराणां श्रीमदानन्दतीर्थभगवत्पादानां परमानुग्रहेणैव सम्पन्नः प्रह्लादावतारभूतानां श्रीमद्राघवेन्द्रतीर्थगुरुसार्वभौमानाम् आराधनसमये तत्करकमलाभ्यामेव श्रीमन्मूलरामचन्द्रदेवस्य पादकमलयोः तद्भक्तवृन्देन सप्रश्रयं सभक्ति समर्प्यतेतमाम्। श्रीकृष्णार्पणमस्तु॥

आचार्याः साणूरु भीमभट्टाः
प्रधानसम्पादकाः

॥ श्रीमद्धनुमद्भीममध्वान्तर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवाय नमः ॥

श्रीमज्जयतीर्थयतिकृता

श्रीमन्न्यायसुधा

सम्पुटम् – १५

वैशेषिकाधिकरणम्

विषयानुक्रमणिका

विषयः	परिच्छेदः	पुटसंख्या
वैशेषिकाधिकरणम् (गतसम्पुटात् अग्रे)		
१)-आ-१-ख-१-		
ज) उक्तार्थस्य परामर्शपूर्वकं सौत्रानुमानस्य युक्तत्वे (उपसंहार) समन्वयः	३४ – ३५	७००१-७००२
१) उक्तार्थे वैजात्यमङ्गीकृत्यापि कार्यकारणभावस्य शक्योपपादनत्वेऽपि सजातीयतोपपादनेनोक्तार्थसाधने कारणप्रदर्शनम्	३५	७००१-७००२
झ) उक्तार्थे आक्षेपसमाधानम्	३६ – ८६	७००२-७१४२
१) परमाणोरुत्कृष्टापकृष्टपरिमाणाश्रयत्वे आक्षेपसमाधाने	३६ – ८६	७००२-७१४२
ट) आक्षेपः	३६	७००२-७००५
ठ) समाधानम् (विश्रान्तिशब्दार्थविकल्पद्वयमपि सदोषम्)	३७ – ८६	७००५-७१४२
१) प्रथमविकल्पितार्थे अङ्गीक्रियमाणे दोषत्रयम्	३८ – ४३, ६६	७००७-७०१६
त) प्रथमदोषः- दृष्टान्तस्य साध्यविकलता	३८ – ३९	७००७-७००८
१) तत्र कारणम् (परिमाणोत्कर्षतरतमभावानन्त्यदर्शनम्)	३९	७००८
थ) द्वितीयदोषः- अनुमानस्य कालात्ययापदिष्टता (परिमाणापकर्षतारतम्यानन्त्यस्यापि दर्शनम्)	४०, ६६	७००८-७१४२

विषयः	परिच्छेदः	पुटसंख्या
द) प्रथमदोषोक्तस्य 'दृष्टान्ते साध्यवैकल्य'स्य विशदनम्	४१ – ४२	७००९-७०१५
१) उक्तविशदनस्य प्रयोजनम्	४२	७०१४-७०१५
ध) तृतीयदोषः- सत्प्रतिपक्षता	४३	७०१६-७०१८
२) द्वितीयविकल्पितार्थेऽपि दोषदर्शनम्	४४ – ४६	७०१७-७०२६
त) द्वितीयविकल्पितार्थाभिप्रायः	४४	७०१७-७०१८
थ) तद्दूषणम् – अपसिद्धान्तता	४५ – ४६	७०१८-७०२६
१) तद्दूषणनिरासार्थं कल्पितानामनेकयोजनानां निराकरणम्	४६	७०१९-७०२६
३) प्रथमविकल्पितार्थे दोषत्वेनोक्तसाध्यवैकल्यस्य कारणे उक्तानां विषयाणां सूत्रकारीयसिद्धान्तत्वदर्शनम्	४७ – ८६	७०२७-७१४२
त) तदर्थं तद्विषये प्रमाणप्रदर्शनम्	४७ – ८६	७०२७-७१४२
१) तत्रादौ ईश्वरादन्यत्र कालाकाशविषयकपरिमाणोत्कर्षाप-कर्षोभयतारतम्यानन्तत्वे प्रमाणप्रदर्शनम्	४७-५५, ६९-८६	७०२७-७०५३ ७०९०-७१४२
प) परिमाणोत्कर्षतारतम्यानन्तत्वे कालाकाशेश्वरादिषु मध्ये कालाकाशयोस्तावत्परिमाणोत्कर्ष-तारतम्यानन्तत्वस्य साक्षिसिद्धत्वम्	४७	७०२७-७०२८
फ) परिमाणापकर्षतारतम्यानन्तत्वे चापि कालाकाशे-श्वरादिषु मध्ये कालाकाशयोस्तावत्परिमाणापकर्ष-तारतम्यानन्तत्वस्य साक्षिसिद्धत्वम्	४८	७०२८-७०३०
ब) परिमाणोत्कर्षापकर्षोभयतारतम्यानन्तत्वे कालाकाशयो-स्तावत् तत्साक्षिसिद्धत्वस्य समर्थनम्	४९-५५, ६९-८६	७०३१-७०५३ ७०९०-७१४२
१)-आ-१-ख-१-झ-१-ठ-३-त-१-ब		
१) तत्साक्षिसिद्धत्वमनिच्छतामभिप्रायस्य विकल्पत्रयम् तन्निरासश्च	४९-५५, ६९-८६	७०३१-७०५३ ७०९०-७१४२

विषयः	परिच्छेदः	पुटसंख्या
य) तत्रादौ प्रथमविकल्पद्वयनिरासः	४९-५५	७०३१-७०५३
१) आद्यविकल्पनिरासः (कालाकाशगतपरिमाणोत्कर्षापकर्षयोः आनन्त्यस्य साक्ष्यनवगतत्वनिरासः)	४९ – ५१	७०३१-७०३९
श) 'साक्षिणा नावगम्यते' इत्याद्ये विकल्पे आपत्तिः	४९	७०३१-७०३३
ष) अनुमानगम्यत्वरूपद्वितीये विकल्पे आपत्तिः	५०	७०३३-७०३५
स) आगमगम्यत्वरूपे तृतीये विकल्पे आपत्तिः	५१	७०३५-७०३९
२) द्वितीयविकल्पनिरासः (साक्षिणाऽवगतस्य कालाकाशगत-परिमाणोत्कर्षापकर्षयोरानन्त्यस्य असत्यतानिरासः)	५२ – ५५	७०३९-७०५३
श) 'साक्षिणा अवगतेऽपि न तत्सत्यता' इति द्वितीयविकल्पविवरणपूर्वकं तस्य निरासः	५२ – ५५	७०३९-७०५३
१) तदुपलम्भकबलवत्प्रमाणाभावः	५२ – ५५	७०३९-७०५३
ह)परिमाणापकर्षस्यानन्त्याभ्युपगमे बाधकरूप-प्रमाणसद्भावशङ्कानिरासः	५३ – ५५	७०४१-७०५३
१) महत्त्वाणुत्वदृष्टान्तेन अनन्तत्वस्य अनल्पतार्थतायां बाधकशङ्का	५३	७०४१-७०४९
२) सङ्ख्यादृष्टान्तेनापि अनन्तत्वस्य अनल्पतार्थतायां बाधकशङ्का	५४	७०४९-७०५०
३) उक्तसङ्ख्यादृष्टान्ते अनुपपत्तिसद्भावात् तच्छङ्कानिरासः	५५	७०५०-७०५३
१)-आ-१-ख-१-झ-१-ठ-३-त		
२) ईश्वरविषयकपरिमाणोत्कर्षापकर्षतारतम्यानन्तत्वे आगमप्रमाणप्रदर्शनम्	५६ – ६०	७०५४-७०६५
प) प्रथमश्रुत्युदाहरणम्	५६	७०५४-७०५७
फ) द्वितीयश्रुत्युदाहरणम्	५७	७०५७-७०५९
ब) श्रौतानंतशब्दस्य देशकालार्हवस्तुतोऽनेकार्थत्वे अनुपपत्तिशङ्कायाः निरसनम्	५८	७०५९-७०६०

विषयः	परिच्छेदः	पुटसंख्या
भ) कालतो गुणतश्च आनन्त्यवाचकस्यानन्तशब्दस्य अर्थस्पष्टीकरणम्	५९	७०६०-७०६४
म) 'नैव गुणाल्पत्वं' इत्यादेः अभिसन्ध्युद्घाटनम्, कारणसहितम्	६०	७०६४-७०६५
३) 'तदर्थस्य (ईश्वरादेरनवधिकोत्कृष्टापकृष्टपरिमाणसमर्थनस्य) सूत्रकाराभिप्रेतत्व'दर्शनम्	६१	७०६५-७०६९
४) तदर्थविपर्यये बाधकप्रदर्शनम्	६२ – ६४	७०६९-७०८३
१) कालाकाशेश्वराणां अनवधिकपरिमाणोत्कर्षापकर्षाभावे बाधकप्रदर्शनम्	६२ – ६४	७०६९-७०८३
प) कालादेरल्पाल्पतरदेशसंस्थानाभावे सर्वगतत्वाभावरूपानिष्टापत्तिः	६२	७०६९-७०७१
फ) कालादेरल्पाल्पतरदेशसंस्थानाभावे सत्ताया अप्यभावाच्छून्यत्वापत्तिः	६३	७०७१-७०७५
ब) उक्तसर्वगतत्वाभावरूपानिष्टापत्तेः इष्टापत्तिताशङ्का तन्निरसनञ्च	६४	७०७६-७०८३
५) कालादौ परिमाणोत्कर्षापकर्षयोरानन्त्यमुपपाद्योपसंहारः	६५	७०८३-७०८४
१)-आ-१-ख-१-झ-१-ठ		
४) विश्रान्तिशब्दार्थप्रथमविकल्पितार्थोक्तानुमानदूषणस्योपसंहारः	६६	७०८४-७०८५
१)-आ-१-ख-१-झ-१-ठ-३-त		
६) परिमाणोत्कर्षापकर्षयोरानन्त्यस्य कालाकाशेश्वरादिवत् प्रकृत्यादौ सर्वगते परममहति द्रव्यान्तरेऽप्यस्तित्वम्	६७	७०८५
७) ईश्वरगतानन्त्यस्य कालादिगतानन्त्याद्वैलक्षण्यम्, त्रिविधम्	६८	७०८६-७०९०
१)-आ-१-ख-१-झ-१-ठ-३-त-१-ब-१		
र) तृतीयविकल्पनिरासः (कालाकाशगतपरिमाणोत्कर्षापकर्षतारतम्यानन्त्यसाक्षिसिद्धत्वमनिच्छतामभिप्रायगत-तृतीयविकल्पस्य 'साक्षी नाम प्रमाणमेव नास्ती'त्यस्य निरसनम्)	६९ – ८६	७०९०-७१४२
१) तत्र बाधकसाधककथनम्	६९	७०९०-७०९३
श) साक्ष्यनङ्गीकारे बाधकम् – अक्षजादिज्ञानप्रामाण्यस्य, कालाकाशादेः अन्तःसुखादिकस्य च गमकाभावानुपपत्तिः	६९	७०९०-७०९३
ष) साक्ष्यङ्गीकारे साधकम् – तस्य साक्षिणः स्वयंभातत्वम्	६९	७०९०-७०९३

विषयः	परिच्छेदः	पुटसंख्या
२) साक्ष्यनङ्गीकारपक्षोक्तबाधकोद्धारप्रयत्ने अनवस्थाप्रसङ्गः	७०	७०९४-७०९५
३) साक्षिप्रामाण्यसमर्थनस्य प्रकृतोपयोगसमन्वयप्रदर्शनम्	७१ – ८६	७०९५-७१४२
श) अनुव्याख्यानगत'सर्वपदार्थानां'इतिपदस्य वैकल्पिकार्थतया परमाणोः सभागत्वसाधने अनुमानसूचनम्	७२	७०९५-७०९८
ष) अनुव्याख्यानगत'सर्वदा'इत्यादिपदानामपि वैकल्पिकार्थतया परमाणोः सभागत्वसाधने अनुमानान्तरकथनम्	७३ – ७८	७०९९-७११३
१) तत्रादौ तदनुमानान्तरगतहेतुविशेषणार्थाभिधानम्	७३	७०९९
२) ततश्च तदनुमानान्तरगतहेतुविशेषणवैयर्थ्यशङ्कानिवारणम्	७४ – ७८	७१००-७११३
ह) अनुव्याख्यानगतस्य संयोगार्थकसम्बन्धपदस्य द्रव्यत्वेनैव चरितार्थत्वशङ्का, तन्निरसनञ्च	७५ – ७८	७१०१-७११३
१) अनुव्याख्यानगतस्य संयोगार्थकसम्बन्धपदस्य विपक्षे बाधकसूचनार्थत्वम्	७५ – ७८	७१०१-७११३
क्ष) तद्बाधकतर्कः तत्रेष्टापत्तिनिराकरणं च	७६	७१०३
ज्ञ) तत्तर्कस्य अप्रयोजकत्वनिराकरणं च	७७ – ७८	७१११-७११३
१) संयोगस्य प्रदेशवृत्तित्वे अर्थान्तरं कल्पयित्वा अप्रयोजकत्वशङ्कायाः पुनरुत्थानं तन्निरासश्च	७८	७११२-७११३
स) अनुव्याख्यानगतपदानां वैकल्पिकार्थतया 'परमाणोः सभागत्वसाधका'-नुमानसूचकव्याख्याने व्याघातशङ्का तन्निरसनञ्च	७९-८६	७११४-७१४२
१) तच्छङ्काप्रदर्शनपूर्वकं स्थूलतया तन्निरसनञ्च	७९	७११४
२) तच्छङ्कानिरसनस्य समर्थनम्	८०-८६	७११५-७१४२
ह) परमाणुपदनिर्वचनम् – इतरनिर्वचननिषेधपूर्वकम्	८०	७११५-७१२१
ळ) उक्तपरमाणुपदनिर्वचनेन अवयवपरंपराविश्रान्त्यभावेऽनवस्थेति-शङ्कान्तरस्यापि निरासः	८१	७१२१-७१२४
हह) प्रकारान्तरेण परमाणुपदनिर्वचनम् (परोक्तपरमाणुपदनिर्वचन-मङ्गीकृत्य तत्र व्याहत्यभावपरतया व्याख्यानम्)	८२	७१२४-७१३१

विषयः	परिच्छेदः	पुटसंख्या
हळ)अवयवपरम्पराविश्रान्त्यभावे तर्कपराहतिशङ्का तन्निरसनञ्च	८३-८६	७१३१-७१४२
१) तर्कपराहतिशङ्का	८३	७१३१-७१३३
२) तच्छङ्कानिरसनम्	८४-८६	७१३३-७१४२
क्ष) तच्छङ्कायाः द्वैविध्यं कल्पयित्वा तदुभयोरपि विधयोः खण्डनम्	८४	७१३३-७१३७
ज्ञ) तच्छङ्काप्रथमविकल्पितापादनस्य अर्थान्तरेण पुनः 'सर्षपस्य विश्वव्यापित्व'शङ्का तन्निरसनं च	८५	७१३८-७१३९
क्षक्ष)पुनस्तत्रैव प्रकारान्तरेण सर्षपमहीधरयोः परिमाणभेदाभावशङ्का तत्समाधानं च	८६	७१४०-७१४२

१)-आ-१-ख

२) द्व्यणुकादिद्रव्यासमवायिकारणविषये अन्यथाप्रतिपत्तिरूपद्वितीयशङ्कानिराकरणम्	८७ – ११०	७१४३-७१९९
च) तदुक्तसजातीयद्वयसंयोगनियमाभावेऽपि विजातीय-परमाण्वाद्यवयवसंयोगादपि कार्योत्पत्तिप्रदर्शनम्	८७	७१४३-७१४५
छ) तदुक्तनियमे प्रमाणाभावः	८८	७१४५-७१४७
ज) प्रमाणाभावे असिद्धिशङ्का तन्निरसनं च	८९	७१४७-७१५३
झ) अनियमपक्षे बाधकशङ्कानिरासः	९० – ९१	७१५३-७१५७
ञ) सर्वेषामपि पदार्थानां तारतम्येन महत्त्वाणुत्वाभ्यां सहितत्वात् द्वयोरेवेति नियमासिद्धिः	९२	७१५८-७१६१
चच)अनियमसृष्टौ प्रत्यक्षादिप्रमाणसत्त्वम्	९३ – ९४	७१६१-७१६४
१) अनियमसृष्टिविषयकप्रमाणानां भ्रान्तित्वनिरासः	९४	७१६३-७१६४
ट) तन्नियमग्राहकप्रमाणाभावात्तत्प्रमाणविरोधाभावः	९४	७१६३-७१६४
ठ) वैशेषिकादीनां केवलकल्पनया च विरोधाभावः	९४	७१६३-७१६४
चछ)तैः कल्पितानां सृष्टीतरविषयाणामप्यप्रामाणिकत्वम्	९५ – ९९	७१६५-७१७९
१) तत्र विषयत्रयस्य अप्रामाणिकत्वम्	९५	७१६५-७१६६

विषयः	परिच्छेदः	पुटसंख्या
२) सृष्टेः समवाय्यादिकारणत्रयाधीनत्वस्य अप्रामाणिकत्वम्	९६ – ९७	७१६७-७१७७
३) उक्तार्थसमर्थनम्	९८	७१७७
४) पाकजप्रक्रियायाश्च अप्रामाणिकत्वम्	९९	७१७७-७१७९
चज)अनियमसृष्टेः साक्षिमितत्वसमर्थनम् (तत्र शङ्का तत्समाधानं च)	१०० – ११०	७१७९-७१९९
१) परमाण्वादेः साक्षिमितत्वाभावे अप्रामाणिकत्वापत्तिः	१००	७१७९-७१८०
२) परमाण्वादौ अनुमानप्रामाण्याभावः	१०१ – ११०	७१८०-७१९९
ट) कस्यापि पक्षीकर्तुमशक्यता	१०१ – ११०	७१८०-७१९९
१) परमाण्वादेः पक्षीकर्तुमशक्यता	१०२ – १०३	७१८२-७१८४
त) पक्षीकृतपरमाणोः सिद्धासिद्धत्वविकल्पेन हेतोरप्रयोजकत्वशङ्का तन्निरासश्च	१०३ – १०४	७१८३-७१८५
२) परमाण्वितरस्यापि पक्षीकर्तुमशक्यता	१०५ – ११०	७१८६-७१९९
त) द्व्यणुकस्य असिद्धत्वात् पक्षीकर्तुमशक्यता	१०५	७१८६
थ) अनुमितद्व्यणुकस्यापि पक्षीकर्तुमशक्यता	१०६ – ११०	७१८६-७१९९
१) द्व्यणुकसाधकानुमानेऽपि कस्यापि पक्षीकर्तुमशक्यता	१०६ – ११०	७१८६-७१९९
प) द्व्यणुकसाधकानुमानेऽपि परमाणोः पक्षीकर्तुमशक्यता	१०७ – १०८	७१८७-७१८८
१) 'अनुमानेन परमाणुसिद्धि'शङ्का तन्निरसनं च	१०८	७१८७-७१८८
फ) द्व्यणुकसाधकानुमानेऽपि त्र्यणुकस्य पक्षीकर्तुमशक्यता	१०९ – ११०	७१८९-७१९९
१) उक्तार्थसमर्थनम्	११०	७१९२-७१९९

१)-आ-१-ख

३) पूर्वोक्तस्य(४२)आकाशादिपरिमाणोत्कर्षानन्त्यानुमानिकत्वायुक्तत्वस्य प्रपञ्चनम्	१११ – ११२	७२००-७२०५

विषयः	परिच्छेदः	पुटसंख्या
च) देशान्तरादिसाधकानुमानानां शशशृङ्गादिसाधकानुमानतुल्यता	१११ – ११२	७२००-७२०५
१) उक्तदोषपरिहारप्रयत्ने सिद्धसाधनत्वादिदोषदर्शनम्	११२	७२००-७२०५
४) आगममनादृत्येश्वरधर्मानुमानस्यापि शशशृङ्गाद्यनुमानप्रतिबन्दीग्रस्तत्वादयुक्तता	११३	७२०६-७२१३
च) उक्तप्रतिबन्दीग्रहणस्य समर्थनम्	११४ – ११९	७२१३-७२२७
१) शशशृङ्गाद्यनुमानतुल्ययोगक्षेमत्वाभावशङ्का तन्निरसनं च	११४ – ११५	७२१३-७२१७
ट) व्याप्त्याद्यभावे प्रतिबन्दीग्रहणस्य प्रयोजनम्	११५	७२१६-७२१७
२) व्याप्तिज्ञानस्य सहदर्शनमात्रद्वारकत्वाभावः	११६	७२१७-७२१८
३) व्याप्त्यध्यवसायमार्गप्रदर्शनम्	११७ – ११८	७२१८-७२२४
ट) उक्तार्थस्पष्टीकरणम्	११८	७२१९-७२२४
४) महदारम्भकत्वादीनामपि तादृशव्याप्तिमत्वशङ्का तन्निरासश्च	११९	७२२४-७२२७
५) परमाण्वादेः साक्षिवेद्यत्वेन प्रथमसूत्रार्थोपसंहारः	१२०	७२२८-
<u>१)-आ</u>		
२) उपन्यस्तवैशेषिकमतस्योपपत्तिविरुद्धतयाऽपाकरणे तत एतदधिकरणस्य तृतीयसूत्र(ॐ समवायाभ्युपगमाच्च साम्यानवस्थितेः ॐ)व्याख्यानम्	१२१ – ३१९	७२२८-
क) द्वितीयसूत्रव्याख्यानाभावे कारणम्	१२१	७२२८-७२३२
ख) तृतीयसूत्रगतशब्दार्थनिरूपणम्	१२१ – ३१९	७२२८-
१) एतत्सूत्रघटकस्य 'समवायाभ्युपगमाच्च' इति शब्दस्य व्याख्यानम्	१२१ – १२२	७२२८-७२३४
२) तन्मतोक्तसमवायसम्बन्धस्य असिद्धता	१२३ – २९५	७२३४-
च) द्रव्याद्गुणादीनामत्यन्तभेदेऽपि तत्सम्बन्धस्य अपरसमवायत्वरूपत्वाभावः	१२३ – १२६	७२३४-७२५४
१) एतत्सूत्रगत 'साम्यात्' इति शब्दस्य व्याख्यानम्	१२३ – १२४	७२३४-७२३९

विषयः	परिच्छेदः	पुटसंख्या
२) एतत्सूत्रगत 'अनवस्थितेः' इति शब्दस्य व्याख्यानम्	१२५ – १२६	७२४०-७२५४
छ) गुणादीनां द्रव्यात् अत्यन्तभेदाभावाच्च न समवायसिद्धिः	१२७	७२५५-७२५८
ज) तद्धर्माणामपि अत्यन्तभेदाभावाच्च न समवायसिद्धिः	१२८	७२५९-७२६२
झ) उक्तार्थतात्पर्यम्	१२९ – १३१	७२६२-७२६६
१) उपोद्घातत्वेन तात्पर्यम्	१२९ – १३०	७२६२-७२६५
२) प्रकारान्तरेण च तात्पर्यम्	१३१	७२६५-७२६६
ञ) उपसंहारः	१३२	७२६६-७२६८
चच)उक्तार्थसमर्थनम्	१३३ – २९५	७२६८-
१) उक्तार्थस्य व्याहतताशङ्का तन्निरसनं च	१३३	७२६८-७२७०
२) उक्तार्थे अनवस्थाशङ्का तन्निरसनं च	१३४	७२७०-७२७१

१)-आ-२-ख-२-चच-

३) भेदपरित्यागेनाभेदस्यैव स्वीकाराय भेदाभेदपक्षयोः साम्यशङ्कानिरासश्च	१३५ – २९५	७२७१-
ट) अवयवावयव्यादीनामभेदस्य निरूपणम्	१३५ – १७९	७२७१-७३६८
	२०२ – २९५	७४२८-
१) भेदपक्षे कल्पनागौरवस्य अभेदपक्षे च तल्लाघवस्य साधनम्	१३६ – १३७	७२७४-७२७९
त) उक्तार्थाभिसन्धिः	१३७	७२७५-७२७९
२) भेदपक्षमपहायाभेदपक्षपाते न केवलं कल्पनागौरवं कारणम् अपि तु समवाये प्रमाणाभावोऽपि तत्र कारणम्	१३८-१५१-२९५	७२८०-७३०६
त) समवायनिराकरणम्	१३८ – २९५	७२८०-
१) समवायस्य स्वरूपतो निराकरणम्	१३८ – २४७	७२८०-
प) समवाये (प्रत्यक्षानुमान)प्रमाणाभावः	१३८ – १५१	७२८०-७३०६
१) समवाये न प्रत्यक्षं प्रमाणम्	१३९ – १४०	७२८१-७२८७
य) उक्तार्थसमर्थनम्	१३९ – १४०	७२८१-७२८७

विषयः	परिच्छेदः	पुटसंख्या
१) समवायाप्रतीतेः संयोगप्रतीति-साम्याभावः	१३९	७२८१-७२८२
२) समवायप्रत्यक्षत्वस्य अनुमान-साध्यत्वानुपपत्तिः	१४०	७२८२-७२८७
२) समवाये नानुमानमपि प्रमाणम्	१४१ – १५०	७२८७-७३०६
य) इहेदमितिप्रत्ययस्य तत्रानुमानत्वेऽनुपपत्तिः	१४१	७२८७-७२९०
र) लीलावत्युक्तानुमानेऽपि उक्तदूषणातिदेशः (भावमात्रविषयाबाधितविशिष्टव्यवहार-त्वानुमानस्य दूषणम्)	१४२	७२९०-७२९१
ल) एतदाश्रयत्व-एतदाश्रितत्वा-द्यनुमानस्यापि दूषणम्	१४३	७२९१-७२९२
व) भूतलविशेषणत्वानुमानस्यापि दूषणम्	१४४	७२९२-
यय)इहेतिप्रत्ययानुमानस्यापि दूषणम्	१४५	७२९३-७२९६
यर) प्रमेयत्वानुमानस्यापि दूषणम्	१४६	७२९६-७२९७
यल)चक्षुष्त्वानुमानस्यापि दूषणम्	१४७	७२९७-७३०१
यव)जातित्वानुमानस्यापि दूषणम्	१४८	७३०१-७३०२
ययय)द्रव्यत्वानुमानस्यापि दूषणम्	१४९	७३०३-७३०४
ययर)मेयत्वानुमानस्यापि दूषणम्	१५०	७३०४-७३०६
३) समवाये प्रमाणाभावस्योपसंहारः	१५१	७३०६
फ) तथात्वे अभेदपक्षस्यापि 'विशेषे प्रमाणाभाव'शङ्का-मूलकानङ्गीकार्यताशङ्का(पादनं) तन्निरासश्च	१५२	७३०६
ब) अभेदपक्षाङ्गीकारे अवयवावयव्यादिभेदा-प्रामाणिकत्वस्यापि कारणत्वम्	१५३-१७९ -२०२	७३१०-७३६८ -७४२५
१) अनुव्याख्यानोक्तार्थस्पष्टीकरणम् (अभेदस्याप्यप्रामाणिकत्वमिति-शङ्कानिरासः)	१५४-१७९ -२०२	७३१३-७३६८ -७४२५

विषयः	परिच्छेदः	पुटसंख्या
१)-आ-२-ख-२-चच-३-ट-२-त-१-ब-१		
य)अभेदपक्षेऽपि बहुप्रमाणसत्त्वम्	१५५ – १५७	७३१६-७३१८
१) अभेदस्य प्रत्यक्षप्रतीतिविषयत्वे अनुपपत्तिशङ्का तत्परिहारश्च	१५६	७३१९-७३२०
२) विशेषप्रतीत्या सामानाधिकरण्यव्यवहारोपपादनस्य समर्थनम्	१५७	७३२०-७३२२
र) अभेदपक्षीयविशेषस्य प्रत्यक्षार्थापत्तिसिद्धतायाः उपपादनम्	१५८	७३२२-७३२४
ल) अभेदपक्षीयविशेषस्य व्यवहारान्यथानुपपत्तिसिद्धतायाश्चोपपादनम्	१५९ – १७८	७३२५-७३६६
१) वस्तुषु अभिन्नानां तन्निष्ठत्वादिधर्माणां व्यवहारसिद्धत्वप्रपञ्चनम्	१५९ – १६०	७३२५-७३२८
२) व्यवहारसिद्धानां तेषां धर्माणां वस्तुभिन्नत्वशङ्कायाः षट्पदार्थातिरेकापादनेन निराकरणम्	१६१ – १७८	७३२९-७३६६
श) किरणावलीकारमतानुसारेण षट्पदार्थातिरेकासिद्धिशङ्का तन्निरासश्च	१६२ – १७०	७३३०-७३४६
१) तन्निष्ठत्वादिधर्माणां षट्पदार्थेष्वन्तर्भावयितुमशक्यतायाः स्पष्टीकरणम्	१६३ – १७०	७३३१-७३४६
ह) पदार्थषट्कनियमवादिनं प्रति नियमभङ्गापादनम्	१६३ – १७०	७३३१-७३४६
१) आश्रितत्वस्य द्रव्याद्यनन्तर्भावः	१६३	७३३१-७३३४
२) रूपादीनामाश्रयव्यापित्वस्य द्रव्याद्यनन्तर्भावः	१६४ – १६९	७३३४-७३४४
क्ष) समवायपदार्थविकल्पेन तदनन्तर्भावः	१६५	७३३६-७३३८
ज्ञ) संयोगादीनां प्रदेशवृत्तित्वस्य निरासः	१६६	७३३८-७३३९
क्षक्ष) रूपादिगतोद्भूतत्वादिधर्मस्यापि द्रव्याद्यनन्तर्भावः	१६७	७३३९-७३४०
क्षज्ञ) सर्वेषां गुणानां चतुर्विंशतित्वानुपपत्तिः	१६८	७३४०-७३४३
क्षक्षक्ष) उक्तातिदेशेन अनित्यत्वादीनामन्यधर्माणामपि द्रव्याद्यनन्तर्भावः	१६९	७३४३-७३४४
३) पूर्वदोषोपमर्देन एकदेशिमतोत्थापनम्, तन्निरासश्च	१७०	७३४४-७३४६

विषयः	परिच्छेदः	पुटसंख्या
क्ष) धर्मपदार्थस्य अभावेऽन्तर्भवि बाधकानुपन्यासात् तत्रान्तर्भवि षट्पदार्थातिरेकेऽपि नियमभङ्गाभाव इति शङ्का, तन्निरासश्च	१७०	७३४४-७३४६
१)-आ-२-ख-२-चच-३-ट-२-त-१-ब-१-ल-२		
ष)पदार्थषट्कानियमवादिनं नैयायिकं प्रत्यपि धर्मस्य धर्मसन्तानात् अनवस्थाप्रसङ्गेन, भेदनिराकरणस्यार्थवत्त्वम्	१७१ – १७८	७३४७-७३६६
१) पदार्थषट्कानियमवादिनं नैयायिकं प्रत्यपि धर्मस्य धर्मसन्तानात् अनवस्थाप्रसङ्गः, तस्य च प्रकृतसमन्वयः	१७१ – १७२	७३४७-७३५०
इ) उक्तार्थस्पष्टीकरणम्	१७२	७३४८-७३५०
२) धर्मे धर्मानङ्गीकारे उक्तायाः अनवस्थायाः विपक्षे बाधकोपदर्शनमुखेन दूषणत्वम्	१७३ – १७८	७३५०-७३६६
ह) तस्याः अनवस्थायाः दूषणत्वपरा अनुव्याख्यानस्य पदार्थयोजना	१७३ – १७५	७३५०-७३६०
१) उक्तार्थस्पष्टीकरणम्	१७४ – १७५	७३५१-७३६०
क्ष) स्पष्टीकृतोक्तार्थतात्पर्यम्	१७५	७३५७-७३६०
ळ) त'द्विपक्षे बाधकोपदर्शन'स्य अप्रसक्तत्वशङ्का तन्निरसनं च	१७६ – १७८	७३६०-७३६६
१) तस्याः अप्रसक्तत्वशङ्कायाः प्रदर्शनपूर्वकं अविशेष(साम्य)-रूपहेतुबलेन तन्निरासकतया अनुव्याख्यानपदार्थयोजना	१७६	७३६०-७३६१
२) उक्तार्थस्य तात्पर्यम्	१७७ – १७८	७३६१-७३६६
क्ष) तच्छङ्कानिरसने अविशेष(साम्य)रूपहेतूपयोगः	१७७	७३६१-७३६२
ज्ञ) उक्ताविशेष(साम्य)रूपहेतोः असिद्धिशङ्का तन्निरसनं च	१७८	७३६२-७३६६
१)-आ-२-ख-२-चच-३-ट-२-त-१-ब-१		
व) धर्मधर्मिणोर्भेदपक्षपरित्यागेनाभेदपक्षपरिग्रहे निमित्तान्तरम्	१७९	७३६७-७३६८
यय)अपवादकप्रमाणशून्यत्वेन प्रसक्तं यदभेदस्यात्यन्तिकत्वं तदपवादकत्वेन क्वचिद् भेदाभेददर्शनम्	१८० – २०२	७३६८-७४०२

विषयः	परिच्छेदः	पुटसंख्या
१) उक्तार्थस्पष्टीकरणम्	१८१ – २०२	७३७१-७४२५
श) भेदाभेदस्यापि विशेषेणैव वैयर्थ्यशङ्का, तत्समाधानं च	१८२	७३७२-७३७६
ष) 'भेदाभेदयोरेकत्र विरुद्धत्व'शङ्का, विशेषबलाच्च तन्निरासः	१८३ – २०२	७३७६-७४२५
१) विशेषबलाद्विरोधनिरासे विशेषस्य बलिष्ठत्वमेव हेतुः	१८४ – १८६	७३७७-७३८२
ह) 'तथात्वे सर्वत्र विशेषमाश्रित्य विरोधस्योत्सादयितुं शक्यत्वं' इत्यतिप्रसङ्गशङ्का, तन्निरासश्च दृष्टिप्रमाणतः	१८५ – १८६	७३७८-७३८२
१) दृष्टिप्रमाणतायाः विरोधशामकत्वोपपादनम्	१८६	७३८०-७३८२
२) 'धर्मधर्मिणोर्भेदाभेदयोः' व्यवस्थाविवरणम्	१८७ – १८८	७३८३-७३८८
ह) यावद्द्रव्यभाविधर्मैर्भेदाभेदाभावः	१८७	७३८३-७३८५
ळ) अयावद्द्रव्यभाविधर्मैश्च भेदाभेदः	१८८	७३८५-७३८८
३) भेदाभेदयोरनया व्यवस्थया अन्यचोद्यस्यापि परिहारः	१८९ – २०२	७३८८-७४२५
ह)'अंशतः संयोगः' इत्युक्तेरनवस्थामूलकायुक्तताशङ्का, छलत्वेन तन्निरासश्च	१८९ – १९७	७३८८-७४१५
१) उक्तार्थस्पष्टीकरणम्	१९० – १९१	७३९०-७३९३
२) तत्र अवयवावयविगतसंयोगैक्योक्त्या संयोगत्रित्वनिरासः	१९२	७३९३-७३९६
३) तत्र अवयवावयविगतविभागैक्योक्त्या च विभागद्वैविध्यनिरासः	१९३ – १९६	७३९७-७४१०
क्ष) निरसनीयस्य विभागद्वैविध्यस्य निरूपणम्	१९३	७३९७-७३९८
ज्ञ) विभागस्य प्रथमविधायाः अनुपपन्नत्वम्	१९४	७३९८-७४००
क्षक्ष)विभागस्य द्वितीयविधायाः अनुपपन्नतरत्वम्	१९५-१९६	७४००-७४१०
४) संयोगविभागयोरवान्तरभेदनिरासः	१९७	७४१०-७४१५
ळ) 'अंशतः संयोगः' इत्युक्तेरनवस्थामूलकायुक्तताशङ्कायाः प्रकारान्तरेण निरासः	१९८ – २०२	७४१५-७४२५
१) तदनवस्थारूपतर्कस्य विपर्ययापर्यवसायित्वेन तर्काभासत्वम्	१९८ – १९९	७४१५-७४२२

विषयः	परिच्छेदः	पुटसंख्या
क्ष) 'अंशतः संयोगो न भवति' इति विपर्ययस्य अर्थविकल्पः तद्योगश्च	१९९	७४१७-७४२२
१) संयोगस्य पराभिप्रेताव्याप्यवृत्ति-त्वाद्यर्थकत्वनिरासः	१९९	७४१७-७४२२
२) तदनवस्थारूपतर्कस्य प्रतितर्कपराहतत्वम्	२००	७४२२-७४२४
३) 'परमाणोरणौ महत्त्वं ने'त्यस्य व्याहतिः प्रमाणविरोधश्च	२०१-२०२	७४२४-७४२८
क्ष) उक्तस्य प्रमाणविरोधस्य उपपादनम्	२०२	७४२६-७४२८
१)-आ-२-ख-२-चच-३-ट-२-त-१		
भ) अंशांशिनोरत्यन्ताभेदो भेदाभेदौ चेत्यस्य विशदनम्	२०३ – २०४	७४२८-७४३९
१) उक्तार्थस्य विवरणम्	२०३	७४२८-७४३३
२) उक्तार्थे प्रमाणप्रदर्शनं च	२०४	७४३३-७४३९
म)उक्तस्य गुणगुण्याद्यभेदस्य उपपादनम्	२०५ – २४७	७४४०-
१) अवयवावयव्यादीनां परस्परभेदानुपपत्तिशङ्का तन्निरासश्च	२०५ – २४७	७४४०-
य)उक्तार्थसमर्थनम्	२०५ – २४७	७४४०-
१) संयोगादीनामेकैकाश्रितत्वम्	२०६ – २१३	७४४३-७४५९
श) उक्तार्थे प्रमाणम्	२०७ – २१३	७४४५-७४५९
१) अस्मिन्विषये पृथक्त्वस्य संयोगविभागा-त्पार्थक्यशङ्का तन्निरासश्च	२०८ – २१३	७४४६-७४५९
ह) 'अनयोर्भेदः', 'अमीषां भेदः' इत्यादिप्रतीतौ भेदस्य द्विधर्मिकत्वेन उक्तार्थानुपपत्तिशङ्कानिरासः	२०९ – २१३	७४४८-७४५९
१)-आ-२-ख-२-चच-३-ट-२-त-१-म-१-य-१-श-१-ह		
१) द्विधर्मिकभेदपदोक्तैकवचनस्य 'विप्राणां भोजनं' इतिवद्व्यवस्थया अनुपपत्तिनिरासः	२१० – २१३	७४४९-७४५९

विषयः	परिच्छेदः	पुटसंख्या
क्ष) समन्यायेन संयोगादेरप्येकैकाश्रितत्वोक्त्यनुपपत्ति-		
शङ्का तत्समाधानं च	२११ – २१३	७४५४-७४५९
१) संयोगादेरेकैकाश्रितत्वस्य वस्तुस्थित्युक्तितया समाधानम्	२११	७४५४
२) अजसंयोगे वैलक्षण्यम्	२१२ – २१३	७४५५-७४५९
क्षक) परमाणोराकाशादिसंयोगे वैलक्षण्यम्	२१२	७४५५-७४५७
क्षख) आकाशेश्वरसंयोगे च वैलक्षण्यम्	२१३	७४५७-७४५९

(उर्वरितभागः अग्रिमसम्पुटे)

* * *

विषयः	परिच्छेदः	पुटसंख्या
क्ष) 'अंशतः संयोगो न भवति' इति विपर्ययस्य अर्थविकल्पः तद्योगश्च	१९९	७४१७-७४२२
१) संयोगस्य पराभिप्रेताव्याप्यवृत्ति-त्वाद्यर्थकत्वनिरासः	१९९	७४१७-७४२२
२) तदनवस्थारूपतर्कस्य प्रतितर्कपराहतत्वम्	२००	७४२२-७४२४
३) 'परमाणोरणौ महत्त्वं ने'त्यस्य व्याहतिः प्रमाणविरोधश्च	२०१-२०२	७४२४-७४२८
क्ष) उक्तस्य प्रमाणविरोधस्य उपपादनम्	२०२	७४२६-७४२८
१)-आ-२-ख-२-चच-३-ट-२-त-१		
भ) अंशांशिनोरत्यन्ताभेदो भेदाभेदौ चेत्यस्य विशदनम्	२०३ – २०४	७४२८-७४३९
१) उक्तार्थस्य विवरणम्	२०३	७४२८-७४३३
२) उक्तार्थे प्रमाणप्रदर्शनं च	२०४	७४३३-७४३९
म)उक्तस्य गुणगुण्याद्यभेदस्य उपपादनम्	२०५ – २४७	७४४०-
१) अवयवावयव्यादीनां परस्परभेदानुपपत्तिशङ्का तन्निरासश्च	२०५ – २४७	७४४०-
य)उक्तार्थसमर्थनम्	२०५ – २४७	७४४०-
१) संयोगादीनामेकैकाश्रितत्वम्	२०६ – २१३	७४४३-७४५९
श) उक्तार्थे प्रमाणम्	२०७ – २१३	७४४५-७४५९
१) अस्मिन्विषये पृथक्त्वस्य संयोगविभागा-त्पार्थक्यशङ्का तन्निरासश्च	२०८ – २१३	७४४६-७४५९
ह) 'अनयोर्भेदः', 'अमीषां भेदः' इत्यादिप्रतीतौ भेदस्य द्विधर्मिकत्वेन उक्तार्थानुपपत्तिशङ्कानिरासः	२०९ – २१३	७४४८-७४५९
१)-आ-२-ख-२-चच-३-ट-२-त-१-म-१-य-१-श-१-ह		
१) द्विधर्मिकभेदपदोक्तैकवचनस्य 'विप्राणां भोजनं' इतिवद्व्यवस्थया अनुपपत्तिनिरासः	२१० – २१३	७४४९-७४५९

विषयः	परिच्छेदः	पुटसंख्या
क्ष) समन्यायेन संयोगादेरप्येकैकाश्रितत्वोक्त्यनुपपत्ति-		
शङ्का तत्समाधानं च	२११ – २१३	७४५४-७४५९
१) संयोगादेरेकैकाश्रितत्वस्य वस्तुस्थित्युक्तितया समाधानम्	२११	७४५४
२) अजसंयोगे वैलक्षण्यम्	२१२ – २१३	७४५५-७४५९
क्षक)परमाणोराकाशादिसंयोगे वैलक्षण्यम्	२१२	७४५५-७४५७
क्षख)आकाशेश्वरसंयोगे च वैलक्षण्यम्	२१३	७४५७-७४५९

(उर्वरितभागः अग्रिमसम्पुटे)

* * *

॥ श्री वेदव्यास भगवान् ॥

येन प्रादुरभावि भूमिवलये व्यस्तारि गोसन्ततिः
प्राबोधि श्रुतिपङ्कजं करुणया प्राकाशि तत्त्वं परम् ।
ध्वान्तं ध्वंसमनायि साधुनिकरश्चाकारि सन्मार्गग-
स्तेन व्यासदिवाकरेण सततं मा त्याजि मे मानसम् ॥

॥ श्रीमदानन्दतीर्थभगवत्पादाचार्याः ॥

व्याप्तिर्यस्य निजे निजेन महसा पक्षे सपक्षे स्थिति-
व्यावृत्तिश्च विपक्षतोऽथ विषये सक्तिर्न वै बाधिते ।
नैवास्ति प्रतिपक्षयुक्तिरतुलं शुद्धं प्रमाणं स मे
भूयात्तत्त्वविनिर्णयाय भगवानानन्दतीर्थो मुनिः ॥

॥ श्रीपद्मनाभतीर्थाः ॥

रमानिवासोचितवासभूमिस्सन्न्यायरत्नावलिजन्मभूमिः ।
वैराग्यभाग्यो मम पद्मनाभतीर्थामृताब्धिर्भवताद्विभूत्यै ॥

॥ श्रीनरहरितीर्थाः ॥

ससीतामूलरामार्चा कोशे गजपतेः स्थिता ।
येनानीता नमस्तस्मै श्रीमन्बृहरिभिक्षवे ॥

।। श्रीमज्जयतीर्थाः ।।

सत्पद्मबन्धवो यस्य गावो विश्वतमोनुदः ।
स स्यात् तत्त्वप्रकाशाय जयतीर्थरविर्मम ।।

॥ श्रीरघुनन्दनतीर्थाः ॥

परैरपहृता मूलरामार्चा गुर्वनुग्रहात् ।
येनानीता नमस्तस्मै रघुनन्दनभिक्षवे ॥

॥ श्रीविजयीन्द्रतीर्थाः ॥



धर्मः सत्ये च धीमानहिरिव वचसा भूसुराणां सभायां
जेता भीमैव वादे पवन इव गतौ सम्पदि श्रीरिवाढ्यः ।
धाता ज्ञाता च सर्वानहिपतिशयनं पूजयंस्तोषयंश्च
लोकैः सर्वैश्च पूज्यो भुवि मनुजवरैर्मानितोऽभून्मुनीन्द्रः ॥

।। श्रीराघवेन्द्रतीर्थाः ।।

चित्ते चेन्मृदुता शिरीषसदृशे हृय्यङ्गवीनं शिला
गाम्भीर्यं यदि यस्य सोऽन्धुरुदधिः शास्त्रेषु चेत्पाण्डिती ।
आचार्यो विबुधेशितुः कलयते विद्यार्थितामादरात्
औदार्यं यदि कल्पपादपमुखाः सम्भावयन्तेऽर्थिताम् ।।

॥ अथ वैशेषिकाधिकरणम् ॥

(गतसम्पुटात् अनुवर्तते)

॥ अथ उक्तार्थस्य परामर्शपूर्वकं सौत्रानुमानस्य युक्तत्वे (उपसंहार) समन्वयः ॥

३४ सु०— तदेवं परमाणुद्व्यणुकादिपरिमाणानां वैजात्यस्याभावाद्युक्तं सौत्रमनुमानमिति सिद्धम् ।

परि०— सौत्रमिति । महद्दीर्घवद्वेति सूत्रोक्तं प्राक्प्रपञ्चितं अनुमानचतुष्टयं साध्विति सिद्धमित्यर्थः ।

* * *

॥ अथ उक्तार्थे वैजात्यमङ्गीकृत्यापि कार्यकारणभावस्य शक्योपपादनत्वेऽपि सजातीयतोपपादनेनोक्तार्थसाधने कारणप्रदर्शनम् ॥

३५ सु०— यद्यपि वैजात्यमङ्गीकृत्यापि कार्यकारणभावः शक्योपपादनः, अन्यथा सङ्ख्याया अप्यकारणत्वापत्तेः, परिमाणस्यैवमिति नियमस्य निर्मूलत्वात्; तथाऽपि वस्तुस्थितिरेव वक्तव्येति परिमाणत्वावान्तरजात्यपाकरणेन सजातीयतामुपपाद्यानुमानं समाहितमिति ज्ञातव्यम् ।

परि०— भाष्येऽनौचित्यमाशङ्क्य निराह **यद्यपीति** ।

वं०प०— शक्योपपादन इति । तथा चोक्तप्रबन्धेन साजात्यमङ्गीकृत्य सर्वत्राणुत्वस्य वा महत्त्वस्य वोपपादनं व्यर्थमिति भावः । **अन्यथेति** । वैजात्ये यदि कार्यकारणभावो नेत्यर्थः । तर्हीति शेषः । **आपत्तेः** विजातीयत्वात्सङ्ख्यापरिमाणयोरिति शेषः । ननु विजातीयत्वेऽपि सङ्ख्यापरिमाणयोरेव विजातीययोः कार्यकारणभावोऽङ्गीकृतः । न विजातीययोः परिमाणयोः अतः सङ्ख्ययोत्पत्तिः परिमाणस्य युक्ता न परिमाणादिति चेन्न । निर्मूलत्वादेतत्कल्पनाया इत्याह **परिमाणस्यैवमितीति** ।

श्रीनिधि०— परिमाणस्यैवमितीति । परिमाणस्य विजातीयस्य न कारणत्वं किन्तु सजातीयस्यैवेति नियमस्य नियामकशून्यत्वादित्यर्थः । किन्तु सङ्ख्यावत् परिमाणस्यापि विजातीयस्यापि कारणत्वमिति

भावः । परिमाणापकर्षः क्वचिद् विश्रान्तः परिमाणोत्कर्षवदिति साधने बाधः । दृष्टान्ते साध्यवैकल्यं च स्यात् । अपकर्षस्य द्व्यणुकादावपि सत्त्वात् । उत्कर्षस्य घटादावपि सत्त्वात् ।

शे०वा०— भाष्यकारीयस्य परिमाणत्वावान्तरजात्यपाकरणेन सजातीयतामुपपाद्यानुमानसमर्थनस्य आनर्थक्यमाशङ्क्य परिहरति **यद्यपीति** । **शक्योपपादन इति** । तथा च सजातीयतोपपादनमनर्थकमिति शेषः । **अन्यथेति** । विजातीययोः कार्यकारणभावाभाव इत्यर्थः । **सङ्ख्याया इति** । ईश्वरापेक्षाबुद्ध्युत्पन्नायाः परमाणुगतद्वित्वसङ्ख्याया द्व्यणुकगतबहुत्वसङ्ख्यायाश्चेत्यर्थः । तस्या अपि द्व्यणुकपरिमाणेन त्र्यणुकपरिमाणेन च विजातीयत्वादिति भावः । ननु परिमाणस्य सजातीयपरिमाणजनकत्वनियमाद्द्वैजात्ये तदसम्भवात् साजात्य-व्युत्पादनमर्थवदित्यत आह **परिमाणस्येति निर्मूलत्वादिति** । वैपरीत्यस्यापि वक्तुं शक्यत्वादिति भावः । **वस्तुस्थितिरेवेति** । शिष्यानुकम्पया प्रवर्तनेन ग्रन्थानां वादप्रक्रियया प्रवृत्तत्वादिति भावः ।

वा०र०— **भाष्यकारीयस्येति** । अनुमानस्येत्यनेन सम्बन्धः । **तस्यापीति** । परमाणुगत-द्वित्वसङ्ख्यायाः द्व्यणुकगतबहुत्वसङ्ख्यायाश्चेत्यर्थः । यथाक्रमं एतयोः सङ्ख्चययोः उत्तरपरिमाणद्वयेन सम्बन्धः ।

॥ इति उक्तार्थे वैजात्यमङ्गीकृत्यापि कार्यकारणभावस्य शक्योपपादनत्वेऽपि सजातीयतोपपादनेनोक्तार्थसाधने कारणप्रदर्शनम् ॥
॥ इति उक्तार्थस्य परामर्शपूर्वकं सौत्रानुमानस्य युक्तत्वे (उपसंहार) समन्वयः ॥

* * *

॥ अथ उक्तार्थे आक्षेपसमाधानम् ॥
॥ अथ परमाणोरुत्कृष्टापकृष्टपरिमाणाश्रयत्वे आक्षेपसमाधाने ॥
॥ अथ तत्रादौ आक्षेपः ॥

३६ **सु०**— परमाणोरप्युत्कृष्टपरिमाणाश्रयत्वमुक्तम्, तदाक्षिपति **यथेति** ।

अनु०— यथा महत्त्वविश्रान्तिस्तथाऽणुत्वस्य चेष्यते ।
परिमाणत्वतश्चेत्

यथा महत्त्वस्य विश्रान्तिस्तथा परिमाणत्व(तो)हेतोः अणुत्वस्य च विश्रान्तिः इष्यते चेत् इति योजना ।

अत्र महत्त्वाणुत्वशब्दाभ्यां परिमाणोत्कर्षापकर्षावुच्येते । ताभ्यां च तत्तारतम्यमुपलक्ष्यते ।

परिमाणत्वत इति । परिमाणतारतम्यत्वादित्यर्थः । तथा चाणौ सिद्धेऽणुत्वसिद्धिस्तत्सिद्धौ च तत्(अणुत्व)सिद्धिरिति परस्पराश्रयदोषः परास्तः ।

तदयमर्थः । 'परिमाणापकर्षतारतम्यं क्वचिद्विश्रान्तं परिमाणतारतम्यत्वात् परिमाणोत्कर्षतारतम्यवदि'त्यनुमानेन परिमाणापकर्षतारतम्यस्य क्वचिद्विश्रान्तिसिद्धौ 'यत्रेदं विश्रान्तं, यतः परमाणुर्नास्ति स परमाणुरि'ति परिमाणापकर्षकाष्ठाश्रयतया सिद्धस्य परमाणोः कथमुत्कृष्टपरिमाणाख्यमपि महत्त्वं साधयितुं शक्यम्, धर्मिग्राहकप्रमाणेन स्ववचनेन (च) व्याघातादिति ।

परि०— एवं तर्कपराहत्युद्धारेणानुमानानि समर्थ्य तारतम्येति मूलाभिप्रेते अयमत्र प्रयोग इति प्रागुक्तानुमाने प्रतिज्ञादोषवदर्थवचनविरोधरूपबाधकव्याघातोक्तिपरतया मूलं व्याचष्टे **यथेति** । अत्र यथाश्रुतमूलानुरोधात् अणुत्वं क्वचिद्विश्रान्तं परिमाणत्वान्महत्त्ववदित्युक्तावणुद्रव्यसिद्धावणुत्वपरिमाणसिद्धिः तत्सिद्धौ च तदाश्रयत्वेनाणुद्रव्यसिद्धिरिति वक्ष्यमाणान्योन्याश्रयापत्त्या आश्रयासिद्ध्यापातादाह **अत्र महत्त्वाणुत्वेति** । एवं विवक्षायां बीजं स्वयमेवाह **तथा चेति** । **स्ववचनेन चेति** । यतः परमाणुर्नास्ति स परमाणुरिति निर्वचनात् स्वापेक्षयाऽपकृष्टपरिमाणवान्न तादृशपरिमाणवांश्चेति प्रतिज्ञास्वरूपनिष्पत्त्या स्ववचनव्याघात इति भावः ।

यादु०— तथा चाणौ सिद्ध इति । परमाणुरूपेऽणौ सिद्धे हि तदाश्रितस्याणुत्वस्य सिद्धिः, तत्सिद्धौ चाश्रयासिद्ध्यभावेनाणुत्वं क्वचिदाश्रितमिति यथास्थितमूलोक्तानुमानेनाणुसिद्धिरित्यर्थः । न च द्व्यणुकरूपाणुसिद्ध्याऽप्यणुत्वसिद्धिसम्भवान्नेतरेतराश्रय इति वाच्यम् । परमाण्वसिद्धिदशायां द्व्यणुकस्यापि न सिद्धिरित्याशयात् । **स्ववचनेन चेति** । यतः परमाणुर्नास्ति स परमाणुरिति निरुक्तत्वादिति भावः ।

वं०प०— महत्त्वाणुत्वशब्दाभ्यां परिमाणोत्कर्षापकर्षावुच्येते इत्येवं व्याख्याने बीजमाह **तथा चेति** । अणुपदार्थसिद्धौ तन्निष्ठाणुत्वरूपपरिमाणावान्तरजातिसिद्धेरित्यर्थः । **तत्सिद्धौ चेति** । अणुत्वसिद्धौ तदधिकरणभूताणुपदार्थसिद्धिरित्यर्थः ।

श्रीनिधि०— अत उक्तं **ताभ्यां चेति** । एवञ्च उत्कर्षस्यापकर्षस्य च विश्रान्तावपि तत्तारतम्यं क्वचिदेव विश्रान्तं न सर्वत्र द्व्यणुकापेक्षयाप्युपकर्षपरिमाणस्य सत्त्वात् । घटाद्यपेक्षयाप्युत्कर्षपरिमाणस्य

सत्त्वादिति भावः । **तथा चाणौ सिद्ध इति** । इदमणुसाधकमनुमानम् । एवं चानेनानुमानेन अणौ सिद्धे अणुत्वाश्रयो अणुरिति अणुत्वपरिमाणरूपपक्षसिद्धिः । अणुत्वरूपपक्षे सिद्धे अनुमानेनाणुत्वविश्रान्तिभूम्यणुत्वसिद्धिरित्यन्योन्याश्रयो नेत्यर्थः । **यतः परमणुर्नास्ति स परमाणुरिति** । अत्र पर आहुरिति पदविभागः । एवञ्चाणुर्नास्तीत्यणुः । **परिमाणापकर्षकाष्ठाश्रयतयेति** । परिमाणापकर्षतारतम्यावधिरूपाश्रयतयेत्यर्थः । **धर्मिग्राहकप्रमाणेन** स्वधर्मिग्राहकप्रमाणमुक्तम् । स्ववचनं तु परमाणुर्महानिति ।

शे०वा०— अणुत्वविश्रान्तिशङ्कासमाधानयोः प्रकृतानुपयोगात् तत्परोत्तरग्रन्थवैयर्थ्यमाशङ्क्य पूर्वोक्तस्य परमाणोरुत्कृष्टपरिमाणाश्रयत्वस्याक्षेपेण समाधानार्थत्वेन प्रकृतसङ्गतत्वान्न तदिति भावेन तदाक्षेपसमाधानपरतयोत्तरग्रन्थं योजयितुं पूर्वोक्तमनुवदति **परमाणोरपीति** । **इति योजनेति** । महत्त्वशब्देन समस्तस्यापि विश्रान्तिशब्दस्य बुद्ध्या विवेकेन अणुत्वस्येत्यनन्तरमनुवृत्तिः । तथेत्यनन्तरं परिमाणत्वत इत्यस्येष्यत इत्यनन्तरं चेदित्यस्य चान्वयश्चाङ्गीकर्तव्यः । अन्यथाऽसङ्गतेरिति भावः । तर्हि तारतम्ये परिमाणत्वाभावाद्धेतोरसिद्धिः स्यादित्यत आह **परिमाणत्वत इतीति** । किमर्थान्तरपरिकल्पनया प्रतीतार्थपरत्वमेव किन्न स्यादित्यतो निमित्तमुपलक्षणत्वेनाह **तथा चेति** । परमाणुरूपेऽणौ सिद्धे सति तदाश्रिताणुत्वस्य सिद्धिः । तत्सिद्धौ चाश्रयासिद्ध्यभावेनाणुत्वं क्वचिदाश्रितमिति यथास्थितमूलोक्तानुमानेनाणुत्वसिद्धिरित्यन्योन्याश्रय इत्यर्थः । न च द्व्यणुकरूपाणुसिद्ध्याऽप्यणुत्वसिद्धिसम्भवान्नेतरेतराश्रय इति वाच्यम् । परमाण्वसिद्धिदशायां द्व्यणुकस्याप्यसिद्ध्याऽणुत्वसिद्ध्ययोगादित्याशयात् । **स्ववचनेन चेति** । परमाणुरिति स्ववचनेन चेत्यर्थः । परमाणुशब्देन तदपेक्षयाऽण्वभावस्य कथनादिति भावः ।

वा०र०— **वैय्यर्थ्यमाशङ्क्येति** । वैय्यर्थ्यमाशङ्क्येत्यर्थः । तेन वैय्यर्थ्यस्य उत्तरत्र क्रियान्तरसम्बन्धाभावेऽपि न दोषः । **इति योजनेति** उक्तमेव योजननिमित्ता दौर्घट्यं सूचयन्नेव कस्यांशस्य कुत्र योजनं इत्याशङ्कां निराकर्तुं तद्योजनोपायं च वदन् तद्योजने निमित्तं चाह **महत्त्वशब्देनेति** । मूले **उच्येते इति** । अयमणुरित्युक्ते परिमाणेनापकृष्टः इत्यर्थस्य प्रतीतेः । अणुत्वमित्यन्तेनापि परिमाणोत्कर्ष एव वाच्यः । एवं महत्वाणुत्वशब्दयोः परिमाणोत्कर्षापकर्षवाचित्वमिति भावः । **ताभ्यामिति** मूलम् । परिमाणोत्कर्षापकर्षाभ्यां तद्वाचकाभ्यां महत्त्वाणुत्वशब्दाभ्यां इति यावत् । अर्थे तु लक्षणोक्तिस्थले तदर्थवाचकशब्दे लक्षणे व्याख्येय इति टीकाकृता आनन्दमयाद्यधिकरणेषु निरूपितत्वात् अविरोध इति ज्ञेयम् । **द्व्यणुकरूपाणुसिद्ध्याऽपीति** । ततश्चाश्रयासिद्ध्याभावेनाश्रयत्वार्थं न परमाणुसिद्ध्यपेक्षेति भावः ।

स०व्र०— स्ववचनव्याघातमुपपादयति **यतः परमाणुरिति** ।

विष्टल०— अत्राणुत्वस्येत्यत्र विश्रान्तिरित्यस्य बुद्ध्या विवेकेनाष्टसम्बन्ध इति मत्वा योजनामाह **यथा महत्त्वस्येति** । **तथा चाणौ सिद्ध इति** । सर्वतोऽणुद्रव्यसाधनायायमारम्भः । तथा च परमाणुरूपाणु-

द्रव्यसिद्धे तदाश्रिततयाणुत्वसिद्धिः, अणुत्वसिद्धावेव तदाश्रयतयानुमानेनाणुद्रव्यसिद्धिरित्यन्योन्याश्रयदोषः स्यात् । अतस्तन्निरासाय मूलगतं महत्त्वादिपदं परिमाणोत्कर्षादिपरमिति विवक्षितं परिमाणोत्कर्षापकर्षयोर्घटादौ सर्वत्र परेणाङ्गीकृतत्वान्नान्यापेक्षेति भावः । **धर्मिग्राहकेति** । उक्ताणुत्वसाधकानुमानस्यैव परमाणुग्राहकत्वादित्यर्थः । **स्ववचनेनेति** । यतः परमाणुर्नास्ति स परमाणुरिति निर्वचनेनेत्यर्थः ।

॥ इति आक्षेपः ॥

* * *

॥ अथ तत्र समाधानम् (विश्रान्तिशब्दार्थविकल्पद्वयमपि सदोषम्) ॥
॥ अथ तत्रादौ प्रथमविकल्पितार्थे अङ्गीक्रियमाणे दोषत्रयम् ॥
॥ अथ तत्राप्यादौ प्रथमदोषः- दृष्टान्तस्य साध्यविकलता ॥

३७ सु०— अत्र वक्तव्यम् । केयं क्वचिद्विश्रान्तिर्नाम । किमियत्तापरिच्छेदः, त्र्यणुकपरिमाणात् षष्ठभाग एव परिमाणं, न ततोऽपकृष्टमस्तीति; किंवा क्वचिद्द्रव्ये वृत्तिः, अपकर्षतारतम्यमियत्तावच्छेदरहितमेव किन्त्वनन्तांशोपेतमपि तत्सर्वं क्वचिदाश्रितमेवेति ।

परि०— इयत्तापरिच्छेद इत्यस्य विवरणं **त्र्यणुकेत्यादि** । किं वा क्वचिद्द्रव्ये वृत्तिरित्यस्य व्याख्या **अपकर्षतारतम्यमित्यादि** ।

यादु०— इयत्तापरिच्छेद इत्युक्तमेव विशदयति **त्र्यणुकपरिमाणादिति** । क्वचिद्द्रव्ये वृत्तिरित्युक्तमेव विशदयति **अपकर्षतारतम्यमित्यादिना** । नन्वेवं परमाणोर्महत्त्वाभावासिद्ध्याऽर्थान्तरता विश्रान्तिशब्दार्थालाभश्चेत्याशयेन पृच्छति **किन्त्विति** । उत्तरमाह **अनन्तांशोपेतमपीति** । तदनन्तांशोपेतमपि परिमाणं सर्वं क्वचिद्द्रव्यविशेषे आश्रितमेव पर्यवसितमेव एवकारेण क्वचित्पर्यवसितिसाधनमावश्यकमिति सूचयति । तथा च पूर्वकल्पे परिमाणापकर्षतारतम्यस्येयत्तापरिच्छेद एव साध्यः, अत्र तु तस्येयत्तापरिच्छेदराहित्येऽपि क्वचिद्द्रव्ये पर्यवसितिरित्येतावत् साध्यतया विवक्षितमिति भावः । अत्र क्वचित्पर्यवसितिमात्रसाधने पूर्वकल्पे वक्ष्यमाणो दोषः । इयत्तापरिच्छेदराहित्यमात्रसाधने त्वर्थान्तरता । परमाणुमहत्त्वाभावासिद्धेः । अत उभयमपि साध्यतयोपात्तमिति द्रष्टव्यम् ।

वं०प०— इयत्तावच्छेदरहितमेवेति । त्र्यणुपरिमाणात् षष्ठभाग एव परिमाणं न ततोऽपकृष्टमस्तीति इयत्तापरिच्छेदेत्यर्थः । **अनन्तांशोपेतम्** अनन्तांशरूपम् । अपकर्षतारतम्यं नामानन्तांशरूपत्वमेव विवक्षितमित्यर्थः । अनन्तांशरूपमपि तत्क्वचिदाश्रितमिति वक्ष्यति ।

श्रीनिधि०— इयत्तापरिच्छेद इत्यस्यैवार्थः **त्र्यणुकपरिमाणात् षष्ठभाग एवेत्यादि** । ननु तस्मान्नुदपीति नुट् अनचिरिति भाव्यम् । कथमणुरितीति चेन्न । नायं नञ् किन्तु प्रतिषेधार्थकोकारोऽयमिति । अकर्तरि च कारके स नपुंसकस्येति ज्ञापकप्रतिषेधेऽपि अनन्तांशोपेतमपीति । एतदपेक्षया एतत्परिमाणमपकृष्टम् । ततस्तत्परिमाणमित्यादिक्रमेणानन्तांशवृत्तीत्यर्थः । **क्वचिदाश्रितमेवेति** । क्वचिदेवापकृष्यते न ततो नान्यत्र अपकृष्यत इत्यर्थः ।

शे०वा०— विश्रान्तिशब्दस्य वक्ष्यमाणप्रकारेण इयत्तामात्रपरिच्छेदार्थत्वविवक्षायां 'विश्रान्तो यद्यनन्तांश' इत्युत्तरग्रन्थासङ्गतिप्रसङ्गात् वक्ष्यमाणरीत्या क्वचिद्द्रव्ये वृत्त्यर्थत्वे च 'न महत्त्वस्यापि विश्रम' इत्यव्यवहितग्रन्थासङ्गतिप्रसङ्गात् तत्तत्पक्षनिरासकत्वेन व्यवस्थयोत्तरग्रन्थं योजयितुं सम्भावितं विश्रान्तिशब्दार्थं तावद्विकल्पयति **अत्र. वक्तव्यमिति** । इयत्तापरिच्छेद इत्युक्तमेव विशदयति **त्र्यणुकेति** । क्वचिद्द्रव्ये वृत्तिरित्युक्तमेव विशदयति **अपकर्षतारतम्यमित्यादिना** । परिमाणापकर्षतारतम्यमित्यर्थः । नन्वेवं परमाणोर्महत्त्वाभावसिद्ध्याऽर्थान्तरता विश्रान्तिशब्दार्थालाभश्चेत्याशयेन पृच्छति **किन्त्विति** । उत्तरमाह **अनन्तांशोपेतमपीति** । तदनन्तांशोपेतमपि परिमाणं सर्वं क्वचिद्द्रव्यविशेषे आश्रितमेव पर्यवसितमेव । एवशब्देन क्वचित्पर्यवसितिसाधनस्यावश्यकत्वं सूचयति । तथा च पूर्वकल्पे परिमाणापकर्षतारतम्यस्य इयत्तापरिच्छेद एव साध्यः, अत्र तु तस्येयत्तापरिच्छेदराहित्येऽपि क्वचिद्द्रव्ये पर्यवसितिरित्येतावत्साध्यतया विवक्षितमिति भावः । अत्र क्वचित्पर्यवसितिमात्रसाधने पूर्वकल्पे वक्ष्यमाणो दोष इयत्तापरिच्छेदराहित्यमात्रसाधनेऽप्यर्थान्तरता परमाणुमहत्त्वाभावस्यासिद्धेरित्यत उभयमपि साध्यतयोपात्तमिति मन्तव्यम् ।

वा०र०— इयत्तामात्रेति । इयत्तामात्रपरिच्छेदेत्यर्थः । **मात्र**पदेन क्वचित् द्रव्ये वृत्तिर्व्यावर्त्यते । **उत्तरग्रन्थासङ्गतीति** । उत्तरग्रन्थे हि त्र्यणुकाद्यपेक्षया परिमाणेनानन्तांशो द्रव्यविशेषः कश्चिदस्ति इत्यङ्गीकारे परिमाणापकर्षोऽनन्तश्च पर्यवसितश्च इति विप्रतिषिद्धमित्युत्तरदूषणासङ्गतिः । परिमाणस्य त्र्यणुकपरिमाणा षष्ठभाग एव परिमाणविश्रान्तिः इत्येवं इयत्तापरिच्छेदस्यार्थत्वाङ्गीकारे तद्दूषणसङ्गतेः इत्यर्थः । **अव्यवहितग्रन्थेति** । महत्त्वस्यापि इयत्तापरिच्छेदो नास्तीति तद्दृष्टान्तेन परिमाणापकर्षतारतम्यस्यापि इयत्तापरिच्छेदरूपविश्रमायोगः इति प्रतिपादनमसङ्गतं स्यात् । अनन्तांशस्य परिमाणस्य क्वचिद्द्रव्ये वृत्तिरेव । परिमाणापकर्षतारतम्यस्य विश्रान्तिः नामेत्युक्ते महत्त्वस्येत्युक्तविश्रान्त्यभावप्रतिपादनस्य सङ्गत्यभावादित्यर्थः । **पूर्वकल्पे वक्ष्यमाण इति** । महत्त्वस्य विश्रमाभावेन दृष्टान्तासिद्धिरूपदोष इत्यर्थः । **अर्थान्तरतेति** । इयत्तापरिच्छेदरहितस्य परिमाणापकर्षस्याङ्गीकारे परमाणौ विश्रान्तिभावापत्तिपरमाणोरणुर्नास्ति इत्यसिद्धमिति अर्थान्तरतेत्यर्थः ।

विठ्ठल०— इयत्तापरिच्छेद इत्युक्तं विवृणोति **त्र्यणुकपरिमाणादिति** । क्वचिद्द्रव्यवृत्तिरित्युक्तं विवृणोति **अपकर्षतारतम्यमिति** । इयत्तावच्छेदरहितत्वं कथं क्वचिद्विश्रान्तिशब्दार्थ इत्याशयेन शङ्कते **किन्त्विति** । उत्तरमाह **अनन्तांशोपेतमपीति** । परमाण्वाद्यपकृष्टपरिमाणस्य अनन्तांशोपेतत्वाद् **इयत्ताद्** इयत्तावच्छेदराहित्यम् । तथापि तत्सर्वमिति परिमाणं क्वचिद्द्रव्यविशेषे अंशभेदेनाश्रितमेवेति विश्रान्तत्वं च युज्यत इति भावः । अत्रैवकारेण क्वचित्पर्यवसति साधनमावश्यकं निरधिष्ठानस्य परिमाणविशेषस्यावस्थानामुपपत्तिः । तथा च पूर्वविकल्पे परिमाणापकर्षस्येयत्तापरिच्छेदः साध्यः । द्वितीये तस्येयत्तापरिच्छेदाभावेऽपि सर्वस्य क्वचिद्वृत्तिमत्वमिति भेदो ज्ञातव्यः ।

३८ **सु०— तत्राद्ये साध्ये दृष्टान्तः साध्यविकल इत्याह नेति ।**

अनु०— न महत्त्वस्यापि विश्रमः ।

दृष्टान्तीकृतस्य महत्त्वस्य, परिमाणोत्कर्षतारतम्यस्य अपि, विश्रमः उक्तरूपो न अस्ति । न केवलं पक्षस्येति अपेरर्थः ।

परि०— पक्षस्येति । परिमाणापकर्षतारतम्यस्येत्यर्थः ।

वं०प०— उक्तरूपः पूर्वन्यायेन घटनिष्ठपरिमाणान्महत्त्वात् षष्ठभाग एवेत्यादिरूपेयत्तापरिच्छेद इत्यर्थः ।

श्रीनिधि०— उक्तरूप इति । इयत्तापरिच्छेदः स च एतदपेक्षया एतावद्भाग एव परिमाणमुत्कृष्यते नातोऽन्यत्रेत्यत्रत्येवंरूपः ।

शे०वा०— ननु तथाऽपि न महत्त्वस्येति वाक्येन कस्य पक्षस्य किं दूषणमुक्तं भवतीत्यतो विशिष्य तदुद्दङ्कनपूर्वकं तत्परतयोत्तरग्रन्थं योजयति **तत्रेति** । विकल्पितपक्षयोरित्यर्थः । **आद्ये साध्ये** इयत्तापरिच्छेदः साध्य इति पक्षे । **उक्तरूप इति** । इयत्तापरिच्छेदरूप इत्यर्थः । मूले अपिशब्दस्य वैयर्थ्यमाशङ्क्य तत्समुच्चेतव्यप्रदर्शनेन तस्यार्थवत्तामाह **न केवलमिति** ।

वा०र०— तदुद्दङ्केनेति । तत्पक्षोद्दङ्केनेत्यर्थः । **तत्परतयेति** । तत्तत्पक्षीयदूषणपरतयेत्यर्थः ।

* * *

॥ अथ तत्र दृष्टान्तस्य साध्यविकलतायां कारणम्
(परिमाणोत्कर्षतरतमभावानन्त्यदर्शनम्) ॥

३९ **सु०— कुतो नास्तीत्यत आह दृश्यत इति ।**

दृश्यतेऽनन्त इत्येव

परिमाणोत्कर्षतरतमभावः अनन्तः अनवधिक इत्येव दृश्यते, न त्वियत्तापरिच्छेदवानिति; बाधकप्रमाणसद्भावात्, साधकाभावाच्चेत्यर्थः ।

परि०— इत्येव दृश्यत इति । साक्ष्यादिनेति भावः । विवरिष्यते चैतदग्रे 'केवलं साक्षिमानेने'त्यादौ । कुतो नास्तीत्यस्य दृश्यत इत्यादिना किमुत्तरमुक्तमित्यत आह **बाधकप्रमाणसद्भावात्साधकाभावाच्चेत्यर्थ इति** ।

शे०वा०— परिमाणोत्कर्षतारतम्यस्यानन्तत्वेन दर्शनप्रतिपादनस्यानर्थक्यमाशङ्क्य पूर्ववाक्योक्तविश्रमाभावोपपादनार्थत्वान्न तदिति भावेन तदुपपादकतया तद्योजयितुं तदुपपादकाकाङ्क्षामुत्थापयति **कुत इति** । एवशब्दार्थमाह **न त्विति** । तथाऽपि महत्त्वस्य विश्रमो नास्तीत्यत्र को हेतुरनेनोक्तो भवतीत्यतो 'दृश्यतेऽनन्त' इत्यंशेनोक्तं हेतुमाह **बाधकेति** । एवेत्यंशेनाप्युक्तं तमाह **साधकेति** ।

वा०र०— एवेत्यंशेनेति । अनन्त एव दृश्यते न तु इयत्तया परिच्छेदवान् दृश्यते इत्येवशब्देन प्रतिपादनात् इयत्तापरिच्छेदे प्रमाणाभावप्रतिपादनलाभादित्याशयः ।

॥ इति तत्र दृष्टान्तस्य साध्यविकलतायां कारणम् (परिमाणोत्कर्षतरतमभावानन्त्यदर्शनम्) ॥
॥ इति प्रथमदोषः- दृष्टान्तस्य साध्यविकलता ॥

* * *

॥ अथ तत्र द्वितीयदोषः- अनुमानस्य कालात्ययापदिष्टता
(परिमाणापकर्षतारतम्यानन्त्यस्यापि दर्शनम्) ॥

४० **सु०— कालात्ययापदिष्टं चास्मिन्पक्षेऽनुमानमित्याह तथेति ।**

तथानन्त्यमणावपि ।

तथाशब्दो दूषणसमुच्चये । न केवलं परिमाणोत्कर्षतरतमभावोऽनन्त इति दृश्यते, किन्त्वसौ अणौ परिमाणापकर्षतारतम्येऽपि आनन्त्यम् अनवधिकत्वं दृश्यत, इत्यर्थः ।

परि०— कालात्ययापदिष्टं चेति । प्राक् अपिपदसूचितमिति योज्यम् । **अस्मिन्पक्ष इति** । प्रागुक्तरूपेयत्तापरिच्छेदो विश्रान्तिरिति पक्ष इत्यर्थः । अणावित्यनुवादः । परिमाणेत्यादि व्याख्या ।

श्रीनिधि०— अस्मिन्पक्षे इयत्तापरिच्छेदो विश्रान्तिः इति पक्षे ।

शे०वा०— दृष्टान्तस्य साध्यविकलतोपपादनेनाद्यपक्षस्य दूषितत्वात् तथेत्युत्तरग्रन्थानर्थक्यमाशङ्क्य दूषणान्तरोपदर्शनार्थत्वान्न तदिति भावेनोच्यमानदूषणस्य विशिष्योद्दङ्कनपूर्वकं तत्समर्पकतयोत्तरग्रन्थं योजयति **कालेति** । ननु मूले दूषणान्तरपरत्वज्ञापकाभावान्न तत्परत्वमित्यतः, तथाशब्द एव तत्र ज्ञापक इति भावेन तदर्थमाह **तथेति** । दूषणसमुच्चयमेव दर्शयन्नपेक्षितपूरणेन मूलं योजयति **न केवलमिति** । अणावानन्त्यदर्शनेन परिच्छेदाभावसिद्धावपि पक्षे तदसिद्धेः कथं कालात्ययापदिष्टत्वमित्यतोऽणुशब्दस्य लक्षितलक्षणया परिमाणापकर्षतारतम्यपरत्वं मनसि निधायाह **अणौ परिमाणापकर्षतारतम्य इति** ।

वा०र०— आनर्थक्यमाशङ्क्येति । आनर्थक्यमित्याशङ्क्य इत्यर्थः । तेन इतरान्वयापेक्षाभाव इति बोध्यम् । **लक्षितलक्षणयेति** । अणुत्वरूपभावपरेणाणुशब्देन परिमाणगतापकर्षरूपाणुत्वलक्षणानन्तरं विवक्षितार्थालाभे पुनस्तेनैवापकर्षरूपलक्ष्यार्थं सम्बन्धि स्वलक्षणयेत्यर्थः । **तथापि भावप्रधानत्वादिति** । पूर्वमूलटीकानुसारेण भावप्रधानाणुशब्दस्याणुत्वे लक्षणायाः अवर्जनीयत्वात् तस्य तदत्र लक्षणाप्राप्तिः । अत एव 'तथाणोश्च', 'नैतावद्भागता' इत्युत्तरानुव्याख्यानव्याख्यानमूलेऽणोरणुत्वस्येति व्याख्याय परिमाणापकर्षस्येति व्याख्यातम् । तथा च भावप्रधानतां पूर्वोक्तरीत्या सिद्धवत्कृत्य लक्षणद्वयमुक्तमिति द्रष्टव्यम् ।

॥ इति भागशः द्वितीयदोषः- अनुमानस्य कालात्ययापदिष्टता (परिमाणापकर्षतारतम्यानन्त्यस्यापि दर्शनम्) ॥

* * *

॥ अथ तत्र प्रथमदोषोक्तस्य 'दृष्टान्ते साध्यवैकल्य'स्य विशदनम् ॥

४१ **सु०— 'दृश्यतेऽनन्त इत्येवे'तीयत्तापरिच्छेदो न दृष्टान्ते दृश्यत इति एवशब्देन उक्तम् । तद्विशदयति नेति ।**

अनु०— न महत्तत्त्वगुणत एतावानिति हीश्वरः । परिच्छिन्नः

महत्तत्त्वम् इति द्रव्यविशेषस्येयं(स्यैव) संज्ञा । तेन 'आन्महत' इत्येष विधिर्न भवति । 'दृष्टानुगतिर्हि संज्ञाछन्दसोः' इष्यते । यथाऽऽह 'बहुलं तणी'ति । **गुण**शब्दोऽत्र तन्त्रेण द्विः उपात्तः । तत्राद्यस्य परिमाणाख्यो गुणविशेषोऽर्थः । द्वितीयस्य गुणनम् ईश्वर इति परममहत्त्वाश्रयद्रव्योपलक्षणम् । परिमाणोत्कर्षतारतम्यस्येयत्तापरिच्छेदो हि तथा सति दृष्टः स्यात् । यदि महत्तत्त्वादिपरिमाणगणनया **ईश्वरादिः एतावान्** पञ्चगुणपरिमाणवान् षड्गुणपरिमाणवान् वा **इति परिच्छिन्नः** स्यात् । **न** चैवम् । तथा सति परममहत्त्वानुपपत्तेरिति **हि**शब्दार्थः ।

अत्र **महत्तत्त्वग्रहणेनेदं** सूचयति । यदुक्तं वैशषिकादिभिः पृथिव्यादीनि नवैव द्रव्याणि इति तदसत्, महदहङ्कारादीनामपि सत्त्वात् । न च तत्र प्रमाणाभावः, श्रुत्यादेः प्रमाणस्य विद्यमानत्वात् । न च त्र्यणुकादिकमेव तथोच्यते, अव्यक्तत्वादिश्रवणात् । न च बाधकं किञ्चित् विद्यते, येनोपचारकल्पनेति ।

ईश्वरग्रहणेन जीवात्मनामपि यत्परैः परममहत्त्वमुक्तं तदसदिति सूचयति । उपपादयिष्यते खल्वणुत्वं जीवस्येति ।

परि०— महत्तत्वमितीति । ननु कथं महत्तत्वमिति । महच्च तत् तत्त्वं चेति विग्रहे महातत्त्वमिति प्राप्नोति महाह्रद इतिवत् । 'आन्महतः समानाधिकरणजातीययोरि'ति सूत्रे समानाधिकरणशब्दे जातीयशब्दे च परतो महच्छब्दस्याकारोऽन्तादेशो भवतीति तकारस्याकारविधानादित्यत आह **आन्महत इतीति** । कुत इत्यत आह **दृष्टानुगतिर्हीति** । संज्ञायां छन्दोविषये च यथाप्रयोगो दृष्टः तथैवानुगतिरनुसरणमिष्यते प्राज्ञैरित्यर्थः । कुत एवमित्यतो वार्तिकसम्मतिमाह **यथाहेति** । चतुर्थस्याद्यपादे स्त्रीप्रत्ययप्रकरणे अस्वाङ्गपूर्वपदाद्वेति सूत्रे बहुलं तणीति वक्तव्यमिति वार्तिकम् । तणिति संज्ञाछन्दसोः प्राचां संज्ञा । तणीति सप्तमी । संज्ञाछन्दसोर्विषये बहुलं कार्यं भवतीत्युक्तेरिह तकारस्यात्वं न भवतीत्यर्थः । **तन्त्रेणेति** । सकृदुच्चरितमनेकोपकारकं तन्त्रमिति वदन्ति । **श्रुत्यादेरिति** । तन्मात्राणि भूतादौ लीयन्ते भूतादिर्महति महानव्यक्ते लीयत इति । 'यस्याहङ्कारः शरीरं

यस्य बुद्धिः शरीरं यस्याव्यक्तं शरीरमि'त्यादिश्रुतेः । 'त्रिविधोऽयमहङ्कारो महत्तत्वादजायत' इत्यादिस्मृत्यादेः प्रमाणस्येत्यर्थः । **अव्यक्तत्वादिति** । अव्यक्तत्वभूतकारणत्वभूतलयाधारत्वभूतभिन्नत्वादिश्रवणादित्यर्थः । त्र्यणुकादेस्तु व्यक्तत्वभूतात्मकत्वाङ्गीकारादिति भावः । अव्यक्ते द्व्यणुकोपादानकत्वादव्यक्तत्वोपचार इत्यत आह **न च बाधकमिति** । **उपपादयिष्यत इति** । 'उत्क्रान्तिगत्यागतीनामि'ति सूत्रकृतोपपादयिष्यते अग्रेतनपाद इति भावः ।

गु०दी०— दृष्टानुगतिर्हि संज्ञाछन्दसोरिष्यत इत्यत्र **दृष्टानुगतिः** प्रयोगदृष्टानुगतिः । **यथाह बहुलं तणी**ति भाष्यकार इति शेषः । तणि संज्ञा छन्दसि बहुलं स्यादित्यर्थः । 'संज्ञा छन्दसोस्तणीति संज्ञे'ति वैयाकरणाः ।

यादु०— आन्महत इति । 'आन्महतः समानाधिकरणजातीययोः' महत आकारोऽन्तादेशः स्यात् समानाधिकरणे परे जातीये च पर इति सूत्रार्थः । उदाहरणं तु महादेव इत्यादि । **दृष्टानुगतिरिति** । संज्ञाविषये छन्दोविषये वा यथा प्रयोगस्तथैव साधुत्वं वाच्यमित्यर्थः । **बहुलं तणीतीति** । तणीति संज्ञाछदन्सोः पूर्वाचार्याणां संज्ञा । तद्विषये व्याकरणविधिर्बहुलं भवतीत्यर्थः । अत्र तणि इतीति पदच्छेदः । अतस्तद्विषय इति व्याख्यातमिति द्रष्टव्यम् । **न च त्र्यणुकादिकमेवेति** । त्र्यणुकचतुरणुकादिकमेव महदहङ्कारादिप्रतिपादकश्रुत्यादिषु महदहङ्कारादिपदैरुच्यत इत्यर्थः ॥ **अव्यक्तत्वादीति** । महदादीनामिति शेषः । आदिपदेन पृथिव्यादिभूतभिन्नत्वश्रवणसङ्ग्रहः । त्र्यणुकादेश्च त्वया व्यक्तत्वपृथिव्याद्यात्मकत्वयोः स्वीकारादिति भावः । **उपपादयिष्यत इति** । उत्क्रान्तिगत्यागतीनामित्यत्रेति शेषः ।

वं०प०— ननु क्षेत्रज्ञेश्वरयोरुभयोरप्यात्मनोर्व्याप्तत्वादीश्वरमात्रग्रहणं कुत इत्यत आह **ईश्वरेति** ।

कं०रा०— ननु न महत्तत्त्वगुणत इत्यत्र 'आन्महतः समानाधिकरणजातीययोरि'ति महच्छब्दतकारस्य आत्वे महातत्त्वेति प्रयोक्तव्यम् । महत्तत्त्वेति कथं प्रयोजीत्यत आह **महत्तत्त्वमिति द्रव्यविशेषस्येयं संज्ञेति** । संज्ञात्वे ह्यात्वविधिः कस्मान्न भवतीत्यत आह **दृष्टानुगतिर्ही'ति** । उक्तार्थे वार्तिकसम्मतिमाह **यथाऽऽहेति** । बहुलंतणीति वार्तिकस्यायमर्थः । तणिसंज्ञाच्छन्दसो बहुलं कार्यं भवतीति वक्तव्यमिति । अत एव महाभाष्यकारेण बहुलं तणीति वक्तव्यमिति वार्तिकमुदाहृत्य किमिदं तणीति प्रश्नपूर्वकं तणीति संज्ञाच्छन्दसोर्ग्रहणमित्युक्तम् । न च वाच्यं कैयटे बहुलं तणीति वक्तव्यमित्यस्य सर्वप्रकरणापेक्षमेतदुच्यत इति सर्वप्रकरणापेक्षत्वमुक्त्वा किं प्रयोजनानि प्रयोजनप्रश्ने तदुत्तरत्वेन प्रवृत्तस्य अन्नवधकगात्रविचक्षणर्जीराद्यर्धमिति महाभाष्यवाक्यस्याभिप्रायवर्णनावसरे अन्नशब्दे जग्ध्यभावः वधक इति एवुलिवधादेशः । गात्रमिति । इण औणादिके केष्ट्रनिगादेशः विचक्षणे स्यान्नभावः । **अजिरे विभावाभाव इति** । अरोजब्धिर्ध्यत्मिकिति ।

हनोवधभिटि । इणोगालुटि । चक्षिटः ख्याञ् अजेर्ष्यद्य अपोरिति प्रकृतविषयत्वस्यैवोपपादितत्वेन आन्महतः समानाधिकरणजातीययोरित्यप्रकृतकार्यविषयत्वाभावात् महत्तत्त्वेत्यत्र आत्वाभावस्तेन वार्तिकेन न सिद्ध्यतीति महत्तत्त्वेत्यभियुक्तप्रयोगस्य सत्त्वेन बहुलं तणीति वक्तव्यमित्यस्य आन्महत इत्यात्वविषयत्वस्याप्यवश्यंभावात् एतादृशकार्यसङ्ग्रहार्थमेव अजिराद्यर्थमित्यादिपदं प्रयुक्तं सर्वप्रकरणापेक्षमेतदुच्यत इति कैयटवाक्यत्वव्यवहित-प्रकृतख्याञादेशमात्रविषयत्वव्युदासार्थं न तु आन्महत इत्याद्यप्रकृतकार्यविषयत्वव्यवच्छेदार्थमिति श्रुत्यादेरिति 'तन्मात्राणि भूतादौ स्थीयन्ते भूतादिर्महति महानव्यक्ते स्थीयते यस्याहङ्कारः शरीरं यस्य बुद्धिः शरीरं यस्याव्यक्तं शरीरमि'त्यादिश्रुतेः । 'पञ्चभिः पञ्चभिर्ब्रह्मा चतुर्भिर्दशभिस्तथा । एतच्चतुर्विंशतिकं गणं प्राधानिकं विदुः । त्रिविधोऽयमहङ्कारो महत्तत्त्वादजायते'त्यादि स्मृतेश्च । महदहङ्कारादिसद्भावप्रमाणस्य सत्त्वादित्यर्थः । **न चेति** । श्रुत्यादिगतमहदहङ्कारादिशब्देन त्र्यणुकादिकमेवोच्यत इति । न च तत्र तत्र महदहङ्कारादीना-मव्यक्तत्वाश्रयणात् त्र्यणुकादेश्चाव्यक्तत्वाद्यभावादिति भावः । आदिशब्देन स्वस्वकार्यलयाधिकरणत्वं गृह्यते श्रुत्यादिषूच्यमानमव्यक्तत्वादिकमौपचारिकं किं न स्यादित्यत आह **न च बाधकं किञ्चिदिति** । तथा च बाधकाभावेनाव्यक्तत्वादेरनौपचारिकत्वात्तस्य च त्र्यणुकादावसम्भवाच्च श्रुतिगतमहदादिशब्देन त्र्यणुकादिकमुच्यत इति भावः । **ईश्वरग्रहणेनेति** । 'न महत्तत्त्वगुणत एतावानिति हीश्वरः । परिच्छिन्न' इत्यत्रेश्वरग्रहणेन यत्परै-र्जीवात्मनामपि परममहत्तत्त्वमुक्तं तदसदिति सूचयति । 'उत्क्रान्तिगत्यागतीनामि'त्यत्र जीवाणुत्वस्योपपाद-यिष्यमाणत्वादिति भावः ।

श्रीनिधि०— दृष्टानुगतिरिति । प्रयोगानुसरणमित्यर्थः । **संज्ञाछन्दसोरिति** । विषयसप्तमी यथाऽऽहेति महाभाष्यकार इत्यर्थः । **बहुलं तणीति** । तणीति संज्ञा छन्दसोर्नाम । एवं च संज्ञाछन्दसो-र्विषये यौगिकमात्रं बहुलं भवति क्वचिद्भवति क्वचिन्न भवतीत्यादीत्यर्थः । आत्वमिति प्रकृतापेक्षया सर्व-कार्येष्वपीदं द्रष्टव्यम् । गुणनया साङ्ख्येन अव्यक्तत्वश्रवणादिति त्र्यणुकादिकं च व्यक्तमिति भावः । **उपचारकल्पनेति** । स्पष्टप्रतीत्यविषयत्वगुणयोगेनेति भावः । ननु न स्फुटनमात्रेणार्थसिद्धिरित्यत आह **उपपादयिष्यत इति** । उत्क्रान्तिगत्यागतीनामित्यत्रेति भावः । यतो इत्यध्याहृत्य तथेत्यस्यानुवादपूर्वक-मर्थमाह । तथा **तद् दृष्टान्तेनेति** ।

शे०वा०— ननु महत्तत्त्वेत्याद्युत्तरभाष्यमनर्थकम् । न चेश्वरस्येयत्तापरिच्छेदराहित्योपपादनार्थं तदिति वाच्यम् । तद्वर्णनस्य प्रकृतासङ्गतत्वादित्यतोऽव्यवहितेन 'तथाऽऽनन्त्यमणावपि' इत्यनेन तस्य सङ्गत्यभावेऽपि व्यवहितेन 'दृश्यतेऽनन्त इत्येवे'त्यनेन तत्रत्यैवशब्दोक्तार्थप्रपञ्चकत्वेनास्य सङ्गतत्वान्न वैयर्थ्यमित्यभिप्रेत्य तत्सङ्गततया तद्योजयति **दृश्यते इत्यादिना** । नन्वान्महतः समानाधिकरणजातीययोरिति महच्छब्दस्य समानाधिकरणजातीययोः परत आत्वविधानान्महादेव इत्यादिवन्महातत्त्वेत्येव भवितव्यं तत्कथं महत्तत्त्वेति निर्देश इत्यत आह **महत्तत्त्वमितीति** । **तेनेति** । यद्यप्यान्महतः समानाधिकरणजातीययोरित्यस्य विधेः

स्थान्यादेशव्यत्ययेन द्वन्द्वेऽल्पाच्तरस्य परनिपातेन चानित्यत्वादेव महत्तत्त्वेति व्युत्पादयितुं शक्यम् । अत एव तस्यैव महत्सुखत्वाच्च तेषामिति गीताभाष्यटीकायां तथैव समर्थितमिति संज्ञात्वाश्रयणमनर्थकमित्याभाति । तथाऽपि नित्यत्वेऽपि संज्ञात्वाश्रयणेन पररीत्यैवात्वाभावव्युत्पादनसम्भवे किमगतिकागतिकतदनित्यत्वव्युत्पादनेनेत्याशयेन संज्ञात्वमाश्रित्यैव समाहितमिति ध्येयम् । अस्तु संज्ञात्वं तथाऽपि कुतोऽत्र न आत्वविधिप्रसङ्ग इत्यत आह **दृष्टेति** । संज्ञाविषये छन्दोविषये च यथा प्रयोगो दृश्यते तथैव साधुत्वं वाच्यमित्यर्थः । तत्कुत इत्यतस्तत्र भाष्यकारसम्मतिमाह **यथाऽऽहेति** । तद्वाक्यं पठति **बहुलं तणीतीति** । तणिति संज्ञाछन्दसोः पूर्वाचार्याणां संज्ञा । अत्र तणि इतीति पदच्छेदः । तणि इति च सप्तम्येकवचनम् । विषयसप्तमी चेयम् । ततश्च तणि संज्ञाविषये छन्दोविषये च व्याकरणविधिर्बहुलं भवतीत्यर्थः ।

ननु श्रुत्यादेस्त्र्यणुकचतुरणुकादिप्रतिपादकतया सावकाशत्वान्न तद्व्यतिरिक्तमहदादिगमकत्वमित्याशङ्क्य निषेधति **न चेति** । **अव्यक्तत्वादिति** । महदादीनामिति शेषः । आदिपदेन पृथिव्यादिभूतभिन्नत्वपरिग्रहः । त्र्यणुकादेर्व्यक्तत्वपृथिव्यादिभूतात्मकत्वयोस्त्वया स्वीकारान्न श्रुत्युक्तमहदादिरूपत्वमिति भावः । अव्यक्तत्वादिश्रवणस्यौपचारिकत्वान्न बाधकत्वमित्यत आह **न चेति** । अन्यथाऽतिप्रसङ्गादिति भावः । लाक्षणिकपदप्रयोगे प्रयोजनमाह **ईश्वरग्रहणेनेति** । **उपपादयिष्यत इति** । 'उत्क्रान्तिगत्यागतीनामि'त्यादिनोत्तरपाद इति शेषः ।

वा०र०— अनन्त इत्येवेत्यनेनेति । अस्य सङ्गतत्वादित्युत्तरेण सम्बन्धः । कथं तस्य तेन सङ्गतिरित्यत उक्तं **तत्रेत्यादि** । ननु 'आङ् महतः समानाधिकरण' इत्यादि प्रकरणं गीताभाष्यटीकाटिप्पण्यनुसारेण व्याख्यातमस्ति । **स्थान्यादेशेति** । महतः आदिति वक्तव्ये आन्महत इति व्यत्ययेनेत्यर्थः । **अल्पाच्तरस्येति** । सजातीयशब्दस्येति शेषः । **गीताभाष्येति** । द्वितीयाध्यायस्थ इति शेषः । **भाष्यकारेति** । महाभाष्यकारेत्यर्थः । **तद्वाक्यमिति** । द्वितीयाध्यायीयचतुर्थपादगतचक्षिङः ख्याञ्वालिटि इति सूत्रीयेति शेषः । तत्र बहुलं तणीति वक्तव्यम् । **किमिदं तणीति** । संज्ञाछन्दसोः ग्रहणम् । किं प्रयोजनम् । अन्नवधगात्रविवक्षाणा जिराद्यर्थमित्युक्तेः सर्वप्रकरणापेक्षं एतदुच्यते इति कैयटोक्ते च इति भावः । **तणिति इति** । संज्ञायाः छान्दसश्च तण् इत्येव णान्ता संज्ञेत्यर्थः । **लाक्षणिकेति** । परममहत्त्वाश्रयद्रव्योपलक्षणेश्वरपदप्रयोगः इत्यर्थः ।

स०व्र०— ननु 'आन्महत' इत्यनेनात्वे महातत्त्वगुणत्वत इति स्यादित्यत आह **महत्तत्वमितीति** । **दृष्टानुगतिरिति** । संज्ञाविषये छन्दोविषये वा यथा प्रयोगस्तथैव साधुत्वमित्यर्थः । 'बहुलं तणीति' पाठः । तणि इतीति पदच्छेदः । तणि संज्ञायां छन्दसि वा बहुलं दृष्टानुगतिर्हीत्यर्थः ।

विष्ठल०— ननु कथं महत्तत्त्वमिति प्रयोगः आहुः 'मा हतः समानाधिकरणजातीययोः' समानाधिकरणे पदे जातीये च परतः महतः आकारोन्तादेशः स्यात् । उदाहरणं तु महादेव इत्यादि ।

तथा च महत्तत्त्वमिति भवेदित्यत आह **महत्तत्त्वमितीति** । संज्ञात्वेऽपि कुतः आकारादेशविध्यभाव इत्यत आह **दृष्टानुगतिर्हीति** । संज्ञायां विषयोच्छेदो विषये च यथा प्रयोगो दृष्टस्तथैव शब्दसाधुत्वाद् गतिरिष्यत इत्यर्थः । अत्र वार्तिकसम्मतिमाह **यथाहेति** । बहुलं तणिति वक्तव्यमिति वार्तिकस्यायमर्थः । संज्ञाछन्दसोः तन्पूर्वाचार्याणां संज्ञा । तथा च तन्निसंज्ञाच्छन्दसोर्विषये यथा प्रयोगो दृष्टस्तथैव बहुलं साधुत्वं भवतीत्यर्थः । **तन्त्रेणेति** । सकृदुक्तस्य द्विरूपकारकत्वं तन्त्रं तेनेत्यर्थः । परिमाणोत्कर्षतारतम्ये इयत्तापरिच्छेदो न दृश्यत इत्येतत् कथमनेन लभ्यत इत्यतस्तदुपपादयति **परिमाणोत्कर्षतारतम्यस्येति** । **श्रुत्यादेरिति** । 'तन्मात्राणि भूतादौ लीयन्ते', 'भूतादिर्महती'त्यादि श्रुतेः महान्तं च समावृत्य प्रधानं समवस्थितमित्यादि स्मृतेश्चेत्यर्थः । **न च त्र्यणुकादिकमेवेति** । त्र्यणुकचतुरणुकादिकमेव श्रुत्यादिमहदहङ्कारादिपदैरुच्यत इत्यर्थः । **अव्यक्तत्वादीति** । अव्यक्तपृथिव्यादिभूतकारणत्वभूतभिन्नत्वादित्यर्थः । त्र्यणुकाद्यश्च त्वया व्यक्तभूतात्मकत्वाद्युक्तेरिति भावः । अव्यक्तद्व्यणुकजन्यत्वादुपचारेणाव्यक्तत्वाद्युच्यत इति चेन्न । मुख्यार्थे बाधकाभावादित्याह **न चेति** । **उपपादयिष्यत इति** । उत्क्रान्तिगत्यागतीनामिति सूत्रकृतैवेति शेषः ।

चषक— उक्तेऽर्थे वार्तिकं प्रमाणयति **यथाह बहुलं तणीति** । अष्टलक्षण्यां तुरीयलक्षणीयाद्यचरणे स्त्रीप्रत्ययप्रकरणे 'अस्वाङ्गपूर्वपदाद्वैति' सूत्रस्थवार्तिकमेतत् । तणिति संज्ञाछन्दसोः प्राचां संज्ञा । तणीति सप्तम्यन्तम् । संज्ञाछन्दसोर्विषये बहुलं कार्यं भवतीत्युक्त्या यथा प्रयोगस्तथैव साधुत्वं वाच्यमित्यर्थः ।

* * *

॥ अथ उक्तविशदनस्य प्रयोजनम् ॥

४२ **सु०— दृष्टान्ते विश्रमाभावोपपादनस्य प्रयोजनमाह तथेति ।**

अनु०— तथाणोश्च नैतावद्भागता क्वचित् ।

यतो दृष्टान्त एतावद्गुणमेव परिमाणमुत्कृष्यते नातोऽधिकमिति साध्यं नास्ति, अतः तथा तद्दृष्टान्तेन अणोः अणुत्वस्य परिमाणापकर्षस्य चतावद्भागता त्र्यणुकपरिमाणात् षष्ठभाग एव परिमाणमपकृष्यते नातोऽधिकमितीयत्ता क्वचित् द्रव्ये न सिद्ध्यति ।

न हि महाहदं सपक्षीकृत्य पर्वतेऽग्निमत्त्वं शक्यसाधनम् । तदसिद्धौ च न विवक्षितार्थलाभः । अस्मादेतावद्भागमेव परिमाणमपकृष्यते नातोऽधिकमित्यस्यार्थस्य हि सिद्धावपकर्षकाष्ठाश्रयभूतं कुतश्चिदप्यनुत्कृष्यमाणं द्रव्यं सिद्ध्यतीति ।

परि०— षष्ठभाग एवेति । परमाणुद्वयारब्धद्व्यणुकत्रयेण त्र्यणुकस्यारब्धतया त्र्यणुकपरिमाणस्य परमाणुपरिमाणात् षड्गुणाधिक्येन त्र्यणुकपरिमाणात्परमाणुपरिमाणं षष्ठभाग एवापकृष्यत इत्युक्तम् ॥ **तदसिद्धाविति** । त्र्यणुकपरिमाणात् षष्ठभाग एवापकृष्यते परिमाणमित्यस्यासिद्धावित्यर्थः । **विवक्षिताथ** परमाणुरूपार्थ इति भावः । तदेवाह **अस्मादिति** ।

यादु०— तदसिद्धाविति । इयत्तायाः क्वचिद्द्रव्येऽसिद्धावित्यर्थः । तदेवोपपादयति **अस्मादिति** ।

वं०प०— उत्कृष्यते उत्कृष्टं भवति । **अपकृष्यते** अपकृष्टं भवति । एवमुत्तरत्र । **तदसिद्धाविति** । अणोरेतावद्भागताया असिद्धावित्यर्थः । **विवक्षितेति** । अपकर्षकाष्ठाश्रयभूतद्रव्यसिद्धिरूपेत्यर्थः । तदेव विशदयति **अस्मादिति** । **अनुत्कृष्यमाणं** कस्माच्चिदपि स्वयमुत्कृष्टं न भवति किन्तु सर्वापेक्षया स्वयमेवापकृष्टं इत्यर्थः ।

श्रीनिधि०— कोऽयं विवक्षितोऽर्थः । यदलाभ एवं चेत्यत आह **अस्मादेतावद्भागमेवेति** ।

शे०वा०— तथेत्युत्तरभाष्यानर्थक्यमाशङ्क्य दृष्टान्ते विश्रम्भाभावोपपादनप्रयोजनोत्त्यर्थत्वान्न तदिति भावेन तद्योजनप्रदर्शकतया तद्योजयति **दृष्टान्त इति** । माऽस्तु क्वचिद्द्रव्ये उक्तरूपेणेयत्तायाः सिद्धिः किं तावतेत्यत आह **तदसिद्धौ चेति** । इयत्तायाः क्वचिद्द्रव्येऽसिद्धावित्यर्थः । तत्कथमित्यत उक्तमेवोपपादयति **अस्मादिति** ।

वा०र०— आनर्थक्यमाशङ्क्येति । आनर्थक्यमिति आशङ्क्येत्यर्थः । व्याख्यानं प्रयोजनं पूर्ववत् । मास्तु क्वचित् द्रव्ये उक्तरूपेयत्तायाः सिद्धिरिति पाठो मूलकोशे प्रथमतः आसीत् । ततो अस्तु क्वचित् द्रव्ये इति । असिद्धिरिति शोधितः । लेखकेन तु मास्विति पाठमेव लिखित्वा असिद्धिरिति नञ्पदशोधोऽपि लिखित इति पत्रं ज्ञेयम् । **उक्तरूपेति** । तद्दृष्टान्तेन परिमाणापकर्षस्य इयत्ता न सिद्ध्यतीत्येवंरूपेत्यर्थः ।

स०व्र०— तदसिद्धौ चेति । इयत्तायाः क्वचिद्द्रव्ये असिद्धौ चेत्यर्थः । तदेवोपपादयति **अस्मादिति** ।

विट्ठल०— मूलगतमणोरिति पदमनूद्य भावप्रधानतया व्याख्यायार्थमाह **अणोरणुत्वस्य परिमाणापकर्षस्य चेति** । **चेदिति** । मूलगतानुवादः **इयत्ता क्वचिदपि द्रव्ये न सिद्ध्यतीति** । परिमाणापकर्षतारतम्यापर्यवसानस्यानुभवसिद्धत्वादित्यर्थः । **तदसिद्धाविति** । त्र्यणुकपरिमाणमेवापकृष्यते । नातोऽधिकमित्यस्यासिद्धौ त्र्यणुकषष्ठभागपरिमाणोपेत एव परमाणुर्नातोऽपकृष्टपरिमाण इति विवक्षितस्यार्थस्यासिद्धिरित्यर्थः । तदेवोपपादयति **अस्मादिति** ।

॥ इति उक्तविशदनस्य प्रयोजनम् ॥

॥ इति तत्र प्रथमदोषोक्तस्य 'दृष्टान्ते साध्यवैकल्य'स्य विशदनम् ॥

॥ अथ तत्र तृतीयदोषः- सत्प्रतिपक्षता ॥

४३ सु०— यद्वाऽनेन वाक्येन प्रतिपक्षमाह । तथा हि । समर्थितं तावत्परिमाणोत्कर्षतारतम्यं न क्वचिद्विश्रान्तम्, अस्मादेतावद्रुणमेव परिमाणमुत्कृष्यत इतीयत्ताभावादिति । तथा तद्दृष्टान्तेनाणोश्चैतावद्भागता क्वचिन्नास्तीति साध्यत इति । अत्रायं प्रयोगः । परिमाणापकर्षतारतम्यं क्वचिन्न विश्रान्तम्, परिमाणतारतम्यत्वात्, परिमाणोत्कर्षतारतम्यवदिति ।

परि०— तदयमर्थ इत्यादिना पूर्ववाद्युक्तानुमाने दृष्टान्तस्य साध्यहीनताबाधोक्तिपरिहारत्वेन 'न महत्त्वस्यापी'त्यादिमूलं व्याख्याय तथेत्यादिवाक्यमनुमानं विवक्षितार्थासाधकमित्येतदुक्तिपरतया व्याख्यातमधुनान्यथापि व्याचष्टे **यद्वेति** । **अनेनेति** । 'तथाणोश्चे'त्यादिवाक्येनेत्यर्थः । **समर्थितमिति** । 'न महत्त्वस्यापि विश्रम' इत्यादिना ह्यधस्तनग्रन्थेनेति भावः । तत्तात्पर्यं सङ्ग्रहेणानुवदति **तावदित्यादिना** । तथेत्यादिवाक्यतात्पर्यमाह **तथेति** । एतस्यार्थः **तद्दृष्टान्तेनेति** । अणोरित्यस्याणुत्वपरिमाणापकर्षस्येति पूर्ववदर्थो ध्येयः । **एतावद्भागतेति** । त्र्यणुकपरिमाणात् षष्ठभागतेत्यर्थः ।

कं०रा०— परिमाणतारतम्यत्वादिति । तारतम्यत्वादित्येवोक्ते अधिकारितारतम्यव्यभिचारः । तस्य मुख्यप्राणे विश्रान्तत्वेन क्वचिन्न विश्रान्तमिति साध्याभावादतस्तन्निरासाय परिमाणपदम् ।

शे०वा०— दृष्टान्ते साध्यवैकल्योपपादनेनैवोक्तप्रयोजनसिद्ध्या तत्परत्वे वाक्यानर्थक्यं भवतीत्यपरितोषात् प्रकारान्तरेण योजयति **यद्वेति** । प्रतिपक्षसमर्पकतया भाष्यं योजयति **तथा हीत्यादिना** । **एतावद्रुणमेवेति** । पञ्चगुणं षड्गुणमेवेत्यर्थः । यथाश्रुतस्य भाष्यस्यैव प्रयोगप्रक्रियात्वभ्रान्तिनिरासायाह **अत्रेति** ।

विट्ठल०— एवं परकीयानुमानस्य दृष्टान्ते साध्यवैकल्यपक्षे बाधक इत्येतदुपपादनपरतया व्याख्यातमेव असत्प्रतिपक्षोक्तिपरतयापि व्याख्यातं **यद्वेति** । **अनेन वाक्येनेति** । तथाणोश्चेत्यनेनेत्यर्थः । **समर्थितमिति** । महत्त्वस्यापि विश्रम इत्यादिनेत्यर्थः ।

॥ इति तृतीयदोषः- सत्प्रतिपक्षता ॥

॥ इति भागशः प्रथमविकल्पितार्थे अङ्गीक्रियमाणे दोषत्रयम् ॥

* * *

॥ अथ तत्र विश्रान्तिशब्दार्थद्वितीयविकल्पितार्थेऽपि दोषदर्शनम् ॥
॥ अथ तत्रादौ द्वितीयविकल्पितार्थाभिप्रायः ॥

४४ **सु०—** द्वितीयं शङ्कते **विश्रान्त इति** ।

अनु०— विश्रान्तो यद्यनन्तांशः कश्चिदस्तीति गम्यते ।

'विश्रान्त' इत्यस्य त्र्यणुकाद्यपेक्षया परिमाणतः अनन्तांशः द्रव्यविशेषः कश्चिदस्तीति अर्थ इति द्वितीयपक्षो गम्यते अभ्युपगम्यते यदि इत्यर्थः ।

इदमु(एतदु)क्तं भवति । परिमाणापकर्षतारतम्यमियत्तानवच्छिन्नमेव, किन्त्वनन्तांशरूपमपि तत्क्वचिदाश्रितमिति ।

परि०— द्वितीयमिति । किं वा क्वचिद्द्रव्ये वृत्तिरित्यादिनोक्तपक्षमित्यर्थः ।

यादु०— परिमाणापकर्षतारतम्यं क्वचिद्विश्रान्तमिति तारतम्यधर्मिप्रतिज्ञायाः परिमाणानन्तांशो द्रव्यविशेषः क्वचिदस्तीत्यर्थकथनमनुपपन्नमत आह **इदमुक्तं भवतीति** ।

श्रीनिधि०— परिमाणतोऽनन्तांशो द्रव्यविशेष इति । त्र्यणुकापेक्षया अयमस्मादपकृष्टः परिमाणः सोऽपि सोऽपि तस्मात् तस्मादिति सङ्ख्याने स्वयमनन्तांश इत्यर्थः । नन्विदं क्वचिदनाश्रयेऽपि भवतीत्यत आह **एतदुक्तं भवतीति** । **अनन्तांशारूपमपीति** । अनन्तांशाश्रितमपीत्यर्थः । **क्वचिदाश्रितमेवेति** । न ततोऽन्यत्रापकृष्यत इति भावः ।

शे०वा०— द्वितीयमिति । क्वचिद्द्रव्ये वृत्तिरिति द्वितीयमित्यर्थः । परिमाणापकर्षतारतम्यं क्वचिद्विश्रान्तमिति तारतम्यधर्मिकप्रतिज्ञायाः परिमाणतोऽनन्तांशो द्रव्यविशेषः कश्चिदस्तीत्यर्थकथनमनुपपन्नमित्यत आह **एतदुक्तं भवतीति** ।

विट्ठल०— द्वितीयमिति । किं वा क्वचिद्द्रव्यवृत्तीत्यादिनोक्तपक्षमित्यर्थः । अनन्तांशः कश्चिदस्तीत्यस्य विश्रान्तिपदार्थ इति तया पूर्वं विकल्पितत्वेनानन्तांशः कश्चिदस्तीत्यनेनैव विश्रान्त इत्यस्य लाभात् पुनरुक्तिरित्यतोऽर्थमाह **विश्रान्त इत्यस्येति** । तथा च विश्रान्त इति पदं यथा महत्त्वं विश्रान्तिरिति शङ्कते **येनोक्तेति** । विश्रान्तिपदानुवादः परतस्यार्थकथनरूपं यद्यनन्तांशः क्वचिदस्तीति तथा च न पुनरुक्तिरिति भावः । परिमाणापकर्षतारतम्यं क्वचिद्विश्रान्तमिति तारतम्यरूपविषयकप्रतिज्ञायां परिमाणतोऽनन्तांशोः द्रव्य-

विशेषः कश्चिदस्तीति धर्मिपरतयार्थकथनमनुपपन्नमित्यत आह **एतदुक्तं भवतीति** । तथा च प्रतिज्ञायाः धर्मविषयत्वेऽपि तत्कचिदाश्रितमिति वक्तव्यत्वेन तदाश्रयधर्मिनिरूपणमित्यदोष इति भावः ।

॥ इति द्वितीयविकल्पितार्थाभिप्रायः ॥

* * *

॥ अथ द्वितीयविकल्पितार्थदूषणम् – अपसिद्धान्तता ॥

४५ **सु०— निराकरोति नेति ।**

अनु०— नावसाययितुं शक्यो विरोधादेव केवलम् ।

तर्हीति शेषः । कश्चिदिति वर्तते । एवं साधने कश्चिदपि द्रव्यविशेषो नावसाययितुं शक्यः । अयमेव सर्वतोऽपकृष्टपरिमाणवान्नातोऽपकृष्टपरिमाणोऽस्तीति सर्वान्तिमतया न प्रतिपत्तुं कश्चिच्छक्यते । कुतः केवलं साक्षात् विरोधात् । परिमाणापकर्षोऽनन्तश्च पर्यवसितश्चेति हि विप्रतिषिद्धमेतत् । भवितव्यं चावसानेन, अन्यथा सर्वस्याप्युत्कृष्ट-परिमाणसम्भवेन परमाणोर्महत्त्वनिराकरणासम्भवात् । एवशब्देन विरोधस्यापरिहार्यत्वं सूचयति ॥ तदनेनापसिद्धान्तोऽभिहितो भवति ।

परि०— तर्हि मास्तु पर्यवसितिरित्यत आह **भवितव्यं चेति** । **तदनेनेति** । 'नावसाययितुं शक्य' इत्यन्तेनेत्यर्थः । तत्पक्षे त्र्यणुकपरिमाणापेक्षया षष्ठभागपरिमाणेऽवसानाङ्गीकारात् तस्य चाशक्यतया परमाणुमहत्त्वस्याप्यापत्तेरिति भावः ।

यादु०— ननु क्वचिदाश्रितमित्ययमंशः परित्यज्यतेऽतो न विरोध इत्यत आह **भवितव्यं चेति** । तत्परित्यागेऽर्थान्तरता स्यादिति भावः । **तदनेनेति** । अवसानाभावोपपादनेनेत्यर्थः । तत्सिद्धान्ते त्र्यणुक-परिमाणापेक्षया षष्ठभागपरिमाणे द्रव्येऽवसानाङ्गीकारादिति भावः ।

वं०प०— नन्वनन्तस्यापि परिमाणापकर्षस्य पर्यवसितत्वानङ्गीकारान्न विप्रतिषिद्धमेतदित्यत आह **भवितव्यं चेति** । क्वचिदाश्रितत्वरूपपर्यवसानानङ्गीकारे बाधकमाह **अन्यथेति** । **महत्त्वनिराकरणेति** । अणुत्वविश्रान्त्यधिकरणत्वेति यावत् । तथा चावसाने वाच्ये विरोध इति भावः ।

श्रीनिधि०— केवलं साक्षादिति । परस्परविरहरूपत्वेनैव विरोधो न तु तद्वच्याप्यत्वेनेति भावः । **विप्रतिषिद्धमेतदिति** । पर्यवसानाभाव एवानन्त्यमिति भावः । तर्हि क्वचित् पर्यवसानभावेनाप्युपगतेन विरोधः परिहरिष्यत इत्यत आह **भवितव्यं चेति** । 'तदनेनापसिद्धान्तोऽभिहितो भवती'ति परमाणोर्महत्त्वनिराकरणं न क्रियते आनन्त्यं चाभ्युपगम्यते चेत् को दोष इत्यत आह **तदनेनेति** । 'विश्रान्तो यद्यनन्तांश' इत्यादिनेति भावः । स्ववचनविरोधाभिधान एव तात्पर्यं किन्तु तदभिधानमुखेनापसिद्धान्तोद्भावन एव तात्पर्यमिति द्रष्टव्यम् ।

शे०वा०— तर्हीति शेष इति । 'विश्रान्तो यद्यनन्तांश' इति पूर्वत्र यदीति श्रवणादिति भावः । **वर्तत इति** । पूर्ववाक्यात्कश्चिदित्यनुवर्तते इत्यर्थः । तर्हीत्यस्य व्याख्यानं **एवं साधन इति** । कश्चिद्द्रव्यविशेषो नावसाययितुं शक्य इत्येतावन्मात्रं न परस्यानिष्टमित्यतोऽपेक्षितपूरणेन योजयति **कश्चिदपीत्यादिना** । कश्चिदपि द्रव्यविशेषो नावसाययितुं शक्य इत्येतदेव विवृणोति **अयमेवेति** । केवलमित्यनुवादेन साक्षादिति व्याख्यानम् । विरोधादित्युक्तं विरोधमेव प्रकटयति **परिमाणेति** । माऽस्त्वेवं कस्यापि द्रव्यविशेषस्य सर्वान्तिमतया प्रतिपत्तुं शक्यत्वं किमेतावतेत्यतोऽनवसाने बाधकं वक्तुमाह **भवितव्यं चेति** । अवसानेनेत्यतःपूर्वं उक्तविधयेति शेषः । भाष्ये एवशब्दस्याधिक्यमाशङ्क्य परिहरति **एवशब्देनेति** । ननु 'नावसाययितुमि'त्यादिना मूलग्रन्थेन द्वितीयपक्षस्य किं दूषणमुक्तमित्यत आह **तदनेनेति** । त्र्यणुकपरिमाणापेक्षया षष्ठभागपरिमाणद्रव्य एव तदवसानस्य तत्सिद्धान्तत्वादिति भावः ।

विट्ठल०— 'नावसाययितुं शक्य' इत्युक्तं विवृणोति **अयमेवेति** । परिमाणापकर्षः क्वचिदाश्रितः इत्ययमंशः परित्यज्यते । अतो न विरोध इत्यत आह **भवितव्यं चेति** । तदनेनेति पर्यवसानाभावस्य 'नावसाययितुं शक्य' इत्युपपादनेनेत्यर्थः । तत्पक्षे त्र्यणुकपरिमाणापेक्षया षष्ठभागपरिमाणे द्रव्येऽवसानाङ्गीकारात् तस्य चाशक्यतया परमाणुमहत्त्वस्याप्यापत्तेरिति भावः ।

* * *

॥ अथ तद्वितीयविकल्पितार्थदूषणस्य निरासार्थं कल्पितानामनेकयोजनानां निराकरणम् ॥

४६ सु०— यदि चानन्त्यमवधीर्य परिमाणापकर्षतारतम्यं क्वचिदाश्रितमित्येव प्रतिज्ञार्थः स्यात्, तथाऽपि न सिसा(षा)धयिषितमवसानं लभ्यत इत्यर्थान्तरता स्यात् ।

यथा आकाशादेरुत्कृष्टपरिमाणं द्रव्यं नास्ति तथा परमाणोरपकृष्टपरिमाणं द्रव्यं नास्तीति तात्पर्यार्थ इति चेत् । सत्यम् । नायमितो लभ्यत इति उच्यते ।

परिमाणापकर्षतारतम्यं क्वचिन्निरतिशयं परिमाणतारतम्यत्वात् परिमाणोत्कर्षतारतम्यवदिति विवक्षितमिति चेत् । कोऽयमतिशयो नाम । किमाधिक्यमुत न्यूनता अथ साधारणं किञ्चित् । आद्ये बाधः । द्वितीये दृष्टान्तस्य साध्यविकलता । न तृतीयः, तदभावात्, शब्दसाम्यमात्रेणानुमानाप्रवृत्तेः ।

यथाऽऽकाशादिपरिमाणमुभयावधिमन्न भवति, तथा त्र्यणुकावयवावयवपरिमाणमपि साध्यमिति चेन्न, हेत्वभावात् । परिमाणत्वस्य घटादिपरिमाणे व्यभिचारात् । नित्यपरिमाणत्वस्याश्रयानित्यताया वक्ष्यमाणत्वेनासिद्धेः । परिमाणकाष्ठात्वस्य च साध्यत्वात् ।

एवं तात्पर्यान्तराण्यपि निराकार्याणीति ।

परि०— तर्ह्यनन्तत्वं त्यज्यतां एवं च न विरोध इत्याशङ्कामनूद्य निराह **यदि चेति** । **अवधीर्य** तिरस्कृत्येत्यर्थः । **न सिसाधयिषितेति** । त्र्यणुकषष्ठभागपरिमाणद्रव्यासिद्धेरिति भावः । **तदभावादिति** । आधिक्यन्यूनतासाधारणस्यातिशयस्याभावादित्यर्थः । **शब्दसाम्येति** । निरतिशयमितिशब्दसाम्यमात्रेणेत्यर्थः । अन्यथा गोत्वेन पृथिव्या अपि शृङ्गित्वानुमानापत्तेरिति भावः । **उभयावधिमन्न भवतीति** । आकाशपरिमाणस्योत्तरावधिमत्त्वाभावेऽपि पूर्वावधिमत्त्वेन उभयावधिमत्त्वं यथा नास्ति तथा त्र्यणुकावयवावयवपरमाणुपरिमाणमप्युभयावधिमन्नेत्युक्तौ उत्तरावधिमत्त्वेन तदभावेन साध्यपर्यवसाने बाधात्पूर्वावधिमत्त्वाभावेनैव साध्यपर्यवसानमिति परमाणोरणुत्वमात्रमेव सिद्ध्यति । न महत्त्वमपीतीष्टसिद्धिरिति भावः । **वक्ष्यमाणत्वेनेति** 'रूपस्पर्शादिहेतुभ्यः परमाणोरनित्यते'त्यादाविति भावः । परिमाणकाष्ठात्वमेव पक्षदृष्टान्तयोरनुगतो हेतुरस्त्वित्यत आह **परिमाणकाष्ठात्वस्य चेति** । परिमाणतारतम्यकाष्ठात्वस्येत्यर्थः ।

यादु०— अवधीर्येति । अनादृत्येत्यर्थः । धृङ्नादर इति धातोः । **सिषाधयिषितमिति** । त्र्यणुकपरिमाणापेक्षया षष्ठभागपरिमाणोपेतद्रव्यविशेष एवावसानं सिषाधयिषितं तन्न लभ्यत इत्यर्थः । इदमपलक्षणम् । प्रथमकल्पोक्तसाध्यवैकल्यादिदोषोऽपि स्यादिति द्रष्टव्यम् । **इतः** विश्रान्तिशब्दात् । **तदभावादिति** । आधिक्यन्यूनतासाधारणस्यातिशयस्याभावादित्यर्थः । **अनुमानाप्रवृत्तेरिति** । अन्यथा गोशब्दसाम्येन पृथिव्यां शृङ्गानुमानप्रसङ्ग इति भावः । **उभयावधिमन्न भवतीति** । उत्कर्षापकर्षावधिमन्न भवतीत्यर्थः । इदं चैकसत्त्वेऽपि द्वयमिह नास्तीति प्रतीत्या व्यासज्यवृत्तिधर्मावच्छिन्नाभावोऽस्तीति मतमाश्रित्य ।

तथा च दृष्टान्ते उत्कर्षावधेः पर्वतादिपरिमाणस्य सत्त्वेऽप्यपकर्षावध्यभावमादाय साध्यपर्यवसानम् । पक्षे चापकर्षावधेर्द्व्यणुकादिपरिमाणस्य सत्त्वेऽप्युत्कर्षावध्यभावमादायेति ज्ञातव्यम् । त्र्यणुकावयवावयवपरिमाणमित्याश्रयासिद्धिव्युदासायोक्तम् । महावयविन्यवयवावयवनियमेन त्र्यणुकेऽप्यवयवावयवद्रव्यसिद्धौ परिमाणरहितद्रव्याभावेन तत्परिमाणस्यापि सिद्धिरित्याशयात् । **परिमाणकाष्ठात्वस्येति** । परिमाणतारतम्यकाष्ठात्वस्येत्यर्थः । **साध्यत्वादिति** । साध्यसमत्वादित्यर्थः । **एवं तात्पर्यान्तराणीति** । अणुत्वं सजातीयप्रतियोगिकोत्कर्षापकर्षानाश्रयवृत्ति परिमाणत्वव्याप्यजातित्वात् महत्त्ववदित्यादीनि नवीनोत्प्रेक्षितानीत्यर्थः । **निराकार्याणीति** । परिमाणत्वावान्तरजातेरभावेन सिद्ध्याद्यापत्तेः उक्तेतरेतराश्रयादिदोषाच्च निराकार्याणि इत्यर्थः ।

वं०प०— निरतिशयमित्यस्यापकर्षतारतम्यं विवक्षितद्रव्यं विनाऽन्यत्रातिशयेन नास्तीत्यर्थः । एवं दृष्टान्तेऽपि । **आद्ये बाध इति** । निरतिशयमित्यस्य स्वापेक्षयाऽधिकशून्यमिति यद्यर्थः तर्हि गगनादिनिष्ठोत्कर्षे स्वापेक्षयाधिकशून्यत्वे विद्यमानेऽप्यपकर्षतारतम्ये महत्त्वरूपाधिकपरिमाणोपेतत्वस्यैव सत्त्वाद्बाधः । यदि न्यूनताशून्यमित्यर्थः, तर्हि इदं यद्यपि पक्षेऽपकर्षतारतम्ये स्वापेक्षया न्यूनताशून्यत्वमस्ति । तथापि दृष्टान्ते उत्कर्षतारतम्ये न्यूनपरिमाणोपेतत्वस्यैव सत्त्वेन साध्यवैकल्यमित्यर्थः । **घटादिपरिमाण इति** । उत्कर्षावधिभूतस्य सर्षपादेरपकर्षावधिभूतस्य पर्वतादेः सत्त्वेनोभयावधिमत्त्वस्यैव सत्त्वादिति भावः ।

कं०रा०— साधारणमिति । आधिक्यन्यूनतासाधारणमित्यर्थः । **आद्ये बाध इति** । आधिक्यरूपातिशयरहितत्वे साध्यमाने परिमाणापकर्षतारतम्यस्योत्कृष्टपरिमाणनिष्ठाधिक्यसहितत्वाद्बाध इत्यर्थः । **दृष्टान्तस्येति** । परिमाणोत्कर्षतारतम्यरूपदृष्टान्तस्यापकृष्टपरिमाणनिष्ठन्यूनत्वसहितत्वात् साध्यविकलतेत्यर्थः । **तदभावादिति** । आधिक्यन्यूनत्वसाधारणस्यातिशयशब्दार्थस्याभावादित्यर्थः । **यथाकाशादिपरिमाणमिति** । आकाशादिपरिमाणरूपदृष्टान्तेऽपकृष्टपरिमाणरूपावधिसत्त्वेऽप्युत्कृष्टपरिमाणरूपावध्यभावा उभयावधिमत्वाभावरूपसाध्यमस्ति । **पक्षीकृतेति** । त्र्यणुकावयवावयवपरिमाणे उभयावधिमत्वाभावरूपसाध्यस्योत्कृष्टपरिमाणरूपावधिराहित्यमादाय बाधेन पर्यवसानायायोगादपकृष्टपरिमाणरूपावधिराहित्यमादायैव पर्यवसानमिति भावः । **घटादिपरिमाण इति** । घटादिपरिमाणापेक्षयोत्कृष्टपरिमाणस्यापकृष्टपरिमाणस्य च सत्त्वेनोभयावधिमत्वाभावाभावात्तत्र परिमाणत्वहेर्तोव्यभिचार इति भावः । घटादिपरिमाणव्यावृत्तं नित्यपरिमाणत्वं हेतुरस्त्वित्यत आह **नित्येति** । पक्षीकृतपरिमाणाश्रयस्य त्र्यणुकावयवावयवस्यानित्यताया वक्ष्यमाणत्वेन तत्परिमाणस्याप्यनित्यत्वान्नित्यपरिमाणत्वहेतोः तत्रासिद्धिरिति भावः । परिमाणकाष्ठात्वं हेतुर्भवत्वित्यत आह **परिमाणकाष्ठात्वस्येति** । पक्षीकृतत्र्यणुकावयवावयवपरिमाणपरिमाणकाष्ठात्वम् । ततोऽपकृष्टपरिमाणराहित्यमादायोपपादनीयं तदेव चोभयावधिमन्न भवतीत्यनेन साध्यत इति साध्याविशिष्टत्वान्न परिमाणकाष्ठात्वं हेतुरिति भावः ।

श्रीनिधि०— अवधीर्य तिरस्कृत्य । **न सिषाधयिषितमवसानमिति** । त्र्यणुकापेक्षया षष्ठभाग एवाश्रितमित्यर्थः । तत्सप्तमादिभागस्यापि क्वचिद् पदार्थत्वादिति भावः । **नायमितो लभ्यत इत्युच्यत इति** । **अयं** तात्पर्यविषयोऽर्थः । **इतः** परिमाणापकर्षतारतम्यं क्वचिद् विश्रान्तमित्यादि प्रयोगत इत्यर्थः । बहिरेवैवं साधने साक्ष्यागमविरोधो द्रष्टव्यः । **बाध इति** । क्वचिदधिकपरिमाणरहितमिति । साधने बाधः अपकर्षस्याधिकपरिमाणपूर्वकत्वात् । यत्रापकर्षतारतम्यविश्रान्तिः तत्र तत्साधने सिद्धसाधनता । स्वापेक्षयाधिकपरिमाणाभावस्याङ्गीकृतत्वात् । परमाणुभागे तत्साधने आश्रयासिद्ध्यादिः । **साध्यविकलतेति** । घटादेरेवाकाशादिपरिमाणन्यूनपरिमाणस्य दर्शनादिति भावः । निरतिशयमित्येव साध्यते । अतिशयस्य नानात्वेऽपि अतिशयत्वेनानुगमसम्भवादित्यत आह **शब्दसाम्यमात्रेणेति** । अन्यथाशीविषदन्तान्तरवर्ति विषपानं जीवनसाधनं विषपानत्वात् सादेयविषपानवदित्यप्यनुमानं स्यात् । तत्र बाधश्चेदत्रापि तुल्यमिति भावः । **उभयावधिमन्न भवतीति** । उक्तोत्कर्षापकर्षरूपोभयावधिमन्न भवतीत्यर्थः । अत्र **दृष्टान्ते** अपकर्षावधिमत्त्वेऽपि उत्कर्षावध्यभावमादाय साध्यपर्यवसानम् । पक्षे तु उत्कर्षावधिमत्त्वेऽपि अपकर्षावध्यभावमादाय । एकसत्त्वे द्वयं नास्तीति प्रतीतेरिति द्रष्टव्यम् । अत्र परमाणुपरिमाणं द्व्यणुकपरिमाणमिति वा पक्षीकरणे आश्रयासिद्धिः स्यात् । तत्र प्रत्यक्षस्यावृत्तेः अनुमानस्य शङ्क्यमानत्वात् । अतः **त्र्यणुकावयवावयवपरिमाण**मित्युक्तम् । **घटादिपरिमाणे व्यभिचारादिति** । तत्परिमाणस्य उभयावधिमत्त्वाभावादिति भावः । **आश्रयानित्यत्वतया वक्ष्यमाणत्वादिति** । रूपस्पर्शादिहेतुभ्यः परमाणोरनित्यत्वेत्यादिनेति भावः । ननु परिमाणकाष्ठात्वं हेतुर्भविष्यतीत्यत आह **परिमाणकाष्ठात्वस्य चेति** । पर्यवसानगत्या साध्यत्वादिति भावः । तत्राप्यपकर्षकाष्ठात्वे साध्यमाने साध्याविशेषता उत्कर्षकाष्ठात्वे साध्यमाने बाध इति द्रष्टव्यम् । **एवं तात्पर्यान्तराण्यपीति** । तैस्तैर्व्याख्यातृभिरुत्प्रेक्षितानीत्यर्थः । न्यायसाम्यादिति भावः ।

शे०वा०— अवधीर्येति । अनादृत्येत्यर्थः । धृङ् अनादरण इति स्मरणादिति भावः । **प्रतिज्ञार्थ इति** । तथा च परिमाणापकर्षस्यानन्त्यस्य पर्यवसितत्वासाधनान्न विरोध इति भावः । **न सिसाधयिषितेति** । त्र्यणुकपरिमाणापेक्षया पृष्ठभागपरिमाणोपेतद्रव्यविशेषेऽवसानस्य सिसाधयिषितत्वात् तदसिद्धेरर्थान्तरतेत्यर्थः । उपलक्षणं चैतत् । प्रथमपक्षोक्तरीत्या दृष्टान्तस्य साध्यवैकल्याच्चेत्यपि द्रष्टव्यम् । **बाध इति** । तदपेक्षयोत्कृष्टपरिमाणसद्भावेन तद्राहित्याभावादिति भावः । **दृष्टान्तस्येति** । तदपेक्षयाऽपकृष्टपरिमाणसद्भावेन तद्राहित्यस्य तत्राभावादिति भावः । **तदभावादिति** । आधिक्यन्यूनतासाधारणस्यातिशयस्याभावादित्यर्थः । नन्वतिशयशब्दवाच्यत्वमेव तदुभयसाधारणमस्तीति कथं तदभाव इत्यत आह **शब्देति** । **अनुमानाप्रवृत्तेरिति** । अन्यथा गोशब्दवाच्यत्वेन पृथिव्या अपि शृङ्गित्वानुमानप्रसङ्गादिति भावः । **उभयावधिमन्न भवतीति** । उत्कर्षापकर्षावधिमन्न भवतीत्यर्थः । एतच्च घटवत्यपि भूतले घटपटौ न स्त इति प्रतीत्या व्यासज्यवृत्तिधर्मावच्छिन्नाभावोऽस्तीति वादिमतेनोक्तम् । तथा च दृष्टान्तेऽपकर्षावधेः पर्वतादिपरिमाणस्य सत्त्वेन पक्षीकृते त्र्यणुकावयवावयवपरिमाणे चोत्कर्षावधेर्द्व्यणुकादिपरिमाणस्य सत्त्वेन तदभावस्य तत्रासम्भवात्

कथमुभयावधिमत्त्वाभावसाधनमिति शङ्कानवकाशः । दृष्टान्ते अपकर्षावधिमत्त्वस्य दार्ष्टान्तिके चोत्कर्षावधिमत्त्वस्य सत्त्वेऽप्युत्कर्षापकर्षावधिमत्त्वाभावस्य व्यासज्यवृत्तिधर्मावच्छिन्नाभाववादिमतेऽप्रत्यूहत्वादित्यवधेयम् । त्र्यणुकावयवावयवपरिमाणमिति त्वाश्रयासिद्धिपरिहारायोक्तम् । महावयविनोऽवयवावयववत्त्वनियत्या त्र्यणुकेऽप्यवयवावयवद्रव्यसिद्धौ परिमाणरहितद्रव्याभावेन तत्परिमाणस्यापि सिद्ध्या तदनवकाशादिति भावः । तत्कथमित्यतः स किं परिमाणत्वं वा, नित्यपरिमाणत्वं वा, परिमाणतारतम्यकाष्ठात्वं वेति विकल्पान्मनसि निधायाद्यं व्याचष्टे **परिमाणत्वस्येति । घटादेरिति** । तस्योत्कर्षापकर्षावधिमत्त्वादिति भावः । द्वितीयं प्रत्याह **नित्यपरिमाणत्वस्येति** । वक्ष्यमाणत्वेनेति । 'रूपस्पर्शादिहेतुभ्य' इत्यादिनेति शेषः । तृतीयं दूषयति **परिमाणकाष्ठात्वस्येति** । परिमाणतारतम्यकाष्ठात्वस्येत्यर्थः । **साध्यत्वादिति** । तथा च साध्याविशिष्टतेति भावः । नन्वणुत्वं सजातीयप्रतियोगिकोत्कर्षापकर्षानाश्रयवृत्तिपरिमाणत्वव्याप्यजातित्वात् । महत्त्वत्ववदित्यत्र तात्पर्यम् । अत्र चोत्कर्षापकर्षयोरन्यतरगर्भतया साध्यद्वयमभिमतम् । तावतैवाभिमतसिद्धेः । साजात्यं चात्र परिमाणत्वसाक्षाद्व्याप्यजात्या । तथा च सजातीयपरमाणुपरिमाणप्रतियोगिकोत्कर्षानाश्रयीभूतद्व्यर्थकपरिमाणवृत्तित्वमेकेन सिद्ध्यति । सजातीयद्व्यर्थकपरिमाणप्रतियोगिकापकर्षानाश्रयीभूतपरमाणुपरिमाणवृत्तित्वं चापरेण सिद्ध्यति । द्व्यर्थकापेक्षया परमाणोरन्यतरत्वेन तत्परिमाणस्य द्व्यर्थकपरिमाणप्रतियोगिकोत्कर्षाश्रयत्वात् च दृष्टान्तासिद्धिः । सजातीयापकर्षानाश्रयत्वस्य व्योमपरिमाणे सजातीयोत्कर्षानाश्रयत्वस्य च त्र्यसरेणुपरिमाणे सत्त्वेन तद्वृत्तितया महत्तत्वे साध्यसत्त्वात् । न चानुभवसिद्धपर्वतादिमहत्त्ववृत्तिजातिविशेषे परममहत्त्वजातौ व्यभिचार इति वाच्यम् । व्याप्यपदस्य साक्षाद्व्याप्यपरत्वात् । यद्वाऽणुत्वत्वं स्वसमानजातीयनिरूपितापकर्षासमानाधिकरणस्वसमानजातीयनिरूपितोत्कर्षसमानाधिकरणं परिमाणत्वसाक्षाद्व्याप्यजातित्वात् । महत्त्वत्ववदित्यत्र तात्पर्यमित्याशङ्क्याह **एवं तात्पर्यान्तराणीति** । किरणावलीप्रकाशलीलावतीप्रकाशानुसारेणोक्तरीत्या तात्पर्यान्तराणीत्यर्थः । परिमाणत्वावान्तरजातेरभावस्य प्रागुपवर्णितत्वेनाश्रयासिद्ध्यादेरुक्तरीत्येतरेतराश्रयत्वादिदोषाणां चाप्यविशिष्टत्वादिति भावः ।

वा०र०— धृङ् अनादरणे इत्यस्येति । 'याथार्थ्यमेव मानत्वं तन्मुख्यमि'त्येतदनुव्याख्यानसम्बन्धिलक्षणप्रयोजनसमर्थनस्थलीयगौरवमनुरुध्य प्रयोजनमवधीर्यतामिति चेदिति इत्येतन्मूलव्याख्यानरूप धृङ् अनादरणे इत्यस्येदं रूपं इत्येतट्टीकाव्याख्यावसरे व्युत्पादितमेतदस्माभिः तदनुसारेण इहापि व्युत्पादनं प्रतिपत्तव्यम् । क्वचित् निरतिशयमिति साध्यस्य हि अस्मादिदं अपकृष्टमिति तरतमभावेन प्राप्तं परिमाणं क्वचिदधिकरणे विद्यमानं स्वापेक्षया योऽतिशयस्तच्छून्यमित्यर्थः । तत्र सातिशयोऽपकृष्टापेक्षया यदाधिक्यं उत्कर्ष इति यावत् । तद्रूपो वा अथवाऽपकृष्टापेक्षया यत् न्यूनतात्यन्तापकर्ष इति यावत् । तद्रूपं यद्वोत्कर्षसाधारणं अतिशयमात्रमिति विकल्पमूलार्थः । स्वापेक्षया यः उत्कर्षरूपोऽतिशयः तद्राहित्यसाधने परिमाणोत्कर्षे तरतमभावेन गगनादौ पर्यवसन्नतयाङ्गीकृते गगनादिनिष्ठापेक्षया उत्कृष्टपरिमाणाभावेन तद्रूपातिशयशून्यतया दृष्टान्तभूतगगनादिगतपरिमाणोत्कर्षरूपातिशयलक्षणाधिक्यशून्यता नास्ति । तदपेक्षया द्व्यणुके

उत्कर्षस्य सिद्धत्वात् । ततश्च बाधः इत्याशयेन बाधमुपपादयति **तदपेक्षयेति** । स्वापेक्षया न्यूनतारूपापकर्षशून्यतासाधने पक्षीकृते परमाणुपर्यवसन्नतया अङ्गीकृते परिमाणापकर्षे स्वापेक्षया द्रव्यान्तरवर्त्यपकर्षस्यासिद्धतया तद्राहित्यसम्भवेन बाधस्याप्रसङ्गेऽपि दृष्टान्तीकृते गगनादिनिष्ठतयाऽभिप्रेते परिमाणोत्कर्षे गगनाद्यपेक्षया अपकृष्टपरिमाणद्रव्याभ्युपगमात् तद्वृत्तिपरिमाणस्यैव स्वापेक्षयाऽपकृष्टत्वेन स्वापेक्षया न्यूनताराहित्यस्याभावात् दृष्टान्तसाध्यविकलता इत्याशयेनाह **तदपेक्षयाऽपकृष्टेति** । एवमेकैकावध्यदपेक्षया बाधः तद्दृष्टान्तसाध्यवैकल्ये प्राप्येत इति श्रुत्वैव तदुद्धाराय उभयावधिमन्न भवति इत्युत्तरमूलं पक्षदृष्टान्तानुगुण्येन साध्यप्रकारः आशङ्क्यत इति ज्ञेयम् । आधिक्यन्यूनतापदोक्तौ यौ स्वापेक्षया उत्कर्षापकर्षौ तदुभयसाधारणः कश्चनातिशयो नास्ति । कोऽर्थः । यादृश्यातिशयत्वेनोक्ते आधिक्यन्यूनतयोः उभयोः सङ्ग्हो वाच्यः । तादृशः उभयसाधारणः अतिशयपदार्थो नास्ति । किन्तु एतौ विलक्षणावेवातिशयौ । ततश्च दृष्टान्ते वा पक्षे वा तमतिशयमादाय साध्यपर्यवसानं न सम्भवतीत्याशयेनाह **आधिक्येति** । ननु वह्नित्वरूपः साधारणाकारः पर्वतीयमहानसीयवह्न्योरस्तीति तयोरनुगताकारेण साधारण्यात् पक्षदृष्टान्तयोः वह्नित्वसाध्यस्य पर्यवसानात् प्रकृते आधिक्यन्यूनतयोरेकाकाराभावेन तद्रूपपुरस्कारेण पक्षदृष्टान्तानुगमेऽपि अतिशयशब्दवाच्यत्वस्य विलक्षणाकारत्वेऽपि अक्षतत्वात् । तावन्मात्रमेव पुरस्कृत्य पक्षदृष्टान्तयोः न्यूनाधिक्ययोः एकैकस्वीकारेणानुगमः स्यात् इत्याशयेनावतारयति **नन्वतिशयेति** ।

अनुमानप्रवृत्तेरित्यस्यानुमानीयहेतुसाध्ययोः धूमवह्न्यादिरूपयोः धूमत्ववह्नित्वाद्याकारेण एव वा पक्षदृष्टान्तानुगमाश्रयणेनानुमानप्रवृत्तेः दर्शनात् शब्दसाध्यमात्रेण साध्यस्य पक्षदृष्टान्तानुगममाश्रित्यानुमानप्रवृत्तिरेव नास्तीति तथाप्रवृत्तिकरणं तवायुक्तं इत्यर्थसिद्धं मत्वा हेतुसाध्ययोः शब्दसाम्याकाराश्रयणेनानुमानप्रवृत्त्यङ्गीकारे बाधकं अतिप्रसङ्गं चाह **अन्यथेति** । अत्र गोत्वेनेति वक्तव्ये गोशब्दवाच्यत्वेनेत्युक्तिः गोशब्दवाच्यत्वेनैव पक्षदृष्टान्तयोः गोत्वस्यानुगमः न तु गोत्वपदार्थसास्नादिमत्वाकारेणेति दर्शयितुं तेनातिप्रसङ्गबीजं दर्शितं भवति । **पृथिव्याः** इत्युपलक्षणम् । जलादेरित्यपि ज्ञेयम् । **इदं चानुमानप्रवृत्तेरिति** । मूलकाराभिप्रेते हेतुसाध्ययोः शब्दसाम्याश्रयणं अयुक्तमित्यत्र हेत्वंशेऽयुक्तत्वोपपादनाय अतिप्रसङ्गकथनं उपलक्षणया कृतम् । साध्यांशेऽपि वह्निचित्रमूलसाधारणाग्निमान् इति तदुभयसाधारणाग्निशब्दवाच्यत्वपुरस्कारेण पक्षदृष्टान्तयोः अनुगमस्य कर्तुं शक्यतया औषधाद्याश्रयत्वादिना केनचित् लिङ्गेन पर्वतस्याग्निमत्वं साध्यं स्यात् । तत्र दृष्टान्तभूतचित्रमूलाश्रयस्थलविशेषे चाग्निमत्वानुगमः शब्दसाम्येनैव कर्तव्या स्यात् इत्यतिप्रसङ्गोऽपि बोध्यः । एतेन साध्यांशस्य एव प्रकृतत्वात् हेतावतिप्रसङ्गाभिधानमसङ्गतमिति परास्तम् । अनुमानपदेन तस्यापि मूलेऽभिप्रेतत्वात् टीकायाश्च उपलक्षणत्वादिति ज्ञेयम् । परिमाणे च उत्कर्षावधेः द्व्यणुकादिपरिमाणस्येति पाठः । त्र्यणुकपदं लेखकागतम् । मूलकोशे द्व्यणुकपदसद्भावात् युक्तेश्च । **व्यासज्यवृत्तिधर्मेति** । पूर्वोत्तररूपोभयत्वाख्यधर्मावच्छिन्नेत्यर्थः । **इत्यादिनेति शेष इति** । रूपादिमत्वाच्च विपर्ययो दर्शनादित्येतत्सूत्रव्याख्यानरूपोत्तरानुव्याख्यानेत्यर्थः । पृथिवीपदार्थीयकिरणावलीवर्धमानानुसारेणाह **अणुत्वमिति** । **सजातीयेति** । स्वेनेति

योज्यम् । वर्धमानीयरुचिदत्तानुसारेणानुमानविचारमाह **अत्र चेति** । **तावतैवेति** । एकैकसाध्येनापीत्यर्थः । **अभिमतेति** । अणुत्वपरिमाणस्य परमाणुषु विश्रान्तिरूपेत्यर्थः । गुणत्वादिना सजातीयबहुत्वादिसङ्ख्याप्रतियोगिकोत्कर्षापकर्षानाश्रयाल्पत्वादि सङ्ख्यानिष्ठत्वे साध्ये बाधप्रसङ्गादाह **साजात्यं चेति** । अणुत्वत्वादिना साजात्यस्यायोगात् उक्तं **साक्षादिति** । **तथा च सजातीयेति** । अणुत्वत्वेनेत्यर्थः । **द्व्यर्थकेति** । द्वौ अर्थौ परमाणू समवायिकारणे यस्य तत् द्व्यर्थकं द्व्यणुकमित्यर्थः । द्व्यणुकेति पाठोऽपि रुचिदत्तेऽस्ति । **एवमुत्तरत्रापि** द्व्यर्थकेत्यत्र ।

ननु द्व्यणुकपरिमाणसजातीयपरमाणुपरिमाणस्य तदपेक्षयाऽपकृष्टत्वेन तत्प्रतियोगिकोत्कर्षाश्रयीभूतद्व्यणुकपरिमाणवृत्तित्वस्यैव तदनाश्रयवृत्तित्वस्य प्रथमे सिद्ध्यनुपपत्तिः । तथा परमाणुपरिमाणसजातीयद्व्यणुकपरिमाणस्य परमाणुपरिमाणादधिकत्वेन तत्प्रतियोगिकापकर्षाश्रयीभूतपरमाणुपरिमाणवृत्तित्वस्यैव प्राप्त्या तदनाश्रयवृत्तित्वस्य द्वितीये सिद्ध्यनुपपत्तिः इत्यतो नोक्तरीत्या आधिक्येनोत्कर्षो न्यूनत्वेनापकर्ष इति नियमः । अपि तु यत्परिमाणविशिष्टं यत्परिमाणविशिष्टस्येतरवादिप्रयोगविषयता तदुत्कृष्टं ततः इत्युच्यते । एवं च द्व्यणुकापेक्षया परमाणुरणुतरः इति प्रयोगात् परमाणोः तत्प्रयोगविषयत्वेन परमाणुपरिमाणस्य द्व्यणुकपरिमाणापेक्षया उत्कृष्टत्वात् । सजातीयद्व्यणुकपरिमाणप्रतियोगिकोत्कर्षाश्रयत्वेऽपि तत्प्रतियोगिकापकर्षानाश्रयत्वात् द्व्यणुकपरिमाणस्य सजातीयपरमाणुपरिमाणप्रतियोगिकापकर्षाश्रयत्वेऽपि उत्कर्षानाश्रयत्वात् । साध्यद्वयेऽपि इष्टसिद्धिर्युक्ता इत्याशयेनाह **द्व्यर्थकापेक्षयेति** । द्व्यणुकापेक्षया परमाणोरणुतरत्वेन इति पाठः । मूलकोशे रुचिदत्ते च तथैवोक्तेः । अन्यतरत्वेनेति लेखकदोषात् । केचित्तु अन्यतरत्वं भिन्नतरत्वं अतिभिन्नत्वं इत्युक्तौ तत्र निमित्तं अणुतरत्वमेवेति नैमित्तिकेन निमित्तोपलक्षणया अणुतरत्वमेवोक्तं भवतीति व्याचक्षते ।

ननु सजातीयत्रसरेणुपरिमाणप्रतियोगिकोत्कर्षाश्रयव्योमपरिमाणे सजातीयव्योमपरिमाणप्रतियोगिकापकर्षाश्रयत्रसरेणुपरिमाणे चावृत्तिनो महत्तत्त्वस्य नोत्कर्षापकर्षानाश्रयवृत्तित्वमित्यतः साध्यवैकल्यं दृष्टान्तस्येति शङ्कते **न चेति** । यद्वा घटादिनिष्ठमहत्त्वपरिमाणघटादितो न्यूनाधिकपरिमाणवस्तुगतसजातीयपरिमाणप्रतियोगिकोत्कर्षाश्रयतया महत्त्वत्वस्य तत्र सत्त्वेन महत्त्वत्वे साध्यवैकल्यमिति शङ्कते **न चेति** । **असिद्धिः** साध्यस्येति शेषः । साध्यवैकल्यमिति यावत् । व्योमपरिमाणमादायापकर्षानाश्रयवृत्तित्वं त्रसरेणुपरिमाणमादायोत्कर्षानाश्रयवृत्तित्वं इति वैपरीत्याश्रयणात् नाद्यो दोषः । घटादिपरिमाणस्य उत्कर्षापकर्षाश्रयत्वेऽपि त्रसरेणुव्योमपरिमाणयोः तदनाश्रयत्वात् युक्तं वृत्तित्वमिति नान्त्योऽपीति हृदयं कृत्वाह **सजातीयापकर्षेति** । हेतुं विचारयति **न चेति** । लीलावतिवर्धमानोक्तं अनुमानमाह **यद्वेति** ।

विठ्ठल०— तर्ह्यनन्तत्वत्यागेनैव विरोधपरिहारो भविष्यतीत्याशङ्क्य दूषयति **यदि चेति** । **अवधीर्येति** । अनादृत्येत्यर्थः । 'धृङ् अनादरे' इति धातोः परित्यज्येति यावत् । **सिसाधयिषितमिति** । त्र्यणुकषष्ठभागपरमाण्वाश्रयस्य सिसाधयिषितत्वेन तत्सिद्ध्यलाभात् त्र्यणुकशतांशादिभागपरिमाणेऽपि पर्यवसान-

सम्भवेनार्थान्तरतेति भावः । **नायमिति** । अयमुक्तोऽर्थः इतः परिमाणापकर्षतारतम्यमनन्तांशोपेतमपि तत्सर्वं क्वचिदाश्रितमिति प्रतिज्ञातो न सिद्ध्यति । एवं प्रतिज्ञयोक्तार्थाप्रतिपत्तेरिति भावः । तर्हि प्रकारान्तरेण भविष्यति । प्रतिज्ञेत्याशङ्क्य निराकरोति **परिमाणापकर्षेति** । **आद्ये बाध इति** । अपकर्षतारतम्यं निरतिशयं अधिकरहितमिति साधने अपकर्षस्योत्कृष्टावधिसापेक्षत्वेन तस्योत्कृष्टावधेरधिकस्य प्रमितत्वात् तदभावो बाधित इति भावः । **साध्यविकलतेति** । परिमाणोत्कर्षः तारतम्येत्यवधीभूतन्यूनसद्भावेन तद्राहित्यरूपसाध्याभावादित्यर्थः । **तदभावादिति** । आधिक्यन्यूनतासाधारणस्यातिशयस्याभावादित्यर्थः । उभयत्राप्यतिशयव्यवहारदर्शनात् कथं तदभाव इत्यत आह **शब्दसाम्येति** । अन्यथा गोत्वेन पृथिव्यादीनामपि शृङ्गित्वानुमानप्रवृत्तिप्रसङ्गत्वादिति भावः । **उभयावधिमन्न भवतीति** । एकसत्त्वेऽपि द्वयमिह नास्तीति न्यायेन दृष्टान्तीकृताकाशादिपरिमाणे स्वोत्कर्षावधेः पर्वतादिपरिमाणस्य सत्त्वेऽपि स्वस्यापकर्षापवादकावध्यमादाय साध्यपर्यवसानपक्षे तु परमाणुनिष्ठापकर्षपरिमाणं प्रत्यवधीभूतस्य द्व्यणुकपरिमाणस्य सत्त्वेऽपि स्वस्योत्कर्षप्रत्यवधीभूतस्यान्यस्याभावमादाय साध्यपर्यवसानं ज्ञातव्यम् । परमाणुपरिमाणमिति पक्षनिर्देशे परमाणुपरिमाणस्याद्या प्रसिद्ध्याश्रयासिद्धिः प्राप्तेः त्र्यणुकावयवावयवपरिमाणमित्युक्तं सर्वत्रावयवावयवभूतद्रव्यत्वनियमेन त्र्यणुकस्याप्यवयवावयवभूतद्रव्यसिद्धौ परिमाणशून्यद्रव्याभावेन तस्य तावत्परिमाणत्वसिद्धिसम्भवादिति भावः । **हेत्वभावादिति** । परिमाणतारतम्यत्वस्य हेतोः पक्षे अभावादित्यर्थः । हेत्वन्तराण्याशङ्क्य निराह **परिमाणत्वस्येत्यादिना** । **वक्ष्यमाणत्वेनेति** । 'रूपस्पर्शादिहेतुभ्यः परमाणोरनित्यते'ल्यादाविति शेषः । **परिमाणकाष्ठात्वस्येति** । परिमाणतारतम्यपर्यवसानत्वस्येत्यर्थः । साध्यावशिष्टतेति भावः । **एवं तात्पर्यान्तराणीति** । अणुत्वं सजातीयावधिकोत्कर्षापकर्षानाश्रयवृत्तिः परिमाणत्वव्याप्यजातित्वात् महत्त्ववदित्यादिरूपाण्यपि नवीनोत्प्रेक्षितानि परिमाणत्वावान्तरजातेरपाकरणे असिद्ध्यादिना निराकार्याणीत्यर्थः ।

॥ इति द्वितीयविकल्पितार्थदूषणम् – अपसिद्धान्तता ॥
॥ इति तद्दूषणस्य निरासार्थं कल्पितानामनेकयोजनानां निराकरणम् ॥
॥ इति विश्रान्तिशब्दार्थद्वितीयविकल्पितार्थेऽपि दोषदर्शनम् ॥

* * *

॥ अथ विश्रान्तिशब्दार्थप्रथमविकल्पितार्थे दोषत्वेनोक्तसाध्यवैकल्यस्य कारणे उक्तानां विषयाणां सूत्रकारीयसिद्धान्तत्वदर्शनम् ॥
॥ अथ तदर्थं तद्विषये प्रमाणप्रदर्शनम् ॥
॥ अथ तत्रादौ ईश्वरादन्यत्र कालाकाशविषयकपरिमाणोत्कर्षापकर्षोभयतारतम्यानन्तत्वे प्रमाणप्रदर्शनम् ॥

॥ अथ तत्राप्यादौ परिमाणोत्कर्षतारतम्यानन्तत्वे कालाकाशेश्वरादिषु मध्ये कालाकाशयोस्तावत्परिमाणोत्कर्षतारतम्यानन्तत्वस्य साक्षिसिद्धत्वम् ॥

४७ सु०— 'परिमाणोत्कर्षतारतम्यस्यानन्तत्वं दृश्यत इत्युक्तम् । तत्केन प्रमाणेन' इत्याशङ्क्य 'कालाकाशेश्वरादीनि हि द्रव्याणि परममहत्त्ववन्तीष्यन्ते । तत्र कालाकाशयोस्तावत्परिमाणोत्कर्षस्यानन्त्यं साक्षिसिद्धमि'त्याह केवलमिति ।

अनु०— केवलं साक्षिमानेन कालो देशोऽपि नान्तवान् ।

केवलशब्देन प्रमाणान्तराभावं प्रतिजानीते । देश इत्याकाश उच्यते । नान्तवान् इत्यनवधिकपरिमाणोत्कर्षवान् । 'दृश्यत' इति वक्ष्यमाणमत्रापि सम्बध्यते । कालाकाशौ हि केवलं साक्षि(वेद्या)सिद्धावित्युपपादितं प्रथमाध्याये, अतस्तत्परिमाणोत्कर्षस्यानवधिकत्वमपि तेनैव गम्यत इति ।

परि०— एवं 'तारतम्यस्थिता' इत्यादावुक्ते परमाणुगतपरिमाणोत्कर्षापकर्षरूपप्रमेये विरोधितया यथा महत्त्वेत्यादिना शङ्कितमनुमानं न महत्त्वस्येत्यादिना साध्यवैकल्यबाधप्रतिपक्षापसिद्धान्तार्थान्तरत्वहेत्वभावसाध्याविशिष्टत्वदोषैर्निरस्य सर्वस्याणुत्वमहत्त्वे पुरुषापेक्षया प्रत्यक्षत्वाप्रत्यक्षत्वे चोपपाद्य महद्दीर्घवद्वेति सूत्राभिमतं प्रागुक्तानुमानचतुष्टयं समर्थितम् । तत्र प्रागुक्तसाध्यवैकल्यबाधयोः प्रपञ्चनपरः 'केवलं साक्षी'त्यादिः 'अतो नाणुत्वे'त्यन्त उत्तरो ग्रन्थ इति भावेनावतारयति **परिमाणेति** । **आकाश उच्यत इति** । अत्र सर्वत्राकाशपदेनाव्याकृताकाशो ग्राह्यः । नान्तवानिति नसमास इति भावेनार्थमाह **अनवधिकपरिमाणोत्कर्षवानिति** । **उपपादितमिति** । 'कालो हि साक्षिप्रत्यक्षः सुषुप्तौ च प्रतीतित' इत्यादिनानुमानिकपाद इति भावः ।

श्रीनिधि०— 'केवलं साक्षिमानेने'ति प्रतिज्ञामात्रं कृतं नोपपाद्यते, अतो न्यूनतेत्यत आह **कालाकाशयोस्तावदिति** । दोषाद्यप्रतिबद्धे सति यद्द्रव्यं येनेन्द्रियेण गृह्यते तत्परिमाणमपि तेनैव गृह्यत इति नियमादिति भावः ।

शे०वा०— 'केवलं साक्षिमानेने'त्युत्तरभाष्यस्यानर्थक्यमाशङ्क्य कालाकाशयोः परिमाणोत्कर्षानन्त्यस्य साक्षिसिद्धत्वोपवर्णनार्थत्वान्न तदिति भावेन तदुपपादकतयोत्तरग्रन्थं योजयितुं तत्प्रतिपादनस्यापि न पूर्वेण सङ्गतिरित्यतोऽव्यवहितपूर्वग्रन्थेन सङ्गत्यभावेऽपि व्यवहितेन तेन सङ्गतेर्विद्यमानत्वान्नासङ्गति-

रित्याशयवान् व्यवहितपूर्वग्रन्थसङ्गतिप्रदर्शनपूर्वकमुत्तरग्रन्थं सङ्गमयति **परिमाणेति** । **उक्तमिति** । 'दृश्यतेऽनन्त इत्येवे'त्यनेनेति शेषः । 'अणीयांश्च महीयांश्चे'त्यादिना परिमाणानन्त्यस्येश्वरे आगमसिद्धताया वक्ष्यमाणत्वात् तदभिप्रायेण तावदित्युक्तम् । साक्षिमानेनेत्येतावता पूर्त्या भाष्ये केवलमित्यस्यानर्थक्यमित्याशङ्क्य परिहरति **केवलशब्देनेति** । **वक्ष्यमाणमिति** । अपर्यवसितिरित्युत्तरवाक्य इति शेषः । ननु कालाकाशयोः परिमाणोत्कर्षस्य कुतः साक्षिसिद्धतेत्यतो धर्मिग्राहकत्वात् तस्येत्याह **कालाकाशौ हीति** । **उपपादितमिति** । 'कालो हि साक्षिप्रत्यक्षः सुषुप्तौ च प्रतीतितः', 'सत्यत्वं गगनादेश्चे'त्यादिनेति शेषः ।

वा०र०— आनर्थक्यमाशङ्क्येति । आनर्थक्यमित्याशङ्क्येत्यर्थः । व्याख्याने निमित्तं तु तत्र तत्र प्रागेवोक्तम् । **व्यवहितेन तेनेति** । ग्रन्थेनेति बुध्या विविक्ते तेनेति परामर्शः । **केवलमित्यस्यानर्थक्यमिति** । अत्र यथाश्रुत एवान्वयः । **परिहरतीति** क्रियान्वयात् । **तस्येति** साक्षिपरामर्शः । बुध्या विवेकात् ।

विठ्ठल०— परेण देशशब्देन नित्याकाशातिरिक्तादित्युच्यत इत्यङ्गीकारात् तन्निरासायाह **देश इतीति** । न समासत्वमभिप्रेत्य नान्तवानित्येतद्व्याचष्टे **नान्तवानिति** । **प्रथमाध्याय इति** । 'कालो हि साक्षिप्रत्यक्षसुषुप्तौ तु प्रतीतित' इत्यत्रेत्यर्थः ।

॥ इति परिमाणोत्कर्षतारतम्यानन्तत्वे कालाकाशेश्वरादिषु मध्ये कालाकाशयोस्तावत्परिमाणोत्कर्षतारतम्यानन्तत्वस्य साक्षिसिद्धत्वम् ॥

* * *

॥ अथ च तत्र परिमाणापकर्षतारतम्यानन्तत्वे चापि कालाकाशेश्वरादिषु मध्ये कालाकाशयोस्तावत्परिमाणापकर्षतारतम्यानन्तत्वस्य साक्षिसिद्धत्वम् ॥

४८ **सु०— 'परिमाणापकर्षतारतम्यस्याप्यानन्त्यं दृश्यत इत्युक्तम्, तत्केन प्रमाणेन' इत्याशङ्क्य 'कालाकाशयोस्तावत्साक्षिणैवे'त्याह अपर्यवसितिश्चेति ।**

अनु०— अपर्यवसितिश्चाणोर्दृश्यते साक्षिणा द्वयोः ।

द्वयोः काले गगने च । अणोश्च परिमाणापकर्षतारतम्यस्य चेत्यर्थः । **अपर्यवसितिः आनन्त्यम् ।**

नन्वेतदनुपयुक्तम्, परमाणुपरिमाणतोऽपकृष्टपरिमाणसद्भावे प्रमाणोपन्यासस्य कार्यत्वे कालाकाशयोः परिमाणोत्कर्षानन्त्ये प्रमाणोपन्यासस्य प्रयोजनाभावादिति ।

मैवम् । न हि परेण साक्षादेवमुक्तम्, किन्तु परिमाणोत्कर्षपरम्परावत् तदपकर्षपरम्परा ऽपि पर्यवसानवतीति । तथा च कालाकाशयोः परिमाणोत्कर्षापकर्षपरम्परायाः पर्यवसानाभावे साक्षिप्रमाणोपन्यासः कथमसङ्गतः ।

नन्वस्तु कालाकाशयोः परिमाणप्रकर्षोऽनवधिकः, तदपकर्षानन्त्यं तु कथम्, व्याहतत्वात् । मैवम्, साक्षिसिद्धत्वात्, प्रमितेऽर्थे विरोधानवकाशात् ।

परि०— इत्युक्तमिति । 'तथानन्त्यमणावपी'त्यत्रेति भावः । द्वयोरिति सप्तमीत्युपेत्याह **काले गगने चेति** । अणोश्चेत्यस्य व्याख्या **परिमाणेत्यादि** । **एवमुक्तमिति** । परमाणुगत-परिमाणादपकृष्टपरिमाणसद्भावो नास्तीत्येवं साक्षान्न ह्युक्तं पूर्ववादिनेत्यर्थः । 'यथा महत्त्वविश्रांति-स्तथाणुत्वस्य चे'ति मूलानुरोधादाह **किन्तु परिमाणेत्यादि** ।

कं०रा०— न हि परेणेति । न हि परेण परमाणुपरिमाणतोऽपकृष्टपरिमाणं नास्तीति साक्षादुक्तं येन परमाणुपरिमाणतोऽपकृष्टपरिमाणसद्भावे प्रमाणोपन्यासः कार्यः स्यादित्यर्थः । तर्हि परेण किमित्युक्तमिति पृच्छति **किं त्विति** । तत्रोत्तरं वदन् 'केवलं साक्षिमानेने'त्यादि ग्रन्थस्य प्रकृतासाङ्गत्यं परिहरति **परि-माणोत्कर्षपरम्परावदिति** ।

श्रीनिधि०— प्रयोजनाभावादिति । प्रमाणयोर्भिन्नविषयत्वेन बाधायोगादिति भावः । **साक्षा-देवमुक्तमिति** । परमाणुपरिमाणं सर्वतोऽपकृष्टमित्यभिप्रायेऽपि कण्ठतो नोक्तं इत्यर्थः । **तथा चेति** । वादिप्रमाणस्य सामान्यविषयत्वेन प्रतिवादिप्रमाणविषयवैपरीत्यस्यापि विषयीकरणात् समानविषयत्वेनास्य बाधकत्वसम्भवादिति भावः । **प्रमितेऽर्थे विरोधानवकाशादिति** । गोत्वाश्वत्वादीनामपि विरोधः सहा-प्रतीतेरेवेति भावः ।

शे०वा०— परिमाणोत्कर्षानन्त्यस्य साक्षिसिद्धतायाः पूर्वेणैव सिद्धत्वादपर्यवसितिश्चाणोरित्युत्तर-भाष्यमनर्थकमित्याशङ्क्य कालाकाशयोः परिमाणोत्कर्षानन्त्यस्य साक्षिसिद्धत्वसिद्धावपि परिमाणापकर्षानन्त्यस्य साक्षिसिद्धताया असिद्धेस्तदुपवर्णनार्थत्वान्न तदिति भावेन तदुपपादकतया तद्योजयितुं तत्प्रतिपादनस्य न पूर्वेण सङ्गतिरित्यतोऽव्यवहितेन सङ्गत्यलाभाद्व्यवहितेन तामुपदर्शयन्नुत्तरभाष्यमवतारयति **परिमाणापकर्षेति** । **उक्त-मिति** । 'तथाऽऽनन्त्यमणावपी'त्यादिनेति शेषः । नन्वत्र ययोः कयोश्चिद्द्वयोरणोरपर्यवसितिः साक्षिणा दृश्यत इत्येतावदुच्यते, न तु कालाकाशयोः परिमाणापकर्षानन्त्यं साक्षिणा दृश्यत इति तत्कथमनेन कालाकाशयोः परिमाणापकर्षानन्त्यस्य साक्षिसिद्धत्वसिद्धिरित्यतः पूर्ववाक्ये कालाकाशयोः प्रकृतत्वाद् द्वयोरित्यस्य तत्परतां, चशब्दस्याणोश्चेति भिन्नक्रमतामणोरित्यस्योक्तरीत्या परिमाणापकर्षतारतम्यपरतां अपर्यवसितिपदस्य च योगेन

आनन्त्यपरतामङ्गीकृत्य प्रकृतोपयोगिपरतयैतद्योजयति **द्वयोरित्यादिना** । **व्याहतत्वादिति** । एकत्रोत्कर्षापकर्षयोरनवधिकत्वस्य विरुद्धत्वादित्यर्थः । कालाकाशयोः परिमाणोत्कर्षापकर्षानवधिकत्वस्य साक्षिसिद्धत्वान्न विरुद्धत्वमिति परिहरति **साक्षीति** । साक्षिसिद्धत्वेऽपि परिमाणोत्कर्षापकर्षयोरेकत्र विरुद्धत्वं किन्न स्यादित्यत आह **प्रमितेऽर्थ इति** । सहदृष्टौ च विरुद्धौ चेत्यस्य विप्रतिषिद्धत्वादिति भावः ।

वा०र०— 'आशङ्क्चेत्यनन्तरं' पूर्वेण इति वर्तते । **परिमाणोत्कर्षानन्त्यस्येति** । अत्र **परिमाणोत्कर्षानन्त्यस्य** साक्षिसिद्धत्वसिद्धावपि परिमाणापकर्षानन्त्यस्य साक्षिसिद्धतया सिद्धेः तदुपवर्णनार्थत्वात् इत्युक्ते कुत्र परिमाणोत्कर्षानन्त्यस्य साक्षिसिद्धतासिद्धिः इत्यतः उक्तं **कालाकाशयोरिति** । तेन परिमाणापकर्षेत्यत्र तस्य नानुवृत्तिः । **साक्षिणा दृश्यत इतीति** । द्वितीयस्थले उच्यत इति वर्तते । तत्समर्पकाभावादिति भावः । अत्र प्रकरणे मूले परिमाणोत्कर्षस्यानन्त्यपरिमाणापकर्षस्यानन्त्यमित्यपि व्यवहारतारतम्यपदान्तर्भावानन्तर्भावाभ्यां व्यवहारो न दोषायेति ज्ञेयम् । **द्वयोरित्यस्य तत्परतामित्यादि** । द्वितीयान्तानां त्रयाणामङ्गीकृत्येत्युत्तरेण सम्बन्धः । **अङ्गीकृत्येति** । उपलक्षणं चैतत् । अणुत्वपरिमाणापकर्षस्याधिकरणाकाङ्क्षा निवृत्तिद्वयोरित्यस्य कालस्याकाशस्य चेति षष्ठ्यन्तत्वं भाषितुं नार्हतीत्यतः द्वयोरित्यस्य सप्तम्यन्ततां चाभिप्रेत्येत्यपि ज्ञेयम् । अतो मूले कालाकाशयोरिति सप्तम्या व्याख्याने कृते षष्ठीभ्रमः स्यादित्यतः काले गगने चेति भेदेन कीर्तनम् । **परिमाणोत्कर्षापकर्षेति** । परिमाणोत्कर्षानवधिकत्वस्य परिमाणापकर्षानवधिकत्वस्य च इत्यर्थः । कुतो विरोधानवकाशः । इत्यतो अन्यथा प्रमितत्वस्यैवायोगः इत्याशयेनैव व्याघातमाह **सहसिद्धौ चेति** ।

विट्ठल०— **एवमुक्तमिति** । परमाणुपरिमाणादपकृष्टपरिमाणं नास्तीत्येवमुक्तमित्यर्थः । अर्थतोऽस्य लाभात् साक्षाद् इत्युक्तम् । **तथा चेति** । सामान्यवचनस्य सर्वगामित्वेन कालाकाशापकर्षपरम्परापर्यवसानेऽपि प्रवृत्तेरित्याशयः । अपर्यवसितिरिति स्त्रीलिङ्गशब्देनानन्त्यस्य प्रकृतत्वात् सामान्येनेत्युक्तमिति ज्ञेयम् ।

॥ इति परिमाणापकर्षतारतम्यानन्तत्वे चापि कालाकाशेश्वरादिषु मध्ये कालाकाशयोस्तावत्परिमाणापकर्षतारतम्यानन्तत्वस्य साक्षिसिद्धत्वम् ॥

* * *

॥ अथ तत्र ततः परिमाणोत्कर्षापकर्षोभयतारतम्यानन्तत्वे कालाकाशयोस्तावत् तत्साक्षिसिद्धत्वस्य समर्थनम् ॥

॥ अथ तत्रापि चादौ तत्साक्षिसिद्धत्वमनिच्छतामभिप्रायस्य विकल्पत्रयम् तन्निरासश्च ॥

॥ अथ च तत्रादौ प्रथमविकल्पद्वयनिरासः ॥

॥ अथ च तत्राप्यादौ आद्यविकल्पनिरासः (कालाकाशगतपरिमाणोत्कर्षापकर्षयोः आनन्त्यस्य साक्ष्यनवगतत्वनिरासः) ॥

॥ अथ च तत्रापि चादौ 'साक्षिणा नावगम्यते' इत्याद्ये विकल्पे आपत्तिः ॥

४९ **सु०—** कालादावनवधिकः परिमाणापकर्षः साक्षिसिद्ध इत्येव नेष्यत इति चेत् । किं साक्षिणा नावगम्यते, उतावगतोऽपि न सत्यः, अथवा साक्षी नाम प्रमाणं नास्ति ।

आद्यं शङ्कते **यदीति** ।

अनु०— यदि नो साक्षिगम्यं तत्

तत् इति कालादेः परिमाणापकर्षस्यानन्त्यं सामान्येन परामृशति ।

दूषयति **महत्त्वमिति** ।

महत्त्वं केन गम्यते ।

'कालाकाशयोरि'ति वर्तते । **महत्त्वम्** अनवधिकः परिमाणोत्कर्षः । 'तर्ही'ति शेषः ।

अयमभिसन्धिः । कालादौ परिमाणोत्कर्षस्यानन्त्यमुपेत्य हि परेण तदपकर्षानन्त्यं नेष्यते । तत्र वक्तव्यम् । प्रकर्षानन्त्यं केन प्रमाणेनावगम्यत इति । साक्षिणेति चेत्, अपकर्षानन्त्यमपि तद्बलेन कुतो नाङ्गीकार्यम् । तत्तेन नावगम्यत इत्युक्तमिति चेत्, इदमपि (तदपि) तेन नावगम्यत इति वदन्तं प्रति किमुत्तरम् । अनुभवापलापो न युक्त इति चेत्, समं प्रकृतेऽपि । यथा हि कालादेरुत्कर्षानवधिकत्वमनुभवे चकास्ति तथा अपकर्षानन्त्यमपीति किमेकत्र पक्षपातेन । अन्यथैकापलापे द्वितीयस्याप्यपलापो दुरुत्तरः स्यादिति ।

गु०दी०— तथापकर्षानन्त्यमपि इत्यत्र परमाणोर्दशदिक्संयोगात् सन्ति दशांशाः । तेषामप्यंशानां दशदिक्संयोगात् सन्ति दशांशाः । एवमधोऽधोऽपीति परिमाणापकर्षतारतम्यानन्त्यमपि कथं नानुभवसिद्धम् । यद्वा सन्ति परमाणोर्दशांशाः । तेषामपि समर्थेनेश्वरस्य प्रत्येकं द्वैधीकरणे सन्ति ततोऽपकृष्टांशाः । एवमधोऽधोऽपीति सर्वथा सतो वस्तुनोऽनन्तधा द्वैधीकरणेऽप्यत्यन्तासत्त्वायोगात् कथमपर्यवसितापकृष्टानन्तांशपरम्परा नानुभवसिद्धा ।

वं०प०— अपर्यवसितेः प्रकृतत्वादाह **तदितीति** । सामान्ये नपुंसकमिति सूत्रादिति भावः ।

श्रीनिधि०— **सामान्येन परामृशतीति** । अन्यथा एकवचनान्तेन तदित्यनेन कालाकाशयोरन्यतर-परिमाणापकर्षानन्त्यमेव प्रतीयेत । न चेष्टापत्तिः । द्वयोरिति प्रस्तुतिविरोधात् । जात्यभिप्रायमेकवचनमिति भावः । **वर्तते** अनुवर्तते । ननु महत्त्वमनभ्युपगच्छन्तं प्रति महत्त्वं केन गम्यत इत्यसङ्गतमित्यत आह **अयमभिसन्धिरिति** ।

शे०वा०— भवेदेतदेवं यदि परिमाणोत्कर्षापकर्षानवधिकत्वं कालाकाशयोः साक्षिसिद्धं स्यात् । न चैतदस्तीति कथमविरुद्धत्वमिति शङ्कते **कालादाविति** । अपर्यवसितेस्तदिति नपुंसकेन परामर्शानुप-पत्तिमाशङ्क्याह **तदितीति** । **वर्तत इति** । 'अपर्यवसितिश्चाणोर्दृश्यते साक्षिणा द्वयोरि'त्यतोऽनुवर्तत इत्यर्थः । यद्यपि कालाकाशयोरिति न पूर्वत्र श्रुतं तथाऽपि श्रुतस्य द्वयोरित्यस्य तदर्थत्वाभिप्रायेणेदमुक्तम् । **तर्हीति शेष इति** । 'यदि नो साक्षिगम्यं तदि'ति पूर्वत्र यदीति श्रवणादिति भावः । नन्वत्र कालादेः परिमाणापकर्षानन्त्यस्य साक्षिसिद्धत्वाभावे तदुत्कर्षानन्त्यस्यापि साक्षिसिद्धत्वं न स्यादित्यापाद्यते । तदयुक्तम् । कालादेरुत्कर्षा-नन्त्यस्यैव परेणाङ्गीकारेण तस्य साक्षिसिद्धत्वाभावस्य परं प्रतीष्टत्वेन तदापादनस्येष्टापादनत्वात् तर्कमूल-भूतव्याप्त्यभावाच्चेत्यतः प्रकर्षानन्त्यस्य साक्षिसिद्धत्वोपपादनेन तदभावस्यानिष्टतामुपदर्शयन्नविशेषव्याप्तिमप्युप-दर्शयति **अयमभिसन्धिरिति** । **उपेत्येति** । अस्तु कालाकाशयोः परिमाणप्रकारोऽनवधिक इति तद्वचनादिति भावः ।

वा०र०— **परिमाणोत्कर्षानवधिकत्वमिति** । अत्र परिमाणापकर्षानवधिकत्वं इत्येव वक्तव्यम् । उत्कर्षग्रहणं तु दृष्टान्तार्थम् । **महत्त्वग्रहणं दृष्टान्तार्थमिति** मूले वक्ष्यति । ततोऽनुव्याख्यानानुसारेण प्रयोगो-ऽयम् । वक्ष्यति च **परिमाणापकर्षानन्त्यस्येति** । **आशङ्क्याहेति** । आशङ्क्य परिहरतीत्यर्थः । **सामान्येन परामर्शयतीति** मूलम् । नात्र सामान्येनेत्यस्य तच्चाविशेषमानेन जिज्ञासाधिकरणीयानुव्याख्यानरूपसामान्येन नपुंसकनिर्देश इति मूलवत् भिन्नलिङ्गतया उपस्थितानेकसाधारणपरामर्शे नपुंसकमित्यादि वाक्यार्थचन्द्रिकोक्त-रीत्येत्यर्थः । तत्र विशेषसाक्षिसाधकता मिथ्याभूतस्य साधकत्वं चेत्यर्थद्वयस्य प्रकृततया नपुंसकमनपुंसकेन इत्यनेन एकशेषोपपत्तावपि प्रकृतेऽर्थद्वयस्याभावात् । नापि युक्तिपादीय अनुव्याख्यानव्याख्यान इव प्रागुक्ता-स्मदीयार्थः । किन्तु सर्वपदार्थेषु विद्यमानं वस्तुत्वादिरूपं तत्त्वेन तद्व्यवहारे घटादिकं सु इत्येव व्यवह्रीयते तथैवापर्यवसितिरपि आनन्त्यशब्देनाभिहितेति आनन्त्यत्वरूपेणोपस्थितापर्यवसितेः आनन्त्यवाचिशब्देन नपुं-सकेन आनन्त्यत्वरूपेण तदित्यनेन परामर्शो युज्यते इति भावो मूलकारस्य बोध्यः । प्रथमाध्यायान्ते उपपादितमस्माभिः तदत्रानुसन्धेयम् । व्याप्त्यभावाच्चेत्यतःपरं कालादेः परिमाणोत्कर्षानन्त्यमङ्गीकृत्यैव तदप-कर्षानन्त्यस्यैवाक्षेपेण तस्योत्कर्षानन्त्यानङ्गीकारानुपपत्तिरिति तदङ्गीकारं सिद्धवत्कृत्येति पूरणीयम् । विशिष्ट-शङ्काप्रदर्शनेन सूचितत्वात् । **तद्वचनादितीति** । शङ्कादशायां शङ्कित्रा प्राक् तथैवोक्तेरित्यर्थः ।

विठ्ठल०— परिमाणापकर्षानन्त्यं साक्षिगम्यं नेति चोदिते महत्त्वं केन गम्यत इत्युत्तरमसङ्गतमित्यत आह **अयमभिसन्धिरिति** ।

॥ इति 'साक्षिणा नावगम्यते' इत्यादे विकल्पे आपत्तिः ॥

* * *

॥ अथ ततस्तत्र अनुमानगम्यत्वरूपद्वितीये विकल्पे आपत्तिः ॥

५० **सु०**— **'स्यादेतत् । न कालादेः परिमाणोत्कर्षानन्त्यं साक्षिसिद्धमिति ब्रूमः, किन्तु अनुमानगम्यम्, तथा च न प्रतिबन्दीग्रह'** इत्यत आह **विश्रान्तिरिति** ।

अनु०— विश्रान्तिस्तारतम्येन दृश्यते ह्यनुमानतः ।

'परिमाणोत्कर्षपरम्पराया' इति शेषः । **अनुमानत इति तृतीयार्थे तसिः । नानुमानेन कालादावनवधिकपरिमाणोत्कर्षसिद्धिः । हि यस्मात् तारतम्येन** अनुमानेन तत् **विश्रान्तिः दृश्यते । 'परिमाणोत्कर्षतारतम्यं इयत्तावत्परिमाणतारतम्यत्वात् तदपकर्षतारतम्यवदि'ति प्रत्यनुमानप्रतिरुद्धत्वादिति यावत् । न च दृष्टान्तोऽस्माकं साध्यविकल इति वाच्यम्, 'अपकर्षतारतम्यस्य अन्तवत्त्वमुपेत्योत्कर्षतारतम्यस्यानन्त्यमनुमिमानस्य परस्यैवं प्रतिपक्षोत्प्रेक्षा स्यादि'त्युच्यमानत्वात् । तथा च साक्षिविरुद्धं प्रत्यनुमानमिति वक्तव्यम् । कथं तर्हि स एव कालादावनवधिकापकृष्टपरिमाणं न साधयेदिति ।**

परि०— तारतम्येनेत्येतत्सामानाधिकरण्यादाह **तृतीयार्थे तसिरिति** । 'प्रतियोगे पञ्चम्यास्तसिरि'ति सूत्रे 'आद्यादिभ्य उपसङ्ख्यानमि'त्युक्तत्वात् आद्यादेराकृतिगणत्वादत्र तृतीयार्थे तसिरित्यर्थः ॥ **तारतम्येनानुमानेनेति** । तारतम्यत्वहेतुनेत्यर्थः । **अस्माकं** सिद्धान्तिनामित्यर्थः । **इति वक्तव्यमिति** । परिमाणोत्कर्षानन्त्यं ब्रुवतेति भावः । **स एवेति** । साक्ष्येवेत्यर्थः ।

यादु०— ननु तारतम्यस्यैव अनुमानत्वात् तयोश्च भिन्नविभक्तिकतया निर्देशात् विशेषणविशेष्यभावायोग इत्यत आह **अनुमानत इतीति** ।

वं०प०— **अस्माकमिति** । अपकर्षतारतम्यस्येयत्तामनभ्युपगच्छतां मते । **प्रत्यनुमानं** इयत्तासाधकम् । **स एव** साक्ष्येव ।

कं०रा०— 'विश्रान्तिस्तारतम्येन दृश्यते ह्यनुमानत' इत्यत्र तसिप्रत्ययस्य पञ्चम्यर्थत्वे तारतम्येन इत्यनेन सामानाधिकरण्यं न युक्तमित्यत आह **अनुमानत इतीति** । 'सार्वविभक्तिकस्तसिरि'ति तृतीयार्थेऽपि तसिप्रत्ययस्यानुशिष्टत्वादिति भावः । **तारतम्येनेति** । भावप्रधानो निर्देशः । **प्रत्यनुमानप्रतिरुद्धत्वादिति** । पराभिप्रेतस्य कालादिपरिमाणोत्कर्षानन्त्यसाधकानुमानस्येति शेषः । **अस्माकमिति** । अस्मन्मते परिमाणापकर्षतारतम्यस्य विश्रान्त्यभावादिति भावः ।

श्रीनिधि०— **हीति** प्रसिद्धिमाह । यद्वोपेत्य हीत्यनेन परिमाणापकर्षानभ्युपगमो विरोधनिमित्तक इति तदभिप्रायं द्योतयति **किन्त्वनुमानगम्यमिति** । योऽयं योजनादिपरिच्छिन्नो देशः सम्प्रतिपन्नः सः स्वतःस्थूलेन देशान्तरेण युक्तः देशत्वाद् ध्वस्तादिदेशवत् । सोऽप्येवं सोऽप्येवं त्वित्याद्यनुमानैर्देशे महत्त्वमवगम्यते । तथा मुहूर्तादिरूपः कालः स्वापेक्षया स्थूलस्वोत्तरकालवान् कालत्वात् घटिकादिरूपकालवत् सोऽप्येवं सोऽप्येवमिति काले महत्त्वानुमानम् । परिमाणं च काले कालिकं देशे दैशिकं द्रष्टव्यम् । केचित्तु कालस्यापि दैशिकमेव महत्त्वं क्षणादेः सकलदेशव्यापित्वादित्याहुः । **तृतीयार्थे तसिरिति** । दर्शनक्रियायां कारणमेवापेक्षितम् । न तु अपादानादिकमिति भावः । सार्वविभक्तिकश्चायं तारतम्येनानुमानेन न भावप्रधानो निर्देशः । परिमाणतारतम्यत्वेन हेतुनेत्यर्थः । **साक्षिविरुद्धमिति** । अनुभवविरुद्धमित्यर्थः ।

शे०वा०— ननु परिमाणोत्कर्षानन्त्यस्य साक्षिसिद्धत्वप्रतिबन्धा तदपकर्षानन्त्यस्य साक्षिसिद्धत्वसमर्थनेनाविरुद्धत्वसिद्धेर्विश्रान्तिरित्युत्तरभाष्ये कालादौ परिमाणोत्कर्षतारतम्यस्य परिमाणतारतम्यत्वेनेयत्तावत्त्वप्रतिपादनमनर्थकमित्याशङ्क्य तदुत्कर्षानन्त्यसाधकानुमानस्य प्रत्यनुमानपराहतत्वप्रतिपादनेन तस्यानुमानिकत्वेन प्रतिबन्दीग्रहासम्भवशङ्कापरिहारार्थत्वान्न तदिति भावेन तच्छङ्कापरिहारकतयोत्तरभाष्यं योजयितुं कालादावुत्कर्षानन्त्यस्यानुमानिकत्वेन प्रतिबन्दीग्रहासम्भवशङ्कामुत्थापयति **स्यादेतदिति** । तथा चेष्टापादनरूपत्वात् तर्काभासोऽयमिति भावः । तर्हि केन प्रमाणेन तदवगम्यत इति पृच्छति **किन्त्विति** । न ह्यभ्युपगमोऽप्रामाणिक इति सम्भवतीति भावः । उत्तरमाह **अनुमानगम्यमिति** । सम्प्रतिपन्नः सर्वोऽपि परिच्छिन्नः कालः स्वतः स्थूलेन कालान्तरेण युक्तः कालत्वान्मुहूर्तादिकालवदिति कालानन्त्यसाधकम् । संप्रतिपन्नः सर्वोऽपि परिच्छिन्नो देशः स्वतः स्थूलेन देशान्तरेण युक्तो देशत्वाद्धस्तादिदेशवदित्यादिपदोक्तं देशानन्त्यसाधकमनुमानं च द्रष्टव्यम् । प्रत्यनुमानस्य मूलारूढतासिद्ध्यर्थमपेक्षितं पूरयति **परिमाणोत्कर्षेति** । अनुमानत इति पञ्चम्यन्तात्तसिरिति पक्षे तारतम्यस्यैवानुमानत्वासिद्धेस्तत्सिद्ध्यर्थमाह **अनुमानत इति** । **तृतीयार्थे तसिरिति** । आद्यादित्वादिति भावः । भाष्ये हिशब्दानर्थक्यमाशङ्क्य यस्मादित्यर्थत्वान्न तदित्यभिप्रेत्य हेतुसमर्पकतया भाष्यं योजयितुमपेक्षितां प्रतिज्ञां तावत् पूरयति **नानुमानेनेति** । **न च दृष्टान्त इति** । सिद्धान्तेऽपकर्षतारतम्यस्याप्यनवधिकत्वाभ्युपगमेन इयत्तावत्त्वाभावादिति भावः । भवेदेतदेवं यद्येतत्सिद्धान्तिनोऽनुमानं स्यात् । न चैतदस्ति । किन्त्वित्यत आह **अपकर्षतारतम्यस्यान्तवत्त्वमिति** ।

वा०र०— आनुमानिकत्वेनेति । आनुमानिकत्वेन या प्रतिबन्दीग्रहासम्भवशङ्केति योजना शङ्का-परिहाराभिमानं तदुत्कर्षानन्त्येत्यादि पूर्वभागः । **सम्प्रतिपन्न** इत्यनेन धर्मासिद्धिनेत्युक्तं भवति । अनुमानत्वासिद्धेरिति भिन्नविभक्त्यन्ततया तारतम्यातिरिक्तानुमानप्रतीतेरिति भावः । **आद्यादित्वादीति** । तस्यादितः उदात्तं अर्धं ह्रस्वं इति सूत्रीयादितः इत्यादिप्रयोगज्ञापितप्रयोगे 'पञ्चम्यात्तसिरि'त्येतत्सूत्रीय 'आद्यादिभ्यः उपसङ्ख्यानमि'ति वार्तिकाया तृतीयार्थात्तसिरित्यर्थः । यदि सिद्धान्तिनो न भवति तर्हि कस्येदं इति पृच्छति **किन्त्विति** । इत्यतः इति प्रश्नः यतः प्राप्तः अतः तदुत्तरं दातुमाहेति योजना ।

विट्ठल०— तारतम्येनेत्येतत्सामानाधिकरण्यलाभायाह **तृतीयार्थे तसिरिति** । पञ्चम्यास्तसिरिति सूत्रे 'आद्यादिभ्य उपसङ्ख्यानमि'ति प्रथमादावपि तसेरुक्तत्वादिति भावः । प्रमाणोत्कर्षानन्त्यसाधकानुमानस्य प्रत्यनुमानपरतया मूलं योजयन् साक्षिणैवोत्कर्षानन्त्यसिद्धिरित्यङ्गीकार्यः, तदभिप्राय इत्याह **नानुमानेनेति** । **तारतम्येनानुमानेनेति** । तारतम्यत्वहेतुनेत्यर्थः ।

॥ इति अनुमानगम्यत्वरूपद्वितीये विकल्पे आपत्तिः ॥

* * *

॥ अथ तत्रान्ते आगमगम्यत्वरूपे तृतीये विकल्पे आपत्तिः ॥

५१ **सु०—** अस्तु तर्ह्यागमात्कालादावनवधिकोत्कृष्टपरिमाणसिद्धिरित्याशङ्क्याह **यदीति** ।

अनु०— यद्यागमादनन्तं तन्महत्त्वमवगम्यते ।
अनन्तमेव चाणुत्वं कुतो नैवावसीयते ॥

आगमात् स एषोऽनन्त इत्यादेः । **तन्महत्त्वं** कालादिपरिमाणोत्कर्षः । **अणुत्वं** परिमाणापकर्षः ।

एतदु(इदमु)क्तं भवति । नागमः कालाद्यनन्ततां स्वयं प्रतिपादयति, तत्प्रवृत्तेः प्रागेव साक्षिणा तत्प्रतिभासात्, किन्त्वनुवाद एवायम् । प्रतिपादकत्वे वा नास्मत्प्रयोजनपरिक्षयः, यस्मादागमात्कालाद्युत्कर्षोऽनवधिकः प्रतीयते तस्मादेवापकर्षानन्त्यप्रतीतेः । **अनन्त**शब्दो ह्यनवच्छेदमात्रमाचष्टे । स च यथा परिमाणोत्कर्षविषयो व्याख्यायते तथा तदपकर्षविषयोऽपि शक्यते व्याख्यातुमिति ।

परि०— स एषोऽनन्त इत्यादेरिति । आकाश इति होवाचेति प्रकृतमाकाशमेतच्छब्देन परामृश्य 'स एष परोवरीयानुद्गीथः स एषोऽनन्त' इति तस्यानन्त्योक्तेरिति भावः । आकाशस्तल्लिङ्गादित्यत्राकाशस्य विष्णुत्वोक्तावपि वैशेषिकादिभिस्तथात्वानङ्गीकारात् तैरेवात्र साक्षिसिद्धत्वे विवदमानैरागमसिद्धत्वशङ्कनात् तन्मतानुरोधेनैतद्वाक्योक्तिरित्यदोषः । आदिपदेन 'अनन्ताकाशवत्पश्यन्नि'त्यादि सङ्ग्रहः । ननु 'केवलं साक्षिमानेने'त्यत्र साक्ष्यन्यमानाप्रवृत्तेरुक्तत्वात् इहागमादपि परिमाणोत्कर्षापकर्षसिद्धिः कथमुपेयते इत्यतोऽभ्युपेत्यवादोऽयमिति भावेनाह **एतदुक्तं भवतीति** । **अनन्तशब्दो हीति** । स एषोऽनन्त इत्यादौ स्थित इति ज्ञेयम् । **साक्षिणा परिमाणोत्कर्षापकर्षसिद्धिः** ।

यादु०— स एषोऽनन्त इत्यादेरिति । अत्र तच्छब्दस्य प्रकृताकाशपरामर्शकत्वादिति भावः । यद्यप्याकाशाधिकरणेऽयमाकाशशब्दो विष्णुपरतया निर्णीतः, तथाऽप्यव्यक्ताधिकरणन्यायेनान्यपरोऽपि भवतीत्यभिप्रेत्येत्युक्तमिति ध्येयम् । केवलं साक्षिमानेनेत्यत्र कालाद्यानन्त्ये साक्ष्यतिरिक्तप्रमाणाप्रवृत्तेरुक्तत्वादिदानीं कथमागमात् तत्सिद्धिरुच्यत इत्यत आह **इदमुक्तं भवतीति** । **अनुवाद एवायमिति** । वस्तुतः पूर्वपक्षिणं प्रत्येवमेवोत्तरं देयमतो न विरोध इति भावः । केवलसाक्षिभास्यत्वं तु प्रथमाध्यायोक्तैर्जातिबधिराणामप्याकाशादिप्रतीतेरित्यादिहेतुभिः सिद्धम् । अतः केवलसाक्षिभास्यत्वे सिद्धे आगमस्यानुवादत्वसिद्धिः, तत्सिद्धौ च केवलसाक्षिभास्यत्वसिद्धिरित्यन्योन्याश्रय इति परास्तम् । एवं वास्तवं परिहारं स्वयमभिधाय मूलमभ्युपगमवादेनैव प्रवृत्तमतो न विरोध इत्याशयेनाह **प्रतिपादकत्वे वेति** ।

वं०प०— किन्त्विति । साक्षिसिद्धामनन्ततामनुवदति श्रुतिरित्येव, न तु तत्र स्वार्थसत्तानिश्चायकत्वरूपं तात्पर्यमित्यर्थः । अभ्युपेत्याह **प्रतिपादकत्वे इति** । अर्थप्रतिपादने यदि तात्पर्यमित्यर्थः ।

कं०रा०— तत्प्रवृत्तेरिति । आगमप्रवृत्तेः प्रागेव कालादिपरिमाणोत्कर्षानन्त्यस्य साक्षिणा गृहीतत्वादित्यर्थः ।

श्रीनिधि०— आगमात् स एषो अनन्त इत्यादेरिति । आकाशादेव समुत्पद्यन्ते इत्याकाशप्रकरणत्वादस्येति भावः । इदं चापातप्रतीतिमनुसृत्योक्तम् । वस्तुतो भगवत्परमिदम् । ननु केवलमिति साक्षीतरप्रमाणान्तराभावः प्रतिज्ञातः । तथा च कथमागमः शङ्क्यते अनवसरत्वादित्यतः प्रमाणान्तराप्रवृत्तौ हेतुं वदन् अभ्युपगमवादोऽयमित्याह **एतदुक्तं भवतीत्यादिना** । दृष्टान्तार्थमिति महत्त्वविश्रान्ते परेणानाशङ्कितत्वादिति भावः ।

शे०वा०— ननु 'यद्यागमादनन्तं तदि'त्याद्युत्तरभाष्यमनर्थकम् । कालादावुत्कर्षानन्त्यस्यानुमानिकत्वनिरासेन उत्कर्षापकर्षानन्त्यस्य साक्षिसिद्धतायाः पूर्वेणैव सिद्धत्वात् । न च कालादेः उत्कर्षानन्त्यस्य आगमसिद्धतां शङ्कमानं प्रति तदपकर्षानन्त्यस्यापि आगमसिद्धतोपपादनार्थं तदिति वाच्यम् । प्रयोजनविशेषाभावेन साक्षिसिद्धतापरित्यागेन कालादौ परिमाणोत्कर्षानन्त्यस्यागमसिद्धताया एवानाशङ्कनीयत्वात् तत एव च तदपकर्षानन्त्यस्याप्यागमसिद्धतोपपादनस्याप्यनुपयोगादित्यतः कालादेरुत्कर्षानन्त्यस्यागमसिद्धत्वेन साक्षिसिद्धत्वाभावात् कालादावुत्कर्षापकर्षानन्त्ययोरुत्कर्षानन्त्यस्य साक्षिसिद्धत्वेऽपकर्षानन्त्यस्यापि तदेष्टव्यम् । अपकर्षानन्त्यस्य तदसिद्धत्वे चोत्कर्षानन्त्यस्यापि तदसिद्धत्वमेवेति सिद्धान्तिनोक्ताया 'यदि नो साक्षिगम्यं तदि'ति साक्षिसिद्धत्वप्रतिबन्धाः आपादकासिद्धिव्युत्पादनेन वाऽऽपाद्यस्येष्टत्वव्युत्पादनेन वा परिहारार्थतयाऽर्थवत्त्वेन परेण तदाशङ्कायाः कर्तव्यत्वात् सिद्धान्तिनश्च माऽस्त्वेवमुत्कर्षानन्त्ययोः कालादौ साक्षिसिद्धत्वप्रतिबन्दी, आगमसिद्धत्वप्रतिबन्दी तु वक्ष्यमाणरीत्या स्यादेवेति व्यर्थ एव साक्षिसिद्धत्वपरित्यागेनोत्कर्षानन्त्यस्यागमसिद्धताऽङ्गीकारः परस्येति ज्ञापनायापकर्षानन्त्यस्यागमसिद्धत्वोपपादनमप्यावश्यकमेवेति न काऽपि अनुपपत्तिरिति भावेन तदाशङ्कापरिहारकतयोत्तरभाष्यं योजयितुं साक्षिसिद्धत्वप्रतिबन्दीं मोचयितुं कालादावुत्कर्षानन्त्यस्यागमसिद्धत्वशङ्कामुत्थापयति **अस्तु तर्हीति** । **स एषोऽनन्त इत्यादेरिति** । आदिपदेन कालानन्त्यप्रतिपादकागमपरिग्रहः । अत्र च स इति तच्छब्दस्याकाश इति होवाचेति पूर्ववाक्यप्रकृताकाशपरत्वाद्विवक्षितार्थसिद्धिः । यद्यप्यत्राकाशस्तल्लिङ्गादिति न्यायेनास्याकाशस्य विष्णुत्वान्न स एषोऽनन्त इत्यागमेन प्रसिद्धाकाशस्योत्कर्षानन्त्यसिद्धिरित्येव वक्तुमुचितम् । तथाऽप्यङ्गीकृत्य पूर्वपक्षरीत्याऽस्याकाशस्य प्रसिद्धाकाशत्वं अयं ग्रन्थः । अङ्गीकारवादस्येदं प्रयोजनम् । यत्साक्षिसिद्धत्वप्रतिबन्दीपरिहारायाङ्गीकृतमुत्कर्षानन्त्यस्यागमसिद्धत्वं तदुत्कर्षापकर्षानन्त्ययोराकाशादौ आगमसिद्धत्वप्रतिबन्धन्तरसम्पादकत्वादनर्थकमेवेति ज्ञापनमिति ध्येयम् ।

ननु केवलं साक्षिमानेनेत्यादिना कालाद्यानन्त्ये साक्ष्यतिरिक्तप्रमाणाभावस्योक्तत्वादागमात्तत्सिद्धिव्युत्पादनं पर्वविरुद्धमित्यतो यद्यागमादित्यादिनोक्तप्रमाणान्तराभ्युपगमस्याङ्गीकारवादत्वान्न विरोध इति भावेन अङ्गीकारवादतया ग्रन्थतात्पर्यं वक्तुं केवलमित्यादिपूर्वग्रन्थानुरोधेन वस्तुस्थितिं तावदाह **एतदुक्तं भवतीति** । कुतो न स्वयं प्रतिपादयतीत्यत आगमप्रवृत्तेः प्राक् सतः कालाद्यानन्त्यज्ञानस्यागमनिमित्तत्वायोगादित्याह **तत्प्रवृत्तेरिति** । अन्यथा कदाचित्तत्र संशयविपर्ययाद्यन्यतमप्रसङ्गादिति भावः । तत्प्रवृत्तेः प्रागेवेत्युपलक्षणम् । सर्वथा तत्प्रवृत्तयोग्यानां जातिबधिराणामपि तत्प्रतिभासनादित्यपि द्रष्टव्यम् । का तर्हि स एषोऽनन्त इत्यादेर्गतिरिति पृच्छति **किन्त्विति** । उत्तरमाह **अनुवाद एवायमिति** । साक्षिसिद्धानन्त्यानुवाद एवेत्यर्थः । **तत्प्रवृत्तेः प्रागेवेति** । पूर्वोक्तयुक्तेरेवेति भावः । अत एव केवलसाक्षिभास्यत्वसिद्धे आगमस्यानुवादकत्वसिद्धिः तत्सिद्धौ च केवलसाक्षिभास्यत्वसिद्धिरित्यन्योन्याश्रयोऽपि निरस्तः । आगमप्रवृत्तेः प्राक् सतः कालाद्यानन्त्यज्ञानस्यागमनिमित्तकत्वानुपपत्त्यैव तत्सिद्धया केवलसाक्षिभास्यत्वसिद्धेरनुवादकत्वसिद्धयनपेक्षत्वादिति

परि०— स एषोऽनन्त इत्यादेरिति । आकाश इति होवाचेति प्रकृतमाकाशमेतच्छब्देन परामृश्य 'स एष परोवरीयानुद्गीथः स एषोऽनन्त' इति तस्यानन्त्योक्तेरिति भावः । आकाशस्तल्लिङ्गादित्यत्राकाशस्य विष्णुत्वोक्तावपि वैशेषिकादिभिस्तथात्वानङ्गीकारात् तैरेवात्र साक्षिसिद्धत्वे विवदमानैरागमसिद्धत्वशङ्कनात् तन्मतानुरोधेनैतद्वाक्योक्तिरित्यदोषः । आदिपदेन 'अनन्ताकाशवत्पश्यन्नि'त्यादि सङ्ग्रहः । ननु 'केवलं साक्षिमानेने'त्यत्र साक्ष्यन्यमानाप्रवृत्तेरुक्तत्वात् इहागमादपि परिमाणोत्कर्षापकर्षसिद्धिः कथमुपेयते इत्यतोऽभ्युपेत्यवादोऽयमिति भावेनाह **एतदुक्तं भवतीति** । **अनन्तशब्दो हीति** । स एषोऽनन्त इत्यादौ स्थित इति ज्ञेयम् । **साक्षिणा परिमाणोत्कर्षापकर्षसिद्धिः** ।

यादु०— स एषोऽनन्त इत्यादेरिति । अत्र तच्छब्दस्य प्रकृताकाशपरामर्शकत्वादिति भावः । यद्यप्याकाशाधिकरणेऽयमाकाशशब्दो विष्णुपरतया निर्णीतः, तथाऽप्यव्यक्ताधिकरणन्यायेनान्यपरोऽपि भवतीत्यभिप्रेत्येत्युक्तमिति ध्येयम् । केवलं साक्षिमानेनेत्यत्र कालाद्यानन्त्ये साक्ष्यतिरिक्तप्रमाणाप्रवृत्तेरुक्तत्वादिदानीं कथमागमात् तत्सिद्धिरुच्यत इत्यत आह **इदमुक्तं भवतीति** । **अनुवाद एवायमिति** । वस्तुतः पूर्वपक्षिणं प्रत्येवमेवोत्तरं देयमतो न विरोध इति भावः । केवलसाक्षिभास्यत्वं तु प्रथमाध्यायोक्तैर्जातिबधिराणामप्याकाशादिप्रतीतेरित्यादिहेतुभिः सिद्धम् । अतः केवलसाक्षिभास्यत्वे सिद्धे आगमस्यानुवादत्वसिद्धिः, तत्सिद्धौ च केवलसाक्षिभास्यत्वसिद्धिरित्यन्योन्याश्रय इति परास्तम् । एवं वास्तवं परिहारं स्वयमभिधाय मूलमभ्युपगमवादेनैव प्रवृत्तमतो न विरोध इत्याशयेनाह **प्रतिपादकत्वे वेति** ।

वं०प०— किन्त्विति । साक्षिसिद्धामनन्ततामनुवदति श्रुतिरित्येव, न तु तत्र स्वार्थसत्तानिश्चायकत्वरूपं तात्पर्यमित्यर्थः । अभ्युपेत्याह **प्रतिपादकत्वे इति** । अर्थप्रतिपादने यदि तात्पर्यमित्यर्थः ।

कं०रा०— तत्प्रवृत्तेरिति । आगमप्रवृत्तेः प्रागेव कालादिपरिमाणोत्कर्षानन्त्यस्य साक्षिणा गृहीतत्वादित्यर्थः ।

श्रीनिधि०— आगमात् स एषो अनन्त इत्यादेरिति । आकाशादेव समुत्पद्यन्ते इत्याकाशप्रकरणत्वादस्येति भावः । इदं चापातप्रतीतिमनुसृत्योक्तम् । वस्तुतो भगवत्परमिदम् । ननु केवलमिति साक्षीतरप्रमाणान्तराभावः प्रतिज्ञातः । तथा च कथमागमः शङ्क्यते अनवसरत्वादित्यतः प्रमाणान्तराप्रवृत्तौ हेतुं वदन् अभ्युपगमवादोऽयमित्याह **एतदुक्तं भवतीत्यादिना** । दृष्टान्तार्थमिति महत्त्वविश्रान्ते परेणानाशङ्कितत्वादिति भावः ।

शे०वा०— ननु 'यद्यागमादनन्तं तदि'त्याद्युत्तरभाष्यमनर्थकम् । कालादावुत्कर्षानन्त्यस्यानुमानिकत्वनिरासेन उत्कर्षापकर्षानन्त्यस्य साक्षिसिद्धतायाः पूर्वेणैव सिद्धत्वात् । न च कालादेः उत्कर्षानन्त्यस्य आगमसिद्धतां शङ्कमानं प्रति तदपकर्षानन्त्यस्यापि आगमसिद्धतोपपादनार्थं तदिति वाच्यम् । प्रयोजनविशेषाभावेन साक्षिसिद्धतापरित्यागेन कालादौ परिमाणोत्कर्षानन्त्यस्यागमसिद्धताया एवानाशङ्कनीयत्वात् तत एव च तदपकर्षानन्त्यस्याप्यागमसिद्धतोपपादनस्याप्यनुपयोगादित्यतः कालादेरुत्कर्षानन्त्यस्यागमसिद्धत्वेन साक्षिसिद्धत्वाभावात् कालादावुत्कर्षापकर्षानन्त्ययोरुत्कर्षानन्त्यस्य साक्षिसिद्धत्वेऽपकर्षानन्त्यस्यापि तदेष्टव्यम् । अपकर्षानन्त्यस्य तदसिद्धत्वे चोत्कर्षानन्त्यस्यापि तदसिद्धत्वमेवेति सिद्धान्तिनोक्ताया 'यदि नो साक्षिगम्यं तदि'ति साक्षिसिद्धत्वप्रतिबन्धाः आपादकासिद्धिव्युत्पादनेन वाऽऽपाद्यस्येष्टत्वव्युत्पादनेन वा परिहारार्थतयाऽर्थवत्त्वेन परेण तदाशङ्कायाः कर्तव्यत्वात् सिद्धान्तिनश्च माऽस्त्वेवमुत्कर्षानन्त्ययोः कालादौ साक्षिसिद्धत्वप्रतिबन्दी, आगमसिद्धत्वप्रतिबन्दी तु वक्ष्यमाणरीत्या स्यादेवेति व्यर्थ एव साक्षिसिद्धत्वपरित्यागेनोत्कर्षानन्त्यस्यागमसिद्धताऽङ्गीकारः परस्येति ज्ञापनायापकर्षानन्त्यस्यागमसिद्धत्वोपपादनमप्यावश्यकमेवेति न काऽपि अनुपपत्तिरिति भावेन तदाशङ्कापरिहारकतयोत्तरभाष्यं योजयितुं साक्षिसिद्धत्वप्रतिबन्दीं मोचयितुं कालादावुत्कर्षानन्त्यस्यागमसिद्धत्वशङ्कामुत्थापयति **अस्तु तर्हीति** । **स एषोऽनन्त इत्यादेरिति** । आदिपदेन कालानन्त्यप्रतिपादकागमपरिग्रहः । अत्र च स इति तच्छब्दस्याकाश इति होवाचेति पूर्ववाक्यप्रकृताकाशपरत्वाद्विवक्षितार्थसिद्धिः । यद्यप्यत्राकाशस्तल्लिङ्गादिति न्यायेनास्याकाशस्य विष्णुत्वान्न स एषोऽनन्त इत्यागमेन प्रसिद्धाकाशस्योत्कर्षानन्त्यसिद्धिरित्येव वक्तुमुचितम् । तथाऽप्यङ्गीकृत्य पूर्वपक्षरीत्याऽस्याकाशस्य प्रसिद्धाकाशत्वं अयं ग्रन्थः । अङ्गीकारवादस्येदं प्रयोजनम् । यत्साक्षिसिद्धत्वप्रतिबन्दीपरिहारायाङ्गीकृतमुत्कर्षानन्त्यस्यागमसिद्धत्वं तदुत्कर्षापकर्षानन्त्ययोराकाशादौ आगमसिद्धत्वप्रतिबन्धन्तरसम्पादकत्वादनर्थकमेवेति ज्ञापनमिति ध्येयम् ।

ननु केवलं साक्षिमानेनेत्यादिना कालाद्यानन्त्ये साक्ष्यतिरिक्तप्रमाणाभावस्योक्तत्वादागमात्तत्सिद्धिव्युत्पादनं पर्वविरुद्धमित्यतो यद्यागमादित्यादिनोक्तप्रमाणान्तराभ्युपगमस्याङ्गीकारवादत्वान्न विरोध इति भावेन अङ्गीकारवादतया ग्रन्थतात्पर्यं वक्तुं केवलमित्यादिपूर्वग्रन्थानुरोधेन वस्तुस्थितिं तावदाह **एतदुक्तं भवतीति** । कुतो न स्वयं प्रतिपादयतीत्यत आगमप्रवृत्तेः प्राक् सतः कालाद्यानन्त्यज्ञानस्यागमनिमित्तत्वायोगादित्याह **तत्प्रवृत्तेरिति** । अन्यथा कदाचित्तत्र संशयविपर्ययाद्यन्यतमप्रसङ्गादिति भावः । तत्प्रवृत्तेः प्रागेवेत्युपलक्षणम् । सर्वथा तत्प्रवृत्तयोग्यानां जातिबधिराणामपि तत्प्रतिभासनादित्यपि द्रष्टव्यम् । का तर्हि स एषोऽनन्त इत्यादेर्गतिरिति पृच्छति **किन्त्विति** । उत्तरमाह **अनुवाद एवायमिति** । साक्षिसिद्धानन्त्यानुवाद एवेत्यर्थः । **तत्प्रवृत्तेः प्रागेवेति** । पूर्वोक्तयुक्तेरेवेति भावः । अत एव केवलसाक्षिभास्यत्वसिद्धे आगमस्यानुवादकत्वसिद्धिः तत्सिद्धौ च केवलसाक्षिभास्यत्वसिद्धिरित्यन्योन्याश्रयोऽपि निरस्तः । आगमप्रवृत्तेः प्राक् सतः कालाद्यानन्त्यज्ञानस्यागमनिमित्तकत्वानुपपत्त्यैव तत्सिद्ध्या केवलसाक्षिभास्यत्वसिद्धेरनुवादकत्वसिद्ध्यनपेक्षत्वादिति

ध्येयम् । यद्वाऽस्य लोकस्य का गतिरिति सर्वलोकगतिप्रश्नोत्तरत्वेनाकाशमेव सर्वाधारत्वेन इति होवाचेति वाक्येन प्रतिज्ञाय तत्र हेत्वाकाङ्क्षायां सर्वाणीत्यारभ्य 'स एषोऽनन्त' इत्यन्तेनानन्तत्वादिकं तत्र हेतुतया तावदुच्यते । न चासिद्धस्य हेतुत्वमुपपन्नम् । ह वा इति प्रसिद्धिद्योतकनिपातद्वयविरुद्धं च । ततः सिद्धत्वे वाच्ये तस्याश्च प्रमाणान्तरेणोक्तरीत्याऽनुपपन्नत्वेन साक्षिणैव वाच्यतया तत्सिद्धाऽऽनन्त्यानुवादकत्वमेव 'स एषोऽनन्त' इत्यादेरेष्टव्यमित्येवं केवलमित्यादिपूर्वग्रन्थानुरोधेन वास्तवं परिहारमभिधायाभ्युपगमवादतया मूलग्रन्थतात्पर्यमाह **प्रतिपादकत्वे वेति** । अभ्युपगमवादप्रयोजनं चागमस्योत्कर्षानन्त्यप्रतिपादकत्ववत्परीत्यैव तदपकर्षानन्त्य-प्रतिपादकत्वसूचनमेवेति बोध्यम् । इतीत्यस्येत्येतदुक्तं भवतीति पूर्वेण सम्बन्धः ।

वा०र०— उत्कर्षापकर्षानन्त्यस्येति । उत्कर्षानन्त्यवत् अपकर्षानन्त्यस्यापि साक्षिसिद्धत्वमित्यस्य पूर्वेणैव सिद्धेरित्यर्थः । **कालानन्त्यप्रतिपादकागमेति** । अङ्गीकारवादस्य च इदमिति चशब्दयुक्तः पाठः स्वरसः । तन्मतत्वमित्यस्य तस्य महत्त्वमिति व्यधिकरणताभिप्रायेणाह **मूले कालादीति** । **संशयविपर्यया-द्यन्यतमेति** । आदिपदेनाज्ञानस्य परिग्रहः । एतच्चोक्तं **तत्सिद्धेरिति** । केवलसाक्षिभास्यत्वसिद्धेत्यर्थः । आकाशाधिकरणीयचन्द्रिकाद्युक्तरीत्याह **यद्वेति** । **प्रमाणान्तरेणेति** । अनुमानरूपप्रमाणान्तरेणेत्यर्थः । **प्रति-पादकत्वसूचनमेवेति** । प्रतिपादकत्वप्रतिबन्दीसूचनमित्यर्थः । प्राक् तथैवोक्तेरिति ज्ञेयम् ।

स०व्र०— ननु 'केवलं साक्षिमानेन' इत्यत्र केवलशब्देन कालाद्यानन्त्ये साक्ष्यतिरिक्तप्रमाणान्तरा-भावस्य पूर्वं प्रतिज्ञातत्वात् इदानीं *यद्यागमादित्यस्य* कालाद्यानन्त्यप्रमाणकत्वोक्तौ पूर्वोत्तरविरोधः स्यादित्यत आह **एतदुक्तं भवतीति** । **किन्त्वनुवाद एवायमिति** । ननु कालाद्यानन्त्यं न साक्षिग्राह्यम् । किं तु आगमग्राह्यमेवेति वदन्तं प्रति आगमस्य साक्षिसिद्धानन्त्यानुवादत्वोक्तिरयुक्ता । सिद्धे कालाद्यानन्त्यस्य साक्षिसिद्धत्वे 'स एषोऽनन्त' इत्यागमस्य तदनुवादकत्वसिद्धिः । तत्सिद्धौ च प्रमाणान्तराभावात् कालाद्यानन्त्यस्य साक्षिग्राह्यत्वसिद्धिरित्यन्योन्याश्रयापातादिति चेन्न । जातिबधिराणामपि कालाकाशप्रतीतेः आगमस्य तद्बोधकत्वानुपपत्त्या साक्षिणैव तत्सिद्धेरिति प्रथमाध्यायोक्तार्थस्यात्राभिप्रेतत्वेन अन्योन्याश्रया-नवकाशात् । 'अस्य लोकस्य का गतिः' इति प्रश्नोत्तरत्वेन 'आकाश इति होवाच' इत्यनेनाकाशस्य सर्वाधारत्वं प्रतिज्ञाय तत्र हेत्वाकाङ्क्षायां 'सर्वाणी'त्यारभ्य 'स एषोऽनन्त' इत्यन्तेन अनन्तत्वादेस्तत्र हेतुत्वाभिधानात् । असिद्धस्य तदनुपपत्तेः, सिद्धेश्च मानान्तरेणासम्भवेन साक्षिण एव तत्त्वस्य वक्तव्यत्वात् आगमस्य तदनुवादकत्वमभिप्रेतमित्यप्याहुः ।

विठ्ठल०— स एषोऽनन्त इति । 'आकाश इति होवाचे'ति प्रकृतस्य अत्र स एष इत्यनेन परामर्शः । आकाशाधिकरणेत्यत्र आकाशशब्दस्य भगवत्परतासमर्थनेऽपि पौरगनमित्यत्र विषये प्रमाणतया सोपन्यस्तत्वात् तन्मतानुसारेणैतद्वाक्यग्रहणम् । अव्यक्ताधिकरणन्यायेनाकाशार्थत्वं च सम्भवतीति व्याख्याने तु परोवरीयस्त्वादिघटना कथमिति चिन्त्यम् । 'केवलं साक्षिमानेन' इत्यत्र साक्ष्यन्यप्रमाणाप्रवृत्तेरुक्तत्वात्

कथमागमासिद्धिरुच्यत इत्यतोऽभ्युपगमवादोऽयमित्याशयेन दर्शनपूर्वकं 'स एषोऽनन्त' इत्यस्य कथं परिमाणापकर्षापर्यवसितिपरत्वमिति शङ्कां निराह **एतदुक्तं भवतीति** ।

चषक— अनन्तशब्दो हीति । 'स एषोऽनन्त' इत्यादौ स्थित इत्यवसेयम् । **साक्षिणा परिमाणोत्कर्षापकर्षसिद्धिः** ।

॥ इति आगमगम्यत्वरूपे तृतीये विकल्पे आपत्तिः ॥
॥ इति आद्यविकल्पनिरासः (कालाकाशगतपरिमाणोत्कर्षापकर्षयोः आनन्त्यस्य साक्ष्यनवगतत्वनिरासः) ॥

* * *

॥ अथ द्वितीयविकल्पनिरासः
(साक्षिणाऽवगतस्य कालाकाशगतपरिमाणोत्कर्षापकर्षयोरानन्त्यस्य असत्यतानिरासः) ॥
॥ अथ तत्रादौ 'साक्षिणा अवगतेऽपि न तत्सत्यता' इति द्वितीयविकल्पविवरणपूर्वकं तस्य निरासः ॥
॥ अथ तत्राप्यादौ तदुपलम्भकबलवत्प्रमाणाभावः ॥

५२ **सु०—** 'परिमाणोत्कर्षवत् तदपकर्षस्यापि कालादावानन्त्यं साक्षिणाऽऽगमेन वा प्रतीयत एव, तथाऽपि न तत्सत्यम्, न हि प्रतीतत्व(ति)मात्रेण सत्यतानिश्चयोऽतिप्रसङ्गादि'ति द्वितीयं निराकरोति **महत्त्वेति** ।

अनु०— महत्त्वाणुत्वयोर्नैव विश्रान्तिरुपलभ्यते ।

कालादौ परिमाणोत्कर्षापकर्षयोः **विश्रान्तिः** इयत्तावच्छेदो बलवत्प्रमाणेन **नैवोपलभ्यते** । अत्र **महत्त्वग्रहणं** दृष्टान्तार्थम् ।

इदमुक्तं भवति । यथा कालादौ परिमाणोत्कर्षस्यानन्त्यं साक्ष्याद्यवगतं विपरीतग्राहकप्रमाणाभावात् सत्यमेव तथा तदपकर्षस्यापि । विना बाधकेन साक्ष्यादिसिद्धं परिमाणापकर्षानन्त्यं कालादावसत्यं चेत् तदुत्कर्षानन्त्यमप्य(कालादाव)सत्यं स्यात्, अविशेषात् । ततश्चापरिच्छिन्नपरिमाणताऽङ्गीकारो (भज्येत) नङ्क्ष्येत । अतिप्रसङ्गस्तु बाधकाभावेनापास्त इति ।

परि०— साक्ष्यवगतोऽपि न सत्य इति प्राग्विकल्पितद्वितीयकल्पं विवृण्वन्नेवावतारयति **परिमाणोत्कर्षवदित्यादिना अतिप्रसङ्गादिति द्वितीयं निराकरोतीत्यन्तेन** । शुक्तिरूप्यादेरपि सत्यत्वापत्तिरूपातिप्रसङ्गादित्यर्थः । प्रागणुत्वासिद्धेरेव शङ्कनादाह **अत्र महत्त्वग्रहणमिति** । अस्फुटत्वादाह **इदमुक्तं भवतीति** । एवं तर्हि प्रागुक्तातिप्रसङ्गस्य का गतिरित्यत आह **अतिप्रसङ्गस्त्विति** । शुक्तिरूप्यादेर्बाधकाभावादिति वैषम्यमिति भावः ।

यादु०— **अतिप्रसङ्गस्त्विति** । प्रतीतत्वमात्रेण सत्यतानिश्चये शुक्तिरजतादेरपि तन्निश्चयः स्यादित्यतिप्रसङ्गस्तु प्रतीतत्वहेतुविशेषणतया विवक्षितेन बाधकाभावेनापास्त इत्यर्थः ।

कं०रा०— **अतिप्रसङ्गादिति** । प्रतीतत्वमात्रेण सत्यत्वनिश्चये शुक्तिकारूप्यादेरपि तथात्वप्रसङ्गादित्यर्थः ।

श्रीनिधि०— **अतिप्रसङ्गस्त्विति** । प्रतीतिमात्रेण सत्यतानिश्चये शुक्तिरूप्यादेरपि सत्यता स्यादित्यतिप्रसङ्ग इत्यर्थः ।

शे०वा०— महत्त्वाणुत्वयोरित्यादिग्रन्थस्यानर्थक्यमाशङ्क्य द्वितीयपक्षनिरासकतया तं सङ्गमयितुं तं पक्षमुत्थापयति **परिमाणेति** । **अतिप्रसङ्गादिति** । शुक्तिरजतादेरपि प्रतीततया तत्सत्यतानिश्चयप्रसङ्गादित्यर्थः । भाष्ये कालादावणुत्वपरिमाणापकर्षस्य विश्रान्तिरियत्तापरिच्छेदो बलवत्प्रमाणे नैवोपलभ्यत इत्येतावतैव साक्ष्याद्यवगतस्यापकर्षानन्त्यस्य सत्यतासिद्धेर्महत्त्वग्रहणमधिकमित्याशङ्क्याह **अत्रेति** । कथमत्र दृष्टान्तदार्ष्टान्तिकभावः किं च दृष्टान्तोपदर्शनेन प्रयोजनमित्यत आह **इदमुक्तं भवतीति** । तत्र दृष्टान्तदार्ष्टान्तिकभावोपपादनं **यथेत्यादि** । तदपकर्षस्यापीत्यतः परं आनन्त्यं साक्ष्याद्यवगतं विपरीतग्राहकप्रमाणाभावात् सत्यमेवेत्यनुवर्तनीयम् । दृष्टान्तोपदर्शनप्रयोजनमाह **विनेति** । यदविशिष्टस्य यस्य यद्भवति तदविशिष्टस्यापरस्यापि तद्भवतीति तर्कमूलभूतसामान्यव्याप्तेः सूचनायाह **अविशेषादिति** । इष्टापत्तिं परिहरति **ततश्चेति** । एवं तर्हि प्रतीतत्वाविशेषाच्छुक्तिरजतादेरपि सत्यतानिश्चयप्रसङ्ग इत्यतो भवेदयमतिप्रसङ्गः यदि प्रतीततामात्रं तत्सत्यतानिश्चायकतयाऽभिमतं स्यान्न चैतदस्ति । किन्तु निर्बाधप्रतीतत्वमेव, तच्च न शुक्तिरजतादेरस्तीति नातिप्रसङ्ग इत्याह **अतिप्रसङ्गस्त्विति** ।

विट्ठल०— साक्ष्यवगतोऽपि न सत्य इति प्राग्विकल्पितं पक्षं विवृण्वन् तन्निरासकतयोत्तरमूलमवतारयति **परिमाणोत्कर्षवदिति** । **अतिप्रसङ्गादिति** । प्रतीतत्वमात्रेण सत्यतानिश्चये शुक्तिरूप्यादेरपि सत्यत्वं स्यादित्यतिप्रसङ्गादित्यर्थः । दृष्टान्तोक्तिमात्रेण कथं सत्यतासिद्धिरतिप्रसङ्गादित्यत आह **इदमुक्तं भवतीति** ।

* * *

॥ अथ च तत्रादौ परिमाणापकर्षस्यानन्त्याभ्युपगमे बाधकरूपप्रमाणसद्भावशङ्कानिरासः ॥

॥ अथ च तत्राप्यादौ महत्त्वाणुत्वदृष्टान्तेन अनन्तत्वस्य अनल्पतार्थतायां बाधकशङ्का ॥

५३ **सु०—** अन्वस्त्येव परिमाणापकर्षस्यानन्त्याभ्युपगमे बाधकम् । तथा हि । अपकर्षो नामाल्पता, आनन्त्यं चानल्पता । न च विरुद्धयोर्विशेषणविशेष्यभावः सम्भवति, न हि भवति पीतोऽपीत इति । अतो बाधकसद्भावात्प्रतीतमप्यपकर्षानन्त्यं त्यज्यत इत्यत आह **अन्यदेवेति** ।

अनु०— अन्यदेव ह्यनन्तत्वं महत्त्वाणुत्वयोः समम् ।

न **अनन्तत्वं** नाम अनल्पत्वम् । किन्तु **अन्यदेव** परिच्छेदाभावरूपम् । तस्मात् परिमाणोत्कर्षापकर्षयोः समानो धर्म इति युज्यते ।

अत्रापि महत्त्वग्रहणं दृष्टान्तत्वेन, यथा महत्त्वस्य विशेषणं तथा अणुत्वस्यापीति ।

यद्यनन्तत्वं नामानल्पत्वं स्यात् तदोत्कर्षस्यापि विशेषणं न स्यात् । न हि तदेव तस्य विशेषणं भवति, पीतः पीत इत्यदर्शनात् । अतस्तत्रानन्त्यं नाम परिच्छेदाभाव इति स्वीकृत्य विशेषणविशेष्यभावः समर्थनीयः । तथा प्रकृतेऽपीति । यथा हि परिमाणोत्कर्षो गगनादावधिकस्तथा तदपकर्षोऽप्यनवधिक एवेति विशेषणविशेष्यभावाभ्युपगमे न कोऽपि दोष इति ।

यादु०— आनन्त्यं चानल्पतेत्यत्रानल्पताशब्दान्तर्गताल्पशब्दो भावप्रधानो विवक्षितः । अन्त्याल्पशब्दयोः पर्यायत्वात् । तथा चानन्त्यं अनल्पतेत्यर्थः पर्यवस्यति । एवमग्रेऽपि । तेन यथाश्रुते वक्ष्यमाणविरोधादेरनुपपत्तिः । अपकर्षादिकमनन्तमिति प्रयोगस्याल्पत्वादिकमनल्पमित्यर्थप्राप्त्या विरोधादेरसम्भवादिति दूषणानवकाश इति ध्येयम् । ततः किमित्यत आह **न च विरुद्धयोरिति** । अपकर्षोऽनन्त इति प्रयोगे ह्यल्पत्वमनल्पत्वमित्युक्तं स्यात् । न चेदं सम्भवति । स्वस्मिन्स्वान्यत्वस्य विरुद्धत्वेन विशेषणत्वानुपपत्तेरित्यर्थः । ननु तथाऽपि विरुद्धयोरिति कथम् । प्रतियोगिनोऽल्पत्वस्य तदन्यस्य च परस्परविरहरूपत्वादिरूपविरोधासम्भवादिति चेन्मैवम् । परस्परं भिन्नयोर्नाभेदेनान्वयः सम्भवतीत्यत्र तात्पर्यात् । नञः प्रतिषेधा-

र्थत्वेन परस्परविरहरूपत्वरूप एव विरोधोऽत्राभिप्रेत इत्यप्याहुः । तथा प्रकृतेऽपीत्युक्तमेव दर्शयति **यथा हीति** ।

वं०प०— समानो धर्म इति । परिच्छेदाभावरूपमानन्त्यमुत्कर्षापकर्षयोः **समानो** विशेषणभूतो धर्म इति युज्यत इत्यर्थः । **उत्कर्षस्यापीति** । अनल्पतापरर्यायस्येत्यर्थः । कुत इत्यत आह **न हीति** ।

श्रीनिधि०— न कोऽपि दोष इति । उत्कर्षापकर्षयोः आनन्त्यवैषम्यं साधकभावाभावरूपं नास्तीत्यर्थः ।

शे०वा०— अन्यदेवेत्युत्तरवाक्यानर्थक्यमित्याशङ्क्य पूर्ववाक्योक्तस्य परिमाणापकर्षानन्त्यस्य कालादौ निर्बाधप्रतीतिसिद्धत्वस्य बाधकाभावव्युत्पादनेन समर्थनार्थत्वान्न तदिति भावेन बाधकाभावोपपादकतया तद्योजयितुं तच्छङ्कामुत्थापयति **नन्विति** । आनन्त्यं चानल्पतेत्यत्रानल्पशब्दस्य भावप्रधानत्वाश्रयणादनल्पतेत्यर्थोऽभिमतः । अन्यथाऽपकर्षोऽनन्त इति प्रयोगस्याल्पत्वमनल्पत्वमित्यर्थप्राप्त्या वक्ष्यमाणविरोधानुपपत्तिप्रसङ्गादिति ध्येयम् । अस्त्वेवमपकर्षानन्त्ययोरल्पताऽनल्पतारूपत्वं किं तावतेत्यत आह **न च विरुद्धयोरिति** । अपकर्षोऽनन्त इत्युक्त्या ह्यल्पत्वमनल्पत्वमित्युक्तं स्यात् । न चेदं सम्भवति । स्वस्य स्वान्यत्वासम्भवेन विशेषणत्वानुपपत्तेरित्यर्थः । यद्यप्यत्र प्रतियोगिनोऽल्पत्वस्य तदन्यस्य च परस्परविरहरूपत्वादिरूपविरोधासम्भवाद्विरुद्धयोरित्येतदसमञ्जसमित्याभाति । तथाऽपि विरुद्धयोरित्यस्य परस्परभिन्नयोरित्यर्थकत्वाददोषः । यद्यपि च परस्परभिन्नयोरपि विशेषणविशेष्यभावो नानुपपन्नः तथाऽपि नाभेदेन तयोरन्वयः सम्भवतीत्यत्र तात्पर्यादिदोष इति ध्येयम् । वस्तुतोऽनल्पताशब्देऽल्पताशब्दस्य भावप्रधानत्वेन नञश्च 'अकर्तरि च कारके संज्ञायामि'त्यादाविव प्रतिषेधार्थकत्वेन अनल्पतारूपाऽऽनन्त्यस्याल्पतात्वात्यन्ताभावरूपत्वादपकर्षोऽनन्त इति प्रयोगस्याल्पतारूपोऽपकर्षोऽल्पतात्वात्यन्ताभाववान् इत्यर्थपर्यवसानात् अल्पतारूपस्यापकर्षस्याल्पतात्वात्यन्ताभावरूपस्य चानन्त्यस्य परस्परविरहरूपत्वादेव विरुद्धत्वमिति यथाश्रुतमेव रमणीयमिति ध्येयम् । विरुद्धयोर्विशेषणविशेष्यभावानुपपत्तिं दृष्टान्तोक्त्या प्रथयति **न हीति** । आद्ये पीते पीतान्यत्वस्याभावात्पीत पीतान्य इत्यभेदेनान्वयादर्शनादित्यर्थः । द्वितीयव्याख्यायां चापीतशब्दस्थपीतशब्दस्य भावप्रधानत्वान्नञश्च प्रतिषेधार्थकत्वात् पीतोऽपीत इत्यस्य पीतत्ववान् पीतत्वाभाववानित्यर्थपर्यवसानात् परस्परविरहरूपतया विशेषणविशेष्यभावादर्शनादित्यर्थः । उक्ताशङ्कानिवर्तकतयाऽपेक्षितपूरणेन मूलं योजयति **नेत्यादिना** । मूलेऽन्यदेव ह्यनन्तत्वमणुत्वस्येत्येतावतैवापकर्षानन्त्ययोर्विशेषणविशेष्यभावसमर्थनान्महत्त्वग्रहणमधिकमित्याशङ्क्य परिहरति **अत्रापीति** । दृष्टान्तदार्ष्टान्तिकभावमेव दर्शयति **यथेति** । दृष्टान्तत्वेन महत्त्वग्रहणस्यापि किं प्रयोजनमित्यत आनन्त्यस्यानल्पतारूपत्वाभावसिद्धिरेव तत्प्रयोजनमित्यभिप्रेत्य तदुपदर्शनपूर्वकं दृष्टान्तदार्ष्टान्तिकभावमेव विशदयति **यदीत्यादिना** । **न हि तदेव तस्येति** । महत्त्वस्योत्कर्षरूपत्वेनानल्पतारूपत्वादानन्त्यस्य चानल्पत्वरूपत्वान्महत्त्वमनन्तमित्यस्यानल्पतारूप उत्कर्षोऽनल्पतेत्यर्थपर्यवसाने नञः

प्रतिषेधार्थत्वे च अल्पत्वात्यन्ताभावः अल्पत्वात्यन्ताभाव इत्यर्थपर्यवसानेन स्वस्यैव स्वविशेषणत्वं वाच्यम् । न च तत्सम्भवतीत्यर्थः । तत्रैवानुरूपं दृष्टान्तमाह **पीत इति** । **विशेषणविशेष्यभाव इति** । महत्त्व-मनन्तमित्येवंरूप इत्यर्थः ॥ **प्रकृतेऽपीति** । अपकर्षोऽनन्त इत्यत्रापीत्यर्थः । किमनेनोक्तं भवतीत्यतो वाक्यतात्पर्यमाह **यथा हीति** । इतीत्यतःपरं भाव इति शेषः ।

वा०र०— अल्पत्वमनल्पमित्यर्थप्राप्त्या वक्ष्यमाणेति । ननु 'अन्यदेव ह्यनन्तत्वं महत्वाणुत्वयोः सममि'त्यनुव्याख्यानस्यापकर्षो नामाल्पता इत्यादि शङ्का । तत्परिहाररूपेण मूलोक्तयोजनायां सम्भवत्यां किल वक्ष्यमाणविरोधावकाशसम्भवेन तदानुगुण्याय भावप्रधानत्वं अल्पशब्दस्याश्रयणीयम् । न चेयं योजना सम्भवति । अपकर्षरूपाल्पतायां आनन्त्यमित्युक्ते अल्पतायामानन्त्यं यत् विशेषणतया प्राप्तं तत् अनल्पत्व-रूपमेवास्तु । न च विरोधः । महत्वं ह्यनल्पत्वं इति व्यवह्रियमाणं अल्पत्वं भेदवत् अल्पत्वात्यन्ताभाववत् वा उपलब्धमित्यतः तदुपलब्धिमूलः प्रकृते विरोधोऽपि तदावकाशवान् यद्यल्पत्वं अनल्पत्वमित्युच्यते । न च तथोच्यते । किन्तु अल्पत्वे अनल्पत्वमित्येव । एवं चाल्पत्वगताल्पत्वनिषेधे पर्यवसाने अल्पत्वमनन्तं इत्यस्याल्पत्वं अल्पं नेत्येवार्थप्राप्तौ विरोधाभावः । अत्र हि परिमाणेऽपकर्षपदोक्ताल्पताधर्मिणि । तस्यां चापराल्पता निषिध्यते इति स्पष्टम् । अत्र पक्षेऽविरोधः अदोषः अदुष्टत्वमित्यादाविव अनल्पत्वमित्यनेन अल्पत्वाभावप्राप्त्युपपत्तेश्च । अत एव विरोधशङ्कापरिहारकतयाऽन्यदेवेति भाष्यप्रवृत्त्युपवर्णनपूर्वकं नानन्तत्वं नानल्पत्वं इत्यादिरूपेण तदभिप्रायकथनं च दुरुपपादनम् । अनन्तत्वस्यानल्पत्वरूपत्वेऽपि अपकर्षपदोक्तायां अल्पत्वाभावस्य प्रतिपादने विरोधानवकाशात् महत्त्वाल्पतयोः विवेकाप्रतिपादयितुं यत्र महत्त्वमनल्पत्वं इति प्रयुज्यते तत्र समानाधिकरणप्रयोगेऽल्पत्वभेदवत् आद्यर्थप्रतिभासेऽपि प्रकृते व्यधिकरणप्रयोगात् अल्पतायां अल्पताभेदवत् इत्याद्यर्थप्रतिभासस्यैव प्राप्त्या अल्पता अल्पताभेदवतीत्यादेः अर्थस्याप्राप्त्या नात्रोपलम्भा-नुसारेणापि विरोधानवकाशाच्च भ्रान्त्या कथञ्चित् अनवकाशोक्तरीत्या धर्मिभूताल्पताभिन्नं अल्पत्वान्तरस्यां निषिध्यते । न तु तस्याः अल्पत्वभेदवत्वं संसर्गारोपनिषेधपक्षानुसारेणाल्पत्वात्यन्ताभाववत्वं वाऽनन्त्यपदेनो-च्यते । इत्येव परिहारसम्भवे तत्परित्यागेनानन्त्यस्यानल्पत्वम् । किन्तु अन्यदेवानन्तत्वमिति परिहारतया भाष्यप्रवृत्तिवर्णनायोगात् । अत एव च दृष्टान्तत्वेन महत्त्वग्रहणमुपवर्ण्य स्वस्यैव स्वविशेषणत्वायोगात् । उत्कर्षे आनन्त्यं अनल्पत्वरूपं नेत्युपपादनं च कठिणम् । उक्तरीत्योत्कर्षे परिमाणनिष्ठे उत्कर्षान्तरस्यानन्त्यपदेन वचनः उत्कर्षः उत्कृष्टः इत्यर्थप्राप्तावपि उत्कर्षोऽनल्पत्वं इत्यर्थाप्राप्तौ स्वस्यैव विशेषणत्वानुपपत्तेः । अत एव च पीतोऽपीतः इति पूर्वत्र उत्तरत्र च पीतः पीतः इति च दृष्टान्तो विषमः । पीतेऽपीतपदेन पीतभेदस्य वा पीतत्वात्यन्ताभावस्य वा प्रतिपादनेन तदुभयाभावस्य प्रतियोगितदवच्छेदकविरोधेन पीतोऽपीत इत्यपि विशेषणविशेष्यभावस्यायोगेऽपि तथा विशेषणविशेष्यगत इतरव्यावृत्तिप्रतिपादनमुखेन तत्स्वरूपज्ञापकतया पीत इत्यनेन पीतत्वविशिष्टतया बाधिते पुनः पीत इति वचनानर्थक्येन पीतः पीत इति विशेषणविशेष्यभावायोगेऽपि चोक्तरीत्या अनल्पत्वे अनल्पत्वान्तरप्रतिपादनोपपत्त्या विशेषणविशेष्यभावोपपत्तेः । एवमेव बहुत्वाल्पत्वयोः

यद्वदित्यादि सङ्ख्यादृष्टान्तकथनपरभाष्ययोजनापि दुर्घटा एव । अल्पत्वबहुत्वयोः अनल्पत्वरूपानन्त्यसमर्पक अनन्तेति विशेषणपदेन सङ्ख्यात्वेनोक्ताल्पत्वबहुत्वाभिन्नाल्पत्वबहुत्वयोः निषेधविध्यङ्गीकारेण विरोधानवकाशे तत्परिहाराय प्रकारान्तराश्रयणायोगात् । अस्तु वा कथञ्चित् एतन्मूलोक्ता भाष्ययोजना । तथापि तद्व्याख्यान-टीका तु सङ्गता विरुद्धयोः विशेषणविशेष्यभावानुपपत्तेः । वक्ष्यमाणायाः अनुगुण्याय आनन्त्यं चानल्पते-त्यत्रत्याल्पशब्दे भावसाधनतामनाश्रित्यैव मूलस्य प्रकारान्तरेणानायासेन योजयितुं शक्यत्वात् । तथा हि । महत्त्वमनल्पत्वमित्यत्र समानाधिकरणप्रयोगेऽनल्पत्वशब्दार्थदर्शनमात्रेण व्यधिकरणप्रयोगेऽपि भ्रान्त्या तदर्थत्व-मवलम्ब्य विरोधशङ्कायाः वाच्यत्वात् अल्पतायां अनल्पतेत्यस्याल्पताऽनल्पतेति पर्यवसाने अल्पता अल्पता-भेदवती अल्पताभाववतीति वार्थः प्राप्तः । **न अल्पताऽनल्पतेति** । न विद्यते अल्पतात्वं यस्याः इति च विग्रहाभ्यां क्रमेण तदुभयलाभसम्भवात् अत्राल्पतात्वरूपप्रतियोगित्वावच्छेदकधर्मविशिष्टार्थवाची अल्पताशब्देन अल्पताभेदार्थकानञ्विरुद्धः प्रतियोगितावच्छेदकस्यान्योन्याभावविरोधेन तद्वारा तदवच्छिन्नस्यापि तद्विरोधे वाच्यताप्रतियोगिकभेदवतीति विशेषणपदमपि तद्विरुद्धम् । एवं चाल्पतानन्त्यं अनल्पता अल्पताभेदवती इत्यर्थक्रमेण विशेषणविशेष्यभावानुपपत्तेः इत्यर्थः । पीतो पीतः इत्यत्रापि पीतः पीतप्रयोगिकभेदवान् पीत-त्वात्यन्ताभाववान् वेति बोधात् विशेषणविशेष्यभावायोगो बोध्यः । अथवा नञोऽन्योन्याभाव एव शक्तिरिति पक्षे अल्पतायां अनल्पतेत्युक्तस्य यथाश्रुतस्यैव ग्रहणम् । विशेषणविशेष्यशब्दौ च धर्मधर्मिपरौ । अत एव उत्कर्षापकर्षयोः समानो स धर्म इति व्याख्याति **वस्तुत इति** । टीकापक्षेऽपि तदादरात् । तथा चाल्पतारूपे धर्मिणि आनन्त्यपदार्थत्वेनाङ्गीकृतो अल्पताप्रतियोगिकान्यो भावः न धर्मः सम्भवति । वह्न्यभाववति ह्रदे वह्निरूपधर्मस्य विरुद्धतायाः तत्र तद्धर्माभावदर्शनेनाल्पता अन्योन्याभावरहित अल्पतायां तद्रूपधर्मानुपपत्तेः इत्यर्थः ।

विरोधश्च पूर्वोक्तरीत्या परम्परया । एवं अल्पतात्वात्यन्ताभावोऽपि हि प्रतियोगिमतिविरुद्ध एवेति स्पष्टमेव । तद्वारा धर्मिणोऽपि परम्परया विरोधश्च । लोकेऽविरुद्धयोरेव घटरूपादिरूपयोः धर्मधर्मिभावदर्शनेन प्रतियोगिमत् तदभावयोश्च विरुद्धयोः तददर्शनात् । तद्धर्मस्याल्पतायामनुपपत्तेः इत्यत्यन्ताभावस्य नञर्थत्व-पक्षेत्यर्थः । पीतो पीतः इत्येतदपि उभयाभावपक्षेऽपि धर्मधर्मिभावाभावदर्शनपरतया योज्यम् । पीते पीतान्योन्याभावस्य वा पीतत्वात्यन्ताभावस्य धर्मतायाः अभावात् उक्तरीत्यैवेति । **नानन्तत्वनामेति** । उक्तरीत्या अल्पताभेदो वा अल्पतात्वात्यन्ताभावो वा अनन्तत्वं न विवक्ष्यते इत्यर्थः । **परिच्छेदाभाव इति** । अन्तपदस्य परिच्छेदे रूढतया तदभावस्यैवानन्तपदालाभे आनन्त्यं अवच्छेदाभावरूपमेवेत्यर्थः । **इति युज्यत इति** । अवच्छेदाभावरूपधर्मस्यान्योन्याभावात्यन्ताभावयोरिवाल्पतारूपधर्मविरोधाभावात् इति भावः । **न हि देवदत्तस्येति** । उत्कर्षे अनल्पत्वमित्युक्तस्य भ्रान्त्या उत्कर्षो नाल्पत्वमिति पर्यवसाने परिमाणे उत्कर्षोऽनल्पता नामोत्कर्ष इति स्वस्यैव स्वविशेषणत्वं प्राप्नोति । विशेष्यविशेषणपदयोः अपर्यायतदर्शनेन पर्याययोः विशेषणविशेष्यभावानुपपत्तेरित्यर्थः । यद्वा उत्कर्षरूपमहत्त्वाख्ये धर्मिणि स्वस्य एव धर्मताया इव स्थानस्यात्माश्रयपराहतत्वेनाभेदे धर्मधर्मिभावानुपपत्तेरित्यर्थः ।

पीत इति । पीत इत्यस्य हि पीतत्वादि विशिष्टोऽर्थः । तस्मिन् विशिष्टे धर्मिणि द्वितीयपीतपदेन पीतत्वसमर्पणं भवत एव पर्यायत्वात्माश्रयत्वे इति ज्ञेयम् । एवमेव बहुत्वाल्पत्वसङ्ख्यादृष्टान्तपरमूलमपि योज्यमिति । तदेवं 'अन्यदेव ह्यनन्तत्वं' इत्यादिभाष्यस्य मूलोक्तयोजनाया मूलस्य च एतट्टीकोक्तयोजनायाश्च दुर्घटतया कथं वक्ष्यमाणविरोधपरिहारायाल्पशब्दस्य भावप्रधानताश्रयणादिकं इति चेत् । अत्रोच्यते । यत्तावदुक्तम् । अपकर्षरूपताल्पतामानन्त्यमित्युक्तमित्यादिना विरोधानवकाशात् अत्यन्तेनाल्पतानल्पेति पर्यवसन्नार्थे विरोधशङ्कानवकाश इति । तत्तथैवेति ब्रूमः । तर्हि तद्विरुद्धयोः इत्येतत् कथमिति चेत्, न । महत्त्वे हि अनल्पत्वशब्दो वर्तमानो अल्पताभेदं वा अल्पतात्वात्यन्ताभावं वा निमित्तीकृत्य प्रवर्तते । अल्पत्वाभिन्नाल्पत्वरहिते च महत्त्वेऽनल्पत्वप्रयोगात् । तथा चाल्पतायामपि वर्तमानस्यास्याल्पताभेदादेव प्रवृत्तिनिमित्ततया प्राप्नोतीति भ्रान्तो ह्यल्पतायां आनन्त्यपदेनानल्पत्वे उक्तेऽपि समानाधिकरण्ये पर्यवसानं कृत्वा अल्पता अनल्पतेति विशेषणविशेष्यभावानुपपत्तिरिति शङ्कितवान् इत्यदोषात् । अत एव पीतो पीतः इति दृष्टान्तो न विषमः ।

कथं तर्हि अनल्पत्वं नानन्तत्वम् । किन्तु अन्यदेवेति भाष्याशयवर्णनम् । अल्पतायामानन्त्यपदार्थपरतानल्पतापदेनाल्पत्वाभावस्यैवोक्त्या अल्पतानल्पेष्विति विशेषणविशेष्यभावप्राप्त्या विरोधाभावेन तदुपपत्तेरित्याशयस्य वर्णनीयत्वात् इत्युक्तमिति चेत्, सत्यम् । नानल्पत्वमिति निषेधस्य शङ्कितालपता अन्योन्याभावादिति मत्वा रूपानल्पत्वनिषेधपरतयाऽल्पताराहित्यरूपानल्पत्वस्यानन्तत्वरूपविधिनिषेधयोः औदासीन्येन वानन्तपदार्थमर्यादया लब्धार्थस्यैव सम्भवे किं विवक्षितार्थस्वीकारेण इत्याशयेनानन्तत्वं इत्यादिमूलप्रवृत्त्या उक्तरीत्या भाष्याशयवर्णनोपपत्तेः । अत एवोत्कर्षापकर्षयोः समानो धर्म इति युज्यते इति व्याख्यातम् । अनन्तपदोक्तावच्छेदकाभावस्य उत्कर्ष इवापकर्षेऽपि व्यवहारकाले तु अपकर्षोऽनवधिकः इत्येवं विशेषणविशेष्यभावस्य विरोधशङ्काभासेनापि प्रतिरोधाभावसूचनात् । अत एव दृष्टान्तीकृते महत्त्वेऽपि अनल्पत्वे त्वस्याविरोधेऽपि वास्तवानन्तपदार्थविवक्षयैवावच्छेदाभाव एवार्थः । न त्वनल्पत्वं इत्युक्तमित्यदोषः । अत एव च पीतः पीतः इति दृष्टान्तोऽपि सम्मत एव । तथा चैवं मूलकृता उक्तं भवति । यथोत्कर्षः अनन्तः इत्युक्ते अनवधिक इति प्रतीतेः तदुत्कर्षगतं आनन्त्यं अवच्छेदाभावरूपं सम्भवति । तथापकर्षोऽनवधिकः इति विशेषणविशेष्यभावोपपत्तेः अपकर्षे आनन्त्यं अवच्छेदाभावरूपं सम्भवतीति । एवमेव बहुत्वाल्पत्वयोः यद्वदिति सङ्ख्यादृष्टान्तभाष्यमूलमपि सूपपादनमिति ।

नन्वस्तु उक्तरीत्या मूलोक्तं भाष्ययोजना । तथापि तट्टीकाया न सङ्गतिः इत्युक्तमिति चेत् । अत्र ब्रूमः । असङ्गा हि अल्पशब्दस्य भावसाधनत्वाश्रयणेन अनल्पत्वता आनन्त्यमिति व्याख्याने अपकर्षपदोक्तायां अल्पतामानन्त्यपदार्थतया अनल्पतात्वप्राप्तौ अपकर्षोऽनन्तः इत्यस्यापि अल्पताऽनल्पत्वमिति पर्यवसाने विशेषणविशेष्यभावापन्नयोः टीकोक्तरीत्या विरोधावकाशलाभेऽपि महत्त्वादौ यत्रानन्त्यमति तस्यानल्पतारूपत्वेऽपि अनल्पतात्वरूपत्वाभावेनाल्पतागतानन्त्यस्याप्यनल्पतारूपत्वस्यैव प्राप्त्या अनल्पतात्वरूपत्वाभावेन

तथा व्याख्यानस्याशाब्दत्वादिति प्रकारे वाच्यता । तर्हि प्रकारान्तरेण व्याकुर्वतोऽपि तावदशाब्दत्वं अपरिहार्यम् । तत्पक्षे तु अल्पतायां अनल्पतेत्युक्तेऽपि अल्पता अनल्पता इत्येवं सामानाधिकरण्यस्यालाभेन तदाश्रयणेनार्थविशेषपर्यवसानानुपपत्त्या विशेषणविशेष्ययोः विरोधोपपादनायाऽश्रितसामानाधिकरण्ये शब्दत्वस्यैव वाच्यत्वात् यदि च महत्वं अनल्पत्वं इत्यत्राल्पत्वभिन्नस्य अल्पतात्वात्यन्ताभावस्य वानल्पत्वपदार्थतया दृष्टत्वेनाल्पतायां अनल्पतेति व्यधिकरणप्रयोगे कृतेऽपि तत्प्रयोगस्थानल्पताशब्दस्य अल्पत्वभिन्नादिकं अर्थ इति स्वीकृत्य सामानाधिकरणांशे च भ्रान्तस्य युक्तिविरोधशङ्केति ब्रूयेत् तर्हि टीकायामपि भ्रान्तस्य विरोधं शङ्कैव सम्मतेति समः समाधिः ।

तथा हि । अपकर्षे आनन्त्यं नाम अनल्पता इत्युक्ते अल्पं अनल्पं न विद्यते । अल्पत्वं यस्येति वा अनल्पं तस्य भावो अनल्पता इत्यर्थानुसारेणानाल्पीयधर्माधिप्राप्त्याऽपकर्षोऽनन्त इति विशेषणविशेष्यभावेन प्रयोगेऽनन्त इत्यस्यानल्प इत्येवार्थापत्त्या मूलस्थविरोधशङ्कायाः अनवकाश इत्याशङ्कानिवर्तये महत्त्वमनल्पत्व इत्यत्रानल्पत्वशब्दस्याल्पत्वं अल्पतो वात्यन्ताभाववच्चार्थो दृष्ट इति तदनुसारेणाल्पतारूपोपकर्षोऽनल्पतार्थकानन्तपदेन अल्पताभिन्न इत्यादिरुक्तो भवतीति युक्तो विरोधावकाशः इति मूलाभिप्रेतं विशेषणविशेष्यभावायोगं प्रतिपादयितुं आनन्त्यं चानल्पता इति मूले आनन्त्यस्यैवानल्पतारूपत्वोक्तौ अपकर्षोऽल्पताभिन्नवान् अल्पतात्वात्यन्ताभाववादाश्रय इत्येवानन्तपदार्थप्राप्तावपि अनन्तपदार्थस्यानन्तकल्परूपत्वानुक्तेः कथमुक्तार्थलाभः इत्याशङ्कायां यथाल्पतायां आनन्त्यं नामानल्पतेत्युक्तेऽनल्पस्य भावोऽनल्पता इत्यर्थाश्रयणेन अल्पतारूपोपकर्षोऽनल्पः इत्यर्थप्राप्तिः तथाऽल्पस्याभावः प्रधानताश्रयणे अनल्पत्वस्य भावोऽनल्पवताऽऽनन्त्यं इत्यर्थस्यापि प्राप्त्या तदनुसारेणापकर्षोऽनन्त इति विशेषणविशेष्यप्रयोगेऽपकर्षोऽनल्पत्वं इत्यस्याल्पत्वभिन्नत्वमिति नञः प्रतिषेधार्थत्वेऽल्पतात्वात्यन्ताभाववान् इत्येवंरूपार्थस्यापि लाभो युक्त इति । टीकार्थपर्यालोचनयाऽनल्पत्वताऽऽनन्त्यपदार्थः इति भ्रान्तस्य विरोधशङ्केत्यस्यापि मूलाभिप्रेतत्वकल्पनस्योपपन्नत्वात् । त्वत्पक्षेऽऽनन्त्यपदार्थोऽनल्पतेति यथाश्रुतमङ्गीकृत्यापि अल्पतायामनल्पतेति व्यधिकरणत्वस्य सत्त्वेऽपि सामानाधिकरण्यांशे भ्रान्तिरिति कल्पनीयम् । टीकापक्षे तु यथाश्रुतं वैय्यधिकरण्यं अनुसृत्यैवानन्त्यपदार्थे भावप्रवेशाभिप्रेत इत्यंशे भ्रान्तिरितीत्यविशेष एवापि त इति दृष्टान्तानुगुण्यं तु सममेव । योजनान्तरगतं शिष्टं उपपादनं तु टीकायामभिप्रेतमेवेति न कश्चिद्दोषः । अत एव वस्तुत इति पक्षे अत्राविरोधः इत्यादाविवात्यन्ताभावार्थतामादाय एव विरोधं उपपादयिष्यति । धर्मधर्मिणोरेव विरोधश्चोपपादयिष्यते । धर्मधर्मिणोरेव विरोधश्चोपपादयिष्यते । यत्रापि उत्तरटीकावाक्येऽन्यथाप्रमिताभासः तत्र पूर्वोत्तरानुसारेण विवक्षितार्थपरत्वेन योजना कार्या करिष्यते च अनुपदमेव इत्यास्ताम् । तदेवं अन्यदेव ह्यनन्तत्व इति भाष्यस्य मूलोक्तरीत्या मूलस्य च एतट्टीकोक्तरीत्या योजनायाः सूपपादानत्वात् न कश्चित् दोषः इति तद्योजनानुसारेण वक्ष्यमाणविरोधानुगुण्ययाल्पशब्दस्य भावप्रधानाश्रयणात् अनल्पत्वता इत्यर्थोऽभिमतः इति युक्तमुक्तमिति सूरयो विदांकुर्वन्तु ।

अत्रोच्यते इत्यादिना परोक्तमूलयोजनानुगुण्येन टीकायोजनापि कार्याऽस्ति । एतट्टीकानुसारेण पूर्वमूलयोजनायां वा अवकाशानुसारेण कार्यत्वात् । तत्र तत्राप्राप्त्या संवादः आयाति । सावधानेन सा एकवाक्यतया मूलयोजना टीकायोजना न कार्यास्ति । भावो ह्यभावश्च स एव हीत्युत्तरानुभाष्यमूलटीकानुगुण्यं च शोध्यम् ।

अनल्पताशब्दतदर्थमूलटीकाशयोऽनल्पगुरुप्रसादात् ।
अप्यल्पवेत्रा प्रकटीकृतस्तमनल्पबोधाः परिशीलयन्तु ॥ .

विरोधानुपपत्तीति । विशेषणविशेष्यभावानुपपत्तिहेतुविरोधेत्यर्थः । एतच्च उत्तरत्रैव स्फुटीभविष्यति । **अल्पत्वमित्युक्तं स्यादिति** । अल्पताशब्दान्तर्गताल्पशब्दस्य भावप्रधानतायाः सिद्धत्वात् एक एव तदुपात्त इति द्रष्टव्यम् । **स्वस्यान्यत्वेति** । अन्योन्याभावविरोधिभूतप्रतियोगितावच्छेदकाल्पत्वस्य स्वस्मिन् विद्यमानत्वादिति भावः । **प्रतियोगिन इति** । अनल्पत्वशब्दोक्ताल्पत्वान्योन्याभावप्रतियोगिन इत्यर्थः । **अन्यस्य चेति** । अल्पत्वप्रतियोगिकान्योन्याभाववतः । इत्यर्थः । अघटः पटः इत्यादाविव नञो अन्योन्याभाववति लक्षणया तस्य लाभादिति भावः । **परस्परविरहेति** । **आदि**पदेन परस्परविरहव्याप्यसहानवस्थानयोः ग्रहणम् । अयमर्थः । अनल्पत्वमित्यर्थकानन्तपक्षस्य विशेषणपदतया तदुक्तधर्मत्वेनानल्पतैव प्राप्नोति । सा चाल्पत्व-प्रतियोगिकान्योन्याभाववत्वलक्षणा । उक्तरूपं चान्योन्याभावमात्रपर्यवसन्नम् । अन्योन्याभाववतो धर्मस्या-न्योन्याभावात्मकत्वात् । तथा च वक्ष्यमाणो विशेषणविशेष्यपदयोः विरोधो विशेषणविशेष्यविरोधे पर्यवसन्नः । न चानयोः विरोधोऽस्ति । अन्योन्याभावस्य विशेष्यात्यन्ताभावत्वरूपतद्विरहत्वाभावात् । प्रतियोगिभूता-ल्पत्वविशेष्यस्यापि अन्योन्याभावात्यन्ताभावरूपत्वाभावः । प्रतियोगितावच्छेदकधर्मस्यैव तदभावरूपत्वात् । अल्पत्वरूपप्रतियोगिमत्यपि तदन्योन्याभावस्य सत्त्वेन प्रतियोगितदन्योन्याभावयोः परस्परविरहव्याप्यत्वरूपस्य वा सहानवस्थानरूपस्य वा विरोधस्यासम्भव एवेति विरुद्धयोरित्युक्तं कथं इयमेव गतिः । पीतोऽपीतः इत्यन्योन्याभावधर्मकपीतपदार्थदृष्टान्तेऽपीति । विरुद्धपदं गौणार्थमाश्रित्याह परस्परभिन्नयारितीति । **नानुपपन्न इति** । दण्डदेवदत्तादौ भेदेऽपि विशेषणविशेष्यभावदर्शनात् इति भावः । अत्र पक्षे उक्तरीत्यापि विरोधसमर्पणाय आनन्त्यं चानल्पतेत्यत्रत्याल्पशब्दस्य भावप्रधानता आश्रयणीया । अन्योन्याभावस्य नञर्थत्वेन विरोधपदं गौणार्थं भवतीत्यपरितोषात् पूर्ववदत्राल्पशब्दस्य भावप्रधानत्वमनाश्रित्य नञोऽन्योन्याभावार्थत्वमाश्रित्यैव शुक्तिकायां रजतमिति संसर्गारोपपक्षे अरजतमित्यत्र रजतत्वसंसर्गाभाववत् इत्यर्थदर्शनात् तत्र रजतपदस्य भावप्रत्ययप्रधानताव्युत्पत्त्यनुसारेण प्रकृतेऽपि अल्पार्थतायां अल्पतात्वाभावः इत्यर्थप्राप्तौ तत्र विरोधा-सङ्गतिप्रकारमाह **वस्तुत इति** । अपकर्षो नामाल्पतेत्यनुसारेणानन्त्यं अनल्पत इति स्त्रीलिङ्गप्रयोगेऽपि त्वान्त एव प्रयोगोऽपि मतः । अत एवानल्पत्व इत्यादिरेवोत्तरमूलग्रन्थः । तथा चाल्पत्वता अल्पतात्वं इत्येतयोः अर्थभेदाभावः इत्यर्थं सिद्धवत्कृत्य उक्तप्रकारोपलक्षणाभिप्रायेणात्राल्पताशब्दस्य भावप्रधानताश्रयणं इति ज्ञेयम् ।

अकर्तरि चेति । तत्र नञोऽन्योन्याभावार्थत्वेन नञिव युक्तन्यायेन कर्तृभिन्नकर्तृसदृशस्यैव प्राप्त्या कारकग्रहणवैय्यर्थ्यापत्तिः इत्यतः कर्तरि नेति प्रतिषेधार्थताया एवाश्रयणादिति भावः । **अनल्पतारूपेति** । मूलानुवादोऽयम् । अनल्पतारूपेत्यर्थः । **अत्यन्ताभावरूपत्वादिति** । नञोऽत्यन्ताभाव एव शक्तिस्वीकारादिति भावः । **परस्परविरहरूपत्वादेवेति** । यद्यपि अल्पतात्वात्यन्ताभावस्याल्पतात्वस्य च परस्परविरहरूपत्वेऽपि नाल्पतायाः उक्तात्यन्ताभावस्य च तथात्वमिति कथमेवमुक्तिरित्याभाति तथापि अल्पतात्वात्यन्ताभावप्रतियोगिभूताल्पतात्वस्य तद्विरहरूपतया विरोधवतोऽल्पतायां सत्त्वात् तद्वारकाऽल्पतायाः तद्विरोधः । घटवति भूतले घटाभावस्य विरुद्धताव्यवहारानुसारेण घटवद्भूतलघटाभावयोः घटरूपप्रतियोगिद्वारा विरोधाश्रयणस्य दृष्टत्वात् । अतो नान्वयानुपपत्तिः । यद्यपि च नञर्थतयाऽन्योन्याभावपक्षेऽपि अल्पत्वान्योन्याभावस्याल्पतात्वरूपप्रतियोगितावच्छेदकाभावतया परस्परविरहरूपयोः तयोः विरोधमाश्रित्य तत्प्रतियोगितावच्छेदकस्याल्पतायां सत्त्वात् अल्पता तदन्योन्याभावयोः विरोधः इत्यप्यानेतुं वा शक्यं इत्यन्योन्याभावपक्षे सति पक्षान्तरस्वीकारोऽनर्थकः इत्याभाति । तथापि अल्पतारूपापकर्षस्य अनन्तपदोक्ताल्पत्वान्योन्याभावस्य च परस्परविरहे लक्षणविरोधो न प्रतियोगितदभावत्वलक्षणः साक्षादेवास्ति । नापि अत्यन्ताभावार्थत्व इव पारम्पारिकोऽपि । अत्रापकर्षो नामाल्पता आनन्त्यं चानल्पतेति मूलानुरोधेन प्रतियोगितदभावत्वविशेषितस्य एव परस्परविरुद्धत्वस्य टीकाभिप्रेतत्वे प्रतियोगितावच्छेदकस्य च तादात्म्यान्योन्याभावविरोधित्वेऽपि प्रतियोगितदभावरूपविरोधविशेषाभावात् । तदेतत्सर्वमभिप्रेत्याह **यथाश्रुतमेवेति** । न तु विरोधपदभिन्नार्थत्वम् । नापि प्रतियोगितदभावातिरिक्तः आश्रीयत इत्यर्थः । वस्तुतोऽत्र यथाश्रुतरमणीयत्वोक्तिः भिन्नत्वार्थत्वानाश्रयणमात्राभिप्रायेण । पारम्परिकविरोधस्तु अन्योन्याभावार्थत्वेऽपि समः तादात्म्यरूपप्रतियोगिनो अल्पतायां सत्त्वात् । अत एव च पीतो पीतः इत्येतत् दृष्टान्तव्युत्पादनावसरे अर्थद्वयानुसारेण योजनाद्वयं करिष्यति । एवमेव दृष्टान्तविरोधः पारम्परिको ध्येयः इति सर्वमवदातम् ।

एवं टीकायोजनाऽकारि मत्या मन्यन्तां तां ज्ञानिनः साधुबुध्या ।
वदद्भिर्वा साधुतां दूषणाय मद्व्याख्यायाशीलनेऽहं कृती स्याम् ॥

स०व्र०— न च विरुद्धयोर्विशेषणविशेष्यभाव इति । अपकर्षस्याल्पतारूपत्वात् आनन्त्यस्य चानल्पतारूपत्वात् अनन्तानल्पशब्दयोः समानार्थत्वेन अल्पशब्दस्य भावप्रधानत्वात् अल्पं न भवतीत्यनल्पमिति अनल्पशब्दस्य अल्पत्वान्योन्याभाववदर्थत्वात् अन्योन्याभावस्यैव च भावप्रत्ययार्थत्वात् अनल्पताशब्देन अल्पत्वान्योन्याभावस्यैव लाभात् अल्पताऽऽनल्पतेत्यनेन अल्पत्वान्योन्याभावत्वोक्तौ विरोधापत्तेरिति भावः । यद्वा 'अकर्तरि च कारके संज्ञायाम्' इत्यत्र पर्युदासपक्षे कारकग्रहणवैयर्थ्यापत्त्या तत्सार्थक्याय यथा कर्तृशब्दस्य कर्तृत्वपरत्वं अभ्युपेत्य नञः प्रसज्यप्रतिषेधार्थकत्वस्य वैयाकरणैरुक्तत्वात् असदादिशब्देषु टीकाकारैरपि तथाभ्युपगमात् अल्पताशब्दस्य अल्पतात्वपरत्वमभ्युपेत्य अनल्पताशब्दस्य अल्पतात्वात्यन्ताभावार्थकत्वात् अल्पतात्ववती अल्पतात्वात्यन्ताभाववतीत्यभिधाने विरोधापत्तेरित्यर्थः । **न हि तदेव**

तस्येति । उत्कर्षस्य अनल्पतारूपत्वात् अनल्पतायाश्च अल्पतान्योन्याभावरूपत्वात् आनन्त्यस्य तद्विशेषणत्वे अल्पतान्योन्याभाववान् अल्पतान्योन्याभाववानिति विशेषणविशेष्यभावस्य वाच्यत्वात् तस्य चाभेदेनासम्भवादिति भावः ।

विट्ठल०— आनन्त्यं चानल्पतेति । अत्रानल्पताशब्दान्तर्गतोऽल्पशब्दो भावप्रधानः । एवं च अल्पद्रव्यवृत्तिधर्मेति चोच्यते । अन्ताभाव आनन्त्यं, अल्पत्वाभावोऽनल्पतेति हेतोरनन्तस्य धर्मभूतमानन्त्यमेवानल्पतेति सिद्ध्यति । तथा चापरिमाणापकर्षानन्त्याङ्गीकारे अपकर्षोऽल्पता आनन्त्यमल्पतेति परस्परविरोध इत्यर्थः । ततः किमित्यत आह **न चेति** । स्वस्य स्वानन्त्यत्वं विशेषणमित्यस्यानुपपन्नत्वादिति भावः । **तस्मादिति** । आनन्त्यस्य परिच्छेदाभाव इत्यर्थः ।

॥ इति महत्त्वाणुत्वदृष्टान्तेन अनन्तत्वस्य अनल्पतार्थतायां बाधकशङ्का ॥

* * *

॥ अथ च ततः सङ्ख्यादृष्टान्तेनापि अनन्तत्वस्य अनल्पतार्थतायां बाधकशङ्का ॥

५४ **सु०— आनन्त्यं नामानल्पत्वादन्यदित्येतत्प्रत्याययितुं दृष्टान्तान्तरमाह बहुत्वेति ।**

अनु०— बहुत्वाल्पत्वयोर्यद्वत्सङ्ख्यायामुपलभ्यते । आनन्त्यम्

यद्वत् यथा सङ्ख्यायां बहुत्वाल्पत्वयोः विशेषणतया आनन्त्यमुपलभ्यते, बहुत्वमनन्तमल्पत्वं चानन्तमिति, तथा प्रकृतेऽपीति ।

यद्यनन्तत्वं नामानल्पत्वं स्यात् तदा; न बहुत्वस्य विशेषणं स्यात्, तस्यैव तद्विशेषणत्वायोगात्; नाप्यल्पत्वस्य, विरोधात्; अतः, अवच्छेदाभाव एव अनन्तत्वमित्यङ्गीकृत्य बहुत्वमल्पत्वं (चानन्त)चापर्यवसितमिति विशेषणविशेष्यभावो बोद्धव्यः । तथा परिमाणोत्कर्षापकर्षयोरपीति ।

परि०— अवच्छेदाभाव एवेति । परिच्छेदाभाव एवेत्यर्थः ।

यादु०— अतोऽवच्छेदाभाव एवेति । परिच्छेदाभाव एवेत्यर्थः ।

वं०प०— **बहुत्वस्य** अनल्पतारूपस्येत्यर्थः । नाप्यल्पत्वस्येत्यनन्तरमनल्पतारूपमनन्तत्वं विशेषणमिति वर्तते । कुतो नेत्यत उक्तं **विरोधादिति** । **दृष्टान्तान्तरमिति** । महत्त्वस्य दृष्टान्ततयोक्तत्वादित्यर्थः ।

श्रीनिधि०— **सङ्ख्यायां बहुत्वाल्पत्वयोरिति** । नवाष्टचतुस्त्रिद्विएकार्धतदर्धादिकलासवर्णनादिसङ्ख्यायां निविष्टयोस्तयोरित्यर्थः । सामान्यविशेषभावेनेति भावः ।

शे०वा०— दृष्टान्तदार्ष्टान्तिकभावस्फोरणाय वाक्यं योजयति **यद्वदिति** । अत्र यद्वदिति मौलपदानुवादेन यथेति व्याख्यानम् । **तस्यैवेति** । बहुत्वस्यानल्पतारूपत्वात् आनन्त्यस्यानल्पतारूपत्वात् बहुत्वमनन्तमित्यत्राल्पत्वमनल्पत्वमित्यर्थपर्यवसानादिति भावः । **विरोधादिति** । आनन्त्यस्यानल्पतारूपत्वादनल्पत्वमनन्तमित्यस्य अल्पत्वमनल्पत्वमिति वाऽल्पत्वत्वात्यन्ताभाववदिति वा अर्थपर्यवसानादिति भावः । **अतोऽवच्छेदाभाव एवेति** । परिच्छेदाभाव एवेत्यर्थः ।

स०व्र०— **तस्यैवेति** । बहुत्वमनन्तमित्यत्र बहुत्वस्य अनल्पतारूपत्वात् आनन्त्यस्यापि तद्रूपत्वात् उक्तरीत्या अभेदान्वयानुपपत्तेरिति भावः । **विरोधादिति** । अल्पत्वमनन्तमित्यत्र अनन्तत्वस्य चोक्तरीत्या अल्पतान्योन्याभावरूपत्वात् अल्पतात्वात्यन्ताभावरूपत्वाद्वा अल्पता अल्पतान्योन्याभाववती अल्पतात्वात्यन्ताभाववतीत्यस्य विरुद्धत्वादिति भावः ।

॥ इति सङ्ख्यादृष्टान्तेनापि अनन्तत्वस्य अनल्पतार्थतायां बाधकशङ्का ॥

* * *

॥ अथ च तत्रान्ते उक्तसङ्ख्यादृष्टान्ते अनुपपत्तिसद्भावात् तच्छङ्कानिरासः ॥

५५ सु०— ननु च नास्त्येव सङ्ख्यायां बहुत्वाल्पत्वयोरानन्त्यम् । बहुत्वस्य परार्ध एव पर्यवसितत्वात् । अल्पत्वस्य चैक(ा)त्वावधित्वात् । यथोक्तम्, 'सा चैकत्वादिपरार्धपर्यन्ता' इति । अतः कथमयं दृष्टान्त इत्यत आह एकेति ।

अनु०— एकभागानां तावत्वं ह्यवगम्यते ।

सङ्ख्यामधिकृत्य हि गणितशास्त्रं प्रवृत्तम् । तत्र च कलासवर्णनप्रभागभागानुबन्धभागापवाहभागभागादिप्रकरणेषु **एकभागानां तावत्त्वम्** अनवधिकत्वं गम्यते **हि** यस्मात्, तस्मात् **अवगम्यते** अस्त्येकत्वादप्यपकृष्टानवधिका सङ्ख्येति । परार्धा-

त्परतोऽपि सङ्ख्यासद्भावः स्फुट एवेति नोपपादितः । सम्भवति हि परेषामपीश्वरापेक्षाबुद्ध्या परमाण्वादौ परार्धात्परतोऽपि सङ्ख्योत्पत्तिः । ततःपरं संज्ञाकरणं तु गणकानां प्रयोजनाभावात् । एतामेव विप्रतिपत्तिमपनेतुं सङ्ख्यादृष्टान्तोपादानं कृतमिति ।

परि०— यथोक्तमिति । गणकैरुक्तमित्यर्थः ॥ **कालाकाशयोः परिमाणोत्कर्षापकर्षयोरविश्रान्तिसमर्थनम् ॥**

गु०दी०— स्फुट एव इति वदता परस्यार्धं परार्धमिति समासे परार्धादपि परसङ्ख्याया अधिकायाः सुप्रसिद्धत्वादिति सूचितम् ।

यादु०— प्रकरणेष्विति । गणितशास्त्रीयप्रकरणेष्वित्यर्थः ।

वं०प०— एकभागानां तावत्त्वं यद्यप्युक्तं गणितशास्त्रे, तथाऽपि तत्र तस्य तात्पर्यं नास्तीति चेत् तत्राह **सङ्ख्यामिति** । **प्रयोजनाभावादिति** । प्रयोजनस्य लोकव्यवहारस्य परार्धपर्यन्तं कृतसङ्ख्ययैव सिद्धेरिति भावः । **एतामेवेति** । 'ननु नास्त्येव सङ्ख्यायामि'ति पूर्वदर्शितामित्यर्थः ।

कं०रा०— ननु परार्धात्परतोऽपि सङ्ख्याऽस्ति चेत् तस्याः संज्ञाकरणं कुतो नेत्यत आह **ततःपरमिति** । परार्धात्परतः सङ्ख्यायाः सत्त्वेऽपि तत्संज्ञाकरणाभावो गणकानां प्रयोजनाभावाद्युज्यत इति भावः ।

श्रीनिधि०— तत्र च कलासवर्णनभागादिति । प्रकरणेष्विति । एवमादिसङ्ख्यापकर्षगणनप्रकरणेष्वित्यर्थः । **एकभागानामिति** । एका या सङ्ख्या दशपञ्चादिरूपा, तद्भागानां तदेकदेशानां तदर्धादि कलासवर्णानां इत्यर्थः । **परेषामपीति** । एकत्वादि परार्धपर्यन्तेति जल्पतामपीत्यर्थः । यदि परार्धात् परतोऽपि सङ्ख्या स्यात् तदा कलासवर्णनादिवत् गणितशास्त्रे संज्ञाकरणं न स्यात् । तदेतदस्ति तेन ज्ञायते ततःपरं सङ्ख्या नास्तीति तत्राह **ततःपरं त्विति** । न हि प्रयोजनाभावेन संज्ञा न कृतेति वनस्थवनस्पतीनां असत्त्वं भवेदिति भावः । **एतामेव विप्रतिपत्तिमिति** । एकत्वादि परार्धपर्यन्तैव सङ्ख्येति विप्रतिपत्तिमपनेतुमित्यर्थः । अन्यथा महत्त्वदृष्टान्तेनैव बाधकनिरासे सति आधिक्यापत्तेरिति भावः । **यथा चैतत्तथा वक्ष्यत इति** । मय्यनन्तगुणेऽनन्त इत्यादिनेति भावः ।

शे०वा०— तथाप्येकभागानामित्यंशवैयर्थ्यम् । न चैकत्वापेक्षयाऽपकृष्टसङ्ख्यासद्भावप्रतिपादनार्थं तदिति वाच्यम् । तत्प्रतिपादनस्य प्रकृतोपयोगादर्शनादित्याशङ्क्य महत्त्वाल्पत्वयोरित्यादिना प्रागुक्तसङ्ख्यादृष्टान्ते प्राप्तानुपपत्तिपरिहारेण तत्समर्थनार्थत्वान्नानुपपत्तिरिति भावेन सङ्ख्यादृष्टान्तोपपादकतया तद्योजयितुं

तत्रानुपपत्तिशङ्कामुत्थापयति **ननु नास्त्येवेति** । **पर्यवसितत्वादिति** । तदपेक्षयाऽधिकसङ्ख्याया अभावादिति भावः । **अवधित्वादिति** । एकत्वापेक्षयाऽपकृष्टसङ्ख्याया अभावादिति भावः । अपकृष्टसङ्ख्याया एकत्वावधित्वे बहुसङ्ख्यायाश्च परार्धावसानत्वे काणादसूत्रसम्मतिमाह **यथोक्तमिति** । यद्यपि सा चैकत्वादिपरार्धपर्यन्तेत्येवं न कणादसूत्रमस्ति किन्त्वर्थादनेकद्रव्यद्वित्वादिकापरार्धान्तेत्येव, तथाऽपि सा पुनरेकद्रव्यानेकद्रव्या च । तत्रैकत्वजातिमत्येकत्वसङ्ख्या द्वित्वत्वादिजातिमत्यनेकद्रव्या द्वित्वादिका परार्धान्तेत्यादितत्सूत्रव्याख्यानरूप-प्रशस्तपादभाष्याद्यनुरोधेनलब्धतत्सूत्रार्थानुवादोऽयं कृत इत्यवधेयम् । **तत्रेति** । गणितशास्त्र इत्यर्थः । **कलेत्यादि** । भागजातौ करणसूत्रं प्रवृत्तम् । अन्योन्यहाराभिहितौ हरांशौ राश्योः समच्छेदविधानमेव । मिथो हराभ्यामपवर्तिताभ्यां यद्वा हरांशौ सुधियाऽत्र गण्यौ । उदाहरणम्— रूपत्रयं पञ्चलवस्त्रिभागो योगार्थमेतान्वद तुल्यहारान् । त्रिषष्टिभागस्य चतुर्दशांशः समच्छिदोमित्यवियोजनार्थे । प्रभागजातौ करणसूत्रं वृत्ता(र्धं)लवघ्नाश्च हराहरघ्नाः । भागप्रभागेषु सवर्णनं स्यात् । उदाहरणम्— व्योमार्धत्रिलवद्वयस्य सुमते पादद्वयं यद्भवे-त्तत्पञ्चांशकषोडषांश(क)चरणः सम्प्रार्थ्यते प्रार्थिने । दत्ता येन वराटकाः कति कदर्पेणार्पितास्तेन तान् । ब्रूहि त्वं यदि वेत्सि वत्स गणिते जातिं प्रभागाभिधाम् । भागानुबन्धभागापवाहजात्योः करणसूत्रं सार्धवृत्तम् । छेदघ्नरूपेषु लवाद्यनार्णमेकस्य भागा अधिको न कश्चित् । स्वांशाधिको नः खलु यत्र तत्र भागानुबन्धे च लवापवह्नवे । तलस्थहारेण हरं निहन्यात् । स्वांशाधिकोने न तु तेन भागान् । उदाहरणं तु, गुण्यान्त्यमेकं गुणकेन हन्यादुत्सादितेनैवमुपान्त्यमादीन् । गुण्यस्ततोऽधो गुणखण्डतुल्यैः । तैः खण्डकैः सङ्गुणितो यतो वेत्यादिगणितशास्त्रादवगन्तव्यमेतत् । नन्वेतावताऽपि न सङ्ख्यादृष्टान्तसमर्थनमनेन वाक्येन सम्भवति । एकत्वापेक्षयाऽपकृष्टसङ्ख्यासद्भावमात्रस्यानेन प्राप्याऽल्पत्वस्यानन्त्यसिद्धावपि परार्धादुत्कृष्टसङ्ख्यान्तरासिद्धया बहुत्वस्यानवधिकत्वासिद्धया बहुत्वस्य परार्ध एव पर्यवसन्नत्वादिति शङ्कायां अपरिहारादित्यत आह **परार्धात्परत इति** । सङ्ख्यासद्भावस्य स्फुटतामेव दर्शयति **सम्भवतीत्यादिना** । तर्हि गणकानां तत्संज्ञा-करणप्रसङ्ग इत्यतस्तदकरणे निमित्तमाह **ततःपरमिति** । परार्धपर्यन्तसंज्ञाकरणेनैव गणनप्रयोजनसिद्धेस्तदुत्तर-सङ्ख्यासंज्ञाकरणाभावो न दोषायेति भावः । **एतामेवेति** । बहुत्वस्य परार्ध एव पर्यवसन्नत्वादल्पत्वस्य चैकत्वानवधित्वान्न सङ्ख्याया बहुत्वाल्पत्वयोरानन्त्यमस्तीत्येतामित्यर्थः । **सङ्ख्याद्दष्टान्तोपादानमिति** । दृष्टान्तान्तरोपादानमित्यर्थः । अन्यथा महत्त्वदृष्टान्तेनैवानन्त्यस्य परिच्छेदाभावरूपत्वसिद्धया विशेषणविशेष्य-भावसमर्थनात् वैयर्थ्यप्रसङ्गादिति भावः ।

वा०२०— तत्सूत्रार्थेति । यद्यपि एकत्वादिपरार्धपर्यन्तेत्यादि शिवादित्यमिश्रादि वचनमस्तीति तदेवात्र प्रमाणीकृतमिति शक्यते वक्तुम् । तथापि मूलसूत्रतद्भाष्यत्यागेन तदुपजीव्युक्तिमात्रप्रमाणीकरण-मसमञ्जसम् । भाष्यादिना तस्य समञ्जसत्वेऽपि तदुक्तेः उक्तसूत्रीयोक्तभाष्यानुवादरूपतया भाष्यादीत्यादि इत्यादिपदेन ग्रहणमेवोचितमिति भावेन तथा नोक्तमिति ज्ञेयम् । **भागजातौ करणसूत्रमित्यादि** । एतच्च लीलावत्यादिज्योतिषग्रन्थगतम् । द्रुमार्धेति पाठः । **गणितशास्त्रादिति** । उक्तज्योतिग्रन्थतद्व्याख्यानरूप-

गणितशास्त्रादित्यर्थः । **सङ्ख्यादृष्टान्तसमर्थनमिति** । पूर्वावधिशून्यत्वमात्रेणोभयावधिशून्यत्वरूपानन्त्यासिद्धया एकत्वापेक्षयाऽपकृष्टसङ्ख्यासद्भावप्रतिपादनेन तत्समर्थनाभावादिति भावः । **गणनप्रयोजनेति** । ब्रह्मपरार्ध-पर्यन्तमेव युगादिकालानामायनस्य प्रयोजनस्य सत्त्वेन तत्तदुत्तरयुगादिकालायनादि प्रयोजनाभावेनेत्यर्थः ।

स०व्र०— कलेति । भागजातौ करणसूत्रं प्रवृत्तम् । 'अन्योन्यहाराभिहतौ हरांशौ राश्यो-स्समच्छेदविधानमेव । मिथो हराभ्यामपवर्तिताभ्यां तद्वा हरांशौ सुधियोऽत्र गुण्यौ ।' उदाहरणम् । रूपत्रयं पञ्चलवस्त्रिभागो योगार्थमेतान्वद तुल्यहारान् । त्रिषष्टिभागस्य चतुर्दशांशस्समच्छिदौमित्यवियोजनार्थे ॥ प्रभागजातौ करणसूत्रम् । 'लवालवघ्नाश्च हरा हरघ्ना भागप्रभागेषु सवर्णनं स्यात् ।' उदाहरणम् । 'व्योमार्धत्रिलवद्वयस्य सुमते पादद्वयं यद्भवेत् तत्पञ्चांशकषोडशांशकरणस्सम्प्रार्थ्य तेनार्थितम् । (दे प्रार्थने) । दत्ता येन वराटकाः कति कदर्पेणार्पितास्तेन तान् ब्रूहि त्वं यदि वेत्सि वत्स गणिते जातिं प्रभागाभिधाम् । भागानुबन्धभागापवाहजात्योः करणसूत्रम् । 'छेदघ्नसूत्रेषु लवाद्यनार्णमेकस्य भागा अधिकोनकाश्चेत् । स्वांशा-धिकोनः खलु यत्र तत्र भागानुबन्धे च लवापवाहे । तलस्थहारेण हरं निहन्यात् स्वांशाधिकोने न तु तेन भागान् । उदाहरणम्— 'गुण्यान्तमेकं गुणकेनहन्यादुत्सादितेनैवमुपान्त्यमादीन् । गुण्यस्ततोऽधो गुणखण्ड-तुल्यैस्तैः खण्डकैस्सङ्गुणितो यतो वा । इत्यादिगणितशास्त्रादवगन्तव्यमेतत् ।

विट्ठल०— प्रकरणेष्विति । गणितशास्त्रगतेषु कलादिविषयकप्रकरणेषु एकत्वसङ्ख्यावान्तरभागाना-मित्यर्थः ।

॥ इति उक्तसङ्ख्यादृष्टान्ते अनुपपत्तिसद्भावात् तच्छङ्कानिरासः ॥
॥ इति परिमाणापकर्षस्यानन्त्याभ्युपगमे बाधकरूपप्रमाणसद्भावशङ्कानिरासः ॥
॥ इति तदुपलम्भकबलवत्प्रमाणाभावः ॥
॥ इति 'साक्षिणा अवगतेऽपि न तत्सत्यता' इति द्वितीयविकल्पविवरणपूर्वकं तस्य निरासः ॥
॥ इति द्वितीयविकल्पनिरासः
(साक्षिणाऽवगतस्य कालाकाशगतपरिमाणोत्कर्षापकर्षयोरानन्त्यस्य असत्यतानिरासः) ॥
॥ इति प्रथमविकल्पद्वयनिरासः ॥
॥ इति तत्साक्षिसिद्धत्वमनिच्छतामभिप्रायस्य विकल्पत्रयम्, भागशः तन्निरासश्च ॥
॥ इति परिमाणोत्कर्षापकर्षोभयतारतम्यानन्तत्वे कालाकाशयोस्तावत्
तत्साक्षिसिद्धत्वस्य समर्थनम् ॥
॥ इति ईश्वरादन्यत्र कालाकाशविषयकपरिमाणोत्कर्षापकर्षोभयतारतम्यानन्तत्वे
भागशः प्रमाणप्रदर्शनम् ॥

* * *

॥ अथ विश्रान्तिशब्दार्थप्रथमविकल्पितार्थे दोषत्वेनोक्तसाध्यवैकल्यस्य कारणे उक्तानां विषयाणां सूत्रकारीयसिद्धान्तत्वदर्शनार्थं तद्विषये प्रमाणप्रदर्शने ईश्वरविषयकपरिमाणोत्कर्षापकर्षतारतम्यानन्तत्वे आगमप्रमाणप्रदर्शनम् ॥

॥ अथ तत्रादौ प्रथमश्रुत्युदाहरणम् ॥

५६ **सु०—** एवं कालाकाशयोः परिमाणोत्कर्षापकर्षानन्त्यं साक्षिणा प्रसाध्येश्वरे तदागमेन साधयति **अणीयांश्चेति** ।

अनु०— अणीयांश्च महीयांश्च भगवानागमोदितः ।

'अणोरणीयान्महतो महीयानात्मे'ति **आगमेन भगवान्** ईश्वरोऽणोरपि **अणीयान्** महतोऽपि **महीयानुदितः** । न च तत्राणुमहच्छब्दाभ्यां किञ्चिद्द्रव्यवस्थितमुच्यते, विशेषणाभावात् । ततो यद्यदपकृष्टपरिमाणं ततस्ततोऽप्यपकृष्टपरिमाणो यद्यच्चोत्कृष्टपरिमाणं ततस्ततोऽप्युत्कृष्टपरिमाण इत्युक्तं स्यात् । तथा चेश्वरगतयोः परिमाणोत्कर्षापकर्षयोरनवधिकत्वमेव लभ्यते ।

नन्वणीयान्महीयानित्युक्त एव भगवति परिमाणोत्कर्षापकर्षयोः पर्यवसानात् कथं तयोः अनवधिकत्वमित्यत आह **अणीयानिति** । अणीयान्महीयानित्युक्तयोरप्यणोर्महतश्चेति शब्दविषयत्वादिति ।

नन्वेवं सति स्वस्मादपि स्वयमपकृष्ट उत्कृष्टश्चेत्यागतम् । को नेत्याह । यथा चैतत्तथा वक्ष्यते ।

परि०— तदागमेनेति । परिमाणोत्कर्षापकर्षानन्त्यमित्यर्थः । **व्यवस्थितमिति** । अणुपदेन परमाणुलक्षणमेव द्रव्यं ग्राह्यं महच्छब्देन च गगनमेवेति न नियम इत्यर्थः । **इत्युक्तयोः** श्रुतावुक्तयोरीशरूपयोरपि श्रौताभ्यां अणोर्महत इति शब्दाभ्यां गृहीतत्वादित्यर्थः । **यथा चैतत्तथा वक्ष्यत इति** । 'महतोऽल्पत्वमपि ही'त्यादावप्यनवधिकपरिमाणोत्कर्षापकर्षवत्त्वोक्त्या भगवत्यपि तद्व्यक्तीभविष्यतीति भावः ॥

गु०दी०— को नेत्याह इति वदता अपर्यवसिताणुतरानन्तभगवन्मूर्तीनामङ्गीकारः सूचितः ।

यादु०— किञ्चिद्व्यवस्थितमिति । अणुशब्देन परमाणुरूपमेकमेव द्रव्यमुच्यते महच्छब्देन च महत्तत्त्वरूपमेकमेव द्रव्यमिति नेत्यर्थः । कुत इत्याशङ्कायां तत्तात्पर्यज्ञापकलिङ्गाभावादित्याह **विशेषणाभावादिति** । **अणीयान्महीयानित्युक्तयोरपीति** । अणोरणीयानित्यागमे अणीयान्महीयानित्युक्तयोर्भगवद्रूपयोरप्यणोर्महतश्चेति श्रौतपञ्चम्यन्तपदाभ्यामवधितयोपादानादित्यर्थः । तथा च यद्यदणीयान्महीयानिति निर्दिश्यते तत्तत्पञ्चम्यन्ताणुमहच्छब्दाभ्यामवधितयोपादाय ततोऽप्यणीयान्महीयानिति व्याख्यायते । ततश्चानवधिकतासिद्धिरिति भावः । नन्वेवं सति विरोध इत्यत आह **यथा चैतदिति** । 'विशेषशक्त्या निर्भेदमप्याकाशमनन्तांशोपेतम् । तत्रानवधिकौ परिमाणोत्कर्षापकर्षौ व्यवस्थया वर्तेते' इति वक्ष्यत इत्यर्थः । तत्राकाशपदमीश्वराद्युपलक्षकतयाऽभिप्रेतमिति नासङ्गतिः ।

कं०रा०— अणीयान्महीयानित्युक्तयोरिति । अनेन 'अणीयांश्च महीयांश्च भगवानागमोदित' इति मूलस्य अणीयान्महीयांश्चेत्युक्तो भगवानप्यणोर्महत इति पञ्चम्यन्ताणुमहच्छब्दरूपागमेनोदितः अणीयसि महीयसि च भगवद्रूपेऽणुमहच्छब्दप्रवृत्तिनिमित्तसद्भावात् तथा च यद्यदणीयो महीयश्च तस्य सर्वस्याप्यणुमहच्छब्दाभ्यां ग्रहणेन ततोऽणीयस्त्वमहीयस्त्वबोधनेनाणोरणीयानित्यागमेन भगवति परिमाणोत्कर्षापकर्षयोर्निरवधिकत्वं सिद्ध्यतीति तात्पर्यमुक्तं भवति ।

शे०वा०— अणीयानित्युत्तरभाष्यस्याव्यवहितपूर्वार्थोपपादकत्वाभावेन पूर्वभाष्येण सङ्गत्यभावादानर्थक्यमाशङ्क्याव्यवहितेन तेन सङ्गत्यभावेऽपि 'दृश्यतेऽनन्त इत्येव तथाऽऽनन्त्यमणावपी'त्युक्तस्य परिमाणोत्कर्षापकर्षयोरनवधिकतायाः प्रामाणिकत्वस्येश्वरांशे आगमसिद्धत्वोपपादनात् तत्समर्थनेन तत्सङ्गतत्वान्न तदिति भावेन वृत्तानुवादपूर्वकमुक्तार्थपरतयोत्तरग्रन्थं सङ्गमयति **एवमिति** । कोऽसावागम इत्यतस्तदुपदर्शनपूर्वकमीश्वरस्योत्कर्षापकर्षानन्त्यस्यागमसिद्धत्वप्रतिपादकतया वाक्यं योजयति **अणोरिति** । नन्वत्र वाक्येऽणुमहच्छब्दयोः परमाणुमहत्त्वरूपद्रव्यविशेषपरत्वेनापकृष्टोत्कृष्टद्रव्यमात्रपरत्वाभावेनेश्वरस्यैतदागमबलेन परमाण्वपेक्षयाऽपकृष्टत्वस्य महत्तत्वापेक्षया चोत्कृष्टत्वस्य प्राप्तावपि, परिमाणोत्कर्षापकर्षयोरनवधिकत्वस्याप्राप्तेर्नैतद्बलेन विवक्षितार्थसिद्धिरित्याशङ्क्य निषेधति **न चेति** । कुतो नेत्यतोऽर्थविशेषपरत्वनिश्चायकप्रमाणाभावादित्याह **विशेषणाभावादिति** ।

नन्वत्राणीयान्महीयानित्युक्तभगवतोऽपि अणोर्महत इति पञ्चम्यन्ताण्वादिशब्दविषयतायां स्वस्मादपि स्वस्य विरुद्धोत्कृष्टत्वापकृष्टत्वप्रसङ्गेनाणीयानित्याद्युक्तस्य भगवतोऽणोरित्यादिविषयत्वासम्भवादणीयानित्याद्युक्तभगवत्येव परिमाणोत्कर्षापकर्षपर्यवसानान्न निरवधिकत्वमित्यभिप्रायेण गूढाभिसन्धिः शङ्कते **नन्विति** । अणीयानित्याद्युक्तस्यापि भगवतोऽणोरित्यादिविषयत्वाद्युक्ता परमाणोत्कर्षापकर्षयोर्भगवति निरवधिकत्वस्यानेन सिद्धिरित्यभिप्रेत्य गूढाभिसन्धिरेवोक्ताक्षेपपरिहारकतयाऽप्येतदेव भाष्यं पुनरवतारयति **इत्यत आह अणीयानितीति** । भाष्यस्य पूर्वोक्तयोजनाय मुक्ताक्षेपपरिहारकत्वायोगात्प्रकृतोपयोगितया तद्योजयति **अणीयान्महीया-**

नित्युक्तयोरपीति । अनेनाणीयान्महीयानिति उक्तशब्दाभ्यामुक्तोऽपि भगवानणोर्महत इत्यागमोदितोऽणोर्महत इति शब्दविषय इति भाष्ययोजनोक्ता भवति ।

पूर्वपक्षी किञ्चित्स्वाशयमुद्घाटयति **नन्वेवमिति** । विदिताभिप्रायः सिद्धान्त्यपि किञ्चित्स्वाशयमुद्घाटयति **को नेत्याहेति** । तर्हि विरोधः स्यादिति पूर्ववाद्यभिसन्धिं निराकरोति **यथा चेति** । **वक्ष्यत इति** । विशेषशक्त्या निर्भेदमप्याकाशमनन्तांशोपेतं तत्रानवधिकौ परिमाणोत्कर्षापकर्षौ व्यवस्थया वर्तेते इत्यादिनेति शेषः । तत्र चाकाशपदस्येश्वराद्युपलक्षणतयाऽभिप्रेतत्वान्नासङ्गतिरिति ध्येयम् ।

वा०र०— अव्यवहितपूर्वेति । सङ्ख्चायां बहुत्वाल्पत्वयोः आनन्त्यरूपा व्यवहितेत्यर्थः । **आनर्थक्यमाशङ्क्य** इत्यस्य अनर्थरूपमित्याशङ्क्य इत्यर्थः । प्रामाणिकस्येत्यस्य समर्थनेन इत्युत्तरेण सम्बन्धः । **समर्थनप्रकारनिरूपणभागमित्यादि** । **विरुद्धोत्कृष्टेति** । उत्कृष्टापकृष्टत्वस्यानिष्टतोपपादनायोक्तं **विरुद्ध इति** । विशेषशक्त्येत्याद्युत्तरग्रन्थे आकाशस्यानन्ततांशोपेततायाः प्रतिपादनेऽपि नेश्वरस्य तत्प्रतिपादनमस्ति । तत्कथं वक्ष्यत इत्युक्तिरित्यत आह **तत्र चाकाशेति** ।

विट्ठल०— किञ्चिद्व्यवस्थितमिति । अणुशब्देन परमाण्वाख्यमेकमेव द्रव्यमुच्यते । महच्छब्देन च महत्तत्त्वमन्यद्वा यत्किञ्चिदेकमेव द्रव्यमिति नेत्यर्थः । कुत इत्यत आह **विशेषणाभावादिति** । व्यवस्थितिज्ञापकाभावादित्यर्थः । **अणीयान्महीयानित्युक्त एवेति** । अणीयानीश्वर इत्युक्ते परमाण्वाद्यपेक्षया न्यूनपरिमाण इति लाभेन भगवति परिमाणापर्यवसानं लभ्यते । तथा महीयानित्युक्ते भगवति परिमाणोत्कर्षपर्यवसाने लभ्यते । तथा च कथं तयोरपर्यवसितत्वमिति शङ्काग्रन्थार्थः । अत्राणीयान्महीयानित्यागमपदाभ्यां यदुदितः स एव भगवान् पुनरणोर्महत इत्यवधिवाचकपदाभ्यामुदित इति मूलयोजनामभिप्रेत्य व्याचष्टे **अणीयान्महीयानित्युक्तयोरपीति** । तथा च भगवति परिमाणापकर्षोत्कर्षयोरानन्त्यात् पर्यवसानं वक्तुमिदं श्रुतिवाक्यं प्रवृत्तम् । तत्र परमाण्वाद्यवयवापकर्षस्य पर्यवसानाभावेऽपि 'सर्वतः प्रकृतिः सूक्ष्मा प्रकृतेः परमेश्वर' इत्युक्तेरभावस्तु वैजात्येनापर्यवसिताणुत्वोपेतसर्वपदार्थपिक्षयाऽप्यणुत्वं तदपेक्षया परमेश्वरवस्तुवैजात्येन भगवतोऽणुत्वमिति सामान्यतो हरेरणोरणीयस्त्वे बुद्ध्या रूढेऽपि नाणोरणीयानित्यन्तेनैवं भगव.....स्मदादि बुद्ध्यारूढो यः परिमाणापकर्षतावन्मात्रत्वं हराविति न मन्तव्यं, किन्तूक्तरूपमणोरणीयस्त्वमपि अणोरिति पञ्चम्यन्तं पदेनाबाधितयोपादाय ततोऽप्यणीयानिति श्रुत्यर्थो बोद्धव्यः । एवं च सिद्धमप्यणीयत्वं पुनरणोरित्यवधितया स्वीकृत्य ततोऽप्यणीयानित्यपर्यवसानश्रुत्यर्थस्य तथा सर्वत उत्कृष्टपरिमाणायाश्चित्प्रकृतेर्महीयानिति वस्तुवैजात्यात् तस्य महतो महीयस्त्वेव बुद्धे तदीयाद्भुतमहीयस्त्वबोधोपायाभावात् तदेव महीयस्त्वोपेतरूपं महत इति पञ्चम्यन्तपदेनावधीकृत्य ततोऽपि महीयानिति पुनस्ततोऽपि महीयानिति पूर्वपूर्वावबुद्धमहद्रूपापेक्षयोत्तरोत्तरं महत्त्वं पर्यवसितमिति श्रुत्या बोध्यत इति भावः । नान्याणीयानित्युक्तमेवात्यन्ताणुभूतं ब्रह्मैवाणोरिति पुनरवधीकृततदपेक्षयाणीयानात्मेति व्याख्याने भगवतः सकाशाद्भगवानणीयामिति

प्राप्तम् । तर्ह्येकस्येव स्वावधिकापकृष्टत्वमुत्कृष्टं च परस्परविरहव्याप्यत्वाद्विरुद्धमिति गूढाभिसन्धिं शङ्कते **नन्वेवं सतीति** । अविदिताशय इवोत्तरमाह **को नेत्याहेति** । तर्हि विरोध इति शङ्काशयं विदित्वोत्तरमाह **यथा चैतत्तथा वक्ष्यत इति** । अत्र यदुपतीये विशेषशक्त्या निर्भेदमप्याकाशमनन्तांशोपेतं तत्रानवधिकौ परिमाणोत्कर्षापि कर्षौ व्यवस्थाया वर्तत इत्यर्थः । अत्राकाशपदमीश्वराद्युपलक्षणतया विवक्षितमिति नासङ्गतिरिति । राघवेन्द्रीये तु महतोऽल्पत्वमिति हीत्यादिना गगनादावप्यनवधिकपरिमाणोत्कर्षापकर्षवत्वैक्याद्भगवत्यपि तद्वत् भविष्यतीति भावः । सर्वपरिमाणानामप्याकाशे सत्त्वादित्यनन्तरं तथा हीत्युक्तविशेषशक्त्येति वाक्यं तदनुसारेण भगवत्त्र्यणुतराणुतमादिपरिमाणानां अणोरणुतरै रूपैरित्युक्तन्यायेन सर्वेष्वपि हि रूपेषु चेतनान्तस्थमारभ्य सर्वगान्तःस्वरूपवानित्युक्तरीत्या च सर्वदा विद्यमानत्वात् तेषां चाविरुद्धत्वादणुपरिमाणावस्थापेक्षया अनणुतरपरिमाणवतः स्वस्यापकृष्टत्वमित्यादिना विरुद्धमित्येतद्वक्ष्यतीति योज्यन्त इत्यर्थः ।

॥ इति प्रथमश्रुत्युदाहरणम् ॥

* * *

॥ अथ तत्र द्वितीयश्रुत्युदाहरणम् ॥

५७ **सु०— श्रुत्यन्तरं चेश्वरे परिमाणोत्कर्षापकर्षयोरानन्त्यं प्रतिपादयदस्तीत्याह आनन्त्येति ।**

अनु०— आनन्त्यवाचकश्शब्दो
द्विधाऽऽनन्त्येऽपि मानताम् ।
याति

'सत्यं ज्ञानमनन्तं ब्रह्मे'ति ब्रह्मण आनन्त्यस्य वाचकः अनन्तशब्दः तावद्देशतः कालतो वस्तुतश्चानन्त्यमाह । तत्र देशानन्त्यं नामानवधिकपरिमाणवत्त्वम् । कालानन्त्यं नामानवच्छिन्नसत्ताकत्वम् । वस्त्वानन्त्यं नामापरिच्छिन्नसङ्ख्यागुणकर्मविग्रहवत्त्वम् । तत्र यदा परिमाणानन्त्यस्य वाचकः तदा द्विधाऽऽनन्त्येऽपि उत्कर्षापकर्षाभ्यामानन्त्येऽपि मानतां याति; न तूत्कर्षानन्त्यमात्रे, विशेषाभावादिति ।

परि०— अनवच्छिन्नसत्ताकत्वमिति । त्रिकालसत्त्वमित्यर्थः ।

यादु०— अनवच्छिन्नसत्ताकत्वमिति । अकादाचित्कसत्ताकत्वमित्यर्थः ।

शे०वा०— आनन्त्येत्याद्युत्तरभाष्यस्य पूर्वशेषत्वाभावाद्वैयर्थ्यमित्याशङ्क्य परिहरति **श्रुत्यन्त्यरं चेति** । कोऽसावानन्त्यवाचकः शब्द इत्यतः तदुपदर्शनपूर्वकं त्रेधानन्त्येऽप्यनन्तशब्दस्य प्रमाणत्वाद्भाष्ये द्विधेत्यस्यानुपपत्तिरित्याशङ्कानिरासायानन्त्यवाचक इत्यस्यावृत्तिमपेक्षिताध्याहारं वाक्यभेदं चाश्रित्य भाष्यं योजयति **सत्यमित्यादिना** । **अनवच्छिन्नसत्ताकत्वमिति** । अकादाचित्कसत्ताकत्वमित्यर्थः । **अपरिच्छिन्नेति** । अपरिच्छिन्नाः सङ्ख्यागुणकर्मविग्रहा यस्येत्येवात्र विग्रहोऽभिमतो न त्वपरिच्छिन्ना सङ्ख्या येषां ते यथोक्ता एवम्भूता गुणकर्मविग्रहा यस्येति । तथा सत्यपरिच्छिन्नसङ्ख्याख्यगुणकर्मविग्रहत्वमिति प्रसक्त्याऽपरिच्छिन्नसङ्ख्यागुणकर्मविग्रहत्वमिति सार्वत्रिकपाठानुपपत्तिप्रसङ्गात् । यद्यप्यपरिच्छिन्नगुणकर्मविग्रहत्वोक्त्याऽपि सङ्ख्याया अपरिच्छिन्नत्वं सिद्ध्यत्येव, तथाऽपि सामान्यविशेषभावमाश्रित्य कुरुपाण्डवन्यायेन पृथगुपादानम् । तत्प्रयोजनं च सङ्ख्याया गुणत्वे वादिविप्रतिपत्तिसूचनमित्यवधेयम् ।

वा०र०— आनन्त्येत्याद्युत्तरभाष्यस्येति । अत्रानन्त्येत्याद्युत्तरभाष्यस्य पूर्वशेषत्वाभावात् वैय्यर्थ्यमित्याशङ्क्य परिहरति **श्रुत्यन्तरं चेति** । कोऽसावानन्त्यवाचकः शब्दः इत्यतः तदुपदर्शनपूर्वकं त्रेधानन्त्येऽपि इत्यादिः पाठः । आशङ्क्येत्यनन्तरं त्रेधानन्त्येऽपीत्यतः प्राक् परिहरतीत्यादि ग्रन्थाभावो लेखकप्रसादात् । मूलकोशे परिहरतीत्यादेः सत्त्वात् । अपेक्षितत्वाच्च ज्ञेयम् । **तथा सति अपरिच्छिन्नसङ्ख्यगुणेतीति** । 'गोस्त्रियोरुपसर्जनस्य' इति सूत्रेण स्त्रीप्रत्ययान्तसङ्ख्याशब्दस्य ह्रस्वत्वेऽतिमालेत्यादाविव परिच्छिन्नसङ्ख्याशब्दस्यैव निष्पत्त्या सङ्ख्यागुणेति प्रयोगायोगप्रसङ्ग इत्यर्थः । यद्यप्यत्रापरिच्छिन्ना सङ्ख्या येषां इत्येव विग्रहो मूलकाराभिप्रेतो वक्तव्यः । उत्तरत्र गुणग्रहणं क्रियादेरप्युपलक्षणं इत्येवोक्त्या सङ्ख्याग्रहणाभावेन सङ्ख्यायाः विशेषणत्वेनैवान्वयस्याभिप्रेततायाः प्रतीतेः । ह्रस्वप्रसङ्गस्तु 'विशेषणं विशेष्येण बहुलमि'ति पूर्वसूत्रात् बहुलग्रहणानुवृत्तिं आश्रित्यार्धपिप्पलीत्यादाविव न भविष्यतीति नानुपपत्तिः । तथापि सङ्ख्यायाः गुणत्वेन ग्रहणस्य वा आदिपदेन ग्रहणस्य वा आश्रयणे उत्तरमूलेऽपि सङ्ख्याग्रहणसिद्धेः । उत्तरग्रन्थरूपज्ञापकाभावेन सङ्ख्यायाः गुणत्वे वादिविप्रतिपत्तिनिरासस्सूचनाय सामान्येत्यादि उत्तरटीकानुसारेण सद्भावाच्चावश्यं गुणादि समकक्ष्यतया विशेष्यत्वेनैव सङ्ख्याग्रहणं कार्यमिति स्पष्टमेव इत्याशयेनात्र सङ्ख्यायाः विशेषणतापक्षनिराकरणं न तु लिङ्गानुपपत्तिमात्राभिप्रायेन ह्रस्वत्वं वा बाहुलकात् उपपाद्यं स्यादिति भावः । **वादिविप्रतिपत्तीति** । चतुर्विंशतिगुणाः इति व्यवहारेण गुणेष्वपि सङ्ख्यासिद्ध्या गुणेषु च गुणानङ्गीकारेण सङ्ख्यायाः न गुणं इत्येवं केचित् मन्यन्ते । केचित्तु गुणेष्वपि चतुर्विंशति व्यवहारो न वास्तवसङ्ख्यासद्भावनिबन्धनः अपि तु गुणैः कार्यप्रत्यासत्योपचारेणेति न सङ्ख्याङ्गीकारा गुणेषु आवश्यकः इति मन्यन्ते । तदुभयविप्रतिपत्ति इत्यर्थः । स्वमते तु सामान्यस्यापि सामान्यगुणस्यापि गुणो यतः इत्यनुव्याख्यानानुसारेण गुणभूताया अपि सङ्ख्यायाः गुणेष्वङ्गीकारेण नानुपपत्तिरिति भावः । तदुपपादयतीत्यतः प्राक् तावदिति शेषः ।

विट्ठल०— अनवच्छिन्नसत्ताकत्वमिति । कालकादिविहीनसत्ताकत्वमित्यर्थः । **अपरिच्छिन्न-सङ्ख्येति** । गुणकर्मविग्रहाणामत्र वस्तुशब्देन ग्रहणादिति भावः । **विशेषाभावादिति** । विशेषज्ञापकाभावादित्यर्थः ।

॥ इति द्वितीयश्रुत्युदाहरणम् ॥

* * *

॥ अथ तत्र श्रौतानन्तशब्दस्य देशकालार्हवस्तुतोऽनेकार्थत्वे अनुपपत्तिशङ्कायाः निरसनम् ॥

५८ **सु०— नन्वनेकार्थत्वमन्यायः । कोऽत्र न्यायविरोधः । निरर्थकशब्दप्रयोगायोगात् तावदेकोऽर्थोऽङ्गीकार्यः, द्वितीयाङ्गीकारे तु न किञ्चिद्बीजमिति कल्पनागौरवम् । उच्यते । यत्र ह्येकस्मिन्नर्थे व्यवस्थिते सति वृथैवार्थान्तराङ्गीकारस्तत्रैवमेतत् । न चैवं प्रकृते । अनन्तशब्दो हि परिच्छेदाभावमाह । परिच्छे(दश्च)दो हि देशतः कालतो वस्तुतश्च भवन् युगपदेव प्राप्नोति । न च तत्र कस्यचित्प्राथम्यमस्ति, नाप्यन्यतमपरित्यागे कारणम् । एवं परिमाणानन्त्येऽप्युत्कर्षापकर्षपरिग्रहो द्रष्टव्य इति ।**

परि०— अन्यायत्वं व्यनक्ति **निरर्थकेति** । समाधत्ते **उच्यत इति** । **व्यवस्थिते सति** पूर्वं प्रमिते सतीत्यर्थः । **परिमाणानन्त्येऽपीति** । तत्रापि युगपदेवोभयप्राप्त्या अन्यतरमात्रग्रहणे बीजाभावादुत्कर्षापकर्षोभयानन्त्यग्रह इत्यर्थः ।

यादु०— एवं परिमाणानन्त्येऽपीति । तत्रापि युगपदेवार्थद्वयप्राप्त्याऽन्यतरमात्रग्रहणे विनिगमकाभावेनोभयार्थतापरिग्रहः ।

कं०रा०— न्यायविरोधमुपपादयन् शङ्कते **निरर्थकशब्देति** । **कल्पनागौरवमिति** । तथा च श्रौतस्यानन्तशब्दस्योत्कर्षापकर्षानन्त्यरूपानेकार्थत्वे कल्पनालाघवरूपन्यायविरोध इति भावः । **एवमिति** । यथा देशकालवस्तुपरिच्छेदानां युगपदेव प्राप्त्या तदभावानामप्यनन्तशब्देन युगपदेव प्रतिपादनान्नानेकार्थत्वकल्पनागौरवं तथा परिमाणानन्त्ये प्रतिपाद्यमाने परिमाणोत्कर्षापकर्षपरिच्छेदयोरपि युगपत्प्राप्तत्वेन तदभावयोरप्यनन्तशब्देन युगपत्प्रतिपादनान्नानेकार्थत्वकल्पनागौरवमिति द्रष्टव्यमिति भावः ।

श्रीनिधि०— युगपदेव प्राप्नोतीति । युगपदेव बुद्धिस्थो भवतीत्यर्थः ।

शे०वा०— गूढाभिसन्धिश्शङ्कते **नन्विति** । सकृत्प्रयुक्तस्येति शेषः । तथा च सकृत्प्रयुक्तस्यानन्त-शब्दस्य न त्रिविधानन्त्यवाचकत्वम् । नापि परिमाणानन्त्यवाचकत्वपक्षे परिमाणोत्कर्षापकर्षानन्त्यवाचकत्वम् । तस्य न्यायविरुद्धत्वादित्यर्थः । भवेदनन्तशब्दस्यानेकार्थत्वाभावो यद्यत्र न्यायविरोधः स्यान्न चासावस्तीति न तदनुपपत्तिरिति गूढाभिसन्धिरेव परिहरति **कोऽत्रेति** । पूर्ववादी कल्पनागौरवप्रसङ्ग एव न्यायविरोध इति स्वाशयमुद्घाटयति **निरर्थकेति** । सिद्धान्त्यपि स्वाशयमुद्घाटयति **उच्यत इत्यादि** । कथमेकस्मिन्नर्थे व्यवस्थिते वृथैवार्थान्तराङ्गीकाराभावः प्रकृत इत्यतोऽनन्तशब्दस्य त्रिविधानन्त्ये तमुपपादयति **अनन्तशब्दो हीति** । ननु श्वेतो धावतीत्यादावर्थद्वयस्य युगपत्प्राप्तावपि यथैकार्थपरित्यागेनैकार्थनियमनं, तथा प्रकृतेऽपि कस्यचित्परि-त्यागेनार्थविशेषनियमनं भविष्यतीत्यतः प्रमाणान्तरविरोधभावात् तत्र युगपत्प्रतीतयोरेकस्य परित्यागसम्भवेऽपि प्रकृते तदभावान्न तत्त्यागो युक्त इत्याह **नापीति** । अन्यथाऽतिप्रसङ्गादिति भावः । **एवमिति** । अनन्तशब्दस्य परिमाणानन्त्यवाचकत्वपक्षेऽप्यनवधिकोत्कर्षापकर्षरूपार्थद्वयस्य युगपत्प्राप्त्याऽन्यतरस्य प्राथम्याभावात् श्वेतो धावतीत्यादाविव युगपत्प्रतीतत्वेऽप्येकपरित्यागे कारणाभावाच्च उभयार्थत्वमेवेत्युक्तन्यायाविषयत्वोपपादनेन उत्कर्षापकर्षपरिग्रहो द्रष्टव्य इत्यर्थः ।

वा०र०— द्वेधानन्त्येऽपि उक्तप्रकारातिदेशस्य वक्ष्यमाणत्वादिति बोध्यम् । **विरोधेति** । अर्थद्वय-स्येत्युपलक्षणम् । श्वेतः कुष्टः इतिवत् श्वेतो श्वयः इतिवच्च श्वा इतो धावतीत्यर्थान्तरस्यापि सम्भवात् । यद्वा श्वेतपदस्य रूढार्थद्वयस्येति विवक्षणात् न दोषः । **प्रमाणान्तरेति** । ह्येषा शब्दादिश्रवणादिरूपप्रमाणान्तरे-त्यर्थः । **उक्तन्यायाविषयत्वेति** । *अन्यायश्चानेकार्थत्वमिति न्यायेत्यर्थः* ।

विष्ठल०— बाधकसद्भाव एव ज्ञापक इत्याशयेन शङ्कते **नन्वेकार्थत्वमिति** । न्यायो विरोधोऽस्तीति शङ्कते **निरर्थकेति** । एकस्मिन्नर्थ इति शब्दसामर्थ्येनानेकार्थत्वेऽपि सन्ध्यैक्यमानयेत्यादौ प्रकरणादिवशेन एकस्मिन्नेवार्थे व्यवस्थिते सतीत्यर्थः । **कारणमिति** । प्रकरणादिरूपमन्यतममात्रपरिग्रहज्ञापकमित्यर्थः । **एवं परिमाणानन्तेऽपीति** । तत्रापि युगपदेवार्थद्वयप्राप्त्या अन्यतरमात्रपरिग्रहे नियामकाभावेनोत्कर्षापकर्षरूपो-भयार्थपरिग्रह इत्यर्थः ।

॥ इति श्रौतानन्तशब्दस्य देशकालार्हवस्तुतोऽनेकार्थत्वे अनुपपत्तिशङ्कायाः निरसनम् ॥

* * *

॥ अथ तत्र कालतो गुणतश्च आनन्त्यवाचकस्यानन्तशब्दस्य अर्थस्पष्टीकरणम् ॥

५९ **सु०— नन्वेवं कालतो गुणतश्चानन्त्यवाचकस्यानन्तशब्दस्याल्पकालत्वमल्प-गुणत्वं चार्थः स्यात्, अन्यथाऽल्पपरिमाणवत्त्वमपि न स्यात् अविशेषादिति चेत् ।**

किमिदं कालतो गुणतश्चाल्पत्वमापाद्यम्; किमल्पा एव गुणाः सन्ति ब्रह्मणो न बहुतराः तथा अल्पकालीनैव सत्ता न प्रचुरकालीनेति, किंवा सर्वकालगतस्याल्पकालेऽप्यवस्थितिः स्यात् महागुणस्य चाल्पोऽपि गुणः स्यादिति ।

आद्यं दूषयति **नैवेति** ।

अनु०— नैव गुणाल्पत्वं कालाल्पत्वं च मानगम् ।

गुणाल्पत्वं कालाल्पत्वं च मानगम् अनन्तं ब्रह्मेति श्रुतिप्रतिपाद्यं नैव भवेदिति गूढाभिसन्धेः प्रतिज्ञा । हेतुमुत्तरत्र वक्ष्यति ।

द्वितीयमाशङ्क्याङ्गीकरोति **सर्वेति** ।

सर्वकालगतस्याल्पकालेऽपि स्यादवस्थितिः ।
महागुणस्य चाल्पोऽपि गुणः स्यादिति चेद्भवेत् ॥

इति चेत् आपाद्यते । तत् **भवेद्** एव इत्यर्थः । अत्र **गुण**ग्रहणं क्रियादेरप्युपलक्षणम् ।

गुणकालयोर्यथेष्टमुपादानं प्राथम्यनिरासार्थम् । तेनोक्तकल्पनागौरवपरिहारं सूचयति ।

परि०— अर्थः स्यादिति । अनन्तशब्दस्येति योज्यम् । **न स्यादिति** । अर्थ इत्यनुवृत्तिः । वक्ष्यमाणमूलानुरोधेन पूर्वविकल्पे किमल्पा एव गुणा इति गुणाः पूर्वं निर्दिष्टाः । उत्तरविकल्पे तु महागुणस्य चेति पश्चान्निर्दिष्टाः । मूलेऽप्येवं निर्देशस्य गुणकालयोर्यथेष्टमुपादानं प्राथम्यनिरासार्थमिति स्वयमेव गतिं वक्ष्यति । गुणाद्यल्पत्वस्य सर्वकालगतस्येत्युत्तरग्रन्थेऽभ्युपगतेः कथमत्र न मानगमित्यप्रामाणिकतोक्तिरित्यत आह **गूढाभिसन्धेरिति** । अल्पमात्रगुणवत्त्वं अल्पकालमात्रसत्त्वं नेत्यभिप्रायो गूढ इत्यर्थः । स तु 'तावत्त्वमेव नैव स्यादि'त्युत्तरत्र व्यक्तीभविष्यतीति भावः । इयं प्रतिज्ञा चेद्धेतुः केत्यत आह **हेतुमिति** । 'देशेऽप्येतन्न नो मतमि'त्यत्रापादकाभावादिति

हेतुं वक्ष्यतीत्यर्थः । **यथेष्टमुपादानमिति** । नैव गुणाल्पत्वमिति सार्धश्लोके क्वचित्पूर्वं गुणानामुक्तिः क्वचित्कालस्य पूर्वमुक्तिः अनन्तशब्दार्थतया प्राथम्येनैकस्य प्रतीतिनिरासार्थमित्यर्थः । तस्यापि किं फलमित्यत आह **तेनोक्तेति** । अनेकार्थत्वस्यान्याय्यत्वविवरणपरेण निरर्थकशब्दप्रयोगेत्यादिग्रन्थेनोक्तकल्पनागौरवेत्यर्थः ।

यादु०— न स्यादिति । अर्थ इति शेषः । ननु गुणाल्पत्वं कालाल्पत्वं चोत्तरत्राङ्गीक्रियते । अतः कथमिदं निराकरणमित्यत आह **गूढाभिसन्धेरिति** । अत्र निषेध्यं कालगुणाल्पत्वं सावधारणमित्यभिसन्धिर्गूढ इति द्रष्टव्यम् ॥ **उत्तरत्रेति** । 'देशेऽप्येतन्न नो मतमि'त्यत्रेत्यर्थः । वस्त्वानन्त्यं नामापरिच्छिन्नसङ्ख्यागुणकर्मविग्रहत्वमिति व्याख्यातत्वात् तदनुसारेणाह **गुणग्रहणमिति** । **यथेष्टमुपादानमिति** । नैव गुणाल्पत्वमित्यादिसार्धश्लोके क्वचिद्गुणस्य क्वचित्कालस्यादितयोपादानमित्यर्थः । **प्राथम्येति** अनन्तशब्दार्थतया प्राथम्येनैकस्यैव प्राप्तिनिरासार्थमित्यर्थः ।

कं०रा०— गुणकालयोरिति । 'नैव गुणाल्पत्वं च मानगमि'त्यत्र गुणस्य प्रथममुपादानं कालस्य पश्चादुपादानं 'सर्वकालगतस्याल्पकालेऽपि स्यादवस्थितिरि'त्यादौ तत्कालस्य प्रथममुपादानं गुणश्च पश्चादुपादानमित्येवं रूपं गुणकालयोर्यथेष्टमुपादानं गुणानन्त्यादि प्रतिपादिकेनानन्त्यशब्देन गुणानन्त्यादिकं युगपदेव प्रतिपाद्यते न तु तत्र कस्यचित्प्राथम्यमस्तीति प्राथम्यनिरासार्थमित्यर्थः । प्राथम्यनिरासेनापि किमित्यत आह **तेनेति** । प्राथम्यनिरासेनानन्तशब्दे उक्तमनेकार्थत्वकल्पनागौरवपरिहारं सूचयतीत्यर्थः ।

श्रीनिधि०— गूढाभिसन्धेरिति । अल्पगुणत्वमेव नाल्पकालीनत्वमेवेति गूढाभिसन्धेरित्यर्थः । अन्यथा द्वितीयकल्पाङ्गीकारविरोध इति भावः । **हेतुमुत्तरत्र वक्ष्यतीति** । देशेऽप्येतन्नो मतमित्यनेनेति भावः । **यथेष्टमुपादानमिति** । क्वचिद् कालस्यादौ उपादानम् । क्वचिद्गुणस्य न तु नियमेनैकस्यैवेत्यर्थः । **प्राथम्यनिरासार्थमिति** । अन्यतमपरिच्छेदस्यैवादौ बुद्धावारोह इति भ्रमनिरासार्थमित्यर्थः ।

शे०वा०— अल्पकालत्वमल्पगुणत्वं चार्थः स्यादिति । परिमाणानन्त्यवाचकत्वे द्विविधानन्त्ये मानत्ववदनन्तशब्दस्य कालानन्त्यवाचकत्वे गुणानन्त्यवाचकत्वेऽपि च द्विविधानन्त्येऽपि तस्य मानत्वसम्भवादिति भावः । अल्पकालत्वाल्पगुणत्वयोस्तदर्थत्वाभावे बाधकाभावेनाप्रयोजकमेतदित्याशङ्क्य परिहरति **अन्यथेति** । **न स्यादिति** । अर्थ इति शेषः । तर्कमूलभूतव्याप्तेरभावात् तर्काभासोऽयमित्यतो विशेषव्याप्त्यभावेऽपि यदविशिष्टस्य यस्य यद्भवति तदविशिष्टस्यापरस्यापि तद्भवतीत्यविशेषलक्षणसामान्यव्याप्तिसद्भावान्नानुपपत्तिरित्याशयेनाह **अविशेषादिति** । नैव गुणाल्पत्वमित्यादेः सर्वकालगतस्येत्यादेश्चैकस्मिन्पक्षेऽनवकाशाद्भिन्नभिन्नपक्षनिरासकतया वाक्यद्वयं सङ्गमयितुं सम्भावितं विकल्पद्वयमाह **किमिदमित्यादिना** । सर्वकालगतस्येत्युत्तरत्र कालाल्पत्वगुणाल्पत्वयोरङ्गीकारात् कथं नैव गुणाल्पत्वमित्यादिना तन्निराकरणमित्यत

उक्तं **गूढाभिसन्धेरिति** । अत्र निषेध्यं न कालाल्पत्वमात्रं गुणाल्पत्वमात्रं वा किन्तु सावधारणं तन्निषेध्यमित्यभिसन्धिर्गूढ इति द्रष्टव्यम् ।

उत्तरत्रेति । 'देशेऽप्येतन्न नो मतमि'त्युत्तरत्रेत्यर्थः । वस्त्वानन्त्यं नामापरिच्छिन्नसङ्ख्यागुणकर्मविग्रहत्वमिति व्याख्यातत्वात् तदनुरोधेनाह **अत्र गुणग्रहणमिति** । आदिपदेन विग्रहपरिग्रहः । अत्रेत्युपलक्षणम् । नैवाल्पगुणत्वमिति पूर्वत्रेत्यपि द्रष्टव्यम् । **अत्र** प्रकरण इति वाऽर्थः । ननु नैव गुणाल्पत्वमिति पूर्ववाक्योक्तक्रमेण सर्वकालगतस्येत्यत्रापि गुणकालयोर्गुणादितयैव वा सर्वकालगतस्येत्येतद्वाक्यानुरोधेन पूर्ववाक्येऽपि कालादितयैव वा तयोर्निर्देश उचितः तत्किमिति क्वचिद् गुणादितया क्वचित् कालादितयोपादानमित्यत आह **गुणकालयोर्यथेष्टमिति** । **प्राथम्येति** । अनन्तशब्दार्थतया प्राथम्येनैकस्यैव प्राप्तिनिरासार्थमित्यर्थः । किं प्राथम्यनिरासेनापीत्यत आह **तेनेति** । **उक्तेति** । 'उच्यते यत्र ह्येकस्मिन्नर्थे व्यवस्थित' इत्यादिना पूर्वोक्तेत्यर्थः ।

वा०र०— यदविशिष्टस्येति । तेनाविशेषभूतेनान्यसाधारण्येनेति यावत् । युक्तस्येत्यर्थः । **पदविशिष्टस्येति** । तेनाविशेषरूपेण साधारणेन युक्तस्येत्यर्थः । **अविशेषलक्षणेति** । व्याप्तिस्तावत् द्विविधा । **विशेषव्याप्तिसामान्यव्याप्तिश्चेति** । द्वितीयापि द्विविधा । यदिन्द्रियरूपादिषु इत्याद्याकारा यदि पीतमुदकं त्वामन्तर्दधक्षत् तर्हि मामपीत्येवाविशेषणाच्च । तत्र इयं व्याप्तिरित्याशयः । एवमेव जातीयके बोध्यम् । **अपरिच्छिन्नगुणकर्मेति** । यद्यपि गुणादिसमकक्षतया सङ्ख्यापि प्राक् व्याख्यातेति सङ्ख्यागुणकर्म इति वक्तुमुचितम्, तथापि वादिविवादगुणत्वे सूचनाय प्राक् पृथक्ग्रहणे यो प्रकृते गुणत्वेनैव तस्याः सङ्ग्रहोऽभिप्रेत इति न पृथक् तदुपपादनं आवश्यकम् । एतदाशयेनैवादिपदेन विग्रहपरिग्रहः इति विग्रहमात्रपरिग्रहं वक्ष्यतीति नानुपपत्तिरिति ज्ञेयम् ।

स०व्र०— उत्तरत्रेति । 'देशेऽप्येतन्न नो मतमि'त्यत्रेत्यर्थः । वस्त्वानन्त्यं नामापरिच्छिन्नसङ्ख्यागुणकर्मविग्रहवत्त्वमिति पूर्वं व्याख्यातत्वात् तदनुसारेणाह **गुणग्रहणमिति** । ननु गुणाल्पत्वं कालाल्पत्वं चेत्युक्तक्रमेणैवोत्तरत्रापि गुणाल्पत्वस्यैव प्रथमतो वक्तव्यत्वात् क्रमं विहाय यथेष्टं 'सर्वकालगतस्याल्पकालेऽपि स्यादवस्थितिः । महागुणस्य चाल्पोऽपि गुणः स्यादि'त्युत्तरत्र कालाल्पत्वस्य प्रथमतो ग्रहणमयुक्तमित्यत्राह **गुणकालयोरिति** ।

विठ्ठल०— नन्वेवमिति । अनन्तशब्दस्य द्विविधानन्त्यवाचकत्वेऽङ्गीकृत इत्यर्थः । **न स्यादिति** । अर्थ इति शेषः । **किमिदमिति** । अत्रापाद्यमिदं कालतो गुणतश्चाल्पत्वं किमिति योजना किमित्युक्तमेव विवृणोति **किमल्पा एवेत्यादिना** । गूढाभिसन्धेः प्रतिज्ञेति । अल्पगुणवत्त्वं अल्पकालसत्त्वं च ब्रह्मणि विद्यते । परन्तु अल्पगुणवत्त्वमेवाल्पकालमात्रे सत्त्वमेवेत्यतः श्रुतिप्रतिपाद्यं नैवेतीयमभिसन्धिरूढि इत्यर्थः ।

उत्तरत्रेति । 'देशेऽप्येतन्न नो मतमि'त्यत्रेत्यर्थः । वस्त्वानन्त्यं नामापरिच्छिन्नसङ्ख्यागुणकर्मविग्रहत्वमिति व्याख्यातत्वात् तदनुरोधेनाह **गुणग्रहणमिति** । कुत इत्यत आह **गुणकालयोरिति** । **यथेष्टमिति** । उक्तिक्रमनियममपहायेत्यर्थः । **प्राथम्यनिरासार्थमिति** । गुणकालवस्तुपरिच्छेदरूपार्थत्रयमध्ये अनन्तशब्दार्थतया प्राथम्येन ततोऽस्यैव प्राप्तिरिति नियमार्थमित्यर्थः । ततश्च किमित्यत आह **तेनेति** ।

॥ इति कालतो गुणतश्च आनन्त्यवाचकस्यानन्तशब्दस्य अर्थस्पष्टीकरणम् ॥

* * *

॥ अथ तत्र 'नैव गुणाल्पत्वं' इत्यादेः अभिसन्ध्युद्घाटनम्, कारणसहितम् ॥

६० सु०— ननु यदि कालाल्पत्वं गुणाल्पत्वं चाङ्गीक्रियते, कथं तर्हि 'नैव गुणाल्पत्वमि'ति निराकरणमित्यतोऽभिसन्धिमुद्घाटयति तावत्त्वमेवेति ।

अनु०— तावत्त्वमेव नैव स्यात्

अल्पत्वम् एव इत्यर्थः । 'इत्युक्तं प्रागि'ति शेषः । कुतो न स्यादिति चेत्, आपादकाभावादित्याह देशेऽपीति ।

देशेऽप्येतन्न नो मतम् ।

परिमाणे अपि इत्यर्थः । एतत् तावत्त्वमेव । नः अस्माकम् ।

एतदुक्तं भवति । परिमाणविषयेऽस्मदीयं श्रुतिव्याख्यानमुपलभ्य हि गुणकालयोरप्येतदापाद्यते, आपादकान्तराभावात् । न च परिमाणेऽस्माभिरेवं व्याख्यायते 'अपकृष्टमेव परिमाणमनवधिकमस्ति नोत्कृष्टमि'ति, द्विधानन्त्येऽपीत्युक्तत्वात्; अतो निर्मूलमेतदापादनमिति ।

परि०— भावानवगमादाह **एतदुक्तं भवतीति** । **एतदापाद्यत इति** । अल्पत्वमेवेत्येतदित्यर्थः । **इत्युक्तत्वादिति** ॥ **ईशस्यानवधिकपरिमाणोत्कर्षापकर्षत्वे श्रुतिद्वयोक्तिः** ॥

शे०वा०— 'ननु तावत्त्वमेव नैव स्यादि'त्युत्तरवाक्यमनर्थकम् । न चैतन्नैव गुणाल्पत्वमित्युक्ताभिप्रायकथनरूपत्वान्नानर्थक्यमिति वाच्यम् । तदभिप्रायकथनेऽपि निमित्ताभावादित्यतः तत्र प्राप्तानुप-

पत्तिपरिहारार्थत्वात् तदभिप्रायकथनस्य नानर्थक्यमिति भावेन तत्र प्राप्तानुपपत्तिपरिहारार्थं तदभिसन्ध्युद्घाटनपरतयोत्तरवाक्यं योजयितुं तदुक्तेऽर्थेऽनुपपत्तिशङ्कामुत्थापयति **नन्विति** । **अल्पत्वमेवेत्यर्थ इति** । गुणकालयोरिति शेषः । पूर्वोक्ताभिसन्ध्युद्घाटनस्य मूलारूढतां कर्तुमपेक्षितं पूरयति **इत्युक्तं प्रागिति शेष इति** । तथापि 'देशेऽप्येतन्न नो मतमि'त्येतद्भाष्यखण्डवैयर्थ्यमेव । न च परिमाणेऽपि तावत्त्वासम्मतिकथनार्थं तदिति वाच्यम् । तत्कथनस्याप्यानर्थक्यादित्यत आपादकाभावकथनार्थत्वान्न तदिति भावेन तत्कथनपरतयोत्तरवाक्यं सङ्गमयितुं तन्निवर्त्यशङ्कामुत्थापयति **कुत इति** । आपादकाभावस्य मूलारूढतासिद्ध्यर्थं देशपदार्थमाह **परिमाणेऽपीति** । **एतत्तावत्त्वमेवेति** । तावत्त्वमेवेति पूर्ववाक्ये सावधारणस्यैव प्रस्तुतत्वादेतदिति सावधारणस्यैव परामर्श इति भावः । ननु परिमाणे तावत्त्वमेवेत्यसम्मतावपि गुणकालयोस्तावत्त्वमेवेत्यापादनं भविष्यति । आपादकान्तरस्यापि सम्भवेन परिमाणे तावत्त्वस्यैव तदापादकतायां निमित्ताभावात् कथं च परिमाणे तावत्त्वासम्मतिरित्यत आह **एतदुक्तं भवतीति** । एतच्छब्दस्य वक्ष्यमाणेनेतिशब्देन सम्बन्धः ।

वा०र०— परिमाणे भावत्वासम्मतिश्चेत् आपादकाभावः इत्यत आह **आपादकान्तरेणापीति** । **आपादकतायाम्** आपादकत्वाश्रयणेत्यर्थः ।

विठ्ठल०— देशशब्दस्यात्र प्रकृतोपयोगाय विवक्षितार्थमाह **परिमाणेऽपीत्यर्थ इति** निषेधार्थकाव्ययत्वनिरासायाह **अस्माकमिति** । कथमनेन तावत्त्वमेवेत्यस्यापादकाभावसिद्धिरित्यतस्तदुपपादयति **एतदुक्तं भवतीति** । अस्मदीयमिति उत्कर्षापकर्षानन्त्यरूपमित्यर्थः । **एतदिति** । अल्पत्वमित्यर्थः ।

॥ इति 'नैव गुणाल्पत्वं' इत्यादेः अभिसन्ध्युद्घाटनम्, कारणसहितम् ॥
॥ इति ईश्वरविषयकपरिमाणोत्कर्षापकर्षतारतम्यानन्तत्वे आगमप्रमाणप्रदर्शनम् ॥

* * *

॥ अथ 'तदर्थस्य (ईश्वरादेरनवधिकोत्कृष्टापकृष्टपरिमाणसमर्थनस्य) सूत्रकाराभिप्रेतत्व'दर्शनम् ॥

६१ सु०— नन्वेतदीश्वरादेरनवधिकोत्कृष्टापकृष्टपरिमाणसमर्थनमयुक्तम्, सूत्रकारेण क्वाप्यनुक्तत्वात्; 'महद्दीर्घवद्वे'ति सूत्रस्य, विजातीययोरपि कार्यकारणभावोपपादनेन, व्यधिकरणयोरप्यपरिच्छिन्नपरिमाणोत्कर्षापकर्षयोरुपपादनेन वा, समर्थयितुं शक्यत्वादित्यत आह महत इति ।

अनु०— महतोऽल्पत्वमपि हि व्योमवत्प्राह वेदवित् ।

निरवधिकपरिमाणोत्कर्षवतोऽपि) ब्रह्मणोऽल्पपरिमाणवत्त्वं च व्योम दृष्टान्तीकृत्य 'व्योमवच्चे'ति सूत्रखण्डेन प्राह सूत्रकारः ।

अतो ब्रह्मणो गगनस्य वाऽनवधिकपरिमाणोत्कर्षापकर्षसद्भावस्तत्सिद्धान्तो भवत्येवेति ।

परि०— क्वाप्यनुक्तत्वादिति । अक्षरनयेऽन्यभावव्यावृत्तेश्चेत्यत्रेश्वरे अणुत्वमहत्त्वयोरुक्तावपि तयोरनवधिकत्वस्य तत्रानुक्तिरिति भावेन पूर्वमीश्वरादेरनवधिकोत्कृष्टेत्याद्युक्तिः । 'अल्पश्रुतेरिति चेत्तदुक्तमि'त्यस्यापि व्योमवदित्येतत्प्रपञ्चनरूपत्वादिति भावः । ननु 'महद्दीर्घवद्वे'ति सूत्रे ह्रस्वत्वपारिमाण्डल्याभ्यामपि परिमाणोत्पत्तिं ब्रुवता सूत्रकृता परिमाणावान्तरजातेरपाकरणे वैजात्यनिरसनपूर्वं सर्वपरिमाणानां सजात्यसूचनेन त्र्यणुकादिगतपरिमाणस्येव परमाण्वादिगतपरिमाणस्याप्यणुत्वमहत्त्वयोराक्षेपिकयोः सूचनादित्यत आह **महद्दीर्घवद्वेति सूत्रस्येति** । वैजात्यमित्युपेत्यैव ह्रस्वत्वपारिमाण्डल्याभ्यां विजातीयाभ्यामपि महत्त्वं दीर्घत्वं जायते । यथा परमाण्वादिगतद्वित्वत्रित्वसङ्ख्याया द्व्यणुकादौ परिमाणजन्मोपेयते । प्रशिथिलावयवसंयोगरूपप्रचयात्तूलपिण्डादिपरिमाणजन्माङ्गीक्रियते तथेत्येवमुपपादनेनेत्यर्थः ॥ **व्यधिकरणयोरिति** । गगनादावेवानवच्छिन्नोत्कर्षः परमाणुष्वेव तादृशपरिमाणापकर्ष इत्युपपादनेनेत्यर्थः । व्योम दृष्टान्तीकृत्येत्यत्र व्योमेति भिन्नं पदं द्वितीयान्तम् । **सूत्रखण्डेनेति** । 'अर्भकौकस्त्वात्तद्व्यपदेशाच्च नेति चेन्न निचाय्यत्वादेवं व्योमवच्चे'ति लिङ्गपादीयसूत्रांशेनेत्यर्थः ।

यादु०— सूत्रकारेणेति । तथा चापसिद्धान्त इति भावः । ननु 'महद्दीर्घवद्वे'ति सूत्राक्षिप्तमेवेदम् । तथा हि । अस्मिन्सूत्रे तावद् ह्रस्वत्वपारिमाण्डल्याभ्यां त्र्यणुकद्व्यणुकयोरपि परिमाणमुत्पद्येतेत्यापादनमर्थतया प्रतीयते, तत्र वैजात्यात् कथमिदमापादनमिति परेणोक्तेऽसिद्धं वैजात्यं सर्वत्रापि किञ्चिदपेक्षयाऽणुत्वमहत्त्वयोस्सत्त्वेन त्वदभिमतपरमाणोरपि किञ्चिदपेक्षया महत्त्वादित्यस्माभिरभिहिते परेण परिमाणापकर्षतारतम्यं क्वचिद्विश्रान्तमित्यनुमानेन परमाणौ महत्त्वाभावे साधिते तदनुमाने साध्यवैकल्याद्यभिधानाय परिमाणोत्कर्षापकर्षयोरनवधिकत्वं समर्थनीयमेव अतः सूत्राक्षिप्तप्रमेयसमर्थने कथमपसिद्धान्तशङ्केत्यत आह **महद्दीर्घवद्वेति** । **विजातीययोरपीति** । सङ्ख्यापरिमाणयोस्तेनैव स्वीकृतत्वादिति भावः । तथा च सूत्रार्थस्यान्यथाऽनुपपत्त्याऽऽक्षेपोऽसिद्ध इति भावः । अस्तु वा परमते परिमाणत्वावान्तरजात्यभावोपपादनायोक्ताऽपि रीतिः तथाऽपि यदेकैकस्यामेवाकाशादिव्यक्तौ परिमाणोत्कर्षापकर्षयोरनवधिकत्वं समर्थितं तत्सर्वथा नोक्तसूत्राक्षिप्तमित्याशयेनाह **व्यधिकरणयोरपीति** । आकाशे परिमाणोत्कर्षापरिच्छेदः परमाणौ तदपकर्षापरिच्छेद इति भिन्नाधि-

करणयोरपीत्यर्थः । एवमपि साध्यवैकल्याद्युक्तिसम्भवेन सूत्रार्थनिर्वाहादिति भावः । **तत्सिद्धान्तो भवत्येवेति** । नन्वेवं चेत्तत्रैवैतत्सूत्रसमर्थनं न्याय्यम् । सत्यम् । उक्तानुमाने साध्यवैकल्यादिकथनाय परिमाणोत्कर्षापकर्षयोरनवधिकत्वं तावदवश्यमत्र समर्थनीयम् । तच्चोक्तरीत्या यद्यपि नैकस्मिन्नेव वस्तुन्यपेक्षितम् । तथाऽप्यन्यत्र सूत्रकारोक्तं यदाकाशादावेकस्मिन्नेव परिमाणोत्कर्षापकर्षयोरानन्त्यं तदपि प्रसङ्गात्समर्थयितुमत्रेदमुक्तमिति ज्ञातव्यम् ।

वं०प०— तत्सिद्धान्त इति । सूत्रकारसिद्धान्त इत्यर्थः ।

श्रीनिधि०— व्योमवच्चेति सूत्रखण्डेनेति । अर्भकौकस्त्वात् तद्व्यपदेशाच्च नेति चेन्न निचाय्यत्वादेव व्योमवच्चेति सूत्रखण्डेनेत्यर्थः । यथा व्योम्नः सर्वगतस्यापि अल्पदेशस्थत्वं घटाकाशादेस्तथा दर्शनात् । अंशांशिनोश्च अभेदात् । तथा भगवतोऽपि । इयांस्तु विशेषः । भगवदंशानां सर्वगतत्वमपीति भावः ।

शे०वा०— ननु महतोऽल्पत्वमपि हीत्युत्तरभाष्यमनर्थकम् । न चैतदीश्वरादेरनवधिकोत्कृष्टापकृष्टपरिमाणसद्भावस्य सूत्रकृत्कथितत्वकथनार्थं तदिति वाच्यम् । तत्कथनस्याप्यनर्थकत्वात् । न चेदं स्वकीयस्येश्वरादावनवधिकोत्कृष्टापकृष्टपरिमाणसमर्थनस्य सूत्रकृदसम्मतत्वेनायुक्तताशङ्कानिरासार्थत्वान्नानर्थक्यमिति वाच्यम् । महद्दीर्घवद्वेति व्याख्येयसूत्रानुरोधेनैवोक्तार्थस्य सूत्रकृत्सम्मतत्ववर्णनसम्भवेन तत्त्यागेन सूत्रान्तरपर्यन्तधावनस्याकुशलत्वापादकतयाऽयोगादित्यतो व्याख्येयस्य सूत्रस्यान्यथासिद्धत्वादेतदनुरोधेन सूत्रकृत्सम्मतत्वसमर्थनासम्भवाद्युक्तमेतत्सूत्रपरित्यागेन सूत्रान्तरपर्यन्तधावनमित्येतदभिप्रेत्य सूत्रकृदकथितत्वशङ्कानिरासकतयोत्तरभाष्यं योजयितुं 'महद्दीर्घवद्वे'ति सूत्रस्यान्यथासिद्धिव्युत्पादनपूर्वकं सूत्रकृदकथितत्वेन भाष्यकारीयस्येश्वरादावनवधिकोत्कृष्टापकृष्टपरिमाणसमर्थनस्यायुक्ततताशङ्कामुत्थापयति **नन्वेतदिति** । **सूत्रकारेण क्वापीति** । तथा च सूत्रानुक्तार्थसमर्थनरूपत्वादभाष्यत्वमिति भावः । नन्वयमर्थो महद्दीर्घवद्वेति सूत्र एव सिद्धः । यद्यपि चायं न सूत्रस्य श्रौतोऽर्थः तथाऽप्याक्षिप्तार्थो भवत्येवेति भवति सूत्रार्थः । तथा हि । अत्र सूत्रे तावत्परमाणुद्व्यणुकपरिमाणाभ्यां ह्रस्वत्वपारिमाण्डल्याभ्यां द्व्यणुकत्र्यणुकयोः परिमाणमुत्पद्येतेत्यापादनमर्थतया प्रतीयते । तत्र वैजात्यात् कथमिदमापादनमिति शङ्कानिरासाय वैजात्यमसिद्धं सर्वत्र द्रव्ये आपेक्षिकाणुत्वमहत्त्वयोर्दर्शनेन त्वदभिमतपरमाण्वादेरपि किञ्चिदपेक्षया महत्त्वादित्यवश्यं प्रतिवक्तव्यमेव । तत्र च परिमाणापकर्षतारतम्यं क्वचिद्विश्रान्तं परिमाणतारतम्यत्वात् उत्कर्षपरिमाणतारतम्यवदित्यनुमानबाधशङ्कायां तदनुमाने दृष्टान्ते साध्यवैकल्याद्यभिधानाय परिमाणोत्कर्षापकर्षयोरनवधिकत्वसमर्थनस्यात्रावश्यकत्वात् । अतः सूत्राक्षिप्तप्रमेयसमर्थनपरत्वान्नाभाष्यत्वमित्याशङ्क्याह **महद्दीर्घवद्वेति** । **विजातीययोरिति** । वैजात्यमङ्गीकृत्यापि कार्यकारणभावः शक्योपपादनः । अन्यथा परमाण्वादिगतद्वित्वादिसङ्ख्याया अपि द्व्यणुकादिपरिमाणविजातीयतया तदकारणप्रसङ्गात् । परिमाणस्यैवमिति नियमस्य निर्मूलत्वात् । तथा च सूत्रार्थस्यान्यथासिद्धत्वान्नोक्तार्थस्य तदाक्षिप्तत्वमिति भावः । अस्तु वा परमते परिमाणत्वावान्तरजात्यपाकरणाय

उक्तरीत्यनुसरणम् । तथाऽपि यदेकैकस्यामेवाकाशादिव्यक्तौ परिमाणोत्कर्षापकर्षयोरनवधिकत्वसमर्थनं तत्सर्वथा नोक्तसूत्राक्षिप्तमित्याशयेनाह **व्यधिकरणयोरिति** । आकाशे परिमाणोत्कर्षापरिच्छेदः परमाणौ च तदपकर्षापरिच्छेदः । इत्येवं भिन्नाधिकरणयोरपीत्यर्थः । एवमपि साध्यवैकल्याद्युक्तिसम्भवेन सूत्रार्थनिर्वाहादिति भावः । **तत्सिद्धान्तो भवत्येवेति** । यद्यप्येवमेतत्समर्थनं तत्सूत्रव्याख्यानावसर एव कर्तुमुचितम् । तथाऽप्युक्तानुमाने साध्यवैकल्यादिव्युत्पादनाय परिमाणोत्कर्षापकर्षयोरनवधिकत्वं तावदवश्यमत्र समर्थनीयम् । तच्च यद्यपि व्यधिकरणयोरपि परिमाणोत्कर्षापकर्षयोरुपपादनेऽपि पर्यवस्यतीति तादृशमेव व्युत्पाद्यम् । तथाऽप्यन्यत्र सूत्रकारोक्तं यदाकाशादावैकैकस्मिन्नेव परिमाणोत्कर्षापकर्षयोरानन्त्यं तस्यापि सिंहावलोकनन्यायेनात्र समर्थनं कृतमित्यवधेयम् ।

वा०र०— अयुक्तताशङ्कापरिहारार्थत्वादिति । अयुक्तताशङ्कायाः व्योमवच्चेति सूत्रे सूत्रकृत्सम्मतत्वप्रदर्शनेन परिहारार्थत्वादित्यर्थः । तेन महद्दीर्घवद्वेति उत्तरवाक्येऽकुशलत्वदूषणाभिधानप्रसक्तिरिति बोध्यम् । **अभाष्यत्वमितीति** । सूत्रार्थो वर्ण्यते यत्र पदैः इत्याद्युक्तभाष्यलक्षणाभावादिति भावः । **एतत्समर्थनमिति** । एकस्मिन्नेव परिमाणोत्कर्षानन्त्यसमर्थनमित्यर्थः । **तत्सूत्रेति** । 'व्योमवच्चे'ति सूत्रेत्यर्थः । सिंहावलोकनन्यायेन इत्यतःपरं 'प्रतिपादनार्थे' इति शेषः । अत्रेत्यस्यात्र प्रतिपादनार्थे अत्र समर्थनं इति उभयत्रान्वयः । समर्थनपदे तु प्रागुक्त एतत्समर्थनमित्यत्रत्य एतच्छब्दपरामृष्टव्यस्य समर्पकं तस्येत्येतावत् अनुवर्तनीयम् । तेन विवक्षितार्थलाभः इति बोध्यम् । समर्थनपदं प्रागुक्तैतत्समर्थनपरमित्याहुः ।

विट्ठल०— सूत्रकारेणेति । यद्यप्यन्यभावव्यावृत्त्येश्चेत्यत्र अस्थूलमनण्विति परिमाणोत्कर्षाद्युक्ताऽप्यनवधिकापकर्षाद्यनुक्तेरिति द्रष्टव्यम् । तथा चापसिद्धान्त इति भावः । ननु 'महद्दीर्घवच्चे'ति सूत्रे त्र्यणुकादिपरिमाणाच्चतुरणुकादिपरिमाणवत् परमाणुद्व्यणुकगत्याभ्यां ह्रस्वपरिमण्डलाभ्यां द्व्यणुके त्र्यणुके च परिमाणमुत्पद्येतेत्यापादानं क्रियते । तद् द्व्यणुकादिगतपरिमाणस्य परमाण्वादिगतपरिमाणापेक्षया विजातीयत्वाभेदमापादनमुपपन्नमिति परेण चोदिते परिमाणावान्तरजातेरभावेन वैजात्यमसिद्धम् । किन्तु किं तदपेक्षयाणुत्वमहत्त्वयोः सर्वत्र सत्त्वेन सर्वत्राप्यणुत्वं महत्त्वं चास्तीति सूत्रतात्पर्यस्य निश्चितत्वादीश्वरादेरनवधिकोत्कर्षापकर्षे कथमपसिद्धान्त इत्यत आह **महद्दीर्घवद्वेति सूत्रस्येति** । कुत एव सूत्रव्याख्यापरिमाणवैजात्यमङ्गीकृत्यैव ह्रस्वत्वपारिमाण्डिल्याभ्यां तद्विजातीयमेव महत्त्वं दीर्घत्वं त्र्यणुकादावुत्पद्येत । सङ्ख्याप्रचयेन च विजातीयेन परिमाणजन्मदर्शनेनेहापि तद्वज्जन्मोपपत्तेरित्युपादानेन सूत्रस्य समर्थयितुं शक्यत्वादित्यर्थः । अस्तु वा परिमाणावान्तरजात्यभावोपपादनेनोत्कृष्टापकृष्टपरिमाणवत्त्वमिति सूत्रकारसिद्धान्तः । तथाप्येकस्यामेव व्यक्तौ परिच्छेदरहितपरिमाणोत्कर्षापकर्षवत्त्वं न सूत्राक्षिप्तं किन्तु गगनादौ परिमाणोत्कर्षापरिच्छेदः । परमाणौ तदपकर्षापरिच्छेद इति भिन्नाधिकरणयोरप्यपरिच्छिन्नपरिमाणोत्कर्षापकर्षयोरुपपादनेन सूत्रार्थस्य समर्थयितुं शक्यत्वेनैकस्मिन् ईश्वरादेरनवधिकोत्कृष्टापकृष्टपरिमाणसमर्थनमयुक्त-

मित्याह **व्यधिकरणयोरपीति** । **व्योमवच्चेति सूत्रखण्डेनेति** । सर्वेषु भूतेष्वित्यल्पौकस्त्वश्रवणान्नायं सर्वगतो विष्णुरित्याशङ्क्य 'अर्भकौकस्त्वादि'ति सूत्रांशे सर्वगतत्वे अल्पौकस्त्वं च युज्यते । **व्योमवदिति** । ब्रह्मणि तत्र तत्र दृष्टान्ततयोपपत्ते गगने च परिमाणोत्कर्षवत्त्वेऽप्यल्पपरिमाणत्वमुपपादितमिति भावः । **सिद्धान्तो भवत्येवेति** । यद्यपि महद्दीर्घवद्वेति सूत्र एव परिमाणावान्तरजातिनिरसनेनेश्वरादावनवधिकपरिमाणोत्कर्षापकर्षवत्त्वं सूत्रार्थतया सिद्ध्यत्येव तथाप्यङ्गीकारवादेनाभ्युच्चयतया वा लिङ्गपादीयं सूत्रोपादानमिति ज्ञातव्यम् ।

॥ इति 'तदर्थस्य (ईश्वरादेरनवधिकोत्कृष्टापकृष्टपरिमाणसमर्थनस्य) सूत्रकाराभिप्रेतत्व'दर्शनम् ॥

* * *

॥ अथ तदर्थविपर्यये बाधकप्रदर्शनम् ॥

॥ अथ तत्र कालाकाशेश्वराणां अनवधिकपरिमाणोत्कर्षापकर्षाभावे बाधकप्रदर्शनम् ॥

॥ अथ तत्राप्यादौ कालादेरल्पाल्पतरदेशसंस्थानाभावे सर्वगतत्वाभावरूपानिष्टापत्तिः ॥

६२ **सु०—** किञ्च योऽर्थो निरवकाशप्रमाणसिद्धो यद्विपर्यये चानिष्टं स सर्वोऽपि सिद्धान्त एव । तत्र कालाकाशयोरी(रपी)श्वरे चानवधिकपरिमाणोत्कर्षापकर्षसद्भावः साक्षिणा आगमेन च सिद्ध इत्युक्तम् । तद्विपर्यये बाधकमाह **यदीति** ।

अनु०— यद्यल्पदेशसंस्थानं न सर्वत्रापि नो भवेत् ।

'कालादेरि'ति वर्तते । **सर्वत्रापि संस्थानं** इति च ।

कालादीनां सर्वगतत्वं परेणाप्यङ्गीकृतम् । सर्वगतत्वं च सर्व(त्र)देशे संस्थानम् । तथा च यदि कालादेरल्पाल्पतरदेशेषु संस्थानं न स्यात्, तदा सर्वत्रावस्थानमपि नो भवेत् ।

कुत इत्यत आह **स्थितस्य हीति** ।

स्थितस्य ह्यल्पदेशेषु सर्वगत्वं भवेद् ध्रुवम् ।
एकत्राप्यनवस्थस्य कुत एवाखिलस्थता ॥

ध्रुवम् इत्यवधारणे । अल्पदेशेषु स्थितस्यैवेति । यथा खल्वेकैकं वर्णमुच्चारयत एव सर्ववेदोच्चारणम्, न त्वेकमपि वर्णमनुच्चारयतः; तथा अल्पाल्पतरदेशेषु स्थितस्य एव हि सर्वदेशगतत्वं भवेत् । एकैकत्रापि देशे अनवस्थितस्याखिलदेशस्थता कुत एव भवेत् ।

अनेन 'यो यत्समुदायं व्याप्नोति स तदेकदेशानपि व्याप्नोति(त्येव)', 'यश्चैकदेशान्न व्याप्नोति नासौ तत्समुदायमि'त्यन्वयव्यतिरेकौ दर्शितौ ।

परि०— कालाकाशबुद्ध्याह **साक्षिणेति** । आकाशेश्वराभिप्रायेणाह **आगमेन चेति** । 'स एषोऽनन्तः', 'अणोरणीयान्', 'सत्यं ज्ञानमनन्तं ब्रह्मे'त्याद्यागमेनेत्यर्थः । **इति चेति** । सर्वत्रापीत्यनन्तरं संस्थानमिति चानुवर्तत इत्यर्थः । **सर्वगतत्वमिति** । यद्यपि परेणावृत्तिमत्त्वमेवाभ्युपेतं तथाऽपि विभुत्वाङ्गीकारात् विभुत्वस्य च सर्वगतत्वेन विनानुपपत्तेरेवमुक्तम् । अत एव तत्तथैव व्यनक्ति **सर्वगतत्वं चेति** ।

कं०रा०— **कालाकाशयोरिति** । कालाकाशयोरनवधिकपरिमाणोत्कर्षापकर्षसद्भावः साक्षिणा सिद्धः ईश्वरे त्वागमेन स सिद्ध इत्युक्तमित्यर्थः । **सर्वत्रापीति** । 'सर्वत्रापि नो भवेदि'त्यत्र कालादेरिति संस्थानमिति चानुवर्तत इत्यर्थः । ध्रुवमित्यस्यावधारणार्थत्वमेव दर्शयति **अल्पदेशेष्विति** ।

शे०वा०— सूत्रकृत्कथितत्ववर्णनात्पूर्वभाष्येणैव भाष्यकारीयस्याकाशादावनवधिकपरिमाणोत्कर्षापकर्षव्युत्पादनस्य समर्थनात् यद्यल्पदेशेत्युत्तरभाष्यानर्थक्यमित्याशङ्क्य रीत्यन्तरेणाप्येकत्रैवाकाशादावनवधिकपरिमाणोत्कर्षापकर्षसद्भावस्य सूत्रकारसिद्धान्तत्वसमर्थनार्थत्वान्न तदानर्थक्यमित्यभिप्रेत्य तदुपपादकतयोत्तरग्रन्थं सङ्गमयितुं सूत्रकारसिद्धान्तत्वोपपादकं रीत्यन्तरं तावदाह **किञ्चेति** । तर्हि निरवकाशप्रमाणसिद्धत्वं तद्विपर्यये बाधकं चोभयमप्यभिधातव्यं तत्कथं विपर्ययेऽनिष्टत्वकथनमात्रेण तत्सिद्धिरित्यतः 'केवलं साक्षिमानेने'त्यादिनाऽनवधिकपरिमाणोत्कर्षापकर्षसद्भावस्य कालादौ साक्षिसिद्धतायाः समर्थितत्वात् तदकथयित्वैव विपर्ययेऽनिष्टमात्रकथनस्योपपन्नत्वादित्यभिप्रेत्य निरवकाशप्रमाणसिद्धत्वोपदर्शनपूर्वकमनिष्टकथनपरतयोत्तरग्रन्थं योजयति **तत्रेत्यादिना** । साकाङ्क्षत्वेन वाक्याभासत्वपरिहारायापेक्षितं पूरयति **कालादेरिति** । **संस्थानमिति चेति** । सर्वत्रापीत्यतःपरं संस्थानमित्यनुवर्तनीयमित्यर्थः । आपाद्यस्यानिष्टत्वमुपदर्शयति **कालादीनामिति** । तर्हि भवतु सर्वगतत्वाभावप्रसङ्गोऽनिष्टः, सर्वत्र संस्थानाभावस्य तु किमायातमित्यत आह **सर्वगतत्वं चेति** । किमनेन विपर्यये बाधकमुक्तं भवतीत्यतस्तर्कविरोध इति भावेन तत्स्वरूपोपदर्शकतया भाष्यं योजयति **तथा चेति** । विपर्ययेऽनिष्टकथनस्य पूर्वेणैव सिद्धेः स्थितस्य हीत्युत्तरभाष्यानर्थक्यमाशङ्क्य तर्काङ्गव्याप्तेरन्वयव्यतिरेकोपदर्शनेन समर्थनार्थत्वान्नानर्थक्यमित्यभिप्रेत्य व्याप्त्युपपादकतयोत्तरभाष्यं योजयितुं व्याप्त्यभिधानेन निवर्तनीयामप्रयोजकताशङ्कामुत्थापयति **कुत इति** । यदल्पदेशस्थितं तस्य सर्वगतत्वं ध्रुवं भवेदिति योजनायामल्पदेशस्थितत्वं

व्याप्यं सर्वदेशस्थितत्वं व्यापकमिति प्राप्नोति । न च तद्युज्यते । घटादेरल्पदेशस्थस्यापि सर्वदेशस्थत्वाभावदर्शनिन व्यभिचरितत्वात् । अतोऽत्र यत्सर्वदेशस्थं तदल्पदेशस्थमिति व्याप्यव्यापकभावो वाच्यः । न चोक्तयोजनायां विवक्षितव्याप्यव्यापकभावस्य लाभः सम्भवतीत्यतः तल्लाभायावधारणार्थस्य ध्रुवमित्यस्य ध्रुवमल्पदेशस्थस्येत्यन्वयो वाच्यः । तथा चाल्पदेशस्थस्यैव सर्वदेशस्थत्वमित्यर्थपर्यवसानाद्वह्निमानेव धूमवानित्यादाविव विवक्षितव्याप्यव्यापकभावलाभान्नाव्यापकव्यावृत्त्याऽव्याप्यव्यावृत्त्यापादनत्वादस्य तर्काभासत्वमित्याशयवानवधारणसम्बन्धं तावद्दर्शयति **अल्पदेशेषु स्थितस्यैवेति** । गगनादिकमेकदेशस्थितं सर्वदेशस्थत्वात् इत्यभिप्रेत्यानुमाने यद्येकदेशस्थं न स्यात् तर्हि सर्वदेशस्थं न स्यादित्यप्रयोजकतानिरासकतर्के च मूलभूतव्याप्तेर्विशिष्य दृष्टान्ताभावेनासम्भवात् सामान्यव्याप्तिरेवानुसन्धेयेति भावेन तद्व्याप्तावनुरूपं दृष्टान्तमाह **यथेत्यादि** । अनेन सर्ववेदोच्चारयिताऽन्वयदृष्टान्तः । तस्य समुदायव्यापिन एकदेशव्याप्तेरपि सत्त्वात् । सर्वथाऽनुच्चारयिता च व्यतिरेकदृष्टान्तः । तस्यैकदेशाव्यापिन समुदायाव्याप्तेरपि सत्त्वादित्युक्तं भवति । विवक्षितान्वयव्यतिरेकयोर्मूलारूढतां दर्शयितुं मूलयोजनामाह **यथेत्यादि** । वाक्यतात्पर्यप्रदर्शनम् **अनेनेति** ।

वा०र०— पूर्वभाष्येणैवेति । 'महतोऽल्पत्वमपि ही'ति पूर्वभाष्येणैवेत्यर्थः । कथं तेन समर्थनमित्यत उक्तं तेन भाष्येण सूत्रकृत्कथितत्ववर्णनादिति योजना । **वह्निमानेवेति** । यथा वह्निमानेव धूमवान् इत्यत्र यो धूमवान् स वह्निमान् इति व्याप्तिमाश्रित्य धूमवतोऽपि वह्निमत्वाभावे व्यभिचारः स्यात् । न चैवम् । यतो वह्निमान् एव धूमवान् धूमवति वह्निमत्वाभावो नास्तीति प्रतिपादनमुखेनावधारणं अव्यभिचरितसम्बन्धं प्रतिपादयति इति व्याप्यव्यापकभावस्य वैपरीत्येन लाभवदित्यर्थः । **विवक्षितेति** । यत्र सर्वदेशस्थत्वं तत्राल्पदेशत्वमिति व्याप्तौ तदा व्यभिचारः स्यात् । यदि सर्वदेशस्थलेऽपि केचित् अल्पदेशस्थत्वं न स्यात् । न चैवम् । यतोऽल्पदेशस्थस्यैव सर्वदेशस्थत्वं न तु अल्पदेशस्थितत्वशक्त्यस्यापि सर्वदेशस्थितत्वं तथा च सर्वदेशस्थितत्ववत्यपि अल्पदेशस्थितस्यैव इत्येतत् वैपरीत्येन विवक्षितव्याप्यव्यापकभावस्य लाभादित्यर्थः । **मूलभूतव्याप्तेरिति** । असम्भवात् इत्युत्तरेण सम्बन्धः । **अनेनेतीति** । अनेन यो यत् समुदायादिकमित्यर्थः ।

स०व्र०— उक्तमिति । पूर्वम् 'उच्यत' इत्यादिनोक्तमित्यर्थः ।

विट्ठल०— साक्षिणा आगमेन चेति । कालाकाशयोः साक्षिणा ईश्वरे त्वागमनेति ज्ञेयम् । सर्वत्रापि इत्यतःपरं संस्थानसंस्थानमिति चानुवर्तत इत्यर्थः । **सर्वगतत्वं चेति** । कालादेः परेणावृत्तिमत्वाङ्गीकारेऽपि सर्वदेशसंस्थानविभुत्वरूपं सर्वगतत्वं न घटत इत्याशयेनैवमुक्तमिति ज्ञेयम् । अल्पदेशावस्थानभावे सर्वदेशसंस्थानाभावः कुतोऽङ्गीकार्य इत्याशङ्क्य परिहाराय प्रवृत्तेन 'स्थितस्य ही'ति मूलेन किं नियामकमुक्तमित्यत आह **अनेनेति** । अंशभेदापेक्षया समुदायमित्युक्तिः । **अन्वयव्यतिरेकाविति** । तथा चान्वयव्यतिरेकाभ्यां सर्वगतत्वं प्रत्यल्पदेशगतत्वनियामकमित्यवगम्यत इति भावः ।

॥ इति कालादेरल्पाल्पतरदेशसंस्थानाभावे सर्वगतत्वाभावरूपानिष्टापत्तिः ॥

॥ अथ तत्र ततः कालादेरल्पाल्पतरदेशसंस्थानाभावे सत्ताया अप्यभावाच्छून्यत्वापत्तिः ॥

६३ सु०— न केवलमल्पाल्पतरदेशस्थत्वाभावे सर्वगत्वाभावप्रसङ्गः किन्तु शशविषाणादिवत्सत्ताऽपि न स्यादित्याह **शून्यत्वमेवेति** ।

अनु०— शून्यत्वमेव तस्य स्याद्यस्यैकत्रापि न स्थितिः ।

एंवञ्च कालादीनामल्पाल्पतरदेशावस्थानेऽल्पाल्पतरपरिमाणवत्त्वमप्यवर्जनीयमित्यनवधिकपरिमाणापकर्षसिद्धिः । अनवधिकोत्कर्षस्तु परेणाप्यङ्गीकृत एवेति न तद्विपर्यये बाधकमुक्तम् । 'सर्वत्रापि नो भवेदि'त्येव वा द्रष्टव्यम् । न हि परममहत्त्वाभावे सर्वगतत्वं सम्भवति, तथा चाह 'विभुत्वान्महानाकाश' इत्यादि । अल्पाल्पतरदेशपर्यवसितस्याल्पाल्पतरपरिमाणत्वम्, न चैवमाकाशादीति चेत् । तत्किमाकाशादि समुदितरूपं येन पर्यवसानापर्यवसानविषयत्वमश्नुवीत, किन्त्वेकमेव; तच्च यद्यल्पाल्पतरदेशेषु तिष्ठेत् तदा तत्तत्परिमाणं भवत्येव (भवेदेव) । यदि तव तत्र स्थितस्य तत्तत्परिमाणत्वं तदा घटादावपि तत्प्रसङ्ग इति चेन्न, तस्य सांशत्वेनान्यथासिद्धत्वात् ।

परि०— किं तावता प्रकृत इत्यत आह **एवं च कालादीनामिति** । **इत्येव वा द्रष्टव्यमिति** । महत्त्वविपर्ययेऽपि बाधकोक्तिपरतया द्रष्टव्यमित्यर्थः । तथा च तत्र बाधकानुक्तिरसिद्धेति भावः । नन्वेवमापाद्यमात्रलाभेऽपि आपादकस्यालाभ इत्यतः तदपि योज्यमिति भावेन तदर्थमाह **न हि परममहत्त्वाभाव इति** । **तथा चाहेति** । तार्किक इत्यर्थः । शङ्कते **अल्पाल्पतरेति** । पर्यवसितस्य परमाण्वादेरिवाल्पदेशे कृत्स्नस्वरूपेण वर्तमानस्येत्यर्थः **समुदितरूपमिति** । माषराश्यादिवद्भिन्नांशोपेतसमुदायरूपं नेत्यर्थः । **अश्नुवीतेति** । प्राप्नुयादित्यर्थः । **एकमेवेति** । अत्यन्ताभेदोपेतानन्तांशयुक्तमेकव्यक्तिरूपमेवेत्यर्थः । **सांशत्वेनेति** । भिन्नाभिन्नांशवत्त्वेनेत्यर्थः ।

यादु०— नन्वेवं कालाद्यधिकरणदेशस्यैवाल्पाल्पतरपरिमाणवत्वं प्राप्तं न कालादेरत आह **एवं च कालादीनामिति** । **न हि परममहत्त्वाभाव इति** । निरवधिकपरिमाणोत्कर्षाभाव इत्यर्थः । इदमापादकमत्र मूले पूरणीयमिति भावः । **विभुत्वात्** सर्वगतत्वात् । **महान्** निरवधिकोत्कृष्टपरिमाणवानिति तत्फक्किकार्थः । **पर्यवसितस्येति** । पर्याप्त्या वर्तमानस्येत्यर्थः । **समुदितरूपमिति** । सेनावनादिवद्भिन्नानेकवस्तुसमुदायरूपमित्यर्थः । **एकमेवेति** । अखण्डमेवेत्यर्थः । अभिन्नांशोपेतमिति यावत् । **तत्तत्परिमाणं भवेदेवेति** ।

तत्रांशिनोऽत्यन्ताभेदादिति भावः । आशयमविद्वान् शङ्कते **यदि तत्र तत्रेति** । आशयमुद्घाटयति **तस्य सांशत्वेनेति** । विभिन्नांशवत्त्वेनेत्यर्थः । तथा च तत्र तत्र देशेऽवस्थितघटाद्यंशानां तत्तत्परिमाणत्वेऽपि न घटादेराकाशादेरिव तत्तत्परिमाणत्वप्रसङ्गः । तस्य तेभ्यो भिन्नत्वेनाकाशादाविव अत्यन्ताभेदाभावादित्याशयः ।

वं०प०— यद्वा बाधकमुक्तमेवेत्याह **सर्वत्रापीति । इत्येव** इत्यनेनैव । बाधकमुक्तमिति शेषः । तद्विशदयति **न हीति । तत्प्रसङ्ग इति** । घटादेरपि तत्र तत्र स्थितस्याकाशादेरिव तत्तत्परिमाणत्वप्राप्त्या-ऽनेकपरिमाणवत्वप्रसङ्ग इत्यर्थः ।

कं०रा०— ननु कालादेरनवधिकपरिमाणोत्कर्षाभावे तस्य सर्वत्रापि संस्थानं नो भवेदित्येवं तदेव वा बाधकं द्रष्टव्यमित्यर्थः । ननु कालादेरनवधिकपरिमाणोत्कर्षाभावे सर्वत्र संस्थानं कुतो न सम्भवतीत्यत आह **न हीति** । परममहत्तत्त्वाभावे सर्वगतत्वं न सम्भवतीत्यत्र सम्मतिमाह **तथा चाहेति** । विभवात्सर्वगतत्वा-त्परममहत्त्वे वा नाकाश इत्यादि वदन् वैशेषिकः परममहत्त्वाभावे सर्वगतत्वासम्भवमाहेत्यर्थः । **तस्येति** । घटादेर्भिन्नांशवत्त्वेनांशैस्तत्तद्देशे स्थितत्वात् तस्य चांशानां तत्तत्परिमाणत्वमात्रेणोपपत्तेर्न घटादौ तत्प्रसङ्ग इति भावः ।

श्रीनिधि०— सर्वत्रापि नो भवेदित्येव वा द्रष्टव्यम् । बाधकमिति वर्तते । तदेवोपपादयति **न हीति । विभुत्वात्** परममहत्त्वात् । **महान्** सर्वगतः । **न चैवमाकाशादीति** । तथात्वे वा अनवधिको-त्कृष्टपरिमाणं न स्यादिति द्रष्टव्यम् । **पर्यवसानापर्यवसानविषयत्वमश्नुवीत इति** । पर्यवसानापर्यवसानयो-रङ्गीकृतयोः पर्यवसाने विभुत्वं न स्यात् । अपर्यवसाने तत्तपरिमाणं न स्यात् इत्यापादनविषयत्वमश्नुवीते-त्यर्थः । तत्तत्पर्यवसान एव तत्तपरिमाणमित्येवं समुदितविषयिणी व्याप्तिः । न त्वेकद्रव्यविषयिणी । अत्र तु तत्तद्देशेऽवस्थानमेव वस्तूनां वैचित्र्यात् । अन्यथा अर्थक्रियाकारिणां पटानामातानवितानात्मकत्वदर्शनात् घटे तदभावेन तन्न स्यात् । तत्र च आतानवितानात्मकत्वेनार्थक्रियाकारित्वस्य व्याप्तिः पट एव । घटादौ तु तद्व्यापकं पृथुबुध्नोदराकारत्वादिकं वस्तुवैचित्र्यादि इति वक्तव्यम् । तुल्यमेतत् प्रकृतेऽपीति भावः । अर्थक्रियावैचित्र्यात् तथेति चेत् तुल्यमत्रापि । अन्यथा समुदितासमुदितपरिमाणयोस्तादात्म्यापत्तेः । **सांशत्वेनेति** । विभिन्नांशत्वेनेत्यर्थः । यावदंशैः अत्यन्ताभेदेऽपि तत्तदंशैः भेदाभेदाङ्गीकारात् । तत्तदंशस्यैव तत्र तत्र स्थितत्वाद् यावदंशानां चाल्पाल्पतरदेशसम्बन्धाभावादिति भावः । आकाशादौ तु एकैकांशेनापि अत्यन्ताभेदात् तत्परिमाणत्वं युज्यत इति द्रष्टव्यम् ।

शे०वा०— विपर्यये बाधकोक्त्याऽनवधिकपरिमाणोत्कर्षापकर्षसद्भावस्याकाशादौ सूत्रकारसिद्धान्तत्व-समर्थनाच्छून्यत्वमेवेत्युत्तरवाक्यानर्थक्यमित्याशङ्क्य विपर्यये बाधकान्तरोपदर्शनार्थत्वेन तस्यापि सूत्रकार-सिद्धान्तत्वोपपादकत्वान्न तदिति भावेन बाधकान्तरोपदर्शकपरतयोत्तरग्रन्थं योजयति **न केवलमिति** । **सत्ताऽपीति** । न चाल्पदेशस्थत्वाभावेऽपि सर्वदेशस्थत्वान्न शून्यत्वप्रसङ्ग इति वाच्यम् । एकदेशस्थत्वाभावेन

सर्वदेशस्थत्वाभावस्यापि प्राप्तत्वेन सर्वदेशस्थत्वेन तन्निरासायोगादित्याशयात् । ननु च कालादेरल्पाल्पतर-देशस्थतया तदधिकरणदेशस्याल्पाल्पतरपरिमाणप्राप्तावपि कालादेस्तदप्राप्तेः कथं कालादावनवधिकपरिमाणाप-कर्षसिद्धिरित्यत आह **एवं चेति** । अल्पाल्पतरपरिमाणाभावेऽल्पाल्पतरदेशस्थत्वायोगात् तेन तत्सिद्धिरिति भावः । ननु तथाऽपि नानेन भाष्येणानवधिकपरिमाणोत्कर्षापकर्षसद्भावस्याकाशादौ सूत्रकारसिद्धान्तत्वं सिद्ध्यति । अपकर्षानन्त्याभावे बाधकोक्त्याऽनेनापकर्षानन्त्यप्राप्तावप्युत्कर्षानन्त्याभावे भाष्ये बाधकानुक्त्या तदानन्त्यस्य विपर्यये बाधकबलेनाप्राप्तत्वादित्यतस्तदनुक्तौ निमित्तकथनेनोक्तशङ्कां परिहरति **अनवधिकेति** । **परेणाप्यङ्गीकृत एवेति** । परिमाणोत्कर्षानन्त्यस्य गगनादावेवानवधिकपरिमाणापकर्षस्य परमाणावेवोपपादनेन वाऽस्य सूत्रस्य समर्थयितुं शक्यत्वादिति शङ्काकर्त्रा गगनादावनधिकपरिमाणोत्कर्षस्याङ्गीकारान्न तत्र बाधक-मुक्तमिति भावः । अस्मिन्पक्षे उत्कर्षानन्त्यव्यतिरेके बाधकानुक्तिर्भाष्ये भवतीत्यपरितोषात् पक्षान्तरमाह **सर्वत्रापीति** । **द्रष्टव्यमिति** । विपर्यये बाधकमित्यनुवर्तते । तदेवोपपादयति **न हीति** । निरवधिक-परिमाणोत्कर्षाभाव इत्यर्थः । तथा चैतद्योजनायामेतदापादकं पूरणीयमित्युक्तं भवति । कुतः परममहत्त्वाभावे सर्वगतत्वासम्भव इत्यतः तथा सति सूत्रकारीयस्य सर्वगतत्वेन परममहत्त्वसाधनस्यानुपपत्तिप्रसङ्गादिति भावेन सर्वगतत्वेन परममहत्त्वसाधनपरं कणादसूत्रं पठति **तथा चाहेति** । यद्यपि 'विभुत्वान्महानाकाशस्तथाऽऽत्मे'ति कणादसूत्रं, तथाप्येकदेशस्यैव प्रकृतोपयोगात् तन्मात्रमेव मुखत उदाहृतम् । अन्यत्तु आदिशब्देन सङ्गृहीतमिति मन्तव्यम् । यथाऽऽकाशं विभुत्वात् सकलमूर्तसंयोगित्वात् परममहत्परिमाणवत् तथाऽऽत्माऽपि परम-महानित्यात्ममहत्त्वस्य विभुत्वेन साधने आकाशस्य दृष्टान्तीकरणान्न परममहत्त्वं विनाऽऽकाशस्य सर्वगतत्वमिति विवक्षितसिद्धिरिति ध्येयम् । **पर्यवसितस्येति** । पर्याप्त्या वर्तमानस्येत्यर्थः । घटादौ तथा दर्शनादिति भावः । **न चैवमिति** । आकाशस्याल्पतरदेशपर्यवसितत्वेऽन्यत्र तदभावापातादिति भावः । **समुदितरूपमिति** । सेनावनादिवत् विभिन्नानेकवस्तुसमुदायरूपमित्यर्थः । **एकमेवेति** । अखण्डमेवेत्यर्थः । अभिन्नांशोपेतमिति यावत् । **तत्तत्परिमाणं भवेदेवेति** । तत्रांशांशिनोरत्यन्ताभेदादिति भावः । आशयमविद्वान् शङ्कते **यदि तत्र तत्रेति** । आशयमुद्घाटयति **तस्य सांशत्वेनेति** । विभिन्नांशवत्त्वेनेत्यर्थः । तथा च तत्र देशेऽवस्थितघटाद्यंशानां तत्तत्परिमाणत्वेऽपि न घटादेराकाशादेरिव तत्तत्परिमाणत्वप्रसङ्गः । तस्य तेभ्यो भिन्नत्वेनाकाशादाविवात्यन्ता-भेदाभावादित्याशयः ।

वा०र०— सिद्धान्तत्वसमर्थनादिति । पूर्वग्रन्थेनैवेति शेषः । **उत्कर्षापकर्षसद्भावस्येति** । उत्कर्षापकर्षोभयसद्भावस्येत्यर्थः । **सूत्रकारीयस्येति** । कणादसूत्रकारीयस्येत्यर्थः । **कणादसूत्रमिति** । सप्तमाध्यायाह्निकस्थमिति शेषः ।

स०व्र०— सत्ताऽपीति । अल्पदेशस्थत्वाभावे सर्वगतत्वस्याप्यसम्भवेन शून्यत्वमेव स्यादित्यर्थः । तेनाल्पदेशस्थत्वाभावेऽपि सर्वगतत्वान्न शून्यत्वापत्तिरिति शङ्कानवकाश इति भावः । **परेणाऽप्यङ्गीकृत एवेति** । परिमाणोत्कर्ष(र्षानन्त्यस्य)तारतम्यस्य गगनादावेव, अपकर्ष(अनवधिकपरिमाणापकर्षस्य)तारतम्यस्य

परमाणावेवोपपादनेन वाऽस्य सूत्रस्य समर्थयितुं शक्यत्वादिति शङ्काकर्त्रा गगनादौ अनवधिकोत्कर्षस्याङ्गीकारान्न तत्र बाधकमुक्तमिति भावः । **समुदितरूपमिति** । भिन्नावयवसमुदायरूपं नेत्यर्थः ।

विट्ठल०— अस्तु कालादीनामल्पाल्पतरदेशसंस्थानं तथापि निरवधिकपरिमाणापकर्षसिद्धिः कथमित्यत आह **एवं चेति** । **सर्वत्रापि नो भवेदित्येवेति** । अनवधिकोक्तिविपर्यये बाधकोक्तिपरत्वेन इत्येतावदेव पृथग्वाक्यतया द्रष्टव्यमित्यर्थः । किमनेन बाधकमुक्तमित्यत आपादकाध्याहारेण तदर्थमाह **न हीति** । निरवधिकोत्कर्षाभाव इत्यर्थः । भावात् **विभुत्वात्** । **महान्** निरवधिकापरिमाणोत्कर्षवान् । यदत्रोक्तमाकाशादेः सर्वगमत्वान्यथानुपपत्त्या अल्पाल्पतरदेशगतत्वसिद्धेरल्पाल्पतरपरिमाणवत्त्वमप्यङ्गीकार्यम् । अल्पाल्पतरपरिमाणाभावे तावद्देशगतत्वस्यायोगादिति । तदेतदाक्षिपति **अल्पाल्पतरेति** । यद्यन्मात्रदेशे अन्येन पर्याप्तः तस्य तावत्परिमाणत्वं भवति । नैवमाकाशादिकमल्पाल्पतरदेशपर्यवसितम् । तस्य विभुत्वेन तदसम्भवात् । अतो नाकाशस्यांशैरल्पाल्पतरदेशावस्थानेऽपि नाल्पाल्पतरपरिमाणवत्त्वे मात्रं युज्यत इत्यर्थः । अत्र 'स्थितस्य ह्यल्पदेशेष्वि'त्यादिना साधितत्वादाकाशस्य अल्पाल्पतरदेशेष्ववस्थानं तावदङ्गीकार्यम् । तेषु देशेष्ववस्थितस्य तत्रापर्यवसितत्वं माषराश्यादिरूपसमुदायस्याल्पापदेशेष्ववस्थितस्यापि स्थूलदेशे अवस्थितत्वे पर्यवसितत्वात् पर्यवसितत्ववदाकाशस्यापि समुदितत्वेनाल्पाल्पदेशेष्ववस्थितस्य तस्य स्थूलदेशेऽप्यवस्थानादल्पाल्पतरदेशपर्यवसितत्वं पर्यवसितत्वमिति तावन्नोपपद्यत इत्याह **तत्किमिति** । किमित्याक्षेपेनैवेत्यर्थः । अपसिद्धान्तापत्तेरेवेति भावः । येन भिन्नानेकवस्तुसमुदायरूपत्वेन भिन्नभिन्नवस्तुनाल्पदेशादिपर्यवसानं समुदायस्य स्थूलदेशे एवावस्थानादल्पदेशापर्यवसानमिति पर्यवसानापर्यवसानविषयत्वमश्नुवीत प्राप्नुयादित्यर्थः । समुदितरूपत्वाभावे किं रूपत्वमाकाशस्येति पृच्छति **किं त्विति** । उत्तरमाह **एकमेव** अखण्डमेवेति । ततः किमित्यत आह **तच्चेति** । तच्चाखण्डमप्याकाशादिकं प्रागुपपादितरीत्या अल्पाल्पतरदेशेष्ववस्थितमित्यङ्गीकार्यम् । यदि चाल्पाल्पतरदेशेषु तिष्ठेत् तदा तत्तत्परिमाणं भवेदेव । तत्र तत्र स्थितस्य तत्तत्परिमाणत्वनियमादिति भावः । एकमेवेत्यस्याशयमविद्वान् शङ्कते **यदीति** । यदि तत्तद्देशपर्यवसानाभावेन तत्र तत्र स्थितस्य तत्तत्परिमाणमङ्गीक्रियते । तर्हि स्थूलस्यापि पटादेर्हस्तवितस्त्यादि देशस्थितत्वात् तत्तत्परिमाणवत्वं प्रसज्येत । न चेष्टापत्तिः । पटादावेकस्यैव परिमाणस्य दर्शनात् । तथा च तत्र तत्र स्थितत्वस्य तत्तत्परिमाणवत्त्वव्यभिचारेण व्याप्तिभावान्न तेन तत्तत्परिमाणवत्वं साधयितुं शक्यत इति भावः । स्वाशयमाविष्कुर्वन्परिहरति **न तस्येति** । तस्य पटादेर्भिन्नांशत्वेनान्यथात्वात् । आकाशविलक्षणत्वादित्यर्थः । पटाद्यंशानां पटादेर्भिन्नत्वेन पटभिन्नानामंशानामेव तत्र तत्र स्थित्या तत्तत्परिमाणत्वम्, न तु पटादेः । अतो न तत्र व्यभिचारः । न चैवमाकाशादावप्यङ्गीकर्तुमुचितम्, तस्याखण्डत्वेन भिन्नांशभावादिति भावः ।

॥ इति कालादेरल्पाल्पतरदेशसंस्थानाभावे सत्ताया अप्यभावाच्छून्यत्वापत्तिः ॥

* * *

॥ अथ तत्रान्ते उक्तसर्वगतत्वाभावरूपानिष्टापत्तेः इष्टापत्तिताशङ्का तन्निरसनञ्च ॥

६४ सु०— ननु च सर्वमूर्त(द्रव्य)संयोगित्वमेव सर्वगतत्वं, न सर्वत्र संस्थानम्; आकाशादेरनाश्रितत्वात् । संयोगश्च तत्तत्परिमाणाभावे(ऽपि) भवेदेव, न हि घटो गगनेन संयुज्यमानो भवति परममहान्नापि परमाणुना संयुज्यमानः परमाणुः । तत्कस्य हेतोः । संयोगस्य प्रदेशावृत्तित्वादिति । मैवम् । सर्वपरिमाणानामप्याकाशे सत्त्वात् परमाणुना च घटांशस्यैव संयोगात् । तथा हि । विशेषशक्त्या, निर्भेदमप्याकाशमनन्तांशोपेतम् । तत्र अनवधिकौ परिमाणोत्कर्षापकर्षौ व्यवस्थया वर्तेते । ततश्च घटो वितस्ति-परिमाणेनैवाकाशेन संयुज्यते, स्वयं च तत्परिमाण इति को दोषः । घटांश एव परमाणुसंयोगो वर्तते न घट, इति कथं घटस्य परमाणुता । तर्ह्याकाशप्रदेशा एवाल्पाल्पतरप्रदेशसंयोगिन इति त एव तत्तत्परिमाणाः स्युर्नाकाशमिति चेन्न; तेषामप्याकाशात्मकत्वात्; अन्यथा संयोगस्य प्रदेशावृत्तित्वं न स्याद्व्याघातादिति ।

परि०— सर्वत्राप्यवस्थानं गगनादेर्न स्यादित्यस्येष्टापादनरूपत्वात्तर्काभासोऽयमिति शङ्कते **ननु चेति** । सर्वमूर्तसंयोगोऽपि तत्तन्मूर्तपरिमाणे सत्येव स्यादित्यत आह **संयोगश्चेति** । यदि सर्वगतत्वं नाम सर्वमूर्तसंयोगित्वं, न तु सर्वत्र संस्थानमिति मन्यसे, भवतु तावदेव तुष्यतु भवान् दुर्जनः, तावतापि महत्त्ववत्यपि गगनेऽनवधिकपरिमाणापकर्षोऽपि सिद्ध्यत्येव । मूर्तं नामेयत्तावच्छिन्नपरिमाणोपेतद्रव्यम् । एवं च तत्तन्मूर्तपरिमाणतुल्यपरिमाणवत्त्वे सत्येव तत्तन्मूर्तसंयोगित्वं नान्यथेति भावेन निराह **मैवमिति** । यदत्रोक्तं तत्तद्रूपपरिमाणाभावेऽपि संयोगो भवत्येव न हि घटो गगनेनेत्यादि । तत्र घटो न महत्परिमाणेन गगनेन संयुज्यते किं तु घटपरिमाणतुल्यपरिमाणेनैव गगनेनातो न व्यभिचार इति भावेनाह **सर्वपरिमाणानामपीति** । सर्वमूर्तपरिमाणतुल्यपरिमाणानामित्यर्थः । यदपि नापि परमाणुनेति व्यभिचारान्तरचोदनं तदपि नेत्याह **परमाणुना चेति** । **घटांशस्यैवेति** । तस्य च परमाणुपरिमाणतुल्यपरिमाणत्वमेवेति नापि व्यभिचार इति भावः । नन्वेवं घटस्याप्यनवधिकापकर्षसिद्धिर्गगनवदिति चोद्यं तु घटांशानां भिन्नत्वात्तस्य सांशत्वेनेति पूर्वग्रन्थ एव निरस्तमिति भावः । सर्वपरिमाणानामित्यादिनोक्तं प्रमेयद्वयं व्यनक्ति **तथा हीत्यादिना परमाणुतेत्यन्तेन** । **व्यवस्थयेति** । सूक्ष्मसूक्ष्मतरसूक्ष्मतमांशेषु तत्तदनुरूपापकृष्टपरिमाणानि स्थूलस्थूलतरस्थूलतमांशेषु तत्तदनुगुणोत्कृष्टपरिमाणानीत्येवं व्यवस्थयेत्यर्थः । घटांश एवेति सप्तमी । स चांशो

घटाद्भिन्न इति भावः । **अन्यथेति** । अंशानामाकाशात्मकत्वाभाव इत्यर्थः । अभेदे ह्याकाश-संयोगस्तदंशे वर्तत इति प्रदेशवृत्तित्वं लभ्यते । भेदे त्वंशे वर्तमानः संयोगो नाकाशसंयोगः किन्त्वंशसंयोग एव आकाशधर्मिकः संयोगः आकाशात्मके तत्प्रदेशे वर्तत इत्युक्तौ तु न व्याघातः आकाशधर्मिकः संयोगः आकाशभिन्नांशधर्मिकः इत्यस्यैव व्याघातादित्यर्थः । अंशसंयोगस्याकाश-संयोगानात्मकत्वात् तदनात्मके तद्व्यवहारस्य व्याहतेरिति भावः ।

यादु०— ननु तर्हि यो येन संयुज्यते स तत्परिमाण इति व्याप्तिबलेनैव सर्वसंयोगिन्याकाशादौ तत्तत्परिमाणप्राप्तिरित्यत आह **संयोगश्चेति** । **संयोगस्येति** । अन्यथा व्याप्यवृत्तित्वमेव स्यादिति भावः । न हि घटो गगनेनेत्युक्तं व्यभिचारं परिहरति **सर्वपरिमाणानामिति** । सर्वपरिमाणसदृशपरिमाणानामित्यर्थः । नापि परमाणुनेत्युक्तं दोषं परिहरति **परमाणुना चेति** । ननु परिमाणभेदस्य द्रव्यभेदप्रयोजकत्वादाकाशे सर्वपरिमाणाङ्गीकार आकाशभेदप्रसङ्गोऽन्यथा स्वयमेव स्वापेक्षयोत्कृष्टमपकृष्टं चापद्येत । तथा च विरोध इत्याशङ्कां परिहरन्नुक्तमुपपादयति **तथा हीत्यादिना** । अत्राकाशपदं भगवदाद्युपलक्षकम् । अत एव पूर्व-माकाशादेरित्युक्तमित्यवधेयम् । नन्वशेषेष्वनन्तत्वं कथं भेदाभावे भवेदित्यत उक्तं **विशेषशक्त्येति** । तथा च तत्तद्वस्तुसंयुक्ताकाशांशगतान्येव तत्तत्परिमाणानीति भावः । अत एव न विरोधशङ्काऽपीत्याह **तत्रेति** । अंशेष्वित्यर्थः । आकाशे उत्कृष्टापकृष्टांशानामनन्तत्वात् तेषु केषुचिदुत्कृष्टेषूत्कृष्टपरिमाणमनवधिकं केषुचि-दपकृष्टेष्वपकृष्टपरिमाणमनवधिकमस्तीति व्यवस्थाङ्गीकारान्न विरोध इति भावः । इदानीं सर्वपरिमाणानाम-प्याकाशे सत्त्वादित्यनेनोक्तं प्रथमदोषपरिहारमुपपादयति **ततश्च घट इति** । परमाणुना च घटांशस्यैव संयोगादित्यनेनैवोक्तं द्वितीयदोषपरिहारमुपपादयति **घटांश एवेति** । अल्पाल्पतरप्रदेशसंयोगेन इत्युपलक्षणम् । स्थूलस्थूलतरदेशसंयोगिन इत्यपि ग्राह्यम् । **नाकाशमितीति** । तथा च सर्वपरिमाणानामप्याकाशे सत्त्वा-दित्युक्तमयुक्तमित्याशयः । **तेषामपीति** । विशेषशक्त्येत्युक्तत्वान्न पुनर्विरोधादिशङ्केति भावः ॥ **अन्यथेति** । अंशांशिनोरभेदाभाव इत्यर्थः । **प्रदेशवृत्तित्वमिति** । अव्याप्यवृत्तित्वमित्यर्थः । अंशांशिनोरभेदे हि अंशि-संयोगस्यांशे वृत्त्याऽव्याप्यवृत्तित्वं लभ्यते । तयोर्भेदे तु अंशे प्रतीयमानः संयोगः अंशस्यैव गुणः स्यान्न अंशिनः । ततश्च व्याप्यवृत्तिरेव स्यान्नाव्याप्यवृत्तिरिति भावः । नन्वंशिसंयोगोंऽशस्याव्याप्यवृत्तित्वं न तदंशे विद्यमानत्वरूपम् । किन्तु स्वसमानाधिकरणात्यन्ताभावप्रतियोगित्वरूपमतः कथमिदमापादनमित्यत आह **व्याघातादिति** । संयोगतदत्यन्ताभावयोः सामानाधिकरण्यमेव न सम्भवतीति विरोधादित्यर्थः । अन्यथे-त्यस्याकाशेंऽशानामेवाभाव इत्यर्थः । व्याघातादित्यस्य चाकाशो निरंशस्तत्संयोगश्च प्रदेशवृत्तिरित्यङ्गीकारे व्याघातादित्यर्थ इत्यप्याहुः ।

वं०प०— **सर्वपरिमाणानामिति** । घटपरिमाणसदृशपरिमाणस्यापि गगने सत्त्वेन तत्परिमाण-सदृशपरिमाणवत्त्वं घटे प्राप्तमेवेति भावः । **तेषामपि** आकाशप्रदेशानामपि ।

कं०रा०— नापीति । नापि परमाणुना संयुज्यमानो घटः परमाणुरित्यर्थः । **तत्कस्य हेतोरिति** । परमाणुना संयुज्यमानस्य घटस्यापरमाणुत्वं कस्मात्सम्पन्नमित्यर्थः । उत्तरमाह **संयोगस्येति** । संयोगस्याव्याप्यवृत्तित्वादित्यर्थः । **अन्यथेति** । आकाशांशानामाकाशात्मकत्वाभावे अंशावृत्तिघटादिसंयोगस्याकाशवृत्तित्वं न स्यादन्यसंयोगेऽन्यवृत्तित्वस्य व्याहतत्वादित्यर्थः । यदाप्यत्र परस्येष्टापत्तिः संयोगस्य स्वात्यन्ताभावसमानाधिकरणत्वाङ्गीकारेण वा वृत्तित्वभावस्येष्टत्वात् तथापि स्वात्यन्तभावसमानाधिकरणस्य विरुद्धत्वेन संयोगस्यांशवृत्तित्वमेवाव्याप्यवृत्तित्वं परेणाङ्गीकार्यमित्यभिप्रेत्यैवमापादनं कृतमिति ध्येयम् ।

श्रीनिधि०— परमाणुना संयुज्यमानः परमाणुरिति । परमाणुना संयुज्यमानो घटः परमाणुर्न भवतीत्यर्थः । तत्तत्परिमाणाभावेऽपि संयोगो भवतीति यदुक्तं तत् असाध्वित्याह **मैवमिति** । **अन्यथेति** । अंशानां भेदेऽङ्गीक्रियमाणे प्रदेशवृत्तित्वं न स्यात् किन्तु समग्रद्रव्यवृत्तित्वमेव स्यात् । प्रदेशस्य भिन्नत्वेन तन्निष्ठसंयोगस्य प्रदेशिनिष्ठत्वाभावात् भेदेऽपि तन्निष्ठसंयोगेन प्रदेशिनः प्रदेशित्वं किन्न स्यादित्यत आह **व्याघातादिति** । आकाशभिन्नयोर्निष्ठः सहयोग आकाशसंयोग इति विप्रतिषिद्धमिति भावः ।

शे०वा०— यदि कालादेरल्पाल्पतरदेशेषु संस्थानं न स्यात् तदा सर्वत्रावस्थानमपि न स्यादिति विपक्षबाधकतर्कस्येष्टापादनरूपत्वेनाभासत्वादकिञ्चित्करत्वमित्याशङ्कते **ननु चेति** । ननु विपरीतस्यापि वक्तुं शक्यत्वात् कुतोऽवधारणमित्यतो युक्तिमाह **आकाशादेरिति** । 'आश्रितत्वं चान्यत्र नित्यद्रव्येभ्यः' इति प्रशस्त(देवा)पादाचार्योक्तेरिति भावः । *ननु तर्हि यो येन संयुज्यते स तत्परिमाणः, यथा परमाणुना संयुज्यमानः परमाणुः परमाणुपरिमाण इति व्याप्तिबलेन सर्वसंयोगिन्याकाशादौ तत्तत्परिमाणप्राप्त्याऽपकर्षानन्त्यप्राप्तेरस्मदिष्टसिद्धिरित्यत आह* **संयोगश्चेति** । **नापीति** । घट इति वर्तते । **संयोगस्येति** । परमाणुना संयुज्यमानस्य घटस्य परमाणुत्वे परमाणुसंयोगस्य परमाणौ सर्वत्र सत्त्वेनैकदेशवृत्तित्वरूपप्रदेशवृत्तित्वाभावप्रसङ्गान्न तस्य परमाणुपरिमाणत्वमिति भावः ।

अस्तु अत्र सर्वमूर्तसंयोगित्वमेव सर्वगतत्वं, तथाऽपि तत्तत्परिमाणाभावे तत्तत्संयोगानुपपत्त्या तत्संयोगेनैव गगनादौ तत्तत्परिमाणसिद्धिरवर्जनीयैव । न चैवं घटस्य गगनेन संयुज्यमानस्य परममहत्त्वप्रसक्तिरिति वाच्यम् । स्वपरिमाणसमानपरिमाणेनैव गगनेन घटस्य संयोगाङ्गीकारेण तदनापत्तेः । न च गगने परममहत्त्वमेकमेव परिमाणं न त्वन्यदिति कथं स्वपरिमाणसमानपरिमाणेनैव गगनेन संयोगो घटस्य स्यादिति वाच्यम् । सर्वपरिमाणानामपि तत्र सत्त्वेनाविरोधादित्याशयेन प्रथमदोषपरिहारं प्रतिजानीते **सर्वेति** । सर्वपरिमाणसदृशपरिमाणानामित्यर्थः । द्वितीयदोषपरिहारं प्रतिजानीते **परमाणुना चेति** । ननु परिमाणभेदस्य द्रव्यभेदप्रयोजकत्वादाकाशे सर्वपरिमाणाङ्गीकारे आकाशाभेदप्रसङ्गः, अन्यथा स्वयमेव स्वापेक्षयोत्कृष्टमपकृष्टं चेति प्रसक्त्या विरोधप्रसङ्गः इत्याशङ्कां परिहरन्नुक्तमुपपादयति **तया हीत्यादिना** । तत्रोक्ताक्षेपपरिहारायोपोद्घातेनाकाशस्यानन्तांशवत्तामुपदर्शयति **विशेषशक्त्येति** । **आकाशमिति** । आकाशपदमीश्वरादेरुपलक्षकम् ।

अत एव पूर्वमाकाशादेरित्युक्तमित्यवधेयम् । अनन्तत्वस्य भेदाविनाभूतत्वादंशानामनन्तत्वे भेदप्रसङ्ग इत्यत उक्तं **निर्भेदमिति** । तर्हि व्यापकनिवृत्तौ व्याप्यनिवृत्तेरवश्यम्भावात् भेदाभावेऽनन्तत्वस्याभावप्रसङ्गः इत्यतो भवेदेतदेवं यद्यनन्तत्वस्य भेदमात्रेणाविनाभावनियमो भवेत् । न चैवम् । किन्नाम भेदविशेषयोरन्यतराविनाभावनियम एव । ततश्च प्रकृते भेदाभावेऽपि तत्प्रतिनिधिविशेषस्य सत्त्वेनोक्तस्य व्यापकस्य निवृत्त्यभावान्नानन्तत्वनिवृत्तिरिति भावेनोक्तं **विशेषशक्त्येति** । तथा च तत्तद्वस्तुसंयुक्ताकाशांशगतान्येव तत्तत्परिमाणानि । अत एव न विरोधशङ्काऽपीति भावः । यदर्थमुपोद्घातेनानन्तांशत्वमुपवर्णितं तदिदानीमाह **तत्रेति** । आकाशांशेष्वित्यर्थः । आकाशे उत्कृष्टापकृष्टांशानां अनन्तत्वात् तत्र उत्कृष्टेषु परिमाणोत्कर्षानवधिकत्वं अपकृष्टेषु च परिमाणापकर्षानवधिकत्वमिति परिमाणोत्कर्षापकर्षानन्त्ययोर्व्यवस्थितत्वेनोत्कृष्टानामपकृष्टत्वस्यापकृष्टानामुत्कृष्टत्वस्य च असत्त्वान्न विरोध इति भावः । प्रतिज्ञातं प्रथमदोषपरिहारमुपपादयति **ततश्चेति** । परमाणुना च घटांशस्यैव संयोगादित्युक्तं द्वितीयदोषपरिहारमुपपादयति **घटांश एवेति** । परमाणुमात्रसंयुक्तस्य घटांशस्य परमाणुत्वं चेष्टमेवेति भावः । अल्पाल्पतरदेशसंयोगिन इत्युपलक्षणम् । उत्कृष्टोत्कृष्टतरदेशसंयोगिन इत्यपि द्रष्टव्यम् । **नाकाशमिति** । तथा च सर्वपरिमाणानामप्याकाशे सत्त्वादित्युक्तमसदिति भावः । भवेदयं प्रसङ्गो यद्याकाशात्तत्तत्परिमाणास्तदवयवा भिन्नाः स्युर्न चैवमित्याह **तेषामपीति** । भेदाभावेऽपि विशेषबलाद्विरुद्धनानापरिमाणावयवाभिन्नत्वमुपपन्नमिति भावः । अंशानामाकाशात्मकत्वानभ्युपगमे बाधकमाह **अन्यथेति** । अयं भावः । इह पक्षीत्यादिप्रतीतिसिद्धाकाशसंयोगस्यांशिसंयोगत्वात् घटाद्यंशिसंयोगस्य तदंशवृत्तित्वस्य दर्शनेन यो यदंशिनस्संयोगः स तदंशवृत्तिरिति नियमबलात् आकाशांशवृत्तित्वमवश्यं वाच्यम् । तच्च आकाशांशानां आकाशानात्मकत्वे नोपपद्यते । अंशिसंयोगस्य अंशवृत्तितायामविशेषेण घटसंयोगस्यापि पटवृत्तित्वापत्त्या अंशवृत्तिनस्संयोगस्य अंशवृत्तिताया अतिप्रसङ्गपराहतत्वात् । घटसंयोगो घटवृत्तिः तद्गुणत्वात् रूपवत् । अंशवृत्तिसंयोगो न घटसंयोगः तदन्यवृत्तित्वात् पटसंयोगवदिति प्रमाणबाधाच्च । अंशानां अंश्यात्मकतायां तु नैतद्दोषद्वयप्रसक्तिः । घटांशस्य घटेनाभिन्नत्वेन, पटवत् घटेनात्यन्तभिन्नत्वाभावात् घटसंयोगस्य घटांशवृत्तितायामपि पटस्य घटेनाभेदाभावेन घटांशवैषम्यात् पटवृत्तित्वाभावोपपत्त्या प्रसङ्गमूलभूताविशेषरूपव्याप्यसिद्ध्या उक्तातिप्रसङ्गनिराससम्भवात् । अंशवृत्तेरेव घटवृत्तित्वेन आद्यस्यानुमानस्य सिद्धसाधनत्वात् । अंशावृत्तित्वे सति घटवृत्तित्वसाधने च दृष्टान्तस्य साध्यविकलत्वात् । द्वितीये तु स्वरूपासिद्धिः स्यात् । अंशस्य घटाभिन्नत्वेन तत्संयोगस्य घटसंयोगत्वेऽपि तस्यैवांशस्य घटभिन्नत्वस्यापि सत्त्वेन घटभिन्नवृत्तित्वस्य उपपन्नतया घटभिन्नवृत्तित्वरूपहेतुं प्रति घटसंयोगत्वाभावस्य अप्रयोजकत्वाच्च । ततश्च अंशांशिनोर्भेदे आकाशसंयोगस्य अंशवृत्तित्वरूपप्रदेशवृत्तित्वानुपपत्तेः । अभेदे च तदुपपत्तेः । अभेदेन विनाऽनुपपद्यमानेन उक्तांशवृत्तित्वरूपप्रदेशवृत्तित्वेन आकाशांशानां आकाशाभेदसिद्धिरिति ॥ ननु संयोगस्य प्रदेशवृत्तित्वं नाम अंशवृत्तित्वमिह न विवक्षितम् । किन्तु स्वसमानाधिकरणात्यन्ताभावप्रतियोगित्वमेव । तच्च अंशवृत्तित्वं विनापि सम्भवतीति कथं तदभावापादनमित्याशङ्क्य न प्रदेशवृत्तित्वं स्वात्यन्ताभावसामानाधिकरण्यं वक्तुं शक्यम् । प्रतियोगितदत्यन्ताभावयोस्सामानाधिकरण्यस्य व्याहतत्वेनायोगात्, किन्तु अंशवृत्तित्वमेवेति तदभावापादन-

मित्याशयेनाह **व्याघातादिति** । यदत्र वक्तव्यं तत् 'अंशे संयोगदृष्टेश्चे'त्येतद्ग्रन्थव्याख्यानावसरे टीकायां टीकाकार एव वक्ष्यतीति न कश्चित् क्षुद्रोपद्रवः ॥ अन्ये तु प्रदेशानामाकाशात्मकत्वे तद्वृत्तिसंयोगस्याकाशैकदेशे सत्त्वेऽप्येकदेशान्तरेऽसत्त्वेन तद्रूपदेशवृत्तित्वसम्भवेऽपि प्रदेशानां तदात्मकत्वाभावे संयोगस्य तत्तदेकदेशे सत्त्वेऽप्याकाशेऽसत्त्वेनैकदेशे च व्याप्यवृत्तितया संयोगस्याव्याप्यवृत्तित्वं न स्यादित्यर्थः । ननु संयोगस्याव्याप्यवृत्तित्वं नैकदेशवृत्तित्वमभिमतं, किन्तु स्वसमानाधिकरणात्यन्ताभावप्रतियोगित्वमेव । तच्चैकदेशवृत्तित्वं विनाऽपि सम्भवतीति कथं तदभावापादनमित्याशङ्क्य नाव्याप्यवृत्तित्वं स्वात्यन्ताभावसामानाधिकरण्यं वक्तुं शक्यम् । प्रतियोगितदत्यन्ताभावयोः सामानाधिकरण्यस्य व्याहतत्वेनायोगात् । किन्तु प्रदेशवृत्तित्वरूपमेवेति युक्तमेव तदभावापादनमित्याशयेनाह **व्याघातादित्यप्याहुः** । केचित्त्वन्यथेत्यस्य प्रदेशानङ्गीकार इत्यर्थं वर्णयन्तो व्याघातादित्यस्याकाशो निरंशः तत्संयोगश्चांशवृत्तिरित्यस्य व्याहतत्वादित्यर्थमाहुः ।

वा०२०— आश्रितत्वं चेति । पदार्थानां साधर्म्यं निरूपयितुं प्रवृत्तेनाश्रितत्वं चेत्येतद्वाक्यं प्रयुक्तम् । नित्यद्रव्याणि विहायाश्रितत्वस्वाभाविकी सत्तासमवायेन सत्वमिति यावत् । नित्यद्रव्याणामपि संयोगवृत्त्या आश्रितत्वात् व्यावृत्त्ययोग इत्यतः स्वाभाविकसत्तेति आश्रितत्वं किरणावल्यां व्याख्यातम् । स्वाभाविकीत्येतत् समवायेनेति वर्धमाने व्याख्यातमिति ज्ञेयम् । **परमाणुत्वेति** । परमाणुपरिमाणत्वेत्यर्थः । **न परमाणुपरिमाणत्वं इति** । विपर्ययपर्यवसानकरणानुसारादिति ज्ञेयम् । **परमाणौ सर्वत्रेति** । परमाणोरंशाभावेन सम्पूर्णे परमाणावित्यर्थः । यद्यपि एवमेव परममहता गगनादिना संयुज्यमानस्य घटस्य परममहत्त्वे गगनादौ घटादिसंयोगस्य सर्वत्र सत्त्वेन घटादिसंयोगस्य प्रदेशवृत्तित्वं न स्यादित्यर्थकत्वमाश्रित्य संयोगस्य प्रदेशवृत्तित्वात् इत्येतत् न हि घटः इत्येतत् प्रथमप्रतिज्ञायामपि हेतुत्वेनाश्रयितुं शक्यम् । तथापि घटनिष्ठाकाशसंयोगस्य प्रदेशवृत्तितेव परमाणुसंयोगस्यैव प्राप्ता सा चानुपपन्नेति स्पष्टमेवेति । आकाशानिष्ठसंयोगस्तु अप्रकृतः । तथाभूतस्यापि प्रदेशवृत्तिताव्याख्याने आकाशस्येव घटस्यापि परममहत्त्वेऽजसंयोगापत्तिरिति संयोग एव नास्तीत्यादिकं घटस्य परममहत्त्वाङ्गीकारे दूषणमुत्प्रेक्षणीयं स्यादित्याशयेन संयोगस्य प्रदेशवृत्तित्वाद् इत्येतद्वाक्यं प्रतिज्ञायां हेतुतया न वर्णितमिति बोध्यम् । तत्प्रतिज्ञायामपि हेतुतया एतद्व्याख्यानमुपलक्षणया बोध्यमित्याहुः । एतेन प्रतिज्ञाद्वये प्रतीयमानस्य हेतोः द्वितीयप्रतिज्ञायामेव हेतुतया योजनं कुतः टीकाकारस्य इति शङ्कानवकाशः । पूर्वप्रतिज्ञाया सिद्धविषयतया अहेयत्वाच्चेति ज्ञेयम् ।

भेदविशेषयोरिति । भेदविशेषयोः यदन्यतरः तदविनाभाव एवेत्यर्थः । तथा च भेदव्यावृत्तावपि विशेषव्यावृत्त्यभावेन भेदविशेषान्यतरसत्त्वात् व्यापकाभावो नास्तीति नानन्तत्वरूपव्याप्यनिवृत्तिप्रसङ्गः इत्यर्थः । **प्रतिज्ञातं प्रथमदोषपरिहारमिति** । यद्यपि विशेषवाक्येत्यादि पूर्वभागस्यापि प्रथमदोषपरिहारोपादकतोऽस्तीति तदुपपादकतया पूर्वभागमारभ्यैवावतारः कर्तुमुचितः । तथापि ततश्चेत्युक्तोपपादकतोपपादकत्वं पूर्वभागस्येति भावेन साक्षात्तदुपपादकं, ततश्चेत्येतदेव तथाऽवतारितमिति ज्ञेयम् । आकाशे संयोग एव नास्तीति आशङ्कापरिहाराय तस्य निर्बाधप्रतीतिसिद्धत्वात् न तदभावो वक्तुं शक्यः इति दर्शयन् अंशांशिनोरभेदे न त्वंशेनेति

अनुव्याख्यानव्याख्यानावसरेऽयमभिसन्धिः इत्यादिना मूलकृतांशसंयोगस्य तदंशवृत्तित्वाद्युपपादनं यत्कृतं तत्रत्य यो यस्यांशिनः संयोगः सः तदंशे वर्तते । घटसंयोगो घटांशवृत्तिरित्यप्ययुक्तम् । अतिप्रसङ्गात् । तथा सति पटवृत्तिरपि घटसंयोगः स्यादित्यादिना उक्तं प्रमेयं मनसि निधाय अंशिसंयोगस्यांशिवृत्तित्वसाधनेनाकाशांशानां आकाशात्मकत्वमुपपादयति । **अयं भावः इह पक्षीत्यादिना** आकाशसंयोगस्याकाशांशेत्युत्तरेण सम्बन्धः । तत्र हेत्वादेः क्रमेणाभिधानं **अंशवृत्तित्वादित्यादि** । **अंशस्येति** । विभिन्नांशिसंयोगस्येत्यर्थः । अविशेषणाविशेषस्य नियामकाभावेत्यर्थः । अंशात्मकतायां तु नैतद्दोषेति पाठः । द्वितीयो नकारः लेखकागतः । मूलोक्तमन्यथासिद्धत्वमप्रयोजकत्वे पर्यवसन्नमिति भावेनोपपादनपूर्वकं अप्रयोजकत्वमाह **अंशस्य घटाभिन्नत्वेनेति** । उक्तं निगमयति **ततश्चेति** । केयं आव्याप्यवृत्तिता नाम । अन्यांशवृत्तित्वात् स्वाभावसमानाधिकरणत्वमिति चेत् विरुद्धत्वात् इत्यंशे संयोगश्च दृष्टश्चेत्यत्रत्यमूलानुसारेण अभिन्नांशाभावेऽपि प्रदेशवृत्तित्वं सम्भवतीति शङ्कानिरासकत्वेन व्याघातात् इत्येतदवतारयति **ननु संयोगस्येति** । **व्याहतत्वेन** विरुद्धत्वेन । **यदत्र वक्तव्यमिति** । दृष्टत्वादविरुद्धत्वमिति चेदित्यादि शङ्कान्तरनिराकरणादिकमित्यर्थः । अन्ये त्विति पक्षस्तु व्याघातादिति इत्यन्तानन्तरमाहुरित्यन्तः । तत्पक्षे इत्याहुरित्यस्येत्यर्थः । इत्यन्तानन्तरं निवेशस्तु तदानीं लेखकत्वेनावस्थितस्य मम दोषात् । मया हि प्रवेशो नाम आकाशात्मकत्वे इत्यादि व्याख्याने अन्ये त्वित्याहुः इत्येतयोः क्रमेणाद्यन्तयोः निवेशः कार्यः इत्येवं गुरुभिराज्ञप्तेन अन्यथेत्येतत् एकदेशमात्रव्याख्यानान्तर्भूते न स्यादित्यर्थः । इत्यनन्तरमेव इत्याहुः इत्येतत् बाधितं न तु केचित्त्विति व्याख्यानान्तरात्प्राक् व्याघातादितीत्यन्त द्वितीयवाक्यव्याख्यानानन्तरं इत्याहुरित्येतत् शोधितम् । **प्रदेशानां आकाशात्मकत्वे** इत्यादि व्याख्यानस्यायं भावः । इह पक्षीत्यारभ्य व्याघातादित्यन्त स्वीयव्याख्यानानन्तरभाविनः । केचित्तु अन्यथेत्यस्य इत्यादि वाक्यद्वयव्याख्यानात्मक केचित्पक्षाश्च पूर्वभाविनो वाक्यद्वयव्याख्यानान्तत्वेन स्पष्टशोधनकालेऽनवधानेन व्याघातादितीत्यन्तस्थलपरित्यागेन प्रथमवाक्यार्थः न स्यात् इत्यर्थः इत्यन्तानन्तरमेव निवेशकरणादित्यवधेयम् । तथाऽन्येषां पक्षे व्याघातादितीत्येतदवतारे नाव्याप्यवृत्तित्वं स्वात्यन्ताभावेति पाठः । तत्र प्रदेशोऽपि इति पाठोऽपि लेखकागतः । मूलकोशेऽभावात् । स्वीयव्याख्याने प्रदेशपददर्शनमूलत्वाच्चेति ज्ञेयम् ।

स०व्र०— संयोगस्येति । परमाणुना संयुज्यमानस्य घटस्य परमाणुत्वे परमाणुसंयोगस्य परमाणौ व्याप्यवृत्तित्वस्य परेणाङ्गीकारात् तदेकदेशवृत्तित्वरूपप्रदेशवृत्तित्वानुपपत्त्या न तस्य परमाणुपरिमाणत्वमिति भावः । अस्तु सर्वमूर्तसंयोगित्वमेव सर्वगतत्वम् । तथाऽपि तत्परिमाणाभावे संयोगानुपपत्तेस्तत्परिमाणत्वमावश्यकमेव । न चैवं गगनेन संयुज्यमानघटस्यापि तत्परिमाणत्वापत्तिरिति वाच्यम् । स्वपरिमाणवतैव गगने तस्य संयोगेन परममहत्त्वानापत्तेः । न च गगने परममहत्त्वात्परिमाणान्तरमेव नास्तीति वाच्यम् । तत्तत्परिमाणसमानसर्वपरिमाणानामपि तत्र सत्त्वादित्याशयेन आद्यदोषपरिहारं प्रतिजानीते **सर्वेति** । द्वितीयदोषमप्युद्धरति **परमाणुना चेति** । प्रथमदोषपरिहारमुपपादयति **तथा हीति** । ननु यद्याकाशे अनवधिकौ

परिमाणोत्कर्षापकर्षौ वर्तेते इत्यभ्युपेयते तर्हि वितस्तिपरिमाणेनाकाशेन संयुक्तस्य घटस्य वितस्तिपरिमाणत्ववत् परममहत्त्वमपि स्यात् । वितस्तिपरिमाणस्याकाशस्य महाकाशाभिन्नत्वेन महत्त्वात् । अन्यथा यत् यत्संयुक्तं तत् तत्परिमाणमिति व्याप्तेस्तत्रैव व्यभिचारः स्यादित्यत उक्तं **व्यवस्थयेति** । यत् यतोऽपकृष्टं तत्ततोऽपकृष्टमेव । यत् यत उत्कृष्टं तत् ततः उत्कृष्टमेवेति व्यवस्थयेत्यर्थः । द्वितीयदोषपरिहारमुपपादयति **घटांश एवेति** । **अन्यथेति** । अन्यथा आकाशस्य प्रदेशानङ्गीकार इत्यर्थः । **व्याघातादिति** । प्रदेशानङ्गीकारे प्रदेशवृत्तित्वस्य व्याहतत्वादित्यर्थः । यद्वा निर्भेदस्याप्याकाशस्याभिन्नांशानङ्गीकारेणांश एव संयोगावस्थानाङ्गीकारात् त्वदभिप्रेतसंयोगस्य प्रदेशवर्तित्वमपि न स्यादित्यर्थ इत्यप्याहुः । वस्तुतस्तु प्रदेशानामाकाशात्मकत्वे तद्वृत्तिसंयोगस्याकाशैकदेशे सत्त्वेन देशान्तरे तदभावात् प्रदेशवृत्तित्वसम्भवेऽपि प्रदेशानाम् आकाशात्मकत्वाभावे घटसंयोगस्य प्रदेशे सम्पूर्णस्यैव सत्त्वात् एकदेशवृत्तित्वरूपप्रदेशवृत्तित्वं न स्यादित्यर्थ इति ।

विष्ठल०— ननु पटादेरवयविनोऽल्पाल्पतरदेशस्थित्यभावे शून्यत्वमेव स्यात् । **तथोपपादितत्वादिति** चेन्न । स्यादेतद्दूषणं अंशांशिभेदवादिनां तार्किकाणां न त्वस्माकं, अस्माभिर्भेदाङ्गीकारात् । अतोऽस्मद्रीत्या तत्तद्रूपवत्वरूपसाधनवति घटादावेकैकदृश्येन तत्तत्परिमाणत्वं सिद्धान्तः । यत्र त्वीश्वरादावत्यन्ताभेदस्तत्र न काचिदनुपपत्तिरिति । ननु तत्तद्देशस्थितस्य तत्तत्परिमाणत्वमित्येतत्कालादौ युज्यते । न चैतदाकाशे । तस्यैव देशत्वेन स्वगतत्वानुपपत्तेरिति चेन्न, स्वगतत्वस्य वक्ष्यमाणत्वात् । अत्र देश इत्यनुभवाच्च । यदा तु स्वगतत्वं तदा गम्यगमकभावोऽप्युपपद्यत एवेति । एवमाकाशादिकमल्पाल्पतरपरिमाणवत् अल्पाल्पतरदेशस्थितत्वादिविवक्षितानुमानस्य पटादावल्पाल्पतरदेशस्थितत्वरूपहेतोस्सत्त्वे साध्याभावेन व्यभिचार इत्याशङ्क्य पटावयवांशानामेवाल्पाल्पतरदेशस्थितत्वं न पटादेः तस्यांशभिन्नभिन्नत्वादिति परिहृत्य आकाशादौ पक्षे अल्पाल्पतरदेशस्थितत्वरूपहेतोरसिद्धिमाशङ्क्य परिहरति **ननु चेत्यादिना** । **अनाश्रितत्वादिति** । आकाशादेरवृत्तिमत्पदार्थत्वेन सर्वत्रावस्थित्यनुपपत्तेरिति भावः । तर्ह्याकाशस्य तत्तन्मूर्तद्रव्यसंयोगित्वेनैव तत्तत्परिमाणत्वमस्तु यो येन संयुज्यते स तत्परिमाण इति व्याप्त्युपपत्तेरित्यत आह **संयोगश्चेति** । **न हि घट इति** । तथा च तत्परिमाणत्वरूपसाध्यरहिते घटादौ तत्तत्संयोगित्वरूपसाधनभावाद्व्यभिचार इति भावः । यद्यद्येन संयुक्तं तस्य तत्परिमाणत्वाभाव इत्यत्र निमित्तं पृच्छति **तत्कस्येति** । उत्तरमाह **संयोगस्येति** । समपरिमाणत्वे व्याप्यवृत्तित्वं स्यादिति भावः । यद्याकाशस्य सर्वमूर्तद्रव्यसंयोगित्वमङ्गीक्रियते तदा सिद्धं नः समीहितम् । तत्तत्संयोगित्वस्य तत्तत्परिमाणाविनाभूतत्वात् तर्ह्याकाशसंयुक्ते पटेऽपि परममहत्त्वं स्यादित्युक्तमिति चेन्न । आकाशांशेष्वल्पाल्पतरपरिमाणस्त्वेव पटादेः संयुक्तत्वेन समग्रपरिमाणवत्याकाशे संयुक्तत्वात् । भावात् घटपटादिसर्वपरिमाणानामप्याकाशे सत्त्वात् । यदप्युक्तं नापि परमाणुना संयुज्यमानः परमाणुरिति तदप्ययुक्तं, परमाणुना समयपटस्य संयोगाभावात् । किं तु पटादावस्यैव संयोगः अंशांशिनोर्भेदाभ्युपगमेनासौ पटसंयोगोऽपि भवति । अत आकाशादेः सर्वसंयोगेनापि सर्वपरिमाणत्वं युक्तमित्याशयेन परिहरति **मैवमिति** । सर्वपरिमाणमित्यस्य सर्वपरिमाणसदृशपरिमाणानामित्यर्थः । सर्वपरिमाणानामप्याकाशे सत्त्वादित्यादिकमुप-

पादयति **तथा हीति** । **निर्भेदम्** अत्यन्तभेदरहितमित्यर्थः । आकाशांशानां भेदश्चेत् प्रतिपादकस्य वक्ष्यमाण-सुधान्यायदीपाद्यनेकग्रन्थस्य सत्त्वात् । 'खण्डिते भेद ऐक्यं वे'त्यादि वाक्यजातस्याप्यन्यथासिद्धत्वादिति सङ्गिरन्ते **विशेषशक्त्येति** । भेदाभेदयोरेकत्र घटनार्थमिति चाहुः । अस्त्वनन्तांशोपेतत्वं किमत इत्यत उक्तं **तत्रेति** । एवमनन्तांशोपेतत्वे सतीत्यर्थः । **तेष्वंशेष्विति वा व्यवस्थेति** । स्वस्य न्यूनपरिमाणो-पेतांशापेक्षयोत्कर्षः स्वस्वापकृष्टपरिमाणोपेतांशापेक्षया अपकर्ष इति व्यवस्थेत्यर्थः । एवं सति न व्यभिचारदोष इत्याह **ततश्चेति** । तत्तत्संयुक्तस्य तत्तत्परिमाणवत्त्वनियमान्न व्यभिचार इति भावः । अणुपरिमाणत्वापादनेन व्यभिचारचोदनं चायुक्तमित्याह **घटांश एवेति** । यदि घटांश एव परमाणुसंयोग इत्यङ्गीकृत्य न पट-स्थाणुत्वप्राप्तिरित्युच्यते तर्ह्याकाशांशानामेवाल्पाल्पतरदेशसंयोगित्वेनैव तेषामेव सत्परिमाणत्वेन त्वंशिन आकाशस्य ततश्च सर्वपरिमाणानामप्याकाशे सत्त्वादित्ययुक्तमिति शङ्कते **तर्हीति** । अल्पाल्पतरेत्युपलक्षणं स्थूलस्थूलतरेत्यपि ग्राह्यम् । **तेषामपीति** । न चैवं घटांशानामभेदस्यापि भावात्पटस्याप्यणुत्वोपपत्तेर्न पटस्याणुत्वं प्राप्तिरिति कथमुक्तमिति वाच्यं, पररीत्यैव शङ्कचेत्युक्तत्वात् । **अन्यथेति** । आकाशानां आकाशात्मकाभावे इत्यर्थः । यदि संयोगस्यांशवृत्तित्वमनभ्युपगम्य तद्भिन्नांशिमात्रनिष्ठत्वमङ्गीक्रियते । तर्हि त्वयोक्तमव्याप्यवृत्तित्वरूपं प्रदेशावृत्तित्वं न स्यात् । प्रदेशवृत्तित्वव्याप्यवृत्तित्वयोर्विरोधेन व्याघातादिति भावः । प्रदेशवृत्तित्वं नाम स्वात्यन्ताभावसमानाधिकरणत्वं न त्वव्याप्यवृत्तित्वं, अतो न विरोध इत्यत आह **व्याघातादिति** । संयोगतदत्यन्ताभावयोः सामानाधिकरण्यं व्याहतमिति भावः ।

॥ इति उक्तसर्वगतत्वाभावरूपानिष्टापत्तेः इष्टापत्तिताशङ्का तन्निरसनञ्च ॥
॥ इति कालाकाशेश्वराणां अनवधिकपरिमाणोत्कर्षापकर्षाभावे बाधकप्रदर्शनम् ॥
॥ इति तदर्थविपर्यये बाधकप्रदर्शनम् ॥

* * *

॥ अथ तत्र कालादौ परिमाणोत्कर्षापकर्षयोरानन्त्यमुपपाद्योपसंहारः ॥

६५ **सु०— कालादौ परिमाणोत्कर्षापकर्षयोरानन्त्यमुपपाद्योपसंहरति अत इति ।**

अनु०— अतो नाणुत्वविश्रान्तिर्न महत्त्वस्य च क्वचित् ।

क्वचित् कालादौ त्रये ।

परि०— त्रय इति । कालाकाशेश्वरेष्वित्यर्थः ।

कं०रा०— कालादौ त्रयमिति । कालाकाशेश्वररूपत्रय इत्यर्थः ।

शे०वा०— उत्तरभाष्यस्य पौनरुक्त्यमाशङ्क्योपसंहारार्थत्वान्न तदिति भावेनोपसंहारपरतया योजयति **कालादाविति** ।

॥ इति कालादौ परिमाणोत्कर्षापकर्षयोरानन्त्यमुपपाद्योपसंहारः ॥

* * *

॥ अथ विश्रान्तिशब्दार्थप्रथमविकल्पितार्थोक्तानुमानदूषणस्योपसंहारः ॥

६६ सु०— यद्वाऽनुमानदूषणोपसंहारोऽयम् । ततश्च कालातीतत्वदृष्टान्तदोषावपरिहार्याविति ।

परि०— अनुमानदूषणेति । 'तारतम्यस्थिता यस्मादि'त्यत्रोक्ते परमाणुगतपरिमाणाणुत्व-महत्त्वरूपे प्रमेये विरोधितया 'यथा महत्त्वे'त्यादिना शङ्कितानुमानस्य दूषणयोः साध्यवैकल्यबाधयोः 'न महत्त्वस्यापि विश्रम' इत्यादिनोक्तयोरुपसंहारोऽयमित्यर्थः ।

वं०प०— अनुमानेति । अणुपरिमाणतारतम्यं क्वचिद्विश्रान्तमित्युक्तानुमानेत्यर्थः । **ततश्चेति** । 'अतो नाणुत्वविश्रान्तिरि'त्यनेन कालात्ययापदिष्टतायास्तथा 'न महत्त्वस्य चे'त्यनेन साध्यवैकल्यरूपदृष्टान्तदोषस्य चापरिहार्यत्वं उक्तं ज्ञेयम् ।

कं०रा०— अनुमानदूषणोपसंहार इति । परिणामापकर्षतारतम्यं क्वचिद्विश्रान्तं परिमाणतारतम्य-त्वादित्यंनुमानदूषणोपसंहारपरः । अतो नाणुत्वविश्रान्तिरित्यादि ग्रन्थ इत्यर्थः । **कालातीतत्वेति** । अत्र नाणुत्वविश्रान्तिः क्वचिदित्यनेन कालातीतत्वदोषस्यापरिहार्यतामाह । तस्य च क्वचिद्विश्रान्तिर्नेत्यनेन न दृष्टान्ते साध्यवैकल्यरूपदोषस्यापरिहार्यतोक्तेति ज्ञातव्यम् ।

श्रीनिधि०— कालातीतत्वेत्यादि । साक्षिणा 'अणोरणीयानि'ति श्रुत्या च बाधात् साध्य-वैकल्याच्चेत्यर्थः ।

शे०वा०— दृष्टान्तदोषः साध्यवैकल्यम् ।

विट्ठल०— अनुमानदूषणेति । अणुत्वं क्वचित्पर्यवसितं परिमाणत्वान्महत्ववदित्यनुमानस्य बाध-साध्यवैकल्ययोः 'दृश्यते अनन्त' इत्यनेन 'महत्त्वस्याविश्रम' इति चोक्तयोरुपसंहारोऽयमित्यर्थः ।

॥ इति विश्रान्तिशब्दार्थप्रथमविकल्पितार्थोक्तानुमानदूषणस्योपसंहारः ॥
॥ इति विश्रान्तिशब्दार्थप्रथमविकल्पितार्थे द्वितीयदोषः- अनुमानस्य कालात्ययापदिष्टता (परिमाणापकर्षतारतम्यानन्त्यस्यापि दर्शनम्) ॥
॥ इति विश्रान्तिशब्दार्थप्रथमविकल्पितार्थे अङ्गीक्रियमाणे दोषत्रयम् ॥

* * *

॥ अथ तत्र परिमाणोत्कर्षापकर्षयोरानन्त्यस्य कालाकाशेश्वरादिवत् प्रकृत्यादौ सर्वगते परममहति द्रव्यान्तरेऽप्यस्तित्वम् ॥

६७ **सु०—** कालाकाशेश्वरेषु परिमाणोत्कर्षापकर्षयोरानन्त्यमस्तीत्युक्तम् । न केवलं तेष्वेव । किन्तु प्रकृत्यादौ सर्वगते परममहति द्रव्यान्तरेऽपीत्याह **उभयेति** ।

अनु०— उभयानन्त्ययुक् तस्माद्यदि मुख्यं महद्भवेत् ।

तस्मादिति । कालादिषूक्तन्यायात् ॥ मुख्यं महत् परममहत् ।

वं०प०— प्रकृत्यादौ प्रकृत्यादिरूपे द्रव्यान्तरेऽपीत्यर्थः ।

कं०रा०— न केवलं तेष्वेवेति । न केवलं कालाकाशेश्वरेष्वेव परिमाणोत्कर्षापकर्षयोरानन्त्य-मित्यर्थः ।

श्रीनिधि०— यदि मुख्यमिति । तर्हीति शेषः । यद्वा यत् इत्यस्य यदीत्यर्थः । तदा तदिति शेषः ।

शे०वा०— उभयेत्युत्तरभाष्यानर्थक्यमाशङ्क्य प्रकृत्यादिद्रव्यस्योक्तन्यायेन परिमाणोत्कर्षापकर्षा-नन्त्योपपादनार्थत्वान्न तदिति भावेन वृत्तानुवादपूर्वकं प्रकृत्यादेस्तदुपपादकतयोत्तरभाष्यं योजयति **कालेति** ।

॥ इति परिमाणोत्कर्षापकर्षयोरानन्त्यस्य कालाकाशेश्वरादिवत् प्रकृत्यादौ सर्वगते परममहति द्रव्यान्तरेऽप्यस्तित्वम् ॥

* * *

॥ अथ ईश्वरगतानन्त्यस्य कालादिगतानन्त्याद्वैलक्षण्यम्, त्रिविधम् ॥

६८ **सु०**— 'यदि कालादेरप्यानन्त्यं स्यात् । कथं तर्हि सत्यं ज्ञानमनन्तं ब्रह्मेत्यानन्त्यं ब्रह्मणो लक्षणत्वेनोच्यते, न ह्यतिव्याप्तं लक्षणं भवतीत्यत आह **तच्चेति** ।

अनु०— तच्च ब्रह्म परं साक्षात्

परम् इति केवलार्थे ।

यद्यपि कालादिकमप्यनन्तं, तथाऽपि ब्रह्मैव तदनन्तमित्युच्यते । कुतः । **साक्षात्** परानपेक्षयाऽनन्तत्वात् । अपराधीनत्वापेक्षयेति यावत् ।

पक्षान्तरमाह **सर्वेति** ।

सर्वानन्त्ययुतं

नास्यां श्रुतावानन्त्यमात्रं लक्षणत्वेनोच्यते, किन्तु देशतः कालतो गुणादितश्च । तादृशं च ब्रह्मैवेति न दोषः । यथोक्तम् 'देशतः कालतश्चैव गुणतश्च त्रिधा ततिः । सा समस्ता हरेरेव न ह्यन्ये पूर्णसद्गुणाः' इति ।

पक्षान्तरमन्वाचिनोति **सदेति** ।

सदा ।

पूर्वेणैव सम्बन्धः । तथा च कालक्षणेषु देशतोऽनन्तेष्वपि नातिव्याप्तिरिति ।

परि०— मूले तच्चेति चोऽवधारणे भिन्नक्रम इत्युपेत्याह **ब्रह्मैवेति** । तदित्यनुवादेनार्थमाह **तत् अनन्तमिति** । अनन्तत्वस्यान्तरूपप्रतियोग्यपेक्षत्वात् परानपेक्षयेति कथमुक्तमित्यत आह **अपराधीनत्वेति** । गुणादीत्यादिपदेन क्रियाविग्रहयोर्ग्रहः । **यथोक्तमिति** । द्वितीये गीतातात्पर्ये उक्तमित्यर्थः । **पक्षान्तरमन्वाचिनोतीति** । चशब्दस्य हि चत्वारोऽर्थाः । इतरेतरयोगसमाहार-समुच्चयान्वाचया इति । तत्रान्वाचयो नाम भिक्षामट गां चानयेत्यत्र भिक्षाटनसमये गौर्दृष्टा चेदानय

न चेन्मास्त्वित्येवंरूपः । तथा च सदानन्त्ययुतमित्युक्त्या कालतोऽप्यानन्त्यस्य लाभेन क्षणलवादिमात्रव्यावर्तकत्वेन परममहन्मात्राव्यावर्तकत्वादन्वाचिनोतीत्युक्तम् । यद्वा अनन्याधीनानन्त्यलक्षणमिति पक्षे देशकालगुणादिभिरानन्त्यमिति पक्षे च न क्वाप्यतिव्याप्तिशङ्का । किन्तु प्रकरणप्राप्तोभयविधपरिमाणानन्त्यमात्रमनन्तशब्दार्थ इति पक्षे क्षणादावतिव्याप्तिशङ्कायां सदेति विशेषणमन्वेतीत्यर्थः । कालादावतिव्याप्तिशङ्का तु प्रागुक्तरीत्या द्वेधा निरसनीयेति भावः ।

यादु०— मूले चशब्दो अप्यर्थ इत्यभिप्रेत्याह यद्यपि **कालादिकमिति** । नन्वथाऽप्यसम्भवः । अनन्तत्वस्याभावगर्भतया प्रतियोगिरूपपरापेक्षत्वादित्यत आह **अपराधीनत्वेति** । स्वसत्तादौ परनियम्यत्वाभावापेक्षयेत्यर्थः । भगवदानन्त्यं च तथा भवतीति नासम्भव इति भावः । गुणादित इत्यत्रादिपदेन क्रियाविग्रहयोर्ग्रहणम् । **पूर्वेणैवेति** । बुद्ध्या विविक्तेनानन्त्ययुतमित्यनेनैव सम्बन्ध इत्यर्थः । तथा च नित्यानन्त्ययुतत्वमत्र लक्षणतया विवक्षितमिति भावः । आनन्त्यं चात्र देशत एव विवक्षितमिति ज्ञातव्यम् । नित्यत्वविशेषणस्य कृत्यमाह **तथा च कालक्षणेष्विति** । कालरूपक्षणेष्वित्यर्थः । इदं क्षणानां देशतोऽनन्तत्वमुपपादयितुमिति ज्ञातव्यम् । क्षणानामनित्यत्वेन तदानन्त्यस्याप्यनित्यत्वान्नित्यत्वविशेषणेन तद्व्यावृत्तिरिति भावः । न चैवमपि प्रकृत्यादावतिव्याप्तिः । 'इदं वा अग्रे नैव किञ्चनासीदि'त्यादिना भगवदितरस्य कस्यापि मुख्यनित्यत्वाभावावगमेन तदानन्त्ये मुख्यनित्यत्वासम्भवात् । मुख्यनित्यत्वस्यैव च लक्षणे विवक्षितत्वात् । न चैवं तावदेव लक्षणमस्तु किं विशेषणेनेति वाच्यम् । मुख्यनित्यत्वस्य पृथग्ब्रह्मविशेषणत्वे हि इयमाशङ्का । न चैवं किन्त्वानन्त्यविशेषणमेतत् । तत्र च यथोक्तविशेष्यविशेषणभावे न वैयर्थ्यमिति समाधानमित्याशयात् ।

वं०प०— **अन्वाचिनोतीति** । अप्रधानार्थान्तरसूचनमन्वाचयः । यथा वटो भिक्षामट गां चानयेत्यत्र भिक्षाटनं प्रधानं गवानयनं पाक्षिकम् । भिक्षाटनसमये यदि गौर्लभ्यते तर्ह्यानय नो चेन्नेति । एवमिह सदानन्त्ययुतमिति नित्यदा देशानन्त्ययुतत्वमुक्तम् । अनेन कालरूपक्षणेषु देशानन्त्येष्वतिव्याप्तिपरिहारसूचनमपि भवतीत्यतिव्याप्तिपरिहारोऽप्रधानम् । यद्यतिव्याप्तिपरिहार एव पूर्वलक्षणयोरिवात्रापि प्रधानं प्रयोजनं स्यात्तर्ह्यव्याकृताकाशे प्रकृत्यादौ चातिव्याप्तिरवश्यं परिहार्या स्यान्न च पर्यहार्षीत् तेन ज्ञायते तत्र न भार इत्यतोऽयमन्वाचयः । तथा च कालक्षणादिव्यावर्तकमात्रमेवेदं लक्षणमिति भाव इत्याहुः ।

कं०रा०— **अपराधीनत्वापेक्षयेति** । आनन्त्यस्य पराधीनत्वविवक्षया ब्रह्मैवानन्त्यमित्युच्यते । तथा च परानधीनानन्त्यस्य कालादावनतिव्याप्तत्वात् ब्रह्मलक्षणत्वेनोक्तिः सम्भवतीति भावः । **पूर्वेणेति** । सदेत्यस्यानन्त्ययुतमिति पूर्वेण सम्बन्ध इत्यर्थः । सदानन्त्ययुतमिति कालानन्त्यग्रहणस्य प्रयोजनमाह **तथा चेति** । काललक्षणानां देशतानन्तत्वेऽपि कालतः आनन्त्यभावात् तदानन्त्यग्रहणेन कालक्षणेष्वतिव्याप्तिनिरास इति

भावः । यद्यपि देशकालाभ्यामानन्त्यमव्याकृताकाशेऽस्ति तथाप्यनन्तपदेन गुणानन्त्यस्यापि विवक्षितत्वात् तस्य च तत्राभावान्नातिव्याप्तिरिति ध्येयम् । न च वाच्यं गुणानन्त्यमात्रस्यानतिव्याप्तत्वेन ब्रह्मलक्षणत्वसम्भवे देशकालानन्त्यग्रहणं व्यर्थमिति अखण्डाभावे वैय्यर्थ्याभावात् । न ह्यनन्तशब्दोक्तदेशकालगुणपरिच्छेदत्रयाभावे एकैकाभावस्य प्रवेशोऽस्ति येन वैय्यर्थ्यं स्यात् । न च वाच्यं गुणपरिच्छेदवत्याकाशे कालादिपरिच्छेदाभावेन परिच्छेदत्रयाभावोऽस्तीत्यतिव्याप्तिरिति प्रतियोगिसत्त्वस्याभावविरोधित्वेन गुणपरिच्छेदत्रयाभावस्य तत्रासत्त्वात् वस्तुतस्त्वनन्याधीनकालानन्त्यमनन्याधीनदेशानन्त्यं चेति लक्षणत्रये तात्पर्यमिति द्रष्टव्यम् ।

श्रीनिधि०— पक्षान्तरमन्वाचिनोतीति । सर्वत्रातिव्याप्तेरेकेन विशेषेण परिहारादन्वाचिनोतीत्युक्तम् । एकक्रियायोगो हि समुच्चयः । यथा 'घटं पटं चानये'त्यत्र भिन्नक्रियायोगेन्वाचयः । यथा 'भिक्षां अट गां च आनये'त्यत्र तत्र यथा एकक्रियाया सर्वत्रान्वयभावेन अन्वाचयत्वम् । एवमत्रापि समाधानस्यासार्वत्रिकत्वात् उपचारेणान्वाचिनोतीत्युक्तम् ।

शे०वा०— तच्चेत्युत्तरभाष्ये आनन्त्यस्य ब्रह्मण्यपराधीनत्ववर्णनस्य प्रकृतानुपयोगमाशङ्क्यातिव्याप्तिनिरासाय लक्षणाविष्करणार्थत्वान्न तदिति भावेनातिव्याप्तिनिरासाय लक्षणाविष्करणार्थतयोत्तरग्रन्थं सङ्गमयितुमानन्त्यस्य ब्रह्मलक्षणत्वानुपपत्तिशङ्कामुत्थापयति **यदीति** । मूले चशब्दो अप्यर्थ इत्यभिप्रेत्याह **यद्यपि कालादिकमिति** । नन्वथाऽप्यसम्भवः । अनन्तत्वस्याभावगर्भतया प्रतियोगिरूपपरापेक्षत्वादित्यत आह **अपराधीनत्वेति** । स्वसत्तादौ परनियम्यत्वाभावापेक्षयेत्यर्थः । भगवदानन्त्यं च तथा भवतीति नासम्भव इति भावः । **किन्त्विति** । न च सर्वानन्त्ययुतत्वं न लक्षणं, गुणानन्त्यमात्रस्यैवानतिप्रसक्तत्वेन लक्षणत्वोपपत्त्या व्यर्थविशेषणत्वादिति वाच्यम् । प्रकृतलक्षणे सर्वत्वेन रूपेण तस्य प्रवेशेऽपि प्रातिस्विकेन रूपेण तस्याप्रविष्टतया वैयर्थ्यानवकाशादिति भावः । गुणादित इत्यादिशब्देन क्रियाविग्रहयोः परिग्रहः । ब्रह्मण एव त्रिविधानन्त्यं न त्वन्यस्येत्यत्र प्रमाणमाह **यथोक्तमिति** । **पक्षान्तरमिति** । देशकालादिनिरासाय प्रकारद्वयमभिहितं पूर्वत्र । इदानीं कालमात्रे तन्निरासाय प्रकारान्तरं कथ्यते । अत एव प्रकारद्वयस्य प्रकृत्यादिसर्वव्यावर्तकत्वात्प्राधान्यम्, अस्य तु कालक्षणमात्रव्यावर्तकत्वादप्राधान्यमिति भावेनान्वाचिनोतीत्युक्तम् । न तु लक्षणान्तरपरत्वेनायं ग्रन्थो योज्यः । कालक्षणे उक्तलक्षणाभावेनातिव्याप्त्यभावेऽप्याकाशादावतिव्याप्तितादवस्थ्यादिति ध्येयम् । **पूर्वेणैव सम्बन्ध इति** । बुद्ध्या विविक्तेनानन्त्यमिति पूर्वेण सदेत्यस्य सम्बन्ध इत्यर्थः । एतत्पक्षाश्रयणप्रयोजनमाह **तथा च कालेति** । केचित्तु लक्षणान्तरत्वेऽप्यस्य न दोषः । न च आकाशादेरपि सदानन्त्ययुतत्वात् तत्रातिव्याप्तिरिति वाच्यम् । अंशतोऽप्यानन्त्यस्य विवक्षितत्वेन तदप्रसङ्गात् । न चैवं सदेति व्यर्थम् । तन्महिम्नैवास्यार्थस्य लब्धत्वादित्याहुः ।

वा०र०— तच्चेत्युत्तरभाष्य इत्यारभ्योत्थापयतीत्यन्तानन्तरं कथं तर्हीतीति प्रतीकोपादाने कर्तव्ये यदीति प्रतीकोपादानेन इदं सूचयति । यद्यपि अनुव्याख्यानस्थ यदिपदस्य शेषपूरणेन व्याख्यानपर यदि

कालादेरपि आनन्त्यं स्यादित्येतद्वाक्यं अवश्यं वाच्यम् । अन्यथा यदिशब्दस्य मूले व्याख्यानाभावप्रसङ्गात् तर्हि तथापि कथं तर्हि इत्युत्तरग्रन्थशेषोऽप्ययं भवतीति वाच्यम् । तेन तर्हि इत्येतत् स्पष्टं भवति ।

पूर्वशेषत्वमात्रे तर्हि इत्येतत्स्पष्टीकरणार्थे आवश्यकं यदीत्यादेः अनुक्तिप्रसङ्गः । उत्तरशेषत्वमात्रे च यदीत्येतस्य व्याख्यानाभावप्रसङ्गः । तस्मात् मध्यदीपिकान्यायेन उभयशेषभूतं इदमिति । ननु यदीत्यस्य उत्तरशेषत्वे तर्हीत्येतत्स्पष्टीकरणोपयुक्तार्थप्रतिपादकतयाऽर्थान्वयेऽपि पूर्वशेषत्वेनार्थान्वयः सम्भवति । कालादिषु उक्तन्यायादित्यर्थक तस्मादित्यनेनैव कालादेः दृष्टान्तताया: लब्धत्वात् । यदि कालादेरित्यादिरूपापादकोक्त्ययोगाच्च । न ह्यत्र प्रकृत्यादेः परिमाणानन्त्यमापाद्यते । अपि तु यथा कालाकाशेश्वराणां परिमाणोत्कर्षापकर्षयोः आनन्त्यं तथा प्रकृत्यादिद्रव्येऽपि आनन्त्यमिति अतिदेशमुखेन प्रतिपाद्यते । तथा च दृष्टान्ततयैव तदुपादानस्यावश्यकत्वात् नात्रापादकोक्तिर्युक्तेति चेत् ।

अत्र ब्रूमः । तस्मादित्यनेनैव कालादिदृष्टान्तोक्तिलाभेऽपि अतिदेशकधर्मलाभेऽपि च उपदिष्टप्रमेयलाभाय एव यदीत्येतदनुव्याख्यानव्याख्यानरूप यदि कालादेः इत्येतदावश्यकम् । न च तर्हि आपादकोक्त्ययोगः । अनुव्याख्यानस्थ यदि इत्यस्य यस्मादित्यर्थकतायाः सिद्धवत्कारेण तस्मादित्यस्य कालादिषु उक्तन्यायादिति मूलकृता व्याख्याततया स्यादित्यस्य च मास्तु प्राचीनशेषः । अयं तु स्यात् । घटोऽयं स्यादित्यत्रेव न स्यादिति शङ्कोत्तरतया प्रयुक्ते स्यादित्यत्रेव च सत्तामात्रप्रतिपादकतया आपादननियतत्वाभावात् । अत एव प्रक्रियास्थ इत्संज्ञः स्यात् इत्यादौ भवतीति व्याख्यानम् । 'नैकस्मिन्नसम्भवादि'त्यधिकरणे स्याच्छब्दतिङन्तप्रतिरूपकक्रियात्व इति टीकायामुक्तम् । जैनाधिकरणे च स्याच्छब्दस्य तिङन्तप्रतिरूपकस्य कथञ्चिदर्थकत्वं टीकायामुक्तम् । तथा च यस्मात् न्यायात् कालादेरप्यानन्त्यं तस्मादेव आनन्त्यप्रकृत्यादेरिति फलति । **कालादेरपि** इत्यपिशब्देन प्रकृत्यादेः कालादेश्चाविशेषं सूचयति । कालादेः प्रकृत्यादेश्च आनन्त्याङ्गीकारानङ्गीकारयोः विशेषनियामकाभावः । किन्तु आनन्त्यानङ्गीकाराविषयतया समानत्वमेव । अन्यथा कालादेरपि तन्न स्यादित्येवं प्रकृत्याद्यविशेषवतोऽपि कालादेरितीति न तदनुपपत्तिरिति ज्ञातव्यम् । उत्तरशेषत्वं तु स्पष्टमेवेति सूरयो विदाङ्कुर्वन्तु ।

प्रातिस्विकरूपेणेति । गुणानन्त्यत्वादिरूपेणेत्यर्थः । **क्रियाविग्रहयोरिति** । अपरिच्छिन्नसङ्ख्या-गुणकर्मविग्रहवत्वमिति प्राचीनमूले सङ्ख्यायाः गुणत्वविवादसूचनाय पृथग्ग्रहणेऽपि वास्तवसङ्ख्यागुणत्वाश्रयेणात्र गुणे मात्रग्रहणमिति भावेन क्रियाविग्रहयोरेवादिपदार्थतया व्याख्यानमिति ज्ञेयम् । 'देशतः कालतश्चे'ति प्रमाणवाक्ये गुणतः इत्यस्य क्रियाद्युपलक्षणत्वात् गुणोदितः इत्यंशोऽपि सम्मतिता युक्तेति ज्ञातव्यम् । **अन्वाचिनोतीत्युक्तमिति** । पूर्वत्रेव पक्षान्तरमाहेत्यनुक्त्वा अनुलक्षीकृत्य स्थूलविशेषं आचिनोति । प्रवर्तयतीत्युक्त्या कालाद्यशेषव्यावर्तकत्वमस्य नास्तीति सूचनादिति भावः । **अन्वाचिनोतीत्येतत्** निष्कृष्टार्थः निष्कास्योऽस्ति । पूर्वेणैव सम्बन्धः इतीति प्रतीकोपादानपाठः । **आकाशादेरपीति** । कालादिपरिग्रहायादि-

पदम् । **इत्याहुरिति** । अत्र इदं अस्वरसबीजम् । सदानन्त्यविवक्षया देशतोऽनन्तः अनन्तकालक्षणेषु अतिव्याप्तिपरिहारेऽपि कालादौ अतिव्याप्तिः स्यादेव इति शङ्कापरिहारायांशतोऽपि आनन्त्यं विवक्षितम् । तत्र यदि देशतः आनन्त्यमभिप्रेतं तदा न कालक्षणव्यावृत्तिः । यदि कालतोंऽशानन्त्यं तदा कालव्यावृत्त्युपपत्तावपि नाकाशव्यावृत्तिः । आकाशांशानां देशतः इव कालतोऽपि अनन्तत्वादिति ।

विठ्ठल०— तच्चेति । चशब्दोऽप्यर्थ इत्यभिप्रेत्यार्थमाह **यद्यपि कालादिकमिति** । केवलं ब्रह्मेत्यस्यार्थो **ब्रह्मैवेति** । चशब्दोऽवधारणार्थकोऽपि भवताभिप्रेत्यान्वयमाह । ब्रह्मैवेत्यप्याहुः । यदित्यनूद्यार्थमाह **तदनन्तमिति** । उच्यत इति दोषोक्तिः हेतुत्वेन साक्षादित्युक्तं सङ्गमयति **कुत इति** । नन्वनन्तत्वमन्तरूपप्रतियोग्यपेक्षम् । अतः परानपेक्षत्वं सम्भवतीत्याह **अपराधीनत्वेति** । यद्वा ननु कालादिकमपि जडत्वेन परानपेक्षयानन्तरमेवेत्यत आह **अपराधीनत्वापेक्षयेति** । परानपेक्षानामपराधीनत्वं विवक्षितमिति भावः । तथा च यद्यपि कालादिकमनन्तं भवति तथापि केवलं ब्रह्म ब्रह्मैव स्वातन्त्र्येणानन्तं अतो नातिव्याप्तिरिति मूलार्थः । **आनन्त्यमात्रमिति** । येन केनचिदानन्त्यमित्यर्थः । **गुणादित** इत्यत्रादिपदेन क्रियाविग्रहयोर्ग्रहणम् । **पक्षान्तरमन्वाचिनोतीति** । देशत आनन्त्यलक्षणत्वेनात्र विवक्षितत्वात् तन्मात्रस्यातिव्याप्तिं परिहर्तुमानन्त्यमित्यनेन सदेति विशेषणं योजयतीत्यर्थः । **पूर्वेणैव सम्बन्ध इति** । बुद्ध्या विवेकेन अनानन्त्यमित्यनेनैव सम्बन्ध इत्यर्थः । सदा विशेषणकृत्यमाह **तथा चेति** । सर्वदा देशत अनन्तत्वस्य देशादावतिव्याप्तिशङ्का प्रागुक्तरीत्या द्वेधा निरसनीया । कालक्षणानां देशतोऽनन्तत्वं प्रसङ्गात्सूचयितुं पक्षान्तरोक्तिरिति साम्प्रदायिकाः अतिप्रसङ्गसूचनेनेति साक्षिणो मानत्वाभावे अजआदेर्मानत्वग्रहणं न स्यादित्युक्तातिप्रसङ्गसूचितेनेत्यर्थः ।

॥ इति ईश्वरगतानन्त्यस्य कालादिगतानन्त्याद्वैलक्षण्यम्, त्रिविधम् ॥

* * *

॥ अथ तृतीयविकल्पनिरासः
(कालाकाशगतपरिमाणोत्कर्षापकर्षतारतम्यानन्त्यसाक्षिसिद्धत्वमनिच्छतामभिप्रायगत-
तृतीयविकल्पस्य 'साक्षी नाम प्रमाणमेव नास्ती'त्यस्य निरसनम्) ॥
॥ अथ तत्रादौ बाधकसाधककथनम् ॥
॥ अथ तत्राप्यादौ साक्ष्यनङ्गीकारे बाधकम् – अक्षजादिज्ञानप्रामाण्यस्य,
कालाकाशादेः अन्तःसुखादिकस्य च गमकाभावानुपपत्तिः ॥
॥ अथ च तत्र साक्ष्यङ्गीकारे साधकम् – तस्य साक्षिणः स्वयंभातत्वम् ॥

६९ **सु०—** परमाणावपि परिमाणापकर्षतारतम्यविश्रान्तिर्नास्तीत्युक्तम् । तदसत्; परिमाणस्य द्रव्याश्रयत्वात्; परमाणुतोऽप्यपकृष्टपरिमाणाश्रयस्य द्रव्यस्याभावात् । मैवम्,

परमाणुभागानां सत्त्वात् । न च तेषु विश्रान्तिः, तेषामपि (भागसत्वात्) सभागत्वात् । अविश्रान्तभागपरम्परा कुतः सिद्धेत्यतः साक्षिणेति वक्तुं, 'साक्षी नाम प्रमाणमेव नास्ती'ति वदतो बाधकं तावदाह यदीति ।

अनु०— यदि साक्षी स्वयम्भातो न मानं केन गम्यते । अक्षजादेश्च मानत्वम्

साक्षी नाम मानं यदि न इष्यते, तदा अक्षजादेः ज्ञानस्य मानत्वम्, चशब्दाद्बहिः कालाकाशादिकमन्तःसुखादिकं च, केन प्रमाणेन गम्यते । न केनापि, तद्ग्राहकस्य प्रमाणान्तरस्य अभावात् । न च तन्मा भूदिति वाच्यम्, तद्व्यवहारविलयप्रसङ्गादिति ।

'नन्वस्तु साक्षिणमनङ्गीकुर्वाणस्येदं बाधकम्, साधकं (तु) किमि'त्यत आह स्वयम्भात इति । यस्तु स्वयं प्रकाशमानेऽपि साक्षिणि विप्रतिपद्यते सः 'अक्षजादेर्मानत्वं सप्रमाणकं वस्तुत्वाद्घटवदि'ति प्रसङ्गसूचितेनानुमानेन बोधनीयः । प्रसक्तप्रतिषेधश्च वक्ष्यमाणन्यायेन भविष्यति । 'धर्मिग्राहकप्रमाणेनैव सिद्धेर्न तत्प्रामाण्ये पृथक् प्रमाणं वक्तव्यम्, अत एव मानम् इत्युक्तम् ।

परि०— साक्षिणेति वक्तुमिति । 'अतः सर्वपदार्थानामि'त्यादिग्रन्थे वक्तुमित्यर्थः । **इति वदत इति** । 'यदि नो साक्षिगम्यं तदि'त्येतदवतारिकायां कृतविकल्पेषु साक्षी नाम प्रमाणमेव नास्तीत्यवशिष्टतृतीयं पक्षं वदत इत्यर्थः । **बाधकं तावदिति** । स्वयम्भात इति वक्ष्यमाण-साधकापेक्षया तावच्छब्दः । **न च तदिति** । प्रामाण्यादेर्ग्रहणमित्यर्थः । **घटवदितीति** । अनु-मानेनेत्यन्वयः । सामान्यानुमानेनेत्यर्थः । **प्रसङ्गसूचितेनेति** । 'यदि साक्षी'त्यादिनोक्तेन प्रामा-ण्यादेर्ग्रहणव्यवहारयोर्विलोपरूपातिप्रसङ्गेन सूचितेनेत्यर्थः । नन्वनेनानुमानेन सिद्धस्य प्रामाण्यस्य प्रत्यक्षाद्यन्यतमत्वसम्भवात् साक्षिसिद्धिः कुत इत्यत आह **प्रसक्तेति** । यथा न्यायमते गगनादिसिद्धिः सामान्यविशेषाभ्यां, तथेति भावः । **वक्ष्यमाणेति** । प्रामाण्यविषये प्रसक्तस्या-नुमानस्यानवस्थाऽन्यथा भवेदिति वक्ष्यमाणविपक्षबाधकन्यायेनेत्यर्थः । सुखादिविषये च 'इच्छा ज्ञानं सुखं दुःखं भयाभयकृपादयः । साक्षिसिद्धा न कश्चिद्धि तत्र संशयवान् क्वचित् । यत्क्वचि-

द्व्यभिचारि स्याद्दर्शनं मानसं हि तत्' इत्यादिना ज्ञानपादे वक्ष्यमाणसंशया(द्य)भावादिरूपन्यायेन प्रसक्तमानसप्रत्यक्षादेः प्रतिषेधश्च भविष्यतीत्यर्थः । साक्षिसिद्धावपि तन्मानत्वं केन सिद्ध्येदित्यत आह **धर्मीति** । अक्षजादेर्मानत्वं सप्रमाणकं वस्तुत्वादिति सामान्यानुमानरूपेण परिशेषसहितेन साक्षिरूपधर्मिग्राहकेण प्रमाणेनेत्यर्थः ।

यादु०— वक्ष्यमाणन्यायेनेति । 'अनवस्थाऽन्यथा भवेदि'त्यनुपदमेव वक्ष्यमाणन्यायेनेत्यर्थः । प्रवृत्तिसामर्थ्येनानभ्यासदशायां प्रामाण्यसिद्धिः, तज्जातीयत्वेन त्वभ्यासदशायामिति ज्ञातव्यम् ।

वं०प०— प्रसङ्ग इति । यदि साक्षिनामकं मानं न स्यात् तदाऽक्षजादेर्मानत्वग्रहो न स्यादिति तर्केत्यर्थः । ननु सप्रमाणकत्वप्रवृत्तिसामर्थ्याद्यनुमानरूपप्रमाणमादायापि पर्यवस्यतीति न साक्षिरूपप्रमाणसिद्धिरित्यत आह **प्रसक्तेति** । अस्तु साक्षी, तत्प्रामाण्यं कुतः सिद्धं, येन सप्रमाणकमित्युक्ते साक्षिणमादाय पर्यवसानं स्यादित्यत आह **धर्मीति** । साक्षिरूपधर्मिग्राहकेण प्रमाणेन स्वेनैव सिद्धे साक्षिप्रामाण्य इत्यर्थः । तस्य स्वप्रकाशत्वादिति भावः । **पृथक्** साक्षिभिन्नम् । **मानं** स्वसिद्धमानत्वोपेतमित्यर्थः ।

कं०रा०— प्रसङ्गसूचितेनेति । साक्षीनां मानं यदि नेष्यते तदाक्षजादेर्मानत्वम् । केन प्रमाणेन अवगम्यते न केनापीति प्रसङ्गसूचितेनेत्यर्थः । नन्वक्षजादेर्मानत्वं सप्रमाणकमित्यनुमानेन न साक्षिसिद्धिः । प्रवृत्तिसामर्थ्यादिरूपानुमानस्याक्षजादिमानत्वे प्रमाणत्वसम्भवादित्यत आह **प्रसक्तेति** । अक्षजादिमानत्वे प्रमाणत्वेन प्रसक्तस्य प्रवृत्तिसामर्थ्यादिरूपानुमानस्य प्रतिषेधः अनवस्थान्यथा भवेदिति वक्ष्यमाणन्यायेन भविष्यति । तथा च वक्ष्यमाणन्यायेन प्रसक्तप्रतिषेधेऽक्षजादिमानत्वे प्रमाणत्वेन साक्षिण एव सिद्धिरिति भावः ।

श्रीनिधि०— साक्षी नाम प्रमाणमेव नास्तीति वदत इति । साक्षी नाम प्रमाणं नास्तीति तृतीयपक्षं शङ्कत इत्यर्थः । **वक्ष्यमाणन्यायेनेति** । 'अनवस्थान्यथा भवेदि'ति वक्ष्यमाणन्यायेनेत्यर्थः । **धर्मिग्राहकप्रमाणेनैवेति** । स्वप्रकाशेन साक्षिणैवेत्यर्थः ।

शे०वा०— ननु 'यदि साक्षी'त्युत्तरभाष्यमनर्थकम् । न च साक्षिप्रमाणे विवादमानं प्रति विपक्षे बाधकोपदर्शनेन साक्षिप्रामाण्यसमर्थनार्थमेतदिति वाच्यम् । तत्समर्थनस्यापि प्रकृतोपयोगादर्शनादित्याशङ्क्य अव्यवहितेन पूर्वग्रन्थेन तस्यासङ्गतत्वेऽपि 'तथानन्त्यमणावपी'ति विप्रकृष्टपूर्वग्रन्थोक्तस्य परमाणोः परिमाणापकर्षतारतम्यविश्रान्त्यभावस्योपपादकतया तत्सङ्गतत्वेन पूर्वग्रन्थसङ्गतिसम्भवान्नानुपपत्तिरिति भावेन तद्ग्रन्थसङ्गततयोत्तरभाष्यं सङ्गमयितुं तदनुपपत्तिशङ्कामुत्थापयति **परमाणावपीत्यादिना** । **वक्तुमिति** । 'अतः

सर्वपदार्थानामि'त्याद्युत्तरभाष्येणेति शेषः । **इति वदत इति** । प्राग्विकल्पितेषु पक्षेषु तृतीयं पक्षं वदत इत्यर्थः । उत्तरत्र साक्षिप्रामाण्ये साधकस्यापि वक्ष्यमाणत्वात् तावदाहेत्युक्तम् । व्यवहितत्वादन्वयं दर्शयन् तृतीयपक्षनिरासस्य मूलारूढतामुपदर्शयति **साक्षीत्यादिना** । अक्षजादेश्चेति चशब्दानर्थक्यमाशङ्क्यानुक्त-समुच्चयार्थत्वान्न तदिति भावेन तमुपदर्शयति **चशब्दादिति** । उत्तरत्र परिहाराभावेन प्रश्नार्थत्वायोगादाक्षेपार्थतया किंशब्दं व्याचष्टे **नेति** । नन्वनुमानादिनैव कालाकाशादिसिद्धिर्भविष्यतीति कथमाक्षेप इत्यतोऽनुमानादिना तदसिद्धेः 'सत्यत्वं गगनादेश्चे'त्यादिना पूर्वमेव समर्थितत्वान्न प्रमाणान्तरेण तत्सम्भव इत्याह **तद्ग्राहकेति** । भाष्ये विपर्यये बाधकाभिधानस्य स्वयम्भात इत्येतद्विशेषणनैरपेक्ष्येणैव सिद्धेस्तद्वैयर्थ्यमित्याशङ्क्य साक्षिप्रमाणे साधकोत्त्यर्थत्वान्न तदिति भावेन तत्परतया तद्योजयितुं साधकाभावशङ्कामुत्थापयति **नन्विति** । विपर्ययेऽनिष्टकथनमात्रस्यैव तत्साधकत्वे न क्वापि साधकं वक्तव्यं स्यादिति भावः । नन्वस्त्वक्षजादिमानत्व-स्यैवं सप्रमाणकत्वसिद्धिस्तावता कथं साक्षिप्रामाण्यसिद्धिस्तस्य साक्षीतरप्रमाणवेद्यत्वस्यापि सम्भवादित्यतः परिशेषात् तत्सिद्धिरिति भावेन परिशेषमुपपादयति **प्रसक्तेति** । **वक्ष्यमाणन्यायेनेति** । 'अनवस्थाऽन्यथा भवेदि'त्यनुपदमेव वक्ष्यमाणन्यायेनेत्यर्थः ।

वा०र०— प्राग्विकल्पितेति । 'यदि नो साक्षिगम्यं तत्' इत्यनुव्याख्यानावतारमूले विकल्पिते-त्यर्थः । तद्विकल्पेषु प्रथमस्याद्यं शङ्कत इति द्वितीयं निराकरोतीति चाद्यद्वितीयत्वोक्तत्वेन प्रतिपादनवत् अस्य तृतीयपक्षस्य तृतीयत्वेनाभिधानस्य मूलेऽभावात् । इदं व्याख्यानम् । अन्यथा साक्षिणेति वक्तुं साक्षी नाम प्रमाणं इत्यादि ग्रन्थमर्यादया यदीत्युत्तरवाक्यस्य तन्त्रप्रमेयप्रतिपादकताप्रतीतिः स्यात् । प्राग्विकल्पितेषु तृतीयपक्षश्चोर्वीरित एव न तु निराकृतः इति बुद्धिः स्यात् इति द्रष्टव्यम् । **साधकस्यापीति** । 'स्वयं भातः' इत्यनेन इति शेषः ।

विष्टल०— अक्षजादिमानत्वग्रहणं प्रमाणान्तरेण भविष्यतीत्यत आह **प्रसक्तेति** । अनवस्था भवेदित्यनुपदमेव वक्ष्यमाणन्यायेनेत्यर्थः । अस्तु साक्षिसिद्धिस्तत्प्रामाण्ये किं प्रमाणमित्यत आह **धर्मि-ग्राहकेति** । अत एव धर्मिग्राहकप्रमाणसिद्धप्रामाण्यत्वज्ञापनायैवेत्यर्थः । प्रवृत्तिसामर्थ्येनाभ्यां सदृशायां प्रामाण्यसिद्धिः तज्जातीयत्वेन त्वनभ्यासदशायामिति ज्ञातव्यम् ।

॥ इति साक्ष्यङ्गीकारे साधकम् – तस्य साक्षिणः स्वयंभातत्वम् ॥
॥ इति साक्ष्यनङ्गीकारे बाधकम् – अक्षजादिज्ञानप्रामाण्यस्य,
कालाकाशादेः अन्तःसुखादिकस्य च गमकाभावानुपपत्तिः ॥
॥ इति तत्र बाधकसाधककथनम् ॥

* * *

॥ अथ च तत्र साक्ष्यनङ्गीकारपक्षोक्तबाधकोद्धारप्रयत्ने अनवस्थाप्रसङ्गः ॥

७० सु०— 'न साक्षिणोऽनभ्युपगमेऽप्यक्षजादिज्ञानप्रामाण्यमप्रामाणिकं प्रसज्यते, प्रवृत्तिसामर्थ्येन तज्जातीयत्वेन वाऽनुमानेन तत्सिद्धेरि'त्यत आह **अनवस्थेति ।**

अनु०— अनवस्थाऽन्यथा भवेत् ।

अन्यथा साक्षीतरप्रमाणवेद्यत्वाङ्गीकारे ।

तर्हि साक्षिप्रामाण्यमप्यन्येन ग्राह्यमित्यनवस्थैवेति चेन्न, तस्य स्वप्रकाशत्वादिति । तदिदमुक्तं 'स्वयम्भात' इति ।

परि०— अपरिचित(प्र)देशाभिप्रायेणाह **प्रवृत्तिसामर्थ्येनेति** । फलवत्प्रवृत्तिजनकज्ञानेनेत्यर्थः । अभ्यासदशापन्नाभिप्रायेणाह **तज्जातीयत्वेनेति** । समर्थप्रवृत्तिजनकज्ञानजातीयत्वेन इत्यर्थः । अन्यथेत्यनुवादः । साक्षीत्यादि व्याख्या ।

वं०प०— अनभ्यासाभ्यासदशापेक्षया प्रवृत्तीत्यादि वक्ष्यमाणेत्युक्तं दर्शयितुमाह **नेति** ।

कं०रा०— न तस्येति । साक्षिणः स्वप्रकाशत्वेन स्वनिष्ठप्रामाण्यस्यापि स्वेनैव ग्राह्यत्वात् साक्षिप्रामाण्यमप्यनेन ग्राह्यमेवं तत्प्रामाण्यमप्यन्येन ग्राह्यमित्यनवस्था नेत्यर्थः ।

शे०वा०— प्रवृत्तीति । प्रवृत्तिसामर्थ्येनानभ्यासदशायां प्रामाण्यसिद्धिः । अभ्यासदशायां तु तज्जातीयत्वेनेति भावेनात्रोभयोपादानमिति ध्येयम् । मूले **अनवस्थेति** । तस्यायं भावः । प्रवृत्तिसामर्थ्यस्याप्यगृहीतप्रामाण्यस्य प्रामाण्यानिश्चायकत्वेन गृहीतप्रामाण्यस्यैव तथात्वमङ्गीकार्यम् । तथा च तत्प्रामाण्यमप्यन्येनैव ग्राह्यम् । तत्प्रामाण्यमप्यन्येनैवेत्यनवस्थाप्रसङ्गादिति । तर्हि साक्षिणोऽपि प्रामाण्यग्राहकत्वं न स्यादिति भावेन शङ्कते **तर्हीति** । साक्षिणः स्वप्रकाशत्वेन स्वयमेव स्वप्रामाण्यग्राहकत्वेन ग्राहकान्तरानपेक्षणान्नानवस्थेत्याह **तस्येति** । वृत्तिज्ञानस्य तु जडत्वेन न स्वप्रकाशत्वं सम्भवतीति न स्वस्यैव स्वप्रामाण्यग्राहकत्वमित्यनवस्थैवेति भावः ।

वा०र०— प्रवृत्तिसामर्थ्यस्यापीति । लिङ्गकरणतापक्षाश्रयणेन **सामर्थ्येत्युक्तम्** । वस्तुता सामर्थ्यज्ञानस्येत्यर्थः । अत एवागृहीतप्रामाण्यस्य इत्यादिकं सम्बन्धं भवति । अन्यथागृहीतप्रामाण्यकज्ञानस्य इत्याद्यर्थाश्रयणापातात् । सामर्थ्यपदस्य ज्ञानपरतायां तु नानेकव्याख्यानप्रसङ्गः इति ज्ञेयम् । **वृत्तिज्ञानस्य तु**

जडत्वेनेति । एतच्च 'साक्षिणः स्वप्रकाशत्वं अनवस्था ततो न हि' इति भक्तिपादेन 'ज्ञानदृष्टिमात्रेण प्रामाण्यमि'ति ज्ञानपादे चानुव्याख्यानोक्तस्वप्रकाशत्वं मूले एव उपपादयिष्यते । तट्टीकादौ च तदुपपादनं ज्ञेयम् ।

विट्ठल०— तर्हीति । साक्षिग्राह्यत्वं पक्षेऽपीत्यर्थः ।

॥ इति साक्ष्यनङ्गीकारपक्षोक्तबाधकोद्धारप्रयत्ने अनवस्थाप्रसङ्गः ॥

* * *

॥ अथ च तत्रान्ते साक्षिप्रामाण्यसमर्थनस्य प्रकृतोपयोगसमन्वयप्रदर्शनम् ॥

७१ **सु०— किमतो यद्येवं साक्षी नाम प्रमाणमस्तीत्यत आह अत इति ।**

अनु०— अतः सर्वपदार्थानां भागाः सन्त्येव सर्वदा । सर्वदिक्ष्वपि सम्बन्धात्

साक्षित इत्यर्थः । सर्वपदार्थानां परमाणोस्तद्भागानां चेत्यर्थः । सन्त्येव 'इति सिद्धमि'ति शेषः ।

शे०वा०— ननु सर्वपदार्थानां साक्षिणा सभागत्वसाधनत्वस्य न प्रकृतोपयोग इत्यतः प्रकृत-परमाणुतद्भागमात्रपरतया सर्वपदार्थानामित्येतद्योजयति **परमाणोरित्यादिना** । वाक्याभासत्वपरिहारायापेक्षितं शेषं पूरयति **इति सिद्धमिति शेष इति** । सन्त्येवेत्यतःपरं इति सिद्धमिति शेष इत्यर्थः ।

वा०र०— सभागत्वस्य वक्ष्यमाणत्वादिति । 'अतः सर्वपदार्थानामि'त्यादिनेति शेषः ।

* * *

॥ अथ तत्रादौ अनुव्याख्यानगत'सर्वपदार्थानां'इतिपदस्य वैकल्पिकार्थतया परमाणोः सभागत्वसाधने अनुमानसूचनम् ॥

७२ **सु०— यद्वा 'सर्वपदार्थानामि'त्यनेनानुमानमपि सूचयति 'परमाणुः सभागः पदार्थत्वाद्घटवत्' इति । न चाश्रयासिद्धिर्धर्मिग्राहकविरोधो वा, साक्षिणा परमाणु-**

सिद्धेरुक्तत्वात् । तेन च सभागतयैव सिद्धेः ॥ न चैवमनुमानवैयर्थ्यम्, प्रमाण-सम्प्लवाङ्गीकारात्, सभागत्वमात्रे विप्रतिपन्नं प्रति सार्थक्याच्च ।

परि०— पदार्थत्वादिति । गुणक्रियादेरपि सभागत्वान्न व्यभिचार इति भावः । **धर्मि-ग्राहकेति** । प्रत्यक्षसिद्धं त्र्यणुकं स्वल्पपरिमाणद्रव्यारब्धं कार्यत्वाद्घटवदिति द्व्यणुकसिद्धौ तदपि पक्षीकृत्यैव साधने सिध्यन् नित्यनिरवयवत्वेनैव सिद्ध्यति । अन्यथाऽनवस्था स्यात् । अतस्तद्विरोध इति भावः । यद्वा परिमाणापकर्षतारतम्यं क्वचिद्विश्रान्तं परिमाणतारतम्यत्वात् । परिमाणोत्कर्ष-तारतम्यवदित्याद्यनुमानेन परिमाणापकर्षस्य क्वचिद्विश्रान्तिसिद्धौ यत्रेदं विश्रान्तं स परमाणुरिति प्रागुक्तधर्मिग्राहकेत्यर्थः । **उक्तत्वादिति** । 'केवलं साक्षिमानेन कालो देशोऽपि नान्तवानि'ति ग्रन्थव्याख्यावसरे उक्तत्वादित्यर्थः । **सभागत्वमात्र इति** । परमाणुस्वरूपे विप्रतिपत्तिं निराह **मात्र**पदेन । तथाच नाश्रयासिद्धिरिति भावः ।

यादु०— पदार्थत्वादिति । गुणादेः प्रागभावादेश्च पदार्थस्य भागाङ्गीकारान्न व्यभिचार इति भावः । **धर्मिग्राहकेति** । अवयवावयविप्रसङ्गस्तावदनुभूयते । स यदि निरवधिः स्यात् तदा मेरुसर्षपयोस्तुल्यपरिमाणत्वं स्यादनन्तावयवारब्धत्वाविशेषात् । अतो निरवयवं द्रव्यं किञ्चिदवधितयाऽङ्गीकार्यम् । स एव परमाणुरिति परमाणुः सिध्यन्निरवयवतैव सिद्ध्यतीति धर्मिग्राहकविरोध इत्यर्थः ।

वं०प०— आश्रयासिद्धिरिति । परमाणोरेवाभावाद्ध्वन्मते आश्रयासिद्धिः । परमाणुग्राहकानुमानेन निर्भागतयैव प्रसिद्धत्वादस्मद्रीत्या धर्मिग्राहकमानबाध इत्यर्थः । उभयं क्रमेण परिहरति **साक्षिणेत्यादिना** । **तेन चेति** । साक्षिणेत्यर्थः । **एवमिति** । यदि साक्षिणा सभागत एव सिद्धः परमाणुः तर्ह्यनुमानं व्यर्थं, सिद्धसाधनतापत्तेरित्यर्थः ॥ **प्रमाणेति** । एकस्मिन्नर्थे इति शेषः । **सभागत्वमात्र इति** । परमाणुस्वरूपस्य साक्षिसिद्धत्वमङ्गीकृत्य सभागत्वस्य साक्षिसिद्धत्वे यो विप्रतिपद्यते तं प्रति साक्षिसिद्धं परमाणुं पक्षीकृत्य तत्सभागत्वमनुमानेन साध्यत इत्यर्थः ।

कं०रा०— न चाश्रयासिद्धिरिति । परमाण्वसिद्धिदशायां परमाणुः सभाग इत्यनुमानं चेदा-श्रयासिद्धिस्तत्सिद्धिदशायां चेत् परमाणुग्राहकानुमानेन परमाणोर्निरवयवत्वेनैव सिद्धत्वात् तत्र सभागत्वसाधने धर्मिग्राहकविरोध इति । न च साक्षिणा परमाणुसिद्धेरुक्तत्वेनाश्रयासिद्धिर्धर्मिग्राहकविरोध इति । न च साक्षिणा परमाणुसिद्धेरुक्तत्वेनाश्रयासिद्धिर्धर्मिग्राहकविरोधानवकाशादिति भावः । ननु साक्षिणा परमाणुर्यदि निर्भागत्वेनैव सिद्धस्तदा धर्मिग्राहकविरोध एवेत्यत आह **तेन चेति** । साक्षिणा च परमाणोः सभाग एव सिद्धत्वान्न धर्मिग्राहकविरोध इति भावः । **एवमिति** । साक्षिणा परमाणोः सभागत्वेनैव सिद्धत्व इत्यर्थः ।

श्रीनिधि०— प्रमाणसम्प्लवाङ्गीकारादिति । एकस्मिन्नर्थे प्रमाणबहुत्वाङ्गीकारः दार्ढ्यार्थमिति भावः ।

शे०वा०— अस्मिन्पक्षे सर्वपदार्थानामित्यस्य न स्वारस्यमित्यपरितोषात् पक्षान्तरमाह **यद्वेति** । **पदार्थत्वादिति** । गुणादेरपि पदार्थसभागत्वस्य वक्ष्यमाणत्वान्न व्यभिचार इति भावः । **धर्मिग्राहकेति** । अवयवावयविप्रसङ्गो हि तावदनुभूयमानत्वान्नापलापमर्हतीत्यवश्यमसावभ्युपेयः । स च न तावन्निरवधिक एवाभ्युपगन्तुं शक्यते । तथा सत्यनन्तावयवारब्धत्वाविशेषान्मेरुसर्षपादीनां परिमाणभेदानुपपत्तिप्रसङ्गात् । न च कारणसङ्ख्याया अविशेषेऽपि परिमाणप्रचयविशेषाद्विशेष इति युक्तम् । तयोरपि सङ्ख्याविशेषमन्तरेणानुपपत्तेः । न च विनाशावधिरेवायम् । अन्त्यस्य निरवयवत्वे तदनुपपत्तेः । द्रव्यस्यावयवविभागनाशाभ्यां विना विनाशाभावात् । नापि विभागावधिः । तस्य विभज्यमानाश्रयतया तदभावेऽयोगात् । न चैकाश्रयो विभाग इति युक्तम् । किञ्चिदेव हि कुतश्चिद्विभज्यते न तु तदेव तस्मात् । तदेवं निरवयवद्रव्यावधिरेवायमवयवावयविविभाग इति निरवयवद्रव्यसिद्धौ स एव परमाणुरिति क्रियाविभागादिन्यायेन निरवयवतयैव परमाणोः सिद्धत्वाद्धर्मिग्राहकविरोध इत्यर्थः । **साक्षिणेति** । 'यदि साक्षिमितं नैतन्नानुमा तत्र वर्तते । पक्षीकर्तुमशक्यत्वादि'त्यादिना साक्षिणा परमाणुसिद्धेर्वक्ष्यमाणत्वादित्यर्थः । उक्तत्वादित्यतीतत्वोक्तिस्तु निश्चितत्वाभिप्रायेत्यवधेयम् । **सम्प्लवाङ्गीकारादिति** । सम्प्लवस्य दार्ढ्यहेतुत्वान्न वैयर्थ्यमिति भावः । **सभागत्वेति** । तथा च साक्षिणा परमाणुमात्रसिद्धावपि तत्सभागत्वस्य तेनासिद्धया तत्सिद्धयर्थत्वान्नानुमानवैयर्थ्यमिति भावः ।

वा०र०— परमाणुलक्षणा नित्येति प्रशस्तपादभाष्यव्याख्यानरूप एष एव हि अवयवावयवीप्रसङ्गोऽपीत्यादि किरणावलिं अवयवावयविप्रसङ्गस्तावत् अनुभूयते इत्यादि वैशेषिकसूत्रोपस्कारं च मनसि कृत्वा परमाणुसाधकं प्रमाणं दर्शयति **अवयवावयविप्रसङ्गो हि तावदित्यादिना** । **अनन्तावयवेति** । यथा मेरोरवयवपरम्परा न विश्राम्यति तथा सर्षपस्यापीति द्वयोः तुल्यप्रमाणता स्यादित्यर्थः । यदि तु परमाणुः स्वीक्रियते तदा मेरोः परमाणुः बह्वीभिः निरन्तरित इति मेरुः महान् सर्षपस्य तु स्वल्पाभिः अवयवपरम्पराभिः परमाणुर्निरन्तरित इति सर्षपोऽल्पपरिमाणो भवतीत्युपपद्यते इति भावः । ननु अनन्तावयवारब्धत्वेऽपि साक्षात्समवायिकारणाः बहुतरत्वात् महत्त्वम् । तदल्पत्वात् अल्पत्वं इति युज्यत एव परिमाणभेदः । यथा हि परमाण्वाख्यनिरवयवारब्धत्वपक्षेऽपि द्वितन्तुकपटात् विंशतितन्तुके पटे परिमाणाधिक्यं तथेति चेत्, न । साक्षादारम्भकस्यावयवारब्धत्वाविशेषेण सर्षपो यदि साक्षात् मेर्वारम्भक एकानपर्वततुल्यपरिमाणावयवारब्धः स्यात् । तर्हि तत्परिमाणाधिकपरिमाणः स्यात् इति तात्पर्यात् । अधिकं वर्धमानादौ बोध्यम् । **न च कारणसङ्ख्यायाः इति** । अवयवसङ्ख्याविश्रान्त्यभावस्य तुल्यत्वेऽपि कारणगतमहत्त्वपरिमाणात् प्रचयाद्वा मेरौ महत्त्वं सर्षपारम्भके तु अल्पपरिमाणात् प्रचयाभावाच्च न महत्त्वं किन्तु अल्पपरिमाणमेव । तद्यथा अल्पतन्तुकैयटे प्रचयाख्यसंयोगविशेषवर्जितत्वारब्धे वा पटे अल्पत्वे विद्यमानेऽपि महातन्तुकेऽपि वा प्रचयवत् तन्त्वारब्धे वा पटे महत्त्वमेवेति भावः ।

तयोरपीति । अवयवसङ्ख्याविश्रान्त्यभावस्य तुल्यत्वेऽवयवेषु किञ्चित् अल्पत्वकेषु किञ्चिन्महत्त्वमिति परिमाणस्य क्वचित् प्रचयोऽस्ति क्वचित् तदभावः इत्येतदेव न सम्भवति । एकत्र परिमाणप्रचयोत्पत्तिः अन्यत्र नेत्येतदेव कथमित्यर्थः । तूलादौ प्रचयकल्पना मत्पक्षे सम्भवति । अन्यत्र सङ्ख्याविश्रान्तिसिद्धौ प्रचयेनैव समसङ्ख्याकावयवत्त्वेऽपि महत्त्वविशेषोत्पत्तेरङ्गीकारादित्युपपादनीयम् । **न च विनाशेति** । किरणावलिस्थ-प्रलयपदं नाशार्थतया वर्धमाने व्याख्यातम् । सूत्रोपस्कारे च नाशावधिरित्येवोक्तमिति । अत्र टीकायां विनाशावधिरित्येवोक्तम् ।

विनाशस्य यदवधित्वमुच्यते तत्किम् । किञ्चिदपि निरवयवं अन्तिमं द्रव्यं स्वीकृत्य उतास्वीकृत्य । नान्त्यः । सावयवत्वे अवयवपरम्पराया एवापत्त्या सावधिकत्वानुपपत्तिप्रसङ्गादित्याशयेनाद्यं निराकरोति **अन्त्यस्येति** । कस्यचिदित्यस्य पूरणीयम् । तथैव किरणावल्यादावुक्तेः । **तदनुपपत्तेः** । विनाशरूपावधेरेव अनुपपत्तेः इत्यर्थः । अन्त्यस्य निरवयवत्वे कुतो विनाशोऽन्तिमो न भवतीति चेत् न । समवायि-कारणासमवायिकारणविनाशाभ्यामेव द्रव्यनाशेन निरवयवद्रव्यस्य च समवायिकारणाभावादेव उभयनाश-प्रयुक्तोऽपि नाशो न भवतीत्याह **द्रव्यस्येति** । विभागावधित्वं ब्रुवता पृथिव्यवयवत्वे आकाशादिभिः विभागोऽवधिर्वाच्यः । स च पृथिव्यवयवो निरवयवश्चेत् सिद्धं नः समीहितम् । सावयवश्चेत् सैवावयव-परम्परा । सोऽवयवो नास्त्येव चेत् कथं आकाशमात्रे विभागः । विभज्यमानद्रव्यस्यैव तदाश्रयत्वात् विभागस्य द्विष्ठत्वनियमादिति भावेनाह **तस्य विभज्यमानेति** ।

न चैकाश्रयेति । आकाशादिमात्राश्रयेत्यर्थः । द्विष्ठत्वनियमेनैव दूषयति **किञ्चिदिति** । यद्यपि आकाशादिमात्रनिष्ठो विभागः इति शङ्कमानेनापि पृथिव्यवयवोऽवधित्वेनापि स्वीकार्यः । स चावधिः सावयवो निरवयवो वेति विकल्प्य पूर्वोक्तदोषतादवस्थ्यं शक्यते वक्तुम् । तथापि एतद्दूषणं स्वीकृत्यैव स्पष्टत्वादुपेक्ष्य दूषणान्तरमनेनोक्तम् । अवयवावयविप्रसङ्गः इत्येवोपक्रमेऽपि उपसंहारे विभागपदं प्रसङ्गपदव्याख्यानतयेति न दोषः । 'बहुप्रमाणविसंवादश्च दार्ढ्यहेतुरेव' इति तत्त्वनिर्णयं मनसि कृत्वाह **सम्प्लवस्येति** । सम्प्लवस्य च निर्देशार्थक-चशब्दयुक्तः पाठः स्वरस एव । **तेनासिद्ध्येति** । तेन तत्सिद्धौ विवदमानं प्रतीति शेषः । तथा च तेन तत्सिद्धौ विवदमानं प्रति अनुमानमिति भावः ।

विट्ठल०— पदार्थत्वादिति । न च गुणादौ प्रागभावादौ च व्यभिचारः तेषामपि सभागत्वादिति द्रष्टव्यम् । ननु परमाणुः सिद्धो न वा । न चेदाश्रयासिद्धिः । आद्ये सावयवत्वस्य निरवधिकत्वे अनन्तावयवारब्धत्वाविशेषान्मेरुसिद्धार्थयोस्तुल्यपरिमाणत्वं स्यादतो निरवयवं किञ्चिद्द्रव्यमङ्गीकार्यं स एव परमाणुरिति सिद्ध्यन् परमाणुः निर्भागत एव सिद्ध्यतीति धर्मिग्राहकविरोध इत्यत आह **न चेति** । **साक्षिणेति** । विभागानर्हभागानामेव परमाणुत्वादिति भावः । **सभागत्वमात्रमिति** । साक्षिणाऽन्येन वा परमाणुसद्भावमङ्गीकृत्येति ग्राह्यम् ।

॥ इति अनुव्याख्यानगत'सर्वपदार्थानां'इतिपदस्य वैकल्पिकार्थतया परमाणोः सभागत्वसाधने अनुमानसूचनम् ॥

* * *

॥ अथ च तत्र अनुव्याख्यानगत'सर्वदा'इत्यादिपदानामपि वैकल्पिकार्थतया परमाणोः सभागत्वसाधने अनुमानान्तरकथनम् ॥

॥ अथ तत्रादौ तदनुमानान्तरगतहेतुविशेषणार्थाभिधानम् ॥

७३ **सु०—** अनुमानान्तरमाह **सर्वदेति** । युगपदित्यर्थः । **सर्वदिक्षु स्थितैर्द्रव्यैः सम्बन्धात्** संयोगात् **अपि भागाः सन्ति** इत्यवगम्यते ।

परि०— पदार्थत्वादित्यनुमानस्य प्रागुक्तेराह **अनुमानान्तरमिति** । सप्तम्यन्वयाय शेषमाह **स्थितैर्द्रव्यैरिति** । युगपद्दशामूर्तसंयोगित्वादित्यत्र वस्तुमात्रेऽपि दशभागसत्त्वेन विपक्षाभावेन विशेषणानां व्यभिचारावारकत्वेऽप्यप्रयोजकत्वनिरासार्थत्वमस्तीति तदुक्तिः । संयोगमात्रस्य सांशत्वेनैवोपपत्त्योक्तसाध्येऽप्रयोजकत्वात् क्रमेणैकस्मिन्नपि दशामूर्तसंयोगसम्भवादप्रयोजकत्वानुपपत्तये युगपदित्युक्तिः । एवं दशेत्यस्यापि कृत्यं ध्येयम् । एकस्मिन्नप्यंशे कालाकाशप्रकृत्यकारादिवर्णनरूप-दशामूर्तसंयोगसम्भवान्मूर्तेत्युक्तिः ।

शे०वा०— ननु सर्वदिक्षु स्थितैर्द्रव्यैः परमाणोः संयोगस्य यौगपद्यमात्रेणापि परमाणोर्दशभागवत्त्वरूपविवक्षितसाध्यसिद्धिसम्भवात् तत्संयोगानां सार्वकालिकत्वस्यानपेक्षितत्वाद्भाष्ये सर्वदेति संयोगानां सार्वकालिकत्ववर्णनमनर्थकमित्याशङ्क्य यौगपद्यमात्रपरत्वात् सर्वदित्यस्य नानर्थक्यमिति भावेन तत्तात्पर्यमाह **युगपदित्यर्थ इति** ।

वा०र०— सर्वदिक्षु स्थितैः द्रव्यैः इत्यादिमूलम् । अनेन दिक्षु इत्यनन्तरं स्थितैः द्रव्यैः इति पूरणीयम् । अपिशब्दवैय्यर्थ्यशङ्कायाश्च निरासः कृतो भवतीति ज्ञेयम् ।

॥ इति तदनुमानान्तरगतहेतुविशेषणार्थाभिधानम् ॥

* * *

॥ अथ ततश्च तदनुमानान्तरगतहेतुविशेषणवैयर्थ्यशङ्कानिवारणम् ॥

७४ सु०— यद्यपि सभागत्वमात्रसाधने संयोगित्वमात्रं प्रयोजकम्, गगनादीनामपि भागाङ्गीकारेण व्यभिचाराभावात्; तथाऽपि बहुभागसाधनाय विशेषणोपादानम् । तथा हि, 'परमाणुर्दशभागवान्युगपद्दशामूर्तसंयोगित्वात् (प)घटवदि'ति ।

यादु०— युगपद्दशेति । यद्यप्यत्र बहुभागानामपि सर्वत्र सत्त्वेन व्यभिचाराभावान्न तद्वारणं विशेषणप्रयोजनं, तथाऽप्युक्तसाध्यसाधने हेतोरसामर्थ्यशङ्कावारणमेव तत्प्रयोजनम् । तथा हि । घटादावेकस्मिन्नपि भागे क्रमेण दशामूर्तसंयोगानां सम्भवादन्यथासिद्धिशङ्कापरिहाराय 'युगपदिति' विशेषणम् । द्वित्राणां संयोगानां दशभागानपेक्षत्वाद्दशेति । एकस्मिन्नपि भागेऽमूर्ताकाशादिसंयोगानां स्थितिसम्भवात् पुनरप्रयोजकताशङ्कावारणाय **मूर्तेति** विशेषणम् ।

वं०प०— ननु गगनादौ संयोगित्वे सत्यपि सभागत्वाभावाद्व्यभिचार इत्यत आह **गगनादीनामिति** । **विशेषणेति** । पदार्थे सर्वदिक्स्थितत्वरूपविशेषणेत्यर्थः ।

कं०रा०— ननु संयोगित्वमात्रं गगनादौ व्यभिचरितं तत्र सभागत्वाभावात् सर्वदिक्ष्ववस्थितैः संयोगित्वादित्युक्ते तु न व्यभिचारः गगनाद्यपेक्षया पूर्वादिदिग्व्यवहाराभावेन सर्वदिक्ष्ववस्थितद्रव्यसंयोगित्वस्य गगनादावभावादतः सर्वदिक्षिति विशेषणमावश्यकमेवेत्यत आह **गगनादीनामपीति** । गगनादीनामपि भागाङ्गीकारेण सभागत्वरूपसाध्यस्य अत्र सत्त्वेन व्यभिचाराभावात्सर्वदिक्षिति विशेषणं व्यर्थमिवेति भावः ।

श्रीनिधि०— गगनादीनामिति । उपलक्षणं पदार्थमात्रस्येत्यर्थः । मुखतो गगनोपादानेन परे विप्रतिपत्तिं सूचयति । 'न चानवयवं वस्तु क्वचित् स्यान्मानगोचरमि'त्युक्तेः । तथा च कुत्रापि व्यभिचाराभावादिदं विशेषणं व्यर्थमिति शङ्कार्थः । परिहरति **तथापीति** ।

शे०वा०— एवं सर्वदेति हेतुविशेषणार्थमभिधायेदानीं तद्वैयर्थ्यमाशङ्क्य परिहरति **यद्यपीत्यादिना** । ननु च गगनादौ व्यभिचारान्न संयोगित्वमात्रस्य प्रयोजकत्वमित्याशङ्क्य तर्हि विशिष्टस्यापि गगनादौ व्यभिचारान्नाप्रयोजकत्वमिति तुल्यमेव । यदि च सभागत्वरूपसाध्यस्यापि गगने सत्त्वान्न विशिष्टस्य हेतुत्वपक्षे तत्र व्यभिचार इति मन्यसे तर्ह्यविशिष्टस्यापि हेतुत्वपक्षे तत एव न व्यभिचार इति हेतुविशेषणवैयर्थ्यमेवेत्याशयवानाह **गगनादीनामिति** । **बहुभागेति** । दशभागेत्यर्थः । **युगपद्दशेति** । यद्यप्यत्र दशभागानामपि सर्वत्र सत्त्वेन व्यभिचाराभावान्न तद्वारणं विशेषणप्रयोजनं सम्भवति । तथाऽप्युक्तसाधने हतोरसामर्थ्यशङ्कावारणमेव तत्प्रयोजनमिति मन्तव्यम् । तथा हि । घटादावेकस्मिन्नपि भागे क्रमेण दशमूर्तसंयोगानां सम्भवात् अन्यथासिद्धिशङ्कापरिहाराय युगपदिति विशेषणम् । द्वित्रिमूर्तसंयोगानां तावद्भागा-

क्षेपकतायामपि दशभागानाक्षेपकत्वेन विवक्षितासिद्धिप्रसङ्गपरिहाराय दशेति पदम् । एकस्मिन्नपि भागेऽमूर्ताकाशादिसंयोगानां स्थितिसम्भवात् पुनरप्रयोजकत्वमेवेत्याशङ्कानिवारणाय मूर्तेति विशेषणमित्यूह्यम् ।

वा०र०— यद्यपि **सभागत्वेति** मूलानुसारेण पुनः स्वयं आशङ्कामुत्थाप्य विशेषणोपादानस्य दशभागसिद्धिप्रयोजनकत्वं मूलोक्तं समर्थयते **यद्यप्यत्र दशेत्यादि** । **दशभागानामपीति** । न केवलं सभागत्वस्येत्यपिशब्दार्थः । व्यभिचारेत्यतः प्राक् संयोगित्वमात्रस्येति शेषः । **सम्भवादन्यथासिद्धीति** । सम्भवोक्तप्राप्ता याऽन्यथासिद्धिशङ्का तत्परिहारस्येति योजनाभागान् आक्षेपकत्वेनेति । **भागान् आक्षेपकत्वेन** यो विवक्षितसिद्धिप्रसङ्गः तत्परिहारायेति योजना । **आकाशादिसंयोगानामिति** । **आदि**पदेन वर्णानामपि सङ्ग्रहः । तेन स्वपररीत्या आकाश-काल-दिक्-ईश्वराख्यवस्तुचतुष्टयसंयोगप्राप्तावपि दशपदोपादानानुसारेण दशसंयोगास्थिते वाच्यायाः असिद्धिरिति शङ्का निरस्ता ।

विट्ठल०— सर्वदिक्स्थिति विशेषणकृत्यमाह **यद्यपीति** । **युगपद्दशेति** । अत्र संयोगित्वमात्रस्य न साध्यव्यभिचारोऽस्ति । तथापि घटादावेकस्मिन्नेव भागे परिवृत्तिक्रमेण दशमूर्तद्रव्यसंयोगसम्भवेन अन्यथासिद्धिशङ्का स्यादतो युगपदिति विशेषणं द्वित्रिद्रव्यसंयोगस्य दशभागासाधकत्वाद्दशेति । एकस्मिन्नपि विभागे अमूर्ताकाशसंयोगानां स्थितिसम्भवेन पुनरप्रयोजकताशङ्कावारणाय मूर्तेति विशेषणमिति ज्ञेयम् ।

* * *

॥ अथ च तत्र अनुव्याख्यानगतस्य संयोगार्थकसम्बन्धपदस्य द्रव्यत्वेनैव चरितार्थत्वशङ्का, तन्निरसनञ्च ॥

॥ अथ तत्रापि च अनुव्याख्यानगतस्य संयोगार्थकसम्बन्धपदस्य विपक्षे बाधकसूचनार्थत्वम् ॥

७५ सु०— ननु द्रव्यत्वेनैवालं किं संयोगित्वेन । (हेतूच्छित्तिरूप) विपक्षे बाधकसूचनार्थमिति ब्रूमः ।

परि०— ननु संयोगित्वस्य द्रव्यत्वावच्छेदेनैव ज्ञेयतया प्रथमोपस्थितत्वाल्लाघवाद् अव्यभिचाराच्च तदेव हेतुरस्त्विति शङ्कते **ननु द्रव्यत्वेनैवेति** । **किं संयोगित्वेनेति** । तथा च तदनुबन्धित्वाद्युगपद्दशमूर्तेत्यपि व्यर्थमिति भावः ।

यादु०— **ननु द्रव्यत्वेनेति** । अप्राप्तयोर्द्रव्ययोः प्राप्तिः संयोग इति संयोगलक्षणे द्रव्यत्वस्य प्रविष्टत्वेन लाघवादित्याशयः । न च कर्मविरोधी गुणः संयोग इत्यादिसंयोगलक्षणाश्रयणे द्रव्यत्वस्य हेतुशरीरे-

ऽप्रवेशान्नैतच्छङ्कावकाश इति वाच्यम् । तदापि पक्षे संयोगित्वरूपहेतुसाधकतया द्रव्यत्वस्यावश्यं ज्ञातव्यत्वेन तद्धेतोरेवेति न्यायेन तदेव हेतुरस्त्वित्याशयात् ।

श्रीनिधि०— किं संयोगित्वेनेति । यद्यप्यत्र विशिष्टो हेतुः तथापि भागसाधनं संयोगित्वेनैव बहुभागसाधनाय तु विशेषणमिति तावदुपात्तम् । तर्के आपाद्यस्य आपादस्यानिष्टत्वेन भाव्यम् ।

शे०वा०— ननु द्रव्यत्वेनैवालं किं संयोगित्वेनेति । ननु द्रव्यत्वस्य संयोगित्वरूपहेतुशरीराप्रवेशात् कथमत्र तेनैवालमिति शङ्केति चेत् । अत्र वदन्ति । परमाणोः सभागत्वसाधके पदार्थत्वानुमाने गुणादौ व्यभिचारवारणायावश्यं विशेषणीयेन द्रव्यत्वेनैव परमाणोर्दशभागवत्त्वरूपविवक्षितसाध्यस्यापि साधनसम्भवात् संयोगित्वरूपहेत्वन्तराश्रयणमनर्थकमित्यत्र तात्पर्यमिति । तन्न । गुणादावपि सभागत्वसद्भावेन तत्र व्यभिचाराप्रसक्त्योक्तप्रकाराश्रयणायोगात् । अन्ये तु । विमतश्चक्षुष्मान् रूपज्ञत्वादित्यादौ गुणज्ञत्वरूपसामान्यस्य साधकत्वानुपपत्त्या रूपज्ञत्वरूपविशेषस्य साधकतयाऽवश्यं विवक्षणीयत्वेऽपि संयोगित्वस्य संयोगलक्षणगुणविशेषवत्त्वरूपत्वात् तत्र च गुणवत्त्वरूपसामान्यस्यैव विवक्षितसाध्यसाधकत्वोपपत्तौ न हि तद्विशेषस्य संयोगित्वस्य साधकतयोपन्यासो युक्तः । गुणवत्त्वमेव च द्रव्यत्वमिति तेनैवालमिति शङ्कोपपत्तिरित्यभिप्राय इत्याहुः । केचित्तु अप्राप्तयोर्द्रव्ययोः प्राप्तिः संयोग इति संयोगलक्षणानुरोधेन संयोगित्वस्य द्रव्यत्वघटितमूर्तिकत्वेन लाघवात् द्रव्यत्वेनैवालमिति शङ्कोपपत्तिः । न च कर्मविरोधी गुणः संयोग इत्यादिलक्षणाश्रयणेन द्रव्यत्वस्य हेतुशरीरप्रवेशान्नैतच्छङ्कावकाश इति वाच्यम् । तथाऽपि पूर्वमते तच्छङ्काया अप्रत्यूहत्वात् । एतन्मतेऽपि संयोगित्वरूपहेतोः पक्षे साधकतया द्रव्यत्वस्यावश्याश्रयणीयत्वेन तद्धेतोरेवेति न्यायेन द्रव्यत्वमेव हेतुरस्त्विति तदाशयादित्याहुः । वस्तुतस्तु द्रव्यत्वस्य जातित्वेन लघुत्वात् संयोगित्वस्योपाधितया गुरुत्वान्न तस्य प्रयोजकत्वमिति लाघवमनुसृत्यैवेदमुक्तम् । न तु द्रव्यत्वस्य तत्र प्रवेशाभिप्रायेण । अत एव साध्यव्यापकाव्यभिचारित्वमिति लक्षणे साध्याव्यभिचारित्वस्यैव लघुत्वेन लक्षणौचित्यादिरूपा शास्त्रकाराणामुक्तिः सङ्गच्छते । अन्यथा तत्र तस्याप्रवेशेन तदनवकाशादिति द्रष्टव्यम् ।

वा०र०— शास्त्रकाराणामिति । गङ्गेशमिश्राणामित्यर्थः ।

स०व्र०— ननु द्रव्यत्वेनैवालं किं संयोगित्वेनेति । विमतश्चक्षुष्मान् रूपज्ञत्वादित्यादौ गुणज्ञत्वरूपसामान्यस्य साध्यसाधकत्वानुपपत्त्या रूपज्ञत्वरूपविशेषस्य हेतुत्वावश्यम्भावेऽपि प्रदेशे संयोगित्वस्य संयोगलक्षणगुणविशेषवत्त्वरूपत्वात् । तत्र च गुणज्ञत्वरूपसामान्यस्यैव विवक्षितसाध्यसाधकत्वोपपत्तौ न तद्विशेषस्य संयोगित्वस्य साधकत्वोपन्यासो युक्तः, किन्तु गुणित्वमात्रस्यैव तदेव च द्रव्यत्वमिति भावः ।

विट्ठल०— ननु हेत्वन्तर्गतं संयोगित्वसंयोगत्वं संयोगश्चाप्राप्तद्रव्ययोः प्राप्तिः तत्र संयोगलक्षणप्रविष्टं द्रव्यत्वमेव हेतुरस्तु सांशत्वव्यभिचाराभावाल्लाघवात् । किं संयोगित्वेन । अत एव युगपद्दशमूर्तेत्यपि व्यर्थमित्याशयेन शङ्कते **नन्विति** ।

॥ इति अनुव्याख्यानगतस्य संयोगार्थकसम्बन्धपदस्य विपक्षे बाधकसूचनार्थत्वम् ॥

* * *

॥ अथ तत्राप्यादौ तद्बाधकतर्कः तत्रेष्टापत्तिनिराकरणं च ॥

७६ **सु०— तथा हि । अस्ति तावत्परमाणोः परमाण्वन्तरसंयोगः, अन्यथा द्व्यणुकाद्यारम्भानुपपत्तेः । न चैकेनैवेति नियमः; कारणाकारणसंयोगजसंयोगप्रक्रियायामेकैकस्य परमाणोः सजातीयविजातीयपरमाणुद्वयेन युगपत्संयोगस्योररीकृतत्वात्, पाषाणादिमध्यवर्तिनः परमाणोः परितोऽवस्थितैः परमाणुभिः संयोगाभावाद्यनुपपत्तेश्च । न च मूर्तानां युगपदे(दने?)कदेशावस्थानं सम्भवति ।**

परि०— कारणाकारणेति । एवं हि प्रक्रिया । अन्यतरकर्मज उभयकर्मजस्संयोगजश्चेति त्रिविधो हि संयोगः । तत्र पार्थिवपरमाणुः पूर्वं विजातीयाप्यपरमाणुना संयुक्तो भवति । पश्चात्सजातीयपार्थिवपरमाण्वन्तरेण संयुज्यमानः पार्थिवद्व्यणुकमारभते तदैव द्व्यणुकेन तत्कारणपार्थिवपरमाणुना प्राक्संयुक्तः आप्यपरमाणुः संयुज्यते । स च पार्थिवद्व्यणुकाप्यपरमाण्वोः कार्याकार्यसंयोगः पार्थिवपरमाण्वाप्यपरमाण्वोस्संयोगेन जायत इति कारणाकारणसंयोगजः कार्याकार्यसंयोगजः हस्ततरुसंयोगजः कायतरुसंयोगो यथा तथेत्येवंरूपायां प्रक्रियायामित्यर्थः । तावता दशभागवत्त्वं च न स्फुटमित्यत आह **पाषाणादीति** । पाषाणादेः स्थूलावयवितया द्विशो द्विशोऽनेकपरमाण्वारब्धानेकद्व्यणुकचतुरणुकाद्यवयवैरुत्पन्नत्वेन पाषाणादावनेकपरमाणुसत्त्वात् परमाणुभिरित्युक्तम् । ननु पाषाणादौ तदवयवावयवपरम्परया स्थितानां परमाणूनामेकत्रैव सत्त्वमस्तु कुतः परितोऽवस्थानमित्यत आह **न च मूर्तानामिति** ।

गु०दी०— कारणाकारणसंयोगजप्रक्रियायाम् इत्यत्र कारणस्य द्व्यणुककारणस्य पार्थिवपरमाणोरकारणेनाप्यपरमाणुना संयोगे कार्यस्य द्व्यणुकस्याकारणाप्यपरमाणुना संयोग इति न्यायस्य व्याप्तचतुर्विध-

परमाणुमेलने सति न्यायप्राप्तत्वादिति भावः । **पाषाणादिमध्यवर्तिन** इत्यत्र पाषाणादीनां सूक्ष्मतरछिद्र-मध्यस्थस्येत्यर्थः ।

यादु०— वक्ष्यमाणतर्के इष्टापत्तिं परिहर्तुमाह **अस्ति तावदित्यादि** । तथा च न विशेष्याभाव-मादायेष्टापत्तिरिति भावः । **कारणाकारणेति** । यथाऽऽहुर्वैशेषिकः । पार्थिवाप्ययोः परमाण्वोः प्रथममनारम्भके संयोगे जाते पार्थिवपरमाणौ पार्थिवपरमाण्वन्तरेणाऽऽप्ये च परमाणावाप्यपरमाण्वन्तरेण द्व्यणुकद्वयारम्भकं संयोगद्वयमुत्पद्यते । ताभ्यां संयोगाभ्यां सजातीयनिष्ठाभ्यां द्व्यणुकद्वयं युगपदारभ्यते । तत्र यः पार्थिवाप्य-परमाण्वोरनारम्भकः संयोगः पूर्वमुत्पन्नस्तेनैकेनैव पार्थिवपरमाणुनाप्यद्व्यणुकेनैकः संयोगः आप्यपरमाणुना पार्थिवद्व्यणुकेनापरः संयोगो द्व्यणुकयो रूपाद्युत्पत्तिकालमेव जायते । कारणाकारणसंयोगेन कार्याकार्य-संयोगयोरवश्यं जननादिति । अत्र हि विजातीययोः पार्थिवाप्यपरमाण्वोरनारम्भक एकः संयोगस्तयोरेव तदैव सजातीयपरमाण्वन्तरसंयोगो द्व्यणुकद्वयारम्भकोऽपरः स्वीकृत इति स्पष्टमवगम्यत इति द्रष्टव्यम् । नन्वेता-वताऽपि नानैकैर्युगपत्संयोगः प्राप्त इतीष्टापत्तिरेवेत्यत आह **पाषाणादीति** । **संयोगाभावेति** । संयोगाभावे हि पाषाणावस्थानमेव न स्यादिति भावः । परमाणूनां परितोऽवस्थितत्वमेवासिद्धं येन युगपदनेकसंयोगप्राप्तिरित्यत आह **न च मूर्तानामिति** ।

वं०प०— ननु द्व्यणुकाद्यारम्भानुपपत्त्याऽस्तु परमाणोः परमाण्वन्तरसंयोगः । स च एकस्य परमाणोरेकेनैव परमाणुनेत्यस्तु युगपदनेके संयोगाः सन्तीति कुत इत्याशङ्क्य निषेधति **न चैकेनैवेति नियम इति** । **कारणाकारणसंयोगजसंयोगप्रक्रियायामिति** । कदाचिदादौ पार्थिवाप्यपरमाण्वोरकारणीभूतः संयोगो जातः । विजातीयपरमाणुसंयोगस्य द्रव्यानारम्भकत्वात् । अनन्तरं पार्थिवपरमाण्वन्तरसंयोगो जातः । आप्यपरमाणौ चाप्यपरमाण्वन्तरसंयोगः । तत्र पार्थिवपरमाणुद्वयसंयोगेन पार्थिवद्व्यणुकमुत्पन्नं आप्यपरमाणु-द्वयसंयोगेन चाप्यद्व्यणुकमुत्पन्नम् । तथा च द्व्यणुकद्वयजनकत्वात् पार्थिवपरमाणुद्वयसंयोग आप्यपरमाणु-द्वयसंयोगश्च कारणीभूतः संयोग इत्युच्यते । तदनन्तरमाप्यद्व्यणुकेन पार्थिवपरमाणोः संयोगो जातः । पार्थिवद्व्यणुकेन चाप्यपरमाणोः । तथा च अकारणसंयोग आदौ तदनन्तरं कारणीभूतः संयोगस्तज्जन्यं यत्पार्थिवाप्यद्व्यणुकद्वयं तज्जन्यो यः संयोग आप्यपार्थिवपरमाण्वोर्भवतीति तत्प्रक्रियायामित्यर्थः । तथा चैकस्मिन्पार्थिवपरमाणौ विजातीयाप्यपरमाणुसंयोग एकः । सजातीयपार्थिवपरमाण्वन्तरसंयोगोऽपरः, आप्य-द्व्यणुकसंयोगोऽन्य इत्येवं संयोगत्रयम् । तथैकस्मिन्नाप्यपरमाणौ विजातीयपार्थिवपरमाणुसंयोग एकः । सजातीयाप्यपरमाण्वन्तरसंयोगोऽन्यः । पार्थिवद्व्यणुकसंयोगोऽपर इत्येवं संयोगत्रयं प्राप्तम् । तथा च संयोगस्य प्रदेशवृत्तित्वादेकैकत्रांशत्रयसिद्धिरिति भावः ।

श्रीनिधि०— अनिष्टं च द्विविधं प्रामाणिकपरित्यागो अप्रामाणिकस्वीकारश्चेति । तत्राद्यस्य प्रामाणिकपरित्यागरूपत्वं वक्तुं आपाद्यविपर्ययस्य प्रामाणिकत्वं दर्शयति **अस्ति तावदित्यादिना** ।

कारणाकारणसंयोगजसंयोगप्रक्रियायामिति । पार्थिवद्व्यणुकस्याप्यपरमाणूनां संयोगे कारणस्य द्व्यणुकारम्भकपरमाणोरकारणस्याप्यपरमाणोश्च संयोगेन कार्यस्य द्व्यणुकाणुसंयोगश्च परमाणुनिष्ठ इति नोक्तनियमाभाव इत्यर्थः । नन्वस्तु अनेकैः संयोगः । तथाऽपि परमाणोर्दशदिक्षु स्थितैर्द्रव्यैः संयोगेनैव किन्तु एकेन द्वाभ्यां वेत्यत आह **पाषाणादिमध्यवर्तिनः परमाणोरिति** । अनेकैर्दशभिश्च संयोगेऽपि एकप्रदेशावच्छेदेनैव संयोगः । तथा च न दशभागसिद्धिरित्यत आह **न च मूर्तानामिति** ।

शे०वा०— कोऽसौ विपक्षे बाधकस्तर्को यत्सूचकत्वेन संयोगित्वस्य सार्थकत्वमुच्यत इत्यतस्तं प्रतिपादयितुं प्रतिजानीते **तथा हीति** । वक्ष्यमाणतर्कस्येष्टापत्तिमुपोद्बातेन तावत्परिहरति **अस्ति तावदिति** । **अन्यथेति** । परमाणोः परमाण्वन्तरसंयोगस्यासत्त्व इत्यर्थः । असमवायिकारणविरहादिति भावः । अस्ति परमाणोः परमाण्वन्तरसंयोगः किन्त्वेकेनैव । तथा च युज्यते द्व्यणुकारम्भः । तथा चानेकैः संयोगस्यासिद्धेर्न वक्ष्यमाणतर्कस्यानिष्टापादनत्वसिद्धिरित्याशङ्क्य निषेधति **न चेति** । **कारणाकारणसंयोगजप्रक्रियायामिति** । पार्थिवाप्ययोः परमाण्वोः प्रथममनारम्भकसंयोगे जाते पार्थिवे परमाणौ पार्थिवपरमाण्वन्तरेण आप्ये च परमाणावाप्येन परमाण्वन्तरेण द्व्यणुकद्वयारम्भकसंयोगद्वयमुत्पद्यते । ताभ्यां च संयोगाभ्यां सजातीयनिष्ठाभ्यां द्व्यणुकद्वयं युगपदारभ्यते । तत्र यः पार्थिवाप्यपरमाण्वोरनारम्भकः संयोग उत्पन्नस्तेनैकेनैव पार्थिवपरमाणुनाऽऽप्यद्व्यणुकेनैकः संयोगः । आप्यपरमाणुना पार्थिवद्व्यणुकेन चापरः संयोगो द्व्यणुकयोः कारणगुणप्रक्रमेण रूपाद्युत्पत्तिकालमेव जायते । कारणाकारणसंयोगे कार्याकार्यसंयोगयोरवश्यं जननादित्यादिकारणाकारणसंयोगजप्रक्रियायामेकैकस्यैव परमाणोः सजातीयविजातीयपरमाणुद्व्येन युगपत्संयोगस्य वैशेषिकसूत्रवृत्तिकारप्रशस्तभाष्यकारादिभिरुररीकृतत्वादित्यर्थः । अत्र च विजातीययोः पार्थिवाप्यपरमाण्वोरनारम्भक एकः संयोगः तयोरेव च तदैव सजातीयपरमाण्वन्तरसंयोगो द्व्यणुकद्वयारम्भकोऽपरः स्वीकृत इति स्पष्टमवगम्यत इति भवत्यनेन विवक्षितसिद्धिरिति ज्ञेयम् । ननु एतावताऽप्येकस्य परमाणोर्बहुभिर्युगपत्संयोगस्याप्राप्तेरिष्टापत्तितादवस्थ्यमित्यत आह **पाषाणादीति** । **संयोगाभावेति** । संयोगाभावे पाषाणावस्थानमेव न स्यादिति भावः । ननु परमाणूनां परितोऽवस्थितिः एव कुतो येन युगपदनेकदेशसंयोगप्राप्तिरित्यत आह **न च मूर्तानामिति** । अत्र युगपदिति विशेषणात् कालभेदेनैकभूतलवर्तिनोर्घटपटयोः स्वारब्धपटनाशानन्तरं तेषामेव तन्तूनां पटान्तरारम्भकत्वादेकस्मिन्नेव तन्तौ वर्तमानयोश्च पटयोर्नैकदेशताविरोध इति सूचयति । नन्वेकतन्तुकपटस्य तन्तुवृत्तित्वात् तत्र च तन्तुद्व्यसंयोगस्य समवायिकारणस्याभावात् तन्त्ववयवावयवस्य तन्तुसंयोग एव तत्रावश्यं तथा वाच्यः । तथा च असमवायिकारणावच्छिन्ने कार्यनियमादसमवायिकारणस्य च तन्त्ववयवावयवे तन्तौ च वृत्तेः । तन्त्ववयवावयवे तन्तोः पटस्य च वृत्त्यवश्यम्भावात् कथं मूर्तयोरपि समानदेशताविरोध इति चेत् । अत्राहुः । एकतन्तुकपटे मानाभावादिति । वस्तुतो भावेऽप्यसमवायिकारणतन्त्वावयवावयवतन्तुसंयोगः, पटश्च तन्तावेव स्तः । न च कार्यस्यासमवायिकारणान्यूनानतिरिक्तदेशतानियमः । गौरवात् । किन्त्वसमवायिकारणसमानदेशत्वमात्रनियम इति न मूर्तयोः समानदेशत्वप्राप्तिरिति

द्रष्टव्यम् । अङ्गीकृत्य चेदमुक्तं न वस्तुतः । घटतदवयवयोरेकत्र भूतले वृत्तित्वदर्शनेन तदसामानाधिकरण्यनियमासिद्धेः । अवयवावयविभागानापन्नयोस्तथाभावो नास्तीति चेन्न । आलोकमण्डलव्याप्त एव देशे वायुसञ्चारदर्शनेन तस्याप्यसिद्धेः । निबिडावयवत्वे सतीति विशेषणाददोष इति चेन्न । तस्यापेक्षिकस्य सर्वत्र सम्भवात् । आत्यन्तिकस्य च वज्रादन्यत्रासम्भवात् । पटमहारजनयोरेकस्मिन्नेव भूतले सद्भावदर्शनाच्च । समवायवृत्त्या तथाभावस्तत्रापि नास्तीति चेन्न । अत्रापि समवायवृत्त्या परमाणूनां परमाणौ वृत्त्यसम्मत्या प्रकृताविरोधप्रसङ्गादिति दिक् ।

वा०र०— यद्यपि साध्यं यावदव्यभिचरितं तदव्यभिचारित्वं अनौपाधिकत्वं इत्यनूद्य साध्याव्यभिचारित्वस्यैव गमकत्वसम्भवात् इत्येव मणावुक्तम् । तथापि साध्याव्यभिचारित्वस्यैवेति वाक्यं व्याकुर्वता रुचिदत्तेन यद्यपि उक्तलक्षणे साध्याव्यभिचारित्वं न प्रविष्टम् । तथापि साध्याव्यापकाव्यभिचारित्वापेक्षायाऽस्यैव लघुत्वात् गमकत्वमित्युक्तं तया तदुक्तमयं सकलसाध्यव्यापकाव्यभिचारित्वं इति लघुत्वेन लक्षणत्वौचित्यात् इति चोक्तम् । अत एव धर्मराजोऽपि उक्तवान् । तथा च नेतरभेदसाधने व्यर्थविशेषणत्वं प्रकृतेऽभिहितम् । किन्तु एतत् ज्ञानं नानुपपत्तिः इति । लाघवपुरस्कारादित्यर्थ इतीति ज्ञेयम् । कारणाकारणसंयोगजे प्रक्रियायामिति पाठे संयोगजसंयोगप्रक्रियायामित्यर्थः । संयोगजसंयोगप्रक्रियायां इत्येव मूले पाठानुसारेण प्रतीकोपादानटीकापाठस्तु मूलकोशानुसारी स्वरस एव । यदा पार्थिवाप्ययो इकोरित्यादिना संयोगप्रकरणे कारणाकारणजप्रक्रिया प्रशस्तदेवाचार्योक्ता किञ्चित् विवरणेन यथा पार्थिवाप्ययोः परमाण्वोरित्यदिना वैशेषिकसूत्रवृत्तौ अभिहिता । तामेतां प्रक्रियां अनुवदति **पार्थिवाप्ययोः परमाण्वोरित्यादिना** । विजातीयत्वेनानारम्भकत्वं अभिप्रेत्य पार्थिवाप्ययोरित्युक्तम् । एवं पार्थिवस्य पार्थिवेत्यादिना सजातीयतया आरम्भकत्वमभिप्रेति **संयोगद्वयमिति** । युगपदिति शेषः । युगपत्संयोगो भवतः इति वाक्यानुसारात् । उक्तं च किरणावल्यादौ । युगपत्संयोगद्वयोत्पत्तिप्रदर्शनाय द्व्यणुकयोर्युगपदुत्पत्तिं दर्शयितुं संयोगयौगपद्यं युगपदित्यनेनोक्तं युगपत्संयोगस्येति वक्ष्यति चेति । पार्थिवपरमाणुनेत्यादौ द्व्यणुकेनेत्यादि प्रवर्तनात् इत्यादि द्व्यणुकपदोत्तरतृतीयाद्वयं षष्ठ्यर्थतया व्याख्येयम् । पार्थिवं द्व्यणुकं कारणसंयोगं नाणुना इत्यादि प्रशस्तपादभाष्यानुसारादिति ज्ञेयम् । वक्ष्यति च **द्व्यणुकयोरिति** । संयोगद्वयकाले प्रतियोगिन्यपि संयोगोत्पत्तिरिति सूचनायोभयत्रापि तृतीयाया एव प्रयोग इति ज्ञेयम् । **द्व्यणुकयोरिति** । पार्थिवाप्यपरमाणुगतानारम्भकसंयोगेन पार्थिवपरमाणुनाप्यद्व्यणुके संयोग एकः तथा तेनैवानारम्भकसंयोगेनापि आप्यपरमाणुना पार्थिवद्व्यणुके चापरः संयोगः इत्यादौ द्वावपि संयोगौ यदाकारणप्रक्रमेण रूपादिकं द्व्यणुकद्रव्ये उत्पन्नम् । तत्समकाल एव जायत इत्यर्थः । संयोगद्वयोत्पत्तौ नियामकमाह **कारणाकारणेति** । कस्यचित्कार्यस्य यत्कारणं तस्य तत्कार्याकारणेन यः संयोगः सः कारणाकारणसंयोग इत्युच्यते । कस्यचित्कारणस्य यत्कार्यं तस्य तत्कारणाकार्येण यः संयोगः सः कार्यसंयोगः इत्युच्यते । उक्तविधकारणाकारणसंयोगेन उक्तविधकार्याकार्यसंयोगस्य जननावश्यम्भावादित्यर्थः । कारणाकारणसंयोगादेः द्वित्वाभिप्रायेण जन्यसंयोगेष्वपि संयोगयोरिति द्विवचनम् ।

इदमुक्तं भवति । पार्थिवद्व्यणुकस्य पार्थिवपरमाणुः कारणमप्यस्तु अकारणं तयोः परमाण्वोः संयोगात् । पार्थिवपरमाणोः कार्यं पार्थिवद्व्यणुकमपि आप्य परमाणुः तत्कार्यं तयोः संयोगः अवश्यं जायते । तथा आप्यद्व्यणुकस्य कारणं आप्यपरमाणु अकारणं पार्थिवं परमाणुः तयोः संयोगात् आप्यपरमाणोः कार्यमपि आप्यद्व्यणुकं अकार्यः पार्थिवपरमाणुः तयोः संयोगो जायते इति अवश्यं वाच्यम् । तथा च प्रयोगः । पार्थिवं द्व्यणुकं आप्यपरमाणुना संयुज्यते तदकार्यत्वे सति तत्संयोगीकार्यत्वात् । यत् यत् अकार्यत्वे सति यत्संयोगिकार्यं तत् तेन संयुज्यते । यथा तुर्यकार्यकार्यत्वे सति तुरिसंयुक्ततन्तुकार्यः तुर्या संयुक्तः । एकमाप्यद्व्यणुकमपि पक्षीकृत्य प्रयोक्तव्यमिति । अधिकं किरणावल्यां वर्धमानादौ च ज्ञेयम् ।

एतेन कारणाकारणशब्दयोः पार्थिवाप्यद्व्यणुककारणाकारणभूतपार्थिवाप्यपरमाणुपरतावत् कार्याकार्यशब्दयोरपि पार्थिवाप्यपरमाणुकार्यभूतपार्थिवाप्यद्व्यणुकपरताप्रतीतेः । तदुभयसंयोगजननप्रतिपादनमात्रेति भ्रान्तिरपहस्तिता इति ज्ञातव्या । अत एव इतरेतरगतकारणाकारणगतात् संयोगात् इतरेतरकार्याकार्यगतौ युगपत् उत्पद्यते । इत्येतत् प्रशस्तपादभाष्यव्याख्यानकिरणवल्यां कार्यपदं परमाणुपरतया योजितमिति बोध्यम् । **परमाणुद्व्येन युगपदिति** । परमाणुद्व्येन युगपत्संयोगद्व्यस्येव कार्यसंयोगस्यापि तृतीयस्य परैरङ्गीकारलाभेऽपि परमाणुद्व्येन युगपत्संयोगस्य इति मूलानुसारेण संयोगद्व्यसिद्धेरेव फलत्वेन उपसंहारः । मूलानुसारादेव प्रकृतोपयोगकथनेऽपि संयोगद्व्यमेवोक्तमिति ज्ञेयम् । **बहुभिर्युगपत्संयोगस्येति** । यद्यपि कारणाकारणसंयोगजप्रक्रियानुसारेण एकैकस्य पार्थिवादिपरमाणोः सजातीयपरमाणुभ्यां संयोगद्व्यस्येव कार्यसंयोगस्यापि तृतीयप्राप्त्या बहुभिरपि संयोगः द्वाभ्यां संयोगसिद्धिप्रकारेणैव सिद्धिरिति तदप्राप्तिरयुक्तेत्याभाति तथापि मूलकृता सजातीयविजातीयेत्यादिना संयोगद्व्यस्यैव सिद्धिविवक्षया बहुभिः संयोगाप्राप्तिवचनमिति न दोषः । वस्तुतोऽत्र परमाणुसंयोगद्वित्वसिद्ध्यर्थं कारणाकारणसंयोगजसंयोगप्रक्रियोपन्यासेन तत्प्रक्रियायां द्व्यणुकरूपकार्यसंयोगस्याधिकस्य लाभेऽपि परमाणुनिष्ठतन्निरूपितसंयोगद्व्यस्य एव लाभः । न तु परमाणुत्रयादि संयोगलाभः । तथा च परमाणोः बहुभिः संयोगरूपविवक्षितप्राप्त्यभावपरमेवेदम् । अत एवोत्तरमूले परितोवस्थितपरमाणुभिरेव संयोगोऽभिधानम् । एवं पूर्वत्रापि संयोगद्व्यस्यैवाभिधानं परमाणुनिष्ठपरमाणुसंयोगविवक्षया इवेति ज्ञेयम् । बहुशब्दस्य चतुःपञ्चादि विषयत्वात् न दोषः इत्यप्याहुः । **परितोऽवस्थितिरेवेति** । किन्तु तत्परमाणूनां एकत्र एकदेवावस्थितिरेव किं न स्यात् इति एवकारार्थः । एतेन परमाणूनां परितोऽवस्थितत्वविशिष्टस्याक्षेपलाभेन परमाणुसत्त्वमात्रपक्षस्य **पाषाणादीति** पूर्वेण विरोधः, न मूर्तानामित्युत्तरेण परिहाराभावश्चेति शङ्का अपहस्तिता भवतीति ज्ञातव्यम् । संयोगविवक्षया व्यावर्त्यमाह **एकभूतलेति** । समवायविवक्षया स्वारब्धपटेत्येतत् मन्दारमञ्जर्यनुसारेण व्यावृत्त्यमाह **स्वारब्धेति** । अत्र स्वारब्धेत्याद्युक्त्यैव कालभेदलाभात् तल्लाभाय कालभेदेनेति नोक्तम् । स्वारब्धघटनाशानन्तरं तस्मिन्नेव कपाले इत्यादेरुपलक्षणमेतत् ।

एकदेशेति पूरयता पृथिवीपदार्थीयमूर्तानां समानदेशताविरोधात् इत्येतत् किरणावलिवर्धमानीयरुचिदत्तेनैव एतद्व्यावर्त्यकथनात् । अन्धकारवादीयमूर्तानां समानदेशताविरोधात् इत्येतत् वर्धमानव्याख्यान-

रूपपुरुषोत्तम्यनुसारेणाह **ननु एकतन्तुकेत्यादिना द्रष्टव्यं इत्यन्तेन** । **अभावादिति** । उपलक्षणमेतत् । एकस्यैव तन्तोः समवायिकारणभूतस्वसंयोगायोगं इत्यपि ज्ञेयम् । अत एव एकस्यैव संयोगाभावेनेति सूत्रवृत्तावुक्तम् । यौ च तन्तुसंयुक्तौ तयोः संयोगस्य एतत्पटारम्भकसमवायिकारणत्वाभावादित्यपि च ज्ञेयम् । उक्तं च पुरुषोत्तम्यां 'तन्त्वोश्च समवायिकारणसंयोगाभावादि'ति ।

तन्त्ववयवावयवस्येति । यद्यपि तन्त्ववयवादिषु अंशिशब्देन तन्त्ववयवविवक्षयैवांशसमवेततयेति रुचिदत्तस्य एकतन्तुकपटे अंशिसंयोगानामेवेति आत्मतत्त्वविवेकव्याख्यातुश्चोक्तेः । प्रकृते तु तन्त्ववयवतन्त्वोः संयोगस्यैवासमवायिकारणताप्रतीतेः तन्त्ववयवावयवत्वतन्तुसमवायिकारणता न परग्रन्थात् लभ्यते इत्याभाति । तथापि अंशु अवयवतन्तुसंयोगो वाच्यः इति पुरुषोत्तमीयोक्तेः । तदीयांशुपदोपेतवाक्येऽपि अंशुपदस्य तदवयवपरतायाः आवश्यकत्वात् तदनुसारेण तन्त्वावयवावयवत्वेत्यस्य लाभोपपत्तिः । एवमुत्तरत्रापि स्थलत्रये तन्त्वावयवावयवेत्युक्तिर्योज्या । न चांशुसमवेततयेत्यादि विरोधः । तत्रापि अंशुपदस्य तदवयवपरत्वस्यैव वाच्यत्वात् । अन्यथांशुशब्दाभिहितत्वावयवस्य तन्तोश्चायुतसिद्धतया संयोगानुपपत्तेः तन्त्वावयवावयवैरेव तन्त्वावयवमारभ्य तन्तोरपि आरम्भकान्तरतन्त्वावयवत्वेनाभिमतांशोः तन्तुसमवायिकारणत्वाभावात् न संयोगायोग इति चेत् न । आरभ्यारम्भकवादस्यानभ्युपगमेन त्र्यणुकादेः परमाण्वादिपर्यन्ताभावस्य पृथिवीपदार्थीयकिरणावल्यादौ प्रतिपादनात् इत्याशयेनैवमुक्तमिति ज्ञेयम् । **असमवायिकारणावच्छिन्न इति** । यत्र यत्रासमवायिकारणं तत्र तत्र कार्यमिति नियमात् इत्यर्थः । कार्यैकार्थप्रत्यासन्नस्यैव संयोगस्य द्रव्यासमवायिकारणत्वादिति भावः । **तन्तौ च वृत्तेरिति** । वस्तुस्थितिप्रदर्शनं च इदमिति न व्यर्थम् । **तन्तोः पटस्य चेति** । यद्यपि तन्त्ववयवावयवे तन्तुर्न समवेतः किन्तु तन्त्ववयवे एवेति । न तन्तुपटयोः एकत्र सत्ता प्राप्नोति । तथापि तन्तोरपि समवेतसमवायसम्बन्धेनावयवावयववृत्तिता अस्त्येव । समवायेन वृत्तिता तु नाद्यापि विवक्षितेति भावेन तन्तुपटयोः समानदेशता आनीतेति बोध्यम् । **मानाभावादिति** । तत्र वेमाद्यभिघातेन महावयविनष्टस्य तन्तोः नाशे सति खण्डतन्तूत्पत्तौ तेषामेवान्योन्यसंयोगेन पटोत्पत्ति एकतन्तुपटस्याभाव एव । अन्यथा पटसंस्थानसारूप्येण रूप्यमानपटप्रत्ययस्य भ्रान्तित्वप्रसङ्गात् । अन्त्यावयवतन्तुसंयोगरूपासमवायिकारणाश्रयत्वरूपेणैव तन्तोः समवायिकारणत्वप्रसक्त्या तन्तुत्वेन तदभावापाताच्च । तन्तौ वेमाद्यभिघातेऽपि एकत्वप्रतीतिस्तु आभिमानिकीति न दोषः इत्यादिकं आत्मतत्त्वविवेकव्याख्यानसूत्रवृत्त्युक्तरीत्या मानाभावोपपादनं ज्ञेयम् । ततश्च एकतन्तुकपटोपपत्त्यर्थं न तन्त्ववयवावयवतन्तुसंयोगस्यानङ्गीकार्यत्वमिति न तन्त्वावयवावयवे तन्तुपटयोः सत्त्वप्रसङ्ग इति भावः । उपलक्षणं चेदम् । तन्त्वावयवावयवतन्त्वोः संयोगस्यासमवायिकारणत्वेऽपि न तन्तुपटयोः एकदेशता । तन्तोरपि स्वावयववृत्तित्वेऽपि तदवयवे अभावात् । न च समवेतसमवायेन तत्र वृत्तिरस्तीति वाच्यम् । तथा विवक्षणेन सामानाधिकरण्योपपादने एकतन्तुकपटपर्यन्तं धावनानर्थक्यापातात् द्वितन्तुकादिपक्षेऽपि पटस्य स्वावयवावयवे समवेतसमवायेन वृत्त्या स्वावयवेन सह एकत्रावस्थानस्यानेतुं शक्यत्वात् । न च तन्तुपदस्योपलक्षणया

तन्त्ववयवपरतया तन्त्ववयवस्य पटस्य च तन्त्ववयवावयवे वृत्तिः प्राप्नोतीति भाव इति वाच्यम् । एतत्कल्पनायाः एकतन्तुकपटसिद्ध्युत्तरकालीनतयाऽन्योन्याश्रयापातात् इत्यपि द्रष्टव्यम् ।

ननु अस्ति तावत् अंशुतन्तुसंयोगस्य एकतन्तुकपटासमवायिकारणत्वम् । न चांशुतन्त्वोरयुतसिद्धतया संयोगायोगः इत्युक्तमिति वाच्यम् । यथाऽवयवस्यावयविना संयोगो नास्तीति वदतोऽपि हस्तरूपावयवस्य शिरोरूपावयवान्तरावच्छेदेन शरीररूपावयवसंयोगोऽङ्गीक्रियते । शिरसि शरीरसंयुक्तः पाणिरिति प्रत्ययात् । एवं अवयवावयविनोः अंशितन्त्वोरपि संयोगोऽप्यङ्गीकर्तुं उचितः । अंश्वन्तरावच्छेदेनांश्वन्तरस्य तन्तुसंयोगस्य स्वाभाविकसमवायाविरोधित्वात् । अन्यथा शिरोऽवच्छेदेन हस्तसंयोगोऽपि हस्तशरीरसमवायविरोधि स्यात् । एवं सिद्धे एकतन्तुके पटे प्राप्तमेव तन्तुपटयोः सामानाधिकरण्यम् । यदैवं साक्षात् अवयवावयविनोरपि समवायाविरोधि संयोगः तदा का कथन्ता तदवयवानामपि अवयविना संयोगाश्रयणे अवच्छेदकान्तरावच्छेदेन संयोगस्य साक्षात्परम्परासाधारणसमवायाविरोधात् । अन्यथा हस्तेऽपि शरीरसंयोगप्रतीतिः बाधिता स्यात् । तदेवं एकतन्तुपटसिद्धौ दूषणान्तराणि कथञ्चित् परिहरणीयानि इति प्राप्तमेवासमवायिकारणावच्छेदेन कार्य-सत्त्वनिबन्धनं तन्तुपटयोः समानदेशत्वम् । तत्कथं परिहारः इत्यपरितोषादाह **वस्तुतो भावेऽपीति** । अस्तु नाम तन्त्ववयवावयवतन्तुसंयोगोऽसमवायिकारणम् । न च तावता पटस्य तन्त्वावयवावयवे वृत्तिर्वक्तव्यतया प्राप्नोति । कार्यस्यासमवायिकारणसमानदेशतानियमेऽपि असमवायिकारणवति या वृत्तिकार्यस्य सत्तानियमाभावेन उक्तरूपतन्तुसंयोगवृत्तितन्तौ पटस्य सत्त्वेऽपि तादृशसंयोगवति तन्त्ववयवावयवे पटसत्तायाः अनापत्त्या न मूर्तानां सामानाधिकरण्यप्रसङ्गः इत्यर्थः । एवं तन्त्वनयवावयवेति पाठानुसारेण ग्रन्थो योजितः । यदि च तन्त्ववयवस्येत्यादिरूपेण एकमेवावयवपदं तदा तन्तुतदवयवसंयोग एवासमवायिकारणतया प्राप्नोतीति ग्रन्था-नानुगुण्यशङ्कानिरासार्थत्वप्रयासप्रसक्तिः । अवयवावयविनोः संयोगमङ्गीकृत्यैव योज्या शङ्का । भानाभावेन तद्दूषणं तु उपलक्षणया अयुतसिद्धयोज्य इति सकलमकलङ्कम् ।

एवं संशोधितवाक्यतात्पर्यार्थं मनीषिणः ।
विदांकुर्वन्त्वादरेण तदा मे सार्थकः श्रमः ॥

कार्यस्येति । कार्यद्रव्यस्येत्यर्थः । **मूर्तयोरिति** । पुरुषोत्तमीये उक्तशङ्कातः प्रागेव कठिणयोः इत्यादि विवक्षणात् तदुक्तावपीह टीकायाम् । तथा प्रागविवक्षणाकठिणयोरित्यस्यानुक्तिरिति ज्ञेयम् । ननु एकत्र घटो आलोकेन्द्रियादिसंयोगदर्शनादिवर्धमानाद्यनुसारेणाह **अङ्गीकृत्य चेदमिति** । मन्दारमञ्जर्यनुसारेणाह **निबिडा-वयवत्वे सतीत्यादिना** । **वृत्त्यसम्मत्त्येति** । समवायस्यैव मयाऽनङ्गीकारादिति भावः । किञ्च चरमादि-तन्त्वप्रकर्षणे सति महावयविनाशेऽपि द्वितन्तुकादिनानापटोपलम्भेन एकस्यैव चरमादितन्तोः द्वितन्तुकादि-नानापटसमवायिता अस्तीति मूर्तानां समानदेशत्वाभावनियमो नास्त्येव । यदत्रोक्तं किरणावल्याम् । प्रतिबन्धकावगमे अवस्थितसंयोगेभ्यः खण्डपटोत्पत्तेरिति । तदसत् । महापटोत्पत्त्यनन्तरं तस्य खण्डपटोत्पत्तौ प्रतिबन्धकत्वकल्पनेत्युत्पत्तेः प्रागपि खण्डपटोत्पत्तिप्रसङ्गः । यदत्रोक्तं वर्धमाने । दृढतरवेमाभिघातात् महापटे

नष्टे खण्डः उत्पद्यत इति । तदपि निरस्तम् । महापटस्य प्रतिबन्धकत्वे तदुत्पत्तेः प्रागपि खण्डपटोत्पत्तेरनिवारणात् । न च प्राक् तन्तुषु खण्डाभावात् न खण्डपटोत्पत्तिप्रसङ्ग इति वाच्यम् । तथा सति अखण्डतन्तुभ्यो खण्डपट इति कारणवैचित्र्येणैव उपपत्तौ प्रतिबन्धकत्वोक्तेः असामञ्जस्यात् । एतेन महापटध्वंसस्य कारणस्याभावात् प्रागपि खण्डपटाभावः इत्यपि निरस्तम् । महापटस्य प्राक् विद्यमानखण्डपटोपलब्धिप्रतिबन्धकत्वकल्पनाया एव लाघवेन कर्तव्यत्वापातात् । वस्तुतस्तु समवाय एव मन्मते नास्तीति समवायवृत्त्येति विशेषणायोगाच्च इत्याद्याशयेनाह **दिगिति** ।

स०व्र०— परमाणोः सभागवत्वसाधके पदार्थत्वानुमाने गुणादौ व्यभिचारवारणायावश्यं विशेषणीयस्य द्रव्यत्वस्यैव परमाणोर्देशभागवत्वसाधकत्वसम्भवेन संयोगित्वरूपहेत्वन्तरकथनं व्यर्थमित्यभिप्राय इत्यप्याहुः । **कारणाकारणसंयोगजप्रक्रियायामिति** । पार्थिवद्व्यणुककारणं पार्थिवपरमाणुरकारणमाप्यपरमाणुराप्यद्व्यणुककारणमाप्यः परमाणुरकारणं पार्थिवपरमाणुः तत्समवेतसंयोगात् पार्थिवपरमाणुकार्यं पार्थिवद्व्यणुकमकार्यमाप्यः परमाणुराप्यपरमाणोः कार्यमाप्यद्व्यणुकं अकार्यं पार्थिवपरमाणुः तत्समवेतौ संयोगौ पार्थिवपरमाण्वाप्यद्व्यणुकगत एकः आप्यपरमाणुपार्थिवद्व्यणुकगतोऽपर इति संयोगद्वयं युगपद्युत्पद्यत इत्यर्थः । पार्थिवद्व्यणुकमाप्येन परमाणुनाऽऽप्यद्व्यणुकं पार्थिवपरमाणुना संयुज्यते तदकार्यत्वे सति संयोगिकार्यत्वात् यद्यदकार्यत्वे सति यत्संयोगिकार्यं तत्तेन संयुज्यते यथा तुरीसंयुक्तः पटः तुर्येत्यनुमानादिति भावः ।

विष्ठल०— बाधकतर्के दृष्टापादनरूपां परिहर्तुमाह **अस्ति तावदिति** । **कारणाकारणेति** । एवं हि तार्किकानां प्रक्रिया ईशेच्छादृष्टादिचोदितस्य पार्थिवपरमाणोर्विजातीयाप्यपरमाणुना प्रथममनारम्भकः संयोगो जायते पश्चात्पार्थिवपरमाण्वन्तरेण सजातीयतद्व्यणुकारम्भकसंयोग उत्पद्यते । तदेव प्राक्पार्थिवपरमाणुसंयुक्त आप्यपरमाणुराप्यपरमाण्वन्तरेण संयुज्यन्ते । एवं सजातीयनिष्ठाभ्यां ताभ्यां संयोगाभ्यां पार्थिवद्व्यणुकमाप्यद्व्यणुकमिति द्व्यणुकद्वयं युगपदारभ्यते तत्र पार्थिवे द्व्यणुकावयवभूतस्यात एव द्व्यणुकं प्रति कारणस्यैकस्य परमाणोस्तदनवयवेनाप्यकारणे आप्यपरमाणुना संयोगे सति तेन संयोगेन कार्यस्य पार्थिवद्व्यणुकस्याप्यपरमाणुना संयोगो जायते । एवं कारणकारणसंयोगसंयोगः यथा कार्यावयवभूतकार्यकारणहस्तस्य तदकारणतरुसंयोगे तेनैव संयोगेन कायतरुसंयोगोत्पत्तिस्तथेति कारणाकारणसंयोगजसंयोगप्रक्रिया । सति चैवं पार्थिवाप्यद्व्यणुकपरमाणूनां मध्ये एकैकस्य परमाणोः स्वस्वसजातीयपरमाणूनां विजातीयपरमाणुद्वयेन विजातीयद्व्यणुकेन च युगपत्संयोगस्याङ्गीकृतत्वात् परमाणोः परमाण्वन्तरसंयोगेनैव संयोग इति नियम इति भावः । दशभागत्वस्फुटीकरणाय उदाहरति **पाषाणादीति** । ननु पाषाणादौ परमाणूनां एकदेशावस्थानात् परितावस्थितत्वे परमाणूनां नास्तीत्यत आह **न च मूर्तानामिति** ।

॥ इति तद्बाधकतर्कः तत्रेष्टापत्तिनिराकरणं च ॥

* * *

॥ अथ च ततस्तत्र तत्तर्कस्य अप्रयोजकत्वनिराकरणं च ॥

७७ सु०— प्रदेशवर्तिनश्च संयोगाः, साक्षिसिद्धत्वात्, घटादौ तद्दर्शनेन च परमाणौ-(णावप्य) तदनुमानाच्च; तथा च, 'यदि परमाणुरनेकांशो न स्यात्, तदा युगपदनेकैर्न संयुज्येते'ति ।

परि०— तावता संयोगित्वे भागाः कुत इत्यत आह **प्रदेशवर्तिनश्चेति** । साक्षिणि विप्रतिपन्नं प्रत्याह **घटादाविति** । परमाणुगतसंयोगाः तत्प्रदेशवर्तिनः संयोगत्वाद्घटनिष्ठसंयोग-वदित्यनुमानाच्चेत्यर्थः । **न संयुज्येतेतीत्यत्र** इतिशब्दस्य इति हेतूच्छित्तिरूपविपक्षे बाधक-सूचनार्थमिति पूर्वेणान्वयः ।

यादु०— एवं तर्के इष्टापत्तिशङ्कामपाकृत्याप्रयोजकत्वशङ्कामप्यपाकरोति **प्रदेशवर्तिन इति** । तथा चैकस्य परमाणोरनेकैः संयोगो नानेकान् तदंशान्विनोपपद्यतेऽतो नाप्रयोजकतेति भावः । युगपदनेकैरित्यत्र मूर्तैरिति शेषः ।

वं०प०— विपक्षे बाधकसूचनार्थमित्युक्तं विपक्षे बाधकतर्कमाह **तथा चेति** ।

श्रीनिधि०— मूर्तानां युगपदनेकदेशावस्थानसम्भवेऽपि संयोगस्य अव्याप्यवृत्तित्वेन विवक्षित-भागासिद्धिरित्यत आह **प्रदेशवर्तिनश्चेति** । अनुभवे विवदमानं प्रत्याह **घटादौ तद्दर्शनेनेति** । एवमापाद्य-स्यानिष्टत्वं अन्यथासिद्धिशङ्कापरिहारं च व्युत्पाद्य इदानीं तर्कमाह **तथा चेति** ।

शे०वा०— एवं तर्कस्येष्टापादनतामपाकृत्य अप्रयोजकतामप्यपाकरोति **प्रदेशवर्तिन इति** । ततश्चैकस्य परमाणोर्बहुभिः संयोगस्य बह्वंशत्वं विनाऽनुपपत्तेर्नाप्रयोजकतेति भावः । भवेदेतद्यदि संयोगस्य प्रदेशवृत्तित्वमेव सिद्धं स्यात् तदेव तु कुतः सिद्धमित्यत आह **साक्षीति** । साक्षिणि विप्रतिपन्नं प्रत्यनुमान-मप्याह **घटादाविति** । अनेन परमाणुसंयोगस्तदवयववृत्तिर्भवितुमर्हति परमाणुसंयोगत्वात् । यो यत्संयोगः स तदवयववृत्तिरिति सामान्यव्याप्तिमूलकं विमतः संयोगः प्रदेशवृत्तिः संयोगत्वात् । यः संयोगः स प्रदेशवृत्तिरिति विशेषव्याप्तिमूलकं चानुमानं सूचितं भवति । संयोगित्वोक्त्या सूचितं विपक्षे बाधकं तर्कं दर्शयति **तथा चेति** । युगपदनेकैरित्यत्र मूर्तैरिति शेषः ।

वा०र०— **तर्कस्येति** । यदि परमाणुरनेकांशो न स्यात् इत्यादिना वक्ष्यमाणमूलोक्ततर्कस्येत्यर्थः । **परमाणुसंयोगत्वादिति** । तदवयववृत्तिरिति साध्यानुसारेण संयोगत्वमात्रस्य व्यभिचारित्वेन हेतुत्वायोगात् परमाणुपदम् । **संयोगित्वोक्त्येति** । सर्वदिक्ष्वपि संयोगादित्यनेनेति शेषः ।

विष्टुल०— एवं वक्ष्यमाणतर्के इष्टापत्तिं परिहृत्याप्रयोजकताशङ्कामप्यपाकरोति **प्रदेशवर्तिनश्चेति** । तथा च संयोगानेकत्वं तदंशानेकत्वेन विना नोपपद्यत इति नाप्रयोजकतेति भावः । **संयुज्येतेति** । इति हेतूच्छित्तिरूपबाधकसूचनार्थमिति ब्रूम इति पूर्वेणान्वयः ।

॥ इति तत्तर्कस्य अप्रयोजकत्वनिराकरणं च ॥

* * *

॥ अथ संयोगस्य प्रदेशवृत्तित्वे अर्थान्तरं कल्पयित्वा अप्रयोजकत्वशङ्कायाः पुनरुत्थानं तन्निरासश्च ॥

३८ सु०— ननु संयोगस्य प्रदेशवृत्तित्वं नाम स्वात्यन्ताभावसमानदेशत्वमेव, न तु घटसंयोगो घटावयवे वर्तत इति; तत्कथं भागाभावे संयोगानुपपत्तिरिति । मैवम्, प्रत्यक्षादिसिद्धस्य अवयववृत्तित्वस्य परित्यागेनाप्रामाणिकव्याहताङ्गीकारस्यानुचितत्वात् । वक्ष्यते चैतत् ।

परि०— नन्वंशिसंयोगस्यांशगत्वेऽन्यनिष्ठत्वाविशेषात् पटसंयोगो घटेऽपि स्यादंशगतोऽपि तदंशे सोऽपि तदंश इत्यनवस्था(यां सं)यामंशिसंयोगस्य क्वाप्यवस्थानमेव न स्यादित्यत आह **वक्ष्यते चैतदिति** । 'अंशांशिनोरभेदेन त्वंशसंयोग एव ही'त्यादिग्रन्थ इति भावः ।

यादु०— पुनरप्रयोजकतामाशङ्कते **ननु संयोगस्येति** । **व्याहताङ्गीकारस्येति** । स्वस्य स्वात्यन्ताभावसमानदेशत्वं व्याहतमिति भावः । कपिसंयोगतदभावयोरपि परस्परभिन्नवृक्षावयवगतत्वान्न समानदेशत्वम् । ननु घटसंयोगो घटावयववृत्तिरित्यप्ययुक्तम् । अतिप्रसङ्गात् । तथा सति हि पटवृत्तिरपि घटसंयोगः स्यादित्यत आह **वक्ष्यते चैतदिति** । 'अंशांशिनोरभेदेन त्वंशसंयोग एव हि । अंशिन' इत्यत्रेति शेषः ।

वं०प०— **घटसंयोग इति** । घटे पदार्थान्तरसंयोग इत्यर्थः ।

श्रीनिधि०— प्रकारान्तरेणान्यथासिद्धिमाशङ्क्य परिहरति **ननु संयोगस्येति** । **वक्ष्यते चैतदिति** । अंशवृत्तित्वस्य प्रामाणिकत्वमितरस्याप्रामाणिकत्वं च अंशे संयोगदृष्टेश्चेत्यादिनेति भावः ।

शे०वा०— प्रदेशवृत्तित्वस्याप्यवृत्तित्वरूपत्वाभावेन बह्वंशत्वं विनाऽपि बहुभिः संयोगस्य परमाणौ सम्भवादप्रयोजकत्वमेवेत्याशङ्कते **नन्विति** । **प्रत्यक्षादीति** । प्रत्यक्षपदं तद्विशेषसाक्षिपरम् । आदिपदेन

घटादावपि तद्दर्शनेनेत्यादिनोक्तानुमानपरिग्रहः । **व्याहताङ्गीकारस्येति** । प्रतियोगितदत्यन्ताभावयोः सामानाधिकरण्यस्य विरुद्धत्वादिति भावः । नन्वेकत्रैव वृक्षे कपिसंयोगतदत्यन्ताभावयोर्दर्शनान्न विरोध इत्यत आह **अप्रामाणिकेति** । अंशभेदेनैव वृक्षे संयोगतदत्यन्ताभावयोरनुभूयमानत्वेन यदवच्छिन्ने संयोगस्तदवच्छिन्ने तदत्यन्ताभावस्यासिद्ध्या नाविरुद्धत्वं कल्पयितुं शक्यत इति भावः । ननु घटसंयोगो घटावयववृत्तिरित्ययुक्तम् । अतिप्रसङ्गात् । तथा सति पटवृत्तिरपि घटसंयोगः स्यात् । घटसंयोगो घटवृत्तिस्तद्गुणत्वाद्रूपवत्, अंशवृत्तिः संयोगो न घटसंयोगः तदन्यवृत्तित्वात्पटसंयोगवदिति प्रमाणविरोधाच्चेत्यत आह **वक्ष्यते चैतदिति** । 'अंशांशिनोरभेदेन त्वंशसंयोग एव हि । अंशिन' इत्यादिनेति शेषः । अयमर्थः । अंशांशिनोरभेदस्य समर्थितत्वेन पटवद्घटांशस्य घटादत्यन्तभिन्नत्वाभावेनाविशेषासिद्धेर्न तन्मूलकस्यातिप्रसङ्गस्यात्रावसरः । अंशवृत्तेरेव घटवृत्तित्वादाद्यानुमानस्य सिद्धसाधनत्वात् । अंशावृत्तित्वे सति घटवृत्तित्वसाधने च दृष्टान्तस्य साध्यवैकल्यप्रसङ्गात् । द्वितीयहेतोस्तु स्वरूपासिद्धत्वादन्यथासिद्धत्वाच्च न बाधकत्वमपीति वक्ष्यत इत्यर्थः ।

वा०र०— अंशिनोरंशैरभेदेनेति । वक्ष्यमाणानुव्याख्यानव्याख्यानमूलानुसारेण ननु घटसंयोग इत्यादि वक्ष्यत इत्यन्तम् ।

विठ्ठल०— पुनरप्रयोजकतामाशङ्कते **नन्विति** । **व्याहताङ्गीकारस्येति** । प्रतियोगितदभावयोरेकत्रावस्थानस्य व्याहतत्वादिति भावः । नन्वंशिसंयोगस्यांशगतत्वं न युक्तं, अंश्यन्यत्वादेशानां अन्यथा घटसंयोगः पटेऽपि स्यादित्यत आह **वक्ष्यते चैतदिति** । 'अंशांशिनोरभेदेन त्वंशसंयोग एव हि । अंशिन' इत्यत्रेति शेषः ।

चषक— ननु पटसंयोगो घटावयववृत्तिरित्युक्तम् । तथा सति पटवृत्तितापि घटसंयोगस्य स्यादित्यत आह **वक्ष्यते चैतदिति** । 'अंशांशिनोरभेदेन त्वंशसंयोग एव हि । अंशिन' इत्यत्रेति पूरणीयम् ।

॥ इति संयोगस्य प्रदेशवृत्तित्वे अर्थान्तरं कल्पयित्वा अप्रयोजकत्वशङ्कायाः पुनरुत्थानं तन्निरासश्च ॥

॥ इति तत्तर्कस्य अप्रयोजकत्वनिराकरणम् ॥

॥ इति अनुव्याख्यानगतस्य संयोगार्थकसम्बन्धपदस्य विपक्षे बाधकसूचनार्थत्वम् ॥

॥ इति अनुव्याख्यानगतस्य संयोगार्थकसम्बन्धपदस्य द्रव्यत्वेनैव चरितार्थत्वशङ्का, तन्निरसनञ्च ॥

॥ इति तदनुमानान्तरगतहेतुविशेषणवैयर्थ्यशङ्कानिवारणम् ॥

॥ इति अनुव्याख्यानगत'सर्वदा'इत्यादिपदानामपि वैकल्पिकार्थतया परमाणोः सभागत्वसाधने अनुमानान्तरकथनम् ॥

* * *

॥ अथ तत्रान्ते अनुव्याख्यानगतपदानां वैकल्पिकार्थतया
'परमाणोः सभागत्वसाधका'नुमानसूचकव्याख्याने व्याघातशङ्का तन्निरसनञ्च ॥
॥ अथ च तत्रादौ तच्छङ्काप्रदर्शनपूर्वकं स्थूलतया तन्निरसनञ्च ॥

७९ **सु०—** ननु 'परमाणुः सावयव' इति स्वव्याघातस्य मुख्यमुदाहरणम् । यो हि सर्वतोऽपकृष्टो, यतः [1]परमाणुर्नास्ति, तं परमाणुमाचक्षते । तस्य सावयवत्वेऽवयविनोऽवयवानामपकृष्टपरिमाणत्वावश्यम्भावात् कथं न व्याहतिरित्यत आह **अविभाग इति** ।

अनु०— **अविभागः पराणुता ।**

स्यादयं विरोधो यदीदं परमाणुपदप्रवृत्तिनिमित्तं स्यात् । न चैवम्, सावयवतया साक्षिसिद्धे तदसम्भवात् । किन्तु **अविभागः, पराणुता** परमाणुशब्दप्रवृत्तिनिमित्तम् । तथा च कुतो व्याघात इति ।

कं०रा०— इदमिति । स्वापेक्षयापकृष्टपरिमाणराहित्यादिकमित्यर्थः । **असम्भवादिति** । परमाणोर्येन केनचिद्विभागस्य सत्त्वेन विभागसामान्याभावस्यासम्भवादित्यर्थः ।

शे०वा०— नन्वविभागः पराणुतेत्याद्युत्तरभाष्यमनर्थकम् । न चैतत्परमाणुशब्दप्रवृत्तिनिमित्तोपदर्शनार्थमिति वाच्यम् । तदुपदर्शनस्याप्यनर्थकत्वात् । न च पराभिमतस्य परमाणुशब्दप्रवृत्तिनिमित्तत्वाभावज्ञापनार्थत्वान्न तदिति वाच्यम् । तज्ज्ञापनस्यापि प्रयोनाभावादित्याशङ्क्य परमाणोः सभागत्वसाधकानुमाने व्याघातशङ्कापरिहारार्थत्वात् तस्य न तदिति भावेन तच्छङ्कापरिहारकतयोत्तरवाक्यं योजयितुं तदनुमाने व्याघातशङ्कामुत्थापयति **नन्विति** । कथमत्र व्याघात इत्यतस्तमेवोपदर्शयति **यो हीत्यादिना** । ननु पराभिमतमेव परमाणुशब्दप्रवृत्तिनिमित्तमित्यपि वक्तुं शक्यत्वान्नानेनाभिमतसिद्धिरित्यत एतद्भाष्यसूचितं परोक्तस्य प्रवृत्तिनिमित्तत्वमुपपादयन् व्याघातपरिहारकतया वाक्यं योजयति **स्यादयमित्यादिना** ।

वा०र०— पराभिमतस्येति । परस्परपरमाणुशब्दप्रवृत्तिनिमित्तत्वेनाभिमतस्येत्यर्थः । **पराभिमतमेवेति** । यो हि सर्वतोऽपकृष्टा इत्यादिनोक्तमित्यर्थः ।

॥ इति तच्छङ्काप्रदर्शनपूर्वकं स्थूलतया तन्निरसनञ्च ॥

* * *

[1] [illegible]

॥ अथ च तत्रान्ते तच्छङ्कानिरसनस्य समर्थनम् ॥
॥ अथ च तत्राप्यादौ परमाणुपदनिर्वचनम् – इतरनिर्वचननिषेधपूर्वकम् ॥

८० सु०— 'नन्वविभाग इति कथमिदं विज्ञायते । सर्वथा विभागलक्षणगुणाभाव इति चेन्न, गुणादेरपि परमाणुत्वप्रसङ्गात् । द्रव्यत्वे सतीति विशेषणाददोष इति चेन्न, असम्भवात् । यत्किञ्चिद्विभागाभावाभिप्राये मेरुमन्दरयोरप्यणुत्वप्रसङ्गात् । अवयव-विभागाभावोऽभिमत इति चेन्न; गगनादेरपि परमाणुत्वापत्तेः, अवयवनाशादेव नष्ट-स्यावयविनोऽपि तदापत्तेः' इति । मैवम् । यस्य विभिन्नावयवेषु सत्स्वपि तेषां विभागो न कदाऽपि भवितुमर्हति स परमाणुरिति व्याख्यानात् ।

परि०— कथमिदमिति । 'अविभाग, इतीदं वाक्यं कथं व्याख्यायत इत्यर्थः । सम्भावितपक्षानुट्टङ्क्य निराह **सर्वथेत्यादिना** । **असम्भवादिति** । द्रव्यस्यैव विभागगुणाश्रयत्वादिति भावः । **मेरुमन्दरयोरपीति** । तयोः कदापि संयोगाभावेन विभागरूपगुणस्यापि तयोरन्योन्य-निरूपितस्य कदापि अभावादिति भावः ॥ **अवयवेति** । अवयवनिरूपिते विभाग इत्यर्थः । **तेषां विभाग इति** । पार्थक्यमित्यर्थः । अत्र गगनेऽनतिव्याप्तये विभिन्नावयवेषु सत्स्वपीत्युक्तिः । अवयवनाशान्नष्टे अवयविन्यनतिव्याप्तये तेषां विभागो न कदापि भवितुमर्हतीति योग्यताऽभाव उक्तः । तत्र सजातीये अवयव्यन्तरे अवयवविभागदर्शनरूपयोग्यतासत्त्वान्नातिव्याप्तिरिति भावः । 'अत्रावयवभेदेन स्यादेव ह्यनवस्थितिरि'ति गीतातात्पर्योक्तेर्नित्यपरमाणावपि अवयवभेदोऽस्त्येवेति केचिद्व्याचक्षते । अन्ये तु न्यायमते गगनेऽपि सावयवत्वे विवादादवयवेषु सत्स्वित्येतावता गगनादावनतिव्याप्तेर्विभिन्नेति स्वरूपकथनम् । न्यायमते भेदप्रतिनिधिविशेषानभ्युपगमा-दवयवाना-मवयविना भेदाभावे निरवयवमेवेति प्राप्तमिति तदीयशङ्काऽपनुत्तये अवयवसत्त्वस्फुटीकरणाय (वि)भिन्नेत्युक्तमिति पररीत्यैवेदं लक्षणं परं प्रत्युक्तम् । अत एव लक्षणान्तरमिति व्याचक्षते । वस्तुतस्तु विभिन्नावयवेष्वित्यस्यावयविना भिन्नेष्विति नार्थः । किन्तु एकैकोऽप्यवयवः स्वान्त-र्भेदयुक्तः सखण्डो न त्वखण्ड इत्यर्थः । तथा च विभिन्नेषु सखण्डेषु अनेकांशोपेतेष्ववयवेष्विति फलितार्थः ।

यादु०— कथमिदमिति । 'अविभाग' इति लक्षणावाक्यार्थः केन प्रकारेण विज्ञायते भवद्भि-रित्यर्थः । **गगनादेरपीति** । तत्रावयविनो नित्यत्वेनावयवविभागस्याभावादिति भावः । **अवयवनाशादेवेति** ।

न तु तत्संयोगनाशात् । येन तत्रावयवविभागः स्यात् । तथा च तत्र यावत्स्वसत्त्वमवयवविभागाभावादतिव्याप्तिरिति भावः । **यस्य विभिन्नेति** । अत्र गुणादिष्वतिव्याप्तिपरिहारायावयवेषु सत्स्वपीत्युक्तम् । इदं च पररीत्यैव । अस्मन्मते गुणादेरपि सभागत्वादिति द्रष्टव्यम् । गगनादावतिव्याप्तिपरिहाराय **विभिन्नेति** । अवयवनाशादेव नष्टेऽवयविन्यतिव्याप्तिवारणाय **अर्हतीति** । नार्हतीत्येतदुपपादयितुं कदाऽपीत्युक्तम् । **कुत्रापि** तत्सजातीयेऽपीति यावत् । अवयवनाशेन नष्टेऽवयविनि त्ववयवविभागयोग्यताऽस्ति तत्सजातीयेऽवयविन्यवयवविभागदर्शनादिति भावः ।

वं०प०— तदसम्भवादिति । साक्षिसिद्धे परमाणौ तस्य यतः परमाणुर्नास्ति स परमाणुरिति निर्वचनस्यासम्भवादित्यर्थः । **गुणादेरिति** । गुणे गुणानाङ्गीकारादित्यर्थः । **असम्भवादिति** । विभागस्य सामान्यगुणत्वेन द्रव्यत्वे सति विभागलक्षणगुणशून्यः परमाणुरित्युक्तेऽसम्भवादिति भावः । **मेरुमन्दरयोरिति** । तत्रापि स्वस्वनिष्ठयत्किञ्चिद्वृक्षे प्रत्यन्तपर्वतादिविभागाभावोऽस्तीति भावः । **अवयवनाशात्** समवायिकारणनाशात् ।

कं०रा०— यस्येति । आकाशादौ भिन्नावयवानामेवाभावान्नातिप्रसङ्गः अवयवनाशादेव नष्टेऽवयविन अवयवानां विभागः कदाचिद्भवितुमर्हत्येवेति नातिप्रसङ्ग इति भावः ।

श्रीनिधि०— कथं ज्ञायते = केन प्रकारेण ज्ञायते = किमस्य तात्पर्यमिति यावत् । विभागलक्षणगुणाभाव इत्युक्ते संयोगेन विभागनाशे तद्रहितघटेऽतिव्याप्तिः स्यादतः **सर्वथेत्युक्तम्** । **गुणादेरिति** । गुणे गुणानङ्गीकारेण विभागगुणस्य सर्वथा तत्राभावादिति भावः । सर्वथेत्यनेनात्यन्ताभावं अभिप्रैति । प्रागभावप्रध्वंसादिव्युदासार्थमिति द्रष्टव्यम् । **असम्भवादिति** । द्रव्यस्य सतो विभागवत्त्वनियमादन्यथा द्रव्यत्वं न स्यादिति द्रष्टव्यम् । **मेरुमन्दरयोरपीति** । तयोर्मेरुमन्दरविभागाभावात् । विभागस्य संयोगपूर्वकत्वनियमादिति भावः । **अवयवनाशादेव नष्टस्येति** । समवायकारणनाशादेव नष्टस्येत्यर्थः । असमवायिकारणनाशेन नष्टे तु अवयवविभागोऽस्तीत्येवमुक्तम् । यस्य विभिन्नावयवेषु सत्स्वपि तेषां न कदापि विभागो भवितुमर्हति । **स परमाणुरिति** ।

शे०वा०— कथमिदमिति । अविभाग इति लक्षणवाक्यार्थः केन प्रकारेण विज्ञायते भवद्भिरित्यर्थः । काऽत्र कथन्तेत्यतः किमत्र सर्वथा विभागाभाव एव प्रवृत्तिनिमित्ततयाऽभिमतः, किंवा यत्किञ्चिद्विभागाभावः, अथवाऽवयवविभागाभाव इति विकल्पान् मनसि निधायाद्यं दूषयति **सर्वथेति** । किमत्र निर्विशेषणमविभागत्वं तत्त्वेनाभिमतं किंवा सविशेषणमिति विकल्पद्वयं मनसि निधायाद्यं प्रत्याह **गुणादेरपीति** । गुणादेर्निर्गुणतया सर्वथा विभागाभावस्य तत्रापि सत्त्वादिति भावः । द्वितीयमाशङ्कते **द्रव्यत्वे सतीति विशेषणादिति** । **असम्भवादिति** । विभागस्य द्रव्यसामान्यगुणत्वादिति भावः । आद्यद्वितीयमुत्थाप्य

दूषयति **यत्किञ्चिदिति** । तृतीयमाशङ्कते **अवयवेति** । अतिव्याप्त्या दूषयति **गगनादेरपीति** । तत्रावयविनो नित्यत्वेनावयवानां (अवयवविभागवत्त्वस्य) विभागस्यासत्त्वादिति भावः । गगनादेः सावयवत्वेऽवयव-विभागाभावे च विप्रतिपन्नं प्रति घटादावनित्यावयविन्यपि तामाह **अवयवेति** । ननु च तन्त्वा-द्यवयवसंयोगनाशेनावयविनाशादवयवि(ना)नोऽस्त्येव यावत्स्वसत्त्वमवयवविभागवत्त्वमित्युक्तलक्षणागमनात् कथं तत्रातिव्याप्तिरित्यतस्तादृशावयविन्यतिव्याप्त्यसम्भवेऽप्यवयवनाशादेव नष्टे तस्मिन्यावत्स्वसत्त्वमवयवविभाग-वत्त्वाभावादतिव्याप्तिरवर्जनीया इत्याशयेनोक्तम् **अवयवनाशादेव विनष्टस्येति** । **यस्येति** । तेषाम् अवयवानां परस्परमिति शेषः । सत्यवयविनीत्यपि शेषः । यस्य तेषामित्यादिविशेषणमहिम्ना तेषामित्यस्यावयवा-ऽवयवित्वावस्थापन्नानामित्यर्थः । अत्र च यदीयावयवानां विभागो भवितुं नार्हति स परमाणुरित्येव कृते गगनादेरपि परमाणुत्वापत्तिः । तस्य नित्यतया तदीयावयवानामपि विभागभवनानर्हत्वात् । तन्निरासाय यस्य विभिन्नावयवेषु सत्स्वित्युक्तम् । तस्य च विभिन्नावयवानामसत्त्वान्नातिप्रसङ्गः । येषां विभागो न भवती-त्येतावन्मात्रं चावयवनाशान्नश्यति द्रव्येऽप्यस्तीति तादृशावयविनोऽपि परमाणुत्वप्रसङ्गस्तन्निरासायार्हती-त्युक्तम् । नार्हतीत्येतदुपपादयितुं कदाऽपीत्युक्तम् । कुत्रापि तत्सजातीयेऽपीति यावत् । तथा चावयवनाशेन नष्टे वस्तुनि त्ववयवविभागयोग्यताऽस्ति । ततश्च तत्सजातीये तन्तुन्यवयवानां विभागदर्शनात् सजातीय-दर्शनरूपस्य योग्यताकल्पकस्य तत्र सत्त्वाद्विभागो भवितुं नार्हतीत्यस्यांशस्य तत्राभावान्नातिप्रसङ्गः । अत एव न द्व्यणुकादावतिप्रसङ्गः । तत्राप्यणुकार्यत्वेन सजातीयतया वादिप्रतिवादिसम्मते चतुरणुके तद्विभागदर्शनेन द्व्यणुकादौ विभागादर्शनेऽपि तद्भवनयोग्यतायाः सत्त्वेनोक्तलक्षणविरहात् । नाप्यसम्भवः । उक्तरीत्याऽन्यत्र योग्यतायाः कल्पकसद्भावेन कल्पयितुं शक्यत्वेऽपि परमाणौ तद्विरहेण योग्यतायाः कल्पयितुमशक्यत्वात् । न च विभिन्नावयवत्वस्य परमाणावसिद्ध्या पुनरप्यसम्भव इति वाच्यम् । उत्पत्तिविनाशवत्परमाणोः स्वावयवैर्भेदस्यावश्याश्रयणीयत्वात् । तस्मिन्सत्यप्यसत्त्वस्यैवावयवावयविभेदव्यवस्थापकतया सिद्धान्ते सम्मत-त्वात् । न च परमाण्ववयवेऽतिव्याप्तिरिति वाच्यम् । भूतसूक्ष्माणामेव परमाण्ववयवत्वेन तेषां चानादि-नित्यत्वेन भेदसाधकखण्डितत्वयुक्तेस्तत्राप्रसरणेन तद्भेदासिद्ध्या विभिन्नावयवेषु सत्स्वित्यनेनैव तत्रातिव्याप्ति-परिहारात् ।

यत्तु ततोऽपि परमाणुत्वं तदंशानामित्यादिवाक्यानुरोधात् तेषामपि लक्ष्यत्वमेवेति न तत्रातिप्रसङ्ग इति केषाञ्चित् समाधानम् । तन्न । तत्रोक्तरीत्या लक्षणाभावेनाव्याप्तिप्रसङ्गात् । 'कणादाद्या निरंशिनं यमाहुर्भ्रान्तिदर्शनादि'त्यादि तदुत्तरग्रन्थानुरोधेन त्रसरेणुषष्ठभागस्यैव परमाणुत्वेन 'लक्ष्यतायास्तत्रापि सिद्धत्वेन ततोऽपि परमाणुत्वमि'त्यस्य पूर्वपक्षवाक्यत्वस्यैव वाच्यतया तदनुरोधेन परमाण्ववयवानां लक्ष्यत्वस्य कल्पयितुमशक्यत्वाच्च । न च मनसि प्रसङ्गः । तस्यापि लक्ष्यत्वात् । जीवपरमाणोराकाशपरमाणोश्चालक्ष्य-त्वान्न तत्राव्याप्तिरपीति सङ्क्षेपः ।

वा०र०— ननु अविभाग इतीति मूलम् । अविभाग इति इदं कथं विज्ञायते । किमर्थकमिति योजना । **निर्विशेषणमिति** । केनचिद्विशेषणेनानुपस्कृतमित्यर्थः । अविभागत्वमात्रमिति यावत् । अविभागत्वं च सर्वथा विभागलक्षणगुणाभावरूपमिति सिद्धमेव । **तत्त्वेन** शब्दप्रवृत्तिनिमित्तत्वेनेत्यर्थः । **सविशेषणं** केनचिद्विशेषणेनोपस्कृतम् । **मेर्विति** मूलम् । मेर्वादावाकाशविभागराहित्यादिति भावः । **अवयवेतीति** । अत्र च द्रव्यत्वे सति इति विशेषणस्याभिप्रेतत्वात् न गुणादावतिव्याप्तिरिति हृदयम् । अत एव गगनादावेवातिव्याप्तिं वक्ष्यतीति ज्ञेयम् । यत्किञ्चित् इति पक्षे तु यत्किञ्चित् इत्युक्त्यैव किञ्चिद्विभागस्थत्वलाभात् गुणादिव्यावृत्तिसिद्धे द्रव्यत्वे सतीति विशेषणं नापेक्षितमिति ज्ञेयम् । **तन्त्वाद्यवयवेति** । आदिना कपालपरिग्रहः । **अवयवीति** घटादिरूपावयवीत्यर्थः । **इत्युक्तेति** । इत्यतो हेतोः उक्तलक्षणेत्यर्थः । **तेषामवयवानामिति** । अत्र तेषामित्यनूद्य अवयवानामिति व्याख्यानम् । परस्परमिति तु शेषपूरणमिति विवेकः । अन्यावयवादिभ्यो विभागस्य विद्यमानत्वात् परस्परमिति शेषपूरणम् । यो नष्टोऽवयवी तदीयावयवानां विभागो भवितुं नार्हतीति किल स्थितिः । असमवायिकारणसंयोगनाशाद्वा समवायिकारणभूतावयवनाशाद्वा यत्रावयविनाशात् पूर्वमेवावयविविभागस्य वा तन्नाशस्य वा सद्भावेनावयविनाशानन्तरं तदवयवानां विभागार्हत्वाभावेन तथाविधावयविनि यस्य विभिन्नावयवेषु सत्स्वपीत्यादि सम्पूर्णलक्षणस्यातिव्याप्तेः स्यात् इत्यतः सति अवयविनीति विवक्ष्यते । तथा चावयविनाशानन्तरं सति अवयविनि इत्येतत् विशेषणाभावात् नातिव्याप्तिः । अर्हतीत्येतत्पदकृत्यं तु अवयवनाशादेवेत्यनेन वक्ष्यति ।

तत्र चावयविनः सत्ताकाल एव यस्य भिन्नावयवेषु सत्स्वपि तेषां विभागो नास्तीत्यस्य लक्षणस्य सत्त्वेनातिव्याप्तिः इत्यतोऽर्हतीत्युक्तमिति विनाशयोग्यस्यैव द्रव्यस्योपादानेनातिव्याप्तिर्विवक्षिता । अतो विनाशोत्तरमवयविनि अतिव्याप्तिपरिहाराय सति अवयविनि इत्यस्यावश्यं निवेशः कार्यः इत्याशयेनाह **सत्यवयविनीत्यपीति** । एतेनार्हतीत्यनेनैवावयविनाशस्थलेऽतिव्याप्तिनिरासाय असत्यवयविनि अर्हतीत्यनयोः अन्यतरव्यर्थता इत्यपास्तम् । शेषपूरणपक्षमसहमानः पक्षान्तरमाह **यस्य तेषामित्यादीति** । अवयवित्वावस्थापन्नानां इत्युक्त्या अवयविनि सति इत्यर्थलाभात् इति भावः । **विभिन्नावयवेषु सत्सु इत्युक्तमिति** । विभिन्नत्वे चावयव्यपेक्षया इत्येतत् न च विभिन्नावयवत्वस्य इत्याद्युत्तरटीकायां स्पष्टम् । **अवयवनाशादिति** । यत्रासमवायिकारणसंयोगनाशात् द्रव्यनाशः तादृशद्रव्ये सति अवयविनि अवयवविभागस्य सत्त्वेन तदभावाभावात् नातिव्याप्तिः इत्याशयेनावयवनाशादित्युक्तम् । एवमुत्तरत्रापि द्व्यणुकादावतिव्याप्तिस्तु तदसमवायिकारणसंयोगनाशेन नाशाभिप्रायेति बोध्यम् । **नश्यतीति** । नाशयोग्ये द्रव्येत्यर्थः । विनष्टेऽतिव्याप्तेः सत्यवयविनि इत्यनेनैव परिहृतत्वात् । **सजातीय इति** । असमवायिकारणनाशात् नाशयोग्ये द्रव्ये सत्यवयविनि तदवयवानां विभागे दर्शनादित्यर्थः । सत्यवयविनि इत्येतत् कृत्यकथनं तु शेषपूरणव्याजेनैवाभिहितप्रायमित्याशयेन मूलोक्तविशेषणानां एव कृत्यकथनं टीकायामिति न दोषः । **वादीति** । चतुर्भिः त्र्यणुकैः आरब्धे चतुरणुके जायमानस्य सत्यवयविनि तदवयवविभागस्योभयसम्मतत्वादिति भावः ।

तद्विरहेणेति । अणुकार्यत्वेन सजातीयत्वानुपपत्त्या कल्पकविरहेणेत्यर्थः । **भूतसूक्ष्माणामेवेति** । एतच्च 'ननु अस्माभिः भूतसूक्ष्माणां नित्यता अङ्गीक्रियते तत्कथमेवमनुमीयते । मैवम् । न हि परमाणवो भूतसूक्ष्माणि किन्नाम अहङ्कारोपचितानि विकृताकारश्चानित्य एवेत्येव' रूपादिमत्वाच्च विपर्ययः इत्येतत्सूत्रीयमूलानुसारेण बोध्यम् । अनेन भूतसूक्ष्माऽवयवकोऽहङ्कारोपचितपरिणामविशेष एव परमाणुरिति ध्वनितं भवति । खण्डितत्वे युक्तेः तत्रेति । तस्मिन् सत्यपि असत्त्वरूपान्यथाख्यातिग्रन्थो वाक्यार्थविनोदे दूषितोऽस्ति । परमा एवावयवेऽतिव्याप्तिमाशङ्क्य निरासेन तल्लक्ष्यत्वाङ्गीकारेण तद्ग्रन्थप्रवृत्तिरपि दूषितेति बोध्यम् ।

त्रिकाम्पुरस्थनृसिंहाचार्यमतमनुवदति **यत्त्विति** । **इत्यादिवाक्येति** । तृतीयस्कन्धीयद्वादशाध्यायतात्पर्योदाहृततत्त्वविवेकप्रमाणवाक्येत्यर्थः । **ततोऽपि परमाणुत्वमिति** ! वाक्ये परमाण्ववयवानां परमाण्वपेक्षयाऽपकृष्टपरमाणुत्वोक्त्या परमाणुत्वेनाङ्गीकारप्रतीतेः परमाणुलक्षणेऽवयवानामपि लक्ष्यत्वं वाच्यमिति परेषामाशयः । **लक्षणाभावेनेति** । परमाण्ववयवभूतसूक्ष्मस्य नित्यतया स्वस्वावयवैः अत्यन्ताभिन्नत्वेन विभिन्नावयवेषु इत्यंशस्याभावादित्यर्थः । **यमाहुः भ्रान्तीति** । यं ब्रूयुः भ्रान्तीत्येव तात्पर्यमुदाहृतत्वेऽपि ब्रूयुरित्यस्याहुरित्यनुवादोऽयमित्यदोषः । ब्रूयुरितीति टीकापाठे तु यथाश्रुतानुवादत्वमेवेति ध्येयम् । **तदुत्तरग्रन्थानुरोधेनेति** । अत्र तत्पूर्वग्रन्थानुरोधेनेति पाठः स्वरसः । तदुत्तरेति पाठेऽपि तत् ततोऽपि परमाणुत्वमिति वाक्यमुत्तरं यस्य कणादाद्याः इत्यादिरूप तदुत्तरो ग्रन्थः इत्येवं बहुव्रीहिणार्थः । अतो नानुपपत्तिरिति ध्येयम् । **तत्रापि सिद्धत्वेनेति** । 'चरमस्तु विशेषाणां अनेकासंयुतस्तु यः । परमाणुः स विज्ञेयो नृणामैक्यभ्रमो यतः' इत्येतत् परमाणुलक्षणपरभागवतवाक्यव्याख्यानरूप 'मनुष्यादेव लोकेऽपि विशेषेणैव दर्शनि । अंशांशित्वविशेषं तु यस्य द्रष्टुं न शक्नुयुः ॥ चरमो विशेष इति तं मुनयो ब्रूयुरञ्जसा । परमाणुः स विज्ञेयः' इत्यन्ते ततोऽपि परमाणुत्वमित्यतः प्राक्तनवाक्येऽपीत्यर्थः । त्रसरेणुषष्ठभागस्य एव करणादादिभिः निरंशत्वेन अभ्युपगततया यं ब्रूयुः स विज्ञेयः इत्युक्त्या च तैः परमाणुत्वेनाङ्गीकृतस्यैव लक्ष्यत्वावगमस्य स्पष्टत्वादिति भावः । **पूर्वपक्षवाक्यत्वस्यैवेति** । अयं भावः । परमाण्वंशानां परमाण्वपेक्षयापकृष्टपरिमाणत्वात् । तेषामेव परमाणुत्वं कुतो नोच्यते इत्येतत् शङ्कापरिहाराय प्रवृत्तस्य ततोऽपि परमाणुत्वं तदंशानां तु यः ततोऽपि अन्त्यतापकृष्टपरिमाणात् परमाणुत्वेनाभिमतपदार्थादपि परमाणुताऽतितरां अपकृष्टपरिमाणाश्रयता वर्तते । तथापि विवेकार्थं कणादाद्युक्तरीत्या प्रसिद्धत्रसरेणुषष्ठभागात् द्व्यणुकादिक्रमेण कार्यकारणप्रक्रियानुसारेणैव परमाणुद्व्यणुकादिविवेकार्थं अस्य कणादादिभिः निरंशत्वेनाभिमतत्रसरेणुषष्ठभागस्य परमाणुतोक्तपरमाणुशब्दवाच्यत्वेन सङ्केतितत्वमुच्यते । अन्यथा परिमाणापकर्षतारतम्यस्याविश्रान्ततायां परमाणुद्व्यणुकादिज्ञानस्याशक्यतया परमाण्वादिमहावयव्यन्तवस्तुजातस्य कार्यकारणभावप्रक्रिया दुर्बोधा स्यात् इति । तथा च एतद्वाक्यार्थपर्यालोचनायां अत्यपकृष्टपरिमाणाश्रयतया परमाणुत्वमित्यङ्गीकारे परमाणुत्वेन यदभिमतं तदवयवानामपि ततोऽप्यपकृष्टपरिमाणाश्रयत्वेन परमाणुतापि कुतो नाङ्गीकार्येति शङ्का न प्रसरति ।

कणादादिभिर्निरंशत्वेनाभिप्रेतत्रसरेणुषष्ठभागस्यैव परमाणुद्व्यणुकादिकार्यकारणभावप्रक्रियावबोधोपयुक्तत्वेनात्र परमाणुरिति क्रियमाणसङ्केतविषयत्वोपपत्तावपि परमाण्ववयवानां उक्तप्रयोजनानुपयुक्ततया उक्तसङ्केतविषयत्वस्यानुपपत्तेः इत्येतावत एवार्थस्य प्रतीतावपि परमाणुवत् तदंशानामपि परमाणुत्वं इत्येतदर्थस्य तद्वाक्यादप्रतीत्या उक्तार्थस्य तद्वाक्यबलायत्तत्ववचनस्य तद्वाक्यशेषभूत यद्यपीत्याद्युत्तरवाक्यार्थानवबोधनिबन्धनत्वमेव । न च पराभिमतत्रसरेणुषष्ठभागस्यैव लक्ष्यत्वाङ्गीकारप्रयोजनभूतपरमाण्वादिकार्यकारणभावप्रक्रियाया विज्ञापितस्याः सिद्धान्त्यनभिमतत्वात् इति वाच्यम् । अस्याः परमाण्वादीनां महावयव्यन्तानां कार्यकारणभावप्रक्रियायाः कणादाद्यभिहितत्वमित्येतावतैव सर्वथा सिद्धान्त्यभिमतज्ञानेति केनापि वक्तुमशक्यत्वात् । अतः परोक्तप्रक्रियानुसारेण त्रसरेणुषष्ठभागस्यैव वैविक्षिकी परमाणुता । न तु तदंशानामपीत्येव परिहारकरणानुसारेण परमाणुवत् तदंशानामपि अत्यन्तापकृष्टपरिमाणाश्रयत्वात् परमाणुता कुतो न इत्येतत् शङ्कापरत्वमेव ततोऽपि परमाणुत्वमित्यस्य वाक्यस्य स्पष्टमिति तदेव वाच्यमिति । उपलक्षणमेतत् । 'रूपादिमत्वाच्चे'ति सूत्रव्याख्यानरूपस्पर्शादिहेतुभ्यः परमाणोरनित्यता इत्युत्तरानुव्याख्यानव्याख्यानरूपमूले ननु अस्माभिः भूतसूक्ष्माणां नित्यता अङ्गीक्रियते तत्कथमेवमनुमीयते । मैवम् । न हि परमाणवो भूतसूक्ष्माणि किं नामाहङ्कारोपचितानि विकृताकारश्चानित्य एवेति ग्रन्थे भूतसूक्ष्माणां विकृताकारस्य परमाणुतया विवक्षितत्वोक्त्या परमाण्ववयवानां विकृताकारत्वरूपपरमाणुत्वाभावोक्त्या च परमाणुतायाः वैविक्षिकत्वस्य सिद्ध्या कणादाद्यभिमतत्रसरेणुषष्ठभागस्यैव परमाणुरित्येतत्सङ्केतविषयतायाः मूलकृदभिप्रेतत्वेन सिद्धतया भूतसूक्ष्माणां उक्तसङ्केतविषयत्वाभावेन परमाणुविषयत्वस्यैव सिद्ध्या तल्लक्ष्यत्वाङ्गीकारस्य सुतरामयुक्तत्वात् । अन्यथा भूतसूक्ष्माणां परमाणुतया रूपस्पर्शादिहेतुभ्यः तेषामपि अनित्यत्वं स्यात् इत्यपि द्रष्टव्यम् । **तस्यापीति** । एतच्च द्वितीयलक्षणोपपादनावसरे ग्रन्थकृदेव विभावयिष्यतीति ध्येयम् । **अव्याप्तिरपीति** । जीवाकाशपरमाण्वोः नित्यत्वेन विभिन्नावयवेषु इत्यंशस्याभावेन प्राप्ता याऽव्याप्तिः सापि नेत्यर्थः ।

स०ना०— यस्य विभिन्नावयवेष्विति । यस्य वस्तुनः विभिन्नावयवेषु स्ववाचकशब्दावाच्येष्ववयवेषु सत्स्वपि तेषां विभागो भवितुं नार्हति स परमाणुरित्यर्थः । आकाशावयवाः आकाशशब्दवाच्या एवेति न भिन्नावयवाः ततश्च नाकाशेऽतिव्याप्तिः । परामाण्ववयवास्तु न परमाणुशब्दवाच्या इति वैवक्षिकभिन्नावयवाः । ततश्च नासम्भवः । एतेन यावद्वस्तुनः भेदवदित्युक्तदिशा तेषां अपरमाणूनां भेदाभावात् भेदाङ्गीकारो न युक्त इति परास्तम् ।

विठ्ठल०— नन्वविभाग इतीति । इदं परमाणुलक्षणपरं 'अविभागः परमाणुते'ति वाक्यं कथं व्याख्यायत इत्यर्थः । **गुणादेरिति** । गुणादौ विभागरूपगुणभावादिति भावः । **असम्भवादिति** । द्रव्यमात्रस्य विभागलक्षणगुणाधिकरणत्वनियमादिति भावः । **यत्किञ्चिदिति** । यत्किञ्चिद्वस्तु निरूपितेत्यर्थः । **मेरुमन्दरयोरिति** । तथा कदाप्यसंयुक्तत्वेनान्योन्यरूपितस्य विभागस्याभावादिति भावः । **गगनादेरिति** । गगनादेः

नित्यत्वेन तदवयवानां कदापि विभागादिति भावः । **अवयवनाशादेवेति** । समवायकारणनाशादेवेत्यर्थः । न तु तत्संयोगनाशात् । येन तत्रावयवविभागः स्यात् । तथा च यावत्स्वसत्त्वमवयवविभागाभावादिति व्याप्तिरिति भावः । **यस्य विभिन्नावयवेष्विति** । यस्य विभागो नास्ति इत्येवोक्ते गुणादिष्वतिव्याप्तिः अतो अवयवेषु सत्स्वपीत्युक्तम् । परमते गुणादेरवयवाभावान्नातिव्याप्तिः । गगनादावतिव्याप्तिवारणाय विभिन्नावयवेषु सत्स्वपीत्युक्तम्, अवयवनाशान्नष्टे अवयविन्यतिव्याप्तिवारणाय अर्हतीत्युक्तम्, तदुपपादनाय कदापीत्युक्तम् । अस्मन्मतानुसारेण तु स्वरूपकथनाय विशेषणानि मूर्तत्वे सतीत्यपि ग्राह्यम् । अचेतनमात्रे अवयवभेदाभ्युपगमात् तत्त्वविवेकवाक्यस्य धर्ममात्रपरत्वापरत्वान्न क्षुद्रोपद्रवः ।

चषक— कथमिदमिति । 'अविभाग' इत्यानुपूर्वीकमौलप्रतीकं कीदृशार्थप्रत्यायकं विज्ञायते भवद्भिरित्यर्थः । **सर्वथेति** । विभागत्वरूपसामान्यधर्मावच्छिन्नाभाव इत्यर्थः । **प्रसङ्गादिति** । गुणादेर्निर्गुणत्वादिति भावः । विभागपदस्य भावसाधनघञन्ततया । **असम्भवादिति** । द्रव्यत्वावच्छेदेन विभागोपगतेरिति भावः । **मेरुमन्दरयोरपीति** । तदेकतरानुयोगिकापरप्रतियोगिकसंयोगस्य अलीकतया तन्नाशकविभागस्याप्यलीकत्वादिति भावः । सिद्धान्तिदिशेदम् । न्यायनयेऽलीकप्रतियोगिकाभावानुपगतेरित्यवसेयम् । **अवयवेति** । तेषां पार्थक्याभाव इत्यर्थः । **गगनादेरपीति** । अवयविनस्तत्र नित्यत्वेनावयवविभागाभावादिति भावः । गगनादेः सावयवत्वेऽवयविविभागाभावे च विप्रतिपन्नं प्रति पटादावनित्यावयविन्यतिप्रसङ्गमभिधत्ते **अवयवेति** । **तदापत्तेः** परमाणुत्वापत्तेः । अत्र गगनादावनतिप्रसङ्गाय सप्तम्यन्तपदोपादानम् । अवयवनाशान्नष्टेऽवयविन्युक्तक्षतिविधूननाय योग्यताभावपर्यन्तानुधावनम् । तत्सजातीयेऽवयविन्यवयवविभागावनतिदर्शनेन तद्योग्यताया एव तत्र सत्त्वान्न क्षतिरिति भावः । अत्र विभिन्नावयवेष्वित्यस्यावयविना भिन्नेष्विति नार्थः । किन्तु एकैकोऽप्यवयवः स्वान्तर्भेदयुक्तः सखण्डो न त्वखण्ड इत्यर्थः । तथा च विभिन्नेषु अनेकांशेष्वेतेष्ववयवेष्विति फलितार्थ इति व्याकर्तृणां निरूढः पन्थाः ।

॥ इति परमाणुपदनिर्वचनम् – इतरनिर्वचननिषेधपूर्वकम् ॥

* * *

॥ अथ तत्र उक्तपरमाणुपदनिर्वचनेन अवयवपरंपराविश्रान्त्यभावेऽनवस्थेति-शङ्कान्तरस्यापि निरासः ॥

८१ सु०— एतेनावयवपरम्पराविश्रान्त्यभावेऽनवस्थेत्यपि परास्तम्, मूलक्षयाभावस्य सूचितत्वात् ।

परि०— सूचितत्वादिति । अवयवानामारम्भकत्वे पूर्वपूर्वावयवारम्भानन्तरमेवोत्तरोत्तरावयवारम्भनियमेन प्रकृतपरमाणुलक्षणावयव्यारम्भस्य वाच्यतया पूर्वपूर्वासिद्ध्या परमाण्वाख्यावय-

कणादादिभिर्निरंशत्वेनाभिप्रेतत्रसरेणुषष्ठभागस्यैव परमाणुद्व्यणुकादिकार्यकारणभावप्रक्रियावबोधोपयुक्तत्वेनात्र परमाणुरिति क्रियमाणसङ्केतविषयत्वोपपत्तावपि परमाण्ववयवानां उक्तप्रयोजनानुपयुक्ततया उक्तसङ्केतविषयत्वस्यानुपपत्तेः इत्येतावत एवार्थस्य प्रतीतावपि परमाणुवत् तदंशानामपि परमाणुत्वं इत्येतदर्थस्य तद्वाक्यादप्रतीत्या उक्तार्थस्य तद्वाक्यबलायत्तत्ववचनस्य तद्वाक्यशेषभूत यद्यपीत्याद्युत्तरवाक्यार्थानवबोधनिबन्धनत्वमेव । न च पराभिमतत्रसरेणुषष्ठभागस्यैव लक्ष्यत्वाङ्गीकारप्रयोजनभूतपरमाण्वादिकार्यकारणभावप्रक्रियाया विज्ञापितस्याः सिद्धान्त्यनभिमतत्वात् इति वाच्यम् । अस्याः परमाण्वादीनां महावयव्यन्तानां कार्यकारणभावप्रक्रियायाः कणादाद्यभिहितत्वमित्येतावतैव सर्वथा सिद्धान्त्यभिमतज्ञानेति केनापि वक्तुमशक्यत्वात् । अतः परोक्तप्रक्रियानुसारेण त्रसरेणुषष्ठभागस्यैव वैविक्षिकी परमाणुता । न तु तदंशानामपीत्येव परिहारकरणानुसारेण परमाणुवत् तदंशानामपि अत्यन्तापकृष्टपरिमाणाश्रयत्वात् परमाणुता कुतो न इत्येतत् शङ्कापरत्वमेव ततोऽपि परमाणुत्वमित्यस्य वाक्यस्य स्पष्टमिति तदेव वाच्यमिति । उपलक्षणमेतत् । 'रूपादिमत्वाच्चे'ति सूत्रव्याख्यानरूपस्पर्शादिहेतुभ्यः परमाणोरनित्यता इत्युत्तरानुव्याख्यानव्याख्यानरूपमूले ननु अस्माभिः भूतसूक्ष्माणां नित्यता अङ्गीक्रियते तत्कथमेवमनुमीयते । मैवम् । न हि परमाणवो भूतसूक्ष्माणि किं नामाहङ्कारोपचितानि विकृताकारश्चानित्य एवेति ग्रन्थे भूतसूक्ष्माणां विकृताकारस्य परमाणुतया विवक्षितत्वोक्त्या परमाण्ववयवानां विकृताकारत्वरूपपरमाणुत्वाभावोक्त्या च परमाणुतायाः वैविक्षिकत्वस्य सिद्ध्या कणादाद्यभिमतत्रसरेणुषष्ठभागस्यैव परमाणुरित्येतत्सङ्केतविषयतायाः मूलकृदभिप्रेतत्वेन सिद्धतया भूतसूक्ष्माणां उक्तसङ्केतविषयत्वाभावेन परमाणुविषयत्वस्यैव सिद्ध्या तल्लक्ष्यत्वाङ्गीकारस्य सुतरामयुक्तत्वात् । अन्यथा भूतसूक्ष्माणां परमाणुतया रूपस्पर्शादिहेतुभ्यः तेषामपि अनित्यत्वं स्यात् इत्यपि द्रष्टव्यम् । **तस्यापीति** । एतच्च द्वितीयलक्षणोपपादनावसरे ग्रन्थकृदेव विभावयिष्यतीति ध्येयम् । **अव्याप्तिरपीति** । जीवाकाशपरमाण्वोः नित्यत्वेन विभिन्नावयवेषु इत्यंशस्याभावेन प्राप्ता याऽव्याप्तिः सापि नेत्यर्थः ।

स०ना०— यस्य विभिन्नावयवेष्विति । यस्य वस्तुनः विभिन्नावयवेषु स्ववाचकशब्दावाच्येष्ववयवेषु सत्स्वपि तेषां विभागो भवितुं नार्हति स परमाणुरित्यर्थः । आकाशावयवाः आकाशशब्दवाच्या एवेति न भिन्नावयवाः ततश्च नाकाशेऽतिव्याप्तिः । परामाण्ववयवास्तु न परमाणुशब्दवाच्या इति वैवक्षिकभिन्नावयवाः । ततश्च नासम्भवः । एतेन यावद्वस्तुनः भेदवदित्युक्तदिशा तेषां अपरमाणूनां भेदाभावात् भेदाङ्गीकारो न युक्त इति परास्तम् ।

विठ्ठल०— नन्वविभाग इतीति । इदं परमाणुलक्षणपरं 'अविभागः परमाणुते'ति वाक्यं कथं व्याख्यायत इत्यर्थः । **गुणादेरिति** । गुणादौ विभागरूपगुणभावादिति भावः । **असम्भवादिति** । द्रव्यमात्रस्य विभागलक्षणगुणाधिकरणत्वनियमादिति भावः । **यत्किञ्चिदिति** । यत्किञ्चिद्वस्तु निरूपितेत्यर्थः । **मेरुमन्दरयोरिति** । तथा कदाप्यसंयुक्तत्वेनान्योन्यरूपितस्य विभागस्याभावादिति भावः । **गगनादेरिति** । गगनादेः

नित्यत्वेन तदवयवानां कदापि विभागादिति भावः । **अवयवनाशादेवेति** । समवायकारणनाशादेवेत्यर्थः । न तु तत्संयोगनाशात् । येन तत्रावयवविभागः स्यात् । तथा च यावत्स्वसत्त्वमवयवविभागाभावादिति व्याप्तिरिति भावः । **यस्य विभिन्नावयवेष्विति** । यस्य विभागो नास्ति इत्येवोक्ते गुणादिष्वतिव्याप्तिः अतो अवयवेषु सत्स्वपीत्युक्तम् । परमते गुणादेरवयवाभावान्नातिव्याप्तिः । गगनादावतिव्याप्तिवारणाय विभिन्नावयवेषु सत्स्वपीत्युक्तम्, अवयवनाशान्नष्टे अवयविन्यतिव्याप्तिवारणाय अर्हतीत्युक्तम्, तदुपपादनाय कदापीत्युक्तम् । अस्मन्मतानुसारेण तु स्वरूपकथनाय विशेषणानि मूर्तत्वे सतीत्यपि ग्राह्यम् । अचेतनमात्रे अवयवभेदाभ्युपगमात् तत्त्वविवेकवाक्यस्य धर्ममात्रपरत्वापरत्वान्न क्षुद्रोपद्रवः ।

चषक— कथमिदमिति । 'अविभाग' इत्यानुपूर्वीकमौलप्रतीकं कीदृशार्थप्रत्यायकं विज्ञायते भवद्भिरित्यर्थः । **सर्वथेति** । विभागत्वरूपसामान्यधर्मावच्छिन्नाभाव इत्यर्थः । **प्रसङ्गादिति** । गुणादेर्निर्गुणत्वादिति भावः । विभागपदस्य भावसाधनघञन्ततया । **असम्भवादिति** । द्रव्यत्वावच्छेदेन विभागोपगतेरिति भावः । **मेरुमन्दरयोरपीति** । तदेकतरानुयोगिकापरप्रतियोगिकसंयोगस्य अलीकतया तन्नाशकविभागस्याप्यलीकत्वादिति भावः । सिद्धान्तिदिशेदम् । न्यायनयेऽलीकप्रतियोगिकाभावानुपगतेरित्यवसेयम् । **अवयवेति** । तेषां पार्थक्याभाव इत्यर्थः । **गगनादेरपीति** । अवयविनस्तत्र नित्यत्वेनावयवविभागाभावादिति भावः । गगनादेः सावयवत्वेऽवयविविभागाभावे च विप्रतिपन्नं प्रति पटादावनित्यावयविन्यतिप्रसङ्गमभिधत्ते **अवयवेति** । **तदापत्तेः** परमाणुत्वापत्तेः । अत्र गगनादावनतिप्रसङ्गाय सप्तम्यन्तपदोपादानम् । अवयवनाशान्नष्टेऽवयविन्युक्तक्षतिविधूननाय योग्यताभावपर्यन्तानुधावनम् । तत्सजातीयेऽवयविन्यवयवविभागावनतिदर्शनेन तद्योग्यताया एव तत्र सत्त्वान्न क्षतिरिति भावः । अत्र विभिन्नावयवेष्वित्यस्यावयविना भिन्नेष्विति नार्थः । किन्तु एकैकोऽप्यवयवः स्वान्तर्भेदयुक्तः सखण्डो न त्वखण्ड इत्यर्थः । तथा च विभिन्नेषु अनेकांशेष्वेतेष्ववयवेष्विति फलितार्थ इति व्याकर्तृणां निरूढः पन्थाः ।

॥ इति परमाणुपदनिर्वचनम् – इतरनिर्वचननिषेधपूर्वकम् ॥

* * *

॥ अथ तत्र उक्तपरमाणुपदनिर्वचनेन अवयवपरंपराविश्रान्त्यभावेऽनवस्थेति-शङ्कान्तरस्यापि निरासः ॥

८१ सु०— एतेनावयवपरम्पराव(श्रान्त्यभा)श्रमाभावेऽनवस्थेत्यपि परास्तम्, मूलक्षयाभावस्य सूचितत्वात् ।

परि०— सूचितत्वादिति । अवयवानामारम्भकत्वे पूर्वपूर्वावयवारम्भानन्तरमेवोत्तरोत्तरावयवारम्भनियमेन प्रकृतपरमाणुलक्षणावयव्यारम्भस्य वाच्यतया पूर्वपूर्वासिद्ध्या परमाण्वाख्यावय-

व्यसिद्धेर्मूलक्षयकारी स्यात् । न चैवम् । आरम्भकावयवानां कार्यदशान्यदशायां विभक्तत्वात् इह चाविभाग इति कदापि विभागाभावोक्त्याऽनारम्भकत्वसूचनेन वा कदाप्यवयवविभागाभावोक्त्या परमाणोरकार्यत्वनित्यत्वयोः सूचनेन वा प्रकृतपरमाण्वाख्यवस्तूत्पत्तिज्ञप्त्यप्रतिबन्धकत्वसूचनादिति भावः ।

यादु०— मूलक्षयेति । यस्य विभिन्नावयवेषु सत्स्वपि तेषां विभागो भवितुं नार्हतीत्युक्त्या परमाणुरूपावयविनो नित्यत्वावगमेन स्वावयवाजन्यतायाः सूचनादित्यर्थः । तथा च यदि हि तत्तज्जनकीभूतावयवपरम्पराया अविश्रमस्तदा परमनवस्थादूषणम् । पूर्वपूर्वावयवानुत्पत्तावुत्तरोत्तरावयव्यनुत्पत्तेः प्रकृतकार्यस्याप्यनुपपत्तिरिति मूलक्षयसम्भवात् । न चैवमस्माभिरङ्गीक्रियते किन्त्वनन्तांशोऽपि परमाणुः स्वावयवाजन्य एवादिकार्यजनक इति । ततश्च घटादिकार्यजनकावयवपरम्परायास्तत्र विश्रान्तिसम्भवान्न मूलक्षय इति भावः ।

श्रीनिधि०— मूलक्षयाभावस्येति । उत्पत्तिज्ञप्तिमूलं तत्प्रतिबन्धो हि मूलक्षयः । नाविश्रममात्रम् । एवं 'चाविभाग' इत्यनेन पूर्वपूर्वावयवैः उत्तरोत्तरावयविन उत्पत्तिर्नास्तीति ज्ञापितम् । यदि स्यादुत्पत्तिः तर्हि भावकार्यस्य नाशनियमेनाविभागकथनमसङ्गतं स्यात् । न च समवायिकारणनाशानाशे कथमस्य ज्ञापकत्वम् । तत्राविभागेऽपि नाशदर्शनादिति चेन्न । तदापि विभागभावनार्हत्वात् । तदिदमुक्तं कदापि नार्हतीति । विभागभावनयोग्यता नास्तीत्यर्थः । उत्पत्त्यभावे च कस्य प्रतिबन्धेन मूलक्षयः स्यात् । ज्ञाप्यप्रतिबन्धस्तु स्फुट एव । परमाणुज्ञानस्य घटादिवत् पूर्वपूर्वाङ्गज्ञानानपेक्षणादिति भावः ।

शे०वा०— एतेनेति । यस्य विभिन्नावयवेषु सत्स्विति परमाणोर्विभिन्नावयवसद्भावोक्त्या तदवयवानां भूतसूक्ष्माणां विभिन्नावयवासत्त्वसूचनद्वारा नित्यत्वसूचनपरेणाविभाग इति मूलेनेत्यर्थः । **मूलक्षयेति** । न तावदवयवपरम्पराकल्पकाभावोऽत्र मूलक्षयस्सम्भवति । अविश्रान्तावयवपरम्परायाः साक्षिसिद्धतायाः समर्थनात् । नापि घटादिकार्यानुत्पत्तिरूपप्रयोजनपरिक्षयः । जनकीभूतावयवपरम्पराया अविश्रान्तिपक्षे पूर्वपूर्वावयवानुत्पत्तावुत्तरोत्तरावयवानुत्पत्त्या घटादिरूपप्रकृतकार्यस्याप्यनुत्पत्तिरिति मूलक्षयप्रसङ्गोऽपि परमाण्ववयवभूतसूक्ष्मेषु तद्विश्रान्त्यभ्युपगमवादे तदप्रसरादिति भावः ।

वा०२०— साक्षितायाः इति । ननु यदि परम्परा साक्षिसिद्धा तर्हि कल्पकापेक्षायाः अभावात् कल्पनाभाव एव प्राप्नोति । कल्पकपरीक्षया भाववर्णनेन कल्पनोपपादनं विरुद्धमिति चेत् । अप्रामाणिककल्पनागौरव इत्यादाविव कल्पनापदस्योपपादकतया स्वीकारपरत्वेनादोषात् । एवमन्यत्रापि ज्ञेयम् । **परमाण्ववयवभूतसूक्ष्मेषु तद्विश्रान्तीति** । जनकीभूतावयवपरम्परायाः तेषु विश्रान्तिसत्त्वेनेत्यर्थः ।

अयं भावः । प्रकृतघटादिकार्यानुत्पत्तिरेव वाच्या । अवयवावयविपरम्परायाः अविश्रान्त्यङ्गीकारे एतद्घटाद्यवयवादिपरम्परायां मूलाभावेन तदुत्पत्त्यनुपपत्तौ तदवयवकद्रव्यस्याप्यनुपपत्तिरिति परम्परया घटाद्यवयवोत्पत्त्यसम्भवात् घटाद्यनुत्पत्तिप्रसङ्गः इति । न तु इयमस्ति । अवयवावयविपरम्परायाः अविश्रमेऽपि घटादिजनकपरम्परायाः परमाण्ववयवभूतसूक्ष्मेषु पर्यवसन्नत्वेन भूतसूक्ष्माणां च नित्यत्वे न तदारम्भकद्रव्यान्तरानङ्गीकारतद्रूपमूलकारणेन परमाणूत्पत्तिसम्भवात् । **ततश्च न प्रयोजनपरिक्षय इति** । यतो विभिन्नं वस्तु नास्तीत्यर्थः । **स्यादिति** । विभागशब्दस्य विभज्यमानद्रव्यपरत्वे अघटं भूतलं इत्यादिवत् अविभागशब्देन विभिन्नशून्यत्वं उक्तं भवति । तस्यैव तात्पर्यार्थो यतो भिन्नं नास्तीत्यर्थ इतीति ध्येयम् ।

स्वावयवानां चेति । नन्वत्र स्वावयवावयवानामेव ग्रहणं कर्तुमुचितम् । तानादाय प्राप्तासम्भवस्य वक्ष्यमाणरीत्या अनवयवरूपमित्यर्थकस्वतन्त्रमित्यनेन परिहारसम्भवात् । न तु स्वावयवानामपि । तानादाय प्राप्तासम्भवस्यानवयवरूपकमित्यर्थकेन स्वतन्त्रमित्यनेन परिहारायोगात् । स्वावयवानां अवयवत्वावस्थानापन्नत्वसत्त्वेन वक्ष्यमाणानवयवरूपत्वस्य तत्रापि सत्त्वात् इति चेत् न । भवेदेवं यद्यत्र स्वावयवावयवसमकक्षत्वमसम्भवप्राप्तावेव विशेषणेन तत्परिहारेऽपि स्वावयवानामभिप्रेतं स्यात् । न चैवम् । अपि तु असम्भवप्राप्तावेव तयोः समकक्षत्वम् । स्वावयवावयवानिव स्वावयवानपि आदाय असम्भवस्य दुर्वारत्वात् । तमेतं विशेषमभिप्रेत्यैव स्वावयवानां वेति प्रथमवाशब्दोऽनवस्थार्थकः टीकाकृता प्रयुक्तः । अन्यथा स्वावयवानां तदवयवानां वेत्येवावक्ष्यत् । स्वावयवानुपस्थितौ द्वाराभावेन तदवयवावयवानामप्युपस्थितिर्न सम्भवतीति तदुपस्थित्युपयोगितया स्वावयवग्रहणं कृतमित्यप्याहुः । केचित् स्वतन्त्रमित्यनेनैव स्वावयवानां तदवयवानां च व्यावृत्तिरिति उभयेषामपि युक्तमेवासम्भवप्राप्तावेव तत्परिहारेऽपि समकक्षत्वम् । न चावयवरूपमित्यर्थकं अनवयवरूपमिति । अपरं स्वावयवं विनेति । तत्र स्वावयवावयवानादाय प्राप्तासम्भवस्यानवयवरूपमित्येतदर्थकस्वतन्त्रमित्यनेनैव परिहारः । तत्राद्यपरिहारोपपादनं तस्यैव विवरणं इत्यादिना कृतम् । द्वितीयपरिहारोपपादनं तु ननु परमाण्ववयवेत्यादिना तमेवासम्भवं पुनः उत्थाप्य तत्परिहारप्रतिपादनेन करिष्यते । तदर्थं च इत्यतः इत्यतःपरं विवरणान्तररूपमिति शेषः पूरणीयः । स्वावयवानादायासम्भवस्य प्रथमतोऽभिधानेऽपि तत्परिहाराय पश्चाद्यत्नकरणं सूचीकटाहन्यायेनेति न दोषः । अतो न काप्यनुपपत्तिरित्यप्याहुः । वस्तुतस्तु अवयवत्वावस्थानापन्नत्वार्थकेनानवयवरूपमित्येतद्विवरणेनैवासम्भवद्वयस्यापि परिहारः टीकाकृदभिप्रेतः । परमाणूत्पत्त्यनन्तरं भूतसूक्ष्माणां अवयवत्वावस्थापन्नस्यापि सत्त्वेन तादृशापकृष्टपरिमाणसद्भावेऽपि अवस्थानापन्नापकृष्टपरिमाणस्य सत्त्वाप्राप्त्या लक्षणसत्त्वस्य स्वावयवावयवेऽपि साम्यात् । ततश्च स्वावयवावयवानामिव स्वावयवानामपि असम्भवप्राप्तितत्परिहारयोः समकक्षत्वमेवेति स्वावयवानामपि ग्रहणे बाधकाभावः ।

ननु परमाण्ववयवेत्यादि टीकाग्रन्थेन तु अवयवत्वावस्थानापन्नत्वं नाम सर्वदा यदवस्थापन्नं तदतिरिक्तत्वं विवक्षितम् । भूतसूक्ष्माणां च परमाणूत्पत्त्यनन्तरं अवयवावस्थापन्नत्वे विद्यमानेऽपि तदुत्पत्तेः प्राक्

क्षुध् क्षान्तौ । धत्तौ क्षौण्वाम् । **अक्षवत्क्षौण्वीत्** । अक्षवत्क्षौण्वाम् । अक्षवत्क्षौण्वीत्क्षौण्वाम् । अक्षवत्क्षौण्वीत्क्षौण्वाम् । अक्षवत्क्षौण्वी

यतः अवयवानात्मकमपकृष्टपरिमाणमचेतनं वस्तु नास्ति स परमाणुरिति निष्कृष्टार्थः । प्रकरण-बलादचेतनमिति लाभान्नेशरूपमादायासम्भवशङ्का कार्या । **पदार्थत्वसंयोगित्वाभ्यां परमाणोः सांशत्वसाधने व्याघातनिरासः ॥**

यादु०— ननु परमाणुशब्दादुक्तलक्षणाप्रतीत्या न तच्छब्दप्रवृत्तिनिमित्तमित्यस्वरसात् यतः परमाणुर्नास्ति स परमाणुरिति परोक्तमेव लक्षणमनुसृत्य यथाऽत्र न व्याहतिस्तथा व्याख्याति **यद्वेति** । नन्वेवमविभाग इत्यस्य यतो विभिन्नं वस्तु नास्तीत्यर्थः स्यात् ततश्चासम्भव इत्यत आह **यतः स्वावयव-मिति** । अत्र यतोऽपकृष्टपरिमाणं नास्ति स परमाणुरित्येवोक्तेऽसम्भवतादवस्थ्यं, परमाण्वपेक्षयाऽपकृष्ट-परिमाणस्य तदवयवस्य सत्त्वादतः **स्वावयवं विनेति** । नन्वेवमप्यसम्भव एव । एतत्परमाण्वपेक्षया अपकृष्टपरिमाणस्यान्यपरमाण्ववयवस्य सत्त्वादतः स्वावयवं विनेत्यस्य तात्पर्यमाह **स्वतन्त्रमिति** । अप्रतीत्याऽस्याप्यर्थमाह **अनवयवरूपमिति** । अवयवभिन्नमित्यर्थः । तथा च यतोऽवयवभिन्नमपकृष्टपरिमाणं जडं नास्ति स परमाणुरिति लक्षणं पर्यवस्यति । अतो लक्ष्यभूतपरमाण्वपेक्षयाऽपकृष्टपरिमाणस्य भगवद्रूप-विशेषस्य सत्त्वात् पुनरसम्भव इति शङ्काऽनवकाश इति ध्येयम् । एतद्दोषपरिहारायैवास्वतन्त्रमित्येव अत्र पदं विवक्षितमित्यप्याहुः । नन्वेवं परमाण्ववयवेऽतिव्याप्तिः । तदपेक्षयाऽपकृष्टपरिमाणस्यानवयवरूपस्यान्य-स्याभावादिति चेन्न । अवयवभिन्नत्वे सतीति विशेषणस्याप्यत्राभिप्रेतत्वात् । न चैवमसम्भवः परमाणो-रप्यादिकार्यावयवत्वादिति वाच्यम् । अविभक्तावयवभिन्नत्वस्य विवक्षितत्वात् । परमाणोश्चादिकार्यावयवा-न्तराद्विभक्तत्वात् । अतो नासम्भवो नाप्यतिव्याप्तिरिति । पूर्वलक्षणेऽत्र च प्रकृतिरूपं सूक्ष्मं यद्रजस्तदेव लक्ष्यम् । न पराभिप्रेतं जालसूर्यमरीचिस्थसूक्ष्मभागापेक्षया षष्ठभागरूपम् । अग्रे तदनित्यतायां वक्ष्यमाण-त्वेनोक्तलक्षणयोस्तत्रासम्भवादिति ज्ञातव्यम् ।

कं०रा०— विभज्यते भिद्यत इति व्युत्पत्त्या विभागशब्दस्य भिन्नवाचित्वे अविभागशब्देन भिन्न-भावो वक्तव्यः । स च न सम्भवति । स्वापेक्षया च भिन्नस्य सत्त्वादित्यतो विवक्षितमर्थमाह **यतः स्वावयवं विनेति** । अनेनाविभागशब्दस्य स्वावयवाद्भिन्नस्यापकृष्टपरिमाणस्याभावोऽर्थ इत्युक्तं भवति ।

श्रीनिधि०— विभागः विभिन्नम् । एवं पदार्थं उक्त्वा वाक्यार्थमाह **यत इति** । स्वतन्त्रमित्यस्यार्थो **अनवयवरूपमिति** । ततः अपकृष्टपरिमाणं नास्ति सपरमाणुरित्युक्ते असम्भवः । स्वावयवस्य सत्त्वात् अतः स्वावयवं विनेत्युक्तम् । एवमप्यसम्भवः स्वावयवावयवस्यापि सत्त्वात् इत्यतस्तदेव व्याख्याति **अनव-यवरूपमिति** । ननु द्व्यणुकेऽतिव्याप्तिः तदपेक्षया प्रकृष्टपरिमाणस्य परमाणोस्तदवयवत्वादिति चेन्न । अवयवपदस्यांशपरत्वात् । न हि परमाणुर्द्व्यणुकांशः । किन्तु तदारम्भकत्वेनावयवः । विभागानर्होऽस्येकदेश अंश इत्युच्यते । न च परमाणुर्द्व्यणुकस्य तथेति ।

शे०वा०— ननु परमाणुशब्दाद्यतः परमाणुर्नास्ति स परमाणुरिति परोक्तमेव तच्छब्दप्रवृत्तिनिमित्तं प्रतीयते न तु यस्य विभिन्नावयवेषु सत्स्वित्याद्युक्तरूपमित्यविभागस्य परमाणुशब्दप्रवृत्तिनिमित्तत्वाश्रयणमयुक्तमित्यतः परोक्तं परमाणुशब्दप्रवृत्तिनिमित्तमङ्गीकृत्यापि यथा तत्र न व्याहतिस्तथा तत्परतया भाष्यं व्याचष्टे **यद्वेति** । नन्वेवमविभाग इत्यस्य यतो विभिन्नं वस्तु नास्तीत्यर्थः स्यात् । ततश्चासम्भव इत्यत आह **यत इति** । अत्र यतोऽपकृष्टपरिमाणं नास्ति स परमाणुरित्युक्तेऽसम्भवः । स्वावयवानां वा तदवयवानां वाऽपकृष्टपरिमाणानां सत्त्वादतः स्वतन्त्रमित्युक्तम् । तस्यैव विवरणमनवयवरूपमिति । अवयवत्वावस्थानापन्नमित्यर्थः । तथा च परमाण्वपेक्षयाऽपकृष्टपरिमाणसत्त्वेऽपि अवयवत्वावस्थानापन्नापकृष्टपरिमाणाभावान्नासम्भवः ।

ननु परमाण्ववयवभूतभूतसूक्ष्मावयवानां भूतसूक्ष्मरूपस्वावयविनाऽभेदेनावयवत्वावस्थापन्नानामेव तेषां सत्त्वेन तादृशापकृष्टपरिमाणमादायासम्भवस्योक्तविशेषणेन परिहारेऽपि परमाण्ववयवभूतभूतसूक्ष्माणां परमाणुना भेदाभावे पूर्वलक्षणस्याव्याप्त्यापत्त्या तद्भेदस्यावश्यकत्वेनावयवत्त्वावस्थानापन्नानामपि तेषां परमाणूत्पत्त्यादेः पूर्वं सत्त्वावश्यम्भावात् स्वावयवरूपभूतसूक्ष्मलक्षणापकृष्टपरिमाणसद्भावात् तादृशापकृष्टपरिमाणमादाय परमाणावसम्भवः स्यादेवेत्यत उक्तं **स्वावयवं विनेति** । स्वावयवातिरिक्तमित्यर्थः । तथा च परमाण्वपेक्षया स्वावयवरूपस्यावयवत्वावस्थानापन्नापकृष्टपरिमाणस्य सत्त्वेऽपि स्वावयवातिरिक्तस्य अवयवत्वावस्थानापन्नापकृष्टपरिमाणस्याभावान्नासम्भवः । न चैवं द्व्यणुकस्यापि परमाणुत्वापत्तिः । तदपेक्षया तदवयवातिरिक्तस्य अवयवत्वावस्थानापन्नापकृष्टपरिमाणस्य तत्राप्यभावादिति वाच्यम् । तत्रापि परमाण्ववयवभूतभूतसूक्ष्माणामेव द्व्यणुकावयवातिरिक्तानाम् अवयवत्वावस्थानापन्नानामपकृष्टपरिमाणत्वेन तत्रोक्तलक्षणाभावात् । नापि परमाण्ववयवेऽतिव्याप्तिः । तदवयवानामपि सर्वदाऽवयवत्वावस्थापन्नानामेव सत्त्वेन तत्रोक्तलक्षणसद्भावादिति वाच्यम् । अत्र स्वावयवव्यतिरिक्तेति विशेषणमहिम्ना स्वावयवानामनवयवत्वावस्थापन्नानामप्यपकृष्टपरिमाणानां सत्त्वलाभेन भूतसूक्ष्मावयवानां चावयवत्वावस्थापन्नानामेव सत्त्वेन स्वावयवरूपावयवत्वावस्थानापन्नापकृष्टपरिमाणस्य तत्राभावेन तत्रोक्तलक्षणाविरहात् । अत एव नाकाशपरमाणौ जीवपरमाणौ वाऽतिव्याप्तिः । तत्र तदवयवानामनवयवत्वावस्थापन्नानामपकृष्टपरिमाणानामभावात् । न च मनसि प्रसङ्गः । तदवयवभूतभूतसूक्ष्माणामनवयवत्वावस्थापन्नानामपकृष्टपरिमाणत्वेन तत्रोक्तलक्षणसत्त्वादिति वाच्यम् । तस्य लक्ष्यतयेष्टत्वेन तदप्रसङ्गात् । परैरपि निरवयवः क्रियावान् परमाणुरिति लक्षणे तस्य लक्ष्यत्वाङ्गीकारात् अन्यथा परमाणुलक्षणस्य तत्रातिव्याप्तिप्रसङ्गात् । तथा चायं लक्षणनिष्कर्षः । यतः स्वावयवा एवावयवत्वावस्थानापन्ना अप्यपकृष्टपरिमाणाः सन्ति तदतिरिक्तमनवयवत्वावस्थापन्नमपकृष्टपरिमाणं नास्ति न परमाणुरिति सर्वमनवद्यम् ।

केचित्तु । अनवयवरूपमित्यस्य स्वानवयवरूपमित्यर्थमङ्गीकृत्य स्वावयवं विनेत्यस्य स्वतन्त्रपदार्थविवरणरूपतां चाश्रित्य यतः स्वतन्त्रं स्वानवयवरूपमपकृष्टपरिमाणं नास्ति स परमाणुरित्येवात्र

परमाणुलक्षणं ग्रन्थकृदभिमतम् । अत्र च यतोऽपकृष्टपरिमाणं नास्ति स परमाणुरित्येव कृते स्वावयवावयवरूपापकृष्टपरिमाणसद्भावादसम्भवः । तद्वारणाय **स्वतन्त्रमिति** । तस्य विवरणं **स्वावयवं विनेति** । तथा च यदीयापकृष्टपरिमाणं कुतोऽस्यास्मादपकृष्टत्वमित्युक्ते तदवयवावयवत्वादित्येवंरूपेण स्वावयवापेक्षं न भवतीत्यर्थः । ततश्चावयवावयवानामपकृष्टत्वस्य अवयवसापेक्षत्वेन तदनपेक्षापकृष्टपरिमाणाभावान्नासम्भवः । तथाऽपि परमाण्वपेक्षया तदवयवरूपापकृष्टपरिमाणसद्भावादसम्भव एव । तदीयापकृष्टत्वस्य स्वावयवानपेक्षत्वेन स्वावयवमनन्तर्भाव्यापकृष्टपरिमाणस्यैव सत्त्वात् । अत उक्तं **स्वानवयवरूपमिति** । ततश्च स्वावयवरूपस्यैवापकृष्टपरिमाणस्य सद्भावात् स्वावयवानपेक्षं स्वावयवरूपमपकृष्टं परिमाणं नास्तीति नासम्भवः । न चैवम् यतः स्वानवयवरूपमपकृष्टपरिमाणं नास्तीत्येव लक्षणमास्तां कृतमितरेणेति वाच्यम् । स्वावयवावयवानां परमाण्वनवयवत्वेन अनवयवरूपापकृष्टपरिमाणसद्भावेनासम्भवापत्त्या स्वावयवं विनेत्यस्यावश्यकत्वात् । न च परमाण्ववयवेऽतिप्रसङ्गः । तस्यापि परमाणुत्वेन लक्ष्यत्वात् । न चैवं द्व्यणुकेऽप्युक्तरीत्या लक्षणसत्त्वादतिप्रसङ्गः । तत्र द्व्यणुकावयवमनन्तर्भाव्यापकृष्टस्य स्वानवयवरूपस्य मनस एव सत्त्वेन स्वानवयवरूपमपकृष्टं परिमाणं नास्तीत्यस्यांशस्य तत्राभावात् । एवं च सर्वं सार्थकमेवेत्याहुः ।

अत्र ब्रूमः । परमाण्ववयवानां लक्ष्यत्वाङ्गीकारेण तत्रातिव्याप्तिपरिहारस्तावदयुक्तः । तथा सति पूर्वलक्षणस्य तत्राव्याप्त्यापातात् । तत्र त्रसरेणुषष्ठभागस्यैव लक्ष्यत्वमत्र च तदवयवानामपीति वैचित्र्यकल्पनं च निर्मूलत्वादुपेक्षणीयम् । न चान्यथाऽनुपपत्तिरेव तत्र मूलम् । उक्तरीत्योभयत्रापि त्रसरेणुषष्ठभागस्यैव लक्ष्यतायामपि लक्षणद्वयस्य समञ्जसीकृतत्वात् । किञ्च परमाण्वपेक्षया जीवावयवरूपस्यापकृष्टपरिमाणस्य सत्त्वात्तदादायासम्भव एव । तस्य त्रसरेणुषष्ठभागानवयवत्वात् । तदवयवानपेक्षत्वाच्च तत्रोक्तलक्षणाभावात् । यदि च परमाणुत्वावच्छिन्नस्य लक्ष्यत्वाज्जीवस्यापि तादृशत्वेन जीवावयवस्य स्वानवयवत्वाभावेन स्वानवयवरूपापकृष्टपरिमाणाभावस्य सत्त्वान्नासम्भव इति मन्यसे तर्हि त्रसरेणुषष्ठभागवत् तदवयवोऽपि परमाणुत्वेनात्र लक्ष्य इति त्वन्मते परमाण्ववयवावयवस्यापि स्वावयवत्वेन स्वानवयवरूपापकृष्टपरिमाणाभावस्य सत्त्वात् । अवयवावयवमादायासम्भवप्रसक्तेरेवाभावेन स्वावयवं विनेति विशेषणवैयर्थ्यप्रसङ्गादिति सङ्क्षेपः ॥

वा०र०— ननु यतो अनवयवरूपं अपकृष्टं परिमाणमेव नास्ति इत्येवोक्ते द्व्यणुकेऽतिव्याप्तिः ततोऽपकृष्टपरमाणोः तदवयवतया अवयवरूपापकृष्टपरिमाणस्यैव सत्त्वलाभेऽपि द्व्यणुकापेक्षयाऽवयवरूपापकृष्टपरिमाणस्य सत्त्वाभावेन यतोऽनवयवरूपमित्युक्तलक्षणस्य सूत्रसत्त्वादित्यतो व्याचष्टे **अवयवत्वावस्थानापन्नमित्यर्थ इति** । ततश्च परमाणोरवयवतया अनवयवरूपत्वाभावेऽपि द्व्यणुकोत्पत्तेः प्राक् अवयवत्वावस्थापन्नत्वेन द्व्यणुकापेक्षया अवयवत्वावस्थानापन्नापकृष्टपरिमाणत्वस्यैव प्राप्त्या यतोऽवयवत्वावस्थानापन्नमपकृष्टपरिमाणं नास्तीति लक्षणस्याभावात् न तत्रातिव्याप्तिरिति भावः । ननु स्वावयवं विनेति विशेषणोपादानस्य वक्ष्यमाणन्यायेन सिद्धत्वात् । स्वावयवातिरिक्तावयवरूपं अपकृष्टपरिमाणं नास्तीत्यर्थपर्यवसानात् द्व्यणुकापेक्षया स्वावयवभूतपरमाण्वतिरिक्तानवयवरूपापकृष्टपरिमाणस्य तद्द्व्यणुकानारम्भक-

परमाणुलक्षणस्य भूतसूक्ष्मस्य च सत्त्वेन तादृशपरिमाणं नास्तीत्यस्य लक्षणस्याभावात् । अतिव्याप्तिरेव नेति न तत्परिहारायोक्तव्याख्यानं आवश्यकमिति चेत्, न । तादृशापकृष्टपरिमाणं भूतसूक्ष्मादिकमपि अवयवरूपमेवेति स्वावयवातिरिक्तावयवरूपापकृष्टपरिमाणमेव तत् ज्ञातम् । अतोऽनावयवरूपापकृष्टपरिमाणत्वस्य तत्राभावेन भूतसूक्ष्ममादाय स्वावयवातिरिक्तानवयवरूपापकृष्टपरिमाणशून्यत्वरूपलक्षणाभावस्य वक्तुमशक्यतया व्याख्यान-प्रयोजकीभूतातिव्याप्तेर्दुवारत्वात् । अवयवस्थानापन्नेति व्याख्यानकरणे तु भूतसूक्ष्ममादायैव लक्षणाभावेनाति-व्याप्तिपरिहारोपपत्तिः । भूतसूक्ष्माणां अनवयवत्वाभावेऽपि परमाणूत्पत्तेः प्राक् अवयवत्वावस्थापन्नत्वाभावेन स्वावयवातिरिक्तावयवत्वावस्थानापन्नतया तादृशापकृष्टपरिमाणत्वस्यैव द्व्यणुके विद्यमानत्वेनोक्तविधमपकृष्ट-परिमाणं नास्तीति उक्तलक्षणस्य द्व्यणुकेऽभावात् । तत्रापि परमाण्वावयवेत्यादिना उत्तरटीकायां स्पष्टं चैतत् अवधेयम् । **स्वावयविना अभेदेनेति** । अत्यन्ताभेदेनेत्यर्थः । अन्यथा परमाणुवत् भेदस्यापि प्रसक्त्या अवयवत्वावस्थापन्नानामेवेत्यस्यासिद्ध्यापातादिति द्रष्टव्यम् । **अव्याप्त्यापत्तेरिति** । विभिन्नावयवेषु इत्यंशा-भावप्रयुक्ताव्याप्तीत्यर्थः । **परमाणूत्पत्त्यादेरिति** । आदिपदेन विनाशपरिग्रहः । **पूर्वमिति** उत्तरत्वस्यापि उपलक्षणम् । ततश्चोत्पत्तेः पूर्वं विनाशोत्तरं चेति लब्धं भवतीति द्रष्टव्यम् । **असम्भवः स्यादेवेति** । न तु अवयवरूपमित्यनेन परिह्रियत इत्येवकारार्थः । **तदवयवावयवानां** इत्यत्र तच्छब्देन परमाण्वावयवरूपभूत-सूक्ष्मपरिग्रहः । भूतसूक्ष्मावयवावयवानामेव स्वावयवातिरिक्तत्वसम्भवेन तानादायैवातिव्याप्तिचोदनसम्भवात् । एतेन परमाण्वावयवभूतसूक्ष्मावयवानां स्वावयवातिरिक्तत्वेन एव व्यावृत्तिरिति शङ्कानवकाशः इति ज्ञेयम् । द्व्यणुकावयवातिरिक्तानां अवयवत्वावस्थानापन्नानामिति पूर्वत्र *स्वावयवानामवयवत्वावस्थानापन्नानामिति* मध्ये *तदवयवानामवयवत्वावस्थानापनानामवयवत्वावस्थानापन्नानामिति* च तृतीयवाक्ये पाठः । अनवयवत्वाव-स्थापन्नानामिति *स्थलत्रये* इति पाठपक्षेऽप्यवयवत्वावस्थानापन्नानामित्येवार्थः । अतो न प्रक्रमादिवैगुण्यशङ्केति ज्ञातव्यम् । **सत्त्वलाभेनेति** । अनेन अवयवत्वावस्थानापन्नस्वावयवरूपापकृष्टपरिमाणसद्भावे सति स्वाव-यवातिरिक्तावयवत्वावस्थानापन्नापकृष्टपरिमाणशून्यत्वं परमाणुत्वमित्युक्तं भवति । अत्र परमाण्वावयवेति व्याप्तिपरिहाराय सत्यन्तं विशेषणं उपक्रान्तमेव विशेषणमात्रं तु द्व्यणुकादौ प्रसक्तं इति विशेष्यभाग इत्यपि पूर्वग्रन्थात् स्पष्टं विशेषणस्य प्रयोजनान्तरमाह **अत एवेति** । **अतिव्याप्तिरिति** । उक्तलक्ष्यतावच्छेदकाभावात् तयोरलक्ष्यत्वमिति भावः । **अभावादिति** । मनोवत् उचितरूपेणापि अनित्यत्वाभावेन मुख्यत एव तयोः नित्यत्वादिति भावः । **अवयवत्वावस्थानापन्नाऽपीति** । न केवलं अवयवत्वावस्थापन्नाः इत्यपेरर्थः । **लक्ष्यतयेति** । भूतसूक्ष्मावयवकाहङ्कारोपचितपरिमाणमवविशेषत्वस्य लक्ष्यतावच्छेदकतया मनसोऽपि लक्ष्य-त्वमिति भावः । मनसः परमाणुत्वाङ्गीकारः परसम्मतोऽपीत्याह **परैरपीति** । अत एव मतोपन्यासावसरे अणुत्वं नित्यं चतुर्विधं परमाणुषु मनसि च परिमाण्डिल्यं इत्युच्यत इति । अत एव चतुर्वर्गा इति चोक्तम् । अवयवत्वावस्थानापन्नमिति निष्कर्षपाठः । अनवयवत्वेति पाठेऽपि अवयवत्वावस्थानापन्नमित्यर्थः । परमाणुरिति अत्रेति शब्दद्वययुक्तः पाठः । एक इति शब्दपाठे वृत्त्यभिप्रायः इति बोध्यम् । ननु अणीयांश्चेत्याद्युक्त-रीत्या भगवतः सर्वापेक्षयाऽपकृष्टपरिमाणत्वेनावयवत्वावस्थानापन्नस्वावयवातिरिक्तं ईश्वराख्यं अपकृष्टपरिमाणं

परमाण्वपेक्षया प्राप्तमिति अपकृष्टपरिमाणं नास्तीत्यस्याभावात् असम्भवस्तादवस्थ्यमिति चेत् न । अपकृष्टमित्यस्यापकृष्टमात्रमित्यर्थात् । ईश्वरस्य च अतथात्वात् । मात्रपदेन च यदपेक्षयाऽपकृष्टं तदपेक्षयोत्कृष्टं नेत्यर्थसमर्पणस्य विवक्षितत्वात् स्वावयवादीनां स्वस्वावयवादिभ्यः उत्कृष्टपरिमाणत्वेऽपि अपकर्षावपि त एवोत्कृष्टपरिमाणाभावात् स्वावयवादीनां अपकृष्टमात्रत्वं युक्तमिति न दोषः । तदेतदाह **सर्वमनवद्यमितीति** । **मनस एवेति** । तस्य पार्थिवादि परमाणुवत् स्वतन्त्रपदार्थतया परमाणुमपेक्ष्यापकृष्टत्वानधिकरणत्वादिति भावः । एवमुक्त्या एतेषां पक्षे मनसो लक्ष्यत्वं नास्तीति ध्वनयति । **अन्यथानुपपत्तिरेवेति** । पूर्वलक्षणस्य परमाण्वावयवेऽतिव्याप्तिप्रसक्त्यभावेन तत्र तस्य लक्ष्यत्वाङ्गीकारस्यानावश्यकत्वेऽपि द्वितीयलक्षणस्य परमाण्वावयवेऽतिव्याप्तिसत्त्वेन लक्षणस्य दुष्टत्वापत्त्या तल्लक्ष्यत्वाङ्गीकारस्यावश्यकत्वेन लक्षणसाधुत्वोपपत्तिरिति तदनुपपत्ती एव । क्रमेण पूर्वोत्तरलक्षणयोः परमाण्वावयवलक्ष्यत्वानङ्गीकारे तदङ्गीकाररूपवैचित्र्यकल्पनायां मूलमित्यर्थः । **उभयत्रापीति** । लक्षणद्वयेऽपीत्यर्थः । अत्र पूर्वलक्षणग्रहणं दृष्टान्ततया कृतम् । तल्लक्षणे परमाण्वावयवस्य लक्ष्यतामङ्गीकृत्य टीकाकृत्पक्षोक्तरीत्या तल्लक्षणसमञ्जसीकरणस्य एतत्केचित्पक्षे सम्मतत्वात् एवं लक्षणद्वयस्येति उत्तरत्रापि बोध्यम् । **समञ्जसीकृतत्वादिति** । भूतसूक्ष्माणामेव परमाण्वावयवत्वेन इत्यादिना पूर्वलक्षणस्य । अत्रास्यावयवातिरिक्तेति विशेषमहिमेत्यादिना च द्वितीयलक्षणस्य परमाण्वावयवेऽतिव्याप्तिपरिहारेण समञ्जसीकृतत्वादित्यर्थः । द्व्यणुकेऽतिव्याप्तिपरिहारप्रकारेणातिप्रसङ्गमाह **किञ्चेति** । जीवावयवपरमाण्वपेक्षया अपकृष्टत्वे नियामकमाह **तस्य त्रसरेण्विति** । परमाण्वावयवानपेक्षत्वं चाह **तदवयवेति** । न तु परमाण्वावयव एव लक्ष्य इति नास्ति । अपि तु परमाणुतदवयवावुभावपि । तथा च परमाणुलक्ष्यत्वे पक्षे अवयवावयवमादायासम्भवः स्यादेव इत्यत आह **सङ्क्षेप इति** । अथवा परमाण्वावयवलक्ष्यत्वपक्षे तदवयवावयवमादायासम्भवः तस्य परमाण्वावयवावयवत्वाभावेन स्वानवयवरूपत्वात् इत्यत आह **सङ्क्षेप इति** । तदर्थस्तु तथा सति द्व्यणुकेऽतिव्याप्तिपरिहारायोगः । परमाणुमात्रस्य लक्ष्यत्वे मनःपरमाणोरपि लक्ष्यत्वापत्त्या तस्य यत इति पञ्चम्यर्थावधितया तमादायापकृष्टपरिमाणसद्भावव्युत्पादनायोगात् । अन्यथा मनोऽवयवमादायैवासम्भवप्रसङ्गः । तेषां पार्थिवादिपरमाण्वावयवत्वाभावात् । परमाण्वावयवानपेक्षत्वाच्च । तथा मनस्यपि अतिव्याप्तिः । तस्यापि स्वावयवानपेक्षस्वानवयवरूपापकृष्टपरिमाणाभाववत्वात् । आकाशपरमाणावतिव्याप्तिस्तु नाशङ्किता न वा परिहृता इत्यादि द्रष्टव्यः ।

विट्ठल०— अस्य व्याख्यानस्य परमाणुशब्दाननुसारित्वात्प्रकारान्तरेणाविभागशब्दार्थमाह **यद्वेति** । **तदभाव** इत्यस्य स्वस्मिन् भिन्नस्त्वभाव इत्यर्थः । स्वापेक्षयाभिन्नं वस्तुनीत्यर्थ इति असम्भविनिरासाय पराचष्टे **यतः स्वावयवमिति** । यतोऽपकृष्टपरिमाणं वस्तु नास्ति स परमाणुरित्युक्ते असम्भवः स्वावयवस्य स्वतोऽपकृष्टपरिमाणत्वादित्यत उक्तं **स्वावयवं विनेति** । तथाप्यसम्भव एव परमाण्वन्तरावयवस्य स्वापेक्षयाऽपकृष्टपरिमाणस्यासत्त्वादित्यत उक्तं **स्वतन्त्रमिति** । स्वतन्त्रमित्यस्यैव विवरणं **अनवयवरूपमिति** । तर्हि यतः सकाशादाकृष्टपरिमाणमवयविभूतं वस्तु नास्ति परमाणुरित्यापन्नं ॐ इति चेत्तर्हि स्वावयवं

विनेति व्यर्थमिति चेत् स्वरूपकथनार्थं तदिति ब्रूमः । तथा सर्वतो अणोर्भगवतोऽत्र प्रस्तुतत्वात् तमादायासम्भव इति न वाच्यम्, जडानामेवात्र प्रस्तुतत्वात् । अत्र नित्यपरमाणुरेवालक्ष्यतयाभिमतः न तु रूपादिमत्वादि-वक्ष्यमाणः कार्यपरमाणुः एतन्नित्यतायाः वक्ष्यमाणत्वादिति ।

चषक— अत्र 'न चानवयवं वस्तु क्वचित्स्यान्मानगोचरमि'ति तत्तात्पर्योक्त्या सर्वं सावयव-मिति उपेत्य स्वमतसाधारण्येन लक्षणान्तरमाह **यद्वेतीति** व्याचक्षते । ननु परमाणुशब्दादुक्तलक्षणाप्रतीत्या न तच्छब्दप्रवृत्तिनिमित्तमिदमित्यस्वरसाद्यतः परमाणुर्नास्ति स परमाणुरिति परोक्तमेव लक्षणमनुसृत्य यथात्र न व्याहतिस्तथा व्याख्याति **यद्वेती**त्यप्यवतारयन्ति । प्रकृते विभागपदस्य कर्मसाधनघञन्ततामभिप्रेत्य व्याकुरुते **विभज्यत इति** । यथाश्रुतार्थादरे विभिन्नवस्तुशून्यत्वमित्यर्थपर्यवसानेनासम्भवापत्त्या विभागपद-स्यापकृष्टपरिमाणवस्तुपरतां तथापि स्वावयवमादायोक्तादवस्थ्यवारणाय स्वावयवान्यत्वस्य प्रतियोगितावच्छेदककोटिनिवेशं परमाण्वन्तरावयवमादाय तद्विधूननाय स्वीयत्वांशमवयवे निवेश्यावयवत्वावच्छिन्नभिन्नाप-कृष्टपरिमाणवस्तुशून्यत्वं तदिति परिष्कुरुते **यतः स्वावयवमिति** । अत्र लक्ष्यभूतपरमाण्वपेक्षयाऽपकृष्ट-परिमाणभगवद्रूपविशेषमादायासम्भवापनुत्तये जडत्वांशोऽस्वतन्त्रत्वांशो वा प्रतियोगितावच्छेदककोटौ निवेशनीय इति स्थितम् । अत्र परमाण्ववयवेऽतिप्रसङ्गवारणायावयवभिन्नत्वं विशेष्यविधयापि निवेशनीयम् । परमाणो-रप्यवयवत्वेनासम्भवव्युदासायावयवभिन्नत्वमविभक्तावयवभिन्नत्वरूपं ग्राह्यम् । परमाणोश्चादिकार्यावयवान्तरा-द्विभक्तत्वादिति पर्यष्कार्षुः । पूर्वलक्षणेऽत्र च प्रकृतिरूपं सूक्ष्मं यद्रजस्तदेव लक्ष्यं न तु पराभिप्रेतं जालसूर्यमरीचिस्थसूक्ष्मभागापेक्षया षष्ठभागरूपम् । अग्रे तदनित्यताया अभिधास्यमानत्वेनोक्तलक्षणयोस्तत्रा-सम्भवादिति ज्ञातव्यम् इत्यभ्यधुर्व्याकर्तारः । न हि परमाणवो भूतसूक्ष्माणीत्येतन्नयान्तिमफक्किकां जाल-सूर्यमरीचिस्थत्र्यणुकषष्ठभागपरिमिता ये परमाणवः परेण मूलकारणतया स्वीकृतास्ते भूतसूक्ष्माणि नेत्यर्थः । **किन्त्वहङ्कारोपचितानीति** । अत्राहङ्कारपदं तत्कार्याणां भूतानामप्युपलक्षकम् । तथा च तामसाहङ्कार-तत्कार्यभूतोपचितानि भूतसूक्ष्माणि पराभिमतपरमाणव इत्यर्थ इति व्याचख्युश्चेति तद्दिशा भूतसूक्ष्माणामेव सौधलक्षणद्वयलक्ष्यताऽवसीयते । 'मनुष्या देवलोकेऽपि विशेषेणैव दर्शने । अंशांशित्वविशेषं तु यस्य द्रष्टुं न शक्नुयुः । चरमो विशेष इति तं मुनयो ब्रूयुरञ्जसा । परमाणुः स विज्ञेयः कणादाद्याः निरंशिनम् । अनन्तांशयुतत्वेऽपि यं ब्रूयुर्भ्रान्तिदर्शनात् । ततोऽपि परमाणुत्वं तदंशानां तु यद्यपि । अनन्तत्वाद्विवेकार्थ-मस्योक्ता परमाणुते'ति तत्त्वविवेक इति भागवततात्पर्यं किमचेतने पटादावन्त्यावयविन्येव भेदाभेदाविति नेत्याह **अत्रेति** । 'अत्रावयवभेदेन स्यादेव ह्यनवस्थितिः ।' अचेतने पटादौ स्वावयवैर्भेदाभेदौ तदवयवस्यापि स्वावयवैर्भेदाभेदावित्यपर्यवसानमेव भवेदित्यर्थः । परमाणोर्निरवयवत्वेन पर्यवसानसम्भवात् कथमनवस्थिति-रित्यत आह **न चेति** । केवलं निरवयवत्वे प्रमाणाभावात् परमाणोः सावयवत्वमपि तु पूर्वपरादिभागभेदेन सावयवत्वावगमाच्चेत्याह **पूर्वेतीति** । न्यायदीपिकाविवृताशयगीतातात्पर्यम् । परमाणुत्वमापेक्षिकं न तु परिनिष्ठितमेकत्र अतो यतः परमाणुर्नास्ति स परमाणुरिति न किन्तु यदवयवानां परस्परविभागो न क्रियते

स परमाणुरिति युक्तमिति सन्न्यायरत्नावलिः । यतः परमाणुर्नास्ति स परमाणुरिति वदता यत्परमाणुनिरवयवत्वमभिप्रेतं तन्निराकरोति **अतः सर्वेति** । तर्हि सृष्टिकारणस्य कस्यचित्परमाणोः किं लक्षणमित्याकाङ्क्षायामाह **अविभाग इति** । यतः विभागो नास्ति स परमाणुरिति नयचन्द्रिका च भूतसूक्ष्माणामेव परमाणुपदवाच्यतामवगमयतीति मन्तव्यम् । अत्र कतिपये व्याचक्षाणाः न च विभिन्नावयवत्वस्य परमाणावसिद्ध्या पुनरप्यसम्भव इति वाच्यम् । उत्पत्तिविनाशवत् परमाणोः स्वावयवैर्भेदस्याश्रयणीयत्वात् । तस्मिन् सत्यप्यसत्त्वस्यैवावयवावयविभेदव्यवस्थापकतया सिद्धान्ते सम्मतत्वादिति समादधानास्त्रसरेणुषष्ठभागस्यैव तादृग्लक्षणद्वयलक्ष्यतामुपगच्छन्ति । अत्र गुरुपादाः ननु 'खण्डिते भेद ऐक्यं चे'त्युक्तेः कथमखण्डितावयविनां भूतसूक्ष्माणां स्वावयवैर्भेदाभेदाविति तन्मतदिशा द्वयोर्लक्षणयोर्लक्ष्यं सूक्ष्ममिति स्थितम् । यादुपत्यमते तत्र भिन्नावयवता कथमिति शङ्कमानाः गीतातात्पर्योदाहृतप्रमाणानुरोधेन यस्यामवयवावयविधारायां क्वचित् खण्डितत्वं तद्धारापतितानामवयवावयविनां भेदाभेदादिति व्याख्यानान्न भूतसूक्ष्माणां स्वावयवैर्भेदानुपपत्तिः तद्धारापतितानां भूतसूक्ष्मावयवकानां नैयायिकपरमाणूनां स्वावयवेषु सत्स्वपि खण्डितत्वात् । आकाशावयविनस्तु न कदाचित् खण्डितत्वम् । न ह्यपरिच्छिन्नाकाशावयविनो महत्तत्त्वावच्छिन्नाकाशोऽवयवस्तस्यापि योऽहङ्कारतत्त्वावच्छिन्नाकाशोऽवयवस्तस्यापि बुद्धितत्त्वावच्छिन्नाकाशोऽवयवस्तस्यां धारायां न कदाचिदप्यवयवेषु सत्सु अवयविनः खण्डितत्वमुपलभ्यत इति न तत्र भेदाभेदाविति न कश्चिद्दोष इति यादवाचार्याणामाशयं प्रकाश्य तन्मतं प्रतिष्ठिपन् ।

॥ इति प्रकारान्तरेण परमाणुपदनिर्वचनम्
(परोक्तपरमाणुपदनिर्वचनमङ्गीकृत्य तत्र व्याहत्यभावपरतया व्याख्यानम्) ॥

* * *

॥ अथ च तत्रान्ते अवयवपरम्पराविश्रान्त्यभावे तर्कपराहतिशङ्का तन्निरसनञ्च ॥
॥ अथ तत्रादौ तर्कपराहतिशङ्का ॥

८३ सु०— नन्वेवमवयवपरम्पराविश्रान्त्यभावेऽनन्तावयवारब्धत्वाविशेषात् सर्षपमहीधरयोः परिमाणाविशेषः स्यात् । न च कारणसङ्ख्याऽविशेषेऽपि तत्परिमाणप्रचयविशेषात् सर्षपमहीधरयोः परिमाणविशेष इति वाच्यम्, अवयवानन्त्यसाम्ये तयोरप्यनुपपत्तेरिति ।

परि०— मूलोक्तमुपलक्षणं मत्वा तर्कपराहतिमाशङ्क्य निराह **नन्वेवमित्यादिना एवमनेकमुदाहरणमित्यन्तेन** । अवयवेत्युक्त्याऽरम्भकत्वभ्रान्त्या शङ्कत इति ध्येयम् । **अवयवा-**

नन्त्येति । सर्षपमहीधरजनकावयवानामानन्त्यसाम्य इत्यर्थः । **तयोरपीति** । सर्षपमहीधरावयवयोरपीत्यर्थः ।

गु०दी०— न हि सर्षपादेरवयवपरम्पराविश्रान्त्यभाववादिना अनन्तावयवारब्धत्वमङ्गीकृतमित्यस्य इदं तात्पर्यम् । सन्त्यतिसूक्ष्मतराः प्रकृतिरूपाः मूलावयवाः । ते चापरिमितानन्तसूक्ष्मसूक्ष्मतरांशपरम्परोत्पन्नत्वाद्भवन्ति सर्वेऽपि समपरिमाणाः । अतोऽनन्तांशारब्धत्वे सर्वेषां साम्यं स्यादित्यापादनमिष्टापादानमेव । तदुपरि तैस्समपरिमाणैः प्रकृतिरूपांशैरुत्पन्नोत्पन्नोत्तरावयवपरम्परा यत्राल्पसङ्ख्याका साऽल्पपरिमाणा । यत्र बहुसङ्ख्याका सा महापरिमाणा । एवं च मन्दरो यावत्सङ्ख्याकप्रकृत्युत्तरांशपरम्परोत्पन्नः न तावदंशपरम्परोत्पन्नः सर्षप इति कुतस्तयोः समपरिमाणता । यथा हि समपरिमाणमृत्पिण्डकोटिषु शतमृत्पिण्डोत्पन्नमल्पपरिमाणं सहस्रमृत्पिण्डोत्पन्नं ततोऽपि महत् । एवं तत उत्तरोत्तरबहुसङ्ख्याकमृत्पिण्डोत्पन्नं महत्तरं महत्तमं च । तथा प्रकृतेऽपीति ।

यादु०— अवयवानन्त्यसाम्य इति । सर्षपमहीधरावयवजनकेष्ववयवेष्वानन्त्यसाम्य इत्यर्थः । **तयोः** सर्षपमहीधरावयवगतयोरपीत्यर्थः । यथाऽनन्तावयवारब्धत्वाविशेषात् सर्षपमहीधरयोः परिमाणाविशेष आपादितः, तथा तदुभयावयवेष्वपि आनन्त्यसाम्येऽनन्तावयवारब्धत्वाविशेषात् सर्षपमहीधरावयवेषु परिमाणप्रचययोरविशेष एव स्यान्न तु विशेष इत्यापादनात् तयोरप्यनुपपत्तिरिति भावः । यद्वाऽवयवसङ्ख्यासाम्ये परिमाणप्रचयविशेषयोरपि परिमाणभेदप्रयोजकत्वानुपपत्तेरित्यर्थः । यत्र ह्यवयवसङ्ख्यायां विशेषस्तत्रैव तयोः परिमाणभेदप्रयोजकत्वं न तत्साम्येऽपीति भावः ।

वं०प०— अविशेषः कार्ये इति शेषः ।

कं०रा०— कारणसङ्ख्याविशेषेऽपीति । कारणसङ्ख्याया अविशेषेऽपीत्यर्थः । **तयोरिति** । परिमाणविशेषप्रचयविशेषयोरित्यर्थः ।

श्रीनिधि०— तत्परिमाणादिति । तत्परिमाणविशेषादित्यर्थः ।

शे०वा०— तत्परिमाणेति । कारणपरिमाणप्रचयेत्यर्थः । भवेत्कारणपरिमाणप्रचयविशेषात् सर्षपमहीधरयोः परिमाणविशेषः । यदि सर्षपमहीधरारम्भकाणामवयवानां परिमाणप्रचयविशेषावुपपन्नौ स्याताम् । न च तौ परमते उपपद्येते । महीधरारम्भकावयवस्येव सर्षपारम्भकावयवानामप्यनन्तावयवारब्धत्वेन परिमाणस्य प्रचयस्य च अविशेषस्यैव प्राप्तेरित्यभिप्रेत्य परिहरति **अवयवानन्त्यसाम्य इति** । सर्षपमहीधरारम्भकावयवानामनन्तावयवारब्धत्वसाम्य इत्यर्थः । **तयोः** सर्षपमहीधरारम्भकावयवगतयोर्विशिष्टपरिमाणप्रचययोरपीत्यर्थः । यथाऽनन्तावयवारब्धत्वाविशेषात् सर्षपमहीधरयोः परिमाणाविशेषः प्रसञ्जितः । तथा तदुभयारम्भका-

वयवयोरप्यनन्तावयवारब्धत्वाविशेषेण परिमाणप्रचययोरप्यविशेषस्यैव प्रसञ्जयितुं शक्यत्वान्न तेन तदुपपत्तिरिति भावः । यद्वाऽवयवसङ्ख्चायां यत्र विशेषस्तत्रैवावयवगतपरिमाणप्रचयविशेषयोः परिमाणभेदप्रयोजकत्वेनावयव-सङ्ख्चासाम्ये तयोरप्रयोजकत्वादवयवसङ्ख्चासाम्यात् प्रकृते तत्परिमाणप्रचयविशेषयोर्न परिमाणभेदप्रयोजकत्व-मित्याशयेनाह **अवयवेति** ।

वा०र०— महीधरारम्भकावयवस्येति । जात्येकवचनम् । अवयवानां इति बहुवचनान्तपाठस्तु स्वरस एव । एतट्टीकाग्रन्थविवरणम् । 'अतः सर्वपदार्थानां भागाः सन्त्येव सर्वदा' इति पूर्वानुव्याख्यान-व्याख्यानस्थलीय न चाश्रयासिद्धिधर्मिग्राहकविरोधादित्येतन्मूलव्याख्यानरूप अवयवावयविप्रसङ्गो हि तावत् अनुभूयमानत्वात् नापलापमर्हति इत्यादि टीकाव्याख्यानावसरेऽस्मद्वयुत्पादितप्रकारेणोहनीयम् । **न तेनेति** । परिमाणयुक्त्यविशेषेत्यर्थः । **विशेषादिति** मूलानुसारेण एकवचनम् । न ताभ्यामिति पाठश्चेत् तयोरिति मूलानुसारेण द्विवचनमिति विवेकः । **एवं साम्य इति** । निमित्तसप्तमीहेतुमाह । तथा च साम्यात्तयोरिति योजना दर्शिता । अथ यत्र साम्यं तत्र इत्यर्थमभिप्रेत्य योजनान्तरमाह **यद्वेति** । यद्यपि अवयवानन्त्ये साम्य इत्यस्य सर्षपमहीधरयोरेव तत्साम्ये तदवयवेषु परिमाणविशेषायोगः इत्यर्थकतयाऽपि योजना प्रतीयते । तथापि एतेनावयवपरम्परे इत्युत्तरमूले तत्पक्षस्यातिदेशेन निरासात् तद्योजनात्र न कृतेति ज्ञेयम् ।

विट्ठल०— अनन्तावयवारब्धत्वाविशेषादिति । यत्स्वावयवं तदवयवारब्धमिति परमते नियमादिति भावः । **अवयवानन्त्यसाम्येऽपीति** । सर्षपमहीधरावयवानामानन्त्यस्य समत्वे । सर्षपमहीधरा-ववयवगतपरिमाणप्रचययोरित्यर्थः । व्यत्यासप्रापकाभावादिति भावः ।

चषक— अवयवानन्त्यसाम्ये सर्षपमहीधरारम्भकावयवेष्वानन्त्यसाम्ये । **तयोः** तत्तदवयवगत-परिमाणप्रचयविशेषयोः ।

॥ इति तर्कपराहतिशङ्का ॥

* * *

॥ अथ च तच्छङ्कानिरसनम् ॥

॥ अथ तत्रादौ तच्छङ्कायाः द्वैविध्यं कल्पयित्वा तदुभयोरपि विधयोः खण्डनम् ॥

८४ **सु०— उच्यते । किमयं प्रसङ्गः, उतानुमानम् ।**

आद्ये ह्ययमर्थः । यदि सर्षपमहीधरावविश्रान्तावयवपरम्परौ स्यातां तदा अनन्ता-वयवारब्धौ प्रसज्येयाताम्, तथा च समपरिमाणौ भवेतामिति । तत्रोभयत्रापि व्याप्य-

भावः । यदविश्रान्तावयवपरम्परं तदनन्तावयवारब्धम्, यच्चैवं तत्तुल्यपरिमाणमिति । किन्नाम भवतोपलब्धम् ॥ किञ्चावयवपरम्पराविश्रान्त्यभावे ते सर्वेऽपि सम्भूयानन्ताः स्युः । सर्षपमहीधरारम्भकाणामानन्त्यं तु कुतः ॥ अत एव द्वितीयप्रसङ्गस्यापादकासिद्धिः ॥ एतेनावयवपरम्पराविश्रान्त्यभावे समसङ्ख्यावयवारब्धत्वं, ततश्चावयवपरिमाणादिविशेषाभावे परिमाणाविशेषः स्यादितीत्यपि परास्तम्; व्याप्यसिद्धेः, समसङ्ख्यावयवारब्धत्वासिद्धेश्च ।

द्वितीये त्विदमुक्तं स्यात्, 'सर्षपमहीधरौ नानन्तावयवारब्धौ विसदृशपरिमाणत्वात्, विमतौ नाविश्रान्तावयवपरम्परौ अनन्तावयवानारब्धत्वादि'ति । आद्ये सिद्धसाधनम् । न हि सर्षपादेरवयवपरम्पराविश्रान्त्यभाववादिनाऽनन्तावयवारब्धत्वमङ्गीकृतम्, किन्तु सम्भूतानामनन्तत्वम् । तदभावसाधने मां प्रति दृष्टान्ताभावः, गुणादौ साधनाभावात् ॥ द्वितीयस्य त्वप्रयोजकतेति ।

परि०— तथा चेति । अनन्तावयवारब्धत्व इत्यर्थः । **उभयत्रापि** तर्कद्वयेऽपि । व्याप्यभाव इत्युक्तं व्यनक्ति **यदविश्रान्तेति** । तदीयभ्रान्तिप्रकटनेनाद्यतर्के आपादकाप्रयोजकत्वं चाह **किञ्चेति** । **कुत इति** । न ह्यस्माकमवयवपदेनारम्भकमभिमतम् । येन भ्रान्तस्त्वमेवमापादनं कुर्याः किन्त्वनारम्भकीभूतांशा एवारम्भकावयवेभ्योऽन्ये एव विवक्षिताः । अत एवमापादनेऽप्रयोजकत्वमेव प्राप्नोतीति भावः । नन्वविभागरूपपरमाणुपर्यन्तमेवमारम्भकत्वेऽपि परमाणुद्व्यणुकादिवस्त्वंशानां भवदभिमतावयवानामारम्भकपरमाणुद्व्यणुकाद्यवयवत्वात् तद्वारा तेषामप्यनन्तानामारम्भकत्वं प्राप्तमेवेति शङ्क्यम् । व्याप्यभावेनासम्मतेः, आनन्त्ये तारतम्यसत्त्वाच्चेति । **अत एवेति** । अवयवपदेनारम्भकांशानां विवक्षितत्वादेवेति वा आद्यतर्केणारब्धत्वस्यालाभादेवेति वार्थः । **द्वितीयेति** । तथा च समपरिमाणावित्युक्तद्वितीयप्रसङ्गस्यानन्तावयवारब्धत्वरूपापादकासिद्धिरित्यर्थः । **एतेनेति** । व्याप्यभावादित्युक्तत्वेनेत्यर्थः । तदेव व्यनक्ति **व्याप्यसिद्धेरिति** । परमते तादृशवस्तुनोऽभावेन दृष्टान्ताभावादिति भावः । **समसङ्ख्येति** । पर्वतारम्भकावयवापेक्षाया सर्षपारम्भकावयवानामल्पत्वेन सङ्ख्यातारतम्यसत्त्वादिति भावः । **द्वितीये त्विति** । उतानुमानमितिपक्ष इत्यर्थः । **सम्भूतानामिति** । मिलितानामित्यर्थः । नन्वनेनैव हेतुना सर्षपमहीधरौ न सम्भूता-

नन्तावयवाविति साध्यत इत्यत आह **तदभावेति** । गुणकर्मादिरस्तु दृष्टान्त इत्यत आह **गुणादाविति** । **द्वितीयस्य त्विति** । विमताविति्युक्तस्येत्यर्थः ।

यादु०— तर्के अप्रयोजकतामप्याह **किञ्चेति** । **सर्षपमहीधरारम्भकाणामिति** । साक्षात्तत्समवायिकारणानामित्यर्थः । आनन्त्यं कुत इत्यनन्तरं किन्तु सर्षपारम्भकेषु बहुत्वं महीधरारम्भकेषु बहुतरत्वमित्येवेति शेषः । तथा चावयवपरम्पराया आनन्त्येऽपि सर्षपमहीधरयोः साक्षात्समवायिकारणबहुत्वबहुतरत्वकृतः परिमाणभेदो भविष्यतीति भावः । उक्तं च वर्धमानेन 'अनन्तावयवारब्धत्वाविशेषेऽपि कश्चित्तादृग्बहुतरावयवारभ्य कश्चित्तादृगल्पावयवारभ्य इत्यवान्तरसङ्ख्याभेदादेव परिमाणभेदः स्यादि'ति । दृष्टान्ताभावभीत्या यत्केनचित्समसङ्ख्यावयवारब्धत्वमेव साध्यतया विवक्षितमित्युक्तं तदप्यनूद्य दूषयति **एतेनेति** । **ततश्चेति** । अवयवसङ्ख्यावैषम्य एव ह्यवयवपरिमाणप्रचयविशेषयोः परिमाणभेदकतया कल्पनं दृष्टं न तत्सङ्ख्यासाम्येऽपीति भावः । **व्याप्त्यसिद्धेरिति** । परमतेऽवयवपरम्पराविश्रान्त्यभावस्याप्रसिद्धत्वादिति भावः । **समसङ्ख्येति** । उक्तरीत्या साक्षात्समवायिकारणेषु सङ्ख्यासाम्यस्याप्यभावादिति भावः । सिद्धसाधनतामुपपादयति **न हीति** । साक्षात्सर्षपारम्भकाणां नानन्तत्वमिति भावः । **अप्रयोजकतेति** । सम्भूतावयवानामानन्त्येन अवयवानामविश्रान्त्युपपत्तेरित्यर्थः ।

वं०प०— **व्याप्त्यसिद्धेरिति** । द्वितीयतर्के हस्तचतुष्टयवितस्तिचतुष्टयारब्धे पटे परिमाणाविशेषाभावेन व्यभिचार इत्यर्थः । आरब्धत्वमङ्गीकृतमित्यत्रारब्धपदोग्गि भारः । **सम्भूतानामिति** । आरम्भकाणां अनारम्भकाणां चावयवानां सम्भूतानामित्यर्थः । न तु जनकीभूतावयवानामेवानन्त्यमिति भावः । **तदभावेति** । विमतौ सम्भूयाप्यानन्त्योपेतावयवौ न भवत इति साधने । **मां प्रति** सर्वत्राप्यवयवेषु सम्भूयानन्त्यमेवेत्यङ्गीकारिणं मां प्रति । गुणानां निरवयवत्वेनानन्तावयवारब्धत्वाभावेन दृष्टान्तत्वं भविष्यतीत्यत आह **गुणादाविति** । गुणादेर्निर्गुणत्वेन तत्र विसदृशपरिमाणवत्त्वरूपसाधनाभावादित्यर्थः ।

कं०रा०— **सर्षपमहीधरारम्भकाणामिति** । साक्षात्सर्षपमहीधरारम्भकाणामित्यर्थः । ननु त्वदनङ्गीकृतः सम्भूतानन्तावयवकत्वाभाव एव साध्यते अतो न सिद्धसाधनमित्यत आह **तदभावसाधन इति** । सम्भूतानन्तावयवकत्वाभावसाधने मया सर्वद्रव्येऽप्यविश्रान्तावयवपरम्परया अङ्गीकृतत्वेन तेषु सम्भूतानन्तावयवकत्वस्यैव सत्त्वात् मां प्रति दृष्टान्ताभाव इत्यर्थः । सम्भूतानन्तावयवकत्वरहितं गुणादिकं दृष्टान्तोऽस्त्वित्यत आह **गुणादाविति** । गुणादौ साध्यसत्त्वेऽपि विसदृशपरिमाणकत्वरूपसाधनाभावान्न तस्य दृष्टान्तत्वमित्यर्थः ।

श्रीनिधि०— **आद्ये ह्ययमर्थ इति** । प्रसङ्गार्थत्वेन विवक्षिते तर्के अयं वक्ष्यमाण इत्यर्थः । **तत्तुल्यपरिमाणमिति** । **किन्नाम भवतोपलब्धमिति** । एवं व्याप्तिग्रहणस्थानं किन्नाम वस्तु भवतोपलब्धं

न किमपीत्यर्थः । **एतेन** सम्भूयानन्तारम्भकाणामानन्त्यं नास्तीति समर्थनेन आपादकसिद्धया । तदभावसाधने सम्भूयानन्तावयवाभावसाधने गुणादिर्दृष्टान्तो भविष्यति तेषां निरंशत्वादित्यत आह **गुणादौ त्विति** ।

शे०वा०— उभयत्रापीति । उदाहृततर्कद्वयेऽपीत्यर्थः । कुतोऽत्र व्याप्त्यभाव इत्यतो व्याप्ति-द्वयस्वरूपप्रदर्शनपूर्वकं व्याप्तिग्रहणस्थलस्य परं प्रत्यसिद्धेरित्याह **यदिति** । प्रथमतर्केऽप्रयोजकत्वमप्याह **किञ्चेति** । **सर्षपमहीधरारम्भकाणामिति** । साक्षात्तत्समवायिकारणानामित्यर्थः । **आनन्त्यं तु कुत इति** । न कुतोऽपि किन्तु सर्षपारम्भकेषु बहुत्वं महीधरारम्भकेषु च बहुतरत्वमित्येवेति विशेषः । तथा चावयव-परम्पराया आनन्त्येऽपि साक्षात्समवायिकारणानां बहुत्वबहुतरत्वकृतः परिमाणभेदो युक्तः । अत एव द्रव्यकिरणावलीप्रकाशकृताऽप्यनन्तावयवारब्धत्वाविशेषे कश्चित्तादृग्बहुतरावयवारब्धः कश्चित्तादृगल्पावयवारब्ध इत्यवान्तरसङ्ख्याभेदादेव परिमाणभेदः स्यादित्येव तात्पर्यं वर्णितमिति ध्येयम् । **अत एवेति** । अवयवपरम्पराया विश्रान्त्यभावे तेषां सर्वेषां सम्भूयानन्तत्वेनारम्भकानन्त्याभावादेवेत्यर्थः । **द्वितीयप्रसङ्गस्येति** । यद्यनन्ता-वयवारब्धौ स्यातां तर्हि समपरिमाणौ स्यातामिति प्रसङ्गस्येत्यर्थः । **आपादकेति** । अनन्तावयवारब्धत्व-रूपेत्यर्थः । उक्तदूषणातिदेशेन तात्पर्यान्तरमपि परकीयमनूद्य दूषयति **एतेनेति** । ननु समसङ्ख्यावयवारब्ध-त्वात् कारणसङ्ख्याऽविशेषेऽपि तत्परिमाणप्रचयभेदात् परिमाणभेदोपपत्तेरप्रयोजकत्वमित्यतोऽवयवसङ्ख्यावैषम्य एवावयवपरिमाणादिविशेषस्य परिमाणभेदकत्वान्न सङ्ख्यासाम्ये तदिति भावेनोक्तम् **अवयवपरिमाणादि-विशेषाभाव इति** । एतेनेत्युक्तमेव विशदयति **व्याप्त्यसिद्धेरिति** । यत् अविश्रान्तावयवपरम्परं तत् समसङ्ख्यावयवारब्धं, यच्चैवंविधं तदविशिष्टपरिमाणमिति व्याप्तेर्दृष्टान्ताभावेनासिद्धेरित्यर्थः । **समेति** । उक्तरीत्या साक्षात्समवायिकारणेषु सङ्ख्यासाम्यस्याभावादिति भावः । ततश्च द्वितीयप्रसङ्गस्यापादका-सिद्धिरिति भावः ।

द्वितीय इति । अनुमानमिति द्वितीय इत्यर्थः । सिद्धसाधनतामेवोपपादयति **न हीति** । साक्षा-त्सर्षपारम्भकाणां नानन्तत्वमङ्गीकृतमित्यर्थः । ननु च सम्भूयानन्तावयवारब्धत्वाभावस्यैव साधनान्न सिद्ध-साधनमित्यत आह **तदभावेति** । **दृष्टान्ताभाव इति** । विसदृशपरिमाणस्य द्रव्यस्य सम्भूयानन्तावयवारब्ध-स्यादर्शनादिति भावः । ननु च मास्तु तर्हि द्रव्यमत्र दृष्टान्तो गुणादिकं तु भविष्यतीत्यत आह **गुणादा-वितिं** । तथा च साधनवैकल्यमिति भावः । न च सदृशपरिमाणशून्यत्वस्य तदर्थत्वान्न साधनवैकल्यमिति वाच्यम् । तथाऽपि प्रतिवादिरीत्या तद्वैकल्यापरिहारात् । तेन गुणेऽपि गुणाङ्गीकारादिति भावः । एवं तर्ह्यारम्भकाणां सम्भूया(तानाम)नन्तत्वात् साध्यवैकल्यमेवेत्यभिप्राय इत्याहुः । **द्वितीयस्य त्विति** । विमतौ नाविश्रान्तावयवपरम्परावित्यादिद्वितीयानुमानस्येत्यर्थः । विपक्षे बाधकाभावादिति भावः ।

वा०र०— परम्परया आरम्भकत्वस्यावयवपरम्परायामपि सत्त्वात् व्याचष्टे **साक्षादिति** । **तात्पर्यं वर्णितमितीति** । परमाणुलक्षणा नित्य इत्येतत्प्रशस्तपादभाष्यव्याख्यानरूपा न तावयवारब्धत्वाविशेषेण

मेरुमन्दरयोः इत्येतत् किरणावलिव्याख्यानावसरे इति शेषः । यद्यपि नेदं तस्य तात्पर्यम्, अपि तु ननु इत्यादिना तदुपरि शङ्कैवेयं वर्धमाने कृता तथापि अनन्तावयवारब्धत्वे उक्तेऽपि साक्षात्समवायिकारणरूप-बहुतराल्पतरावयवारब्धत्वमेव यथासम्भवं तात्पर्यतः प्राप्तिर्भवतीत्याशयेन तात्पर्यत्वोक्तिरिति ध्येयम् । अनन्तावयवारब्धत्वाविशेषेऽपि इत्यपि शब्दयुक्तो वर्धमानपाठः । ननु च सम्भूतेति पाठः । विमतौ नावि-श्रान्तेति पाठः ।

स०व्र०— गुणादाविति । न च सदृशपरिमाणशून्यत्वस्य हेत्वर्थत्वात् न गुणादौ साधनाभाव इति वाच्यम् । तावतापि साध्यवैकल्यापरिहारात् ।

विट्ठल०— अयमर्थ इति । अयं प्रसङ्गार्थ इत्यर्थः । साहचर्यदर्शनाद्युक्तो व्याप्त्यभाव इत्युपपादयति **यदविश्रान्तेति** । **किन्नामेति** । न किञ्चिदुपलब्धमतो व्याप्तिग्रहणस्थलाभावाद्व्याप्त्यभाव इति भावः । अप्रयोजकश्चायं तर्क इत्याह **किं चेति** । सर्षपमहीधरावयवपरम्परायाः विश्रान्त्यभावे तदारम्भकाणां परमाणूनां तदवयवानां च सम्भूयमानन्त्यं स्यात् । सर्षपमहीधरारम्भकाणामानन्त्ये तु न नियामकं सर्षपस्याल्प-परमाण्वारब्धत्वं महीधरस्य ततोऽपि परमाण्वारब्धत्वोपपत्तेरित्यर्थः । **अत एवेति** अनन्तावयवारब्धत्वा-भावादेवेत्यर्थः । समसङ्ख्चावयवारब्धत्वमेवापाद्यतया विवक्षितमित्यत आह **एतेनेति** । **व्याप्त्यसिद्धेरिति** । परमते अवयवपरम्पराविश्रान्त्यभावस्याप्रसिद्धत्वादिति भावः । **समसङ्ख्येति** । उक्तरीत्या साक्षात्समवायि-कारणेषु सङ्ख्यासाम्यस्याभावादिति भावः । **द्वितीये त्विति** । उतानुमानमिति पक्ष इत्यर्थः । सिद्धसाधन-मुपपादयति **न हीति** । परमाणुष्वविश्रान्तावयवपरम्परासद्भावेऽपि सर्षपाद्यारम्भकपरमाणूनां मितत्वादिति भावः । **सम्भूतानामिति** । आरम्भकाणां अनारम्भकाणां नारम्भकावयवानां च मिलितानामित्यर्थः । नन्वनेनैव हेतुना सर्षपमहीधरो न सम्भूतानन्तावयवानिति साध्यत इत्यत आह **तदभावेति** । गुणकर्मादिरुक्तदृष्टान्त इत्यत आह **गुणादाविति** ।

चषक— तथा च अनन्तावयवारब्धत्वे उभयत्रापि अविश्रान्तावयवपरम्परात्वापादकानन्तावयवारब्ध-त्वापाद्यकतादृशारब्धत्वापादकसमपरिमाणत्वापाद्यकापत्तिद्वये निदर्शिताद्यप्रसङ्गे आपाद्यमन्तरेणाप्यापादक-सत्त्वोपपत्त्याऽप्रयोजकतामभिधत्ते **किञ्चेति** । तथा च तत्तत्समवायिकारणबहुत्वबहुतरत्वकृतः परिमाणभेदः संपत्स्यत इति भावः । **आपादकः सिद्धिः** अनन्तावयवत्वाभावसाधने । **द्वितीयस्य** विमतावित्युक्तस्य ।

॥ इति तच्छङ्कायाः द्वैविध्यं कल्पयित्वा तदुभयोरपि विधयोः खण्डनम् ॥

* * *

॥ अथ तच्छङ्काप्रथमविकल्पितापादनस्य अर्थान्तरेण पुनः 'सर्षपस्य विश्वव्यापित्व'शङ्का तन्निरसनं च ॥

८५ सु०— स्यादेतत् । 'सर्षपावयवपरम्पराया निरवधिकत्वे मूर्तानां समानदेशत्वानुपपत्तौ सर्षपावयववैर्जगति व्याप्ते विश्वव्यापी सर्षपः स्यादिति महीधरस्यानवकाश एवे'त्यापादनार्थ इति चेन्न, पार्थिवपरमाणूनामनन्तत्वेऽपि मूर्तान्तरावकाशदर्शनात्, सर्षपो यावन्तं देशमवष्टभ्य वर्तमानो दृश्यते तावत्येवानवधिकाया अपि तदवयवपरम्पराया अवस्थानाच्च । अत एव हि आकाशादीनामप्यनवधिकामंशपरम्परामुपेत्य तत्र परिमाणापकर्षानन्त्यमुपपादितम् ।

परि०— अत एव हीति । अवयवी हि यावन्तं देशमवष्टभ्य वर्तमानो गम्यते तावति देशे तदवयवानामवस्थानाभ्युपगमादेवेत्यर्थः । यद्वाऽनन्तानां सर्षपाद्यवयवानामवस्थानार्थत्वादित्यर्थः । आकाशप्रकृत्यादिपरममहतामित्यर्थः । अथवाऽवयवपरम्परावत्त्वमारब्धत्वे प्रयोजकं नेत्यत्र ज्ञापकमाह **अत एव हीति** । प्रागुक्ततर्कानुमानयोरप्रयोजकत्वेनाविश्रान्तावयवपरम्परात्वस्यारब्धत्वासाधकत्वादेव आकाशकालप्रकृत्यादीनां नित्यानामप्यनवधिकांशपरम्परामुपेत्याणुत्वमुक्तम् । अन्यथाऽनादिनित्येषु कथमंशपरम्परामुपेयादित्यर्थः ।

यादु०— अत एवाकाशादीनामिति । अनन्तसर्षपाद्यवयवावस्थानलक्षणप्रयोजनवशादेवेत्यर्थः । आदिपदेन कालेश्वरग्रहणम् । अन्यथा कालाकाशेश्वराणामनन्तापकृष्टपरिमाणकांशपरम्पराभावे सर्षपाद्यवयवपरम्पराया अनवधिकाया आधारनियामकयोरभावेनावस्थानमनुपपन्नं स्यादिति भावः ।

वं०प०— यावन्तं देशमिति । आकाशप्रदेशमित्यर्थः । तथा च सर्षपावयववैर्जगति व्याप्त इत्युक्तमसदिति भावः ।

कं०रा०— अत एवेति । उक्तरीत्या अनवधिकावयवपरम्पराङ्गीकारे बाधकाभावेत्यर्थः ।

श्रीनिधि०— व्युत्थितं प्रत्युत्त्वा विस्तीर्णं प्रत्याह **सर्षपो यावन्तं देशमिति । अत एवेति** । सर्षपदेश एवानवधिकाया अपि तदवयवपरम्पराया अवस्थानेनेत्यर्थः । तदतिरिक्तदेशत्वे तु न्यायसाम्येन आकाशावयवानामपि अवयविबाह्यदेशत्वे परमाणूनामिव सर्वेषां समपरिमाणत्वं स्यात् । न तु परिमाणापकर्षानन्त्यं स्यादिति भावः ।

शे०वा०— नन्ववयवपरम्पराविश्रान्त्यभावेऽनन्तावयवारब्धत्वाविशेषात् सर्षपमहीधरयोः परिमाणाविशेषः स्यादिति प्रसङ्ग एवाभ्युपगम्यते । न च तत्पक्षोक्तदोषः । सर्षपमहीधरयोः परिमाणाविशेषस्य यथाश्रुतस्यापाद्यतयाऽनभिमतत्वेन तदप्रसरादिति भावेन तदर्थमनुवदति **स्यादेतदिति** । **मूर्तानामिति** । कृतव्युत्पादनमेतत् । सर्षपावयवानामनन्तत्वेन तैर्जगति व्याप्तेऽपि न महीधरस्य जगत्यनवकाशः प्रसज्यते । पार्थिवपरमाणूनामनन्तत्वेन तैर्जगति व्याप्तेऽपि मूर्तान्तरावकाशदर्शनात् । यदि च तेषामणुत्वेनापतिषेधत्वान्न मूर्तान्तरावकाशविघातकत्वमिति मन्यसे तर्हि सर्षपावयवपरम्पराया अप्यणुत्वेन महीधरावकाशाविघातकत्वान्न तदनवकाशप्रसङ्गोऽपीत्याशयेन समाधत्ते **पार्थिवेति** । एवं सर्षपावयवपरम्पराया अनवधिकत्वेऽपि जगति व्याप्तिमङ्गीकृत्य महीधरस्यावकाशः समर्थितः । इदानीं त्वनधिकत्वेऽपि सर्षपावयवपरम्परायास्तया जगति व्याप्तिरेवासिद्धेत्याह **सर्षप इति** । ननु सर्षपो यावति प्रदेशे वर्तमानो दृश्यते तस्य देशस्याल्पपरिमाणत्वात् तत्रैवाविश्रान्तसर्षपावयवपरम्पराया अवस्थानाङ्गीकारे मूर्तानां समानदेशत्वापत्तिर्दुर्वारित्यतः तस्मिन्प्रदेशेऽप्यनवधिकपरिमाणापकर्षसद्भावान्नानुपपत्तिरित्याह **अत एवेति** । यावन्तं देशमवष्टभ्य सर्षपो वर्तमानो दृश्यते तावत्येव प्रदेशेऽनवधिकाया अवयवपरम्पराया अवस्थानसम्भावनार्थत्वादेवेत्यर्थः । आदिपदेन कालादिपरिग्रहः । अन्यथा कालाकाशेश्वराणामनन्तापकृष्टपरिमाणांशपरम्पराभावे सर्षपाद्यवयवपरम्पराया अनवधिकाया आधारनियामकयोरभावेनावस्थानमनुपपन्नं स्यादिति भावः । नन्वेकस्मिन्प्रदेशेऽनवधिकापकर्षपरिमाणाभ्युपगमे विरोध इत्यत उक्तम् **अनवधिकांशपरम्परामुपेत्येति** । तत्तदंशपरम्पराया एवाल्पाल्पतराल्पतमपरिमाणाश्रयत्वान्न विरोध इति भावः ।

वा०र०— **कृतव्युत्पादनमिति** । 'सर्वदा सर्वदिक्षु अपी'त्येतद्भाष्यसम्बन्धो न च मूर्तानां युगपदित्येतन्मूलव्याख्यानावसरे इति शेषः । **विश्वव्यापीति** मूलम् । अत्र व्यापीत्येतत् त्वमग्ने प्रथमोऽङ्गिरस्सामः इत्येतदृग्भाष्यगतव्यापी चेत्येतदुपपादनं गुरुपादैः कृतमस्ति तदनुसारेण उपपाद्यम् ।

विट्ठल०— **अत एवेति** । अवयवीयावन्तदेशमवष्टभ्य वर्तमानोऽवगम्यते । तावति देशे तदवयवानां स्थानानामभ्युपगमादेवेत्यर्थः । यद्वा अनवधिकावयवपरम्परावस्थानार्थमाधारस्यावश्यकत्वादेव आकाशकालप्रकृत्यादीनामपि निरवधिकावयवपरम्परामङ्गीकृत्य परिमाणापकर्षतारतम्यमुपपादितम् । तथा च आकाशपरमाणोरप्यनन्तपरिमाणोपेतत्वादसमानदेशानां मूर्तानां सर्षपावयवानामस्थानं युज्यत इति भावः । साक्षात्सर्षपमहीधरारम्भकाणामिति परमाणुद्व्यणुकादिरूपाणामित्यर्थः ।

॥ इति तच्छङ्काप्रथमविकल्पितापादनस्य अर्थान्तरेण पुनः
'सर्षपस्य विश्वव्यापित्व'शङ्का तन्निरसनं च ॥

* * *

॥ अथ च तत्रान्ते पुनस्तत्रैव प्रकारान्तरेण सर्षपमहीधरयोः परिमाणभेदाभावशङ्का तत्समाधानं च ॥

८६ **सु०— ननु मा भूत् साक्षात्सर्षपमहीधरारम्भकाणां समसङ्ख्यत्वम्, तथाऽप्यवयवपरम्पराया विश्रान्त्यभावे सम्भूतावयवानां समसङ्ख्यत्वात् परिमाणभेदो न स्यादि-(त्युच्यत इति)ति चेन्न, आनन्त्येऽपि तारतम्यसम्भवात् । अनन्ता हि पार्थिवपरमाणवोऽनन्ताश्चान्त्यविशेषाः, न च ते समसङ्ख्याः; तथा सत्याप्यपरमाणुषु तदभावापातात् ॥ तथा सर्वकल्पेषु संसारिणोऽनन्ताः । तथाऽप्यपवर्गवशात् तारतम्यमुपेयमेव ।**

एवमनेकमुदाहरणमिति ।

परि०— साक्षात्सर्षपमहीधरारम्भकाणामिति । परमाणुद्व्यणुकादिरूपाणामित्यर्थः । **अवयवेति** । परमाण्वादिगतावयवपरम्परायाः इत्यर्थः । **अपवर्गवशादिति** । मोक्षवशादित्यर्थः । मुक्तानामानन्त्यं संसारिणामप्यानन्त्यमस्ति प्रत्येकं तदुभयानान्त्यापेक्षया मिलिततदुभयानन्त्यमधिकमित्येवमादिरूपेणानन्त्यतारतम्यमित्यर्थः । **एवमनेकमिति** । दिनपक्षमाससंवत्सराद्यानन्त्यं सप्तसमुद्रेष्वेकैकसमुद्रस्यैकतानन्त्यमप्युदाहरणं ध्येयमित्यर्थः । **सुरेशोक्तपरिमाणासमवायिकारणप्रक्रियाखण्डनम् ॥**

यादु०— उपेयमेवेति । संसारिणामानन्त्य इति शेषः । पूर्वपूर्वकल्पेषु यावन्तः संसारिणस्तावन्तो नोत्तरोत्तरकल्पेषु सन्ति । प्रतिकल्पं बहूनामपवर्गसद्भावात् । तथा च तदानन्त्ये तारतम्यमुपेयमेवेति भावः । **एवमनेकमिति** । अनन्ता कल्पा अनन्ता वत्सरा अनन्ताश्च मासादयः । न च तेष्वानन्त्यं सममित्याद्यनेकमित्यर्थः । अत्र केचिन्नवीनाः । सर्षपो यदि साक्षात्परम्परासाधारणमेवारम्भकान्यूनावयवारभ्यः स्यात् तर्ह्येतत्परिमाणाधिकपरिमाणः स्यादित्यत्रोक्ततर्कस्य तात्पर्यमित्याहुः । तत्तुच्छम् । साक्षात्सर्षपारम्भकाणां साक्षान्मेवारम्भकावयवापेक्षया न्यूनत्वेनापादकासिद्धिः । वर्धमानस्तु मेरुपदं स्थूलपरं, सर्षपपदं च द्व्यणुकपरं, तेन यदि द्व्यणुकं सावयवावयवारब्धं स्यात् तदा महत्स्यादिति महत्त्वापत्तिरेव तुल्यपरिमाणत्वापत्तिः । यद्वा द्व्यणुकत्रसरेण्वोः सावयवावयवारभ्यत्वे तुल्यपरिमाणापादने तात्पर्यमित्याह । तदपि मन्दम् । आद्ये पक्षे द्व्यणुकेऽपि महत्त्वस्योपपादितत्वेनेष्टापत्तेः । द्वितीये तु सावयवावयवारब्धानां घटपटादीनां तुल्यपरिमाणत्वाभावेन व्यभिचारात् । महत्त्वेन तुल्यतापादने त्विष्टापत्तेरिति ।

वं०प०— सम्भूतावयवानामिति । साक्षात्सर्षपारम्भकावयवास्तदनारम्भकाश्चावयवाः सम्भूयानन्ताः । एवं साक्षान्महीधरारम्भकावयवास्तदनारम्भकाश्चावयवाः सम्भूयानन्ता इत्यर्थः । **आनन्त्येऽपीति** ।

सर्षपारम्भकावयवानां तदनारम्भकावयवानां च सम्भूयानन्त्ये महीधरारम्भकाणां तदनारम्भकाणां च सम्भूयानन्त्येऽपीत्यर्थः । **तथा सतीति** । विशेषानन्त्यपार्थिवपरमाण्वानन्त्ययोर्यदि साम्यं तर्हि तेषां विशेषाणां पार्थिवपरमाणुष्वेव सत्त्वप्राप्त्या इतरत्र तदभाव एव स्यादित्यर्थः ।.

कं०रा०— तथा सतीति । अन्त्यविशेषाणामनन्तानामप्यनन्तपार्थिवपरमाणुसमसङ्ख्यत्वे समसङ्ख्यानां च तेषां पार्थिवपरमाणुषु वृत्त्यङ्गीकारे आद्यपरमाण्वादिभृत्यविशेषाभावापातादित्यर्थः ।

श्रीनिधि०— एवमनेकमुदाहरणमिति । अनन्ता जीवाः अनन्ता हि शरीराणि । न च समसङ्ख्यत्वं पुनः पुनः जननमरणदर्शनात् । संसारस्यानादित्वाभावापत्तेश्चेत्यादि द्रष्टव्यमित्यर्थः ।

शे०वा०— नन्विति । यद्यपि यदविश्रान्तावयवपरम्परं तत्सम्भूय समसङ्ख्यावयवारब्धं यच्चैवंविधं तदविशिष्टपरिमाणमिति व्याप्त्यसिद्ध्या दूषितप्रायमेतत् । तथाऽप्यधिकं वक्तुं पुनराशङ्क्येयमिति ध्येयम् । आद्ये तर्केऽप्रयोजकत्वं द्वितीये चापादकासिद्धिरिति भावेन परिहरति **आनन्त्येऽपीति** । **अपवर्गवशादिति** । प्रतिकल्पमिति शेषः । **तारतम्यमिति** । संसारिणामानन्त्य इति शेषः । पूर्वपूर्वकल्पीयसंसार्यानन्त्यापेक्षयोत्तरोत्तरकल्पीयतदानन्त्यस्यापकृष्टत्वात् तदानन्त्यं नैकप्रकारमिति भावः । **एवमनेकमिति** । कल्पानां तदन्तर्गतवर्षाणां तदन्तर्गतमासानां तदन्तर्गतपक्षाणां तदन्तर्गतदिवसानां तदन्तर्गतप्रहराणां तदन्तर्गतमुहूर्तानां तदन्तर्गतघटिकाक्षणलवादीनां चानन्त्येऽपि न तेषां साम्यमित्यनेकमुदाहरणमित्यर्थः । एतेनैव, 'सर्षपो यदि साक्षात्परम्परासाधारणमेवारम्भकान्यूनावयवारब्धः स्यात् तर्हि तावत्परिमाणाधिकरणं स्यादित्यत्रोक्तस्य तात्पर्यम् । यद्वाऽत्र मेरुपदं स्थूलपरं सर्षपपदं द्व्यणुकपरम् । ततश्च यदि द्व्यणुकं सावयवारब्धं स्यात् तर्हि महत्त्वापत्तिरेवात्र तुल्यपरिमाणत्वापत्तिरभिमतेति नोक्तदोषः । यद्वा द्व्यणुकत्रसरेण्वोः सावयवावयवारब्धत्वेन तुल्यपरिमाणत्वापादनेऽस्य तात्पर्यम्' इति परेषां तात्पर्यवर्णनमपि निरस्तम् । तथा हि । तत्र न तावदाद्यः । तर्के ह्यापादकस्य पराभ्युपगमोऽपेक्षितः । न च मेरुसर्षपयोस्तुल्यावयवत्वं परो मन्यते । सर्षपस्य निरवध्यवयवपरम्परायाः स्वल्पसङ्ख्याका एव साक्षादवयवा मेरोस्तु तादृशा बहुसङ्ख्याका अवयवा इति तेनाङ्गीकारात् । तथा चापादकासिद्धिप्रसङ्गः । न द्वितीयः । द्व्यणुकेऽपि महत्त्वस्य 'महत्त्वं च परमाणावणावपी'त्यादिनोपपादितत्वेनेष्टापादनत्वात् । न तृतीयः । सावयवावयवारब्धानामपि घटपटादीनां तुल्यपरिमाणत्वाभावेन तर्कस्य मूलशैथिल्यात् । न च महत्त्वे तुल्यत्वमापाद्यतया विवक्षितम्, तच्च घटपटादीनामस्त्येवेति न व्यभिचार इति वाच्यम् । तथा सति द्व्यणुकत्र्यणुकयोरपि महत्त्वेन तौल्यस्योपपादितत्वेनेष्टापादनत्वात् । न चैवं तत्प्रत्यक्षापत्तिः । प्रत्यक्षत्वाप्रत्यक्षत्वयोरिन्द्रियपाटवापाटवादिनिमित्तताया उपपादितत्वेन महत्त्वामहत्त्वनिमित्तत्वासिद्धेः । अन्यथा मन्दलोचनस्यापि त्र्यणुकप्रत्यक्षप्रसङ्गादिति दिक् ।

वा०र०— पूर्वपूर्वकल्पीयेति । न चैवं प्रकारेणानन्तकल्पेषु जीवापवर्गेऽनन्तजीवसमाप्तिप्रसङ्गः । क्षणानन्त्यादपि जीवानन्त्यस्याधिकत्वेन एकैकलक्षणे जीवमुक्तावपि समाप्त्यप्राप्तेः । 'यावन्तः सहिताः क्षणाः ततोऽप्यनन्तगुणिताः' इत्यादि तत्त्वनिर्णयटीकायां उपपादितं चेदमिति ज्ञेयम् । कल्पानामित्यादौ युगमन्वन्तरादीनां वर्षादितः पूर्वभाविनां ग्रहणं अनन्तावयवारब्धत्वेति किरणावलीव्याख्यानदशायां अनन्तावयवारब्धत्वाविशेषेऽपि बहुतराल्पावयवारब्धत्वमेव स्यात् न तु परिमाणसाम्यमित्याशङ्क्य तन्निरासकतया अत्राहुः **सर्षपो यदीत्यादिना** । पक्षत्रयं वर्धमानकृतोक्तम् । तद्दूषयितुमनुवदति **एतेनैवेत्यादिना निरस्तमित्यन्तेन** । आद्यं निराकर्तुं प्रतिजानीते **तत्र न तावदिति** । वर्धमानादौ ननु तर्कः इत्यादिना शङ्कितं तदेवाह **तर्के हीति** । स्वसिद्धान्तानुसारेण द्वितीयं दूषयति **न द्वितीय इत्यादिना** । उपलक्षणं चैतत् । उक्तरीत्या तात्पर्ये क्रियमाणे तुल्यपदार्थाप्रवेशात् तदस्वारस्यं इत्यपि द्रष्टव्यम् । तृतीयं दूषयितुं प्रतिजानीते **न तृतीय इति** । वर्धमानरुचिदत्ते घटादीनां तुल्यपरिमाणत्वाभावात् व्यभिचारः इत्याशङ्क्य महत्त्वेन तुल्यपरिमाणत्वस्य तत्रापि सत्त्वात् न व्यभिचार इति परिहृतम्, तद्दूषयितुमाशङ्कते **न च महत्त्वेनेति** । स्वसिद्धान्तरीत्यैव दूषयति **तथा सतीति** । **उपपादितत्वेनेति** । 'प्रत्यक्षत्वतदन्यत्वे पुरुषापेक्षयाखिले' इत्येतद्व्याख्यावसरेति शेषः । ननु प्रथमतर्कस्य सर्षपो यदि एके साक्षात् मेर्ववयवपरम्परातुल्यावयवपरम्पराकसाक्षादवयवारब्धं स्यात् इत्यापादकं विवक्षितम् । एतच्च परोऽङ्गीकरोत्येव । मेरोरेकस्यावयवस्य यथा नावयवपरम्पराविश्रान्तिः तथा सर्षपस्यापि अवयवानां विश्रान्त्यभावसद्भावात् । तत्कथमापादकानङ्गीकारः इत्यत आह **दिगिति** । तदर्थस्तु उक्तरीत्या तात्पर्यकल्पनेऽपि तर्कस्य मूलशैथिल्यमेव । उक्तापादकापाद्यवतः कस्यापि त्वयोपलब्धत्वाभावेन व्याप्यसिद्धेरित्यादि । यद्वा प्रथमतृतीयतर्कयोः व्याप्यभावेनाभासत्वं पूर्वोक्तरीत्या प्रतिपत्तव्य इत्याशयेनाह **दिगिति** ।

स०व्र०— आनन्त्येऽपि तारतम्यसम्भवादिति । यत्रानन्त्यं तत्र समसङ्ख्यत्वमिति व्याप्यभावेन समसङ्ख्यत्वरूपापादकस्यैव सिद्ध्या न तेन समपरिमाणत्वापादनं उपपन्नमित्युक्तं भवति ।

विठ्ठल०— अवयवेति । परमाणुगतावयवपरम्परायां इत्यर्थः । आनन्त्यं तारतम्यं परमतस्वमतरीत्योपपादयति **अनन्ता हीति** । अपवर्गेति एकस्मिन्कल्पे संसारिणोऽनन्तः तेषु केषाञ्चिन्मुक्तो तदनन्तरकल्पेऽप्यनन्ता इत्यङ्गीकार्यत्वादिति भावः । **एवमनेकेति** । कल्पवत्सरमासदिनक्षणाद्यानन्तेषु तारतम्यं स्फुटमिति भावः ।

चषक— उदाहरणमिति । कल्पानन्त्यवत्सरानन्त्यमासानन्त्यादिकमित्यर्थः । **सूत्रघटकपदाभिहितपरिमाणसमवायिकारणप्रक्रियानिराक्रियासीमा ॥**

॥ इति पुनस्तत्रैव प्रकारान्तरेण सर्षपमहीधरयोः परिमाणभेदाभावशङ्का तत्समाधानं च ॥

॥ इति तच्छङ्कानिरसनम् ॥

॥ इति अवयवपरम्पराविश्रान्त्यभावे तर्कपराहतिशङ्का तन्निरसनञ्च ॥
॥ इति तच्छङ्कानिरसनस्य समर्थनम् ॥
॥ इति अनुव्याख्यानगतपदानां वैकल्पिकार्थतया
'परमाणोः सभागत्वसाधका'नुमानसूचकव्याख्याने व्याघातशङ्का तन्निरसनञ्च ॥
॥ इति साक्षिप्रामाण्यसमर्थनस्य प्रकृतोपयोगसमन्वयप्रदर्शनम् ॥
॥ इति तृतीयविकल्पनिरासः
(कालाकाशगतपरिमाणोत्कर्षापकर्षतारतम्यानन्त्यसाक्षिसिद्धत्वमनिच्छतामभिप्रायगत-
तृतीयविकल्पस्य 'साक्षी नाम प्रमाणमेव नास्ती'त्यस्य निरसनम्) ॥
॥ इति तत्साक्षिसिद्धत्वमनिच्छतामभिप्रायस्य विकल्पत्रयम् तन्निरासश्च ॥
॥ इति परिमाणोत्कर्षापकर्षोभयतारतम्यानन्तत्वे कालाकाशयोस्तावत्
तत्साक्षिसिद्धत्वस्य समर्थनम् ॥
॥ इति ईश्वरादन्यत्र कालाकाशविषयकपरिमाणोत्कर्षापकर्षोभयतारतम्यानन्तत्वे
प्रमाणप्रदर्शनम् ॥
॥ इति तदर्थं तद्विषये प्रमाणप्रदर्शनम् ॥
॥ इति प्रथमविकल्पितार्थे दोषत्वेनोक्तसाध्यवैकल्यस्य कारणे
उक्तानां विषयाणां सूत्रकारीयसिद्धान्तत्वदर्शनम् ॥
॥ इति समाधानम् (विश्रान्तिशब्दार्थविकल्पद्वयमपि सदोषम्) ॥
॥ इति परमाणोरुत्कृष्टापकृष्टपरिमाणाश्रयत्वे आक्षेपसमाधाने ॥
॥ इति उक्तार्थे आक्षेपसमाधानम् ॥
॥ इति उक्तसमन्वयरूपार्थस्य वैशेषिकादिमतविरोधप्रयुक्तान्यथात्वशङ्काद्वयनिरासे
'पारिमाण्डल्यादेः कारणत्वाभावरूपप्रथमशङ्का'याः निरासः
(परिमाणासमवायिकारणनिरासः) ॥

* * *

॥ अथ उक्तसमन्वयरूपार्थस्य वैशेषिकादिमतविरोधप्रयुक्तान्यथात्वशङ्काद्वयनिरासे
द्व्यणुकादिद्रव्यासमवायिकारणविषये अन्यथाप्रतिपत्तिरूपद्वितीयशङ्कानिराकरणम् ॥
॥ अथ तत्रादौ तदुक्तसजातीयद्वयसंयोगनियमाभावेऽपि
विजातीयपरमाण्वाद्यवयवसंयोगादपि कार्योत्पत्तिप्रदर्शनम् ॥

८७ सु०— यदेतत्सूत्रकृता परिमाणासमवायिकारणविषये दूषणमुक्तम्, तदुपलक्षण-मात्रम् । अन्यत्राप्यसमवायिकारणे स्वयं दूषणान्यूहनीयानीत्याशयवान् द्रव्यासमवायि-कारणसंयोगविषये अन्यथाप्रतिपत्तिं निराकरोति **तत्संयोगादिति** ।

अनु०— तत्संयोगादनियतात्पदार्थानां जनिर्भवेत् ।

अवयवसंयोगो द्रव्यासमवायिकारणमिति वदन्तोऽपि वैशेषिकादयः परमाणुकार्योत्पत्तौ द्वयोरेव सजातीययोरेव परमाण्वोरेव संयोग(स्यासमवायिका)स्य कारणत्वमित्याद्याचक्षते । तदश्रद्धेयम् ॥ किन्नाम तेषां कारणानामनियतादुक्तनियमरहितात्संयोगात्पदार्थानां द्रव्याणां जनिर्भवेत्, किञ्चित्कार्यं द्वयोः परमाण्वोः संयोगादुपजायते तद् द्व्यणुकमुच्यते, कदाचित् त्रयाणां तत् त्र्यणुकम्, चतुर्भिः परमाणुभिरारब्धं च(तच्च)तुरणुकम्, एवमन्यदपि । तथा किञ्चित्सजातीययोः परमाण्वोः संयोगात्, किञ्चिद्विजातीययोः । एवं किञ्चित्परमाण्वोरेव संयोगात् किञ्चित्परमाणुद्व्यणुकयोरित्यादि । एवं द्व्यणुककार्योत्पत्तावप्यनियमो द्रष्टव्यः ।

परि०— अन्यथाप्रतिपत्तिं द्व्यणुकादिकार्ये विषयवैपरीत्येनाङ्गीकारमित्यर्थः । **परमाणुकार्येति** । परमाणुतः कार्योत्पत्तावित्यर्थः । **इत्यादीति** । त्र्यणुकोत्पत्तौ त्रिभिरेव द्व्यणुकैः सजातीयैरेवेत्यादिग्रहः । एवं परिष्कृत्य मूलं योजयति **तेषामित्यादिना** ।

गु०दी०— किञ्चिद्विजातीययोः इत्यत्र 'तासां त्रिवृतं त्रिवृतमेकैकामकरोदि'ति श्रुतेः सर्वस्यापि कार्यस्य तेजोबन्नात्मकत्वादयमेव पक्षः साधीयान् । अन्ये तु उद्भटवादा इति ज्ञेयम् ।

यादु०— इत्याद्याचक्षत इति । अत्रादिपदेन त्र्यणुकाद्युत्पत्तावपि तदुक्तनियमसङ्ग्रहः ।

वं०प०— त्रयाणामिति । त्रयाणां परमाणूनां संयोगाज्जातमित्यर्थः । **एवमन्यदपीति** । चतुर्णां परमाणूनां संयोगाज्जातं चतुरणुकमित्यर्थः ।

श्रीनिधि०— उत्सूत्रता परिसंयोगाच्चतुरणुकमुत्पद्यते न तु चतुर्भिः स्त्र्यणुकैरिति नियम इत्यर्थः । **परमाणुद्व्यणुकयोरित्यादीति** । आदिपदेन परमाणुत्र्यणुकयोः संयोगो गृह्यते । **एवं द्व्यणुककार्योत्पत्ताविति** । द्व्यणुकयोरेव संयोगात् किञ्चित् । द्व्यणुकत्र्यणुकसंयोगात् किञ्चिदिति द्रष्टव्यम् ।

शे०वा०— 'तत्संयोगादनियतादि'त्युत्तरभाष्यानर्थक्यमाशङ्क्य द्रव्यासमवायिकारणनिराकरणार्थत्वान्न तदिति भावेन तथा सत्युत्सूत्रार्थप्रतिपादकत्वेनाभाष्यत्वप्रसङ्ग इत्यतस्तच्छङ्कानिराकरणपूर्वकं द्रव्यासमवायिकारणनिराकरणपरतयोत्तरग्रन्थं सङ्गमयति **यदेतदित्यादिना** । इत्यादीत्यादिपदेन द्व्यणुकादिकार्यभूतत्र्यणुका-

द्युत्पत्तावपि पराभिमतस्य त्रयाणामेव सजातीयानामेव द्व्यणुकानामेव संयोगस्य कारणत्वमित्यादेः सङ्ग्रहः । अत एवैवं द्व्यणुककार्योत्पत्तावप्यनियमो द्रष्टव्य इत्युत्तरत्र ग्रन्थकृद्वक्ष्यतीति ध्येयम् । **उक्तनियमरहितादिति** । द्वयोरेवेत्यादिनियमरहितादित्यर्थः । तत्कथमित्यतो द्वयोरित्यंशेऽनियममुपदर्शयति **किञ्चिदिति** । सजातीययो-रित्यंशेऽपि तमुपदर्शयति **तथेति** । परमाण्वोरेवेत्यंशेऽपि तमुपदर्शयति **एवमिति** ।

वा०र०— अन्यत्रापि असमवायिकारण इति मूलम् । कारण इत्यनन्तरं परपरिकल्पितनियम इति शेषः । **प्रमाणाभावेन प्रागुक्तेति** । प्रागुक्तस्य द्वयोरेवेत्यादिनियमाभावस्य प्रमाणाभावेनोपपादनार्थत्वादिति योज्यम् ।

चषक— अन्यथाप्रतिपत्तिं द्वयोरेवेत्यादिनाऽभिधास्यमानाम् ।

॥ इति तदुक्तसजातीयद्व्यसंयोगनियमाभावेऽपि विजातीयपरमाण्वाद्यवयवसंयोगादपि कार्योत्पत्तिप्रदर्शनम् ॥

* * *

॥ अथ तत्र तदुक्तनियमे प्रमाणाभावः ॥

८८ **सु०— कुत इति चेत् उक्तनियमे प्रमाणाभावादित्याह द्वयोरेवेति ।**

अनु०— द्वयोरेव तु संयोग इति केनावसीयते ।

तुशब्दो विशेषार्थः । तेन सजातीययोः परमाण्वोरिति नियमो लभ्यते । संयोगः आदिकार्यस्यासमवायिकारणमिति शेषः । केन प्रमाणेनेत्याक्षेपे । उपलक्षणमेतत् । त्रयाणामेव द्व्यणुकानामित्यपि द्रष्टव्यम् ।

ननु सावयवस्यानेकसंयोगः सम्भवति, परमाणुस्तु निरवयवः, इति द्वयोरेवेति नियमसिद्धिरित्युक्तोत्तरम् । निरवयवत्वे द्वयोरपि संयोगो न सम्भवति, संयोगस्यांश-वृत्तित्वात् ।

परि०— उक्तोत्तरमिति । परमाणोरपि सावयवत्वसमर्थनेनोक्तपरिहारमेतच्चोद्यमित्यर्थः । दोषान्तरं चाह **निरवयवत्व इति** ।

यादु०— उक्तोत्तरमिति । परमाणोरपि सावयवत्वस्योक्तत्वादित्यर्थः ।

वं०प०— उक्तोत्तरमिति । परमाणोरपि सावयवत्वस्य साधितत्वादिति भावः । दूषणान्तरमाह **निरवयवत्व इति** ।

कं०रा०— उक्तोत्तरमिति । 'सर्वदिक्ष्वपि सम्बन्धादि'त्यत्र परमाणोः सावयवतायाः समर्थितत्वादिति भावः ।

श्रीनिधि०— तुशब्दो विशेषार्थ इति । द्वयोरपि परमाणुत्वं सजातीयत्वं च विशेषणं समुच्चिनोतीत्यर्थः । तदेव दर्शयति **तेनेति** । **आदिकार्यस्य असमवायिकारणमिति शेष इति** । इदानीन्तनकार्याणां घटादीनां अनियमेनोत्पत्तिः । ततश्चानियमेनैव सर्वावयविसम्भव इत्युक्तेः । घटादीनां च खण्डावयविजन्यत्वादेवमुक्तम् । **उक्तमेवोत्तरमिति** । 'अतः सर्वपदार्थानां भागाः सन्त्येव सर्वदा । सर्वदिक्ष्वपि सम्बन्धादि'त्यनेनोक्तमित्यर्थः । दूषणान्तरमाह **निरवयवत्व इति** ।

शे०वा०— 'तत्संयोगादि'ति भाष्येणैव द्रव्यासमवायिकारणसंयोगविषयेऽन्यथाप्रतिपत्तिनिराससिद्धेः किं 'द्वयोरेवे'त्युत्तरग्रन्थेनेत्याशङ्क्य प्रमाणाभावेन प्रागुक्तानियमोपपादनार्थत्वान्न तदिति भावेन (तत्परतयो)-तथोत्तरवाक्यं योजयितुं तदनुपपत्तिशङ्कामुत्थापयति **कुत इतीति** । **उक्तेति** । द्वयोरेवेत्याद्युक्तेत्यर्थः । भाष्ये 'द्वयोरेव तु संयोग' इत्यनेन प्रमाणाभावेन द्वयोरेवेति नियमनिराकरणेऽपि सजातीययोरेव परमाण्वोरेवेति नियमद्वयस्यानिरासान्नानेन परोक्तनियमभङ्गसिद्धिरित्यतोऽत्र भाष्ये तुशब्देन सजातीययोरित्याद्युक्तनियमद्वयलाभान्नानुपपत्तिरिति भावेन तुशब्दबलेनोक्तनियमद्वयलाभमुपपादयितुं तदनुकूलतया तुशब्दार्थमाह **तुशब्द इति** । साकाङ्क्षत्वप्रयुक्तवाक्याभासत्वपरिहारायापेक्षितं पूरयति **कार्यस्येत्यादि** । **आक्षेप इति** । परिहाराभावेन प्रश्नार्थत्वासम्भवादिति भावः । द्व्यणुककार्योत्पत्तौ प्रमाणाभावेन पराभिमतनियमभङ्गस्य मूलारूढतासिद्ध्यर्थमाह **उपलक्षणमिति** । **ननु सावयवस्येति** । तत्रावयवभेदेन तत्संयोगोपपत्त्याऽनेकसंयोगाङ्गीकारे मूर्तानां समानदेशत्वापत्तेरभावादित्यर्थः । **परमाणुस्त्विति** । तस्य निरवयवत्वेन तत्तदवयवभेदेन तत्तत्संयोगानुपपत्त्याऽनेकसंयोगाङ्गीकारे मूर्तानां समानदेशताप्रसङ्गात् तद्रूपबाधकेन निरवयवस्य परमाणोरनेकसंयोगानुपपत्तावपि द्वयोः परमाण्वोः संयोगाङ्गीकारे मूर्तानां सामानाधिकरण्याप्रसङ्गादुक्तबाधकाभावेन निरवयवेऽपि तत्सम्भवान्न द्वयोः संयोगानुपपत्तिरिति भावः । **उक्तोत्तरमिति** । उक्तप्रायोत्तरमित्यर्थः । एतदेव दर्शयति **निरवयवत्व इति** । तत्र हेतुमाह **संयोगस्येति** । यो यत्संयोगः तदंशवृत्तिरिति व्याप्तेरित्यर्थः । तथा च द्वयोरपि संयोगोपपादकतया परमाणोः सावयवताया आवश्यकत्वात् तत एवानेकसंयोगपक्षेऽपि मूर्तानां समानदेशत्वाप्रसङ्गान्न द्वयोरेवेति नियमसिद्धिरिति भावः ।

वा०र०— तथोत्तरवाक्यमिति । उक्तनियमे प्रमाणाभावकथनपरतयेत्यर्थः । **तदनुपपत्तीति** । उक्तनियमाभावे निमित्ताभावेन तदङ्गीकारायोगः इति प्रागुक्तानुपपत्तिः इत्यर्थः । इति नियमद्वयेत्यत्रेति चेति योज्यम् । **द्व्यणुककार्योत्पत्तौ प्रमाणेति** । द्व्यणुककार्योत्पत्तौ यः पराभिमतो नियमः त्रिभिरेव सजातीयैरेवेत्यादिरूपः तस्य प्रमाणाभावेन यो भङ्गः तस्येति योजना । **तत्रावयवेति** । एतच्च .... ।

विट्ठल०— उक्तोत्तरमिति । परमाणोरपि सावयवत्वस्योक्तत्वादित्यर्थः ।

चषक— उक्तोत्तरम् परमाणोरपि सावयवत्वादित्यानुपूर्वीकम् ।

॥ इति तदुक्तनियमे प्रमाणाभावः ॥

* * *

॥ अथ तत्र प्रमाणाभावे असिद्धिशङ्का तन्निरसनं च ॥

८९ सु०— 'ननु सजातीयसंयोग एवारम्भक इति नियमो न निष्प्रमाणकः, परमाणुकार्ये गन्धाद्युत्पत्तेरेव तत्र प्रमाणत्वात् । तथा हि । पार्थिवाप्यपरमाणुभ्यां यद्येकं कार्यमुत्पद्यते तदा तदगन्धमस्नेहमापद्येत, पार्थिवतैजसाभ्यामुत्पन्नमगन्धरूपं उत्पद्येत, एकस्य गन्धादेरनारम्भकत्वात्; अतो गन्धाद्युत्पत्त्यैव सजातीयसंयोगस्यारम्भकत्वसिद्धिरि'त्यत आह कारणस्येति ।

अनु०— कारणस्य गुणास्तेन भवेयुः कार्यगा अपि ।

तेनेति । द्वयोरेवेति नियमाभावेनेत्यर्थः ।

स्यादेतद्विजातीयारम्भकत्वे बाधकम्, यदि द्वयोरेव परमाण्वोः संयोगः कार्यारम्भक इति नियमः प्रमाणवान् स्यात् । न चैवम् । तथा च बहूनां परमाणूनां विजातीयानां संयोगात् कार्यारम्भे कारणगता गन्धादयो गुणाः (सद्वितीयाः) सजातीयाः सन्तः (कार्यगाः) कार्यगतगन्धाद्यारम्भका अपि भवेयुः, को दोषः ।

परि०— तेनेतिमूलोक्ततात्पर्यं व्यनक्ति **स्यादेतदित्यादिना** । **तथा चेति** । द्वयोरेवेति नियमस्याप्रामाणिकत्वे सतीत्यर्थः । फलितमाह **बहूनामिति** । एकैकस्यानेकस्य वाऽऽप्यादि-

परमाणोरपीति योज्यम् । **विजातीयानां** पार्थिवादीनामित्यर्थः । मूलपदानि योजयति **कारणगता इति** ।

यादु०— तथा च बहूनामिति । सजातीयानामिति शेषः । अत एव सद्वितीयाः सन्त इति वक्ष्यमाणमुपपद्यत इति ध्येयम् ।

वं०प०— तदिति । कार्यमित्यर्थः । **अगन्धमस्नेहमिति** । पार्थिवपरमाणुजन्यत्वात् तस्मिन्कार्ये गन्धेन भाव्यम् । आप्यपरमाणुजन्यत्वात् स्नेहेन भाव्यम् । तथा चाप्यपरमाणुजन्यत्वात् तत्कार्यमगन्धमापद्येत कारणीभूताप्यपरमाण्वादौ गन्धाभावात् । पार्थिवपरमाणुजन्यत्वात् तत्कार्यमस्नेहमापद्येत । तत्कारणीभूत-पार्थिवपरमाण्वादौ स्नेहाभावादित्यर्थः । **अगन्धमरूपमिति** । **अरूपम्** अपाकजरूपरहितम् । पार्थिवपरमाणु-जन्यत्वात् तस्मिन्कार्यं गन्धेन भाव्यम् । तैजसपरमाणुजन्यत्वादपाकजरूपेण भाव्यम् । तथा च तैजस-परमाणुजन्यत्वात् तत्कार्यमगन्धमापद्येत । कारणीभूततैजसपरमाणौ गन्धाभावात् । पार्थिवपरमाणुजन्यत्वात् तत्कार्यमपाकजरूपाभाववदापद्येत । तत्कारणीभूतपार्थिवपरमाणावपाकजरूपाभावादित्यर्थः । **एकस्येति** । समवायिकारणीभूतैकपरमाणुनिष्ठस्यैकस्य गन्धस्येत्यर्थः ।

श्रीनिधि०— एकस्य गन्धादेरिति । आदिपदेन रसादिर्गृह्यते ।

शे०वा०— कार्यमिति । द्व्यणुकमित्यर्थः । ननु द्व्यणुकं यदि पार्थिवजलपरमाण्वारब्धं स्यात् तर्हि निर्गन्धं स्यादित्यत्र पार्थिवपरमाणुजलपरमाण्वारब्धस्य द्व्यणुकस्य पक्षत्वेन विवक्षायामाश्रयासिद्धिः । तन्मते तादृशद्व्यणुकस्याभावात् । पार्थिवपरमाणुद्व्यारब्धस्य द्व्यणुकपदेन विवक्षायां चापादकासिद्धिः । तत्र जलारब्धत्वस्यानभ्युपगमात् । किञ्च गन्धवदजन्यमत्रोपाधिः । न च घटजन्ये रूपादौ व्यभिचारेण यत्र निर्गन्धत्वं तत्र गन्धवदजन्यत्वमिति व्याप्तिविरहान्न साध्यव्यापकत्वमस्येति वाच्यम् । शुद्धसाध्यव्यापक-त्वाभावेऽपि द्व्यणुकत्वे सति यत्र निर्गन्धत्वं जलद्व्यारब्धद्व्यणुकादौ तत्र गन्धवदजन्यत्वसत्त्वेन पक्षधर्माव-च्छिन्नापाद्यव्यापकतया पार्थिवद्व्यणुके जलारब्धत्वसन्देहेन सन्दिग्धापादकाव्यापकतया चोपाधित्वसम्भवादित्यत आह **एकस्य गन्धादेरिति** । गन्धाद्यन्तरासहकृतस्येत्यर्थः । तत्रारम्भकस्य पार्थिवपरमाणुगतस्य गन्धस्य गन्धान्तरासहकृतत्वात् । तादृशाप्यपरमाणुगतस्नेहस्य च स्नेहान्तरासहकृतत्वात् । पार्थिवतैजसाभ्यामारब्धे चारम्भकपार्थिवपरमाणुगतगन्धरसयोः गन्धाद्यन्तरासहकृतत्वान्नारम्भकत्वमित्यर्थः ।

अयं भावः । पार्थिवद्व्यणुकत्व द्व्यणुंकमात्रवृत्तित्वे सति यदि आप्योपादेयवृत्तिः स्यात् तर्हि निर्गन्धमात्रवृत्तिः स्यादिति विपक्षे बाधकतर्कबलेन हेतोः साध्यव्याप्यतयोपाधेः साध्याव्यापकत्वम् । अत्र च सत्तादौ व्यभिचारवारणाय सायन्तम् । पार्थिवपरमाणुद्व्यारब्धद्व्यणुकमात्रवृत्तिधर्मे व्यभिचारं वारयितुमाप्योपा-देयवृत्तीति विशेष्यभागः । आपाद्ये मात्रपदमिष्टापत्तिवारणाय । विजातीयारब्धे परेण निर्गन्धत्वाभ्युपगमात् ।

ननु पार्थिवाप्यद्व्यणुकवृत्तिसंयोगद्वित्वादौ व्यभिचारः । न च अतो गुणान्यत्वे सतीत्यापादके विशेषणमभिमतं न तत्र व्यभिचार इति वाच्यम् । द्व्यणुकत्वादौ तदुभयद्व्यणुकान्यतरत्वादौ च तथाऽपि व्यभिचारादिति चेत् । अत्र केचित् । द्व्यणुकपदस्यात्र पृथिवीसमवायिकारणकपरतया पृथिवीसमवायिकारणकमात्रवृत्तित्वे सतीति सत्यन्तार्थलाभात् । पार्थिवाप्यद्व्यणुकवृत्तिसंयोगादेर्द्व्यणुकादेश्चाप्यसमवायिकारणकद्व्यणुकवृत्तित्वेन पृथिवीसमवायिकारणकमात्रवृत्तित्वाभावान्न व्यभिचारः । न चैवं दृष्टान्तालाभः । पृथिवीजलद्व्यणुकसमवायिकारणकसंयोगवृत्तितत्संयोगत्वादेस्तथात्वादित्याहुः । तन्न । पृथिवीजलद्व्यणुकसमवायिकारणकसंयोगपार्थिवद्व्यणुकान्यतरत्वे तथाऽपि व्यभिचारतादवस्थ्यात् । वस्तुतस्तु निर्गन्धमात्रवृत्तीत्यनन्तरं वृत्तिपदपूरणेन निर्गन्धमात्रवृत्तिवृत्तित्वस्यैवापाद्यत्वस्थितेर्नोक्तव्यभिचारः । द्व्यणुकत्वादेरपि निर्गन्धमात्रवृत्तिजलद्व्यणुकादिवृत्तित्वात् । न चैवं सत्तादावप्यापाद्यसत्त्वेन व्यभिचाराभावात् सत्यन्तवैयर्थ्यं स्यादिति वाच्यम् । पृथिवीजलद्व्यणुकोपादेयसंयोगवृत्तितत्संयोगत्वादौ व्यभिचारवारकत्वात् । न चैवमपि मात्रपदवैयर्थ्यम् । पार्थिवद्व्यणुकपूर्वोक्ततत्संयोगान्यतरत्वे व्यभिचारवारकत्वादिति सङ्क्षेपः ।

तथा च बहूनामिति । ननु बहूनां परमाणूनां विजातीयानां संयोगात् कार्यारम्भे कारणगतगन्धादेः सद्वितीयत्वं न सम्भवति । पार्थिवाप्यतैजसपरमाण्वारब्धे कारणगतगन्धस्नेहयोः, पार्थिवतैजसवायवीयपरमाण्वारब्धे च पृथिवीगतगन्धरसयोर्गन्धाद्यन्तरसहकृतत्वालाभात् कथं तत्कार्यगतगन्धाद्यारम्भकत्वमिति चेन्न । यत्र च पार्थिव एक आप्यश्चैकस्तैजसोऽप्येक एवेति वा यत्र पार्थिव एकस्तैजसोऽप्येको वायवीयश्चैक एवेति वा विजातीयानां पार्थिवाप्यतैजसपरमाणूनामथवा पार्थिवतैजसवायवीयानां वा संयोगात् कार्यारम्भस्तत्र कारणगतगन्धस्नेहरसानां गन्धाद्यन्तरासहकृतत्वेन सद्वितीयत्वासम्भवेऽपि यत्र पार्थिवौ द्वावाप्यौ च द्वौ तैजसस्त्वेक इत्येवं बहूनां विजातीयानां पार्थिवादिपरमाणूनां संयोगात् कार्यारम्भस्तत्र कारणगतगन्धस्नेहरसानां गन्धाद्यन्तरसहकृतत्वेन सद्वितीयत्वलाभात् कार्यगतगन्धाद्यारम्भकत्वस्य नानुपपत्तिरित्यभिप्रायेणैतद्ग्रन्थप्रवृत्तेः । यत्र च पार्थिव एक एवेत्याद्युक्तरीत्या विजातीयानां संयोगात् कार्यारम्भः तत्रैकैकस्यापि गन्धादेरारम्भकत्वे बाधकाभावादित्यादिरूपेण 'नन्वनियमवादिने'त्यादिशङ्कासमाधानरूपेण न्यायेनैव कार्यगतगन्धाद्यारम्भकत्वोपपत्तेर्नानुपपत्तिप्रसङ्ग इत्याशयः ।

वा०र०— यद्येकं कार्यं उत्पद्येत इत्यत्रत्य कार्यं इत्येतत् प्रतीकतया उपादाय तदर्थमाह **कार्यमिति । द्व्यणुकमित्यर्थ इति** । उक्ततर्के धर्मिविकल्पपूर्वकदूषणाभिधानपूर्वकं उपाध्युद्भावनं वर्धमाने एकस्येत्यवतारकृतं तदनुसारेण उक्ततर्कपक्षविकल्पपूर्वकदूषणाभिधानपूर्वकं उपाधिं चाभिधाय तन्निरासकतया उत्तरवाक्यं योजयितुं पार्थिवाप्येत्येतन्मूले विवक्षिततर्कस्वरूपं व्यञ्जयन्नेव पक्षं तावद्विकल्पयति **ननु द्व्यणुकमिति । तन्मत इति** । सजातीयारम्भकत्ववादिमतेत्यर्थः । ननु शरीरपरम्परारम्भकद्व्यणुकत्वेन वा यत् सजातीयाभ्यामेवारब्धमिति विजातीयाभ्यामपि आरब्धमिति च वादिप्रतिवादिविमतिविषयीभूतत्वेन वा द्व्यणुकस्य पक्षता इत्यस्वरसात् दूषणान्तरमाह **किं चेति** । यद्यपि वर्धमानकृता पक्षधर्मावच्छिन्न-

साध्यव्यापकगन्धवदजन्यत्वं उपाधिरित्येवोक्तम् । तथापि पक्षधर्मेति विशेषणकृत्यकथनाय प्रथमतः उपाध्युद्भावनपूर्वकं तत्रानुपपत्तिनिरासाय पक्षधर्मप्रदर्शनपूर्वकं तदवच्छिन्नसाध्यव्यापकत्वोपदर्शनेन व्युत्पादनमिदं वर्धमानेन्दौ कृतम् । तदनुसारेण स्वयं तदुपपादनं कृतं इत्यदोषः । अयं चोपाधिः निर्गन्धत्वे आपाद्यमेव । तत्र च पृथिविगुणे आपाद्यापादकत्वमाशङ्कते **न चेति** । व्यापकाभावोपपादनायोक्तं **घटजन्य इति** । **न साध्यव्यापकत्वमिति** । नापाद्यव्यापकत्वमित्यर्थः । अत एव वक्ष्यति **पक्षधर्मावच्छिन्नापाद्येत्यादि** । एवमुत्तरत्रापि साध्यपदस्थाने आपाद्यपदमूह्यम् । **द्व्यणुकत्वे सतीति** । उपलक्षणं चैतत् । द्रव्यत्वे सतीति वेत्यपि बोध्यम् । एवमेव रसत्वाद्यनुमानेऽपि रसवदजन्यत्वे स्नेहस्पर्शवदजन्यत्वादेः उपाधित्वं चोपलक्षणमात्रावधेयम् ।

ननु समवाय्यादिसाहित्यात् नैकत्वं गन्धादेः इत्यतो व्याचष्टे **गन्धाद्यन्तरेति** । तत्रारम्भकस्येत्यादिना इत्यर्थः इत्यन्तम् । यद्यपि अरूपत्वास्पर्शत्वोपपादकतया रूपस्पर्शयोरपि अनारम्भकत्वमुपपादनीयम् । अत एव वैशेषिकसूत्रोपस्कारे पृथिव्यनिलाभ्यां अगन्धं अरूपं अरसं अस्पर्शं च स्यात् इत्याद्यूह्यमित्युक्तम् । वर्धमानेऽपि अगन्धं अरसं इत्याद्यापद्यते किरणावलिवाक्यव्याख्यानावसरेऽगन्धत्वारसत्वयोरिवारूपत्वास्पर्शत्वयोरपि तत्तत्पक्षोपादानेनोपपादनं कृतम् । तथापि तत्तत्पक्षभेदेनावशिष्टं वर्धमानाद्युक्तरीत्या स्वयमेवोहनीयमित्यभिप्रायेण मूलकृताऽगन्धत्वारसत्वयोरेवोपपादनं कृतम् । तदनुसारेणात्र टीकायामपि एकस्येति वाक्यं तावन्मात्रोपपादकतया योजितम् । मूलस्य तत्रोपलक्षणतया व्याख्यानवत् अत्रापि उपलक्षणतया व्याख्यातुं शक्यत्वादिति हृदयम् । शरीरं अगन्धं अरसं अरूपस्पर्शं आपद्यते इति भाष्यं तृतीयाध्याये । ननु एको गन्धोऽनारम्भवा इति कुतः इत्यादि तात्पर्यपरिशुद्धिः । तत्स्थलानुगुण्येनोपयुक्तमधिकं व्याख्येयम् । मूले **अस्नेहमापद्यत इति** । अनेन एकस्मिन्नेव पक्षे आपादनद्वयसम्भवे प्रत्येकापादनपरवर्धमानग्रन्थेऽरुचिरिति सूचितम् । उपलक्षणं चैतत् । पार्थिवावयवीयाभ्यां अगन्धमरसमरूपपरमाणोरपरमाणुनापि इत्यनियमे पार्थिवाकाशाभ्यां अगन्धं अरसं अस्पर्शं आपद्यते इत्याद्यपि द्रष्टव्यम् । तत्र यत्पक्षविषये विकल्पदूषणं तच्छरीरपरम्परारम्भक द्व्यणुकत्वादिनैव पक्षता सम्भवतीति नानुपपत्तिरित्यस्वरससूचककिञ्चेत्यनेन परिहृतमिति न तदर्थं पक्षतापेक्षेति मनसि निधायोपाधिमात्रदूषणपरतया मूलं योजयन् विपक्षे बाधकतर्कमाह **अयं भाव इत्यादिना** । अयं च वर्धमानकृतोक्तोपाधिदूषणायाभिहितः । तत्र च जलद्व्यणुकत्वं दृष्टान्त इति द्रष्टव्यम् । **हेतोः साध्यव्याप्यतयेति** । अत्र हेतुसाध्यपदे आपादकापाद्यपरतयाऽभिहिते । आपाद्येत्यादेः पूर्वमुक्तत्वात् । नन्वत्र कथमुपाधेः साध्यव्यापकत्वम्, तथा सति द्व्यणुकत्वे सति निर्गन्धत्वस्य गन्धवदजन्यत्वव्यभिचारित्वं वक्तव्यम् । न च तत् सम्भवति । व्यभिचारो हि निर्गन्धद्व्यणुके एव वाच्यः । तदन्यत्राविशिष्टे साध्याभावात् । न च तत् द्व्यणुके गन्धवज्जन्यत्वमस्तीति गन्धवदजन्यत्वरूपोपाधेरपि सत्त्वेन व्यभिचाराभावात् । न च सुरभ्यसुरभिपरमाण्वारब्धे द्व्यणुके साध्यसत्त्वेऽपि गन्धवदजन्यत्वं नास्तीति अस्ति व्यभिचार इति वाच्यम् । तथा सति निर्गन्धत्वे साध्ये गन्धवदजन्यत्वरूपोपाधेः साध्यव्यापकत्वं तु न सम्भवत्येव । यत्र निरूपद्व्यणुके द्व्यणुकत्वावच्छिन्ननिरूपत्वं तत्र रूपवदजन्यत्वाभावेन तदजन्यत्वसद्भावेन व्यभिचाराभावात् । न हि निर्गन्धं वा जन्यमिव नीरूपमपि

द्व्यणुकं रूपवज्जन्यमस्ति तत्कथं साध्यव्यापकत्वमिति चेत् । अत्र वदन्ति । प्रथमलक्षणे उत्पत्त्यनन्तरमेव विनष्टे द्व्यणुकद्व्यणुकत्वावच्छिन्ननिरूपत्वसद्भावेऽपि रूपवज्जन्यत्वस्यैव सत्त्वेन तदभावाभावात् अरूपत्व-रूपापाद्येऽपि युक्तं **उपाधेः साध्यव्यभिचारित्वमिति** । तदपरे न सहन्ते रूपवज्जन्यत्वमित्यत्र रूपव-त्पदोपादानमाहिम्ना विशिष्टकार्योत्पत्तौ द्रव्यस्येव रूपस्यापि कारणत्वमित्यर्थलाभेन फलोपहितभूतरूपवत् जन्यत्वस्यैव रूपवदजन्यत्वप्रतियोगितया उत्पत्त्यनन्तरमेव विनष्टे द्रव्ये च कारणगुणेन कार्यगुणानारम्भात् तादृशरूपवज्जन्यत्वाभावेन रूपवदजन्यत्वरूपोपाधिसत्त्वेन व्यभिचाराभावादिति । वस्तुतस्तु रूपवत् वृत्ति-द्रव्यविभाजकोपाधिमत्वस्यैव रूपवत्वरूपतायाः विवक्षितत्वेन उत्पत्त्यनन्तरमेव विनष्टद्व्यणुके च रूपवत् वृत्तिद्रव्यविभाजकोपाधिवत् द्रव्यत्वसद्भावेनारूपत्वस्यैवाभावात् । व्याप्यस्यैवाभावेन उपाध्यव्यभिचारित्व-सम्भवात् । एवं विलक्षणप्रकारेण सुरभिअसुरभिपरमाण्वारब्धे द्व्यणुके निर्गन्धस्यापि व्यावृत्तिः सुशका भवतीति तत्रापि साध्यस्य उपाध्यव्यभिचारित्वमेव । अतः प्रकारान्तरानुपपत्तेः उपाधेः साध्यव्यापकत्वोक्तिः अन्यथोपपाद्यते । तथापि । साध्यते अनेनेति साध्यशब्दस्य करणे ण्यत्प्रत्ययान्तस्य साधनपरत्वेन व्यापक-त्वात् इत्यत्राङ्श्च सम्मतेत्यर्थकत्वेन साधनव्यापकत्वमेव साध्याव्यापकत्वपदेनाभिप्रेतम् । न च तावता कथं उपाधित्वानुपपत्तिरिति वाच्यम् । यत्र हि विपक्षे बाधकतर्कबलेन हेतोः साध्यव्याप्यतानिश्चयः तत्र उपाधिर्नास्तीति नियमः । स चोपाधेरभावः क्वचित् उपाधेः साध्याव्यापकत्वात् क्वचिच्च साधनव्यापकत्वात् । तथा चायं प्रयोगः । अयमुपाधिः साधनव्यापकः तद्व्यापकत्वादिति । तावतापि लक्षणाभावेनोपाधित्वा-भावोपपत्तेः । एवं च प्रकृते रूपवदजन्यत्वोपाधेः यद्यपि साध्याव्यापकत्वं न सम्भवति तथापि साधन-व्यापकत्वमेव भविष्यतीति युक्तः उपाध्यभावः । वस्तुतस्तु 'अनुकूलेन तर्केण सनाथे सति साधने साध्यव्यापकताभङ्गात् पक्षेऽन्योपाधिसम्भवः' इत्युक्तरीत्या पक्ष एव साध्यव्यापकत्वेनोपाधित्वानुपपत्ति-रित्यत्र तात्पर्यमित्यदोषः । वर्धमानरुचिदत्तानुसारेण बाधकतर्के पदकृत्यमाह **अत्र चेति** । **द्व्यणुकमात्र-वृत्तिधर्म इति** । तद्व्यणुकत्वमित्यर्थः । **इष्टापत्तिवारणायेति** । पार्थिवद्व्यणुकत्वे पार्थिवपरमाणुद्वयारब्ध-द्व्यणुकावच्छेदेन गन्धवद्वृत्तित्वमङ्गीक्रियते । पार्थिवजलपरमाण्वारब्धे तु निर्गन्धवृत्तित्वं अङ्गीक्रियत एवेति इष्टापत्तिपरिहारायेत्यर्थः । तामेव उपपादयति **विजातीयारब्ध इति** । उक्त एवार्थः । **निर्गन्धत्वाभ्युप-गमादिति** । यद्यपि परस्याविजातीयारब्धे निर्गन्धत्वाभ्युपगमः स्वरसः । तथा सति अगन्धं अरसं इत्यादि मूलोक्तं तर्केऽपि इष्टापत्तिं ब्रूयात् । तथापि यदि इदानीमेव तत्र निर्गन्धत्वं स्वरसताभ्युपगम्य इष्टापत्तिं ब्रूयात् तर्हि तत्परिहाराय मात्रपदमुपादेयमिति हृदयम् । अत एव रुचिदत्ते एवमेवोक्तम् ।

अत एव च महद्द्रव्यारम्भकत्वादिति हेतौ महत्पदकृत्यं परोक्तरीत्या टीकायामेवोत्तरत्र वक्ष्यते इति ध्येयम् । रुचिदत्तानुसारेण हेतुं विचारयति **ननु पार्थिवोऽप्येत्यादिना** । पार्थिवपरमाणुद्वयारब्धं पार्थिवद्व्यणुकं आप्य परमाणुद्वयारब्धं चाप्यद्व्यणुकतया वर्तमानो यः संयोगः तद्वृत्ति च द्वित्वादि तस्य द्व्यणुकमात्रवृत्तित्वे सति आप्योपादेयवृत्तित्वरूपापादकवत्वात् निर्गन्धरूपाप्यद्व्यणुकवृत्तित्ववत् रसगन्धपार्थिवद्व्यणुकवृत्तित्व-स्यापि सत्त्वेनापाद्यभावात् व्यभिचार इत्यर्थः । **द्व्यणुकत्वादाविति** । **आदि**पदेन परमाण्वारब्धत्वपरिग्रहः ।

तदुभयेति । पार्थिवद्व्यणुकाप्यद्व्यणुकोभयान्यतरत्वादावित्यर्थः । अत्रान्यतरत्वस्याननुगमात् तदुभयद्व्यणुकान्यान्यत्वादावित्यर्थः । अत एव रुचिदत्तीये तथैवोक्तम् । ग्रन्थकृता तु शास्त्रीयव्यवहारानुसारेण तत्रैव तात्पर्येणान्यतरत्वादावित्युक्तमिति ध्येयम् । **आप्यसमवायिकारणकद्व्यणुकवृत्तित्वेनेति** । आप्यपरमाणुद्वयसमवायिकारणकद्व्यणुकेऽपि वृत्तित्वेनेत्यर्थः । **न व्यभिचार इति** । न चैवं पार्थिवद्व्यणुकत्वस्यापि पृथिवीजलपरमाणुसमवायिकारणवृत्तितया पृथिवीसमवायिकारणकमात्रवृत्तित्वाभावप्रसङ्ग इति परं प्रति आपादकसिद्धिरिति वाच्यम् । वैषम्यात् । परेण हि पार्थिवाप्यपरमाणुद्वयारब्धद्व्यणुकस्य एकत्वाङ्गीकारेण तद्व्यणुकत्वस्य पृथिवीमात्रसमवायिकारणकमात्रवृत्तित्वाङ्गीकारेऽपि पृथिवीसमवायिकारणकमात्रवृत्तित्वस्याङ्गीकारात् । एकस्य तस्य द्व्यणुकस्य जलसमवायिकारणत्वेऽपि पृथिवी पृथिवीसमवायिकारणकत्वाक्षतेः । पृथिवीभ्यां आप्याभ्यां परमाणुभ्यां आरब्धयोः द्व्यणुकयोः विद्यमानसंयोगादेस्तु न पृथिवीसमवायिकारणकमात्रवृत्तित्वमिति युक्तस्तत्परिहारः इति द्रष्टव्यम् ।

पृथिवीसमवायिकारणका वृत्तिः जलद्व्यणुकत्वस्य तर्हि दृष्टान्ततानुपपत्तिः इत्याशङ्कते **न चेति** । दृष्टान्तान्तराश्रयणात् नानुपपत्तिः इत्याशयेन परिहरति **पृथिवीजलेति** । **पृथिवीजलद्व्यणुकेति** । पृथिवीपरमाणुभ्यामारब्धं जलपरमाणुभ्यामारब्धं च यत् द्व्यणुकद्वयं तत्समवायिकारणको यः तयोः संयोगः तद्वृत्ति यत् तत् संयोगत्वं तस्य पृथिवीसमवायिकारणभूतसंयोगस्यैव आप्यसमवायिकारणकत्वेन आप्यसमवायिकारणकवृत्तित्वेऽपि पृथिवीसमवायिकारणकमात्रवृत्तित्वस्याविरोधेनापादकसत्त्वात् संयोगस्य निर्गन्धतया तन्मात्रवृत्तित्वाच्च दृष्टान्तत्वमित्यर्थः । **पृथिवीजलद्व्यणुकेति** । उक्तरीत्या संयोगस्य पृथिवीसमवायिकारणकत्वम् । पार्थिवद्व्यणुकं तु पार्थिवाभ्यामेव परमाणुभ्यां उत्पन्नं तदुभयान्यतरत्वस्य उक्तरीत्या पृथिवीजलद्व्यणुकसमवायिकारणकसंयोगपार्थिवद्व्यणुकयोरसत्त्वेन पृथिवीसमवायिकारणकमात्रवृत्तित्वे सति आप्योपादेयवृत्तित्वस्यापि सत्त्वात् पार्थिवद्व्यणुकस्य सगन्धत्वेन निर्गन्धसगन्धोक्तसंयोगपार्थिवद्व्यणुकयोः उक्तान्यतरत्वस्य सत्त्वेन निर्गन्धमात्रवृत्तित्वाभावात् साध्याभावेन च व्यभिचार इति भावः । **द्व्यणुकादिवृत्तित्वादिति** । द्व्यणुकवृत्तित्वात् इत्येव वक्तव्यत्वेऽपि द्व्यणुकत्वादावित्यत्रादिपदसङ्गृहीत परमाण्वारब्धत्वस्य द्व्यणुकत्वाकारपरित्यागेन परमाण्वारब्धवृत्तित्वादित्येतत् वक्तुं आदिपदमित्याहुः । **आपाद्यसत्त्वेनेति** । केवलजलपरमाण्वारब्धद्व्यणुकादौ निर्गन्धमात्रवृत्तिनि सत्तायाः सत्त्वेन निर्गन्धमात्रवृत्तित्वस्य तत्र सत्त्वादिति भावः । **पृथिवीजलद्व्यणुकेति** । पृथिवीद्व्यणुकं जलद्व्यणुकं च तदुभयोपादेयतत्संयोगवृत्तितत्संयोगस्याप्योपादेयवृत्तित्वेऽपि निर्गन्धमात्रवृत्तित्वस्य संयोगेऽभावेन निर्गन्धमात्रवृत्तिवृत्तित्वाभावेन व्यभिचारे तन्निरासाय द्व्यणुकमात्रवृत्तित्वे सति इत्युक्तम् । तत्संयोगत्वस्य च द्व्यणुकवृत्तित्वस्यैवाभावेन तन्मात्रवृत्तित्वस्य सुतरामभावात् । **न व्यभिचार इति** । तत्परिहारकत्वमिति भावः । द्व्यणुकमात्रस्य तत्संयोगत्वादौ व्यभिचारपरिहारत्वोपपत्तेः मात्रपदं व्यर्थमित्याशङ्कते **न चैवमिति** । **पूर्वोक्तेति** । पृथिवीजलद्व्यणुकसमवायिकारणकेत्यर्थः इति सर्वमनवद्यम् ।

मूले **द्वयोरेवेति** । नियमाभावेनेत्यर्थः । उक्तरीत्या उपलक्षणया सजातीययोरेवेति नियमाभावोऽपि अभिप्रेतः । अन्यथा वक्ष्यमाणतया च बहूनामित्यस्यासामञ्जस्यापत्तिरिति ध्येयम् । अत्र बहूनामित्येतत् विजातीयेष्वेव प्रत्येकं बहुत्वाभिधायकमित्यभिप्रायस्याज्ञानेन ननु बहूनामित्यादि शङ्का । तदभिप्रायाविष्कारेणैव यत्र पार्थिव इत्यादि परिहारश्च इत्यवधेयम् । **कारणगतगन्धस्नेहयोरिति** । रूपरसस्पर्शानां उत्पत्तिसम्भवाभिप्रायेण द्वयोरेवोपादानम् । एवं पृथिवीगतगन्धरसयोरित्यत्रापि रूपस्पर्शोत्पत्तिसम्भवाभिप्रायेण द्वयोरुपादानमित्यवधेयम् । उपलक्षणं चैतत् । आप्यतैजसवायवीयपरमाण्वारब्धे जलगतस्नेहरसयोः इत्याद्यपि द्रष्टव्यम् । गन्धस्नेहयोः पृथिवीजलमात्रवृत्तित्ववत् । रूपस्यापि तदभावेन तैजसरूपस्य पृथिवीजलरूपाभ्यां अनेकत्वं सम्भवतीति तद्वैविध्यमावश्यकं इत्याशयेनोक्तं **तैजसस्तु एक इति** । एतदुपादानं च रूपादिकमपि अत्राभिप्रेतमिति ज्ञापनार्थम् । अत एवोत्तरत्र रसानामिति बहुवचनमाद्यर्थे । तेन च रसादेरित्यर्थः पर्यवसन्नो ग्रन्थकृदभिप्रेत इति ध्येयम् । पत्रान्तरे लेख्यमस्ति । शङ्कासमाधानरूपेण न्यायेन इत्यत्र वक्ष्यमाणेति पूरणीयम् । यद्वा वक्ष्यमाणग्रन्थस्य व्यवधानाभावेन पूर्वोत्तरग्रन्थयोः बुद्धिस्थत्वमाश्रित्य तयोः विषयविवेचनमेतदित्यदोषः ।

विट्ठल०— नियमाभावः कुत इत्यतस्तदुपपादनं न गन्धाद्युत्पत्तिप्रकारं दर्शयति **स्यादेतदिति** । **तथा चेति** । नियमस्याप्रामाणिकत्वे सतीत्यर्थः । **बहूनामिति** । सजातीयानामिति शेषः । अत एव सद्वितीयाः सन्त इत्येतदुपपद्यते ।

॥ इति प्रमाणाभावे असिद्धिशङ्का तन्निरसनं च ॥

* * *

॥ अथ तत्र अनियमपक्षे बाधकशङ्कानिरासः ॥

९० सु०— नन्वनियमवादिना द्वयसंयोगस्यारम्भकत्वं तावदिष्यते । तत्र विजातीययोरारम्भकत्वे कार्ये गन्धाद्यनुत्पत्तिः प्रसज्यत इति चेन्न, एकैकस्यापि गन्धादेरारम्भकत्वे बाधकाभावात् ।

अपेक्षणीयान्तराभावात् सन्ततोत्पत्तिप्रसङ्गो बाधक इति चेन्न; कार्यद्रव्योत्पत्तेरपेक्षणीयत्वात्, समवायिकारणाभावे कार्यानुत्पादात्, अन्यथाऽनेकगन्धाद्यभ्युपगमेऽपि समानो दोषः ।

तदिदमुक्तं कार्यगा इति ।

परि०— अनियमवादिनेति । सिद्धान्तिनेत्यर्थः । **इष्यत इति** । किञ्चित्कार्यं द्वयोः परमाण्वोः संयोगादुपजायत इति पूर्वमुक्तत्वादिति भावः । अस्तु कार्यद्रव्योत्पत्तिरपीत्यत आह **समवायीति** ।

गु०दी०— अपेक्षणीयान्तराभावात् इत्यत्र गन्धस्य गन्धान्तरारम्भकत्वे रूपाद्यनपेक्षत्वादिति भावः । **कार्यद्रव्योत्पत्तेरपेक्षणीयत्वात्** इत्यत्रैकैकपरमाणुगतगन्धेन गन्धान्तरोत्पादनं द्व्यणुकाख्यकार्योत्पत्तावेव भवति । तस्यैवोत्पत्स्यमानगन्धसमवायिकारणत्वात् । कार्यं च द्व्यणुकादिकं परमाणुद्वयसापेक्षमिति न गन्धस्यापि सन्ततोत्पत्तिरिति भावः ।

यादु०— द्वयसंयोगस्येति । कदाचिद् द्वयसंयोगस्यापीत्यर्थः । अनियमवादित्वादेवेति भावः ।

वं०प०— एकैकस्य गन्धादेरारम्भकत्वे बाधकमाशङ्कते **अपेक्षणीयेति । सन्ततेति** । प्रलयेऽप्येकस्य परमाणोस्तद्गन्धस्य च सत्त्वात् कार्यं स्यादित्यर्थः । अपेक्षणीयत्वमुपपादयति **समवायीति । अन्यथेति** । अनेकेषां गन्धादीनां कार्ये गन्धाद्यारम्भकत्वपक्षेऽपि प्रलयेऽनेकेषां परमाणूनां तद्गन्धस्य च भावात् कार्यं स्यादेवेत्यर्थः । कार्यद्रव्योत्पत्त्यपेक्षामङ्गीकृत्य समाधिः समानः । **कार्यगा** इत्यस्योत्पन्नं यत्कार्यं द्रव्यं तत्रत्या इत्यर्थः ।

कं०रा०— एकैकस्य गन्धादेरारम्भकत्वे बाधकं शङ्कते **अपेक्षणीयान्तरेति । सन्ततोत्पत्तिप्रसङ्ग इति** । कार्यभूतगन्धादेरिति शेषः । कार्यभूतगन्धाद्युत्पत्तौ कार्यद्रव्योत्पत्तेरपेक्षणीयत्वात् तस्य सततोत्पत्तिर्न प्रसज्यत इति परिहरति **नेति** । कार्यद्रव्यानुत्पत्तावपि गन्धाद्युत्पादः कुतो नेत्यत आह **समवायिकारणाभाव इति । अन्यथेति** । गन्धाद्युत्पत्तौ कार्यद्रव्योत्पत्तेरनपेक्षितत्वेनैकगन्धादेरारम्भकत्वाभ्युपगमेऽपि कार्यभूतगन्धादेः सततोत्पत्तिप्रसङ्ग इति दोषः समान इत्यर्थः । **तदिदमिति** । गन्धाद्युत्पत्तौ कार्यद्रव्योत्पत्तेरपेक्षितत्वात्कार्यद्रव्यस्य च सदा असत्त्वादेकैकगन्धादेरारम्भकत्वे कार्यभूतगन्धादेर्न सततोत्पत्तिप्रसङ्ग इत्येतत्प्रमेयं कार्यगा इत्यनेन सूचितमित्यर्थः ।

श्रीनिधि०— कार्यद्रव्योत्पत्तेरिति । द्व्यणुकरूपस्येत्यर्थः । **अन्यथा** । समवायिकारणानपेक्षणे । **अनेकगन्धाद्यभ्युपगमेऽपीति** । अनेकैर्गन्धादिभिः । **अभ्युपगमे** गन्धाद्यारम्भाभ्युपगमे । अपेक्षणीयान्तराभावात् । समवायिकारणापेक्षायां तु तुल्यं समाधानम् । 'कारणस्य गुणास्तेने'त्येतत् परमतानुसारेण बाधकशङ्कापरिहारकत्वेन व्याख्याय स्वमतानुसारेणापि तथा व्याख्याति **एतच्चेति । कारणगुणा एवेति** । न त्वारम्भका इत्येव शब्दार्थः । येन साजात्यमावश्यकं स्यादिति भावः । **व्यवहारविलोपः स्यादिति** । पृथिव्येवेयं न जलमित्यादि व्यवहारविलोपः स्यादित्यर्थः । **परिहरिष्यमाणत्वादिति** । पृथिव्यादेः बाहुल्यात्पत्वाभ्यां पृथिव्येव न जलमित्यादि व्यवहार इति भावः ।

शे०वा०— यद्यप्येवमुक्तरीत्या बहूनां विजातीयानां संयोगात् कार्यारम्भस्थले एव कार्ये गन्धाद्यनुत्पत्तिप्रसञ्जनमेव सम्भवतीति तदेवाशङ्कनीयम् इति तत्परित्यागेन द्वयसंयोगात् कार्यारम्भस्थले तदनुत्पत्तिप्रसञ्जनपर्यन्तं धावनमनर्थकमित्याभाति । तथाऽपि स्थलान्तरे तद्व्युत्पादनेनार्थतोऽभिप्रेतस्यापि सिद्धिमभिप्रेत्य वा परेण तत्रैव विजातीययोरारम्भकत्वे गन्धाद्यनुत्पत्तिप्रसङ्गस्य व्युत्पादितत्वाद्वा स्वयमपि तत्रैव गन्धाद्यनुत्पत्तिप्रसङ्गमुत्थापयति **नन्विति** । द्वयसंयोगस्यापि हेतुतामुपपादयितुमनियमवादिनेत्यनियमवदित्वादेवेति हेतुगर्भविशेषणम् । अन्यथा एतदंशे नियमवादित्वप्रसक्त्याऽनियमवादित्वभङ्गप्रसक्तेरिति भावः । **अनुत्पत्तिः प्रसज्यत इति** । एकैकस्य गन्धादेरनारम्भकत्वादिति भावः । समवायिकारणाभावान्न सन्ततकार्योत्पत्तिप्रसङ्ग इत्यभिप्रेत्य गूढाभिसन्धिरुत्तरमाह **एकैकस्यापीति** । तथा च न गन्धाद्यनुत्पत्तिप्रसङ्गेन सजातीययोरेवारम्भकत्वमिति नियमसिद्धिरिति भावः । आशयमविद्वान् पूर्वपक्षी स्वाशयमुद्घाटयति **अपेक्षणीयान्तराभावादिति** । सिद्धान्ती स्वाशयमुद्घाटयति **कार्यद्रव्योत्पत्तेरिति** । तदुत्पत्त्यपेक्षामुपपादयति **समवायिकारणाभाव इति** । उत्पाद्यस्य गन्धादेर्यत्समवायिकारणं द्व्यणुकादि, तदनुत्पत्तौ तदभावादेव परमाणुगन्धादि न तत्र गन्धादिकमारभत इत्यर्थः । कार्ये गन्धाद्युत्पत्तेः कार्योत्पत्त्यपेक्षत्वं परेणाप्यवश्यं वाच्यम् । अन्यथा गन्धाद्यन्तरासहकृतस्य गन्धादेर्गन्धाद्यारम्भकत्ववादिमत इव तत्सहकृतस्य गन्धादेस्तदारम्भकत्ववादिमतेऽप्यपेक्षणीयान्तराभावात् परमाणुद्वयगतगन्धादिद्वयस्य गन्धाद्यारम्भकत्वसम्भवेन सन्ततोत्पादप्रसङ्गस्यावर्जनीयत्वादित्याह **अन्यथेति** । तथा च गन्धादिद्वयस्यारम्भकत्ववादिना कार्ये गन्धाद्युत्पत्तेः कार्योत्पत्त्यपेक्षत्वात् तदभावेन न सन्ततोत्पादप्रसङ्ग इत्येव समाधानं वाच्यम् । तच्चैकैकस्यैव गन्धादेरारम्भकत्वपक्षेऽपि तुल्यमेव । इयांस्तु विशेषः । समवायिकारणीभूतद्व्यणुकस्याभावस्तव सजातीयसंयोगाभावप्रयुक्तः, मम तु विजातीयसंयोगाभावप्रयुक्त इतीति द्रष्टव्यम् । कार्ये गन्धाद्युत्पत्तेः कार्योत्पत्त्यपेक्षत्वकल्पनमपि नोन्मूलमित्याह **तदिदमुक्तमिति** । अनेन कार्यगा इत्येतत्कार्योत्पत्त्यपेक्षिण इति व्याख्यातं भवति ।

विट्ठल०— द्वयसंयोगेत्यत्र क्वचित्क्वचिदिति ग्राह्यम् । **गन्धाद्यनुत्पत्तिरिति** । एकस्यानारम्भकत्वादिति भावः । बाधकं शङ्कते **अपेक्षणीयेति** । अपेक्षणीयान्तराभावोऽसिद्ध इत्याह **कार्यद्रव्येति** । कार्यद्रव्योत्पत्तेरपेक्षणीयत्वं कुत इत्यत आह **समवायीति** । **अन्यथेति** । समवायिकारणद्रव्योत्पत्तेरनपेक्षणीयत्वे अनेकगन्धस्यारम्भकत्वेऽपि सत्तोत्पत्तिप्रसङ्गः समानः । परमाणुद्वयगन्धस्य विशकलिततया सर्वदा सद्भावादिति भावः ।

९१ सु०— एतच्च परमतरीत्योक्तम् । वस्तुतस्तु यतः कारणान्येव कार्याकारेणोत्पद्यन्ते तेन कारणगुणा एव कार्यगा भवेयुः, ततश्च विजातीयारम्भकत्वे को दोषः ।

एवं तर्हि पृथिवीत्वादिजातिसङ्करः स्यादिति चेत् । ततः किम् । व्यवहारविलोपः स्यादिति चेन्न, 'वैशेष्यात्तु तद्वाद' इति परिहरिष्यमाणत्वात् ।

तथाऽपि सम्प्रतिपन्नसजातीयारब्ध(कार्य)दृष्टान्तेन विप्रतिपन्नानामपि सजातीयारब्धत्वमनुमास्यत इति चेन्न, विजातीयारम्भकत्वस्य साक्ष्यादिप्रमाणसिद्धत्वेन बाधात् ।

परि०— मूलं सिद्धान्तदिशा योजयितुं तेनेति परामर्शविषयमध्याहृत्य विशदयति **यतः कारणान्येव कार्याकारेणोत्पद्यन्त इति** । **तेनेति** । कारणानामेव कार्याकारेणोत्पद्यमानत्वेन हेतुनेत्यर्थः । **व्यवहारेति** । इयं पृथिवी इमा आप इत्यादिव्यवहार इत्यर्थः । **वैशेष्यादिति** । 'मांसादिभौमं यथाशब्दमितरयोश्चे'ति द्वितीयाध्यायान्तिमाधिकरणे 'वैशेष्यात्तु तद्वादस्तद्वाद' इति गुणसूत्रम् । पार्थिवादिशरीराणां पाञ्चभौतिकत्वेऽपि पार्थिवशरीरमिदमाप्यमिदं तैजसमिदमित्येवं विशिष्य व्यवहारो वैशेष्यादाधिक्यात् । यस्मिन्देहे यस्य भूतस्याधिक्यं तद्व्यवहार इति तदर्थः । तथा च तेन न्यायेन परिहरिष्यमाणत्वादित्यर्थः । **प्रतिपन्नसजातीयारब्धकार्येति** । अनियमवादिना कदाचित्सजातीयैरप्यणुभिः कार्योदयस्वीकारादिति भावः । **साक्ष्यादीति** । आदिपदेन विजातीयकारणारब्धलोष्टादिदृष्टान्तेन विजातीयारब्धत्वानुमानस्य 'तासां त्रिवृतं त्रिवृतमेकैकामकरोदि'त्याद्यागमस्य च ग्रहः ।

गु०दी०— **विजातीयारम्भकत्वस्य साक्ष्यादिप्रमाणसिद्धत्वात्** इत्यत्र मृण्मयस्यापि घटस्याप्यसहकारे सत्येव जननदर्शनादिति भावः ।

यादु०— **साक्ष्यादिप्रमाणेति** । परमाणूनां वक्ष्यमाणरीत्या साक्षिसिद्धत्वे तत्सम्बन्धिनां विजातीयारम्भकत्वस्यापि तत्सिद्धत्वमित्याशयः । आदिपदेन त्रिवृत्करणादिप्रतिपादकागमग्रहणम् ।

वं०प०— **ततश्चेति** । एकस्मिन्नपि परमाणौ विद्यमानो य एको गन्धः स एव कार्ये भवतीत्यङ्गीकारादिति भावः । **एवं तर्हीति** । यदि पार्थिवाप्यपरमाणवो विजातीया मिलित्वा एककार्यारम्भका इत्यर्थः । **व्यवहारः** इदं पार्थिवमिदमाप्यमित्यादिरूपः । **वैशेष्यादिति** । तत्तद्भागबाहुल्यापेक्षयेत्यर्थः । सम्प्रतिपन्नं यत्सजातीयतन्त्वारब्धं पटादिकार्यं तद्दृष्टान्तेन कार्यत्वादिति हेतुनेति शेषः । **विप्रतिपन्नानां** द्व्यणुकादीनाम् ।

कं०रा०— एवं तर्हीति । विजातीययोः पार्थिवाप्ययोरारम्भकत्वे तदारब्धकार्ये पृथिवीत्वादि-जातिसंस्कारः स्यादित्यर्थः । **ततः किमिति** । पृथिवीत्वादिजातिसङ्करश्चेत् किं दूषणं न किञ्चिदित्यर्थः । पृथिवीत्वादिजातिसङ्करे इदं पार्थिवमित्याद्यसाधारणव्यवहारस्य विपरिलोपः स्यादिति दूषणं शङ्कते **व्यवहारेति** । वैशेष्यात्तु तद्वाद इत्यत्र पार्थिवाद्यंशानां विशेषसंयोगाद्विशेषव्यवहार इत्यसाधारणव्यवहारस्योपपादयिष्यमाण-त्वान्न तल्लोपप्रसङ्ग इति समाधत्ते **नेति** ।

शे०वा०— कारणगतस्य गन्धादेः कार्यगतगन्धाद्यारम्भकत्ववर्णनस्य सिद्धान्तविरोधमाशङ्क्य परिहरति **एतच्चेति** । ततश्च कारणगतगन्धादेः कार्यगतगन्धाद्यारम्भकत्वाभावादेव न सन्ततकार्योत्पत्तिप्रसङ्ग इति भावः । **एवं तर्हीति** । विजातीयानामप्येककार्यारम्भकत्व इत्यर्थः । द्व्यणुकस्य पार्थिवपरमाण्वारब्धत्वेन गन्धवत्त्वा-द्गन्धवत्त्वस्य च पृथिवीत्वव्यवस्थापकत्वात् द्व्यणुकस्य पृथिवीत्वं वाच्यम् । तथाऽऽप्यपरमाण्वारब्धत्वेन सांसिद्धिकद्रवत्वादिप्रसङ्गात् तस्य च आप्यत्वव्यवस्थापकत्वात् तस्याप्यत्वमपि वाच्यम् । तथा च पृथिवी-त्वादिजातिसङ्करः । पृथिवीत्वजलत्वयोः परस्परात्यन्ताभावसमानाधिकरणयोरेकत्र समावेशादिति भावः । इष्टापत्त्या समाधत्ते **ततः किमिति** । पृथिवीत्वादिजातिसङ्करो न स्वरूपेणानिष्टस्तदुन्नेयदोषाभावान्न तदुन्नायकोऽपीति भावः । स्वरूपेणानिष्टत्वाभावेऽप्यनिष्टान्तरापादकत्वादनिष्टत्वमेवेति नेष्टापत्तिरिति शङ्कते **व्यवहारेति** । पार्थिवं द्व्यणुकमाप्यं द्व्यणुकमित्यादिव्यवहारेत्यर्थः । मिश्रितत्वादिति भावः । किं यत्र द्व्यणुकादिकार्यारम्भक एकः पार्थिवः परमाणुः अपरश्चाप्यः तत्र व्यवहारविलोपप्रसङ्गोऽभिधीयते किंवा यत्रा-रम्भकं पार्थिवं परमाणुद्वयमाप्यश्चैकः तत्र । नाद्यः । तत्रोभयथाव्यवहारस्येष्टत्वेनैकमात्रव्यवहारस्यानभिमततया तद्विलोपस्येष्टत्वादित्याशयेन द्वितीयं पक्षं दूषयति न **वैशेष्यादिति** । **साक्ष्यादिप्रमाणेति** । वक्ष्यमाणरीत्या परमाणूनां साक्षिसिद्धत्वात् तत्सम्बन्धिनो विजातीयारम्भकत्वस्य धर्मिग्राहकसाक्षिसिद्धत्वादिति भावः । आदिपदेन त्रिवृत्करणादिप्रतिपादकागमग्रहः ।

वा०र०— वक्ष्यमाणरीत्येति । 'यदि साक्षिमतं नैतदि'त्येतदनुव्याख्यानविवरणेत्यर्थः ।

स०व्र०— वैशेष्यादिति । न च 'तत्रैकः पार्थिवः परमाणुः अपरश्चाप्यः तदुभयारब्धद्व्यणुके पार्थिवः आप्य इति व्यवहारविलोपः स्यात् तत्र वैशेष्याभावादि'ति वाच्यम् । तत्रोभयात्मकव्यवहारस्यैव सद्भावेनैकैकमात्रविषयव्यवहारस्यैवाभावादिति भावः ।

विठ्ठल०— को दोष इति । कारणगतगुणानां कार्ये सम्भवेन विजातीयारम्भकत्वेऽपि न कार्ये गन्धाद्यनुत्पत्तिदोष इत्यर्थः । **वैशेष्यादिति** । यत्र यद्वैशेष्यं प्राचुर्यं तत्र तद्व्यवहार इति भावः ।

॥ इति अनियमपक्षे बाधकशङ्कानिरासः ॥

* * *

॥ अथ तत्र सर्वेषामपि पदार्थानां तारतम्येन महत्त्वाणुत्वाभ्यां सहितत्वात् द्वयोरेवेति नियमासिद्धिः ॥

९२ **सु०—** "स्यादेतत्, यदि बहूनां परमाणूनां संयोगस्यारम्भकत्वं स्यात् । न चैवम् । 'आरम्भकसङ्ख्यापकर्षतारतम्यं क्वचिद्विश्रान्तम्, तारतम्यत्वात्, परिमाणतारतम्यवदि'त्यनुमानेनारम्भकसङ्ख्यापकर्षस्य क्वचिद्विश्रान्तिसिद्धौ एकस्यारम्भकत्वे सन्ततोत्पत्त्यादिप्रसङ्गात्, त्र्यादिकल्पने गौरवात्, 'द्वयोरेव परमाण्वोः संयोगो द्रव्यारम्भक' इति नियमसिद्धेः" इत्यत आह **तारतम्येनेति** ।

अनु०— तारतम्येन सर्वेऽपि महान्तश्चाणवो यतः ।

यतः कारणात् **तारतम्येन सर्वेऽपि** अर्था **महान्तश्चाणवश्च,** समर्थिताः, ततः परिमाणतारतम्यवदिति दृष्टान्तस्य साध्यविकलत्वात्, " 'द्वयोरेव तु संयोग' इति केनावसीयत" इति सम्बन्धः ।

किञ्च 'अनेनैव न्यायेन द्व्यणुकद्वयसंयोगस्याप्यारम्भकत्वं किं नेष्यते बहुत्वाभावे कार्यमहत्त्वानुपपत्तिप्रसङ्गादि'ति चेन्न; **यतः तारतम्येन सर्वेऽपि महान्तश्चाणवश्च, समर्थिताः,** तेन द्व्यणुकमहत्त्वात् तदुत्पत्त्युपपत्तेः ।

परमाणुद्वयारब्धकार्यदृष्टान्तेन सर्वत्रानुमाने त्वतिप्रसङ्ग इति ।

परि०— परमते द्व्यणुकत्र्यणुकपरिमाणयोः द्वित्वत्रित्वसङ्ख्याजन्यत्वादाह **आरम्भकसङ्ख्येति** । **सन्ततोत्पत्त्यादीति** । आदिपदेनैकस्मादपि तन्त्वादेः पटाद्युत्पत्तिप्रसङ्गः, अनुभवविरोधादिश्च ग्राह्यः । **अनेनैव न्यायेनेति** । एकस्यानारम्भकत्वात् त्रित्वकल्पने गौरवादित्युक्तन्यायेनेत्यर्थः । नन्वनियमवादिनापि कदाचित्परमाणुद्वयारब्धं कार्यमुपेयते । तथा च तद्दृष्टान्तेन विमतं स(र्वं परमाणुकार्यं प)र्वं द्व्यणुकं परमाणुद्वयारब्धं परमाणुकार्यत्वादिति साध्यत इत्यत आह **परमाणुद्वयारब्धेति** । **अतिप्रसङ्ग इति** । तन्तुद्वयारब्धपटदृष्टान्तेन बहुतन्त्वारब्धपटेऽपि तदनुमानप्रसङ्ग इत्यर्थः । **द्व्यणुकादिद्रव्यासमवायिकारणनिरासः ॥**

गु०दी०— द्व्यणुकमहत्त्वात्तदुत्पत्त्युपपत्तेः इत्यत्र कपालद्वयमहत्त्वाभ्यां घटे महत्त्वोत्पत्तिवत् द्व्यणुकद्वयमहत्त्वाभ्यां त्र्यणुकेऽपि महत्त्वोत्पत्तिसम्भवादित्यर्थः ।

यादु०— ननु द्व्यणुकं परमाणुद्वयेनैवारब्धं परमाणुकार्यत्वात् परमाणुद्वयारब्धसंयोगादिवदित्यनुमानेनैव द्वयोरेवेति नियमसिद्धिरित्यत आह **परमाणुद्वयारब्धेति** । **सर्वत्र** द्व्यणुकादिपरमाणुकार्येषु । **अतिप्रसङ्ग इति** । तन्तुद्वयारब्धपटदृष्टान्तेन सर्वत्रापि पटे तन्तुद्वयारब्धत्वानुमानप्रसङ्ग इत्यादिरूप इत्यर्थः ।

वं०प०— आरम्भकेति । तथा च घटादिदशसङ्ख्याकावयवजन्यं तथा चतुरणुकत्र्यणुकं चतुष्टयजन्यं त्र्यणुकं द्व्यणुकत्रयजन्यं द्व्यणुकं परमाणुद्वयजन्यमित्यारम्भकसङ्ख्यापकर्षस्य तारतम्यमित्यर्थः । **आरम्भकत्वं** त्र्यणुकारम्भकत्वम् । तथा च न द्व्यणुकत्रयसंयोगजन्यत्वमिति भावः । **बहुत्वाभावे** द्व्यणुक इति शेषः । **कार्ये** त्र्यणुके ।

कं०रा०— नन्वनियमवादिनस्तवापि मते परमाणुद्वयारब्धमपि किञ्चित्कार्यमस्त्येव । तथा च तद्दृष्टान्तावष्टम्भेन सर्वत्रापि परमाणुकार्ये द्वाभ्यामेव परमाणुभ्यामारब्धत्वसाधने द्वयोरेव परमाण्वोः संयोगः कारणमिति नियमः सेत्स्यतीत्यत आह **परमाणुद्वयारब्धेति** । **अतिप्रसङ्ग इति** । तन्तुद्वयारब्धकार्यदृष्टान्तेन सर्वत्रापि तन्तुकार्ये तन्तुद्वयमात्रारब्धत्वसाधनप्रसङ्ग इत्यर्थः ।

श्रीनिधि०— सन्ततोत्पत्त्यादीति । आदिपदेन सर्वकार्याणां परमाणुत्वापत्तिः । **महान्तश्चाणवश्च समर्थिता इति** । ततः परिमाणतारतम्यस्य विश्रान्तिरसिद्धेत्यर्थः । आभाससमानयोगक्षेमं चानुमानमित्याह **परमाणुद्वयारब्धकार्यदृष्टान्तेनेति** । त्र्यणुकमारम्भकद्वयजन्यं कार्यत्वात् द्व्यणुकवदित्यादिक्रमेण सर्वकार्येष्वप्यनुमान इत्यर्थः । तथा च द्व्यणुकत्रयेणेत्यादि प्रक्रिया बाधिता स्यादिति भावः ।

शे०वा०— 'ननु तारम्येने'त्याद्युत्तरभाष्यमनर्थकम् । न च सर्वेषां पदार्थानां महत्त्वाणुत्वसद्भावप्रतिपादनार्थं तदिति वाच्यम् । तत्प्रतिपादनस्याप्यनर्थकत्वात् । न च परिमाणतारतम्यस्य अविश्रान्तिप्रतिपादनार्थत्वान्न तदिति वाच्यम् । तस्याप्युपयोगादर्शनादित्यत आरम्भकसङ्ख्यापकर्षतारतम्यस्य परिमाणतारतम्यदृष्टान्तेन विश्रान्तिसाधकानुमाने दृष्टान्तस्य साध्यवैकल्योपदर्शनार्थत्वान्न परिमाणतारतम्यस्याविश्रान्तिप्रतिपादनवैयर्थ्यमित्यभिप्रेत्य तर्हि तत्प्रतिपादनस्य न पूर्वेण सङ्गतिरित्यतोऽव्यवहितपूर्ववाक्येन तदभावेऽपि 'द्वयोरेव तु संयोग' इत्युक्तानियमास्यार्थत उपपादकतया तत्सङ्गतत्वान्नासङ्गतिरिति भावेन तत्सङ्गततयोत्तरभाष्यं योजयितुं तद्वाक्योक्तानियमपक्षानुपपत्तिशङ्कामुपपादयति **स्यादेतदिति** । **सन्ततोत्पत्त्यादिप्रसङ्ग इति** । एकस्य गन्धादेरारम्भकत्वे सन्ततोत्पादप्रसङ्गस्य कार्योत्पत्त्यपेक्षतया परिहर्तुं शक्यत्वेऽप्येकैकस्यापि परमाणोर्द्व्यणुकारम्भकत्वेऽपेक्षणीयान्तराभावान्न सन्ततोत्पादप्रसङ्गः परिहर्तुं शक्य इति भावः । परिमाणापकर्ष-

तारतम्यस्य क्वचिद्विश्रान्तिसिद्धौ किञ्चित्सर्वतोऽपकृष्टमेव न ततोऽन्यदपकृष्टमित्यर्थसिद्ध्या सर्वतोऽप्यपकृष्ट-परिमाणाश्रयतया परमाणुसिद्धिवदारम्भकसङ्ख्यापकर्षतारतम्यस्यापि क्वचिद्विश्रान्तं किञ्चिदपकृष्टसङ्ख्यावच्छिन्न-मेवारम्भकम् । न त्वनवधिकसङ्ख्यावच्छिन्नमपीत्यर्थसिद्ध्या द्वित्वावच्छिन्नस्य आरम्भकत्वसिद्धौ तन्त्वादे-स्तद्रूपतया बाधितत्वात् परिशेषेण तथाविधं कारणं परमाणुलक्षणमेव सिद्ध्यतीति भावः । साकाङ्क्षत्व-प्रयुक्तवाक्याभासतापरिहारायापेक्षितं पूरयन् वाक्यं योजयति **यत इत्यादिना** । तारतम्येनेत्यादिमूलं प्रकारा-न्तरेणापि योजयितुं तदुपयुक्तमर्थमतिप्रसङ्गमुखेन तावदाह **किञ्चेति** । **अनेनैवेति** । आरम्भकसङ्ख्यापकर्षस्य उक्तानुमानेन क्वचिद्विश्रान्तिसिद्धौ एकस्यारम्भकत्वे सन्ततोत्पादप्रसङ्गात् त्र्यादिकल्पने गौरवाद् द्वयोरेव द्व्यणुकयोः संयोगस्त्र्यणुकहेतुरिति नियमस्य सिद्धिरित्युक्तन्यायेनेत्यर्थः । एवमुपयुक्तमभिधाय तत्रार्थे प्रसक्ता-नुपपत्तिपरिहारकतया भाष्यं योजयितुं तन्निवार्यशङ्कामुत्थापयति **बहुत्वेति** । कारणबहुत्वतन्महत्त्वातिरेकेण कार्यमहत्त्वे प्रयोजकान्तराभावात् द्वयोरेव द्व्यणुकयोः हेतुत्वे च कारणबहुत्वस्य चाभावान्न त्र्यणुके महत्त्वोत्पत्तिर्युज्यत इत्यर्थः । कारणबहुत्वाभावेऽपि तन्महत्त्वादेव कार्ये महत्त्वोत्पत्त्युपपत्तेर्नानुपपत्तिरित्या-शयेनोक्तार्थसमर्पकतया मूलं योजयति **न यत इत्यादिना** । नन्वनियमवादिना द्वयोरपि कारणत्वं क्वचिदवश्यमङ्गीकर्तव्यमेव । तथा च सम्प्रतिपन्नपरमाणुद्वयारब्धकार्यदृष्टान्तेन विप्रतिपन्नानामपि तत्कार्याणां परमाणुद्वयारब्धत्वानुमानसम्भवाद् द्वयोरेव कारणत्वमिति नियमसिद्धिः स्यादित्यतः त्र्याद्यारब्धत्वस्य साक्ष्यादिप्रमाणसिद्धत्वेन बाधरूपातिप्रसङ्गान्नैवमनुमातुं शक्यमित्याह **परमाण्विति** । यद्वा परमाणुद्वया-रब्धकार्यदृष्टान्तेन सर्वत्र विप्रतिपन्नतत्कार्येष्वपि परमाणुद्वयारब्धत्वानुमाने तन्तुद्वयारब्धपटदृष्टान्तेन बहुतन्त्वा-रब्धे पटे तन्तुद्वयारब्धत्वानुमानप्रसङ्ग इत्यतिप्रसङ्ग इत्यर्थः । बाधितत्वान्न तत्प्रसङ्ग इति तु प्रकृतेऽपि तुल्यमित्यर्थः ।

वा०र०— एवं सततोत्पत्त्यादीति वाक्यभावमभिधाय स्यादेतदित्यादि सम्पूर्णशङ्काभावमप्याह **परिमाणापकर्षस्येत्यादिना** । एतेन एके प्रतीकोपादानानन्तरं भावद्वयोक्तिः कथमिति शङ्का निरस्ता । अनेनैव न्यायेनेत्यत्र परमाणुपदघटितप्रागुक्तन्याय एव द्व्यणुकस्थलेऽपि प्रवर्तत इति नाभिप्रेतम् । अपि तु द्व्यणुक-त्र्यणुकपदघटित उक्तन्याय समानन्याय इत्यभिप्रेतमित्याशयेन न्यायसञ्चारप्रकारद्वय इति । **आरम्भक-सङ्ख्येत्यादिना** । अत एवोक्तन्यायेनेत्यर्थ इत्यत्रोक्तसदृशन्यायेनेत्यर्थान्न क्षुद्रोपद्रवः । अतिप्रसङ्गपदस्वारस्या-नुज्ञानिपक्षान्तरमाह **यद्वेति** । मूले विजातीयैरित्युक्त्या पार्थिवपरमाण्वोरेवेति नियमकारणलाभाय विसदृशै-रित्युक्तम् ।

स०व्र०— **अतिप्रसङ्ग इति** । तन्तुद्वयारब्धपटदृष्टान्तेन सर्वत्रापि द्वयारब्धत्वसाधनापातादिति भावः ।

विठ्ठल०— साक्ष्यादिप्रमाणसिद्धत्वेनेति यदि साक्षिमितं नैतदिति परमाणूनां तदीयारम्भप्रकारस्य च साक्षिसिद्धत्वं वक्ष्यति आदिपदेन तासां त्रिवृतं त्रिवृतमेकैकामकरोदित्यादित्रिवृत्करणप्रतिपादकागमस्य लोष्टादिकार्याणामिति वक्ष्यमाणानुमानस्य च ग्रहणं बहूनां परमाणूनामारम्भकत्वे तत्र विजातीयप्रवेशेन विजातीयारब्धत्वं स्यात् तदेवायुक्तमिति शङ्कते **स्यादेतदिति** । द्व्यणुकत्र्यणुकपरिमाणयोः परेण सङ्ख्या-जन्यत्वाङ्गीकारात् तदनुसारेणोक्तं **आरम्भकसङ्ख्येति** । सततोत्पत्त्यादीत्यादिपदेनानुभवं विरोधादिसङ्ग्रहः **साध्याविकलत्वादिति** । तथा चानुमानस्याभासत्वेन द्वयोरेव परमाणोः संयोगो द्रव्यारम्भक इत्यस्या-साधकत्वात् द्वयोरेव तु संयोग इति केनावसीयत इत्येतद्युज्यत इति भावः । ननु विप्रतिपन्नद्व्यणुकं परमाणुद्वयेनैवारब्धं परमाणुद्वयारब्धं संयोगवत् । तथा चानेन द्वयोरेव तु संयोग इति नियमसिद्धिरित्यत आह **परमाणुद्वयारब्धेति** । सर्वत्र परमाणुद्वयकार्येषु सर्वत्र अतिप्रसङ्ग इति । द्व्यचित्तं तु द्वयारब्धपटस्यापि भावात् तद्दृष्टान्तेन पटमात्रेऽपि तन्तुद्वयारब्धत्वानुमानप्रसङ्ग इति भावः ।

॥ इति सर्वेषामपि पदार्थानां तारतम्येन महत्त्वाणुत्वाभ्यां सहितत्वात् द्वयोरेवेति नियमासिद्धिः ।

* * *

॥ अथ तत्र अनियमसृष्टौ प्रत्यक्षादिप्रमाणसत्त्वम् ॥

९३ सु०— अस्त्वेवमुक्तनियमेषु प्रमाणाभावस्तथाऽप्यनियमसृष्टौ किं मानमिति चेत्; साक्षी तावत्, लोष्टादिकार्याणामनियतसङ्ख्यैर्विजातीयैर्विसदृशैश्चारम्भदर्शनेनानुमानं च, आगमाश्चात्र बहुलं भवन्ति ।

परि०— अनुमानं चेति । द्व्यणुकादिकार्यं द्वाभ्यामेवेत्यादिनियमशून्यकारणजन्यं कार्य-द्वयत्वाल्लोष्टादिवदित्यनुमानमित्यर्थः । तत्र विजातीयं जलं तेजश्च विसदृशं सिकतादि ध्येयम् । **आगमाश्चेति** । 'तासां त्रिवृतं त्रिवृतमि'त्याद्या इत्यर्थः । सत्त्वादिगुणत्रयमेलनेन सृष्टिबोधक-पुराणाद्यागमाश्चेत्यर्थः । तथा 'नित्यान्येतानि सौक्ष्म्येण हीन्द्रियाणि तु सर्वशः । तेषां भूतैरुपचयः सृष्टिकाले विधीयत' इत्याद्युपचयबोधकागमाश्च तथा 'प्राणा वा इदमग्र आसुः । तेभ्यो भूतानि जज्ञिर' इत्याद्याश्चेत्यर्थः ।

वं०प०— अनियतसङ्ख्यैः सजातीयैः । **विजातीयैर्विसदृशैश्चेति** । न च विजातीयत्वं विसदृशत्वं चैकमेवेति वाच्यम् । विजातीययोरपि ब्राह्मणक्षत्रिययोर्मुखादिसादृश्यदर्शनात् । सजातीययोरपि ब्राह्मणयोर्मुखादौ वैसादृश्यस्यानुभवसिद्धत्वाद्विजातीयत्वं विसदृशत्वं च भिन्नमेवेति ज्ञातव्यम् । एवमेव सजातीयत्वं सदृशत्वं च

भिन्नमेवेति च ज्ञातव्यम् । अत एव 'सदृशं च सजातीयं नास्मत्पक्षे किमेव ही'ति वक्ष्यति । **अनुमानं चेति** । द्व्यणुकादिकार्यमनियतसङ्ख्याकसजातीयविजातीयविसदृशकारणजन्यं कार्यत्वाल्लोष्टादिकार्यवदित्यनुमानमित्यर्थः । **आगमेति** । विजातीयैर्विसदृशश्च तत्त्वैर्ब्रह्माण्डोत्पत्तेरागमसिद्धत्वादिति भावः । **अत्र** विजातीयादिजन्यत्वे ।

कं०रा०— उक्तनियमेऽष्विति । द्वयोरेव संयोगस्य कारणत्वं सजातीययोरेव संयोगस्य कारणत्वं परमाण्वोरेव संयोगस्य कारणत्वमिति नियमेष्वित्यर्थः ।

श्रीनिधि०— आगमश्चात्रेति । तासां त्रिवृतं त्रिवृतमेकैकामकरोत् इत्यादिका इत्यर्थः ।

शे०वा०— ननु 'न च तत्प्रोक्तसृष्टावि'त्याद्युत्तरभाष्यमनर्थकम् । न च परोक्तनियमसृष्टौ प्रमाणाभावोपदर्शनार्थं तदिति वाच्यम् । उक्तनियमे प्रमाणाभावस्य 'द्वयोरेव तु संयोग इति केनावसीयते' इत्यनेनैव सिद्धत्वात् । न चानियमसाधकप्रमाणानां नियमसाधकप्रमाणेनाबाधोपपादनार्थं तदिति वाच्यम् । तथा सत्यनियमपक्षे प्रमाणानामादावुपन्यसनीयत्वापत्त्या तान्यनुपन्यस्य तेषां नियमग्राहकप्रमाणाबाधं वर्णयतो भाष्यकारस्याकुशलत्वप्रसङ्गादित्याशङ्क्य स्पष्टत्वात् तत्प्रमाणानां शिष्यैरेवोहितुं शक्यत्वेन तान्यनुपन्यस्यैव तेषां प्रमाणानां भाष्यकारीयं अबाधितत्ववर्णनं नानुपपन्नमित्यभिप्रेत्य अनियमपक्षसाधकप्रमाणानां अबाधितत्ववर्णनपरतयोत्तरभाष्यं सङ्गमयितुं कानि तानि प्रमाणानीत्यतः तानि वक्तुमनियमपक्षसाधकप्रमाणाकाङ्क्षामुत्थापयति **अस्त्वेवमित्यादिना** । साक्षिणा विप्रतिपन्नं प्रत्यनुमानमप्याह **लोष्टादीति** । उपाधिप्रतिपक्षग्रस्तत्वशङ्क्या शङ्कितप्रामाण्यमनुमानं न तन्निर्णयाय प्रभवतीत्यतोऽनुमानानुग्राहकागमानप्याह **आगमाश्चात्रेति** ।

वा०र०— अत्र च द्व्यणुकादिकार्याय नियतसङ्ख्यैः विजातीयैकविसदृशैरेवारभ्य कार्यत्वात् लोष्टादिवत् इति प्रयोगो ध्येयः । **आगमाश्चेति** । मूलोक्ता आगमास्तु 'तासां त्रिवृतं त्रिवृतमि'त्याद्या इत्यर्थः । तथा 'नित्यान्येतानि सौक्ष्म्येण हीन्द्रियाणि तु सर्वशः । तेषां भूतैरुपचयः सृष्टिकाले विधीयते' इत्याद्युपचयबोधकागमाश्चेत्यर्थः ।

विट्ठल०— उक्तनियमेष्विति । सजातीयाभ्यामेव द्व्यणुकं द्व्यणुकत्रयेणैव त्र्यणुकम् । त्र्यणुकैश्चतुर्भिः एव चतुरणुकमित्युक्तनियमेष्वित्यर्थः । **अनुमानं चेति** । द्व्यणुकादिकमनियतकारणं जन्यं कार्यकार्यत्वात् । चतुःपञ्चेत्याद्यनियतसङ्ख्यैः शिलाद्यसकलवालुकावादिविजातीयैः परिमाणादिभिर्विसदृशैरारब्धलोष्टादिवदित्यनुमानमित्यर्थः ।

* * *

॥ अथ तत्राप्यादौ अनियमसृष्टिविषयकप्रमाणानां भ्रान्तित्वनिरासः ॥

॥ अथ च तत्रापि चादौ तन्नियमग्राहकप्रमाणाभावात्तत्प्रमाणविरोधाभावः ॥

॥ अथ च तत्रान्ते वैशेषिकादीनां केवलकल्पनया च विरोधाभावः ॥

९४ **सु०—** तद्दर्शनं भ्रान्तिरिति चेत् । किं नियमग्राहकप्रमाणविरोधादेवमुच्यते, उत केवलया वैशेषिकादिकल्पनया विरोधात् ।

आद्यं दूषयति **न चेति** ।

अनु०— न च तत्प्रोक्तसृष्टौ तु मानं

सजातीयाभ्यामेव द्वाभ्यामेव परमाणुभ्यामेवेत्यादिनियमवत्यां तत्प्रोक्तसृष्टौ तु मानं नास्ति, यत् साक्ष्यादिसिद्धस्यास्मदभिमतसृष्टिप्रकारस्य बाधकं स्यात् । तथा चोक्तम् (प्राक्) ।

द्वितीयं दूषयति **केवलेति** ।

अनु०— केवलकल्पना ।
कथं साक्षिमितस्यास्य शक्नुयाद्धारणे क्वचित् ॥

निर्मूलेत्यर्थः । साक्षी इत्युपलक्षणम् । **अस्य** अनियमारम्भस्य । **कल्पनामात्रस्य** प्रामाणिकनिवारकत्वेऽतिप्रस(ङ्ग इति)ङ्गादिति भावः ।

परि०— तद्दर्शनमिति । लोष्टादिकार्येषूक्तप्रकारदर्शनं साक्षिदर्शनं तादृशागमदर्शनं चेत्यर्थः । **तथा चोक्तमिति** । नियमग्राहकतया पराभिमतं यदनुमानरूपं प्रमाणं तत्सर्वं 'द्वयोरेव तु संयोग इति केनावसीयते' इत्यादिसार्धश्लोकव्याख्यावसर एवाशङ्क्य निरासाद्यथास्माकं न बाधकं तथोक्तमेवेत्यर्थः । **उपलक्षणमिति** । प्रागुक्तानुमानागममित्यस्येत्यपि ज्ञेयमिति भावः । 'अस्य' इत्यनुवादः । 'अनियमारम्भस्य' इति व्याख्या । **अतिप्रसङ्ग इति** । बौद्धसाङ्ख्यादिकल्पनयापीश्वरादिप्रामाणिकार्थनिवारणप्रसङ्ग इत्यर्थः ।

वं०प०— भ्रान्तिरिति । उक्तानुमानागमजन्यं ज्ञानमित्यर्थः । **उक्तमिति** । 'द्वयोरेव तु संयोग इति केनावसीयत' इत्युक्तमित्यर्थः ।

कं०रा०— तथा चोक्तमिति । वैशेषिकादि प्रोक्तसृष्टौ यथा मानाभावः तथोपपादितमित्यर्थः । **साक्षीतीति** । कथं साक्षिमितस्यास्येत्यत्र साक्षीत्येतदनुमानागमयोरुपलक्षकमित्यर्थः ।

श्रीनिधि०— तद्दर्शनमिति । आगमजन्यं ज्ञानमित्यर्थः । **नियमग्राहकप्रमाणविरोधादिति** । द्वयोरेवेत्याद्युक्तनियमग्राहकप्रमाणविरोधादित्यर्थः । **तथा चोक्तमिति** । यथा चैतत्तथा द्वयोरेव तु संयोग इति केन प्रमाणेन अवसीयते । न केनापि इत्यनेनेति भावः । **साक्षीत्युपलक्षणमिति** । लोष्टादिकार्याणामनियतावयवैः इत्यादिनोक्तानुमानस्येत्यर्थः । अन्यदपि तत्कल्पितमप्रामाणिकमिति सूचितमिति । अन्यथा नियमसृष्टेरेव प्रकृतत्वात् तत्र प्रमाणं नैवेति विशिष्य वदेदिति भावः ।

शे०वा०— भ्रमत्वस्य बाधकैकसमधिगम्यत्वात् प्रकृते च बाधकाभावान्न भ्रान्तित्वमित्याशयेन सम्भावितबाधकविकल्पप्रदर्शनपूर्वकं तन्निरासकतया भाष्यं योजयति **किमित्यादिना** । साक्ष्यादीत्यादिपदेनानुमानागमपरिग्रहः । कथमुक्तनियमवत्यां तत्प्रोक्तसृष्टौ मानाभाव इत्यत आह **तथा चोक्तमिति** । द्वाभ्यामेव परमाणुभ्यामेव सजातीयाभ्यामेवेत्यादिनियमवत्यां तत्प्रोक्तसृष्टौ यथा प्रमाणाभावः तथा द्वयोरेव तु संयोग इत्यादिना पूर्वमेवोक्तमित्यर्थः । भाष्ये केवलपदानर्थक्यमाशङ्क्याबाधकत्वोपपादकनिर्मूलत्वोपदर्शनार्थत्वान्न तदिति भावेन तदर्थमाह **निर्मूलेत्यर्थ इति** । अनुमानादेरप्यनियमसाधकत्वेनोक्तत्वात् मूले साक्षिमात्रग्रहणमनुपपन्नमित्यतः तस्य प्रमाणान्तरोपलक्षणार्थत्वान्नानुपपत्तिरिति भावेनोपलक्षणतया तद्व्याचष्टे **साक्षीत्युपलक्षणमिति** ।

वा०र०— यथा प्रमाणेति । अनेन यथा चैतत् तथेति योजना सूचितेति ज्ञेयम् । तस्य क्षणत्वादिति पाठः । अर्थपदं लेखकागतम् । उपलक्षणयेत्युत्तरानुसारात् । तस्येत्यस्य साक्षिग्रहणस्येत्यर्थः ।

स०व्र०— तथा चोक्तमिति । सजातीयाभ्यामेव द्वाभ्यामेव परमाणुभ्यामेवेत्यादिनियमवत्यां तत्प्रोक्तसृष्टौ यथा प्रमाणं नास्ति तथा पूर्वमेवोक्तमित्यर्थः । लोष्टादिकार्याणामनियतसङ्ख्यैरित्यादिना अनुमानादेरप्युक्तत्वादाह **साक्षीत्युपलक्षणमिति** ।

विष्टल०— तद्दर्शनमिति । साक्षादिज्ञानमित्यर्थः । **तथा चोक्तमिति** । द्वयोरेव तु संयोग इत्येतद्व्याख्यानावसरे यथैतत्सिद्ध्यति तत्तथोक्तमित्यर्थः । **उपलक्षणमिति** । प्रागुक्तानुमानागममितस्येत्यपि ग्राह्यमिति शेषः । अन्योन्यानपेक्षत्वमिह विवक्षितं ततश्चाधारत्वादिनान्योन्यापेक्षाङ्गीकारविरोध इत्यपास्तम् ।

॥ इति वैशेषिकादीनां केवलकल्पनया च विरोधाभावः ॥

॥ इति तन्नियमग्राहकप्रमाणाभावात्तत्प्रमाणविरोधाभावः ॥
॥ इति अनियमसृष्टिविषयकप्रमाणानां भ्रान्तित्वनिरासः ॥
॥ इति अनियमसृष्टौ प्रत्यक्षादिप्रमाणसत्त्वम् ॥

* * *

॥ अथ तत्र तैः कल्पितानां सृष्टीतरविषयाणामप्यप्रामाणिकत्वम् ॥
॥ अथ तत्र विषयत्रयस्य अप्रामाणिकत्वम् ॥

९५ **सु०—** अत्र 'तत्प्रोक्तसृष्टावि'ति सामान्यतो वदताऽन्यदपि तत्कल्पितमप्रामाणिकमिति सूचितम् । तथा हि ।

'प्रकृतेर्महान्महतोऽहङ्कारः अहङ्कारात्क्रमेणाकाशादीनि महाभूतानी'त्येतां श्रुत्यादिप्रसिद्धां प्रक्रियामपहाय वाय्वादीनां चतुर्णामन्योन्यानपेक्षैव सृष्टिर्व्युत्क्रमेण चाभिहिता ।

विनैव बाधकेन 'आकाशाद्वायुर्वायोरग्निरि'त्यादिपञ्चमी भाक्ती स्वीकृता ।

अत्यन्तासत एव च जनिरङ्गीकृता ।

परि०— श्रुत्यादीति । आदिपदेन तृतीयस्कन्धगतसप्तदशाध्यायादिसिद्धामिति गृह्यते । **अन्योन्यानपेक्षैवेति** । तत्तत्परमाण्वादिभिरेव सजातीयैर्विजातीयामिश्रैर्वाय्वादिजन्माङ्गीकारादिति भावः । **व्युत्क्रमेण चेति** । अनादिनित्ये गगने प्रथनं वायुसृष्टिः । पश्चात्तदाधारतया जलस्य । पश्चात्पृथिव्याः । पश्चात्तेजस इत्यभिहितेत्यर्थः । **भाक्तीति** । आधारार्थकत्वेनामुख्या स्वीकृतेत्यर्थः ।

यादु०— अन्योन्यानपेक्षैवेति । अन्योन्यानुपादानकैवेत्यर्थः । तेनाधारतया वाय्वादीनामबादिसृष्टावपेक्षितत्वात् कथमिदमिति शङ्काऽनवकाश इति ध्येयम् । **व्युत्क्रमेण चेति** । आदावाकाशे वायोरुत्पत्तिः ततस्तदाश्रिततयाऽनलस्य ततस्तदाश्रिततया पृथिव्याः ततस्तदाश्रिततया तेजस इति व्युत्क्रमेणेत्यर्थः । इदं च प्रशस्तपादभाष्यादौ स्पष्टम् । **पञ्चमी भाक्तीति** । अमुख्येत्यर्थः । पूर्वपूर्वस्योत्तरोत्ताराधारत्वमेव नोपादानत्वमतः पञ्चम्या आधारत्वमेवार्थ इति स्वीकारादिति भावः । **अत्यन्तासत एवेति** । न तु सदसत इत्येवार्थः ।

वं०प०— व्युत्क्रमेण पृथिव्यादिक्रमेण ।

कं०रा०— क्रमेणेति । प्रथममाकाशस्योत्पत्तिस्तदनन्तरं वायोस्तदनन्तरं तेजस्तदनन्तरमपां तदनन्तरं च पृथिव्या इत्येवं क्रमेणेत्यर्थः । **भाक्तीति** । औपचारिकीत्यर्थः ।

श्रीनिधि०— भाक्ती अमुख्या । **अत्यन्तासत एवेति** । प्रागत्यन्तासत एव कार्यस्येत्यर्थः । समवायिकारणप्रत्यासन्नतया सामर्थ्यावधारणमभिमतम् ।

शे०वा०— भाष्ये सामान्योक्तेर्वैयर्थ्यमाशङ्क्य परकल्पितप्रमेयान्तरस्याप्रामाणिकत्वसूचकत्वान्न तदिति भावेन तत्प्रयोजनमाह **अत्रेति** । किं तत्प्रमेयं कथं च तदप्रामाणिकमित्यतस्तदुभयं दर्शयति **तथा हि इत्यादिना** । श्रुत्यादीत्यादिपदेन पुराणपरिग्रहः । **अन्योन्यानपेक्षैवेति** । यद्यपि वाय्वादीनामबादिसृष्टौ आधारत्वेनापेक्षा परमतेऽप्यस्त्येव तथाऽप्युपादानतया तदनपेक्षत्वाभिप्रायकोऽयं ग्रन्थ इत्यवधेयम् । **व्युत्क्रमेण चेति** । आकाशाश्रिततया वायोरादावुत्पत्तिः ततस्तदाश्रिततया जलस्य, ततस्तदाश्रिततया पृथिव्यास्तत-स्तदाश्रिततया तेजस इति व्युत्क्रमेणेत्यर्थः । स्पष्टं चैतत्प्रशस्तपादभाष्यादौ सृष्टिसंहारविधिप्रसङ्गे व्युत्क्रमेण चेति चशब्दस्त्वन्योन्यानपेक्षत्वसमुच्चयार्थः । **भाक्तीति** । अमुख्येत्यर्थः । पूर्वपूर्वस्योत्तरोत्तराधारताया एव पञ्चम्यर्थत्वाभ्युपगमात् तस्या भाक्तत्वमिति भावः । **अत्यन्तासत एवेति** । न तु सदसत इत्येवार्थः ।

वा०र०— सामान्योक्तेरिति । सृष्टिविशेषमनुपादाय सृष्टाविति सामान्योक्तेरित्यर्थः । **सूचकत्वा-दिति** । सूचनार्थत्वादित्यर्थः । **अस्त्येवेति** । तत्र तथा प्रतिपादनादिति भावः । **स्पष्टं चेति** । भाष्ये 'ततः पुनः प्राणिनां भोगभूतयः' इत्यादिना महातेजोराशी देदीप्यमानस्तिष्ठतीत्यन्तेन तथैव प्रतिपादितत्वात् इति भावः । **भाक्तेति** प्रतीकोपादानम् ।

स०व्र०— वाय्वादीनां चतुर्णामिति । वायूत्पत्त्यनन्तरं जलोत्पत्तिः ततः पृथिव्याः, ततस्तेजस इति क्रमेण व्युत्क्रमेण चेत्यर्थः । **पञ्चमी भाक्तीति** । पूर्वपूर्वस्योत्तरोत्तराधारत्वमात्राङ्गीकारेण एतत्कारणत्वानङ्गीकारात् तद्वाचिपञ्चम्यर्थपरतया व्याख्यानं गौणमित्यर्थः ।

विट्ठल०— व्युत्क्रमेण चेति । अनदिनित्याकाशे वायूत्पत्तिरादितः तदाश्रिततया जलस्य तदा-श्रिततया पृथिव्यांस्तदाश्रिततया तेजस इति तदीयग्रन्थोक्तरीत्या व्युत्क्रमेणेत्यर्थः । **भाक्तीति** । आधारार्थतया अमुख्येत्यर्थः । **अत्यन्तासत इति** । न तु सदसत इत्येव शब्दार्थः ।

चषक— भाक्ती अमुख्या । **अत्यन्तासत एवेति** । न तु सदसत इत्यर्थः ।

॥ इति च तत्रादौ तत्र विषयत्रयस्य अप्रामाणिकत्वम् ॥

* * *

॥ अथ च तत्र सृष्टेः समवाय्यादिकारणत्रयाधीनत्वस्य अप्रामाणिकत्वम् ॥

९६ सु०— सर्वाऽपि सृष्टिः समवाय्यादिकारणत्रयाधीनाऽभ्युपगता । तत्र समवायिकारणं समवायाप्रामाणिकत्वस्य वक्ष्यमाणत्वादयुक्तम्; अत एवासमवायिकारणमपि, तदधीननिरूपणत्वाच्च तल्लक्षणस्य, समवायिनिमित्तयोरतिव्याप्तेश्च ।

तथा हि । तन्तुपटयोः उत्पन्नस्य द्वित्वस्य पटः समवायिकारणम्, स च द्वित्वसमवायिकारणे तन्तौ समवेतत्वात् समवायिकारणप्रत्यासन्नः, समवायिकारणतयाऽवधृतसामर्थ्यश्च । शरीरात्मनोरुत्पन्नस्य द्वित्वस्यापेक्षाबुद्धिर्निमित्तम्, सा च द्वित्वसमवायिकारणात्मसमवेतत्वान्निमित्तत्वाच्चोक्तलक्षणसम्पन्ना । समवायिकारणप्रत्यासन्नतया सामर्थ्यावधारणमभि(हि)मतम्, न च तथा प्रकृत इति चेत्; तथाऽपि व्याप्यबुद्धेर्व्यापकबुद्धिं प्रति विषयबुद्धेर्धर्माधर्मयोश्च सुखदुःखे प्रत्यसमवायिकारणत्वापत्तेः, न ह्यन्यगतं व्याप्यबुद्ध्याद्यन्यगतस्य व्यापकबुद्ध्यादेर्निमित्तं भवति । आत्मनि प्रदेशभेदान्नेति चेन्न; आद्यादिशब्दानां द्वितीयादिशब्दासमवायिकारणत्वाभावापत्तेः, एकाकाशगतत्वेन तत्सम्भवे प्रकृतेऽपि समानम् ।

परि०— तन्तुपटयोरुत्पन्नस्येति । व्यतिषिक्ततन्तुपटोभयसमवायिकारणकतया तदुभयाधारतया इमौ तन्तुपटावित्युत्पन्नस्येत्यर्थः । दित्वं प्रति पटगतैकत्वमसमवायिकारणं न तु पट इति द्वित्वसमवायिनि पटेऽतिव्याप्तिरित्यर्थः । शरीरात्मनोरित्यपि प्राग्वत् । शङ्कते **समवायीति** । **न च तथा प्राकृत इति** । किन्तु पटः समवायिकारणत्वेनापेक्षाबुद्धिश्च निमित्तकारणतया द्वित्वं प्रत्यवधृतसामर्थ्य इत्यर्थः । **तथापीति** । पूर्वोक्तस्थलद्वयेऽतिव्याप्तिपरिहारेऽपि । व्याप्यबुद्धाविष्टानिष्टवस्तुविषयकबुद्धौ धर्मेऽधर्मेऽतिव्याप्तिरित्याह **व्याप्येति** । धूमादिज्ञानं वह्न्यादिज्ञानं प्रतीत्यग्रेतनमाकृष्यते । **विषयबुद्धेरिति** । स्रक्चन्दनवनितादिसर्पवृश्चिकादिरूपविषयविषयकबुद्धेरित्यर्थः । व्याप्यबुद्धिविषयबुद्धिधर्माधर्माणां तत्कार्यभूतव्यापकबुद्धिसुखदुःखानां चात्मैव समवायिकारणमिति व्याप्यबुद्ध्यादीनां स्वकार्यव्यापकबुद्ध्यादिकं प्रति समवायिकारणप्रत्यासन्नतयैव सामर्थ्यावधारणं नान्यथेत्येतद्व्यनक्ति **न ह्यन्यगतेति** । कार्येण सहैकदेशावच्छेदेन समवायिकारणप्रत्यासन्नतया सामर्थ्यावधारणमभिमतमिति भावेनातिव्याप्त्युद्धारमाशङ्कते **आत्मनीति** ।

गु०दी०— व्याप्यबुद्धेर्व्यापकबुद्धिम् इत्यत्र आत्ममनःसंयोगासमवायिकारणिकायां व्यापकबुद्धौ व्याप्यबुद्धिरनिमित्तमिति परस्य मतम् । तस्या अपि बुद्धेर्व्यापकबुद्धिसमवायिकारणे आत्मनि समवेतत्वादन्यस्य व्याप्यबुद्धचाऽन्यस्य व्यापकबुद्धचनुदयेन स्वसमवायिकारणसमवेतत्वेनैव सामर्थ्यावधारणादिति भावः । एवमुत्तरत्रापि ज्ञातव्यम् । **प्रदेशभेदान्नेति चेत्** इत्यस्य देहान्तरावच्छिन्नात्मनि व्याप्यबुद्धिः ततोऽन्यत्र व्यापकबुद्धिरिति प्रदेशभेद इत्यर्थः । एतस्मादेवापरबुद्धेरजनकत्वं न तु समवायिकारणसमवेतत्वाभावापराधेनेति भावः । **प्रकृतेऽपि समानम्** इत्यस्योत्तराकाशः प्रथमाकाशजनितशब्दस्य न समवायिकारणम् । तथाप्याकाशत्वोपाधिसाम्याज्जन्यजनकभावो हि तवाभिप्रेतः । एवं प्राचीनव्याप्यबुद्धेरुत्तरात्मा न समवायिकारणम् । आत्मत्वजात्या साम्यमस्तीति तत्रापि कार्यं स्यादिति भावः । वस्तुगत्या प्रदेशभेदात् कार्यकारणभावो नास्तीति वदता एतद्देहावच्छिन्नात्मसमवेतत्वं नास्तीत्येवोक्तं स्यात् । अतोऽपरिहार्यं समवायिकारणसमवेतत्वेन सामर्थ्यावधारणमिति द्रष्टव्यम् ।

वं०प०— समवायिन्यतिव्याप्तिमुपपादयति **तन्त्विति** । **तन्ताविति** । तन्तुपटयोरुभयोरपि द्वित्वं प्रति समवायिकारणत्वादिति भावः । निमित्ते तामुपपादयति **शरीरेति** । **न च तथेति** । अयमर्थः । पटस्य समवायिकारणत्वेन कारणत्वे सत्यपि समवायिकारणप्रत्यासन्नत्वेन कारणत्वावधारणं विवक्षितम् । प्रकृतकार्यसमवायिकारणप्रत्यासन्नत्वं कारणतावच्छेदकत्वेन विवक्षितमिति यावत् । न चेदं कारणतावच्छेदकं पटेऽस्ति । तथात्वे घटपटयोरुपपन्नस्य द्वित्वस्य पटः कारणं न स्यात् । समवायिकारणीभूतघटाप्रत्यासन्नत्वात् । तथाऽपेक्षाबुद्धावपि नेदं कारणतावच्छेदकमस्ति । तथात्वे घटपटयोरुत्पन्नं द्वित्वं प्रति अपेक्षाबुद्धेः कारणत्वं न स्यात् । समवायिकारणीभूतघटपटोभयाप्रत्यासन्नत्वात् । तथा च नावधृतसामर्थ्यम् । तन्तुद्वयसंयोगादौ तु वर्तत इदम् । अन्यनिष्ठस्य तददर्शनादिति । **विषयबुद्धेरिति** । इष्टार्थोपलब्धौ सुखमनिष्टार्थोपलब्धौ दुःखमिति प्रसिद्धत्वादित्यर्थः । कारणतावच्छेदकमत्रोपपादयति **न हीति** । तन्त्वन्यघटगतद्वित्वं प्रति पटो न कारणं तथा न हीत्यर्थः । **आत्मनीति** । तथा च व्यापकबुद्धिसमवायिकारणीभूतात्मप्रत्यासन्नत्वं न व्याप्यबुद्धाविति नात्रोक्तमवच्छेदकमस्तीत्यर्थः । **आद्येति** । तत्रापि द्वितीयादिशब्दसमवायिकारणीभूताकाशप्रदेशगतत्वं नाद्यशब्देऽस्तीत्यर्थः । **तदिति** । असमवायिकारणत्वेत्यर्थः । **समानमिति** । एकात्मगतत्वेनेत्यर्थः ।

कं०रा०— स चेति । पटश्च तन्तुपटयोरुत्पन्नद्वित्वं प्रति समवायिकारणे तन्तौ समवेतत्वात् समवायिकारणप्रत्यासन्नस्तद्वित्वं प्रति समवायिकारणतयावधृतसामर्थ्यश्चेत्यर्थः । एवमसमवायिकारणलक्षणस्य समवायिकारणेऽतिव्याप्तिमुपपाद्य निमित्तेति व्याप्तिमुपपादयति **शरीरात्मनोरित्यादिना** । तन्तुपटयोरुत्पन्नद्वित्वं प्रति समवायिकारणस्य पटस्य शरीरात्मनोऽनुत्पन्नद्वित्वं प्रति निमित्तभूताया अपेक्षाबुद्धेश्च वस्तुगत्या समवायिकारणप्रत्यासन्नत्वसद्भावेऽपि विवक्षितस्य समवायिकारणप्रत्यासन्नतयावधृतसामर्थ्यस्याभावान्न तयोरति-

व्याप्तिरिति शङ्कते **समवायिकारणप्रत्यासन्नतयेति** । व्याप्यबुद्ध्यादेर्व्यापकबुद्ध्यादिकं प्रति समवायिकारण-प्रत्यासन्नतयैव कारणत्वमित्युपपादयति **न हीति** । न ह्यन्यगताव्याप्यबुद्धिरन्यगतव्यापकबुद्धिं प्रति निमित्तं न वान्यगता विषयानुभवधर्माधर्मा सुखदुःखे प्रति निमित्तमन्यगतव्याप्यबुद्ध्यादिनान्यगतव्यापकबुद्ध्यादे-रदर्शनादित्यर्थः । ननु समवायिकारणप्रत्यासन्नपदेन कार्यं यावद्देशसमवेतं जायते तत्प्रदेशसमवेतत्वं विवक्षितं व्यापकबुद्ध्यादिकं चात्मनि यत्प्रदेशसमवेतं जायते तत्प्रदेशसमवेतत्वं विवक्षितं व्यापकबुद्ध्यादिकं चात्मनि यत्प्रदेशसमवेतं जायते न तत्प्रदेशे व्याप्यबुद्ध्यादिकं समवेतमात्मनि प्रदेशभेदेनैव तद्वृत्तेरतो व्याप्य-बुद्ध्यादेर्व्यापकबुद्ध्यादिकं प्रति नासमवायिकारणत्वप्रसङ्ग इति शङ्कते **आत्मनीति** । एवं तर्हि द्वितीयादिशब्दा आकाशे यत्प्रदेशसमवेतास्तत्प्रदेशसमवेतत्वं स्याद् यदिशब्देऽप्यभावादाद्यादिशब्दानां द्वितीयादिशब्दासमवायि-कारणत्वं न स्यादतो नेत्थं विवक्षा सम्भवतीत्याशयेन परिहरति **नेति** । द्वितीयादिशब्दानां आद्यादिशब्दानां च प्रदेशभेदेऽप्याकाशगतत्वमात्रेण तेषां तदसमवायिकारणत्वं भवत्वित्यत आह **एकाकाशेति** ।

श्रीनिधि०— न च तथा प्रकृत इति । समवायकारणप्रत्यासत्त्यवच्छेदेन सामर्थ्यावधारण-मभिप्रेतमित्यर्थः । न हि पटापेक्षा बुद्ध्योः द्वित्वं प्रति कारणत्वम् । समवायिकारणप्रत्यासत्त्यवच्छेदेन यदा घटपटयोर्द्वित्वमुत्पद्यते तदा तयोरकारणत्वप्रसङ्गात् । न ह्यपेक्षाबुद्धिः घटपटयोः समवेता । नापि घटपटौ घटपटयोः समवेतौ । किन्तु द्वित्वसमवायिकारणभिन्न एव समवेताविति भावः । प्रकृते तु सामर्थ्यावधारणं समवायकारणप्रत्यासन्नत्वेनैवेत्याह **न ह्यन्यगतमिति** । **आत्मनि प्रदेशभेदादिति** । एवञ्च व्याप्यबुद्ध्यादेः समवायिकारणभिन्नदेशत्वात् न तदवच्छेदेन सामर्थ्यावधारणं युज्यत इति भावः । **आद्यादिशब्दानामिति** । तत्राप्यौपाधिकप्रदेशभेदस्य सत्त्वादिति भावः । अभिप्रायमजानानः शङ्कते **एकाकाश इति** । स्वाभाविकैक्य-मादाय तदवच्छेदेन सामर्थ्यावधारणं युज्यत इत्याशयः ।

शे०वा०— सर्वाऽपि सृष्टिरिति । भावसृष्टिरित्यर्थः । **वक्ष्यमाणत्वादिति** । 'कार्यकारणयोश्चैव गुणादेः पञ्चकस्य चे'त्यादिनेति शेषः । **अत एवेति** । समवायिकारणस्यायुक्तत्वादेवेत्यर्थः । **तदधीनेति** । तज्ज्ञानाधीनज्ञानत्वादित्यर्थः । अननुसंहितोपाधेरुपहितप्रत्ययायोगादित्यर्थः । तत्कथमित्यतस्तदुभयमुपपादयितुं प्रतिजानीते **तथा हीति** । निर्देशक्रमेण समवायिकारणेऽतिव्याप्तिमुपपादयति **तन्तुपटयोरुत्पन्नस्य द्वित्व-स्येति** । न च यावत्समवायिकारणप्रत्यासन्नत्वस्य विवक्षितत्वान्न तत्पटेऽतिप्रसङ्गः तस्य द्वित्वसमवायि-कारणतन्तुसमवेतत्वेऽपि 'पटसमवेतत्वाभावादिति वाच्यम् । तथा सति घटपटगतद्वित्वासमवायिकारणे घट-पटगतैकत्वेऽव्याप्तिप्रसङ्गात् । तस्य द्वित्वसमवायिकारणघटपटगतत्वेऽपि घटगतैकत्वस्य पटसमवेतत्वाभावेन पटगतैकत्वस्य च घटसमवेतत्वाभावेन यावत्समवायिकारणप्रत्यासन्नत्वविरहादिति भावः । निमित्तकारणेऽपि तामुपपादयति **शरीरात्मनोरिति** । **न च तथा प्रकृत इति** । पटस्य समवायिकारणतया सामर्थ्यावधारणात् । अपेक्षाबुद्धेश्च निमित्ततयैव तदवधारणान्न समवायिकारणप्रत्यासन्नत्वेन तदवधारणमिति न समवायिनिमित्तयो-

रतिव्याप्तिरिति भावः । व्याप्यबुद्ध्यादेर्व्यापकबुद्ध्यादिकं प्रति समवायिकारणप्रत्यासन्नत्वेन सामर्थ्यावधारणमुपपादयति **न ह्यन्यगतमित्यादिना** । तथा सति पुरुषान्तरीयव्याप्यज्ञानादिना पुरुषान्तरीयानुमित्याद्यापातादिति भावः । **आत्मनीति** । तथा च यत्प्रदेशावच्छिन्ने व्याप्यबुद्ध्यादि न तत्प्रदेशावच्छिन्ने व्यापकबुद्ध्यादीति न तत्रातिव्याप्तिरिति भावः । **नेति** । तत्रापि यत्प्रदेशावच्छिन्ने द्वितीयादिशब्दोत्पत्तिर्न तत्प्रदेशावच्छिन्न एवाद्यादिशब्दा इति तत्रातिव्याप्तिरिति भावः । **प्रकृतेऽपि सममिति** । व्याप्यबुद्ध्यादेर्व्यापकबुद्ध्यादिना प्रदेशभेदेन वृत्तावप्येकात्मगतत्वमस्त्येवेति तत्सम्भव इति समानमित्यर्थः ।

वा०र०— तस्य द्वित्वेति । पटस्येत्यर्थः । **किं चैवं सतीति** । इतः आरभ्य एवं च न कश्चिद्दोषः इत्येतत्पर्यन्तं मुरारिभट्टानुसारेण । तत्र ज्ञानादीनामित्यादि प्रत्यासन्नत्वाच्च इत्यन्तोक्तदूषणमेतत् । अत्र सर्वत्र प्रमेयैक्येऽपि वाक्यविन्यासभेदमात्रे क्वचित् । क्वचित् सिद्धान्तीयदूषणाभिधानं क्वचिदुपपादनाधिक्यं इति ज्ञेयम् ।

विट्ठल०— तन्तुपटयोरिति । परमते पटोत्पत्त्यनन्तरं च तन्तुपटयोर्भेदादित्थमुक्तिः । तथा च तन्तोरपि द्वित्वं प्रति समवायिकारणत्वेन तत्रत्यासन्ने पटेऽतिव्याप्तिः । न च तस्यापि लक्ष्यत्वे द्रव्यस्यासमवायिकारणत्वासम्मतेः पटादिगतैकत्वस्यैवासमवायिकारणत्वाभ्युपगमादिति भावः । निमित्तत्वाद्वये सावधृतसामर्थ्यमुपपादितम् । शङ्कते **समवायिकारणप्रत्यासन्नतयेति** । द्वित्वसमवायिकारणं तु प्रत्यासन्नस्यापि पटस्य सामर्थ्यावधारणं *नासमवायिकारणत्वप्रकारेण किन्तु समवायिकारणत्वाकारेणैव । अतो न द्वित्वसमवायिकारणे पटे तु व्याप्तिः । नापि द्वित्वनिमित्तकारणापेक्षाबुद्धौ तस्या निमित्तत्वेनैव सामर्थ्यावधारणेनासमवायिकारणत्वप्रकारेण सामर्थ्यावधारणाभावादिति* भावः । **व्याप्यबुद्धेरिति** । वह्निप्रमित्यादि *समवायिसमवायिकारणभूतात्मनि प्रत्यासन्ने धूमज्ञानादौ सुखदुःखसमवायिकारणात्मप्रत्यासन्ने तत्कारणतया धृतसामर्थ्ये सक्रन्दनवनियत्ताद्यनुभवरूपे ज्ञाने उक्तलक्षणोपेततयोः सुखदुःखकारणयोर्धर्माधर्मयोश्चातिव्याप्तिरवर्जनीयेत्यर्थः । उक्तउक्तव्याप्यबुद्धादौ समवायिकारणप्रत्यासन्नत्वं नास्ति । तस्य व्यापकबुद्धिसमवायिकारणान्यगतत्वादित्यत आह* **न हीति** । ननु यत्र कार्यं तदवच्छेदेन समवायिकारणप्रत्यासन्नत्वं विवक्षितम् । न चैतद्व्याप्यबुद्ध्यादावस्ति व्यापकं बुद्ध्यादाश्रयात्मप्रदेशापेक्षयान्यस्मिन्प्रदेशे व्याप्य बुद्ध्याद्यवस्थानादिति शङ्कते **आत्मनि प्रदेशभेदादिति** । **आद्यादीति** । अत्रापि प्रदेशभेदस्य सत्त्वे समवायिकारणप्रत्यासन्नत्वानुपपत्तेरिति भावः ।

९७ **सु०— एवमन्यत्राप्यतिव्याप्तिरूहनीया ।**

परि०— एवमन्यत्रापीति । तुरीतन्तुसंयोगादावित्यर्थः ।

यादु०— एवमन्यत्रापीति । तुरीतन्तुसंयोगादावित्यर्थः ।

वं०प०— अन्यत्र तुरीतन्तुसंयोगे ।

कं०रा०— एवमन्यत्रापीति । विशिष्टज्ञानाद्यसम्बन्धिकपादार्थज्ञानादिकं प्रति कारणे विशेष-ज्ञानसम्बन्धितावच्छेदकावच्छिन्नसम्बन्धिज्ञानादावप्यसमवायिकारणस्यातिव्याप्तिरुक्तप्रकारेणोहनीयेत्यर्थः ।

श्रीनिधि०— एवमन्यत्रापीति । वाक्यार्थज्ञानकारणे पदार्थज्ञानेऽपि शिष्टज्ञानसाधने विशेषणज्ञाने अभावज्ञानसाधने प्रतियोगिज्ञाने चेत्यर्थः ।

शे०वा०— किञ्चैवं सति ज्ञानादीनामिच्छादीन्प्रति स्वस्वप्रत्यक्षं प्रति चासमवायित्वं प्रसज्यते । इच्छादीनां स्वप्रत्यक्षस्य च समवायिकारणे आत्मनि ज्ञानादीनां समवेतत्वेन समवायिकारणप्रत्यासन्नत्वात् अनन्यथासिद्धनियतपूर्ववृत्तित्वेन कारणत्वाच्च तत्रोक्तलक्षणसद्भावादित्याह **एवमन्यत्रापीति** । न चात्मा-वृत्तित्वविशेषणान्नैष दोष इति वाच्यम् । तथा सति ज्ञानाद्यसमवायिकारणे आत्ममनःसंयोगेऽव्याप्तिप्रसङ्गात् । न चात्मभिन्नावृत्तित्वविशेषणान्नाव्याप्त्यतिव्याप्ती । आत्ममनःसंयोगस्यात्मभिन्नमनोवृत्तित्वात् । ज्ञानादीनां च तदभावादिति वाच्यम् । एवमप्यात्मैकत्वे द्वित्वासमवायिकारणेऽव्याप्तेः । तस्यात्मभिन्नवृत्तित्वाभावात् । अत एव चात्मविशेषगुणभिन्नत्वे सतीति विशेषणान्नाव्याप्त्यतिव्याप्ती इति निरस्तम् । आत्मैकत्वप्रत्यक्षं प्रति आत्मैकत्वस्यासमवायित्वापत्तेरनिवारणात् । अत एवात्ममनःसंयोगाजन्यत्वे सतीति विशेषणाददोष इति परास्तम् । जन्यस्य सर्वस्याप्यसमवायिकारणस्यादृष्टद्वारा तज्जन्यत्वेनाव्याप्तिप्रसङ्गाच्चेति भावः । नन्वदृष्टद्वारा आत्ममनस्संयोगाजन्यत्वे सति समवायिकारणप्रत्यासन्नं विषयतातिरिक्तरूपेण कारणं असमवायिकारणमिति विवक्षितमिति न किञ्चिदेतदित्याशङ्क्य तथा सति पटरूपे पटस्याप्यसमवायित्वप्रसङ्गः । न च समवायि-कारणप्रत्यासत्त्यभावान्न तथेति वाच्यम् । पटरूपं प्रति तन्तुरूपस्येव कारणैकार्थप्रत्यासत्तेरविशेषादित्याशयेनाह **एवमन्यत्रापीति** । ननु द्रव्यभिन्नत्वे सतीत्यप्यत्र विशेषणमिति नायमपि दोष इत्याशङ्क्य तथाऽपि तुरीतन्तुसंयोगेऽतिव्याप्तिरेव । तस्यापि द्रव्यभिन्नत्वात् । आत्ममनोयोगाजन्यत्वाद्विषयतातिरिक्तरूपेण कारण-त्वाच्चोक्तलक्षणस्य तत्र सत्त्वादित्याशयेनाह **एवमन्यत्रापीति** । न च तुरीतन्तुसंयोगस्यापि पटं प्रत्यसम-वायित्वमेवेति लक्ष्यत्वादेव न तत्रातिव्याप्तिरिति वाच्यम् । तथा सत्यसमवायिकारणनाशे द्रव्यनाशस्याव-श्यम्भावेन तुरीतन्तुसंयोगनाशेन पटनाशप्रसङ्गात् । न च खण्डपटादौ व्यभिचारात्तुरीतन्तुरीसंयोगस्य पटं प्रति कारणत्वमेव नास्तीति नातिव्याप्तिरिति वाच्यम् । तथा सति कुविन्दादीनामप्यकारणत्वप्रसङ्गात् । कुविन्दादीनां पटविशेषकारणत्वाभ्युपगमे च तुरीतन्तुसंयोगस्यापि तत्प्रसक्त्या विशेषं प्रत्यसमवायित्वप्रसङ्गस्य दुर्निवारत्वादिति ध्येयम् ।

अथाऽपि स्यात् यथाश्रुतमेवैतल्लक्षणम् । समवायिकारणप्रत्यासन्नत्वेन च कारणत्वमिह विवक्षितम् । तुरीतन्तुसंयोगादीनां तु न तेन रूपेण जनकता, किन्तु तुरीतन्तुसंयोगत्वेनैवेति न तत्रातिव्याप्तिरिति चेन्न । तथा

सति व्याप्यबुद्धेर्व्यापकबुद्धिं प्रति विषयबुद्धेर्धर्माधर्मयोश्च सुखदुःखे प्रति असमवायिकारणत्वप्रसङ्ग इत्याकरोक्तदोषानुद्धारात् । अन्यगतव्याप्यबुद्ध्यादेरन्यगतव्यापकबुद्ध्याद्यनिमित्ततया समवायिकारणप्रत्यासन्नतयैव तत्र व्याप्यबुद्ध्यादेः कारणत्वात् । तन्तुसंयोगादीनामपि तन्तुसंयोगत्वेनैव जनकतया समवायिकारणप्रत्यासन्नत्वेन जनकत्वविरहादसम्भवापत्तेश्च । न च भावकार्यत्वावच्छिन्नकार्यतानिरूपितकारणताऽसमवायिकारणनिष्ठानुगतधर्माद्यवच्छेद्या । स चानुगतो धर्मोऽन्यस्यासम्भवादुक्त एवेति तेन रूपेण कारणताऽऽवश्यकीति वाच्यम् । तस्य तन्तुत्वादावतिप्रसक्तत्वेनासमवायिकारणनिष्ठकारणतानवच्छेदकत्वात् । कारणभागप्रवेशे चात्माश्रयाद्यापत्तेः । किञ्च तेषां तेन रूपेण कारणत्वे तन्त्वादीनामकारणत्वप्रसङ्गः । तेषां हि कारणत्वे विनिगमनाविरह एव बीजम् । स चैवं सति न सम्भवतीति कथं तेषां कारणत्वं स्यात् । न च समवायिकारणप्रत्यासन्नपदेन समवायिकारणमात्रप्रत्यासन्नत्वं विवक्षितमिति न तुरीतन्तुसंयोगेऽतिव्याप्तिः । तस्य समवायिभिन्नतुरीसमवेतत्वेन समवायिकारणमात्रसमवेतत्वाभावादिति वाच्यम् । तथा सत्यात्ममनःसंयोगे कालपिण्डसंयोगे पाके चाव्याप्तिप्रसङ्गेन तस्यासम्भवदुक्तिकत्वादिति भावः ।

ननु कार्यध्वंसप्रयोजकध्वंसाप्रतियोगिद्रव्यकारणावृत्तीति विशेषणमिह विवक्षितम् । अस्यार्थः । कार्यध्वंसं प्रति प्रयोजकीभूतो यो ध्वंसस्तदप्रतियोगि यद्द्रव्यकारणं तदवृत्तीति । तुरीतन्तुसंयोगस्य च कार्यध्वंसप्रयोजकध्वंसाप्रतियोगितुरीवृत्तित्वान्न पटं प्रत्यसमवायित्वप्रसङ्गः । पाकस्य कार्यध्वंसप्रयोजकध्वंसाप्रतियोगितेजोवृत्तित्वात् तत्राव्याप्तिपरिहाराय द्रव्यकरणेत्युक्तम् । पाकस्य यद्यपि कार्यध्वंसप्रयोजकध्वंसाप्रतियोग्यवृत्तित्वं नास्ति । तथाऽपि कार्यध्वंसप्रयोजकध्वंसाप्रतियोगि यद्द्रव्यकारणं तद्वृत्तित्वं नास्तीति विशिष्टाभावस्य सत्त्वान्नाव्याप्तिरिति न कश्चिद्दोष इति चेन्मैवम् । कपालाकाशसंयोगे शब्दाद्यसमवायिकारणेऽव्याप्त्यनिस्तारात् । तस्य शब्दादिरूपकार्यध्वंसप्रयोजकध्वंसाप्रतियोगिनि द्रव्यकारणे कपाले वृत्तेः । आत्ममनसोरपि द्रव्यकारणतयाऽऽत्ममनःसंयोगेऽव्याप्तेश्च । अत एव द्रव्यसमवायिकारणसंयोगिभिन्नत्वे सतीति विशेषणान्नातिव्याप्तिरिति निरस्तम् । एवमपि पटतुरीसंयोगासमवायिनि तुरीतन्तुसंयोगेऽव्याप्तेरनिस्तारात् । एतेनैव स्वकार्यसमवायिकारणभिन्नरूपवदसमवेतत्वं विशेषणमतो नातिप्रसङ्ग इति निरस्तम् । एवमपि भेर्याकाशसंयोगादावव्याप्तेरिति सङ्क्षेपः ।

नव्यास्तु । स्वकार्यद्रव्यानधिकरणवृत्तिभिन्नत्वे सति द्रव्यभिन्नत्वे सत्यदृष्टाद्वारकात्ममनोयोगाजन्यत्वे सति समवायिकारणप्रत्यासन्नं विषयतातिरिक्तरूपेण कारणसमवायिकारणमिति विवक्षितम् । अत्र च कारणमसमवायिकारणमित्युक्ते आत्मैकत्वं स्वाध्यक्षं प्रति असमवायि स्यात् । तदर्थं विषयतातिरिक्तरूपेणेति । तावत्युक्ते समवायिकारणे गतम् । अतः समवायिकारणप्रत्यासन्नमिति । तावत्युक्ते च ज्ञानादौ गतम् । अतोऽदृष्टाद्वारकात्ममनोयोगाजन्यत्वे सतीति । तावत्युक्ते पटोऽपि स्वरूपं प्रत्यसमवायिकारणं स्यात् तदर्थं द्रव्यभिन्नत्वे सतीति । एतावत्युक्ते च तुरीतन्तुसंयोगे गतम् । अतः स्वकार्यद्रव्यानधिकरणवृत्तिभिन्नत्वे सतीति । न चात्ममनःसंयोगादौ स्वकार्यद्रव्याप्रसिद्ध्याऽव्याप्तिरिति वाच्यम् । स्वकार्यद्रव्यानधिकरणवृत्तयः

तुरीतन्तुसंयोगादयः प्रसिद्धाः तदन्यत्वस्य तत्रापि सत्त्वात् । न च तर्हि तुरीपटसंयोगासमवायिनि तुरीतन्तुसंयोगेऽव्याप्तिः । तस्यैव तद्भिन्नत्वाभावादिति वाच्यम् । न हि य एव तुरीतन्तुसंयोगः पटमारभते स एव तुरीतन्तुसंयोगं बाधात्किन्त्वन्य एवेति, तत्रापि विशिष्टभेदसत्त्वात् । एवं च न कश्चिद्दोषः । तथा हि । स्वकार्यद्रव्यानधिकरणवृत्तिभिन्नत्वविशेषणान्न तुरीतन्तुसंयोगादावतिव्याप्तिः । द्रव्यभिन्नत्वविशेषणाच्च न तन्तुपटयोरुत्पन्नद्वित्वसमवायिकारणे पटेऽतिव्याप्तिः । अदृष्टाद्वारकात्ममनोयोगाजन्यत्वविशेषणाच्च नापेक्षाबुद्ध्यादौ प्रसङ्ग इति । तत्राप्येतदेवोत्तरम् **एवमन्यत्रापीति** ।

अयमाशयः । आत्मत्वरूपसामान्यप्रत्यासत्त्या यदा आत्मप्रत्यक्षं तदा प्रत्यासत्तितया तज्जनकात्मत्वे एवमप्यतिव्याप्तेः । तस्य स्वकार्यद्रव्यानधिकरणवृत्तितुरीतन्तुसंयोगादिभिन्नत्वात् द्रव्यभिन्नत्वाददृष्टाद्वारकात्ममनोयोगाजन्यत्वादात्मप्रत्यक्षसमवायिकारणात्मसमवेतत्वात् प्रत्यासत्तितया तज्जनकत्वेन विषयतातिरिक्तरूपेण कारणत्वाच्चोक्तलक्षणस्य सत्त्वात् । शरीरात्मसंयोगोऽपि ज्ञानादिहेतुरिति मते तत्राप्यतिव्याप्तेश्च । किञ्च परमात्मक्षेत्रज्ञगतद्वित्वनिमित्तकारणीभूतेश्वरापेक्षाबुद्धावतिव्याप्तिः । तस्या अपि स्वकार्यद्रव्यानधिकरणवृत्तितुरीतन्तुसंयोगादिभिन्नत्वात्, द्रव्यभिन्नत्वात्, आत्ममनोयोगाजन्यत्वाच्च तत्रोक्तलक्षणसद्भावात् । तदर्थं जन्यत्वे सतीति विशेषणे च परमात्मक्षेत्रज्ञगतद्वित्वसमवायिकारणे परमात्मक्षेत्रज्ञगतैकत्वेऽव्याप्तेः । संयोगविशेषात्मकसङ्गहासाधारणकारणे स्नेहेऽतिव्याप्तेश्च । न च तस्यापि सङ्गहासमवायिकारणत्वमेवेति न तत्रातिव्याप्तिरिति वाच्यम् । तस्य संयोगरूपतया संयोगकर्मान्यतरमात्रासमवायिकारणत्वनियमस्य परैरभ्युपगतत्वेन तदयोगात् । ईश्वरापेक्षाबुद्धावतिव्याप्तिवारणाय ज्ञानवदवृत्तीति विशेषणे आत्ममनःसंयोगेऽव्याप्तेः । तत्परिहाराय मात्रपदप्रक्षेपे चात्मगतैकत्वेऽव्याप्तेः । किञ्च द्वितीयादिशब्दकारणीभूताऽऽद्यादिशब्देष्वपि सत्त्वात् तत्रातिव्याप्तिरेव । तेषामपि स्वकार्यद्रव्यानधिकरणतुरीतन्तुसंयोगादिभिन्नत्वात्, द्रव्यभिन्नत्वादेश्च सत्त्वात् । न चाद्यादिशब्दानां द्वितीयादिशब्दासमवायिकारणत्वेन लक्ष्यत्वान्न तत्रातिव्याप्तिरिति वाच्यम् । तथा सति ज्ञानादीनामप्यसमवायिकारणत्वेन लक्ष्यत्वस्य वक्तुं शक्यत्वेन तत्रातिव्याप्तेरेवाभावात् तद्वारकादृष्टाद्वारकात्ममनोयोगाजन्यत्वे सतीति विशेषणवैयर्थ्यापातात् । न चात्ममनोयोगस्यैवासमवायिकारणस्य सत्त्वान्न ज्ञानादेस्तथात्वमिति तद्वारकविशेषणसार्थक्यमेवेति वाच्यम् । तथा सति भेर्याकाशसंयोगरूपासमवायिकारणान्तरसत्त्वादाद्यादिशब्दानां द्वितीयादिशब्दासमवायिकारणत्वमपि नास्तीति तत्रातिव्याप्तिपरिहाराय शब्दतन्मात्रवृत्तीत्यादिविशेषणस्याप्यावश्यकत्वात् । न च भेर्याकाशसंयोगस्य द्वितीयादिशब्दसमवायिकारणप्रदेशान्तरप्रत्यासन्नत्वाभावान्नासमवायित्वमिति वाच्यम् । तर्हि तत एवाद्यादिशब्दानामपि प्रदेशान्तरवर्तिनां प्रदेशान्तरवर्तिद्वितीयादिशब्दसमवायिकारणाप्रत्यासन्नत्वादसमवायित्वाभावापातात् । न चाकाशत्वेनैक्यात् तत्प्रत्यासन्नत्वं तर्हि तत एव भेर्याकाशसंयोगस्यापि तत्प्रत्यासन्नतया असमवायिकारणत्वोपपत्तेर्नाद्यादिशब्दानां द्वितीयादिशब्दासमवायिकारणत्वं स्यादिति यत्किञ्चिदेतत् । एतेनैव समवायिकारणसमकालीनद्रव्यनाशप्रयोजकनाशप्रतियोगितावच्छेदकरूपवत्त्वसमवायिकारणत्वं, तादृशं च रूपं यद्यप्यसमवायिकारणत्वमेव तथाऽपि तेन रूपेणाप्रवेशान्नात्माश्रय इति मतान्तरमपि परास्तम् ।

गुणाद्यसमवायिकारणे तन्तुरूपादावसमवायिकारणत्वस्य सत्त्वेनातिप्रसक्ततया समवायिकारणसमानकालीन-द्रव्यनाशप्रयोजकनाशप्रतियोगितावच्छेदकत्वानुपपत्तेरिति दिक् ।

वा०र०— जन्यस्य व्याप्तीति पदयोः प्रयोगेणासमवायिकारणभूतनित्यगुणानां जन्यत्वाभावेन तदंशे आत्ममनःसंयोगाजन्यत्वसम्भवा इति असम्भवं वदतो मुरारेः अकौशल्यं सूचयति **अदृष्टद्वारेत्यादि** । विवक्षामाशङ्क्य तत्र ननु तथापि इत्यादिना शङ्कितदूषणाभिधानेन परिहरति । **ननु अदृष्टेति** । द्रव्यभिन्नत्वे सतीत्युक्तसमाधिमाशङ्क्य नन्वेवमपि नैतल्लक्षणं इत्यादिशङ्कया परिहरति **ननु द्रव्येति** । अत्र वदन्तीत्युक्तपक्षं आशङ्कते **अथापि स्यादिति** । अयं च पक्षः । समवायिकारणप्रत्यासन्नतया सामर्थ्यावधारणमित्यादिना मूल एवाशङ्क्य निराकृत इति तदुक्तदूषणमप्यादावाह **तथा सति व्याप्येति** । मुरार्युक्तं दूषणमप्याह **तन्त्विति** । न च भावकार्येत्याद्युक्तमप्याशङ्क्य निराकरोति **न च भावकार्यत्वेत्यादिना** । कारणत्वं स्यादित्यन्तेन **तेषामिति** । तन्तुसंयोगादीनां समवायिकारणप्रत्यासन्नत्वेन रूपेण कारणत्वे तन्त्वादीनां अकारणत्वप्रसङ्गः । न तु संयोगानां कारणत्वे तन्त्वादीनामपि कारणत्वं स्यात् अविशेषात् । नियामकविशेषाभावेऽपि तन्तु-संयोगादीनामेव कारणता अनन्तत्वादीनामिति स्वीकारे वैपरीत्यापत्तेरिति विनिगमनाविरह एव तन्त्वादीनां कारणत्वे बीजम् । यदैवं तन्तुसंयोगादीनां समवायिकारणप्रत्यासत्त्येन कारणता तदा अस्यैव नियामकतया विशेषाभावात् तन्तुसंयोगादीनां कारणत्वेऽपि तन्त्वादीनां तदिति वक्तुं शक्यतया तेषां कारणत्वं न स्यात् इत्यर्थः । अत्र मुरारिणा अग्निसंयोगः इत्येवोक्तेऽपि कार्यध्वंसेति विवक्षायाः पाकेऽतिव्याप्तिपरिहाराय **द्रव्य-कारणेति** । असमवायिकारणवादे मिश्रैरुक्तत्वेनात्रापि तथा व्याख्यानं कृतमिति ध्येयम् । असमवायिकारण-वादानुसारेणैवास्यार्थकथनपूर्वकं विशेषणकृत्यमाह **अस्यार्थः इत्यादिना नाव्याप्तिरित्यन्तनेन** । मुरारिणा पाठभेदेनाव्याप्त्यतिव्याप्त्यन्यतरमात्रनिराकरणपरतया योजनेऽपि उभयपरत्वसम्भवात् वादान्तरानुसारेण तथा योजितमिति ध्येयम् । **आत्ममनसोरपीति** । अत्रात्मनोऽपीत्येव पाठः । अन्यादृशः स्वयुक्तः । मूलकोशे तथैव सत्त्वात् । मनसः कारणतानुपपत्तेश्च । छत्रिन्यायेन मनसः उपादानमिति यथाश्रुत एव पाठः इत्यप्याहुः । आत्मनः कार्यमात्रकारणत्वादेव तद्वारणाय अदृष्टद्वारकेति विशेषणम् । ईश्वरानुमाने मणिकृतोपात्तं रुचिदत्तेन च कारणत्वमुपपादितमिति अस्ति तस्य द्रव्यकारणतेति बोध्यम् । अत एवेत्युक्तमपि तथैवाह । द्रव्यसमवायिकारणं तदन्यत्कारणं च तयोः संयोगः यः तद्भिन्नत्वे सतीत्यर्थः । तथा च तुरीसंयोगस्य द्रव्य-समवायिकारणतन्त्वन्यतुरीरूपकारणसंयोगत्वेन तद्भिन्नत्वाभावात् नातिव्याप्तिः । कारणाकारणेति पाठः क्वचित् । तत्राकारणशब्दस्य समवायिकारणपदसमभिव्याहरणेन तदन्यकारणत्वमेवार्थ इति विवक्षितसिद्धिरिति ध्येयम् । यद्यपि प्रागभिहितकपालाकाशसंयोगाव्याप्तिपरिहारो नैतद्विवक्षयेति न पूर्वोक्त न सर्वदोषपरिहारः तथापि तुरीसंयोगात्ममनःसंयोगयोः अतिव्याप्त्यव्याप्तिपरिहारमात्रे तात्पर्याददोषः । अत एव चातिदेशोपपत्तिः । यद्यपि च कपालाकाशसंयोग एवाव्याप्त्यभिधानं कर्तुं शक्यं तथापि स्पष्टत्वात् शिष्यैरेवोह्यतामिति भावेन दूषणा-न्तरमाह **एवमपि पटतुरीति** । एतेन स्वकार्येत्यादि उक्तरीत्यैव स्वयमप्याह **एतेनैव स्वकार्येति** । यद्यपि

एतद्विवक्षया पटतुरीसंयोगासमवायिकारणतुरीतन्तुसंयोगे शब्दासमवायिकारणे कपालाकाशसंयोगे चाव्याप्तिपरिहारो न सम्भवति तथापि पटकारणतन्तुसंयोगात्ममनःसंयोगयोः अतिव्याप्त्यव्याप्तिपरिहारमात्रे तात्पर्यान्न दोषः । पटतुरीत्याद्युक्तस्थलद्वयेऽतिव्याप्तेः स्पष्टत्वात् शिष्यैरेवोह्यतामिति भावेन दूषणान्तरमाह **एवमपि भेरीति** । अथात्र ब्रूमः इत्यादिनोक्तं विवक्षाविशेषं दूषयितुं तमनूद्य तद्गतपदकृत्यकथनपूर्वकमूलोक्तदोषपरिहारकत्वं च दर्शयति **नव्यास्त्वित्यादिना नापेक्षाबुद्ध्यादौ प्रसङ्ग इत्यन्तेन** । **अदृष्टाद्वारकात्ममनोयोगाजन्यत्वे सतीति** । अत्रायं विवेकः । ज्ञानादावतिप्रसङ्गवारणाय आत्ममनोयोगाजन्यत्वमेव वाच्यम् । तावतैव तत्परिहारात् । परन्तु तथा सत्यसम्भवः स्यादिति तद्वारणाय **अदृष्टाद्वारकेति** । एवमेव वक्तव्ये तदन्यथाभिधानं तदुभयपरिहारोऽपि एकतयैवास्तु । किमसम्भवापादिकविशेषणोपादानपूर्वकं पश्चादसम्भवपरिहाराय विशिष्टोपादानेनेति भावेन । क्वचिच्च स्वपरग्रन्थयोः तथैव पाठः । एवमेतद्वारकादृष्टाद्वारकात्ममनोयोगाजन्यत्वे सतीति वक्ष्यमाणस्य तात्पर्यं द्रष्टव्यमित्याहुः । **ज्ञानादिहेतुरिति मत इति** । हेतुत्वं च निमित्तत्वमिति नेष्टापत्तिरिति भावः । **क्षेत्रज्ञगतैकत्वेति** । गतयोरित्यर्थः । **संयोगविशेषात्मकेति** । एतत्प्रयोजनं अनुपदमेव स्पष्टम् । **मात्रपदेति** । ज्ञानवन्मात्रवृत्तीति विशेषण इत्यर्थः । **आद्यादिशब्दानामिति** । एकस्य समवायिकारणस्य सत्त्वेनासमवायिकारणान्तराङ्गीकारवैय्यर्थ्यात् न तस्यासमवायिकारणत्वमिति भावः । शब्दवन्मात्रा वृत्तीत्यादि विशेषणस्येति पाठः । मूलकोशे तथैव सत्त्वात् । युक्तत्वात् च । अन्यथा परिहारायोगात् इति ध्येयम् । **एकाकाशगतत्वेनेति** । मूलोक्तं दोषोक्तं तन्निवर्त्याशङ्कां प्रदर्शयन्नेव प्रतिबन्धा परिहरति **न चेत्यादिना यत्किञ्चिदित्यादि इत्यन्तेन** । इति यदेतत् । तत् किञ्चित् । फल्गु इत्यर्थः । **एतेनैवेति** । समवायिकारणेन समानकालीनो यो द्रव्यनाशप्रयोजको नाशः तत्प्रतियोगितावच्छेदकरूपवत्वमित्यर्थः । एतच्च विशेषणसमवायिकारणस्यापि द्रव्यनाशप्रयोजकनाशप्रतियोगितया तत्प्रतियोगितावच्छेदकं त्वसमवायिनि अवर्तमानेऽसमवायित्वमेव नास्तीति असम्भववारणाय । तन्नाशस्य च तत्समानकालीनत्वाभावात् नासम्भवः । समवाय्यसमवायिनाशेन द्रव्यनाशस्थले समवायिकारणसमानकालीनो द्रव्यनाशप्रयोजकोऽसमवायित्वेनाभिमतस्य न सम्भवतीति तत्प्रतियोगितामात्रप्राप्तमिति तत्परिहाराय प्रतियोगितावच्छेदकरूपवत्वपर्यन्तधावनमिति ध्येयम् । **दिगिति** । तदर्थस्तु न च द्रव्यसमवायिकारणस्येव इदं लक्षणमिति द्रव्यासमवायिकारणत्वमेव रूपमिति वाच्यम् । सामान्यलक्षणकथनप्रस्तावे विशेषलक्षणाभिधानस्यानाकाङ्क्षितत्वात् । सान्यलक्षणनिर्वचनापत्तेश्च । एवं पूर्वलक्षणेऽपि परमात्मक्षेत्रगत एकत्वेऽतिव्याप्तिपरिहाराय द्रव्यसमवायिकारणस्वीकारे उक्तो दोषो ध्येयः । किञ्च ज्ञानादावतिव्याप्तिपरिहारस्यात्मावृत्तित्वविशेषणेनैव सम्भवात् न तदर्थं अदृष्टाद्वारकेत्यादि विशेषणमावश्यकम् । आत्ममनोयोगेऽव्याप्तिस्तु उक्तरीत्या न दोषायेति स्यात् । किञ्च समवायिकारणशब्दस्य सम्बन्धिशब्दतया यत्कार्यं प्रति यस्यासमवायिकारणत्वं प्रसक्तं तत्समवायिकारणप्रत्यासन्नत्वं इति विवक्षायां न पटेऽतिप्रसङ्गः । पटगतरूपसमवायिकारणे पटे स्वस्यासमवेततया पटसमवायिकारणतन्तुवद्रूपसमवायिकारणपटस्यापि समवायिकारणप्रत्यासत्यासन्नपदेनैव व्यावृत्तेः । अन्यथा तन्तोरपि तन्त्ववयवरूपतत्समवायिकारणवृत्तितया व्यावृत्तिर्न स्यात् इति न तदर्थं द्रव्यभिन्नत्वरूपविशे-

षणापेक्षा । तन्तावतिप्रसक्तिवारणाय उपात्तविशेषणस्य सम्बन्धिशब्दत्वनिमित्तकतत्तत्समवायिकारणप्रत्यासन्नार्थकत्वेऽपि तदर्थाज्ञानेन पटेऽतिव्याप्तौ चोदितायां उक्तार्थाभिप्रायाविष्काररूपं द्रव्यभिन्नत्वरूपविशेषणम् । तत्परिहाराय उपात्तमपि तन्महिम्ना लब्धमिति न प्रागुक्तदोषप्रसङ्गः । तन्महिम्ना लब्धं च न तद्वैय्यर्थ्यापादकमित्येतत्सर्वमवदातम् । अत एव यत्संशयव्यतिरेकनिश्चयावित्यत्र व्याप्तौ ग्राह्यभिन्नस्येति विशेषणस्य संशयपदोपादानमहिम्ना लब्धस्य तद्वैय्यर्थ्यापादकत्वाभावस्य रुचिदत्तेनोक्तिः । एवमेव तैस्तैः तत्र तत्रोक्तमिति । तदसत् । अथाज्ञानेनातिव्याप्तिशङ्कायाः तदर्थाविष्कारेण एव परिहारार्थतया तत्परिहाराय कुसृष्ट्याश्रयणायोगात् । यत्संशयेत्यादौ तु ग्राह्यभिन्नत्वविशेषणाभावे व्यभिचारपरिहारो नेति तदुपपादनाय कथञ्चित् संशयपदसार्थक्यवर्णनमिति वैषम्याच्च । यत्त्वत्र केचित् द्रव्यभिन्नत्वविशेषणोपादानेऽपि समवायिकारणप्रत्यासन्नपदस्य न वैय्यर्थ्यप्रसङ्गः । ग्रन्थकृदुक्ततन्त्वादिलक्षणे अतिव्याप्तिवारणेऽपि उपलक्षितस्थलान्तरेऽतिव्याप्तिपरिहाराय समवायिकारणप्रत्यासन्नपदस्य सार्थक्यात् । तथाहि । पटाद्यलौकिकसाक्षात्कारं प्रति घटत्वादिरूपसामान्यप्रत्यासत्तेः प्रत्यासत्तितयैव जनकत्वेन विषयत्वेन जनकत्वाभावात् । विषयतातिरिक्तरूपेण कारणत्वेनात्ममनःसंयोगवत् स्वकार्यद्रव्यानधिकरणवृत्तिभिन्नत्वेनादृष्टाद्वारक आत्ममनोयोगजन्यत्वेन च तत्रापि व्याप्तिः तत्परिहाराय समवायिकारणप्रत्यासन्नपदं तस्य च उक्तरीत्या तत्तत्कार्यसमवायिकारणप्रत्यासन्नत्वमेवार्थः । तथा च सामान्यप्रत्यासत्तेः आत्मसमवेतत्वाभावेन समवायिकारणप्रत्यासन्नत्वाभावात् युक्तस्तत्परिहारः इत्याहुः । तत्र क्रमः । तावता समवायिकारणप्रत्यासन्नपदसार्थक्येऽपि द्रव्यभिन्नपदवैय्यर्थ्यमेव । पटगतरूपं प्रति समवायिकारणस्य पटस्य स्वसमवेतत्वाभावात् । न च गुणसमवायिकारणं तन्तुरूपादि समवायिकारणप्रत्यासन्नमेव कारणमुपलब्धमिति तन्न्यायेन पटस्यापि स्वसमवायिकारणसमवेतस्य परम्परया समवायिकारणप्रत्यासन्नत्वात् युक्तातिव्याप्तिरिति वाच्यम् । समवायिकारणप्रत्यासन्नरूपविशेषणस्य गुणसमवायिकारणे गुणादावभावेनाव्याप्तिशङ्कायां तत्परिहाराय समवायिकारणसमवायिकारणप्रत्यासन्नत्वाङ्गीकारस्य प्रयोजने सति निमित्तानुसरणरूपत्वेन उक्तातिव्याप्त्यभिधानस्य निमित्तमस्तीति प्रयोजनापादनरूपतया योगेनातिव्याप्तिपरिहारायोगात् । किं च गुणकर्मरूपकारणगतसमवायिकारणस्य परम्परानन्तर्गतस्यैवासमवायिकारणतायाः दृष्टत्वेन परम्परान्तर्गतस्य तदापादनायोगः । किं च यदि भवद्व्याख्यानोक्तप्रकारेण समवायिकारणासमवायिकारणेति विवक्षा प्रथमत एव सिद्धा तर्हि तन्तुरूपाद्यव्याप्तिप्रसङ्गाभावेन व्याख्येयग्रन्थे उत्तरत्र तदाशङ्क्य निराकरणानुपपत्तिः । तत्र वक्ष्यमाणमेवाभिप्रेत्यैवात्र तदभिधानं इत्यपि न । मुरारिणा अत्र समवायिकारणेन प्रत्यासत्तिरिति व्याचक्षाणेन समवायिकारणसमवायिकारणप्रत्यासन्नत्वस्य समवायिकारणेन सह समवायरूपतया व्याख्यातत्वेन पटस्य च स्वेन सह समवायायोगेनातिव्याप्तिप्रतिपादनानुपपत्तेः । सहार्थस्य भेदघटितत्वात् । अन्यथा स्वव्याख्यानविरोधापातात् इति सङ्क्षेपः इति । यत्तु असमवायिकारणवादे नूतनकृते तत्र तत्रातिव्याप्तिपरिहाराय तत्तद्विशेषणोपादानेन लक्षणं कथितम्, तत्तु विशिष्टलक्षणानन्तरमपि । एवं चान्यत्रापि क्वचिच्चेत् अतिव्याप्तिः तदा तद्व्यावृत्त्यर्थं विशेषणान्तरोपादानं बोध्यमिति वदता स्वेनैव निराकृतप्रायमिति तन्निरासाय न यत्नं कृतवान् टीकाकारः ।

स०व्र०— ननु स्वकार्यद्रव्यानधिकरणवृत्तिभिन्नत्वे सति द्रव्यभिन्नत्वे सति अदृष्टाद्वारकात्म-मनस्संयोगाजन्यत्वे सति समवायिकारणप्रत्यासन्नमवधृतसामर्थ्यमसमवायिकारणमिति विवक्षितम् । अत्र तुरीतन्तुसंयोगे अतिव्याप्तिपरिहाराय पूर्वविशेषणम् । पटव्यावृत्त्यर्थं द्वितीयम् । व्याप्यबुद्ध्यादेर्व्यापकबुद्ध्यादिकं प्रति असमवायिकारणत्वपरिहाराय तृतीयम् । तत्कथमतिव्याप्तिदानमित्यत आह **एवमन्यत्राप्यतिव्याप्ति-रूहनीयेति** । लक्षणान्तरेऽप्युक्तन्यायेनातिव्याप्तिर्द्रष्टव्येत्यर्थः । तथा हि परमात्मक्षेत्रज्ञगतद्वित्वनिमित्तकारणी-भूतेश्वरापेक्षाबुद्धावतिव्याप्तेः, जन्यत्वे सतीति विशेषणे परमात्मक्षेत्रज्ञगतद्वित्वासमवायिकारणे परमात्म-क्षेत्रज्ञ-गतैकत्वे अनादिनित्ये अव्याप्तेः, संयोगविशेषरूपसङ्घहासाधारणकारणसंहेहे अतिव्याप्तेश्च । न च तस्यापि सङ्घहासमवायिकारणत्वमेव इति न तत्र अतिव्याप्तिरिति वाच्यम् । तस्य संयोगरूपत्वेन संयोग-कर्मान्यतरमात्रासमवायिकारणत्वाभावात् । ईश्वरापेक्षाबुद्धावतिव्याप्तिवारणाय ज्ञानवदवृत्तीतिविशेषणे आत्ममन-स्संयोगे अव्याप्तेः । मात्रपदप्रक्षेपे चात्मगतैकत्वे अव्याप्तेरिति दिक् ।

विट्ठल०— एवमन्यत्रापीति । तन्तुतुरीसंयोगादावित्यर्थः ।

॥ इति सृष्टेः समवाय्यादिकारणत्रयाधीनत्वस्य अप्रामाणिकत्वम् ॥

* * *

॥ अथ तत्र उक्तार्थसमर्थनम् ॥

९८ सु०— सङ्केतोऽयमाचार्यस्य, अतो नातीवात्र निर्बन्धः करणीय इति चेत्; एवं तर्हि निर्मूलैवेयं प्रक्रियेति सिद्धमेव ।

श्रीनिधि०— सङ्केतोऽयमिति । न तु लक्षणमित्यर्थः । **अतो नातीव निर्बन्ध इति** । अति-व्याप्त्यादिना दूषणोपायेनातीव यतितव्यमित्यर्थः ।

॥ इति उक्तार्थसमर्थनम् ॥

* * *

॥ अथ तत्रान्ते पाकजप्रक्रियायाश्च अप्रामाणिकत्वम् ॥

९९ सु०— पाकजप्रक्रियां चाप्रामाणिकीमङ्गीकुर्वन्ति । त(त्र)च्च वक्ष्यत इत्यलम् ॥

परि०— पाकजप्रक्रियामिति । पीलुपाकप्रक्रियामित्यर्थः । आमघटश्यामतादिकं घटेऽग्निसंयोगे सति नोदनादिवशेन जातकर्मणा कपालद्वयसंयोगनाशेन नश्यति । एवं कपालद्वयादिगतमपीत्यापरमाणु स्वस्वाश्रयद्रव्यनाशेन नश्यति । परमाण्वोस्तु नित्यत्वेन तच्छ्यामत्वादिकमेव नश्यति । पुनर्भोजकादृष्टवशादुत्पन्नरूपान्तरयोः संयोगे सति द्व्यणुकादिक्रमेण घटोत्पत्तौ तत्र पीतरूपाद्युत्पत्तिरिति । एवंरूपा प्रक्रिया न प्रमाणवतीत्यर्थः । ननु घटरूपादयः स्वाश्रयनाशादेव नश्यन्ति पार्थिवावयविरूपादित्वान्नष्टपटगतरूपादिवदित्यादिप्रमाणमस्तीत्यत आह **तच्च वक्ष्यत इति** । 'अनिवृत्तविनाशास्तु धर्मा उभयरूपका' इत्यादिव्याख्यानावसरेऽप्रामाणिकत्वं वक्ष्यत इत्यर्थः । **अनियमप्रमाणानां साक्ष्यादीनां बाधकोद्धारः ॥**

यादु०— 'विमताः पार्थिवावयविरूपादयः स्वाश्रयविनाशादेव नश्यन्ति अवयविरूपादित्वाद्दग्धपटरूपादिवत् । कारणगुणेभ्य एवोत्पद्यन्ते तत एवे'त्यादिप्रमाणानां पीलुपाकप्रक्रियायां सत्त्वात् कथमप्रामाणिकत्वं प्राकजप्रक्रियाया इत्यत आह **तच्च वक्ष्यत इति** । 'अनिवृत्तविनाशास्तु धर्मा उभयरूपका' इत्यनुव्याख्याव्याख्यावसर इति शेषः ।

वं०प०— तच्चेति । अप्रामाणिकत्वमित्यर्थः ।

श्रीनिधि०— तच्चेति । पाकजप्रक्रियाया अप्रामाणिकत्वमित्यर्थः । **वक्ष्यत इति** । भिन्नाश्च भिन्नधर्माश्चेत्यादाविति शेषः ।

शे०वा०— पाकजप्रक्रियामिति । घटादेरामद्रव्यस्याग्निना सम्बद्धस्याग्न्यभिघातान्नोदनाद्वा तदारम्भकेषु परमाणुषु कर्माण्युत्पद्यन्ते । तेभ्यो विभागः, विभागेभ्यः संयोगविनाशाः, संयोगविनाशेभ्यः कार्यं द्रव्यं विनश्यति । तस्मिन्विनष्टे परमाणुष्वग्निसंयोगादौष्ण्यापेक्षाच्छ्यामादीनां विनाशः पुनरन्यस्मादग्निसंयोगादौष्ण्यापेक्षात्पाकजा जायन्ते । तदनन्तरं भोगिनामदृष्टापेक्षादात्माणुसंयोगादुत्पन्नपाकजेष्वणुषु कर्मोत्पत्तौ तेषां परस्परसंयोगाद् द्व्यणुकादिप्रक्रमेण कार्यद्रव्यमुत्पद्यते । तत्र च कारणगुणक्रमेण रूपाद्युत्पत्तिर्भवतीति पाकजप्रक्रियामित्यर्थः । **अप्रामाणिकीमिति** । उक्तेऽर्थे प्रमाणाभावादिति भावः । ननु नोदनाद्युत्पत्तौ कर्मोत्पत्तिः प्रमाणम् । कर्मसु विभागास्तेषु पूर्वसंयोगानिवृत्तिस्तत्र कार्यद्रव्यविनाशास्तत्र पूर्वरूपादिपरावृत्तिस्तथा रूपाद्यन्तरोत्पत्तिः स्थूलद्रव्योत्पत्तौ प्रमाणम् । सा तावदवयवपरम्परायाम् । सा द्व्यणुके । तदुत्पत्तिः परमाणुसंयोगे । स च तत्क्रियायाम् । साऽदृष्टवदात्मसंयोग इति कथमुक्तप्रक्रियायां अप्रामाणिकत्वमित्यत आह **तत्र वक्ष्यत इति** । परमाणुष्विव कार्यद्रव्येषु पूर्वरूपादिनिवृत्तेरपूर्वरूपाद्युत्पत्तेरुपपत्तेर्न विवक्षितार्थसिद्धिरिति 'अनिवृत्तविनाशास्तु धर्मा उभयरूपका' इत्येतद्व्याख्यावसरे वक्ष्यत इत्यर्थः । ननु पार्थिवावयविरूपादयः

स्वाश्रयविनाशादेव विनश्यन्ति अवयविरूपादित्वाद्दग्धरूपादिवत् । कारणगुणेभ्य एवोत्पद्यन्ते तत एव तद्वदेवेति आश्रयनाशेनैव नाशस्य कारणगुणेभ्य एव चोत्पत्तेश्च सिद्धिर्भविष्यतीत्यत आह **अलमिति** । तदर्थस्तु क्वचित्सत्याश्रयेऽपि विनाशेऽग्निसंयोगजत्वे च विरोधाभावात् । अन्यथा कार्यद्रव्यं संयोगनाशादेव नश्यति कार्यद्रव्यत्वाद् द्व्यणुकवदित्यादिकमपि स्यादिति ।

वा०र०— पार्थिवपरमाणुरूपादीनां अपाकजोत्पत्तिविधानमिति प्रतिज्ञाय पटादेरामद्रव्यस्येत्यादि प्रशस्तपादभाष्योक्तरीत्या 'अनिवृत्तविनाशास्तु धर्माः उभयरूपकाः' इत्युत्तरानुव्याख्यानव्याख्यानावसरे मूले पाकजप्रक्रियास्वरूपोपवर्णनादि करिष्यते । उक्तप्रकारेणैव पाकजप्रक्रियास्वरूपप्रदर्शनपूर्वकं तदप्रामाणिकत्वं उपपादयति **घटादेरामद्रव्यस्येत्यादिना इत्यादिकमपि स्यादित्यन्तेन** । पाकजप्रक्रियादिव्याख्यानम् उदाहृतोत्तरमूलव्याख्यावसरे टीकायां स्पष्टम् । तर्हि व्याख्याने अस्मदुपपादितरीत्या अधिकं च ज्ञेयम् । तत्र तदा पटरूपादिवदिति पाठः । उत्तरमूले तथैवोक्तेः । **इत्यादिकमपीति** । ततश्च समवायिकारणनाशेन कार्यनाशः इति उच्छिद्येत इति भावः ।

विट्ठल०— आमघटादेरग्निसंयोगे आपरमाण्वलं विनाशे पुनः द्व्यणुकादिक्रमेणोत्पत्तिरिति प्रतिपादकप्रक्रिया कथमप्रामाणिकी विमताः पार्थिवावयविरूपादयः स्वाश्रयविनाशादेव नश्यन्ति । अवयविरूपादित्वात् नष्टपटगतरूपादिवदित्यादि प्रमाणमस्तीत्यत आह **तत्र वक्ष्यत इति** । अनिवृत्तविनाशास्तु धर्मादुभयरूपका इत्येतद्व्याख्यानावसर इत्यर्थः ।

॥ इति पाकजप्रक्रियायाश्च अप्रामाणिकत्वम् ॥
॥ इति तैः कल्पितानां सृष्टीतरविषयाणामप्यप्रामाणिकत्वम् ॥

* * *

॥ अथ च तद्वितीयशङ्कानिराकरणान्ते अनियमसृष्टेः साक्षिमितत्वसमर्थनम्
(तत्र शङ्का तत्समाधानं च) ॥
॥ अथ तत्रादौ परमाण्वादेः साक्षिमितत्वाभावे अप्रामाणिकत्वापत्तिः ॥

१०० सु०— ननु परमाणुद्व्यणुके एव तावन्न साक्षिसिद्धे कुतस्तदीयारम्भप्रकारः । तत्कथमुक्तं 'साक्षिमितस्ये'ति । तत्राह यदीति ।

अनु०— यदि साक्षिमितं नैतत्

एतदिति । परमाण्वादिकम् । 'तर्हि तदप्रामाणिकमेवापद्यत' इति शेषः ।

यादु०— किं परमाण्वादिकमेवेति । शब्दोऽनित्यो नित्यत्वं शब्दवृत्ति, पर्वतो वह्निमान् वह्निः पर्वतवृत्तिरित्युभयथाऽपि प्रयोगदर्शनादेवं विकल्पोपपत्तिरिति ध्येयम् । (प्रकृते तु पारिमाण्डल्यं किञ्चिद्द्रव्यवृत्तीति प्रयोगे द्रव्यरूपं यत्साध्यं तस्यैव साध्यस्य तद्विपरीते द्रव्यं पारिमाण्डल्यवदिति प्रयोगे पक्षत्वादिति भावः । साध्यस्यैव पक्षत्वात्) । तथा च विवादास्पदं द्रव्यं पारिमाण्डल्यवत् द्व्यणुककारणत्वाद्व्यतिरेकेण त्र्यणुकादिवदिति प्रयोगो द्रष्टव्यः । एवं द्व्यणुकसाधनायापि ह्रस्वत्ववत् त्र्यणुककारणत्वादिति प्रयोक्तव्यम् ।

शे०वा०— ननु यदीत्युत्तरभाष्यमनर्थकम् । न च परमाण्वादेः साक्षिसिद्धत्वोपपादनार्थमेतदिति वाच्यम् । तत्साधनस्यापि प्रकृते उपयोगादर्शनादित्यतः साक्षिमितस्यास्येति प्रागुक्तस्यानियमेन तदारम्भकप्रकारस्य परमाणोः साक्षिसिद्धतामन्तरेणानुपपत्तेस्तदुपपादनार्थत्वान्न तदिति भावेन तत्समर्थनपरतयोत्तरभाष्यं योजयितुं तदनुपपत्तिशङ्कामुत्थापयति **नन्विति** । पूर्वोत्तरवाक्ययोरसङ्गतिपरिहाराय वाक्यभेदेन योजयितुमपेक्षितपूरणेन पूर्वस्य वाक्याभासतां परिहरति **तर्हीति** ।

वा०र०— पूर्वोत्तरवाक्ययोरिति । 'यदि साक्षिमितं नैतत्' इत्येकं 'नानुमानं तत्र वर्तते' इत्यपरम् । तयोरित्यर्थः ।

॥ इति परमाण्वादेः साक्षिमितत्वाभावे अप्रामाणिकत्वापत्तिः ॥

* * *

॥ अथ चान्ते परमाण्वादौ अनुमानप्रामाण्याभावः ॥
॥ अथ तत्र कस्यापि पक्षीकर्तुमशक्यता ॥

१०१ सु०— स्यादेतत् । यद्यपि 'महत्त्वाभावान्न परमाण्वादिकं चक्षुरादेर्गोचरः । बहिरस्वातन्त्र्यान्मनसोऽपि । आगमादि तु नानुमानाद्विद्यते, भेदेऽप्यतीन्द्रिये सङ्केतानुपपत्तेर्नागमस्य विषयः ।' तथाऽप्यनुमानं तत्र (प्रमाणं) भविष्यति । तत्कथं परमाण्वादेः साक्षिवेद्यत्वाभावेऽप्रामाणिकत्वापत्तिरित्यत आह नेति ।

अनु०— नानुमा तत्र वर्तते ।

वं०प०— नानुमानादिति । यथाऽऽहुः कणादसुगतौ 'पुनरनुमानं च तच्चे'ति । **तत्र** परमाणुसद्भावे ।

कं०रा०— आगमादीति । वैशेषिकमते शब्दस्यार्थापत्त्यादेश्चानुमानविधयैव प्रमाणत्वादागमादेरनुमानाद्भेदाभाव इति भावः । **भेदेऽपीति** । आगमस्यानुमानाद्भेदेऽप्यतीन्द्रिये परमाण्वादौ तदुपस्थित्यभावेन शब्दसङ्गतिग्रहणानुपपत्तेर्न परमाण्वादिकमागमस्य विषय इत्यर्थः ।

श्रीनिधि०— अतीन्द्रिये सङ्केतानुपपत्तेरिति । वृद्धव्यवहारादिना सङ्केतो ग्राह्यः । न चातीन्द्रिये तस्य सम्भव इति भावः ।

शे०वा०— अप्रामाणिकत्वप्रसञ्जनेन साक्षिसिद्धतायाः परमाण्वादेः पूर्वेणैव सिद्धेर्नानुमेत्युत्तरभाष्यमनर्थकम् । न चानुमानिकत्वेन प्रामाणिकत्वसम्भवादप्रामाणिकत्वाभावो भविष्यतीत्यप्रयोजकताशङ्कानिरासाय आनुमानिकत्वाभावोपपादनार्थं तदिति वाच्यम् । तावताऽनुमानिकत्वाभावमात्रप्राप्तावपि प्रात्यक्षिकत्वागमिकत्वाद्यभावासिद्ध्या प्रत्यक्षसिद्धतयाऽऽगमोपमानादिसिद्धतया वा प्रामाणिकत्वसम्भवशङ्कानिरासायाप्रत्यक्षत्वादेरपि वक्तव्यतया आनुमानिकत्वाभावमात्राभिधानस्यानुपपन्नत्वादित्यतः तन्निरासस्याल्पायाससाध्यत्वाच्छिष्यैरेव तन्निरासः कर्तुं शक्यत इति भावेन तदनिराकृत्य आनुमानिकत्वमात्रनिरासोपपत्तेरिति भावेन प्रमाणान्तरनिरासं स्वयं दर्शयन्नानुमानिकत्वादप्रामाणिकत्वानुपपत्तिशङ्कामुत्थापयति **स्यादेतदिति** । परमाण्वादेः प्रत्यक्षतां वदन् प्रष्टव्यः । किं बाह्यप्रत्यक्षत्वं तस्याभिमतं किं वा आन्तरप्रत्यक्षत्वमिति विकल्पद्वयं मनसि निधाय महत्त्वसमानाधिकरणोद्भूतरूपवत्त्वाभावान्न प्रथम इत्याह **यद्यपीति** । यद्यपि 'महत्त्वं च परमाणावणावपी'ति परमाण्वादेर्महत्त्वस्य व्युत्पादितत्वान्न तदभावककथनं सङ्गतं, तथाऽपि स्वमताभिनिवेशेनेदमुक्तमित्यवधेयम् । द्वितीयं प्रत्याह **बहिरिति** । न गोचर इति वर्तते । बहिरर्थविशेषणके तद्विशेष्यके वा प्रत्यये मनसोऽस्वातन्त्र्यान्न मनसो गोचर इत्यर्थः । यद्यपि स रामः श्यामो युवा चेत्यादिज्ञानान्तरोपनीतबहिरर्थविशेष्यकमानसप्रत्ययस्य रामं स्मरामीत्यादिज्ञानान्तरोपनीतबहिरर्थविशेषणस्य मानसप्रत्ययस्य च दर्शनाज्ज्ञानान्तरोपनीतबहिरर्थविशेषणके तादृशबहिरर्थविशेष्यके वा प्रत्यये मनसः सामर्थ्याज्ज्ञातः परमाणुरिति ज्ञानान्तरोपनीतबहिरर्थपरमाण्वादिविशेष्यकः प्रत्ययः परमाणुमहं जानामीति तादृशपरमाण्वादिविशेषणकप्रत्ययो वा मानसो भविष्यत्येव; तथाऽपि मनोमात्रगोचरत्वात् परमाण्वादेर्ज्ञानविषयत्वासम्भवात् रूपाद्युपलब्धिकारणचक्षुरादिवत् ज्ञानकारणमनसो ज्ञानविषयतानैरपेक्ष्येण तद्विशेष्यके बहिरर्थविशेषणके वा प्रत्यये सामर्थ्यं नास्तीति भावेनैतदभिधानमित्यवधेयम् । अस्तु तर्ह्यागमादिकमेव तत्र मानमित्यत आह **आगमादि त्विति** । आदिपदेनोपमानादिपरिग्रहः । वाक्यादेर्वाक्यार्थादावनुमानतया प्रमाणत्वमिति वैशेषिकमतमाश्रित्येदमुक्तम् । नैयायिकमतमाश्रित्याह **भेदेऽपीति** । **सङ्केतानुपपत्तेरिति** । आगमात् तदवगमे सति तत्र सङ्केतग्रहसिद्धिः तत्सिद्धौ च अवगतसमयादागमात् तदवगम इत्यन्योन्याश्रयापत्तेरित्यर्थः ।

वा०र०— आगमिकत्वादीत्यादिपदेन औपमानिकत्वादेः परिग्रहः । उपमानादिसिद्धतया वा यः प्रामाणिकत्वसम्भवः तत् शङ्केति योजना । **अप्रत्यक्षत्वादेरिति** । अप्राप्तसाक्षिकत्वादेरित्यर्थः ।

निरासोपपत्तेरिति । तदनिराकृत्य यः आनुमानिकत्वनिरासः तदुपपत्तेः इति योजनान्नासमानकर्तृत्व-शङ्कानवकाशः । **आनुमानिकत्वादिति** । या आनुमानिकत्वानुपपत्तिः इति या शङ्का तामिति योजना । **इदमुक्तमिति** । परेणेति शेषः । **सन्निधानात् गोचर इति** । एता इति अनुवर्तत इति भ्रान्तिवारणा-योपयोगानुसारेणानुवृत्तिविषयं दर्शयति **न गोचर इत्यनुवर्तत इति** । **तद्विशेष्यक इति** । बहिरर्थविशेष्यक इत्यर्थः । मनसो बहिः अस्वातन्त्र्यं किं बहिरर्थविशेष्यके प्रत्यये उताबहिरर्थविशेषणके प्रत्ययेनोभयमपि सम्भवति इत्याक्षिपति **यद्यपि स राम इति** । इत्यादि इत्यादिपदेन लोहितार्थः दीर्घबाहुः इत्यादेः परिग्रहः । यो मानसप्रत्ययः तस्येति स्थलद्वयेऽपि इत्यादीत्यस्य मानसप्रत्यक्षविशेषणत्वम् । एतत् स्पष्टनीयमस्ति । **नानुमानाद्विद्यत इति** मूलम् । ततश्च नागमादेः विषय इति वक्ष्यमाणाकर्षणेन योज्यम् । **भेदेऽपीति** । यद्यत्रागमादेः इत्यनुवृत्तेः आवश्यकतया आगमादेः अनुमानात् भेदेऽपि इत्यर्थसिद्धौ अतीन्द्रिय इत्यनेनागम-मात्रदूषणायोगः इत्याभाति । तथापि उपलक्षणयोपमानादेः सादृश्यादिविशेषमिष्टस्यात्रासम्भव इत्यभिप्रायाद्वा स्पष्टदूषणत्वेन तद्दूषणाभावाभिप्रायाद्वा मूले आगममात्रनिराकरणोपपत्तेः । उक्तमूलानुसारेण टीकापि प्रवृत्तेति नाधिकं तत्रोक्तमिति न दोषः ।

विठ्ठल०— नानुमानादिति । कणादिमते आगमस्य वाच्यार्थानुमापकतया अनुमानान्तर्भावोऽङ्गी-कारादिति भावः ।

* * *

॥ अथ तत्रादौ परमाण्वादेः पक्षीकर्तुमशक्यता ॥

१०२ सु०— कथमिति चेत्; किं परमाण्वादिकमेव पक्षीकृत्य तत्साध्यते, उतान्यत् ।

श्रीनिधि०— परमाण्वादिकमेवेति । आदिपदेन द्व्यणुकम् । एवञ्च परमाणुं पक्षीकृत्य परमाणुः साध्यते । द्व्यणुकं पक्षीकृत्य द्व्यणुकमित्यर्थः । एवमत्र प्रयोगः । परमाणुः प्रमाविषयः द्व्यणुकं च तथा वस्तुत्वादिति ।

शे०वा०— किं परमाण्वादिकमिति । विप्रतिपन्नं परमाण्वादिकमेवेत्यर्थः । विप्रतिपन्नस्य वह्न्यादेरेव वह्निः पर्वतवृत्तिरिति स्वपक्षीकारेण, पर्वतो वह्निमानित्यन्यपक्षीकारेण च साधनदर्शनाद्विप्रतिपन्नपरमाण्वादि-पक्षीकारेण तत्साधनस्यान्यपक्षीकारेण तत्साधनपक्षस्य च प्रसक्तिसम्भवाद्विकल्पोपपत्तिरित्यवधातव्यम् । **उतान्यदिति** । परमाण्वाद्यन्यदित्यर्थः ।

वा०र०— मूले किं परमाण्वादिकमेव पक्षीकृत्येवेत्युक्तं साध्यस्यैव पक्षीकरणपक्षसंवादेन सम्भावयति **विप्रतिपन्नस्येत्यादि** । पर्वतवृत्तिसाध्यतद्वृत्तिनिश्चितधर्मव्यापकत्वात् यो यद्वृत्तिनिश्चितधर्मव्यापकः स तद्वृत्तिः

घटवृत्तिकृतकत्वव्यापकानित्यवदिति प्रयोगो विज्ञेयः । परमाणुपक्षकस्तु परमाणुः द्व्यणुकप्राक्कालेऽस्ति येन विनाऽनुपपद्यमानतत्कार्यकत्वात् । घटादितः प्राक्कालीनदण्डादिवदित्यादि कथञ्चित् ज्ञेयः । **वक्ष्यति चानुमा दूरनिरस्तेति** मूले । एवं द्व्यणुकपक्षप्रयोगोऽपि ज्ञेयः ।

स०ना०— किं परमाण्वादिकमेवेति । किं द्व्यणुकसाधनाय परमाणुः परमाणुसाधनाय च द्व्यणुकं पक्षीक्रियते उतान्यदित्यर्थः । **सिद्धत्व इति** । प्रमाणान्तरेण परमाणुद्व्यणुकयोः सिद्धत्वे द्व्यणुकरूपसाध्यस्य सिद्धत्वेन परमाणोः पक्षलक्षणाभावः परमाणोः सिद्धत्वेन द्व्यणुकस्य पक्षलक्षणाभाव इत्यर्थः । **असिद्धत्व इति** । व्याप्तिग्रहासम्भवेन न्यायविषयत्वादित्यर्थः ।

विट्ठल०— किं परमाण्वादिकमिति । विमतं परमाण्वाख्यं द्रव्यं पारिमाण्डिल्यवत् द्व्यणुक-कारणत्वाद्व्यतिरेकेण द्व्यणुकवत् एव द्व्यणुकं ह्रस्वत्वोपेतं त्र्यणुककारणत्वादिति साध्यते वा । द्व्यणुकं सकारणकं कार्यत्वादित्यादिकं वेत्यर्थः ।

* * *

॥ अथ च तत्र पक्षीकृतपरमाणोः सिद्धासिद्धत्वविकल्पेन हेतोरप्रयोजकत्वशङ्का तन्निरासश्च ॥

१०३ **सु०— आद्ये तत्प्रमाणान्तरतः सिद्धं न वा । पक्षद्वये दोषमाह पक्षीकर्तुमिति ।**

अनु०— पक्षीकर्तुमशक्यत्वात्कुत एवानुमा भवेत् ।

सिद्धत्वे पक्षलक्षणाभावादसिद्धत्वे न्यायाविषयत्वात् परमाण्वादेः पक्षीकर्तु-मशक्यत्वात्, तत्पक्षीकारेण अनुमा दूरनिरस्तेति ।

परि०— पक्षलक्षणाभावादिति । सन्दिग्धसाध्यधर्मविशिष्टत्वस्य पक्षलक्षणत्वादिति भावः । **न्यायाविषयत्वादिति** । सन्दिग्धस्यैव न्यायविषयत्वादिति भावः ।

गु०दी०— सिद्धत्वे पक्षलक्षणाभावात् इत्यत्र **यथा** प्रत्यक्षसिद्धं पर्वतं पक्षीकृत्य तदसिद्ध-मग्न्यादिकं सन्दिग्धत्वात्साध्यते । पर्वतस्यैवास्तित्वं न साध्यं पर्वतसिद्धौ तस्यापि सिद्धत्वेन सन्देहासम्भवात् । एवं परमाणुसिद्धौ तदस्तित्वमपि सिद्धमेवेति सन्देहाभावात् तदेव साधयितुं न शक्यमिति भावः ।

वं०प०— तत् परमाण्वादिकम् ।

कं०रा०— सिद्धत्व इति । साध्यमानपरमाण्वादेः सिद्धत्वे सन्दिग्धसाध्यकत्वरूपपक्षलक्षणाभावादसिद्धत्वे तु परमाण्वादिपक्षीकारेणैव तत्साधनस्य क्रियमाणत्वादनुपलब्धस्य च न्यायप्रवृत्तावाश्रयत्वायोगादुभयथापि परमाण्वादेः पक्षीकरणमशक्यमिति भावः ।

श्रीनिधि०— तत्प्रमाणान्तरत इति । तदिति परमाणुद्व्यणुके सामान्यतः परामृशति । **सिद्धत्व इति** । प्रमितत्व इत्यर्थः । **पक्षलक्षणाभावादिति** । सन्दिग्धसाध्यधर्माधर्मिपक्ष इति तल्लक्षणम् । न च साध्यसिद्धौ तत्सम्भवतीत्यर्थः । **न्यायाविषयत्वादिति** । हेत्वविषयत्वादित्यर्थः । न ह्यप्रमितपक्षसम्बन्धं साध्यस्य हेतुर्बोधयितुमलमिति भावः ।

शे०वा०— पक्षलक्षणाभावादिति । सिद्धधर्मविशिष्टत्वेन साध्यधर्मविशिष्टत्वाभावात् साध्यधर्मविशिष्टस्यैव पक्षत्वादिति भावः । **न्यायाविषयत्वादिति** । सन्दिग्धस्यैव च न्यायविषयत्वादिति भावः ।

वा०र०— सिद्धधर्मविशिष्टत्वेनेति । परमाणुर्हि सिद्धयन् द्व्यणुककारणतयैवेति प्राक्कालस्य सिद्धत्वात् सन्दिग्धसाध्यकत्वाभावः इति ज्ञेयम् । पक्षदूषण एव भारसत्त्वात् दोषान्तरसङ्करेऽपि न दोष इति मूलेऽभिप्रेतमिति ज्ञेयम् । मूले आशङ्कितमणुपरिमाणतारतम्यमित्येतदनुमानं किरणावल्यां अपरमाह अणुपरिमाणतारतम्यमित्यादिनानूद्य निराकृतं ज्ञेयम् । तत्र यद्यपि परमाणुसिद्धौ महत्त्वविरुद्धाणुपरिमाणसिद्धिः तत्सिद्धौ च परमाणुसिद्धिरिति अन्योन्याश्रयरूपमेव दूषणमभिहितम् । तथापि परिमाणापकर्षः अणुपरिमाण इति पक्षे तदुक्तदूषणाप्रसरात् स्वयं विकल्पपूर्वकं पक्षान्तरस्यापि दूषणं कृतम् । अत एव 'यथा महत्त्वं विश्रान्तिस्तथे'ति वाक्यव्याख्यावसरे प्राक्परिमाणशब्दः तदुत्कर्षापकर्षपरतया व्याख्यातः प्राक्निराकृतस्य पुनरत्र कुतः आशङ्केति न वाच्यम् । अपकर्षे विश्रान्तिसाधनाय तत्राशङ्का । अत्र पुनः परमाणुसाधनायेति न दोष इत्यादि ज्ञेयम् । यद्यपि चाणुत्वं सजातीयेत्यादि वर्धमानीयं तात्पर्यमपि अत्र पूर्वत्रेवाशङ्क्य निराकार्यम् । तथापि तत्राधिकवक्तव्याभावात् न तथा कृतमिति वदन्ति ।

विट्ठल०— पक्षलक्षणाभावादिति । सन्धिदिवधस्यास्यैवध्यस्येव(?) पक्षत्वादिति भावः । **न्यायाविषयत्वादिति** । बुद्धावनारूढस्यानुमित्यविषयत्वादिति भावः ।

चषक— पक्षलक्षणाभावात् विशेष्यताप्रत्यासत्त्या साध्यसन्देहवत्त्वरूपलक्षणाभावात् ।

१०४ **सु०— ननु पक्षीकरणासम्भवे कथमनुमानानुपपत्तिरित्यत आह यत्रेति ।**

अनु०— यत्र नास्ति पदन्यासः कस्तं विषयमाप्नुयात् ।

'यथा तथे'त्यध्याहर्तव्यम् । यत्र यद्विषये । विषयं देशम् ।

यथा हि विषयप्राप्तेः पदन्यासः कारणम्, स्थाण्वस्थाणुसंयोगस्यास्थाणुक्रिया-हेतु(क)त्वात्; अतः पदन्यासाभावे विषयप्राप्तिरपि नास्ति; तथाऽनुमोत्पत्तौ पक्षीकरणं कारणम् । न हि पर्वतादिर्वा वह्न्यादिर्वा अनुमानस्य विषयः, किन्तु तत्सम्बन्धः । न च सम्बन्धिज्ञानेन विना सम्बन्धज्ञानं सम्भवति । अतः पक्षीकरणाभावे नानुमानो-त्पत्तिः सम्भवतीति ।

परि०— स्थाण्विति । अचलवस्तूपलक्षणम् । देशस्याप्यचलत्वात् । कारणमित्युक्तं व्यनक्ति **न हीत्यादिना** ।

गु०दी०— स्थाण्वस्थाणुसंयोगस्यास्थाणुक्रियाहेतुत्वात् इत्यत्र क्रियाहेतुर्यस्येति बहुव्रीहि-समासः ।

यादु०— स्थाण्विति । स्थावरेत्यर्थः ।

कं०रा०— देशप्राप्तिप्रतिपदनिष्ठक्रियायाः कारणत्वे हेतुमाह **स्थाण्विति** । स्थावरास्थावरसंयोग-स्यास्थावरनिष्ठक्रियाजन्यत्वादित्यर्थः ।

श्रीनिधि०— ननु पदन्यासाभावेऽपि श्येनस्य स्थाणुदेशप्राप्तिदर्शनात् कथमेवं उच्यत इत्यतः पदन्यास इत्येतत् देशान्तरप्राप्तिहेतुक्रियामात्रोपलक्षणमिति भावेनान्वयमुपपादयति **स्थाण्वस्थाणुसंयोगस्येति** । अस्थाणुक्रियाहेतुत्वादिति बहुव्रीहिः । अस्थाणुक्रियाहेतुकत्वादित्यर्थः । **न हि पर्वतादिर्वा वह्न्यादिर्वेति** । उभयोरपि सिद्धत्वादिति भावः ।

शे०वा०— स्थाण्विति । स्थाणुश्येनादिसंयोगस्येत्यर्थः । **अस्थाण्विति** । श्येनादिक्रियाहेतुक-त्वादित्यर्थः ।

विट्ठल०— स्थाण्विति । स्थाणुपदेनाचलं विवक्षितम् । देशस्याचलत्वेन तत्संयोगश्चलपदक्रियाहेतुक इत्यर्थः । कारणमित्युपपादयति **न हीति** । पर्वतमात्रस्य वह्निमात्रस्य च स्वरूपतासिद्धत्वादित्यर्थः ।

॥ इति पक्षीकृतपरमाणोः सिद्धासिद्धत्वविकल्पेन हेतोरप्रयोजकत्वशङ्का तन्निरासश्च ॥

॥ इति परमाण्वादेः पक्षीकर्तुमशक्यता ॥

* * *

॥ अथ च तत्रान्ते परमाण्वितरस्यापि पक्षीकर्तुमशक्यता ॥
॥ अथ तत्रादौ द्व्यणुकस्य असिद्धत्वात् पक्षीकर्तुमशक्यता ॥

१०५ **सु०— द्वितीयमपि निराकरोति पक्षीकर्तुमिति ।**

द्व्यणुकं हि पक्षीकृत्य परमाणुरनुमातव्यः, 'कार्यमेवात्र प्रमाणमि'त्युक्तत्वात् । तच्चेदानीमप्यसिद्धमिति पक्षीकर्तुमशक्यत्वात् कुत एव तत्कारणपरमाण्वनुमा भवेत् ।

परि०— द्वितीयमपीति । उतान्यदिति पक्षमित्यर्थः । **उक्तत्वादिति** । तार्किकैरिति योज्यम् ।

शे०वा०— द्वितीयमिति । अन्यदिति द्वितीयमित्यर्थः । कुतो द्व्यणुकमेव पक्षीकृत्य परमाणुरनुमातव्य इत्यतोऽत्र 'कार्यमेव प्रमाणं भविष्यतीत्याशयवता नेह प्रमाणान्तरमादर्शितमि'ति किरणावलीकारवाक्यं प्रमाणयति **कार्यमेवात्रेति** । किरणावल्यां परमाणुलक्षणा नित्येति प्रशस्तपादभाष्यवाक्यव्याख्यानावसर इत्यर्थः । **इदानीं** परमाणुसाधनावसरे ।

स०ना०— द्व्यणुकं हि पक्षीकृत्येति । पूर्वाचार्यानुसारिणा द्व्यणुकं हि पक्षीकृत्य, परमाणुरनुमातव्यः । ततश्च अन्यदेव पक्षीक्रियत द्वितीयपक्षाङ्गीकारो न युक्त इत्यर्थः । अस्तु तद्व्यणुकमेव पक्ष इत्यत आह **तच्चेदानीमपीति** ।

विट्ठल०— उक्तत्वादिति । वैशेषिकैरिति शेषः ।

॥ इति द्व्यणुकस्य असिद्धत्वात् पक्षीकर्तुमशक्यता ॥

* * *

॥ अथ च तत्रान्ते अनुमितद्व्यणुकस्यापि पक्षीकर्तुमशक्यता ॥
॥ अथ च तत्र द्व्यणुकसाधकानुमानेऽपि कस्यापि पक्षीकर्तुमशक्यता ॥

१०६ **सु०— अनुमितं द्व्यणुकं पक्षीकृत्य परमाणुरनुमास्यत इति चेन्न ।**

श्रीनिधि०— द्व्यणुकं पक्षीकृत्येति । द्व्यणुकं स्वापेक्षया स्वल्पपरिमाणद्रव्यारब्धं कार्यत्वादिति प्रयोगो द्रष्टव्यः ।

* * *

॥ अथ च तत्रादौ द्व्यणुकसाधकानुमानेऽपि परमाणोः पक्षीकर्तुमशक्यता ॥

१०७ सु०— तदपि हि परमाणुं पक्षीकृत्य यदि साध्यते तदोक्त एव दोष इत्याह पक्षीकर्तुमिति । अद्याप्यसिद्धस्य परमाणोः पक्षीकर्तुमशक्यत्वात् कुत एव तत्कार्य-द्व्यणुकानुमा भवेत् ।

श्रीनिधि०— परमाणुं पक्षीकृत्येति । परमाणुस्वापेक्षयाधिकपरिमाणद्रव्यारम्भकः । आनन्त्यावयवि अविभुद्रव्यत्वात् । मृत्पिण्डादिवदित्यत्रापि प्रयोगो द्रष्टव्यः । **कुत एव तत्तत्कार्यद्व्यणुकानुमा भवेदिति** । अन्यथा अन्योन्याश्रयः स्यादिति भावः ।

शे०वा०— किमत्र परमाणुमेव पक्षीकृत्य द्व्यणुकानुमानमभिमतं किंवा त्र्यणुकमिति विकल्पं मनसि निधायाद्यमनूद्य दूषयति **तदपि परमाणुं पक्षीकृत्येति** ।

* * *

॥ अथ तत्र 'अनुमानेन परमाणुसिद्धि'शङ्का तन्निरसनं च ॥

१०८ सु०— 'नन्वणुपरिमाणतारतम्यं क्वचिद्विश्रान्तं परिमाणतारतम्यत्वान्महत्परि-माणतारतम्यवदि'त्यनुमानेन परमाणुसिद्धिर्भविष्यतीति चेन्न, विकल्पानुपपत्तेः । अणु-परिमाणशब्देन किं परिमाणापकर्षोऽभिधीयते, किंवा परमाणुपरिमाणम्, यद्वा द्व्यणुक-परिमाणम्, यदि वोभयपरिमाणम् । नाद्यः, दूषितत्वात् । उत्तरपक्षत्रयं दूषयति पक्षी-कर्तुमिति । परमाणुद्व्यणुकयोरसिद्धौ तत्परिमाणस्याप्यसिद्धेः, एकैकत्र तारतम्यस्य अभावाच्चेति भावः ।

परि०— विकल्पानुपपत्तेरिति । विकल्पे कृते कस्यापि विकल्पस्योपपत्तेरभावादित्यर्थः । दूषितत्वादिति । 'न महत्त्वस्यापि विश्रमः' इत्यादिना साध्यवैकल्यबाधादिना दूषितत्वादित्यर्थः । **एकैकत्र तारतम्यस्येति** । परमाणौ द्व्यणुके वैकैकत्रेत्यर्थः । तथा चाश्रयासिद्धिरिति भावः ।

वं०प०— एकैकत्रेति । परमाणुपरिमाणतारतम्यं द्व्यणुकपरिमाणतारतम्यमिति वा साधने एकैकत्र एकैकनिष्ठे परिणामे तारतम्याभावादित्यर्थः ।

श्रीनिधि०— एकत्र तारतम्याभावाच्चेति । अणुपरिमाणशब्देन परमाण्वादि परिमाणमभिधीयत इति पक्षे इदं दूषणम् । तरतमभाव अनेक व्यक्तिवृत्तिः परमाण्वादि परिमाणमात्रस्य पक्षीकरणात् परमाण्वाद्यन्तरे च परिमाणसाम्यम् । एवञ्च परिमाणतारतम्यघटितसाध्यस्य बाध इति भावः ।

शे०वा०— महत्परिमाणतारतम्यवदिति । अत्र महतो द्रव्यस्य परिमाणं महत्परिमाणमिति व्यधिकरणसमासोऽभिप्रेतः । तेन आन्महत इत्येष विधिरत्र न प्राप्नोति । तस्य सामानाधिकरण्य एवात्व-विधायकत्वादत्र च तदभावादिति भावः । **दूषितत्वादिति** । केयं क्वचिद्विश्रान्तिः किमियत्तापरिच्छेदः किंवा क्वचिद्द्रव्ये वृत्तिरिति विकल्प्य 'न महत्त्वस्य विश्रमः । दृश्यतेऽनन्त इत्येव तथाऽऽनन्त्यमणावपी'त्यादिनेति शेषः । **असिद्धेरिति** । तथा चाश्रयासिद्धिरिति भावः । **एकैकत्रेति** । परमाणुपरिमाणमात्रे द्व्यणुकपरमाणुमात्रे चेत्यर्थः । तथा च स्वरूपासिद्धिरपीति भावः ।

वा०र०— 'न महत्तत्त्वगुणतः' इत्येतत्पूर्वानुव्याख्यानमूलस्थविचारानुसारेण परममहत्परिमाणवा-नित्येतद्व्याख्यानरूपपरममहतः परिमाणमिति षष्ठी समासः । इत्यादि उदयनवाक्यानुसारेण च परैरत्रानभि-हितमपि समाधिमाह **अत्र महतो द्रव्यस्येत्यादिना** । वास्तवपक्षोऽपि उपरिष्टात् वक्ष्यते । शेष्यां रमायां च अधिकं ज्ञेयम् । एवं महद्द्रव्येति उत्तरत्रापि । **स्वरूपासिद्धिरपीति भाव इति** । तारतम्यस्यैवाभावात् आश्रया-सिद्धिरिति प्रकारान्तरेणाश्रयासिद्धिसूचकोऽयं अपिशब्दः । परमाणुद्व्यणुकयोः असिद्धौ तत्परिमाणस्याप्यसिद्धेः तत्तारतम्यस्य पक्षतानुपपत्तिरिति । पूर्वोक्ताश्रयासिद्धेस्तु समुच्चायक इति द्रष्टव्यम् ।

स०ना०— अणुपरिमाणशब्देनेति । अणुपरिमाणतारतम्यमित्युच्यते यच्चाणुपरिमाणशब्दवाच्यं न तस्य तारतम्यं यस्य च तारतम्यं न तदणुशब्दवाच्यमिति अवश्यं कस्यचित् गौणत्वमभ्युपेयम् । ततश्च चत्वारः पक्षाः सम्भाविताः । अणुपरिमाणशब्दस्य लक्षणया परिमाणापकर्षपरत्वम् । तारतम्यशब्दस्तु यथाश्रुतार्थः इत्येकः । परमाणुसिद्ध्युपयोगित्वात् अणुपरिमाणशब्दः परमाणुपरिमाणपरः । क्वचिद्विश्रान्तशब्दस्तु क्वचिद्वृत्तितापरः तारतम्यशब्दस्तु अविवक्षितार्थः इति द्वितीयः । अणुपरिमाणशब्दो द्व्यणुकपरिमाणपरः । तारतम्यशब्दस्तु तदपेक्षया नीचपरिमाणपरः क्वचिद्विश्रान्तिशब्दस्तु क्वचिद्वृत्तितापरः इति तृतीयः । उभयोरपि अणुशब्दवाच्यत्वात् अणुपरिमाणशब्दो उभयपरिमाणपर इति चतुर्थ इति विकल्पोपपत्तिर्द्रष्टव्या ।

विट्ठल०— द्वितीयतृतीयपक्षदूषणान्तरमाह **एकैकत्रेति** । तथा चाश्रयासिद्धिरिति भावः ।

॥ इति 'अनुमानेन परमाणुसिद्धि'शङ्का तन्निरसनं च ॥
॥ इति द्व्यणुकसाधकानुमानेऽपि परमाणोः पक्षीकर्तुमशक्यता ॥

* * *

॥ अथ तत्र द्व्यणुकसाधकानुमानेऽपि त्र्यणुकस्य पक्षीकर्तुमशक्यता ॥

१०९ सु०— यदिदं जालसूर्यमरीचिस्थं सर्वतः सूक्ष्मतमं रज उपलभ्यते तत्त्र्यणुकमित्युच्यते ॥ तदिदं महत्, चाक्षुषद्रव्यत्वात्, घटवत् । कार्यं च; महत्त्वे सति चाक्षुषत्वात्, महत्त्वे सति क्रियावत्त्वाद्वा । सावयवं च, कार्यद्रव्यत्वात् ॥ तदवयवाश्च द्व्यणुकनामानः । तेऽपि कार्याः सावयवाश्च, महद्द्रव्यारम्भकत्वात् तन्तुवत् ॥ यश्च तदवयवः स एव परमाणुः, तदवयवकल्पनायां प्रमाणाभावाद्बाधकसद्भावाच्च ॥ अतोऽनुमानेनैव परमाणुद्व्यणुकसिद्धिरित्यत आह पक्षीकर्तुमिति । प्रत्यक्षस्य त्र्यणुकस्यैव परमाणुत्वसम्भवेन तत्कार्यत्वसावयवत्वसाधनाय पक्षीकर्तुमशक्यत्वात् कुत एव द्व्यणुकपरमाण्वोः अनुमा भवेत् ।

परि०— शङ्कते **यदिदमित्यादिना** । **तदिदमिति** । उपलक्ष्यमाणं सूक्ष्मं वस्तु पक्षः । महदि(चे)ति साध्यम् । मनसि गुणादौ चाव्यभिचाराय क्रमाच्चाक्षुषद्रव्यत्वादिति च पदद्वयम् । **कार्यं चेति** । तदिदमिति वर्तते । घटत्वादौ गगनादौ चाव्यभिचाराय महत्त्वे सतीति चाक्षुषत्वादिति च क्रमात् पदद्वयम् । घटवदित्यत्राप्यन्वेति । मनसि गगनादौ चाव्यभिचाराय क्रमाद्विशेषणं विशेष्यं च । **सावयवं चेति** । तदिदमित्यस्ति । गगनादौ गुणादौ चाव्यभिचाराय कार्यद्रव्यत्वादिति क्रमेण पदद्वयम् । शब्दाद्यारम्भके गगनादौ द्रव्यारम्भके परमाणौ चाव्यभिचाराय महद्द्रव्यारम्भकत्वादिति क्रमाद्विशेषणद्वयम् । **बाधकेति** । अनवस्थारूपबाधकसद्भावाच्चेत्यर्थः । **तत्कार्यत्वेति** । तस्य कार्यत्वसावयवत्वयोः साधनायेत्यर्थः ।

यादु०— महत्त्वे सति क्रियावत्त्वात् इत्यत्र मनसि व्यभिचारवारणाय महत्त्वे सतीति विशेषणम् । **बाधकसद्भावाच्चेति** । अनवस्थालक्षणबाधकसद्भावाच्चेत्यर्थः । मेरुसर्षपयोस्तुल्यपरिमाणत्वापत्तिरूपबाधकसद्भावाच्चेति वाऽर्थः ।

वं०प०— द्व्यणुके व्यभिचारवारणाय **चाक्षुष**पदम् । रूपरूपत्वयोस्तद्वारणाय द्रव्यपदम् । सामान्ये व्यभिचारवारणाय महत्त्वे सतीत्युक्तम् । गगनादौ तद्वारणाय चाक्षुषपदम् । मनसि व्यभिचारवारणाय महत्त्वे सतीत्युक्तम् । गगनादिवारणाय क्रियावत्त्वे सतीत्युक्तम् । परमाणौ व्यभिचारवारणाय महदिति द्रव्यविशेषणम् । द्व्यणुके व्याभिचारवारणाय चाक्षुषपदम् ।

कं०रा०— महत्त्वे सतीति । एतच्च गत्यादौ व्यभिचारनिरासाय आकाशादौ तन्निरासाय चाक्षुषपदं महत्त्वे सति क्रियावत्त्वादिति मनसि व्यभिचारनिरासाय सत्यन्तं महत्त्वमात्रं चाकाशादौ व्यभिचारीति क्रियावत्त्वग्रहणं महत्त्वसाधके चाक्षुषद्रव्यत्वादिति हेतौ चाक्षुषत्वं विशेषणं मनसि व्यभिचारनिरासार्थमिति ध्येयम् । **तेऽपि कार्या इति** । यद्यपि द्व्यणुकानां सावयवत्वसाधनेनैव परमाणुसिद्धिरपि कार्यत्वसाधनं व्यर्थमिवाभाति तथापि महद्व्यारम्भकत्वस्य सावयवत्वव्याप्तत्वाप्रतिसन्धानदशायां कार्यत्वेन तु तत्प्रतिसन्धानदशायां महद्व्यारम्भकत्वेन द्व्यणुकानां कार्यत्वं प्रसाध्य कार्यद्रव्यत्वेन सावयवत्वं साधनीयमित्याशयेनैवमुक्तम् । तथा च तेऽपि द्व्यणुकनामा न त्र्यणुकावयवा अपि कार्याग्रहद्रव्यारम्भकत्वात् तन्त्वादिवत् सावयवाश्च कार्यद्रव्यत्वात् तद्वदेवेति योजना द्रष्टव्या । **महद्द्रव्यारम्भकत्वादिति** । अमहत्तच्च तद्द्रव्यं चेति न समानाधिकरणसमासः किन्तु भावप्रधानेन महच्छब्देन द्रव्यशब्दस्य महत्त्वं युक्तं द्रष्टव्यम् । महद्द्रव्यमिति मध्यमपदलोपसमासः तेन आन्महतः समानाधिकरणजातीययोरित्यात्वं न भवतीति ध्येयम् । ननु द्व्यणुकावयवस्याप्यवयवकल्पनासम्भवेन ततोऽपकृष्टपरिमाणस्य तदवयवस्यैव सत्त्वात् कथं तस्य परमाणुत्वमित्यत आह **तदवयवकल्पनायामिति** । द्व्यणुकावयवस्यावयवकल्पनायां प्रमाणाभावादनवस्थाप्रसङ्गादिरूपबाधकसद्भावाच्च द्व्यणुकावयवस्यावयवकल्पनाया असम्भवेन तस्यैव परमाणुमिति भावः ।

श्रीनिधि०— चाक्षुषद्रव्यत्वादिति । परमाणौ सामान्ये च व्यभिचारवारणाय विशेषणविशेष्ये । **महत्त्वे सति चाक्षुषत्वादिति** । अत्रापि गगने सामान्ये च व्यभिचारवारणाय विशेषणविशेष्ये इति द्रष्टव्यम् । **महत्त्वे सति क्रियावत्त्वादिति** । अत्रापि गगने परमाणौ च व्यभिचारवारणाय विशेषणविशेष्ये इति । **कार्यद्रव्यत्वादिति** । रूपादौ गगनादौ च व्यभिचारवारणाय विशेषणविशेष्ये इत्यत्रापि द्रष्टव्यम् । अत्रोत्तरोत्तरानुमानविशेषणसाधनाय पूर्वपूर्वानुमानमिति द्रष्टव्यम् । **महद्द्रव्यारम्भकत्वादिति** । आरम्भकत्वमात्रस्यासमवायिकारणे व्यभिचारात् द्रव्यपदम् । तावतश्च परमाणौ व्यभिचारात् **महदिति** । गगने व्यभिचारवारणाय विशेष्यम् । **बाधकसद्भावादिति** । तन्न्यायेनेव तस्य तस्यापि अवयवानां वक्तव्यत्वेनावस्था । तथा मेरुसर्षपयोस्तुल्यपरिमाणत्वप्रसङ्ग इति बाधकम् । **तत्कार्यत्वसावयवत्वसाधनायेति** । तस्य सावयवत्वकार्यत्वसाधनायेत्यर्थः ।

शे०वा०— यदिदमिति । द्वितीयं दूषयितुमुत्थापयति **चाक्षुषद्रव्यत्वादिति** । द्व्यणुकादावव्यभिचाराय चाक्षुषेति । रूपादावव्यभिचाराय द्रव्यत्वकीर्तनम् । **महत्त्वे सति चाक्षुषत्वादिति** । जातौ व्यभिचारवारणाय महत्त्वे सतीति । आत्मादौ तद्वारणाय चाक्षुषत्वोत्कीर्तनम् । **महत्त्वे सति क्रियावत्त्वादिति** । अत्र मनसि व्यभिचारवारणाय महत्त्वे सतीति विशेषणम् । आत्मादिव्यावृत्त्यर्थं क्रियावत्त्वादित्युक्तम् । कार्यत्वादित्यत्र कार्यत्वमात्रं रूपादौ गतं द्रव्यत्वमात्रं चात्मादौ गतमतो विशिष्टग्रहणम् । **महद्द्रव्यारम्भकत्वादिति** । महच्छब्दस्यात्र भावप्रधानत्वान्महता महत्त्वेन युक्तं महद्द्रव्यमिति वैयधिकरण्याश्रवणे

आत्वप्राप्तिरिति द्रष्टव्यम् । यद्वा द्रव्यस्यारम्भकं द्रव्यारम्भकं, महतो द्रव्यारम्भकं महद्द्रव्यारम्भकं महत्त्वं च योग्यतया द्रव्येणान्वेतीति नानुपपत्तिरिति ध्येयम् । वस्तुतस्तु स्थान्यादेशोक्तिव्यत्ययेन द्वन्द्वेऽल्पाच्तरस्य परनिपातेन च 'आन्महतः' इत्यस्य विधेरनित्यत्वस्यान्यत्र स्थितत्वात् सत्यपि सामानाधिकरण्ये नात्वप्राप्तिरिति तत्त्वम् । अन्ये तु महाद्रव्यारम्भकत्वादित्येव मूलपाठः तद्विपरीतस्तु लेखकदोषपतित इत्याहुः । द्रव्यारम्भकत्वस्य परिमाणौ व्यभिचारान्महत्त्वेन द्रव्यमत्र विशेषितम् । न च तस्यासिद्धौ क्व व्यभिचारः, सिद्धौ च व्यभिचारः किं करिष्यतीति वाच्यम् । आपाततः प्रतिपन्ने परमाणौ व्यभिचारदर्शनेन परावृत्तिर्माभूदित्यस्यार्थस्य विवक्षितत्वात् द्रव्यपदं च स्वरूपकथनं, न हेत्वन्तर्गतम् । अत एव महदारम्भकत्वादित्येवोत्तरत्र व्यवहार इति द्रष्टव्यम् । ननु द्व्यणुकवत् परमाणुरपि कार्यः सावयवश्च किन्न स्यादित्यतः साधकभावाभावाभ्यां वैषम्यान्नैवमित्याह **तदवयवेति** । द्व्यणुकस्य कार्यत्वाश्रयणे बाधकाभावाद्युक्तं तस्य कार्यत्वं सावयवत्वं च । परमाणोस्तु कार्यत्वसावयवत्वयोराश्रयणे सर्षपमहीधरयोस्तुल्यपरिमाणत्वापत्तिरूपबाधकसद्भावाच्च न तदित्याह **बाधकसद्भावाच्चेति** ।

वा०र०— अवयवावयविप्रसङ्गस्य निरवधिकत्वविभागावधित्वनिराकरणेन सावधिकत्वसमर्थनेऽपि सोऽवधिः त्रसरेणुरिव किं न स्यादित्याद्याशङ्कापरिहारः किरणावलीसूत्रोपस्कारादौ कृतः । तदनुसारेणाह मूले **यदिदं जालसूर्य इत्यादिना** । एतन्मूलं च व्यक्ताव्यक्तस्य निष्पत्तेरिति गौतमीयं सूत्रम् । तच्च विवृतं वात्स्यायनभाष्यतद्वार्तिकतद्वाचस्पतितन्निबन्धतद्वर्धमानेषु । तदनुसारेणावशिष्टं ज्ञेयम् ।

मूले महद्द्रव्यारम्भकत्वरूपवक्ष्यमाणहेतुसिद्धिरपि चाक्षुषद्रव्यत्वेन महत्त्वसाधने प्रयोजनं ध्येयम् । मूले **कार्यं चेति** । ततो नायं परमाणुरित्युक्तं भवति । कस्तर्हि परमाणुः तदवयवावयवेति वक्तुं तस्यावयव एव कुतः । सत्त्वेऽपि वा त एव कुतः न परमाणवः इत्याशङ्कापरिहारायाह **सावयवं चेत्यादि** मूलम् । नानुपपत्तिरित्यतःपरं वदन्तीत्यादि क्वचित् पूरणीयम् । **अन्यत्र स्थितत्वादिति** । 'तस्यैव महत्सुखत्वाच्च तेषामि'ति तृतीयाध्यायगीतायां ग्रन्थकृतैव निरूपितत्वादित्यर्थः । विशेषतः तट्टीकाप्रपञ्चानुसारेण ज्ञेयः । कालप्रसङ्गे वर्धमानादौ आत्मविचारोऽस्ति । शेष्यादौ तत्र दोषश्चोक्तोऽस्ति । बाधकसद्भावाच्च न तदित्यत्र चशब्दः । साधकत्वभावाभावाभ्यामित्यनेन प्रागुक्तसाधकाभावसमुच्चयार्थः । उपलक्षणं चैतत् । अनवस्था बाधकेति चेत् इत्यत्र मूलोक्तानवस्थारूपघटाघटाद्यनुत्पत्तिप्रसङ्गो ज्ञातव्यः ।

विट्ठल०— अनुमानान्तराण्याशङ्कते **यदिदमित्यादिना** । तदिदं त्र्यणुकं मनसि व्यभिचारवारणाय **चाक्षुषेति** । गुणादौ च वारणाय द्रव्यत्वादिति महत्त्वे सति चाक्षुषत्वादित्यत्र घटत्वादौ गगनादौ च व्यभिचारवारणाय क्रमेण पदद्वयम् । महत्त्वे सति क्रियावत्त्वादित्यत्र मनसि गगनादौ च व्यभिचारपरिहाराय क्रमेण पदद्वयम् । गगनादौ गुणादौ च वारणाय कार्यद्रव्यत्वादिति शब्दाद्यारम्भके गगनादौ द्व्यणुकारम्भके परमाणौ च वारणाय महद्द्रव्यारम्भकत्वादिति । **बाधकेति** । अनवस्थालक्षणबाधकसद्भावात् मेरुसिद्धयो-

स्तुल्यपरमाणुत्वापत्तिरूपबाधकसद्भावाच्चेत्यर्थः । **प्रत्यक्षस्यैवेति** । प्रत्यक्षसिद्धत्र्यणुकस्यैव मूले कारणीभूतपरमाणुत्वसम्भवे तदतिरिक्तासम्भवेऽतीन्द्रियपरमाणुसिद्धये तस्य तस्य कार्यत्वस्य यत्त्वया साधनाय पक्षीकरणमयुक्तमित्यर्थः ।

* * *

॥ अथ च तत्रान्ते उक्तार्थसमर्थनम् ॥

११० सु०— महत्त्वात् कथमसौ परमाणुरिति चेन्न, महत्त्वासिद्धेः । चाक्षुषद्रव्यत्वात् तत्सिद्धिरिति चेन्न, कस्यचिदमहतोऽपि चाक्षुषत्वे बाधकाभावात् । महत्त्वं च द्रव्यचाक्षुषतायां कारणमिति चेत्; सत्यम्, क्वचिदन्यदपि कारणं कल्पयिष्यते । गौरवं तथा सति स्यादिति चेन्न, धर्मिकल्पनातो धर्ममात्रकल्पनायाः लघुत्वात् ।

अस्तु वा महत्त्वम् । तथाऽप्यणुत्वेन तस्य समावेशे को विरोधः । कार्यत्वसाधनं चाप्रयोजकम्; महतोऽप्यात्मनः प्रत्यक्षवच्चाक्षुषत्वोपपत्तेः, परममहत्त्वाभावेन क्रियासम्भवाच्च । महत्त्वस्य कारणबहुत्वं कारणमिति चेन्न, नित्यत्वोपपत्तेः । चाक्षुषमहत्त्वान्नेति चेन्न, बाधकाभावात् ॥ अत एव कार्यद्रव्यत्वमसिद्धम् ।

सन्तु वा तदवयवास्त एव परमाणव इति तेषां पुनरवयवसाधनाय पक्षीकर्तुमशक्यत्वात् कुत एवानुमा भवेत् । ननु महद्द्रव्यारम्भकत्वात् तेऽपि सावयवा एवेति चेन्न, निरवयवस्य म(हा)हद्द्रव्यारम्भकत्वे बाधकाभावात्, बहुत्वेनैव महत्त्वारम्भोपपत्तेः, द्रव्यारम्भे सावयवत्वस्यानुपयोगात् ।

सन्तु वा द्व्यणुकावयवास्तेऽपि कुतः परमाणवः, महद्द्रव्यारम्भकत्वेन तेषामपि सावयवत्वानुमानात् । अनवस्था बाधिकेति चेन्न, तदवयवानां तदवयवावयवानां वा निरवयवत्वेन तद्विश्रान्तेः । कथं चेयमनवस्था दूषणम् । मेरुसर्षपादीनां समपरिमाणत्वापत्तिस्तु दूषिता । घटादिकार्यानुत्पत्तिरिति चेन्न; सावयवस्यैव नित्यत्वोपपत्तेः, यथोक्तम् 'अविभागः प(राणु)रमाणुते'ति ।

परि०— को विरोध इति । आपेक्षिकपरिमाणोत्कर्षापकर्षयोरेकत्र समावेशस्य साधितत्वादिति भावः । कार्यत्वस्य प्राक्साधनात् कथं अणुत्वं तस्येत्यत आह **कार्यत्वसाधनं चेति** ।

कार्यत्वसाधकहेतुद्वयस्यापि क्रमादप्रयोजकत्वं व्यनक्ति **महतोऽपीत्यादिना** । अकार्यस्यापि त्र्यणुकस्येति योज्यम् । **बाधकाभावादिति** । त्र्यणुकमहत्त्वस्य चाक्षुष(मह)त्त्वेऽपि नित्यत्वे बाधकाभावादित्यर्थः । **अत एवेति** । कार्यत्वसाधकहेत्वोरप्रयोजकत्वेन कार्यत्वासाधकत्वादेवेत्यर्थः । **असिद्धमिति** । तथा च तेन न सावयवत्वसिद्धिरिति भावः । **महद्द्रव्यारम्भकत्वादिति** । 'आन्महतः समानाधिकरणजातीययोरि'त्यत्र महत आदिति वक्तव्ये विधेयोद्देश्ययोर्व्यत्यासेन निर्देश आत्वविधेरनित्यत्वज्ञापनार्थमिति गीताभाष्यटीकायामुक्तत्वान्महद्द्रव्येति साधु । महत्त्वानुपपत्तिर्वा द्रव्यारम्भानुपपत्तिर्वा निरवयवत्वे बाधिकेत्यतः क्रमेण निराह **बहुत्वेनैवेत्यादिना** । **महद्द्रव्यारम्भकत्वेनेति** । द्व्यणुकस्यापेक्षिकमहत्त्वस्य पूर्वं साधनान्नासिद्धिरिति भावः । अङ्गीकृत्याप्यनवस्थां तस्या अदोषत्वमाह **कथं चेयमिति** । केन प्रकारेण दूषणमित्यर्थः । मेरुसर्षपयोस्तुल्यपरिमाणतापादकत्वेनोत सावयवस्य जन्यत्वेन प्रलये नाशनियमेन कारणाभावेनादिकार्यानुत्पत्त्यापादकत्वेन । आद्यं निराह **मेर्विति** । **दूषितेति** । 'अविभागः पराणुते'त्येतद्व्याख्यावसर इति भावः । द्वितीयं शङ्कित्वा निराह **आदिकार्येति** । **यथोक्तमिति** । कदाप्यवयवाविभागोक्त्या नित्यत्वसूचनेन प्रलयेऽप्यवस्थानोपपत्त्याऽऽदिकार्यानुत्पत्त्यभावादिति भावः । **परमाणुद्व्यणुकयोरानुमानिकत्वानिरासेन साक्षिसिद्धत्वसमर्थनम् ॥**

गु०दी०— अणुत्वेन तस्य समावेशो को विरोध इत्यत्र प्रत्यक्षयोग्यत्वान्महत्त्वमप्यस्तु स्वकार्यापेक्षयाऽणुत्वमप्यस्तु । तन्त्वादौ तथा दर्शनादिति भावः । **महद्द्रव्यारम्भकारम्भकत्वेन** इत्यत्र पटारम्भकतन्तूपादानकार्पासवदिति दृष्टान्तो द्रष्टव्यः ।

यादु०— ननु त्र्यणुके कार्यत्वस्य साधितत्वात् कथं तस्य परमाणुत्वमङ्गीक्रियत इत्यत आह **कार्यत्वसाधनमिति** । ननूक्तहेतुद्वयोच्छित्तिरूपविपक्षबाधकसद्भावात् कथमप्रयोजकमित्यतस्तावन्न प्रथमहेतूच्छित्तिर्बाधिकेत्याह **महतोऽपीति** । अकार्यस्यापीति शेषः । **चाक्षुषत्वोपपत्तेरिति** । त्र्यणुकस्येति शेषः । द्वितीयहेतूच्छित्तिरपि न बाधिकेत्याह **परममहत्त्वेति** । तर्कद्वयेऽप्यप्रयोजकतेति भावः । **महत्त्वस्येति** । तथा च जन्यमहत्त्वाधिकरणत्वात् त्र्यणुकं कार्यं सावयवं चाङ्गीकार्यमिति भावः । त्र्यणुकमहत्त्वस्य नित्यत्वादसिद्धो हेतुरित्याह **नित्यत्वेति** । त्र्यणुकमहत्त्वं जन्यं चाक्षुषमहत्त्वाद्बटमहत्त्ववदिति हेतुसाधनान्नासिद्धिरित्याशङ्कते **चाक्षुषेति** । **बाधकेति** । तथा चाप्रयोजकतेति भावः । **अत एवेति** । कार्यत्वसाधकहेत्वोरप्रयोजकत्वेनासाधकत्वादेवेत्यर्थः । **असिद्धमिति** । तथा च न तेन सावयवत्वसाधनमुपपद्यत इति भावः । **ननु महद्द्रव्येति** । महद्द्रव्यमिति द्रव्यविशेषस्य संज्ञा, तेनान्महत इत्येष विधिर्न भवति । 'दृष्टानुगतिर्हि संज्ञाछन्दसोरि'ति पूर्वोक्तमेव समाधानमत्र बोध्यम् । किरणावल्यादौ महद्द्रव्यारम्भकत्वादित्युदयनोक्तमेवात्रानूद्यते ।

अनुवादो ह्यनुकरणविशेषः । अनुकरणस्य च यथोपदिष्टस्यैव साधुत्वमतोऽत्र नोक्तशङ्केत्यप्याहुः । ननु बाधकाभावादिति न युक्तम् । यतो हेतूच्छित्तिरेवात्र बाधिकेति चेत् । अत्र वक्तव्यम् । किं निरवयवेऽवयवपरिमाणरूपकारणाभावेन महत्त्वरूपविशेषणारम्भो न स्यादित्यापाद्यते उत द्रव्यारम्भप्रयोजनकस्य सावयवत्वस्य तत्राभावे द्रव्यरूपविशेष्यारम्भ एव न स्यादितीति । आद्यं दूषयति **बहुत्वेनेति** । द्वितीयं दूषयति **द्रव्यारम्भ इति** । त्वन्मते निरवयवस्यापि परमाणोर्द्रव्यारम्भकत्वादिति भावः । **कथं चेयमिति** । अप्रामाणिकस्वीकारादिरूपानिष्टानापादकत्वादिति भावः । ननु मेरुसर्षपयोस्तुल्यपरिमाणत्वमप्रामाणिकमेवं सति प्रसज्यत इत्यत आह **मेरुसर्षपेति** । तथाऽपि प्रामाणिकघटादिकार्योत्पत्तिपरित्यागापादिकेयमित्याशङ्कते **घटादीति** । **सावयवस्यैवेति** । अनन्तावयवोपेतस्य प्रकृतिरूपस्य सूक्ष्मरजस इत्यर्थः । तथा चावयवपरम्पराया आनन्त्येऽपि कारणीभूतावयपरम्पराया नित्ये सूक्ष्मरजसि विश्रान्तेर्न घटादिकार्यानुत्पत्तिरित्यर्थः ।

वं०प०— ननु चाक्षुषद्रव्यत्वमस्तु महत्त्वं माऽस्त्विति शङ्का न युज्यते । महत्त्वाभावे चाक्षुषद्रव्यत्वमेव न स्यादिति हेतूच्छित्तिरेव बाधिकेत्याशङ्कते । **महत्त्वमिति** । **क्वचित्** त्र्यणुकरूपे द्रव्ये । **अन्यत्** महत्त्वातिरिक्तम् । **तथा सति** चाक्षुषद्रव्यतायां प्रयोजकद्वयकल्पने । **धर्मीति** । चाक्षुषद्रव्यत्वे महत्त्वं कारणं प्रकल्प्य तेन च त्र्यणुके महत्त्वं प्रसाध्य तस्य महद्द्रव्यस्य परमाणुत्वं न सम्भवतीति तदतिरिक्तं किञ्चित्परमाण्वाख्यं धर्मि कल्पनीयमिति धर्मिकल्पनात् इत्यर्थः । **धर्मेति** । चाक्षुषद्रव्यत्वेन सिद्धे त्र्यणुकाख्ये द्रव्ये, महत्त्वातिरिक्तप्रयोजकीभूतं किञ्चिद्धर्मं कल्पयित्वा तस्यैव परमाणुत्वकल्पनं लघ्वित्यर्थः । **को विरोध इति** । विरोधस्य वस्तुव्यपेक्षयेत्यनेन परिहृतत्वादिति भावः । **महतोऽपीति** । ननु महत्त्वे सति चाक्षुषत्वमस्तु अकार्यत्वमेवास्त्वित्यप्रयोजकता न युक्ता, अकार्यस्य द्रव्यस्य महत्त्वे सति चाक्षुषत्वादर्शनादिति चेन्न । यथाऽकार्यस्य महद्द्रव्यस्य कुत्रापि प्रत्यक्षत्वानुपलब्धावपि आत्मरूपमहद्द्रव्यस्य तत्कल्पितं, एवमकार्यस्य महद्द्रव्यस्य कुत्रापि चाक्षुषत्वानुपलब्धावपि त्र्यणुकाख्ये द्रव्ये चाक्षुषत्वोपपत्तेः । अन्यथाऽऽत्मनः तन्न स्यादिति भावः । **परमेति** । ननु द्वितीयहेतौ महत्त्वे सति क्रियावत्त्वेऽप्यकार्यत्वमस्त्विति न युज्यते । अकार्यस्य महतो गगनादेरिव क्रियावत्त्वमेव न सम्भवतीति हेतूच्छित्तिरिति चेन्न । अकार्यस्य परममहत एव क्रियावत्त्वं न युक्तं गगनादिवत् । त्र्यणुकरूपकार्यद्रव्यस्यापरममहत्त्वाद्युक्तं क्रियावत्त्वमिति भावः । **कारणमिति** । तथा च त्र्यणुकनिष्ठजन्यमहत्त्वस्यासमवायिकारणभूतबहुत्वसङ्ख्याधिकरणं त्र्यणुकसमवायिकारणभूतं किञ्चिद्द्रव्यं कल्पनीयमिति तदेव द्व्यणुकमिति हृदयम् । **उपपत्तेः** त्र्यणुकनिष्ठमहत्त्वस्येति शेषः । **नेतीति** । त्र्यणुकमहत्त्वं न नित्यं चाक्षुषमहत्त्वाद्घटमहत्त्ववदित्यर्थः । गगननिष्ठमहत्त्वे व्यभिचारवारणाय चाक्षुषपदम् । **बाधकेति** । तथा च चाक्षुषमहत्त्वेऽपि नित्यत्वमस्त्विति भावः । **अत एवेति** । उक्तरीत्या कार्यत्वसाधकहेतोरप्रयोजकत्वादित्यर्थः । **कार्यद्रव्यत्वं** सावयवत्वसाधकमित्यर्थः । **मेरुसर्षपादीनामिति** । अनन्तावयवारब्धत्वाविशेषादिति भावः । **दूषितेति** । आनन्त्येऽपि कार्यलक्षणाद्यानन्त्य इव तारतम्यसद्भावान्नोक्तदोष इति दूषितमिति भावः । प्रामाणिकपरित्यागहेतुत्वादियमनवस्था दूषणमित्याशङ्कते **घटादीति** । आरम्भकानन्तावयवपरम्पराङ्गीकारे

अनन्तावयवानामुत्पत्तावेव कालस्य पर्यवसितत्वाद्घटादिकार्यस्योत्पत्तुमवकाशस्यैवाभावेन घटादिकार्यानुत्पत्ते-र्बाधिकायाः सत्त्वादियमनवस्था दूषणमिति भावः ।

कं०रा०— महतोऽप्यात्मन इति । अकार्यत्वेऽपि महतोऽप्यात्मनः प्रत्यक्षत्ववदकार्यत्वेऽपि महतः त्र्यणुकस्य चाक्षुषत्वोपपत्तेर्महत्त्वे सति चाक्षुषत्वमप्रयोजकमिति भावः । **परममहत्त्वाभावेनेति** । त्र्यणुकस्या-कार्यत्वेऽपि परममहत्त्वाभावमात्रेण क्रियावत्त्वोपपत्तेर्महत्त्वे सति क्रियावत्त्वमप्यप्रयोजकमिति भावः । ननु महत्त्वस्य कारणबहुत्वं कारणं तथा च त्र्यणुकस्याकार्यत्वे तत्कारणस्यैवाभावेन कारणबहुत्वाभावान्महत्त्वं न स्यादित्यनुपपत्तेः सत्त्वान्महत्त्वघटितहेतुद्वयस्य नाप्रयोजकत्वमिति शङ्कते **महत्त्वस्येति** । जन्यमहत्त्वस्यैव कारणबहुत्वं कारणं त्र्यणुकमहत्त्वं चाजन्यमेवातस्त्र्यणुकस्याकार्यत्वेन तत्कारणबहुत्वाभावेऽपि तन्महत्तत्त्वोप-पत्तेरप्रयोजकत्वतादवस्थ्यमेवेति परिहरति **नेति** । चाक्षुषमहत्त्वस्य सर्वस्यापि जन्यत्वात् त्र्यणुकगतमहत्तत्त्व-स्यापि चाक्षुषमहत्त्वरूपत्वादजन्यत्वं न सम्भवतीति शङ्कते **चाक्षुषेति** । त्र्यणुकगतमहत्त्वस्य चाक्षुषमहत्त्व-रूपत्वेऽप्यजन्यत्वमस्त्वित्युक्ते विपक्षे बाधकाभावेन चाक्षुषमहत्त्वरूपत्वस्य जन्यत्वं प्रति अप्रयोजकत्वान्न तेन तत्साधनं युक्तमिति परिहरति **न बाधकाभावादिति** । **अत एवेति** । कार्यत्वसाधकहेतुद्वयस्याप्रयोजक-त्वेन त्र्यणुके कार्यत्वसिद्धेरभावादेव तस्य सावयवत्वसाधकं कार्यद्रव्यत्वमसिद्धमित्यर्थः । **तदवयवा इति** । त्र्यणुकावयवा इत्यर्थः । ननु त्र्यणुकावयवानामेव निरवयवतया परमाणुत्वे त्र्यणुके महत्त्वं न स्यात् कारण-महत्त्वाभावादित्यत आह **बहुत्वेनैवेति** । त्र्यणुकावयवगतह्रस्वत्वबहुत्वेनैव त्र्यणुकगतमहत्त्वारम्भ इति त्र्यणुका-वयवानां सावयवत्ववादिनापि वक्तव्यम् । तेन तेषामणुत्वस्याङ्गीकृततया कारणमहत्त्वाभावात् तथा च त्र्यणुकावयवानामेव निरवयवत्वेन परमाणुत्वमिति पक्षेऽपि कारणबहुत्वेनैव त्र्यणुकमहत्त्वारम्भोपपत्तेर्न काप्यनुप-पत्तिरिति भावः । ननु त्र्यणुकावयवानां निरवयवत्वे द्रव्यारम्भकत्वमेव न स्यादित्यत आह **द्रव्यारम्भ इति** । **महाद्रव्येति** । महाद्रव्ये त्र्यणुकं तदारम्भकाणि द्व्यणुकानि तदारम्भकत्वेन पक्षे हेतुरस्तीति भावः । महा-द्रव्यारम्भकारम्भकत्वेन द्व्यणुकावयवानां सावयवत्वानुमानमयुक्तम्, अनवस्थारूपबाधकसद्भावादिति शङ्कते **अनवस्थेति** । द्व्यणुकावयवावयवानां तदवयवानां वा निरवयवत्वेनावयवपरम्पराविश्रान्तिसम्भवान्नानवस्थेति परिहरति **नेति** । अविश्रान्तावयवपरम्पराङ्गीकारेऽपि तस्या न दूषणत्वप्रयोजकप्रकाराभावादित्यत आह **कथं चेयमिति** । नन्वविश्रान्तावयवपरम्पराङ्गीकारे मेरुसर्षपादीनामनन्तावयवारब्धत्वाद्यविशेषेण तुल्यपरिमाणत्वं स्यादित्यनिष्टप्रसङ्गबीजत्वेनानवस्थायाः दूषणत्वमित्यत आह **मेरुसर्षपादीनामिति** । मेरुसर्षपादीनामविश्रा-न्तावयवपरम्पराङ्गीकारे सम्भूतावयवानामानन्त्येऽपि साक्षादारम्भकाणामानन्त्याभावेनानन्तावयवारब्धत्वमसिद्धं सम्भूतावयवानन्दो न समपरिमाणत्वापादनत्वं युक्तमानन्त्येऽपि तारतम्यस्य सत्त्वादिति मेरुसर्षपादीनां समपरिमाणत्वापत्तिर्दूषितेत्यर्थः । ननु परमाणोरविश्रान्तावयवपरम्पराङ्गीकारे पूर्वापूर्वावयवोत्पत्तिविनोत्तरोत्तरो-त्पत्तायोगात्पटादिकार्यस्यानुत्पत्तिः स्यादित्यनिष्टप्रसङ्गबीजत्वेनानवस्थादूषणमिति शङ्कते **घटादिकार्येति** । परमाणोः सावयवत्वेनावयवपरम्परासद्भावेऽपि तस्य नित्यत्वेनोत्पत्तेरेवाभावान्न पटादिकार्यानुत्पत्तिप्रसङ्ग इति

परिहरति **नेति** । परमाणुनित्यतायामाचार्यवाक्यसम्मतिमाह **यथोक्तमिति** । अविभागः पराणुतेति परमाणोर्विनाशकारणावयवविभागाभावं वदताचार्येण यथा तस्य नित्यत्वमुक्तं तथैवोक्तं मयेति भावः ।

श्रीनिधि०— बाधकाभावादिति । गुणादेरमहतोऽपि चाक्षुषतादर्शनादिति गूढाभिसन्धेः परिहारः । **अन्यदपीति** । अणुत्वमपीत्यर्थः । **को विरोधः** । न कोऽपीत्यनेन 'अणुत्वं च महत्त्वं च यतो वस्तुव्यपेक्षये'त्यनेन च विरोधः परिहृत इति स्मारयति । तदवयवापेक्षया महत्त्वसम्भवात् परमाणुर्निरवयव इति तु त्याजितमेवेति भावः । **महतोऽप्यात्मनः प्रत्यक्षवच्चाक्षुषत्वोपपत्तेरिति** । अन्यथात्मा कार्यं भवितुमर्हति महत्त्वे सति प्रत्यक्षत्वादित्यप्यनुमीयेतेति भावः । अस्त्वाद्यो हेतुरप्रयोजकः । द्वितीयस्तु सनाथः । तथा हि । यदि कार्यं न स्यात् तर्हि महत्त्वे सति क्रिया न स्यात् । अकार्यस्यापि महतः क्रियावत्त्वे गगनादेरपि क्रिया स्यादित्यत आह **परममहत्त्वाभावेनेति** । अनेन तर्के उपाधिरुक्तो भवति । एवं विपक्षे क्रियानुपपत्तिं परिहृत्य महत्त्वानुपपत्तिमाशङ्क्य परिहरति **महत्त्वस्येति** । अकार्यत्वे कारणाभावादेव तद् बहुत्वं न सम्भवतीति भावः । **बाधकाभावादिति** । विपक्षे बाधकाभावादित्यर्थः । एवञ्च चाक्षुषत्वहेतुरप्रयोजक इति भावः । **अत एवेति** । कार्यत्वासिद्धेरेवेत्यर्थः । सावयवत्वसाधकमिति शेषः । **नन्विति** । यद्यपि तन्मते कार्यमहत्त्वं कारणमहत्त्वात् वा कारणबहुत्वाद्वा भवतीत्यभ्युपगमः । तथा च न सावयवत्वं महद्द्रव्यारम्भे प्रयोजकम् । तथाऽपि सहदर्शनमात्रेणेयं शङ्केति ज्ञेयम् । निरवयवत्वे महद्द्रव्यारम्भकत्वं न स्यादिति वदता वक्तव्यम् । किं कार्यगतमहत्त्वारम्भकत्वं न स्यादिति उत द्रव्यारम्भकत्वं न स्यादिति । नाद्यः । अन्यथासिद्धेरित्याह **बहुत्वेनैवेति** । कारणगतबहुत्वेनैवेत्यर्थः । न द्वितीयः । व्याप्त्यभावादित्याह **द्रव्यारम्भक इति** । त्वदभिमत-परमाणावनुपयोगदर्शनादिति भावः । **तद्विश्रान्तेरिति** । तत्र विश्रान्तेरित्यर्थः । अनेन त्रसरेणुषष्ठभाग एव परमाणुरिति कल्पना निर्मूलेत्युक्तं भवति । ननूत्पत्तिप्रतिबन्धकत्वेनेयमनवस्था दूषणम् । परमाणोरनन्तावयवत्वे घटादीनां तदवयवावयवक्रमेणानन्तावयवारब्धत्वमित्युक्तं स्यात् । तथा च पूर्वपूर्वोत्पत्त्या सिद्धौ उत्तरोत्तरा-सिद्धिरित्याशङ्क्य परिहरति **घटादिकार्यानुत्पत्तिरिति चेदिति** । **सावयवस्यैव नित्यतोपपत्तेरिति** । अत्रैव-शब्देन यत्सावयवं तदनित्यमिति पराभिमानो निर्मूल इति सूचयति । **अविभागः** विभागानर्हत्वम् । अस्य च नित्यताज्ञापकत्वमेतद्व्याख्यानसमये अस्माभिर्व्युत्पादितमवगन्तव्यम् ।

शे०वा०— क्वचिदन्यदपीति । यथा हि द्रव्यगुणयोश्चाक्षुषत्वेऽप्येकस्य प्रयोजकस्य तत्रासम्भवा-द्द्रव्यचाक्षुषतायां गुणचाक्षुषतायां च भिन्नभिन्नमेव प्रयोजकमभ्युपेयते तथा द्रव्यचाक्षुषत्वेऽप्येकस्य तस्योक्त-रीत्याऽसम्भवात् क्वचिन्महत्त्वं क्वचिदणुत्वमिति प्रयोजकद्रव्यमेव कल्प्यम् । अन्यथा चाक्षुषत्वेऽप्येकमेव प्रयोजकमभ्युपेत्य द्रव्यगुणयोरन्यतरस्य अचाक्षुषताया एवाङ्गीकर्तव्यत्वापातादिति भावः । ननु त्र्यणुकस्य कार्यतायाः साधितत्वात् कथं परमाणुत्वमित्यत आह **कार्यत्वसाधनं चेति** । ननूक्तहेतुद्वयोच्छित्तिरूप-विपक्षबाधकसद्भावात् कथमप्रयोजकत्वमित्याशङ्क्य न तावत्प्रथमहेतूच्छित्तिर्बाधिकेत्याह **महतोऽपीति** ।

अकार्यस्यापीति शेषः (अर्थः) । चाक्षुषत्वोपपत्तेरित्यत्र त्र्यणुकस्येति शेषः । अन्यथा प्रत्यक्षत्वेनात्मनोऽपि कार्यत्वापत्तेरिति भावः । द्वितीयहेतूच्छित्तिरपि न बाधिकेत्याह **परममहत्त्वाभावेनेति** । **महत्त्वस्य कारणबहुत्वमिति** । कार्यमहत्त्वं प्रति कारणमहत्त्वकारणबहुत्वयोरेव कारणत्वात् त्र्यणुकस्य कार्यत्वपक्षे तन्महत्त्वं प्रति कारणमहत्त्वस्य कारणत्वासम्भवेऽपि कारणबहुत्वस्य तत्सम्भवात् त्र्यणुके महत्त्वोत्पत्त्युपपत्तावपि तस्याकार्यत्वाभ्युपगमे कारणबहुत्वस्यापि कारणत्वासम्भवान्न त्र्यणुकस्य महत्त्वोत्पत्त्युपपत्तिरिति भावः । भवेत् त्र्यणुकस्याकार्यत्वे महत्त्वानुपपत्तिर्यदि तदनित्यमस्माकमभिमतं स्यान्न चैवम् । किन्तु नित्यमेवेति न तदनुपपत्तिरित्याह **नित्यत्वोपपत्तेरिति** । केचित्तु जन्यमहत्त्वाधिकरणत्वात् त्र्यणुकं कार्यं सावयवं चाङ्गीकार्यमिति पूर्ववाक्यार्थं वर्णयन्तस्त्र्यणुकमहत्त्वस्य नित्यत्वादसिद्धो हेतुरित्येतद्वाक्यतात्पर्यमाहुः । ननु त्र्यणुकमहत्त्वं जन्यं चाक्षुषमहत्त्वात् घटमहत्त्ववदित्यनुमानेनानित्यत्वसिद्धेः कथं महत्त्वस्य नित्यता स्यादिति शङ्कते **चाक्षुषेति** । **बाधकेति** । तथा चाप्रयोजकत्वान्न तेनास्यानित्यत्वसिद्धिरिति भावः । **अत एवेति** । कार्यत्वसाधकयोरुक्तहेत्वोरप्रयोजकत्वेनासाधकत्वादेवेत्यर्थः । **असिद्धमिति** । तथा च न तेन सावयवत्वसाधनमुपपद्यत इति भावः । ननूक्तहेतूच्छित्तिरेव विपक्षे बाधिकाऽस्तीति कथं तदभाव इत्यतः किमत्र निरवयवत्वेऽवयवपरिमाणरूपकारणाभावेन महत्त्वरूपविशेषणारम्भो न स्यादिति विवक्षितमुत द्रव्यारम्भप्रयोजकस्य सावयवत्वस्य तत्राभावाद्द्रव्यरूपविशेष्यारम्भ एव न स्यादित्यभिमतमिति विकल्पद्वयं मनसि निधायाद्यं दूषयति **बहुत्वेनैवेति** । त्र्यणुकस्य सावयवद्व्यणुकारम्भकत्ववादिनापि न अवयवगतपरिमाणेन त्र्यणुके महत्त्वोपपादोऽङ्गीकृतः । तदवयवे द्व्यणुके महत्त्वाभावात्, किन्तु बहुत्वेनैव । तथा च निरवयवारब्धत्वेऽपि तदवयवगतबहुत्वेनैव तन्महत्त्वारम्भो भविष्यतीति भावेन बहुत्वेनैवेत्येवकारः । द्वितीयं दूषयति **द्रव्यारम्भ इति** । अन्यथा त्वन्मते निरवयवत्वात् परमाणोरपि द्व्यणुकारम्भकत्वं न स्यादिति भावः । ननु तदवयवकल्पनायां प्रमाणाभावादेव तेषां परमाणुत्वमित्युक्तमित्यत आह **महद्द्रव्यारम्भकत्वेनेति** । ननु तदवयवकल्पनायां बाधकसद्भावात् तेषामेव परमाणुत्वमित्यभिप्रेत्य शङ्कते **अनवस्थेति** । **कथं चेयमिति** । मूलक्षयाभावादिति भावः । ननु तथा सत्यनन्तावयवारब्धत्वाविशेषान्मेरुसर्षपादीनां समपरिमाणत्वस्य प्रसङ्गात् तस्य चाप्रामाणिकत्वादप्रामाणिकस्वीकाररूपानिष्टापादकत्वात् कथं मूलक्षयाभाव इत्यत आह **मेरुसर्षपादीनामिति** । **दूषितेति** । आनन्त्येऽपि तारतम्यसद्भावादित्यादिनेति शेषः । तथाऽपि प्रमितघटादिकार्योत्पत्तिपरित्यागापादकतयाऽनवस्था बाधिका भविष्यतीत्याशङ्कते **घटादीति** । परमाणोर्निरवयवत्वाङ्गीकारे द्व्यणुकादिक्रमेण घटादिकार्योत्पत्तिसम्भवेऽपि परमाणोरपि सावयवत्वेऽवयवपरम्पराया अविश्रान्तेर्घटादिकार्यानुत्पत्तिः प्रसज्यत इत्यर्थः । सावयवस्यैवेत्यतःपरं कस्यचिदिति शेषः । तथा चावयवपरम्पराया अनवधिकत्वेऽप्यारम्भकावयवपरम्परायाः परमाण्ववयवभूतभूतसूक्ष्मेषु विश्रान्तेर्न घटादिकार्यानुत्पत्तिलक्षणमूलक्षयोऽपीति भावः । ननु परमाणोरपि सावयवत्वे कथं तस्य परमाणुत्वम् । यो हि सर्वतोऽपकृष्टो यतः परमाणुर्नास्ति तं हि परमाणुमाचक्षते । तस्य च सावयवत्वेऽवयविनोऽवयवानामपकृष्टपरिमाणत्वावश्यम्भावात् परमाणुत्वा-

सम्भवादित्यतः स्यादयं विरोधो यदीदं परमाणुशब्दप्रवृत्तिनिमित्तं स्यान्न चैवम् । सावयवत्वेन साक्षिसिद्ध तस्मिंस्तदसम्भवात् । किन्नामान्यदेवेति न व्याघात इत्यभिप्रेत्योक्तमर्थं स्मारयति **यथोक्तमित्यादिना** । न तु सावयवस्यापि परमाणोर्नित्यत्वे सम्मतिकथनमेतत् । तथा सति पूर्वोत्तरविरोधप्रसङ्गादित्यवधेयम् ।

वा०र०— अप्रयोजकत्वसमर्पणाय प्रवृत्तानामित्यर्थः । केचिदित्युक्तास्वरसस्तु तथा सति नित्यत्वादित्युक्तिमात्रेण तत्साध्योपपत्तिः पर्यन्तधावनानर्थक्यात् । जन्यमहत्त्वाद्रित्येव वक्तव्यतया महत्त्वस्य कारणबहुत्वं कारणमिति कारणबहुत्वस्य विशिष्य महत्त्वकारणत्वोक्ते शङ्काग्रन्थे वैय्यर्थ्याशङ्कासमाधानयोः अविरुद्धाभिप्रायान्तरस्यापि स्पष्टप्रतिभासत्वेन उक्तकुसृष्ट्याश्रयणस्यानर्थक्याच्चैवं वाक्यार्थविनोदोक्तो द्रष्टव्यः । **चाक्षुषमहत्त्वादिति** । चाक्षुषं यत् महत्त्वं चाक्षुषस्य वा यत् महत्त्वं तस्य भावः तत्त्वं तस्मादित्यर्थः । महत्त्वत्वमात्रस्यात्मगतमहत्त्वेन व्यभिचारादुक्तं **चाक्षुषेति** । त्र्यणुकस्येति वाक्ये **सावयवद्व्यणुकेति** । **अवयवगतेति** । महत्त्वोत्पाद इति च पाठः ।

स०व्र०— अस्तु वेति । न च महत्त्वस्य सावधिकत्वात् त्र्यणुकापेक्षया अणोरेवाभावान्न तस्य महत्त्वापत्तिरिति वाच्यम् । तदंशानामेव तदपेक्षया न्यूनपरिमाणत्वेन महत्त्वसम्भवादिति गूढाभिप्रायात् । **महतोऽपीति** । अन्यथा प्रत्यक्षत्वेनात्मनोऽपि कार्यत्वापत्तेरिति भावः । महत्त्वे सति क्रियावत्त्वात् इत्यत्राप्यप्रयोजकत्वम् । न च नित्यत्वे क्रियाया अनुपपत्तिः । परममहत्त्वस्यैव क्रियाया अभावे प्रयोजकत्वेन नित्यत्वस्य तदप्रयोजकत्वेन नित्यत्वेऽपि परममहत्त्वाभावेन क्रियाया उपपत्तेरित्याह **परममहत्त्वाभावेनेति** । **अत एवेति** । कार्यत्वसाधकत्वेनाभिप्रेतयोः महत्त्वे सति चाक्षुषत्वमहत्त्वे सति क्रियावत्त्वयोरप्रयोजकत्वेन तदसाधकत्वादेव कार्यद्रव्यत्वस्यासिद्धत्वान्न तेन सावयवत्वसाधनमुपपन्नमिति भावः । **महद्द्रव्यारम्भकत्वादिति** । न च 'आन्महतस्समानाधिकरणजातीययोः इत्यात्वे महाद्रव्यारम्भकत्वादिति वक्तव्यत्वात् महद्द्रव्यारम्भकत्वादित्यनुपपन्नमिति वाच्यम् । द्रव्यं द्विविधम् । परमाणुरूपं द्रव्यम्, महद्द्रव्यं चेत्येवम् । महद्द्रव्यमित्यस्य संज्ञात्वेन 'दृष्टानुगतिर्हि संज्ञा-छन्दसोः' इत्युक्तसमाधानस्यात्राप्युपपन्नत्वात् । किरणावल्यां 'महद्द्रव्यारम्भकत्वम्' इत्युक्तत्वेनास्य परोक्तानुवादरूपत्वेन अनुकरणस्य यथोपदिष्टस्यैव साधुत्वेनादोषादित्याहुः ।

विट्ठल०— धर्मिकल्पनात इति । द्व्यणुकादिरूपधर्मिकल्पनापेक्षया द्रव्यचाक्षुषतायां कारणतया महत्त्वातिरिक्तधर्मान्तरकल्पनस्येत्यर्थः । **अस्तु वेति** । त्र्यणुकस्य स्वांशापेक्षया महत्त्वेऽपि चतुरणुकाद्यपेक्षयाऽणुत्वस्य सम्भवादिति भावः । त्र्यणुकस्य कार्यत्वं साधितमिति कथं तस्य परमाणुत्वमङ्गीक्रियत इत्यत आह **कार्यत्वसाधनमिति** । कार्यत्वसाधकहेतुद्वयोच्छित्तिप्राप्तानां प्रयोजकतेत्यतो न तावदाद्यहेतूच्छित्तिरित्याह **महतोऽपीति** । अकार्यस्य महतोऽप्यात्मनः प्रत्यक्षत्ववन्महतस्त्र्यणुककार्यत्वेऽपि चाक्षुषत्वोपपत्तेरित्यर्थः । नापि महत्त्वे सति क्रियावत्त्वरूपद्वितीयहेतूच्छित्तिरित्याह **परममहत्त्वाभावेनेति** । कार्यत्वेऽपीति

शेषः । अकार्यत्वे महत्त्वमेवानुपपन्नं तस्य कारणबहुत्वं निमित्तकत्वादिति शङ्कते **महत्त्वस्येति** । जन्य-महत्त्वस्यैवैवं न तु नित्यमहत्त्वस्येत्याशयेन परिहरति **नेति** । नित्यत्वमसिद्धम् । चाक्षुषमहत्त्वेन हेतुना घटादिवज्जन्यत्वसाधनादिति शङ्कते **चाक्षुषेति** । अस्तु चाक्षुषमहत्त्वं जन्यत्वं मास्तु । तथा च विपक्षे बाधकाभावादप्रयोजकतेति परिहारादिति बाधकाभावादिति । सावयवत्वसाधकहेतुं दूषयति **अत एवेति** । अकार्यत्वाङ्गीकार्यत्वाङ्गीकारे बाधकाभावादित्यर्थः । त एव परमाणु इतीत्यतःपरं उपपत्तेरिति शेषः । **तेषां** त्र्यणुकावयवानाम् । **ननु महद्द्रव्येति** । 'आन्महतः समानाधिकरणजातीययोरि'त्यत्र महत आदिति वक्तव्ये विधेयोद्देश्ययोर्य्वत्यासेन निर्देश आत्त्वविधेरनित्यत्वज्ञापनार्थ इति प्रमेयदीपिकोक्तत्वेन महाद्रव्येत्युक्त्यभावो न दोषाय । यद्वा किरणावल्यां महद्द्रव्यारम्भकत्वादित्येवोक्तं तदनुवादोऽयमित्यदोषः । ननु महद्द्रव्यारम्भकत्वे सावयवत्वं प्रत्येकं तथा च निरवयवत्वे महद्द्रव्यारम्भकत्वरूपहेतूच्छित्तिरेव बाधकमिति चेत् अत्र वक्तव्यं किं निरवयवे अवयवपरिमाणरूपकारणाभावेन महत्त्वरूपविशेषणारम्भो न स्यादित्युच्यते उत सावयवत्वस्य द्रव्यारम्भप्रयोजकत्वेन तदभावे द्रव्यरूपविशेष्यारम्भ एव न स्यादितीति आद्यं दूषयति **बहुत्वेनेति** । द्वितीयं दूषयति **द्रव्यारम्भक इति** । त्वन्मते निरवयवस्यापि परमाणोः द्रव्यारम्भकत्वस्वीकारादिति भावः । **अनवस्थेति** । द्व्यणुकारम्भकाणामिति सावयवद्रव्यारब्धत्वे तदवयवानां तदवयवानां च तथेत्यनवस्था स्यादित्यर्थः । **कथं चेयमिति** । मूलक्षयो हेतुत्वादिति भावः । ननु अवयवानवस्थायामनन्तावयवारब्धत्वेन मेरुसर्षपयोस्तुल्यपरिमाणत्वं प्रसज्येत इत्यत आह **मेरुसर्षपेति** । ननु द्व्यणुकावयवानां तदवयवानां च सावयवेत्यपर्यवसाने सर्वेषामपि सावयवत्वेन जन्यत्वादनन्तजन्यपदार्थसापेक्षस्य पटादिकार्यस्यैवानुपपत्तिरिति शङ्कते **घटादीति** । **सावयवस्यैवेति** । अनन्तावयवोपेतस्यापि प्रकृतिपरमाणोरित्यर्थः । तथा चावयवपरम्पराया आनन्त्येऽपि जनिपरम्पराया कश्चिन्न दोष इति भावः ।

॥ इति उक्तार्थसमर्थनम् ॥

॥ इति द्व्यणुकसाधकानुमानेऽपि त्र्यणुकस्य पक्षीकर्तुमशक्यता ॥

॥ इति द्व्यणुकसाधकानुमानेऽपि कस्यापि पक्षीकर्तुमशक्यता ॥

॥ इति अनुमितद्व्यणुकस्यापि पक्षीकर्तुमशक्यता ॥

॥ इति परमाण्वितरस्यापि पक्षीकर्तुमशक्यता ॥

॥ इति कस्यापि पक्षीकर्तुमशक्यता ॥

॥ इति परमाण्वादौ अनुमानप्रामाण्याभावः ॥

॥ इति अनियमसृष्टेः साक्षिमितत्वसमर्थनम् (तत्र शङ्का तत्समाधानं च) ॥

॥ इति द्व्यणुकादिद्रव्यासमवायिकारणविषये अन्यथाप्रतिपत्तिरूपद्वितीयशङ्कानिराकरणम् ॥

* * *

॥ अथ तत्र पूर्वोक्तस्य(५०)आकाशादिपरिमाणोत्कर्षानन्त्यानुमानिकत्वायुक्तत्वस्य प्रपञ्चनम् ॥
॥ अथ देशान्तरादिसाधकानुमानानां शशशृङ्गादिसाधकानुमानतुल्यता ॥

१११ **सु०—** एवं परमाणुद्व्यणुकयोरनुमानतः सिद्धिमपाकृत्य प्रसङ्गादाकाशादि-परिमाणोत्कर्षानन्त्यस्यानुमानिकत्वं न युज्यत इति यदुक्तं तत्प्रपञ्चयति **देशान्तरेति** ।

अनु०— देशान्तरादिशब्दाश्च शशशृङ्गादिशब्दवत् ।

'योऽयं योजनादिपरिच्छिन्नो देशः सम्प्रतिपन्नः, स स्वतः स्थूलेन देशान्तरेण युक्तो देशत्वाद्धस्तादिदेशवदि'त्याद्यनुमानैः खल्वाकाशादिपरिमाणोत्कर्षानन्त्यं साधनीयम् । त एते देशान्तरादिशब्दाः देशान्तरादिसाधकानुमानप्रयोगाः । **शशशृङ्गादिशब्दवत्** शशशृङ्गादिसाधकानुमानप्रयोगैस्तुल्यं वर्तन्ते । **अनेनैव प्रकारेण शशशृङ्गादिकमप्यनुमातुं शक्यत इति यावत् । शब्दमात्रमेवैतत्, न त्वनुमानमिति सूचयितुं शब्दा इत्युक्तम् ॥**

न केवलमाकाशादीनां परिमाणोत्कर्षानन्त्यानुमानं प्रतिपक्षपराहतम्; अपि तु, 'सम्प्रतिपन्नानि सर्वशृङ्गाणि शृङ्गान्तरवन्ति शृङ्गत्वाद्गोशृङ्गवत्', 'विमताः सर्वे पुत्राः पुत्रान्तरोपेताः पुत्रत्वाद्देवदत्तपुत्रवदि'ति शशशृङ्गादिसाधकानुमानाभाससमानयोगक्षेमं च इत्यर्थः ।

परि०— इति यदुक्तमिति । 'यदि नो साक्षिगम्यं तन्महत्त्वं केन गम्यत' इत्यादाविति भावः । **स्वत इति** । स्वस्मादित्यर्थः । शब्दपदं प्रयोगपरमित्युपेत्याह **प्रयोगा इति** । **प्रयोगैस्तुल्यं वर्तन्त इति** । तेन तुल्यं क्रिया चेद्वतिरिति तृतीयान्ताद्वतिरिति भावः । मूले चशब्दः 'विश्रान्ति-स्तारतम्येन दृश्यते ह्यनुमानत' इत्यत्रोक्तेन परिमाणोत्कर्षतारतम्यमियत्तावत् परिमाणतारतम्यत्वात् । तदपकर्षतारतम्यवदिति प्रतिपक्षेण समुच्चयार्थ इत्याह **न केवलमिति** । आदिपदगृहीतमाह **विमता इति** । वन्ध्यापुत्रोऽप्यनेन सिद्ध्येदिति भावः ।

यादु०— योऽयं योजनादिपरिच्छिन्न इति । सर्वोऽपि परिच्छिन्नो देशः पक्ष इत्यर्थः । **स्वतः स्थूलेनेति** । स्वस्मात्स्थूलेनेत्यर्थः । एवं च यद्देशान्तरं सिद्ध्यति तत् अपरिच्छिन्नमेव भविष्यतीति भावः । **प्रतिपक्षपराहतमिति** । परिमाणोत्कर्षतारतम्यम् इयत्तावत् परिमाणतारतम्यत्वात् तदपकर्षतारतम्यवदित्युक्त-सत्प्रतिपक्षपराहतमित्यर्थः । **पुत्रान्तरोपेता इति** । इदं च वन्ध्यापुत्रसाधकमित्यवगन्तव्यम् ।

वं०प०— यदुक्तमिति । 'विश्रान्तिस्तारतम्येन दृश्यते ह्यनुमानत' इत्यनेनेत्यर्थः । 'तत्र तस्येवेति' षष्ठीसप्तम्यर्थयोरसम्भवात् 'तेन तुल्यं क्रिया चेद्वतिरि'त्यनेन क्रियातौल्ये इयं वतिरित्याह **तुल्यमिति** । अनुव्याख्यानस्य भावमाह **न केवलमित्यादिना** ।

श्रीनिधि०— इत्याद्यनुमानैरिति । तत्तद्देशपक्षीकारेणानुमानानां बहुत्वात् बहुवचनम् । **आकाशादीति** । अत्रादिपदेन कालो गृह्यते । तत्रैवं प्रयोगः । विप्रतिपन्नः संवत्सरादिरूपः कालः स्वतःस्थूलेन कालान्तरेण युक्तः । कालत्वात् मासादिकालवदिति । **शब्दा इत्युक्तमिति** । अन्यथा देशान्तरादिसाधकप्रयोगा इत्यवक्ष्यदिति भावः । **तुल्यं वर्तत इति** । अनेन तेन तुल्यं क्रिया चेदिति सूत्रेण वतिप्रत्यय इति ज्ञापयति । तत्र तस्यैवेतिप्राप्तावनन्वय इत्यत एव ज्ञापितम् । **प्रतिपक्षपराहतमिति** । 'विश्रान्तिस्तारतम्येन दृश्यते ह्यनुमानत' इति प्रागुक्ततारतम्यानुमानपराहतमित्यर्थः ।

शे०वा०— ननु परमाण्वादेरानुमानिकत्वनिरासस्य नानुमेति प्रक्रान्तस्य पूर्वग्रन्थेनैव सिद्धत्वात् किं 'देशान्तरादिशब्दाश्चे'त्यादिभाष्येण । न चेदमाकाशादिपरिमाणोत्कर्षानन्त्यस्यानुमानिकत्वाभावप्रतिपादनपरमिति नानर्थक्यमिति वाच्यम् । 'विश्रान्तिस्तारतम्येन दृश्यते ह्यनुमानत' इत्यादिनैवाकाशादिपरिमाणोत्कर्षानन्त्यस्य आनुमानिकत्वाभावप्रतिपादनेन तादर्थ्यायोगात् । न च तस्यैवायं प्रपञ्च इति वाच्यम् । तथा सत्यस्य ग्रन्थस्य तत्रैव सन्निवेशनीयतया परमाण्वादेरानुमानिकत्वनिरासग्रन्थे तन्निवेशस्यासङ्गतत्वापातादित्याशङ्क्य वृत्तानुवादेन सङ्गतिप्रदर्शनपूर्वकं पूर्वोक्तानुमानिकत्वाभावप्रपञ्चनपरतयोत्तरग्रन्थं सङ्गमयति **एवमित्यादिना** । **यदुक्तमिति** । 'विश्रान्तिस्तारतम्येने'त्यादिनेति शेषः । **योऽयं योजनादीति** । सर्वोऽपि परिच्छिन्नो देशः पक्ष इत्यर्थः । **स्वतः स्थूलेनेति** । स्वस्मात्स्थूलेनेत्यर्थः । एवं च यद्देशान्तरं सिद्ध्यति तदपरिच्छिन्नमेव भविष्यतीति भावः । इत्यादीत्यादिपदेन सर्वोऽपि परिच्छिन्नः कालः स्वतः स्थूलेन कालान्तरेण युक्तः कालत्वान्मुहूर्तादिकालवदित्यनुमानपरिग्रहः । आकाशादीत्यादिपदेन कालादिपरिग्रहः । देशान्तरादिशब्दानां देशान्तरादिशब्दमात्रपरत्वे देशान्तरादिसाधकानुमानप्रयोगस्य शशशृङ्गादिसाधकानुमानाभाससमानयोगक्षेमताया भाष्यादलाभप्रसङ्गात् तल्लाभाय लक्षणया तत्साधकानुमानप्रयोगपरतया व्याचष्टे **त एते देशान्तरादिति** । **शशेति** । अनेन 'तेन तुल्यं क्रिया चेद्वतिरि'ति सूत्रेण विहितोऽयं वतिरित्युक्तं भवति । एतदेव विशदयति **अनेनैवेति** । स्वायत्तन्यायविरोधमाशङ्क्य ज्ञापनीयार्थविशेषस्य सत्त्वान्नैवमित्याह **शब्दमात्रमेवैतदिति** । देशान्तरादिशब्दाश्चेत्यत्रत्यभाष्ये चशब्दस्य शशशृङ्गादिशब्दवच्चेति भिन्नक्रमत्वान्नानर्थक्यमित्यभिप्रेत्य तदर्थमाह **न केवलमित्यादिना** । **प्रतिपक्षपराहतमिति** । परिमाणोत्कर्षतारतम्यमियत्तावत् परिमाणतारतम्यत्वात् तदपकर्षतारतम्यवदिति 'विश्रान्तिस्तारतम्येन दृश्यते ह्यनुमानतः' इति प्रागुक्तप्रतिपक्षपराहतमित्यर्थः । **पुत्रान्तरोपेता इति** । इदं च वन्ध्यापुत्रसाधकम् ।

वा०र०— प्रतिपक्षपराहतमित्येतत् प्रतिपक्षाप्रतीतेः विश्रान्तिस्तारतम्येनेति प्राचीनमूलानुसारेणाह **परिमाणोत्कर्षेणेति** । उपलक्षणमेतत् । यं देशं पक्षीकृत्य आकाशरूपस्थलदेशसाधनं तमेव पक्षीकृत्य कालदृष्टान्तेन स्वतः स्थूलदेशान्तरेण युक्तत्वाभावसाधनेन सम्भवात् प्रतिपक्षपराहतत्वं इत्यपि ज्ञेयम् ।

विट्ठल०— इति यदुक्तमिति । 'यदि नो साक्षिगम्यं तन्महत्त्वं केन गम्यत' इत्यादावित्यर्थः । **स्वतःस्थूलेनेति** । स्वस्मात्स्थूलेनेत्यर्थः । **इत्याद्यनुमानैरिति** । स च योजनादितः स्थूलो देशतः स्वतःस्थूलेन देशान्तरेण युक्त इति पुनस्तं च पक्षीकृत्य एवं पुनः पुनः साधने आकाशादिकमपरिच्छिन्नमेव सिद्ध्यतीति भावः । **तुल्यं वर्तत इति** । तेन तुल्यं क्रिया चेद्वर्तिरिति तृतीयान्ताद्वर्तिरिति भावः । मूलगत चशब्दाभिप्रायकथनपूर्वकं शशशृङ्गादिशब्दवदित्युक्तमुपपादयति **न केवलमिति** । **प्रतिपक्षपराहतमिति** । परिमाणोत्कर्षतारतम्यमियत्तावत् परिमाणतारतम्यत्वादपकर्षतारतम्यवदिति । विश्रान्तिस्तारतम्येनेत्यनेनोक्तप्रतिपक्षपराहतमित्यर्थः । आदिपदोपात्तमाह **विमता इति** । वन्ध्यापुत्रोऽप्यनेन सिद्धिरिति भावः ।

* * *

॥ अथ तत्रान्ते उक्तदोषपरिहारप्रयत्ने सिद्धसाधनत्वादिदोषदर्शनम् ॥

११२ सु०— न (च) वयमेवमाकाशादिपरिमाणोत्कर्षानन्त्यमनुमिमीमहे येनातिप्रसङ्गः स्यात् । किन्तु 'विप्रतिपन्नो देशः स्वतः स्थूलेन सदृशेन सजातीयेन वा द्रव्यान्तरेण युक्तो देशत्वाद्वस्तादिदेशवत्', सोऽप्येवं, सोऽप्येवम्; एवं कालेऽप्यनुमातव्यम् । न चैवं शशशृङ्गानुमानं शक्यम्, तस्यात्यन्तासतोऽनुपलभ्यमानस्य गवादिशृङ्गैः सादृश्यसाजात्ययोरभावात् । न च आकाशादेरप्येकैकत्वात् सादृश्याद्यभावः, औपाधिकभेदेन तदुपपत्तेः । इत्यत आह सदृशं चेति ।

अनु०— सदृशं च सजातीयं नास्मत्पक्षे किमेव हि ।

सम्प्रतिपन्नदेशादिना सदृशं सजातीयं (च) वा अस्मत्पक्षे गगनादिपरिमाणोत्कर्षानन्त्यमनभ्युपगच्छतां पक्षे **किमेव न** भवति । किन्तु भवत्येवेति । तथा च सम्प्रतिपन्नदेशस्य, ततः स्थूलेनात्मना, सदृशेन सजातीयेन वोपेतत्वस्य सिद्धत्वात्सिद्धसाधनता स्यात्; आकाशादिपरमाणोत्कर्षानन्त्यासिद्धेरर्थान्तरता चेति ।

सम्प्रतिपन्नदेशस्येश्वरादिमत्त्वं बाधितं सम्बन्धाभावादिति चेन्न, देशान्तरेणापि सम्बन्धाभावात् । एतेन शशविषाणादिसाधकानुमानेऽपि बाधाभिधानं परास्तम्, देशान्तरानुमानेऽपि साम्यात् ।

तदेवं परमाणुद्व्यणुकयोराकाशादिपरिमाणोत्कर्षानन्त्यस्य च साक्षिसिद्धतामनङ्गीकृत्य केवलानुमानवेद्यत्वस्वीकरणमनुपपन्नमित्युक्तम् ।

परि०— आत्मनेति । परमतरीत्या जीवात्मनेति वेश्वरात्मनेति वार्थः । नित्यत्वद्रव्यत्वादिना सादृश्यसाजात्ययोर्भावादिति भावः । **सम्बन्धाभावादिति** । अजसम्बन्धयोगानभ्युपगमाद्विभुत्वेनोर्ध्वाधरीभावशून्ययोराधाराधेयभावायोगाच्चेति भावः । **देशान्तरेणापीति** । एकत्वादिति भावः । **आकाशादेः परिमाणानन्त्यानुमानस्याभाससाम्योक्त्या साक्षिसिद्धत्वसमर्थनम् ॥**

गु०दी०— गगनादिपरिमाणोत्कर्षानन्त्यमनभ्युपगच्छताम् इत्यनेन देशत्वादिना साजात्यं शब्दकारणत्वादिना सादृश्यं च न वक्तुं शक्यम् । ततोऽन्यधर्मेण सादृश्यसाजात्ययोरीश्वरादावपि सम्भवादिति किमेव नेत्यर्थः ।

यादु०— आत्मनेति । ईश्वरेणेत्यर्थः । आत्मन्यपि द्रव्यत्वेन सादृश्यसाजात्ययोः सत्त्वादिति भावः । **बाधाभिधानमिति** । शशशृङ्गेण सम्बन्धाभावाच्छृङ्गान्तरवन्तीत्येतद्बाधितमिति बाधाभिधानमित्यर्थः ।

वं०प०— स्वतः स्थूलेन सदृशेन द्रव्यान्तरेण युक्तः, स्वतः स्थूलेन सजातीयेन द्रव्येण युक्तः, इति प्रयोगद्वयम् । सदृशेन सजातीयेन वेत्यत्र विजातीययोरपि ब्राह्मणशूद्रयोः सादृश्यदर्शनेन सदृशसजातीयशब्दौ भिन्नार्थविवेति ज्ञातव्यम् । परिमाणोत्कर्षानन्त्यमनभ्युपगच्छतामित्येव पाठः । **सम्बन्धाभावादिति** । ईश्वराकाशयोरुभयोरपि व्याप्तत्वेन क्रियाभावात् तज्जन्यः संयोगो न युक्त इत्यर्थः । **सम्बन्धाभावादिति** । स्वस्य स्वेनेत्यर्थः ।

कं०रा०— सदृशेन सजातीयेन वेति । सादृश्यसमानधर्ममात्रनिबन्धनं सजातीयतन्तुसमानजातिनिबन्धनमिति भेदः । **सम्प्रतिपन्नदेशस्येति** । सम्प्रतिपन्नदेशस्य तथा स्थूलेनेश्वरादिना संयोगस्य समवायस्य वा अभावात् तदुपेतत्वं बाधितं अतः सिद्धसाधनमर्थान्तरता च नेति भावः । **न देशान्तरेणेति** । सम्प्रतिपन्नदेशस्य देशान्तरेणापि सम्बन्धाभावेन तदुपेतत्वस्य बाधितत्वात् सम्प्रतिपन्नदेशस्य तत्तस्थूलेन सदृशेन सजातीयेन वा देशान्तरेणोपेतत्वं न सिद्धचेदित्यर्थः । **एतेनेति** । सम्प्रतिपन्नानि सर्वशृङ्गाणि शृङ्गीतरवन्तीति

शशविषाणसाधकानुमानेऽपि सम्प्रतिपन्नसर्वशृङ्गानां शृङ्गान्तरेण सम्बन्धाभावाद्बाध इति यद्बाधाभिधानं तत्सम्प्रतिपन्नदेशस्य तत्तत्स्थूलेन देशान्तरेण युक्तत्वसाधकानुमानेऽपि बाधसाम्यमित्यनेन निरस्तमित्यर्थः ।

श्रीनिधि०— अत्यन्ताऽसतोऽनुपलभ्यमानस्येति । अत्यन्ताऽसत्त्वे हेतुरनुपलभ्यमानस्येति । केनापि प्रमाणेऽनुपलभ्यमानस्येत्यर्थः । **सादृश्यसाजात्ययोरभावादिति** । तस्य निःस्वरूपत्वे न सर्वधर्म-विनिर्मुक्तत्वादन्यथाऽसत्त्वव्याघातादिति भावः । **एकैकत्वादिति** । सादृश्यसाजात्ययोर्भेदनियतत्वादिति भावः । **गगनादिपरिमाणोत्कर्षानन्त्यमभ्युपगच्छतां पक्षे किमेवं न भवतीति** । सर्वस्यापि सदृशत्वे साजात्ये च सति तादृशदेशान्तरमादायापि साध्यपर्यवसानेन सिद्धसाधनतार्थान्तरता । अत उक्तं **अनभ्युपगच्छतां पक्ष इति** । न पुनर्गगनपरिमाणोत्कर्षमभ्युपगतां पक्ष इत्यस्य सर्वस्य साजात्यसादृश्योपपादनार्थत्वमिति भ्रमि-तव्यम् । येनैव शशशृङ्गादेरित्युत्तरवाक्यं आकाशादीनां परिमाणोत्कर्षानानन्त्यानुमस्याभाससमानयोगक्षेमता-प्रदर्शनपरमिव न भाति । तदयुक्तम् । देशान्तरादिशब्दाश्चेत्यनेन पुनरुक्तिप्राप्तेरिति भावेन यथा न पुनरुक्तिः तथा तत्सङ्गमयति **तदेवमित्यादिना** ।

शे०वा०— ननु सदृशं च सजातीयमित्युत्तरभाष्यमनर्थकम् । न च सर्वस्य सादृश्यसाजात्य-प्रतिपादनार्थं तदिति वाच्यम् । तस्याप्यनर्थकत्वात् । न चात्मनो देशान्तरादिना सादृश्यादिसद्भावसिद्धि-स्तत्प्रयोजनमिति वाच्यम् । तस्या अपि निष्प्रयोजनत्वात् । न च देशान्तरादिसाधकानुमानस्यात्मना सिद्ध-साधनत्वादिसिद्धिस्तत्प्रयोजनमिति वाच्यम् । आत्मनः परिच्छिन्नदेशादिभ्योऽधिकपरिमाणत्वमात्रेणैव देशा-न्तरादिसाधकानुमानस्यात्मना सिद्धसाधनत्वादिवर्णनसम्भवेन तदर्थमात्मनः सादृश्यादेरनपेक्षितत्वात् । न च स्वतः स्थूलेन सदृशेन सजातीयेन च द्रव्यान्तरेण युक्तत्वे साध्ये सादृश्यसाजात्ययोरभावे कथमात्मनो-ऽधिकपरिमाणवत्वमात्रेण सिद्धसाधनमिति वाच्यम् । स्वतः स्थूलेन देशान्तरेण युक्तत्वमात्रसाधनेनापि देशान्तरादिसिद्धिसम्भवेन सादृश्यादिघटितोक्तरूपसाध्यस्यैवाकर्तव्यत्वात् । न च देशान्तरादिसाधकानुमानस्य शशशृङ्गादिसाधकानुमानाभाससमानयोगक्षेमत्वशङ्कानिरासाय सादृश्यादिघटितोक्तरूपसाध्यान्तरकरणमावश्यक-मिति वाच्यम् । सम्प्रतिपन्नानि सर्वशृङ्गाणि स्वसदृशसजातीयशृङ्गान्तरवन्ति शृङ्गत्वाद्गोशृङ्गादिवदित्यनुमानस्य कर्तुं शक्यतयोक्तरूपसाध्यान्तरकरणेऽपि शशशृङ्गादिसाधकानुमानाभाससमानयोगक्षेमताया अवर्जनीयत्वात् । आकाशादेरेकैकत्वेन तद्भेदापेक्षसादृश्यादिघटितसाध्यस्य बाधितत्वाच्च तत्साधनस्यैवायोगादित्याशङ्क्य साध्या-न्तरकरणेऽनुमानाभाससमानयोगक्षेमताया बाधस्य चाप्रसङ्गाद्युक्तं सिद्धसाधनत्वादिना तन्निराकरणायात्मनः सादृश्यादिसमर्थनमित्यभिप्रेत्य साध्यान्तरनिरासकतयोत्तरभाष्यं योजयितुं सादृश्यादिघटितसाध्यकदेशान्तरा-नुमानेऽनुमानाभाससमानयोगक्षेमत्वाद्यभावशङ्कामुत्थापयति **न च वयमित्यादिना** । तस्यात्यन्तासत्त्वमेव कुत इत्यतो, योग्यत्वे सत्यनुपलभ्यमानत्वादिति भावेनोक्तम् **अनुपलभ्यमानस्येति** । **सादृश्यसाजात्ययोरिति** । तयोः सद्धर्मत्वादिति भावः । **सादृश्याद्यभाव इति** । सादृश्यसाजात्ययोर्व्यक्तिभेदनियतत्वादिति भावः ।

एकैकस्याप्याकाशादेरौपाधिकभेदेन नानाभूतत्वान्न सादृश्याद्यनुपपत्तिरित्याह **औपाधिकेति** । **ततः** सम्प्रतिपन्नदेशात् । **आत्मनेति** । स्वेनेत्यर्थः । सम्प्रतिपन्नदेशेनेति यावत् । सजातीयेनेत्यतःपरमीश्वरादिनेति शेषः । ईश्वरादेरपि गगनादिना द्रव्यत्वेन रूपेण सादृश्यसाजात्ययोः सद्भावादिति भावः । न च स्वतः स्थूलेन सदृशेन सजातीयेन च द्रव्यान्तरेणोपेतत्वमात्रसाधने उक्तरीत्या सिद्धसाधनत्वप्राप्तावपि तादृशेन देशान्तरेणोपेतत्वसाधनान्न दोष इति वाच्यम् । तादृशदेशान्तरस्याप्रसिद्धत्वेन तत्साधनेऽप्रसिद्धविशेषणत्वप्रसङ्गेन तद्विया द्रव्यान्तरयुक्तत्वमात्रस्यैव साधनीयत्वेनोक्तदोषतादवस्थ्यादित्याशयात् । ननु बाधादेव नार्थान्तरमित्याशङ्कते **सम्प्रतिपन्नदेशस्येति** । ईश्वरेण सह सम्प्रतिपन्नदेशसम्बन्ध उभयोः समानदेशत्वं विना न सम्भवतीत्युभयोरप्येकदेशेन सम्बन्धो वाच्यः । स च न सम्भवति । देशस्य देशान्तरेण सम्बन्धाभावात् । तथा च बाध इति भावः । उक्तरीत्या देशस्य देशान्तरेण सम्बन्धोऽपि समानदेशत्वेनैव वाच्यः । स चोक्तरीत्या सम्भवतीति बाध एवेत्याह **देशान्तरेति** । तथा च बाधादेव न पक्षेऽपि साध्यसिद्धिर्भवेदिति भावः । ननु देशान्तरानुमानस्य न शशशृङ्गाद्यनुमानसमानयोगक्षेमत्वं वक्तुं युक्तम् । शशशृङ्गेण सह सम्प्रतिपन्नशृङ्गाणां सम्बन्धाभावेन शृङ्गान्तरवत्त्वस्य बाधितत्वेन वैषम्यादित्यत आह **एतेनेति** । एतेनेत्युक्तमेव हेतुं दर्शयति **देशान्तरानुमानेऽपीति** । तथा च बाधितत्वस्योभयत्रापि साम्यादाभाससमानयोगक्षेमत्वमवर्जनीयमिति भावः ।

वा०र०— सिद्धसाधनत्वादिति । अत्र **आदि**पदेनार्थान्तरतासङ्ग्रहः । **औपाधिकभेदेनेति** । घटमठाद्युपाधिनिमित्तकभेदेनेत्यर्थः । **यावदिति** । तथा च सम्प्रतिपन्नेन यत्सदृशदृष्टान्तेनेत्यादि योजनीयमिति भावः । सम्प्रतिपन्नदेशस्य ईश्वरादिमहत्त्वमित्युत्तरमूलानुसारेण शेषपूरणेन साकाङ्क्षत्वं निवारयति **ईश्वरादिनेति शेष इति** । **आदि**पदेन कालपरिग्रहः । **ईश्वरेणेति** । ईश्वरादिनेत्यर्थः ।

स०ना०— न वयमेवमिति । स्थूलेन देशान्तरेण युक्त इति नानुमीमह इत्यर्थः ।

विट्ठल०— न वयमेवमिति । स्वतःस्थूलेन देशान्तरेणेत्येवं नेत्यर्थः । **आत्मनेति** । परमात्मनि तन्मतरीत्या जीवात्मनि च द्रव्यत्वेन सादृश्यसाजात्ययोर्भावादिति भावः । **सम्बन्धाभावादिति** । अजसंयोगानभ्युपगमादिति भावः । **बाधाभिधानमिति** । शशशृङ्गेण सम्बन्धाभावाच्छृङ्गान्तरवर्तीत्येतद्बाधितमिति बाधाभिधानमित्यर्थः । **आगमानादरमिति** । आगमादररहितस्यागमेन तदसिद्धेर्मानान्तराभावाच्चात्यसिद्धत्वमुपपन्नमिति भावः ।

॥ इति उक्तदोषपरिहारप्रयत्ने सिद्धसाधनत्वादिदोषदर्शनम् ॥
॥ इति देशान्तरादिसाधकानुमानानां शशशृङ्गादिसाधकानुमानतुल्यता ॥
॥ इति पूर्वोक्तस्य(५०)आकाशादिपरिमाणोत्कर्षानन्त्यानुमानिकत्वायुक्तत्वस्य प्रपञ्चनम् ॥

* * *

॥ अथ च तत्र आगममनादृत्येश्वरधर्मानुमानस्यापि शशशृङ्गाद्यनुमानप्रतिबन्दीग्रस्तत्वादयुक्तता ॥

११३ **सु०—** एवमागममनादृत्येश्वरधर्मानुमानमप्ययुक्तमिति प्रसङ्गादाह **येनैवेति** ।

अनु०— येनैव च प्रकारेणात्यसिद्धमनुमीयते ।
तेनैव शशशृङ्गादेः शक्यमस्तित्वकल्पनम् ॥

अत्यसिद्धम् इत्यनेनागमानादरं दर्शयति । **शशशृङ्गादेः** इति अप्रामाणिकस्योपलक्षणम् । एतच्च तत्र तत्र लेशतो दर्शितम् ।

परि०— एतच्च तत्र तत्र लेशतो दर्शितमिति । 'वस्तुत्वात्तुरगः शृङ्गी पुष्पवत्खं सुतैर्युता । चित्रिणी च रसः षष्ठो रसत्वात्सोत्तरो भवेदि'ति शास्त्रयोनिनये । तथा 'जड आत्मैव वस्तुत्वात्प्रमेयत्वाज्जडं चितिः । घन आकाश इत्याद्या वार्यन्ते केन हेतुने'त्यानन्दमयनये कामाच्च नानुमानापेक्षेतिसूत्रव्याख्यानावसरे च दर्शितमित्यर्थः ।

यादु०— आगमानादरमिति । आगमानादरे हि तस्यागमसिद्धत्वप्राप्त्याऽत्यसिद्धत्वमनुपपन्नमिति भावः । अत्यसिद्धमित्यस्य आगमाननुगृहीतकेवलानुमानसिद्धमित्यर्थः । ननु शशशृङ्गादेरिति समासः शशशृङ्गातिरिक्तसर्वार्थपरः । बहुव्रीहावादिपदस्य स्वसमभिव्याहृतपदार्थातिरिक्तसर्वार्थपरतायाः प्रसिद्धत्वात् । तथा च प्रकृते तेन प्रामाणिकस्यापि प्राप्तौ तदंशे इष्टापत्तिरत आह **अप्रामाणिकेति** । न च समासशक्त्यैवाप्रामाणिकग्रहणसम्भवे किमर्थमुपलक्षणमाश्रयणीयमिति वाच्यम् । सामान्यतः शशशृङ्गातिरिक्तसर्वार्थपरसमासेनाप्रामाणिकरूपविशेषबोधस्योपलक्षणां विनाऽयोगादित्याशयात् । **तत्र तत्रेति** । 'वस्तुत्वात्तुरगाः शृङ्गी पुष्पवत्खं सुतैर्युता । चित्रिणी च रसः षष्ठो रसत्वात्सोत्तरो भवेदि'त्यत्र तथा 'जड आत्मैव वस्तुत्वात्प्रमेयत्वाज्जडं चितिः । घन आकाश इत्याद्या वार्यन्ते केन हेतुने'त्यादौ चेत्यर्थः ।

कं०रा०— ईश्वरधर्मादीति । आदिशब्देनोक्तादन्यदतीन्द्रियं सर्वं गृह्यते ।

श्रीनिधि०— आगमानादरमिति । अनुमातृणामिति शेषः । आगमादरे तु धर्मिमात्रसिद्धेर्वासम्भवेन अन्त्यसिद्ध्ययोगादिति भावः । 'शशशृङ्गादेरि'त्यत्रादिपदेनासतां नृमार्जारतुरगादीनां शृङ्गाणामेव साजात्येन ग्रहणमिति प्रतीयते । तदयुक्तम् । अन्त्यसिद्धत्वविशेषे तन्मात्रास्तित्वकल्पनस्य निर्निमित्तत्वात् इत्यत आह **अप्रामाणिकोपलक्षणमिति** । गगनकुसुमादीनां सर्वेषामपीति भावः । अन्यथादिपदेनैव सर्वाऽप्रामाणिकग्रहण-

सम्भवे उपलक्षतोर्व्यर्थत्वमेव इति द्रष्टव्यम् । **लेशतो दर्शितमिति** । 'वस्तुत्वात्तुरगः शृङ्गी'त्यादिव्याख्यानावसरे वैषम्यनिरसनपूर्वकमीश्वरानुमानस्याभाससमानयोगक्षेमत्वं च व्यवस्थापितमित्यर्थः ।

शे०वा०— येनैवेत्युत्तरभाष्यानर्थक्यमाशङ्क्येश्वरादेरानुमानिकत्वनिरासार्थत्वान्न तदिति भावेन तत्परतयोत्तरग्रन्थं योजयितुं तत्प्रतिपादनस्य प्रकृतेन का सङ्गतिरित्यतो वृत्तवर्तिष्यमाणार्थप्रदर्शनपूर्वकं तामाह **तदेवमित्यादिना** । **आगमानादरमिति** । आगमादरे हि तस्यागमसिद्धत्वप्राप्त्याऽत्यसिद्धत्वानुपपत्तिप्रसङ्गादिति भावः । नन्वादिशब्दस्य स्वसमभिव्याहृतपदार्थातिरिक्तसर्वार्थपरताया वियदादीत्यादौ प्रसिद्धत्ववदत्रापि शशशृङ्गादेरित्यादिपदेन शशशृङ्गातिरिक्तप्रामाणिकाप्रामाणिकसाधारणसर्वार्थग्रहणमेव न्याय्यम् । ततश्च प्रामाणिकांशे तर्कस्येष्टापादनरूपत्वेनाभासत्वापत्त्या आदिपदार्थसङ्कोचोऽवश्यं वाच्यः । न चावच्छेदकाभावे स युज्यत इत्यवच्छेदकमवश्यं वाच्यम् । न च तत्प्रकृतेऽस्तीति कथं सङ्कुचितार्थत्वमपीत्यतः 'अन्यथा सप्तमरसभावोऽप्यनुमयाऽऽपतेदि'त्युत्तरवाक्यसूचितमादिपदसङ्ग्राह्यतावच्छेदकमाह **शशशृङ्गादेरित्यप्रामाणिकोपलक्षणमिति** । सामान्यवाचकस्य शब्दस्य साधारणवाच्यतावच्छेदकातिरिक्तासाधारणावच्छेदकावच्छेदकेन वृत्तौ लक्षणैव । प्रथमोपस्थितमुख्यार्थस्य बाधेन परित्यागात् । सा चाजहत्स्वार्थलक्षणैवेति भावेनोपलक्षणमित्युक्तम् । तथा च नातिप्रसक्तिरिति भावः । **तत्र तत्रेति** । 'वस्तुत्वात्तुरगः शृङ्गी पुष्पवत्खं सुतैर्युता । चित्रिणी च रसः षष्ठो रसत्वात्सोत्तरो भवेदि'ति शास्त्रयोनिसूत्रे । 'जड आत्मैव वस्तुत्वाप्रमेयत्वाज्जडं चितिः । धन आकाश इत्याद्या वार्यन्ते केन हेतुने'त्यानन्दमयाधिकरणे चेत्येवं तत्र तत्रेत्यर्थः ।

वा०र०— ईश्वरादेः आनुमानिकत्वमिति । एवं ईश्वरादीति व्यवहारेण ईश्वरधर्मादीत्येतदुत्तरमूले ईश्वरश्च धर्मादिपदोक्तं अधर्मपरमाण्वादिकं चेति विग्रहः प्रदर्शनीयः इति सूचयता ईश्वरस्य ये धर्माः इति भ्रान्तिः परिहृता भवति । नन्वत्र हि **ईश्वरधर्मादीति** मूलानुसारेण उत्तरत्रापि ईश्वरादिकमित्येवासिद्धिमित्यत्र पूरणीयम् । तथा च ईश्वरादिसाधकानुमानस्य शशशृङ्गादिसाधकानुमान प्रतिबन्धाभिमानमिति सिद्धे प्रत्यक्षमागमो वेति इत्येतदवतारे महादारम्भकत्वादिति वचनं प्रस्तुतानुमानानां इत्यर्थप्राप्तेः महदारम्भकत्वाद्यनुमानानामिति टीकायां व्याख्यानं च कथम् । न च परमाण्वाद्यनुमानानामिति परमाण्वाद्यनुमानमिति महदारम्भकत्वाद्यनुमानानामिति आरभ्य तस्मात् परमाण्वादेः साक्षिवेद्यत्वमङ्गीकृत्य प्रतिबन्दी मोचनीयेति कथनं तस्य साक्षिवेद्यत्वं इत्युपसंहारग्रन्थपर्यन्तमूले परमाण्वादित्वेनैव निर्देशात् तदनुसारेण इह टीकायां उत्तरत्रापि च परमाण्वादि इत्याद्युक्तिः युक्तेति वाच्यम् । मूलेऽपि तदेवमिति पूर्वोपसंहारग्रन्थे परमाणुद्व्यणुकेत्यादिव्यवहारेण एवमागममित्युत्तरत्र च ईश्वरधर्मादीति व्यवहारेण प्रागप्रस्तुत ईश्वरे धर्मादौ चागमानादरेणानुमानसिद्धत्वाङ्गीकारदूषणकथनपरतया येनैवेत्यनुव्याख्यानयोजनायाः स्पष्टत्वे सति न परमाण्वाद्युत्तरमूलेऽपि परमाण्वादीनां ग्रहणायोगात् । किञ्च साक्षिनिर्मितस्येत्यनुव्याख्यानानुसारेण साक्षिसिद्धत्वेन प्रतिज्ञातपरमाण्वादौ साक्षिसिद्धत्वोपपादनाय **पक्षीकर्तुमशक्यत्वात्** इत्यादिना परमाण्वादेरानुमानिकत्वनिरासः प्रागेव कृत इति पुनस्तन्निरासवैय्यर्थ्यम् । न च

उक्तप्रकारापेक्षयाऽतिप्रसङ्गरूपप्रकारान्तरेण तन्निरासाभिप्रायेण **येनैव** इत्याद्यनुव्याख्यानादि प्रवृत्तिरिति न तत् वैय्यर्थ्यमिति वाच्यम् । तथा सति प्रकारान्तरेण साक्ष्यनादरेणानुमानिकत्वं परमाण्वादेः साक्षिवेद्यत्वमङ्गीकृत्य प्रतीबन्दी मोचनीयेति कथं न तस्य साक्षिवेद्यत्वमित्युपसंहारश्च एवमवतार एव युज्यते । तत्र चादिपदेन ईश्वरादिग्रहणायोगः । न हि ईश्वरस्य साक्षिसिद्धता सम्मता । अपि च ईश्वरादेरनुव्याख्याने कुत्रापि इह मुखतोऽनुपादानात् तादृशेन सजातीयेन युक्तत्वनिवारणायोगात् परमाण्वादेश्च साक्षिमितस्येत्याद्यन्तग्रन्थो अणवः इत्यव्यवहितपूर्वानुव्याख्यानबलात् उपादानसिद्धेः परमाण्वादिग्रहणमेव युक्तम् । किं च परमाण्वादेः साक्षिण-मनादृत्यानुमानवेद्यत्वनिराकरणानन्तरं ईश्वरादेः इत्यत्रादिपदेन गृहीतपरमाण्वादेः अपि आगममनादृत्य आनु-मानिकत्वं निराक्रियते इति लब्धम् । न च तत्सम्भवति । परमाण्वादेः साक्षिमितत्वोक्त्या आगमिक-त्वानभ्युपगमसिद्धेः । यदि चागमसिद्धत्वनिषेधे तात्पर्यं पूर्वग्रन्थस्य नेति तदापि अङ्गीकर्तुं शक्यमित्युच्यते तथा सति तस्मात् परमाण्वादेः साक्षिवेद्यत्वमङ्गीकृत्येत्युपसंहारायोग एव । तत्रागमस्यापि सङ्ग्राह्यत्वात् साक्षिमितमिति प्रागुक्तोपसंहारत्वपक्षे आगमोपलक्षणानुपपत्तेश्च । साक्षिमितमित्यत्रापि आगमोपलक्षणाभिप्रेते तु बहुकुसृष्ट्याश्रयणादिकम् । अथ मन्यसे साक्षिमितमित्यादौ परमाण्वादेरेव प्रकृतत्वेऽपि प्रसङ्गसङ्गत्या आगम-मनादृत्य केवलानुमानेन परमाण्वादिसाधनपक्षं दूषयितुं प्रवृत्ते येनैवेति वाक्ये समानन्यायसिद्धतया ईश्वरादेरपि आगममनादृत्य अनुमानमात्रेण साधनमनुपपन्नमिति प्रदर्शनाय परमाण्वादीत्यनुक्त्वा ईश्वरादीत्युक्तम् । विचार्य-तया प्रस्तुतपरमाण्वादिकमेवापादाय तु आनुमानिकत्वासम्भवः उपपादितः । व्युत्पन्नस्यैवमवगमकमसम्भवात् । तथा चोपलक्षणया तत्र तत्र ईश्वरग्रहणोपपत्तेर्न दोष इति । तन्न । तस्मात् परमाण्वादेः इत्युपसंहारे ईश्वरोपलक्षणायोगादित्युक्तत्वात् । न हि मध्ये प्रकृततया परमाण्वादि ईश्वरयोः अविशेषे अष्टकस्यैवोपादानं युक्तम् । तस्मात् कथमेतौ मूलटीकाग्रन्थौ इति चेत् । अत्र ब्रूमः । यत्तावदुक्तं प्रस्तुतानुमानानामित्यस्य ईश्वराद्यनुमानानामिति व्याख्येयतया ईश्वरादेरिति पूर्वग्रन्थानुसारेण प्राप्तत्वात् महदारम्भकत्वादीनामिति टीकाव्याख्यानायोगः इति । तत्रेदमुत्तरम् । मूले परमाण्वादिपुरस्कारेणोत्तरग्रन्थप्रवृत्तिरेव तथा व्याख्याने निमित्तमिति । न च ईश्वरादितयाऽस्पष्टप्रतिभासः यदैवेत्यादि भाष्ये परमाण्वादिग्रहणायोगः इत्युक्तमिति वाच्यम् । ईश्वरधर्मादि इत्यादि पदेन परमाण्वादिसङ्गहस्याप्यभिप्रेतत्वेन तस्योत्तरग्रन्थे उपादानसम्भवात् । 'पक्षीकर्तुमि'त्येतत् प्रकारापेक्षया प्रकारान्तरेणानुमानिकत्वं परमाण्वादेः निरस्यते इति पुनस्तन्निरासवैय्यर्थ्या-पत्त्या किञ्च साक्षीत्युक्तदोषोऽपि न प्राप्नोति, तर्हि साक्षिमनादृत्यानुमानिकत्वपरमाण्वादेः प्रकारान्तरेण निराकरोतीत्येव वक्तव्यतयेश्वरे धर्मादीत्युक्तयोगः इत्युक्तमिति चेत् न । केवलानुमानिकत्वनिरासाय प्रवृत्ते न साक्षिविषयत्वेनाभिप्रेतपरमाण्वादावीश्वरसङ्गहानुपपत्तेः तत्परित्यागेन परमाण्वादाविव साक्षिमितत्वोपपादक-तया पक्षीकर्तुमित्यादिग्रन्थो योजितः । इदानीमागमविषयत्वमपि परमाण्वादेरप्यस्ति इति तत्रागममनादृत्य केवलानुमानगम्यत्वायोगः इति प्रतिपादनाय प्रवृत्तये नैवेति ग्रन्थे समानन्यायतया ईश्वरादावपि आगमविषयीभूते अत्रोक्तन्यायेन केवलानुमानगम्यत्वनिराकरणं कर्तव्यमिति सूचनाय अत्र ईश्वरादेः ग्रहणोपपत्तेः । अनेनैव प्रकारान्तरेणैवानुमानिकत्वं निराकरोति इत्यपि अवतारप्रतीतिसम्भवाच्च । तस्मात् परमाण्वादेः साक्षीत्युपसंहारे तु

विचार्यत्वेन प्रकृतपरमाण्वादिकमेवेति तदभिप्रायेण तन्मात्रग्रहणं च युक्तमेव । एतेनैव मध्ये ईश्वरधर्मादिः अनुपस्थिते तद्ग्रहणायोगो मूले इति निरस्तम् । तत्र समानन्यायतया प्रकृतोपपादनविषयत्वाभिप्रायेण परोक्त-मीश्वरादेरानुमानिकत्वमत्रापि निराकृतं भवतु इत्याशयेनाप्रस्तुतस्यापि तस्य ग्रहणोपपत्तेः । परमाण्वादेः प्रकृतत्वोपपादनं चानुगुणमेव । तथा च तथापि परमाण्वादेः प्राक् साक्षिसिद्धमितत्वमुक्त्वा इदानीं आगमिक-त्वाङ्गीकारायोगः इत्युक्तमिति वाच्यम् । तस्यागमवेद्यत्वाङ्गीकारेण पूर्वग्रन्थस्यान्यनिषेधतात्पर्यविषयत्वाभावात् । उपसंहारे साक्षिमात्रग्रहणं तु प्रथमतः आरभ्य प्रकृतपरमाण्वादौ साक्षिमितत्वस्यैव परमप्रकृतत्वाभिप्रायेण इति न तद्विरोधः इत्युक्तप्रायमेव । अत एवोपसंहारे साक्ष्यविषयेश्वरादिग्रहणायोग इति दूषणं गर्भस्रावेण गतम् । तस्मात् परमाण्वादेरेव प्रकृतत्वेऽपि तस्यागमेनापि सिद्धेः सम्मतत्वात् तस्य तस्यागममनादृत्य केवला-नुमानगम्यत्वनिराकरणावसरे प्रसङ्गसङ्गतेरपि तथा निराकरणमुखेन परोक्तेश्वरानुमानिकत्वनिराकरणं सिद्धं भवति इत्याशयेन अप्रस्तुतस्यापि तस्य ग्रहणोपपत्तेः तस्यादिपदेनैव ग्रहणस्य चाप्रस्तुतत्वादेव ग्रहणाभाव एवास्तेत्यपि बुद्धिप्रसङ्गेनायोगात् मुखतः तत्कीर्तनेऽपि प्रधानप्रकृतपरमाण्वादेः आदिपदेन सङ्ग्रहस्य सुज्ञानत्वात् । मध्ये एवेश्वरादेः प्रसक्तावपि प्रधानप्रमेयभूतपरमाण्वादि साक्षिमितत्वस्य एवोपसंहारोपपत्तेश्च मूले न काप्यनुपपत्तिः इति तदनुसारेण प्रकृतटीकाग्रन्थेऽपि तत्तत्स्थलान्तरानुसारेण ईश्वरादिपरमाण्वादिमुपादाय महदारम्भकत्वादीत्यादि व्याख्यानमुपपन्नमिति सूरयो विदां कुर्वन्तु । ईश्वरधर्मादिः केवलानुमानेन सिद्धयङ्गीकारे शशशृङ्गादेरपि अस्तित्वं तेनैव कल्पनीयं स्यात् इत्युक्तम् । तत्रादिपदसङ्गृहीतमेतावदिति न प्रतीयते अतः तत्सङ्गृहीतं वक्तुं प्रवृत्तस्य शशशृङ्गादेरिति वाक्यस्याभिप्रायं स्पष्टयितुं तद्व्यावृत्त्यशङ्कामुत्थापयन् तद्वाक्यमवतारयति **नन्वादिशब्द-स्येत्यादिना** । अयमत्र विवेकः । अस्ति तावत् आदिशब्दस्य कारणत्वरूपः एकोऽर्थः । 'ज्ञात्वा भूतादिमव्ययं', 'भूतादिरि'त्यादौ तदर्थकतया तस्योपलम्भात् । उत्पत्तिश्चापरः । 'अनादिमध्यान्तं', 'गौरनाद्यन्तवति' इत्यादौ तदर्थकतया तदुपलम्भात् । प्रतिरूपोऽर्थश्च तृतीयः । वियदादिप्रपञ्चः इत्यादौ तस्य तदर्थकतया उपलब्धेः । एषु अर्थेषु प्रथमद्वितीयार्थक आदिशब्दं विहाय प्रभृत्यर्थकादिशब्दस्य इत्यर्थ इति । स्वेन आदिशब्देन समभिव्याहृतसमासवाक्ये सहोच्चारितं यत् पदं तस्य यो अर्थः तदतिरिक्तेति योजना । क्षित्यादिकमित्यादिस्थले आदिपदस्य सत्त्वेऽपि वियदादीत्युदाहरणविशेषोपादानम् । तत्रादिपदस्य सङ्कोचासङ्कोचपक्षविचारः आकरे प्रवृत्तितोऽस्ति तस्य स्वग्रन्थेऽतिस्पष्टत्वमित्यभिप्रायेण अत एव प्रसिद्धत्वादित्युक्तम् । अयमर्थः । वियदादीति हि बहुव्रीहिसमासः । तत्समासप्रातिपदिकं चान्यपदार्थशक्तमेव । तत् यस्येदम् । विश्वामित्र आसीदित्यादि श्रुतौ विश्वामित्र इत्याचक्षत इति । तेन 'नारायणः स्मृतः' इत्यत्र स्मृत इति च प्रयोगेणादृश्यत्वादिगुणकः इति सूत्रकारीयनिवेशेन च तच्छक्तिरिति तर्कताण्डवीयप्रतिपादनानुसारात् । पदसमुदाये शक्तिरित्यादिविचारोऽपि तर्कताण्डव एव ज्ञेयः । अत एव सर्वार्थपरतायाः इत्यस्य सर्वार्थवाचकतायाः इत्येवार्थः । तथा च वियदादीत्यादिशब्दोपेतसमासवाक्यस्य शिश्यच्छब्दार्थगगनातिरिक्तसर्वपदार्थवाचकता । अत एव वियदादि मिथ्या इत्यादौ वियदादीत्यस्य तावदर्थकताप्राप्तौ बाधादिना तदनुपपत्तिभयेन सङ्कोचाश्रयणेनार्थ आश्रितः । तदनुसारेण शशशृङ्गादेरित्येतत्समासपदेनापि शशशृङ्गरूपसमभिव्याहृतपदार्थातिरिक्तप्रामाणिकाप्रामाणिकसर्वार्थ-

ग्रहणमेव व्याख्येयमित्युक्तम् । **प्रामाणिकेंशेति** । शशशृङ्गादेरपि सत्त्वं लक्ष्यं स्यात् इत्यापादनस्य प्रामाणिकेंशे इष्टापादनता । तदंशेऽनुमानेन सत्त्वकल्पनायाः अङ्गीकारादिति भावः । **आदिपदार्थेति** । प्रभृत्यर्थकादिपदघटितसमासपदेन प्रामाणिकाप्रामाणिकसर्वग्रहणं यथा न प्रसज्यते । एवंभूतः प्रभृत्यर्थकादिपदार्थसङ्कोचो वाक्यार्थः इत्यर्थः । शरीरादिसमस्तं ईश्वराधीनमित्युक्ते आदिपदेन ईश्वरप्राप्तौ ईशातिरिक्तमिति विशेषणोपादानेन समासपदार्थसङ्कोचे सति तदप्राप्तिदर्शनादिति भावः । **आदिपदसङ्गाह्यतेति** । आदिपदघटितसमासपदसङ्गाह्यतेत्यर्थः । यद्यपि एतत्प्रकरणे आदिपदघटितसमासपदस्य इत्याद्येव वक्तुमुचितं तथापि स्वपरसाधारणसर्वग्रन्थेषु प्रभृत्यर्थकादिपद एव भारदानेन तेनैव इतरसङ्गहवर्णनानुसारेणेह टीकायां तत्पुरस्कार एव कृतः । परन्तु मूले आदिपदेनाप्रामाणिकपरिग्रहः इत्येवावाच्ये तथाऽनुक्त्वा शशशृङ्गादिरित्यप्रामाणिकोपलक्षणमित्येवं विशिष्टवचनेनादिपदघटितसमासपदेन इत्येवार्थः सूचितः इति मूलाभिप्रायं मनसि निधायोपलक्षणपदस्वारस्यप्रदर्शनाय सा चाजहत्स्वार्थेति वक्ष्यतीति ज्ञेयम् । **उत्तरवाक्यसूचितमिति** । तत्रोपलक्षणया सप्तमरसग्रहणेनाप्रामाणिकमात्रग्रहण एव तात्पर्यम् । अत एवोक्तं **सूचितमिति** । ननु प्रामाणिकाप्रामाणिकसाधारणसर्वार्थस्य समासपदवाच्यत्वात् अप्रामाणिकं शक्यमेवेति कुतस्तत्र लक्षणाश्रयणमित्यतः तदुपपादयति **सामान्यवाचकस्येति** । सत्यं प्रामाणिकाप्रामाणिकयोः वाच्यः शरीरान्तप्रवेशोऽस्तीति किन्तु शशशृङ्गातिरिक्तसर्वत्वरूपेणैव शशशृङ्गादेरित्यनेन प्रामाणिकाप्रामाणिकसारणरूपस्य तदतिरिक्तसर्वत्वस्यैवावच्छेदकस्योपस्थित्या तद्रूपेणाप्रामाणिकस्य वाच्यत्वेऽपि तत्पदेनानुपस्थितस्यासाधारणवाच्यतावच्छेदकस्यानुपस्थित्या तेन रूपेण तस्य वाच्यत्वाङ्गीकारे तच्छब्दस्य मुख्यार्थत्वाभावेन तद्ग्रहणे मुख्यार्थत्यागप्राप्तेः । तथा च लक्षणया एव एकदेशाग्रहणमिति वाच्यम् । सा च लक्षणा गङ्गायां घोषः इति तन्न जहत्स्वार्था किन्तु शक्यार्थस्वरूपान्तरेणापि ग्रहणसत्त्वेन सर्वथा शक्यार्थपरित्यागाभावात् । सर्वशक्यार्थपरित्यागाभावाच्चेति विशेषणमाश्रित्योपलक्षणा । स्वार्थं न जहातीति अजहत्स्वार्था भवति इति द्योतयितुमेवोपलक्षणापदप्रयोग इति समुदायार्थः । ननु च काकेभ्यो इत्यादाविवाजहत्स्वार्थलक्षणेत्यभिप्रायः इति न कश्चित् दोषः । न च सामान्यशब्दस्य विशेषसङ्कोचमात्रं न तु बाधः । सामान्यस्य तत्तद्व्यक्तिसाधारणत्वात् इति वाच्यम् । शाबरभाष्ये यद्वा सामान्यादौ विशेषोपलक्षतार्थम् । यद्वा निगमने विशेषः सामान्योपलक्षणार्थः । आरम्भनिगमनयोः किं समञ्जसं असमञ्जसमिति वाक्याभ्यां यच्छ्रुतिवृत्तं तत् समञ्जसं न लक्षणावृत्तिरिति वार्तिके च सामान्यशब्दस्य विशेषे लक्षणाया एवोक्तेः । सङ्कोचस्यापि बाधत्वात् । अन्यथा यदाहवनीयपदशास्त्रयोरपि बाध्यबाधकभावो न स्यात् इत्यादेः उपक्रमापेक्षया उपसंहारबलवत्ताप्रतिपादनावसरे तर्कताण्डवे प्रतिपादनेन मुख्यार्थबाधस्यावश्यकत्वात् । अतो युक्तमुक्तम् । **मुख्यार्थस्य बाधेनेति** । अन्ये तु अजहत्स्वार्थेत्यस्य प्रामाणिकरूपलक्ष्यान्तर्भूतत्वं शशशृङ्गस्यापि अस्तीति रूपेणाप्रामाणिकमात्रग्रहणे शशशृङ्गेति वाचकपदान्तर्गत एकदेशवाक्यस्य शशशृङ्गस्यापि ग्रहणं प्राप्तमेवेति लक्षणयाऽजहत्स्वार्थत्वमिति तात्पर्यमाहुः । अपरे तु 'पुरुषाश्मवदिति चेदि'त्यधिकरणीय 'तथाप्यबुद्धिपूर्वकत्वादि'त्येतदनुव्याख्यानमूले बुद्धिः पूर्वा यस्य ज्ञानेच्छाप्रयत्ना इत्युक्तेः तट्टीकायां चात्मा चतुर्थः इत्यादाविव एकस्यैवान्यपदार्थत्ववृत्तिपदार्थत्वं उभे अपि सम्भवतः इति प्रतिपादनात् तदनुसारेणाप्रामाणिक-

समुदायरूपान्यपदार्थान्तरता शशशृङ्गस्यास्तीति वर्तिपदार्थस्यापि अन्यपदार्थान्तरभावेनार्थत्वमस्तीत्याशयेन अजहत्स्वार्थेत्युक्तिरित्याहुः । न्यायरीत्या बहुव्रीहौ लक्षणायाः सत्त्वानुसारेणात्रान्यपदार्थलक्षणायामपि चित्रगु-मानयेत्यादाविव वर्तिपदार्थस्यान्यपदार्थान्वयिधर्मान्वयाभावः । अपि तु वर्तिपदार्थस्यापि अन्यपदार्था-प्रामाणिकधर्मयुक्तत्वं इत्याशयेन अजहदित्युक्तमिति तु न सम्भवति सामान्यवाचकस्येत्यादि पूर्ववाक्य-विरोधात् । एवमन्यपदार्थानां चेतनानां ब्रह्मरुद्रेन्द्राभिरिति यावदित्येतद्गीताभाष्यटीकावाक्येऽपि वर्तिपदार्थ-स्यान्यपदार्थत्वं चास्तीत्याशयो ज्ञेयः । एवमेव यत्रादिपदेन इतरसङ्ग्रहः ग्रन्थकारैः तत्तत्स्थलेषु उच्यते जन्मादि सूत्रादौ तत्र सर्वत्रोपपादनप्रकारोऽवसेयः । जन्माधिकरणे जन्माद्यस्य यतः तद्गुणसंविज्ञान इति तत्त्व-प्रकाशिकानुसारेण । अपरा तु जन्मादीति तद्गुणसंविज्ञानबहुव्रीहिनिराकरणे तात्पर्याभावात् तदुपपादनरूप-वाक्यार्थचन्द्रिकोक्तरीत्या उपपादनप्रकारोऽपि अत्रानुगुणतया योज्यः । जन्माधिकरणटीकोक्तोपपादनं अस्मत्कृतं चानुगुणतया योज्यम् ।

'प्रवो यह्वं पुराणमि'ति तृतीयाध्यायस्थप्रकरणव्याख्यानात्प्राक् मृण्वं तु सोमं इत्यन्ताः ददर्शकाथ मानस इति ऋग्भाष्यव्याख्यानावसरे इत्यन्ता ऋचः इति तद्गुणसंज्ञान इति टीकायामुक्तम् । तद्व्याख्यानं वाक्यार्थचन्द्रिकोक्तरीत्यैवास्ति । छलारीये तु तस्य बहुव्रीहेः गुणः अप्रधानं वर्तिपदार्थः । संविज्ञायते यस्मिन् बहुव्रीह्यर्थे स तद्गुणः संविज्ञान इत्युक्तम् । चन्द्रिकागतपरापव्याख्यानानुवादगत तद्गुणसंविज्ञानः इत्येतद्व्याख्यानं तट्टीकायां वाक्यार्थचन्द्रिकानुसारेणैवास्ति । जन्माधिकरणीयाभिनवचन्द्रिकायां ननु आपदस्येत्यादि । तत्र वर्तिपदार्थान्यपदार्थे एकदेशः इत्युक्तम् । कल्पतर्वादौ तथैव । 'पुरुषाश्मवदि'त्येतत्सूत्रीय 'तथाप्यबुद्धि-पूर्वकत्वादि'त्यनुव्याख्यानमूले ज्ञानेच्छाप्रयत्नाः इत्युक्तमुपपादयितुं जनार्दनं स्वात्मा चतुर्थः इत्यादिकमुदाहृत्य उपपादनं कृतम् । एतत्सर्वं बुद्ध्यारूढं कृत्वा पक्षभेदस्वारस्यं लेख्यमस्ति । तथा सामान्यवाचकस्य शब्दस्य साधारणवाच्यतावाच्यतावच्छेदकातिरिक्तेत्यादिकमत्रोक्तम् । 'मयैतद्ज्ञातं तु साक्षिगं ज्ञानगोचरमि'ति स्वप्नाधि-करणानुव्याख्यानमूले सामान्याकार एव वाच्ये विशेषस्तु लक्ष्यतेति तावत् निष्टङ्कितं अन्यत्रेत्युक्तम् । तत्राकृत्यधिकरण इति शेष इति टीका । कार्यकारणयोश्चैव गुणादेः इत्येतदधिकरणीयोत्तरानुव्याख्यानरूपात्र कार्यकारणशब्दावेव अवयवावयववाचकौ तौ चोपलक्षणपराविति सूचनाय चशब्द इति मूलटीकायां ननु कार्यकारणपदाभ्यां अवयवावयविनोः कारणत्वेन चेत्यादि ग्रन्थे कार्यत्वकारणत्वरूपाभ्यां अवयवावयविनोः उपस्थितिकाले कार्यकारणपदयोः अवयवावयविवाचकत्ववत् तेन रूपेण उपस्थिता क्रिया क्रियावद्वाच-कत्वमेतयोः । अवयवत्वादिरूपेण उपस्थितिदशायां अवयवावयविनोः कार्यकारणशब्दौ तदुपलक्षकावेव न तु वाचकौ । यथा क्रियात्वात्क्रियात्वरूपाभ्यामुपस्थितक्रियातद्वतोः कार्यकारणशब्दावित्याद्याशङ्क्य समाधानात् । उपक्रमादिबलाबलविचारः तर्कताण्डवे सामान्यस्य विशेषे सङ्कोचमात्रम् । न तु बाधः इत्याशङ्कापरिहाराय शाबरभाष्ये यद्वा सामान्यमादौ विशेषोपलक्षणार्थः । यद्विनिगमने विशेषः सामान्योपलक्षणार्थः इत्यादि प्रागुदाहृतप्रकारेण सामान्यशब्दस्य विशेषोपलक्षणतायां एवोक्तेः । सिद्धत्वात् ब्रह्मशब्दस्य विष्णौ स्पष्टतया श्रुतौ

इति जिज्ञासाधिकरणानुव्याख्यानमूले मुख्यामुख्ययोर्हि मुख्यर्थस्तावत् ग्राह्यः । शक्तिवशात् तस्यैवादौ बुद्धिसन्निधानात् । तदनुपपत्तौ तु अमुख्यः । दृष्टं चैतदुभयं 'गङ्गायां जलं गङ्गायां घोषः' इत्यादावित्युक्तेः । सौत्रब्रह्मशब्देन मुख्यस्यैवोपादाने नियामकाभावः । अन्ततः प्रकरणादेरनुसरणे तु मुख्यत्वोक्तेः वैय्यर्थ्यं इत्याद्याशङ्कानिवारणाय इदमुक्तं भवति । मुख्यामुख्ययोर्हीति मूलानुसारो वाक्यार्थचन्द्रिकायां तथा जिज्ञासा-शब्दविचारे प्रकरणोपपदाभावे सामान्यशब्देन विशेषलाभायोगः इति वाक्यार्थचन्द्रिका । नासतः इत्यधिकरणे 'इदं दृष्टं तु यद्दृष्टं दृष्टाभासस्ततो परं' इत्यनुव्याख्यानमूले यत् निर्दोषत्वेनावधृततया प्रतीत्या विषयीकृतं तदेव दृष्टमित्युक्तम् । कृतः इतरस्य सम्मुग्धदृष्टस्य दृष्टाभासत्वात् । मुख्यामुख्यश्च मुख्यग्रहणस्य न्यायत्वादि-त्युक्तेः । एवं देहादिपर्यन्तमागतं इत्यानन्दमयानुव्याख्यानमूले आकाशादिशब्दानां हरावेव मुख्यत्वेन तस्यैवो-त्कटतया बुद्धिसन्निधानादिकं चेतिसूत्रीय विशिष्टसुखवत्वाच्च एतत्सुधायां मुख्यामुख्ययोः मुख्ये सम्प्रत्ययः इति न्यायोदाहृतः । माधुर्यादिविशेषाश्चेति ईक्षत्यधिकरणानुव्याख्यानेन हि गोशब्दोऽनेकार्थ इति न कस्यापि वाचकः इत्याद्युक्तम् । अन्तराधिकरणन्यायविवरणटीकायां मुख्यामुख्ययोरित्याद्युक्तम् । दुर्बलेन विरोधोऽपी-त्येतद्विलक्षणत्वाधिकरणमूले प्रकरणवशाद्धि सामान्यशब्दाः विशेषे वर्तन्ते इति प्रसिद्धमित्युक्तम् । एवं योगी युञ्जीतेति षष्ठगीताभाष्यटीकायां सामान्यशब्दः प्रकरणात् विशेषे तिष्ठते इत्युक्तम् । स्वाध्यायस्तप आर्जवं इति षोडशगीताभाष्यटीकायां प्रधानस्यैवोपलक्षणोपपत्तेरित्युक्तम् । 'गीतेति भगवद्गीतैवाभिप्रेयते । मुख्या-मुख्ययोरि'त्यादिभाष्यतात्पर्यटीकयोरुक्तम् । निरुपपदसूत्रपदेन ब्रह्मसूत्रमुच्यत इति तत्त्वप्रकाशिकायाम् । शक्तित्ववादे तर्कताण्डवे अनुगतजात्यभावेऽपि शक्तिग्रहादिसमर्थनतर्कताण्डवेऽन्यत्रापि तत्र तत्रोपयुक्तं निष्कास्य एकवाक्यता योज्योऽस्ति । **नातिप्रसक्तिरिति** । अप्रामाणिकत्वरूपसङ्कोचावच्छेदकधर्मलाभात् । प्रामाणिक-स्यापि सङ्कोचापत्तिरूपातिप्रसङ्गो नेत्यर्थः ।

स०व्र०— ननु आदिशब्दस्य स्वसमभिव्याहृतपदार्थातिरिक्तसर्वार्थपरताया वियदादीत्यादौ प्रसिद्धत्वेन शशशृङ्गादेरित्यत्रापि शशशृङ्गातिरिक्तप्रामाणिकाप्रामाणिकसर्वार्थग्रहणे प्राप्ते तत्र च प्रामाणिकांशे तर्कस्येष्टा-पादनरूपत्वेन आभासत्वापत्त्या आदिशब्दार्थसङ्कोचस्यावश्यकत्वात् तस्य चावच्छेदकेन विना अनुपपत्त्या प्रकृते अवच्छेदकं किमित्यतः 'अन्यथा सप्तमरसभाव' इत्युत्तरग्रन्थसूचितमवच्छेदकमाह **अप्रामाणिकस्योप-लक्षणमिति** । सामान्यवाचकशब्दस्य साधारणवाच्यतावच्छेदकातिरिक्तासाधारणावच्छेदेन वृत्तौ लक्षणैव । प्रथमोपस्थितमुख्यार्थस्य बाधे त्यागात् । सा चाजहल्लक्षणैवेति भावेनोपलक्षणपदप्रयोगः । तथा चात्र वाक्ये आदिपदेनाप्रामाणिकोपलक्षणमिति भावः । **तत्र तत्रेति** । 'वस्तुत्वात्तुरगशृङ्गी' इत्यादावित्यर्थः ।

विष्टल०— शशशृङ्गादेरिति । बहुव्रीहावादिपदस्य स्वपदोपात्तातिरिक्तसर्वार्थपरतायाः प्रसिद्धत्वात्तेन च प्रामाणिकस्यापि सङ्कहे तदंशे दृष्टापत्तिरित्यत आह **अप्रामाणिकेति** । न च वाच्यं समासशक्त्यैव प्रामाणिकग्रहणसम्भवात् कुतो लक्षणाश्रयणमिति सामान्यतः सर्वार्थपरसमासे अप्रामाणिकरूपविशेष्योपलक्षणं

विनायोगादित्याशयादिति । **तत्र तत्रेति** । 'वस्तुत्वात्तुरगः शृङ्गी'त्यत्र 'जड आत्मैव वस्तुत्वादि'त्यादौ चेत्यर्थः ।

* * *

॥ अथ तत्र उक्तप्रतिबन्दीग्रहणस्य समर्थनम् ॥

॥ अथ शशशृङ्गाद्यनुमानतुल्ययोगक्षेमत्वाभावशङ्का तन्निरसनं च ॥

११४ **सु०—** "न (च) शशशृङ्गाद्यनुमानप्रतिबन्दीग्रस्तत्वमात्रेणैतेषामनुमानानाम् अप्रामाण्यं युक्तम्, तथा सति धूमानुमानस्याप्यप्रामाण्यप्रसङ्गात् । तत्रापि हि शक्यते वक्तुं, 'यदि धूमवत्त्वात् पर्वतोऽग्निमान्, तदा पशुत्वाच्छशोऽपि विषाणवान् स्यादि'ति । अथोच्येत 'तुल्ययोगक्षेमत्वे हि प्रतिबन्दीग्रहः, अन्यथाऽतिप्रसङ्गात्; न चात्र तुल्ययोग-क्षेमता; धूमानुमानस्य व्याप्त्यादिसामर्थ्यसहितत्वात्, शशशृङ्गाद्यनुमानस्य तदभावादि'ति; सममेतत्प्रकृतेऽपि । प्रस्तुतानुमानानामपि व्याप्त्यादिमत्त्वात्" इत्यत आह **प्रत्यक्षमिति** ।

अनु०— प्रत्यक्षमागमो वाऽपि भवेद्यत्र नियामकः ।
सैव व्याप्तिर्भवेन्मानं नान्या सन्दिग्धमूलतः ॥

वाशब्दः समुच्चये । **अपिः** अनुमानस्य समुच्चयार्थः । **नियामको** ग्राहकः । **मानम्** अनुमानमानत्वोपयोगिनी । **अन्या** प्रत्यक्षाद्यगृहीता । **सन्दिग्धमूलतः** सन्दिग्धाव्यभि-चारत्वतः, अव्यभिचारो हि साहित्यस्य व्याप्तित्वे मूलम् ।

तत्र प्रत्यक्षगृहीता व्याप्तिर्यथा धूमस्याग्निना । आगमगृहीता यथा ब्राह्मणो न हन्तव्य इति । अनुमानगृहीता यथा व्यतिरेकिप्रयोगे ।

एतदुक्तं भवति । 'प्रत्यक्षाद्यवधृतं हि व्याप्त्यादि अनुमानमाना(नता)ङ्गम्, न स्वसमयमात्रसिद्धम्, सन्दिग्ध(ा)व्याभिचा(र)रित्वात्, समयानां सन्दिग्धमूलत्वाच्च । विद्यते च धूमाद्यनुमानानां प्रमाणावधृतं व्याप्त्यादी'ति न प्रतिबन्दीग्रहमात्रेण तद्भङ्गः; न परमाण्वाद्यनुमानानाम्, इति प्रतिबन्दीग्रस्तत्वादप्रामाण्यमेव ।

परि०— शङ्कते **न शशशृङ्गादीति** । **सममेतत्प्रकृतेऽपीति** । ईश्वराद्यनुमानेष्वपीत्यर्थः । तदेव व्यनक्ति **प्रस्तुतेति** । नन्वव्यभिचारसन्देहे कथं व्याप्तिमूलं सन्दिग्धमित्यत आह **अव्यभिचारो हीति** । **ब्राह्मणो न हन्तव्य इतीति** । यो यो ब्राह्मणः स सर्वोऽपि न हन्तव्य इति तद्वाक्यस्य तात्पर्यात् । अत्र ब्राह्मणत्वजातिरेव विवक्षिता । लिङ्गं त्वविवक्षितम् । उक्तं च तन्त्रवार्तिके— 'यो ब्राह्मण इति ह्युक्ते हननप्रतिषेधतः । ब्राह्मणे हनने वापि लिङ्गं नान्यद्विधीयत' इति । **व्यतिरेकीति** । प्राणादिमत्त्वं सात्मकत्वेन व्याप्तम्, तदभावव्यापकाभावप्रतियोगित्वात् । यदेवं तदेवं यथा धूमादीत्येवंरूपेणेति भावः । अस्फुटत्वादाह **एतदुक्तमिति** । **स्वसमयेति** । महद्व्यारम्भकं सावयवमित्यादि स्वमतमात्रसिद्धमिति भावः । कुतो व्यभिचारसन्देह इत्यत आह **समयानामिति** । सन्दिग्धाप्तिकत्वादित्यर्थः । **न परमाण्वादीति** । प्रमाणावधृतं व्याप्त्यादीत्यनुषङ्गः ।

यादु०— नन्वव्यभिचारसन्देहे कथं व्याप्तिमूलं सन्दिग्धमित्यत आह **अव्यभिचारो हीति** । **साहित्यस्य** सामानाधिकरण्यस्य । **व्यतिरेकिप्रयोग इति** । तत्र दृष्टान्ताभावेन प्रत्यक्षेण हेतावन्वयव्याप्तिग्रहासम्भवेन प्राणादिमत्त्वं सात्मकत्वव्याप्यं तदभावव्यापकाभावप्रतियोगित्वादित्यनेनैव सा गृह्यत इत्यर्थः । **सन्दिग्धेति** । अन्ततः पक्ष एव व्यभिचारशङ्कासम्भवादिति भावः । **समयानामिति** । व्याप्त्यादिग्राहकाणामिति शेषः ।

वं०प०— **प्रस्तुतेति** । विमतो देश इत्याद्यानां शशशृङ्गादिसाधकानां व्याप्त्याद्यभावादित्यपि द्रष्टव्यम् । **समुच्चये** परस्परमिति शेषः । अव्यभिचारस्य मूलत्वमुपपादयति **अव्यभिचार इति** । **न प्रतिबन्दीति** । पशुत्वाच्छशोऽपीत्युक्तेत्यर्थः । न परमाण्वाद्यनुमानानां प्रमाणावधृतं व्याप्त्यादीत्यनुवर्तते ।

कं०रा०— **व्यतिरेकिप्रयोग इति** । व्यतिरेकिप्रयोगे व्यतिरेकव्याप्त्यान्वयव्याप्तेरनुमानात् तत्रानुमानगम्या व्याप्तिरिति भावः ।

श्रीनिधि०— **तुल्यबलत्व इति** । व्याप्त्यादितौल्याभिमानदशायामित्यर्थः । **अतिप्रसङ्गादिति** । अनुमानमात्रोच्छेदप्रसङ्गादिति भावः । **प्रस्तुतानुमानानामपीति** । शशशृङ्गाद्यनुमानानां व्याप्त्यादिवैकल्यं सिद्धान्तिनोऽपि सम्मतमिति नात्रोक्तम् । **समुच्चय इति** । उक्तसमुच्चय इत्यर्थः । **अपिरनुमानसमुच्चयार्थ इति** । अनुक्तसमुच्चयार्थ इत्यर्थः । ननु 'ब्राह्मणो न हन्तव्य' इत्यागमगम्या व्याप्तिर्यथानुमानाङ्गम् । एवं समयगृहीताऽपि । समयस्याप्यागमत्वात् अन्यथा तत्रास्य व्यभिचारसन्देहः स्यादित्यत आह **समयानामिति** ।

सन्दिग्धं मूलं विवक्षितार्थत्वज्ञानाधिकं येषां ते सन्दिग्धमूलाः, वक्तुर्दोषदर्शनात् । आगमत्वे अपौरुषेयत्वेनैव दोषाभावनिश्चये प्रामाण्यनिश्चये तद्गृहीता व्याप्तिः अनुमानाङ्गमिति भावः ।

शे०वा०— ननु 'प्रत्यक्षमागमो वाऽपी'त्युत्तरभाष्ये प्रत्यक्ष(ादि)सिद्धव्याप्तेरनुमानमानत्वाङ्गत्वं तदसिद्धायास्तु तस्यास्तदनङ्गत्वमिति प्रतिपाद्यते । तदनर्थकम् । न च 'धूमादिनिष्ठव्याप्तेः प्रत्यक्षादिसिद्धत्वेन अनुमानमानत्वाङ्गत्वाद्धूमाद्यनुमानस्य प्रामाण्यम् । महदारम्भकत्वादिनिष्ठव्याप्तेस्तदसिद्धत्वेन तदनङ्गत्वात्तस्या-प्रामाण्यमिति वैषम्योपपादनार्थं तदि'ति वाच्यम् । तत्प्रतिपादनस्याप्यनर्थकत्वादित्यतोऽवैषम्यशङ्कानिरासार्थ-त्वान्न तदिति भावेन तच्छङ्कापरिहारकतयोत्तरवाक्यं योजयितुमाभाससमानयोगक्षेमत्वभावाभावाभ्यामेव तत्सिद्धेः कथमवैषम्यशङ्काऽपीत्यत आभाससमानयोगक्षेमत्वस्य धूमाद्यनुमानेऽपि अविशिष्टत्वात्तदुपपत्तिरिति भावेन अवैषम्यशङ्कामुत्थापयति **न च शशशृङ्गाद्यनुमानेति** ।

साम्यमेव विशदयति **प्रस्तुतानुमानानामिति** । महदारम्भकत्वाद्यनुमानानामित्यर्थः । उपलक्षणं चैतत् । शशशृङ्गाद्यनुमानानां तदभावादित्यपि द्रष्टव्यम् । ततश्च तुल्ययोगक्षेमत्वाभावान्न प्रतिबन्दीग्रहणं युक्तमिति भावः । भाष्ये वाशब्दस्य विकल्पार्थकतायाः समुच्चयार्थकापिशब्दविरुद्धत्वेनासम्भवादाह **वाशब्दः समुच्चय इति** । तर्हि वाशब्देनैव समुच्चयसिद्धेस्तदर्थकापिशब्दवैयर्थ्यमित्यतः स्वशब्दोपात्तयोः प्रत्यक्षागमयोरन्योन्य-समुच्चयस्य वाशब्देन सिद्धावपि स्वशब्देनानुक्तस्यानुमानस्य समुच्चयसिद्ध्यर्थत्वात् अपिशब्दस्य न वैयर्थ्यमिति भावेन तदर्थमाह **अपिरिति** । नियामकत्वस्य चेतनमात्रनिष्ठत्वादचेतनस्य प्रत्यक्षादेस्तदसम्भवमाशङ्क्याह **नियामक इति** । प्रत्यक्षादिसिद्धव्याप्तेरप्यमानत्वात् तन्मानत्वोक्त्यनुपपत्तिरित्याशङ्क्याऽपचारिकीयमुक्तिरिति भावेनोपचारे निमित्तमाह **मानमिति** । **प्रत्यक्षाद्यगृहीतेति** । सैवेति पूर्वत्र प्रत्यक्षादिगृहीतव्याप्तेरेव प्रकृतत्वा-दिति भावः । नन्वस्त्वव्यभिचारसन्देहः तथाऽपि कथं सन्दिग्धमूलत्वं व्याप्तेरित्यत आह **अव्यभिचारो हीति** । **साहित्यस्येति** । सामानाधिकरण्यस्येत्यर्थः । ततश्च व्यभिचारसन्देहे युक्तमेव व्याप्तेः सन्दिग्ध-मूलत्वमिति भावः । **आगमगृहीता यथेति** । ब्राह्मणत्वावच्छिन्नेऽनिष्टसाधनहननादिमत्त्वस्य मानान्तराविषयता आगममात्रवेद्यत्वादिति भावः । **व्यतिरेकिप्रयोग इति** । धूमस्याग्निनेव प्राणादिमत्त्वस्य हेतोर्यत्प्राणादि-मत्तत्सात्मकमित्यन्वयव्याप्तेर्जीवच्छरीरे प्रागवगताया अपि तत्रैव तद्विप्रतिपत्तावुपदर्शयितुमशक्यत्वेन दृष्टान्त-विरहात् प्रत्यक्षेण व्याप्तिग्रहासम्भवेन प्राणादिमत्त्वं सात्मकत्वेन व्याप्तं तदभावव्यापकाभावप्रतियोगिवाद्यो यदभावव्यापकाभावप्रतियोगी स तद्वद्व्याप्तो यथा धूमोऽग्निनेत्यनुमानेनैव तत्र व्याप्तेर्ग्राह्यत्वादिति भावः । ननु व्याप्त्यादिमात्रस्यैवानुमानमानत्वाङ्गत्वसम्भवेन प्रत्यक्षाद्यवधृतस्य तस्य तदङ्गत्वे नियामकाभावात् कथं प्रत्यक्षाद्यवधृतस्य व्याप्त्यादेस्तदङ्गत्वकथनम् । अस्तु वा तत् । तथाऽपि नोक्तप्रतिबन्दीनिस्तारः । धूमा-द्यनुमान इव परमाण्वाद्यनुमानेऽपि प्रत्यक्षाद्यवधृतव्याप्त्यादेः सत्त्वेन तद्वदेव शशविषाणाद्यनुमानवैलक्षण्य-सम्भवादित्यत आह **एतदुक्तं भवतीति** । यद्वा नन्वेतावताऽपि कथमुक्तप्रतिबन्दीपरिहार इत्यत आह **एतदुक्तं भवतीति** । **सन्दिग्धेति** । अन्ततः पक्ष एव व्यभिचारशङ्कासम्भवादिति भावः । **समयानामिति** ।

व्याप्त्यादिग्राहकाणामिति शेषः । **सन्दिग्धमूलत्वाच्चेति** । समयप्रामाण्योपपादकाप्तवाक्यत्वादेः सन्दिग्धत्वाच्चेत्यर्थः । **प्रतिबन्दीग्रहमात्रेणेति** । शशशृङ्गाद्यनुमानप्रतिबन्दीग्रहणमात्रेणेत्यर्थः ।

वा०र०— तस्येति । महदारम्भकत्वादेरित्यस्य बुद्ध्या विवेकेन परामर्शः । **चेतनमात्र इति** । अन्यत्रापि तत्र तत्राचेतनसम्बन्धादौ नियामकत्वव्यवहारः प्रयोजकत्वाद्यभिप्रायेण नेय इति भावः । **व्याप्तेरपीति** । तदसिद्धव्याप्तेरिवेति समुच्चयार्थापिशब्द इति ज्ञेयम् । **अमानत्वात्** । प्रमाणत्वाभावात् । अनिष्टसाधनेत्येतदनुपदमेव व्याख्यास्यते ।

स०व्र०— वाशब्दः समुच्चय इति । अपिशब्देन व्यतिरेक्यनुमानादिव्याप्तिनिश्चायकतया प्रत्यक्षागमाविव अवश्यं ग्राह्यानुमानस्य समुच्चेतव्यत्वादनुमानसमुच्चयप्रत्यक्षागमविकल्पयोश्च विरुद्धत्वात् वाशब्दः समुच्चयार्थः । **सन्दिग्धमूलत्वाच्चेति** । समयप्रामाण्योपयुक्ताप्तवाक्यत्वादेः सन्दिग्धत्वेन सन्दिग्धमूलत्वादित्यर्थः ।

विठ्ठल०— प्रस्तुतानुमाने ईश्वराद्यनुमानेन न च व्यभिचारसन्देहे कथं व्याप्तिमूलं सन्दिग्धमित्यत आह **अव्यभिचारो हीति** । **व्यतिरेकिप्रयोग इति** । प्राणादिमत्त्वं सात्मकत्वेन व्याप्तं तदभावव्यापकाभावप्रतियोगित्वादिति सामान्यव्याप्तिकप्रयोग इत्यर्थः । मूलार्थं स्पष्टमुपपादयितुमाह **एतदुक्तं भवतीति** । **सन्दिग्धेति** । विपक्षे बाधकाभावन य एव व्यभिचारशङ्कनादिति भावः । ननु प्रत्यक्षादिवत्समयस्यापि प्रमाणत्वेन तत्सिद्धं व्याप्त्याद्यनुमानाङ्गं किं न स्यात् । विपक्षे समयविरोध एव बाधको भविष्यतीत्यत आह **समयानामिति** । मूलप्रमाणाभावादिति भावः । **न परमाण्वादीति** । प्रमाणावधृतव्याप्त्यादीत्यनुषङ्गः ।

* * *

॥ अथ च तत्र व्याप्त्याद्यभावे प्रतिबन्दीग्रहणस्य प्रयोजनम् ॥

११५ सु०— ननु व्याप्त्याद्यभावे किं प्रतिबन्दीग्रहेण । तत एवाप्रामाण्यसिद्धेरिति । सत्यम्, प्रत्यक्षाद्यनवधृतव्याप्त्यादेरपि प्रामाण्येऽतिप्रसङ्गो वा तदप्रामाण्ये दृष्टान्तो वा प्रतिबन्दीग्रहेण द्योत्यत इत्यदोष इति ।

वं०प०— तत एव अव्याप्त्याद्यभावादेव । **तदिति** । प्रत्यक्षाद्यनवधृतव्याप्त्यादिकस्य । **ततः** सहदर्शनात् ।

कं०रा०— तत इति । सहदर्शनमात्रादित्यर्थः ।

श्रीनिधि०— **ततः** सहदर्शनमात्रतः ।

शे०वा०— ननु न परमाण्वाद्यनुमानानां व्याप्त्याद्यभावो वक्तुं युक्तः । तथा सति तत एव तदनुमानानामप्रामाण्यसिद्धेः प्रतिबन्दीग्रहणवैयर्थ्यप्रसङ्गात् । तथा च धूमाद्यनुमानानां विशेष एवेति न प्रतिबन्दीग्रस्तत्वमित्याशङ्कते **नन्विति** ।

॥ इति व्याप्त्याद्यभावे प्रतिबन्दीग्रहणस्य प्रयोजनम् ॥
॥ इति शशशृङ्गाद्यनुमानतुल्ययोगक्षेमत्वाभावशङ्का तन्निरसनं च ॥

* * *

॥ अथ तत्र ततो व्याप्तिज्ञानस्य सहदर्शनमात्रद्वारकत्वाभावः ॥

११६ **सु०— सत्यमेतत् प्रत्यक्षाद्यवधृतैव व्याप्तिरनुमानप्रामाण्योपयोगिनीति; सा च धूमानुमानवत् परमाण्वाद्यनुमानेष्वप्यस्त्येव, धूमस्याग्निनेव महदारम्भकत्वादीनामपि सावयवत्वादिना साहित्यदर्शनात्; इत्यत आह सहेति ।**

अनु०— सहदर्शनमात्रेण न व्याप्तिरवसीयते ।

न धूमादीनामप्यग्न्यादिभिः सहदर्शनमात्रेण व्याप्तिरवसीयते, येन महदारम्भकत्वादीनामपि सावयवत्वादिभिस्ततोऽवसीयेत; तथा सत्यग्न्यादीनां धूमादिभिरपि व्याप्त्यध्यवसायप्रसङ्गात्, सहदर्शनमात्रस्य तत्रापि सत्त्वात् । व्यभिचारानुपलम्भे सति साहित्यदर्शनं व्याप्त्यध्यवसायहेतुरिति चेत् । किं सकलदेशकालनिष्ठोऽनुपलम्भः, किं वा तद्विशेषनिष्ठः । नाद्यः, अस्मदाद्यशक्यत्वात् । न द्वितीयः, अतिप्रसङ्गादिति ।

परि०— शङ्कते **सत्यमेतदिति** । **तद्विशेषनिष्ठः** देशकालविशेषनिष्ठ इत्यर्थः । **अतिप्रसङ्गादिति** । प्रमेयत्वादेरपि वह्निव्याप्यताप्रसङ्गान्महानसादावव्यभिचारोपलम्भादिति भावः ।

यादु०— **अतिप्रसङ्गादिति** । महानसादिरूपदेशविशेषे व्यभिचारानुपलम्भसत्त्वात् वह्नावपि धूमव्याप्त्यध्यवसायप्रसङ्गादित्यर्थः ।

वं०प०— **अवसीयेत** व्याप्तिः ।

कं०रा०— तथा सतीति । सहदर्शनमात्रेण व्याप्तिनिश्चय इत्यर्थः ।

श्रीनिधि०— अस्मदशक्यत्वादिति । अस्माकं सार्वज्ञाभावादिति भावः । **अतिप्रसङ्गादिति** । अग्न्यादीनामपि धूमादिभिर्व्याप्त्यध्यवसायप्रसङ्गादित्यर्थः ।

शे०वा०— ननु 'सहदर्शनमात्रेणे'त्युत्तरभाष्ये साहित्यदर्शनस्य धूमादौ व्याप्तिग्राहकत्वनिराकरणं क्रियते, तदनर्थकम् । न चैतद्धूमाद्यनुमानस्य परमाण्वाद्यनुमानापेक्षया वैषम्योपदर्शनार्थमिति वाच्यम् । धूमाद्यनुमानस्य प्रत्यक्षाद्यवधृतव्याप्तिकत्वेन परमाण्वाद्यनुमानस्य तदनवधृतव्याप्तिकत्वेन वैषम्यस्य पूर्वत्रैवोपदर्शितत्वेन तदुपदर्शनाय साहित्यदर्शनस्य व्याप्त्यग्राहकत्वस्यानिरूपणीयत्वादित्यतः साहित्यदर्शनस्योभयत्राप्यविशिष्टत्वेन परमाण्वाद्यनुमानस्यापि प्रत्यक्षाद्यवधृतव्याप्तिकत्वान्न तस्य धूमाद्यनुमानाद्वैषम्यमित्याशङ्कानिराकरणार्थत्वात् साहित्यदर्शनस्य व्याप्त्यग्राहकत्ववर्णनस्य नानुपपत्तिरित्यभिप्रेत्य तदविशेषशङ्कानिराकरणपरतयोत्तरभाष्यं योजयितुं तां शङ्कामुत्थापयति **सत्यमिति** । **अस्त्येवेति** । तथा च न परमाण्वाद्यनुमानस्यापि शशशृङ्गाद्यनुमानसाम्यमिति भावः । **तत इति** । सहदर्शनमात्रादित्यर्थः । **तथा सतीति** । धूमादीनामग्न्यादिभिः सहदर्शनमात्रेण व्याप्त्यध्यवसायाभ्युपगम इत्यर्थः । **व्यभिचारानुपलम्भ इति** । तथा च व्यभिचारानुपलम्भसहकृतसाहित्यदर्शनस्य सत्त्वात् तेन धूमादीनामग्न्यादिभिर्व्याप्त्यध्यवसायसम्भवेऽप्यग्न्यादीनां धूमादिभिः सह व्यभिचारोपलम्भेन तदनुपलम्भसहकृतसाहित्यदर्शनस्याभावान्नाग्न्यादीनां धूमादिभिर्व्याप्त्यध्यवसायप्रसङ्ग इति भावः । **अतिप्रसङ्गादिति** । महानसादिरूपदेशविशेषे व्यभिचारानुपलम्भसत्त्वादग्न्यादीनामपि धूमादिभिर्व्याप्त्यध्यवसायः स्यादित्यतिप्रसङ्गः स्यादित्यर्थः ।

विट्ठल०— अतिप्रसङ्गादिति । महानसादिरूपदेशविशेषे व्यभिचारानुपलम्भात् वह्नेरपि धूमव्याप्यताप्रसङ्गादित्यर्थः ।

॥ इति व्याप्तिज्ञानस्य सहदर्शनमात्रद्वारकत्वाभावः ॥

* * *

॥ अथ ततस्तत्र व्याप्त्यध्यवसायमार्गप्रदर्शनम् ॥

११७ **सु०— कथं तर्हि व्याप्त्यध्यवसायः स्यादित्यत आह यदैवेति ।**

अनु०— यदैवाव्यतिरेकेऽस्य ह्यक्षजं वाऽऽगमो भवेत् ।
तन्निर्धारितयुक्तिर्वा व्याप्तिः सैवापरा न हि ॥

अव्यतिरेके साध्याभिमतव्यतिरेकेणासत्त्वे । **अस्य** साधनाभिमतस्य धर्मस्य । **युक्तेर्व्याप्तिनिश्चयहेतुत्वेऽनवस्था(स्या)नात्, तद्ग्राप्तेरपि युक्त्यन्तरेण निश्चेतव्यत्वादित्यत उक्तं तन्निर्धारितेति** । व्याप्तिशब्दोऽध्याहार्यः । तेन प्रत्यक्षेणागमेन वा निर्धारित-व्याप्तिकेत्यर्थः । **अपरा साहित्यदर्शनमात्रनिबन्धना, न हि** ।

परि०— मूलपदानामर्थमाह **अव्यतिरेक इत्यादिना** । व्याप्तिशब्दोऽध्याहर्तव्य इत्युक्तं व्यनक्ति **तेनेति** ।

वं०प०— तर्हि व्यभिचारदर्शनसहकृतसहचारदर्शनस्य व्याप्त्यग्राहकत्वे । **साध्याभिमतेति** । साध्यात्यन्ताभाववदवृत्तित्वे । मूले **व्याप्ति**रित्यस्य व्याप्तिग्रहोपयोगिनीत्यर्थः ।

शे०वा०— यदैवेत्युत्तरवाक्यानर्थक्यमाशङ्क्य व्याप्त्यध्यवसायोपायकथनार्थत्वान्न तदिति भावेन तत्प्रतिपादकतयोत्तरभाष्यं योजयितुं तत्प्रयोजकाकाङ्क्षामुत्थापयति **कथमिति** । ननु मूले तन्निर्धारितेति युक्तिविशेषणमनर्थकम् । न च प्रत्यक्षागमनिर्धारितव्याप्तिकत्वं युक्तेरुपदर्शयितुं तदिति वाच्यम् । तदुप-दर्शनस्याप्यनर्थकत्वादित्यतो युक्तेर्व्याप्तिनिश्चायकत्वानुपपत्तिशङ्कापरिहारार्थकत्वान्न तदिति भावेन तस्या व्याप्ति-निश्चायकत्वानुपपत्तिशङ्कामुत्थापयति **युक्तेरिति** । युक्तेरेव प्रत्यक्षेणागमेन निर्धारितत्वविवक्षायां नानवस्था-निस्तारः । युक्तेः प्रत्यक्षादिना निर्धारितत्वेन तन्निर्धारणाय युक्त्यन्तरानपेक्षायामपि तद्ग्राप्तेर्युक्त्यन्तरेण निश्चेतव्यत्वानिस्तारादित्यतोऽत्रापेक्षितमध्याहरति **व्याप्तिशब्द इति** । तन्निर्धारितशब्दात्परत इति शेषः ।

* * *

॥ अथ तत्रापि उक्तार्थस्पष्टीकरणम् ॥

११८ **सु०**— अयमर्थः । **नियतः सम्बन्धो हि व्याप्तिर्न सम्बन्धमात्रम् । नियमश्च व्यभिचाराभावः । अतः साहित्य इव व्यभिचाराभावेऽपि प्रमाणप्रवृत्तौ व्याप्तिसिद्धिः । न चैतदशक्यम्, अनुमित्यनुदये सर्वव्यवहारविलोपप्रसङ्गेन 'कार्यदर्शनादेव तत्सिद्धेः । प्रकारस्तु चिन्त्यते ।**

तत्र धूमस्याग्निना सम्बन्धस्तावत्प्रत्यक्षेणावगम्यते, परिचितदेशकालयोर्व्यभि-चारश्च नावगम्यते, देशान्तरादिगते तु व्यभिचारे सन्देहोऽवशिष्यते । स च न ताव-द्व्यभिचारचिह्नदर्शनजन्यः, किन्तु 'भूयःसहचरिततया दृष्टा अदृष्टव्यभिचारा अपि धर्मा

व्यभिचारिणो दृष्टाः, धर्मश्चायमि'त्येवमुत्पद्यते । तत्र यद्ययमेतत्सहवृत्तिस्वभावस्तदाऽन्यत्रापि सहैव वर्तेत, स्वभावस्यानपायात् । यदि चासहवृत्तिस्वभावस्तदाऽत्रापि न सह वर्तेत । असहवृत्तिस्वभावस्यापि सहवृत्तिर्निमित्तान्तरायत्ता चेदत्रोपलभ्येत । सहवृत्तिस्वभावस्यापि निमित्तान्तराद्व्यभिचारो भविष्यतीति तु निर्बीजा शङ्का नोदेत्येव, सर्वव्यवहाराभावप्रसङ्गात् ।

तदेवं मीमांसासहकृतं प्रत्यक्षं धूमस्याग्निसम्बन्धं गृह्णद्व्यभिचाराभावमप्याकलयतीति व्याप्तिमवधारयत्येव । अनुमानागमाभ्यां तु व्याप्तिग्रहप्रकारः सु(गम)ग्रह एवेति ।

परि०— दुर्गमत्वात् तात्पर्यमाह **अयमर्थ इति** । 'प्रत्यक्षमागमो युक्तिर्वा यदा भवेदि'त्युक्तम् । प्रत्यक्षं तावद्व्यनक्ति **तत्र धूमस्येति** । **व्यभिचारचिह्नेति** । व्यभिचारे यच्चिह्नं सोपाधिकत्वादिकं तज्जन्यो न हि किन्तु साधारणधर्मदर्शनजन्य इत्याह **भूयः सहचरिततयेत्यादिना** । **निमित्तान्तरायत्ता चेदिति** । उपाधिरूपादीत्यर्थः । व्याप्तिग्रहप्रकारः सुगम एवेतीतिशब्दस्यायमर्थ इति पूर्वेणान्वयः प्रागस्माभिर्दर्शितः ।

यादु०— व्यभिचारचिह्नेति । अत्र चिह्नशब्दो लिङ्गपरः ततश्च व्यभिचारलिङ्गसंशयजन्य इत्यर्थः । **निमित्तान्तरादिति** । अयोग्यादित्यर्थः । **निर्बीजेति** । अयोग्यस्य शङ्कितुमशक्यत्वेनोपाधिशङ्कारूपबीजाभावादिति भावः । अयोग्यस्य शङ्कितुमशक्यत्वं कुत इत्यत आह **सर्वेति** । सर्वप्रवृत्तीनामनुमितिरूपेष्टसाधनताज्ञानसाध्यत्वेन अतीन्द्रियोपाधिशङ्कयेष्टसाधनतानुमित्यसम्भवे सर्वप्रवृत्त्यभावप्रसङ्गादित्यर्थः । **मीमांसासहकृतमिति** । इदं च यत्रोपाधिशङ्का तत्रैव न तु सर्वत्रेति द्रष्टव्यम् । अन्यथोक्तविमर्शस्यापि व्याप्तिनिश्चयसापेक्षत्वेनानवस्थापातादिति अवधेयम् ।

वं०प०— एतत् प्रमाणेन सर्वथा व्यभिचाराभावज्ञानम् । **प्रकारः** प्रमाणेन व्यभिचाराभावनिश्चयप्रकार इत्यर्थः । **स चेति** । व्यभिचारसन्देह इत्यर्थः । **न तावद्व्यभिचारचिह्नेति** । अत्र व्यभिचारचिह्नशब्दो लिङ्गपरः । लिङ्गाभावे व्यभिचारोद्भावनायोगेन लिङ्गस्यापि व्याभिचारचिह्नत्वात् व्यभिचारः चिह्नं यस्येति व्युत्पत्त्या वा लिङ्गं ग्राह्यम् । अत्र मात्रशब्दो द्रष्टव्यः । तथा च न लिङ्गदर्शनमात्रजन्य इत्यर्थः । तर्हि केन जन्य इति पृच्छति **किन्त्विति** । साधारणधर्मदर्शनजन्य इत्युत्तरमाह **भूय इति** । **अदृष्टेति** । तत्कालमात्र इत्यर्थः । **दृष्टा इति** । शतशः सहचरितयोरपि पार्थिवत्वलोहलेख्यत्वयोर्वज्रे व्यभिचारो दृष्ट इत्यर्थः । व्यभिचारसन्देहनिरासकतर्कमाह **तत्रेत्यादिना** । **तत्** निमित्तान्तरम् । सर्वत्राप्येवं निर्बीजशङ्कोत्पत्तौ बाधकमाह

सर्वेति । **मीमांसा** तर्कः । **सुग्रह एवेति** । व्यतिरेकव्याप्त्याऽन्वयव्याप्त्यनुमानस्थले ब्राह्मणो न हन्तव्य इत्येवमित्यर्थः ।

कं०रा०— उपलभ्येतेति । निमित्तान्तरमिति शेषः ।

श्रीनिधि०— एवमपि कल्पद्वयानुसरणं व्याप्तिग्रहे कर्तव्यम् । तृतीयप्रकारासम्भवात् । तत्र चोक्तदोषः यदैवाव्यतिरेकस्येत्यनेन उद्धृत इत्यत आशयमाह अयमर्थमित्यत आह **प्रकारस्तु चिन्त्यत इति** । **व्यभिचारचिह्नदर्शनजन्य इति** । व्यभिचारज्ञापकोपाधिदर्शनजन्यो नेत्यर्थः । **असहवृत्तिस्वभावस्यापीति** । वह्नेर्धूमासहवृत्तिस्वभावस्यापि सहवृत्तिरा.....त्तेर्दग्धनिमित्ता । एवमन्यदप्यूह्यम् । **सर्वव्यवहाराभाव-प्रसङ्गादिति** । जलाहरणार्थी घटेन प्रवर्तत इत्यादि द्रष्टव्यम् । **सुग्रह एवेति** । यत्र वह्न्यभावः तत्र धूमाभावः इति सकलव्यक्तीनामपि यच्छब्दाभ्यां क्रोढीकारेण सर्वव्यक्तिनिष्ठस्याप्यव्यभिचारस्यानुमानेन सङ्ग्रहः सुगमः । तथा ब्राह्मणो न हन्तव्य इति सामान्यशब्देन सकलव्यक्त्युपस्थितौ तत्र सर्वत्राहन्तव्यता व्याप्यत्वं ब्राह्मण-स्यागमेन सुग्रहमिति भावः ।

शे०वा०— ननु सम्बन्धरूपत्वाद्व्याप्तेस्तन्निश्चयाय सम्बन्धग्राहकप्रत्यक्षादेरपेक्षा युक्ता । साधनस्य साध्यव्यतिरेकेणासत्त्वग्राहकप्रत्यक्षादेस्तु कथं तत्रोपयोग इत्यत आह **अयमर्थ इति** । **न सम्बन्धमात्रमिति** । अन्यथा व्यभिचारिणो वह्न्यादेरपि धूमादिना साहित्यमात्रसद्भावात् तद्व्याप्तिप्रसङ्गादिति भावः । नन्वेवं नियमस्य निरुच्यमानव्याप्तिरूपत्वादात्माश्रय इत्यत आह **नियमश्चेति** । यद्वा नन्वेवं नियमग्राहकप्रमाणस्य व्याप्ति-निश्चयापेक्षाप्राप्तावपि न साधनस्य साध्यव्यतिरेकेणासत्त्वरूपाव्यभिचारग्राहकप्रत्यक्षाद्यपेक्षाप्राप्तिरित्यत आह **नियमश्चेति** । सम्बन्धपदेन साहित्यांशस्य पृथगभिधानाद्विशिष्टवाचकोऽपि नियमशब्दो लक्षणया विशेषणी-भूताव्यभिचारमात्रपर इति भावः । ननु सकलदेशकालनिष्ठव्यभिचाराभावे प्रमाणप्रवृत्तिर्व्याप्तिसिद्धावुपयोगि-नीति वाऽभिमतं किंवा तद्विशेषनिष्ठव्यभिचाराभावे प्रमाणप्रवृत्तिः । नान्त्यः । तथा सति वह्न्यादीनामपि धूमादिना व्याप्तिसिद्धिप्रसङ्गात् । अतो द्वितीय एव वाच्यः । न चासावपि युक्तः । तथा सति सकलदेश-कालनिष्ठव्यभिचाराभावे प्रमाणप्रवृत्तेरस्मदाद्यशक्यत्वेन धूमादीनामग्न्यादिभिर्व्याप्त्यसिद्ध्या धूमाद्यनुमानोच्छेद-प्रसङ्गादित्याशङ्क्य निषेधति **न चैतदशक्यमिति** । सकलदेशकालनिष्ठव्यभिचाराभावे प्रमाणप्रवृत्तेरस्मदा-द्यशक्यत्वं वदन् प्रष्टव्यः । किमुक्तार्थे कल्पकं नास्तीत्यभिमतं किंवा तत्समर्पकप्रकारो नास्तीति विकल्पद्वयं मनसि निधायाद्यं प्रत्याह **अनुमितीति** । **सर्वव्यवहारेति** । प्रवृत्त्यादिसर्वव्यवहारेत्यर्थः । द्वितीये त्वाह **प्रकारस्त्विति** ।

स च न तावदिति । तच्चिह्नानुपलम्भादिति भावः । अत्र चिह्नशब्दो लिङ्गपरः । ततश्च व्यभिचार-लिङ्गसंशयजन्य इत्यर्थ इत्याहुः । **अन्यत्रापीति** । देशान्तरादावपीत्यर्थः । **स्वभावस्येति** । अपाये च सहवृत्तेः

स्वभावत्वहानेरिति भावः । **अत्रापीति** । परिचितदेशकालयोरपीत्यर्थः । **निमित्तान्तरेति** । उपाधिरूपनिमित्तान्तरेत्यर्थः । अधर्मसाधनत्वादिसाध्येनासहवृत्तिस्वभावस्यापि हिंसात्वादिसाधनस्य निषिद्धत्वादिरूपोपाधिनिमित्तायत्ततत्सहवृत्तेर्दर्शनादिति भावः । **तदिति** । निमित्तान्तरमित्यर्थः । योग्यं चेदिति शेषः । अयोग्यस्य शङ्कितुमशक्यत्वाद्योग्यस्य चानुपलम्भबाधितत्वान्न तन्निमित्ता धूमादेरग्न्यादिना सहवृत्तिरिति भावः । **निर्बीजेति** । अप्रतिबन्धिकेत्यर्थः । यथा हि साधनस्य साध्येन निरुपाधिकसहचार एव तत्साधनाङ्गं न तु सोपाधिकोऽपि । अन्यथा सोपाधिकसाध्यसहचारवतो मैत्रीतनयत्वादेरपि श्यामतासाधनत्वप्रसङ्गात् । तथा व्यभिचारोऽपि निरुपाधिक एवासाधनत्वे हेतुः । यथा प्रमेयत्वस्य नित्यत्वेन । न हि प्रमेयत्वं स्वभावेन नित्यत्वाव्यभिचारि, व्यभिचारि तु निमित्तान्तरेणेत्यत्र नियामकं पश्यामः । यस्तु स्वभावेन साध्याव्यभिचारिणोऽपि साधनस्यौपाधिको व्यभिचारो नासावप्रामाण्यकारणमिति भावः । ननु सोपाधिकसाध्यसहचारस्योक्तातिप्रसङ्गग्रस्तत्वाद्युक्तमसाधनाङ्गत्वम् । सोपाधिकव्यभिचारस्य तु तदभावाद् दूषणाङ्गत्वं भवेदेवेत्यतः 'अतो हि भोजनादीनामिष्टसाधनतानुमे'ति स्वप्नाधिकरणीयोत्तरग्रन्थानुरोधेन सोपाधिकव्यभिचारस्य दूषणाङ्गत्वे बाधकमाह **सर्वव्यवहाराभावेति** । यदि सोपाधिको व्यभिचारोऽप्यप्रामाण्यहेतुः स्यात्तदा क्वचिदनिष्टसाधनत्वस्याप्युपलम्भात्साध्येष्टसाधनत्वेनापथ्यत्वाद्युपाधिनिबन्धस्य व्यभिचारस्य भोजनत्वादिसाधनेऽपि सत्त्वेन विमतं भोजनमिष्टसाधनं भोजनत्वाद्व्यस्तनभोजनवत् इत्यागामिभोजनादीनामिष्टसाधनत्वानुमानस्याप्यमानत्वस्य प्रमेयत्वादिवदमानत्वेन व्यवहर्तृभिर्निश्चितत्वस्यापि प्रसक्त्या ततो भोजने प्रेक्षावतां निःशङ्कप्रवृत्त्यादिरूपव्यवहाराभावप्रसङ्गादित्यर्थः । यद्वा ननु सहवृत्तिस्वभावस्यापि निमित्तान्तराद्व्यभिचारो भविष्यतीति शङ्का कुतो नोदेतीत्यतः तत्कारणोपाधिशङ्कारूपनिमित्तविरहादिति भावेनोक्तं **निर्बीजेति** । ननु योग्यस्योपाधेरनुपलम्भबाधितत्वेन तज्ज्ञानस्योक्तशङ्काकारणत्वासम्भवेऽप्ययोग्योपाधिशङ्कया व्यभिचारशङ्का भविष्यत्येवेत्यतो भवेदेतदेवं यद्ययोग्योपाधिशङ्कैवोपपद्येत । न च सोपपद्यते । तथा सति सर्वत्र तच्छङ्कया व्यभिचारशङ्काप्रसङ्गेन व्याप्त्यनिश्चयादनुमितिमात्रोच्छेदापत्त्येष्टसाधनताज्ञानविरहात् तसाध्यसर्वप्रवृत्तिविलयप्रसङ्गादित्याशयेनाह **सर्वेति** ।

मीमांसासहकृतेति । इदं च यत्रोपाधिशङ्का तत्रैव, न तु सर्वत्र । तथा सत्युक्तरूपमीमांसाया अपि व्याप्तिनिश्चयसापेक्षत्वेनानवस्थापातात् । सर्वत्र तु भूयोदर्शनव्यभिचारादर्शनसहकृतप्रत्यक्षेणैव व्याप्तिग्रह इत्यवगन्तव्यम् । न चैवं व्याप्तिग्राहिणः प्रत्यक्षस्य भूयोदर्शनव्यभिचारादर्शनोपाध्यभावनिश्चयाः सहकारिण इति पद्धत्या विरोधः । तत्रोपाध्यभावनिश्चयस्यापि व्याप्तिग्राहकप्रत्यक्षं प्रति सहकारित्वाभिधानादिति वाच्यम् । तस्या उपाधिशङ्कास्थलाभिप्रायकत्वेन सार्वत्रिकाभिप्रायकत्वाभावात् । अन्यथोपाध्यभावनिश्चयस्य व्याप्तिसापेक्षतर्काधीनत्वेनानवस्थापातात् । पद्धतावेव तर्कस्य क्वाचित्कत्वोक्तेश्चेति द्रष्टव्यम् । **व्याप्तिप्रकार इति** । व्याप्त्यवगमप्रकार इत्यर्थः । क्वचिद्व्याप्तिग्रहप्रकार इत्यपि पाठः । **सुगम इति** । व्याप्तिप्रत्यक्षे भूयोदर्शनापेक्षावत् अत्र तदपेक्षाविरहात् । प्रत्यक्षस्य व्यक्तिविशेषमात्रविषयतयाऽन्यत्र व्यभिचारसन्देहनिरासायोक्तरीत्या

मीमांसायाः सहकारित्वस्यावश्यं कल्पनीयत्वेऽप्यागमादेर्ब्राह्मणत्वाद्यवच्छिन्नेऽनिष्टसाधनहननादिमत्त्वबोधकत्वेन व्यक्तिविशेषमात्रविषयकत्वाभावादुक्तरीत्या मीमांसायाः सहकारित्वस्याकल्पनीयत्वाद्वा साहचर्यज्ञानजन्यव्याप्तिग्रहे दृष्टान्तापेक्षायामपि यो ब्राह्मणः स न हन्तव्य इत्यागमादिजन्यव्याप्तिज्ञाने व्याप्त्यनुमितौ वा यथाऽमुक इति दृष्टान्तापेक्षाविरहाद्वेत्यर्थः । इतीत्यस्येत्ययमिति पूर्वेण सम्बन्धः ।

वा०र०— अतो द्वितीय एव वाच्य इति । अत्राद्य एव वाच्य इति पाठो मूलकोशानुसारात् । द्वितीय इति पाठेऽपि पूर्वापेक्षया उत्तरस्य द्वितीयत्ववत् निरस्ततरापेक्षया निरसिष्यमाणपूर्वस्यापि द्वितीयत्वेन तवोक्तिरिति ज्ञेयम् । नोदत्यैवेति इत्येतत् व्याचष्टे **अप्रतिबन्धकेत्यर्थ इति** । 'अतो हि भोजनादीनाम्' इत्येतत् तृतीयाध्यायगतानुव्याख्यानस्य तत्पूर्वानुव्याख्यानस्य च व्याख्यानरूपमूलं सङ्गाह्याह **यथा हि साधनस्येत्यादिना** । साध्येष्टसाधनत्वेनापथ्यत्वाद्युपाधिनिबन्धनस्य व्यभिचारस्य उत्तरमूलवाक्ये उपाधिपदस्य निमित्तार्थकत्वेन साधनीभूते भोजनत्वं इष्टसाधनत्वे तयोः व्यभिचारः । सः अपथ्यत्वविषयोगादिनिमित्तकः इत्युक्तौ मित्रातनयत्वस्य श्यामत्वेनैव पारिभाषिकोपाधित्वाभावः प्रतीयते तदनुसारेणापि उपाधिपदस्य निमित्तत्वमेवार्थः । यत् भोजनमपि नेष्टसाधनं तत् अपथ्यत्वनिमित्तादेव । तत्र भोजने भोजनत्वेऽपि साध्याभावेन व्यभिचार इत्यर्थः । अत्रोपाधिपदस्य निमित्तार्थकत्वे उपाधिपदात् स्वारस्यं अपथ्यत्वात् अनिष्टसाधनत्वे उक्ते इष्टसाधनत्वे अपथ्यत्वादेः उपाधित्वमवर्जनीयं तथा पथ्यत्वाद्युपाधिनिबन्धनस्येत्येवोक्ते स्वरसता । न च पक्ष एव साधनाव्यापकत्वनियमः । अन्धकारो द्रव्यं स्वातन्त्र्येण प्रतीयमानत्वात् । घटो नित्यः द्रव्यत्वात् । इत्यत्र क्रमेण श्रावणत्वकार्यत्वयोः अतथाभूतयोरपि उपाधितायाः दृष्टत्वात् । प्रतिपक्षोन्नायकत्वाभावेऽपि व्यभिचारमात्रोन्नायकत्वेन दूषणतायाः दृष्टत्वाच्च । तद्वदेव प्रकृतेऽपि तदुपपत्तेः । कथमेतदिति विचारणीयम् । **काचित्कत्वोक्तेश्चेति** । सोऽयं क्वचित् विपरीतशङ्कानिरसनद्वारेण इत्यर्थः । **अनिष्टसाधनहननादि मत्वेति** । नञोऽनिष्टसाधनत्वमर्थस्तद्धननेऽन्वितमित्याशयेन वाक्यार्थतयोक्तमनिष्टसाधनहननादिमत्वेति ।

स०व्र०— निर्बीजेति । अप्रतिबन्धिकेत्यर्थः । यथा निरुपाधिकसहचार एव साधनाङ्गं न सोपाधिकः, तथा व्यभिचारोऽपि निरुपाधिक एव दूषणाङ्गं न तु सोपाधिकोऽपीत्यर्थः । **सर्वव्यवहाराभावप्रसङ्गादिति** । एकत्रौपाधिकव्यभिचारदर्शनमात्रं सर्वत्र तच्छङ्काबीजं चेत्, सर्वत्र भोजने सविषान्नभोजनदृष्टान्तेन व्यभिचारशङ्कया भोजनादौ निश्शङ्का प्रवृत्तिर्न स्यात् । अतो दूषकताबीजशून्या इयं शङ्का नोदेतीत्यर्थः ।

विट्ठल०— साहित्यदर्शनव्यभिचारदर्शननिबन्धनैव व्याप्तिः किं न स्यादित्यत आह **अयमर्थ इति** । **न चैतदिति** । व्यभिचारभावस्य प्रमाणेनोपलम्भ इत्येतदस्मदाद्यशक्यमिति नेत्यर्थः । **सर्वव्यवहारेति** । कार्यदर्शनादनुमित्यङ्गव्यभिचाराभावासिद्धत्वनङ्गीकारे सर्वव्यवहारविलोपप्रसङ्ग इति भावः । **प्रकार इति** । सकलदेशकालनिष्ठव्यभिचाराभावस्य प्रमाणसिद्धत्वप्रकार इत्यर्थः । **व्यभिचारचिह्नेति** । व्यभिचारे यच्चिह्नं लिङ्गभूतमुपाध्यादिकं तद्दर्शनजन्यो नेत्यर्थः । **व्यभिचारिणो दृष्टा इति** । देशकालविशेष इत्यर्थः । उक्तसन्देह-

निवृत्त्युपायमाह **तत्रेति** । **निमित्तान्तरेति** । उपाध्यादिविमतान्तरापत्ता चेत्तन्निमित्तान्तरमत्र हेतुसाध्ययोः सहवृत्तिस्थले उपलभ्येतेत्यर्थः । सहवृत्तिस्वभावत्वमेवाङ्गीक्रियते । तथापि निमित्तविशेषेण स्वभावापाये व्यभिचारः स्यादित्यत आह **सहवृत्तिस्वभावस्यापीति** । **निर्बीजेति** । अयोग्यस्य शङ्कितमशक्यत्वादिति भावः । तदुपपादयति **सर्वेति** । **मीमांसासहकृतमिति** । इदं चोपाधिशङ्कास्थल एवेत्यवधेयम् । अन्यथा मीमांसाया अपि युक्तत्वेन तद्व्याप्तिनिश्चयेऽपि मीमांसाया अपि युक्तत्वेन तद्व्याप्तिनिश्चयेऽपि मीमांसापेक्षायामनवस्थापातादिति ।

॥ इति उक्तार्थस्पष्टीकरणम् ॥
॥ इति व्याप्त्यध्यवसायमार्गप्रदर्शनम् ॥

* * *

॥ अथ तत्रान्ते महदारम्भकत्वादीनामपि तादृशव्याप्तिमत्त्वशङ्का तन्निरासश्च ॥

११९ **सु०— नन्वनेनैव न्यायेन महदारम्भकत्वादीनामपि व्याप्तिनिश्चयसम्भवात् कथं परमाण्वादावनुमानाप्रवृत्तिरिति चेन्न, पक्षेतरत्वस्योपाधित्वसम्भवेन व्यभिचाराभावानिश्चयात् । अथ तस्योपाधित्वं नास्तीत्युच्येत तदा बाधकमाह अन्यथेति ।**

अनु०— अन्यथा सप्तमरसभावोऽप्यनुमयाऽऽपतेत् ।
अनिष्टानि च सर्वाणि ह्यनुमा कामचारिणी ॥

पक्षेतरत्वस्योपाधितामनादृत्य प्रमाणान्तरासहकृतेनैवानुमानेन परमाण्वादिसिद्ध्यभ्युपगम इत्यर्थः । मधुरो रसो लवणादिरसपञ्चकव्यतिरिक्तरसान्योन्याभाववान् रसत्वाल्लवणवदित्याद्यनुमया । अनिष्टानि च सर्वाणि दहनशैत्यादीन्यापतेयुः । कुतः । **यस्मादेवंविधा अनुमा कामचारिणी ।**

ननु च सप्तमरसादेरनुपलम्भादिबाधितत्वात् पक्षेतरत्वोपाधिदुष्टत्वमनुमानानामिति चेत्; समं प्रकृतेऽपि, परमाण्वादेरप्यनुपलम्भबाधितत्वात् । अयोग्यं तदिति चेत्, तुल्यं सप्तमरसादावपि । अनुमानप्रामाण्ये सप्तमरसादिसिद्धावयोग्यत्वं कल्प्यम्, कल्पिते च तस्मिन्ननुमानप्रामाण्यसिद्धिरित्यन्योन्याश्रयत्वमिति चेत्; एतदपि तादृगेव । अनुपभोग्यस्य

सप्तमरसादेः कल्पने गौरवमिति चेत्, समाधिसाम्यम्, प्रमिते न गौरवं दोष इत्येतदपि समानम् ।

परि०— मधुर इति । दृष्टान्ते पक्षीभूतमधुरप्रतियोगिकान्योन्याभाववत्त्वेनेति ज्ञेयम् ।

गु०दी०— पक्षेतरत्वोपाधिदुष्टमनुमानम् इत्यत्र पक्षीकृतमधुररसव्यतिरिक्तपञ्चरसेष्वन्यतमत्वमित्यर्थः ।

यादु०— मधुरो रस इति । अत्र दृष्टान्ते लवणादिरसपञ्चकव्यतिरिक्तो यः पक्षीकृतो मधुररसस्तदन्योन्याभावमादाय साध्यपर्यवसानम् । पक्षे च लवणादिरसपञ्चकव्यतिरिक्तो न मधुर एव रसो ग्रहीतुं शक्यस्तदन्योन्याभाववत्त्वस्य तत्र बाधितत्वात् । अतो योऽप्रसिद्धः सप्तमो रसस्तदन्योन्याभावमादायैव साध्यपर्यवसानमित्यवधेयम् ।

वं०प०— नास्ति सर्वानुमानोच्छेदकत्वात् । मधुरो रसः सप्तमरसवानित्युक्तेऽप्रसिद्धविशेषणतापत्तेराह **लवणादीति** । तथा च दृष्टान्ते लवणादिपञ्चकव्यतिरिक्तपक्षीभूतमधुररसमादाय साध्योपपादनम् । पक्षे तु सप्तमरसमादायेति ज्ञेयम् । पक्षेऽपि दृष्टान्तवदेव साध्योपपादने बाधापत्तेरिति च ज्ञेयम् । **बाधितत्वादिति** । तथा च बाधोन्नीतपक्षेतरत्वं व्यतिरेकेऽसाधारण्याभावाद् दूषणमेवेत्यर्थः । कथं तर्हि प्रकृते बाध इत्यत आह **परमाण्विति** । तथा च परमाण्वादिसाधकानुमानेऽपि पक्षेतरत्वमुपाधिरित्यर्थः । **अयोग्यमिति** । योग्यानुपलब्धेरभावग्राहिकाया अभावादिति भावः । **अयोग्यत्वं कल्प्यम्** अनुपलम्भबाधपरिहारायेति शेषः । **तस्मिन्निति** । अनुपलम्भबाधाभावादिति भावः । **एतदिति** । परमाण्वादिसाधकानुमानप्रामाण्ये परमाण्वादिसिद्धावनुपलम्भबाधपरिहारायायोग्यत्वं कल्प्यम् । कल्पिते च तस्मिन्नुक्तबाधाभावादनुमानप्रामाण्यसिद्धिरित्यन्योन्याश्रयोपेतमेवेत्यर्थः । **साम्यम्** अनुपलभ्यमानपरमाण्वादिकल्पनेऽपि गौरवमित्यर्थः । **प्रमिते** अनेनानुमानेनैव प्रमिते, परमाण्वादौ । **समानम्** अनेनैवानुमानेन सप्तमरसादेरपि प्रमितत्वादिति भावः ।

कं०रा०— लवणादिरसेति । लवणादिरसपञ्चकव्यतिरिक्तो यो रसः तत्प्रतियोगिकान्योन्याभाववानित्यर्थः । एतच्च साध्यं लवणरसरूपदृष्टान्ते लवणादिरसपञ्चकव्यतिरिक्तमधुररसप्रतियोगिकान्योन्याभावस्य बाधितत्वाल्लवणादिरसपञ्चकव्यतिरिक्तसप्तमरसप्रतियोगिकान्योन्याभावमादायैव पर्यवस्यस्तीति भावः । न च वाच्यमेकस्य लवणरसस्य लवणादिगतपञ्चकत्वाभावेन लवणादिरसपञ्चकव्यतिरिक्ततया तत्प्रतियोगिकान्योन्याभावमादायैव पक्षे साध्यपर्यवसानान्न सप्तमरससिद्धिप्रसक्तिरिति व्यासज्यवृत्तिधर्मावच्छिन्नप्रतियोगिताकाभावस्यैवाभावात् तत्सद्भावेऽपि लवणादिरसपञ्चकव्यतिरिक्तशब्देन लवणादिप्रतियोगिकान्योन्याभावानां यत्पञ्चकं तदधिकरणत्वस्य विवक्षितत्वेन लवणरसे च लवणाद्यन्योन्याभावपञ्चकाभावेन तत्प्रतियोगिकान्योन्याभावमादाय

साध्य पर्यवसानस्यायोगादिति । **इत्याद्यनुमयेति** । आदिशब्देनाग्निः शीतः पदार्थत्वादित्याद्यनुमा गृह्यते । **कल्पिते चेति** । कल्पिते च सप्तमरसादेरयोगत्वेऽनुपलम्भबाधाभावादनुमानप्रामाण्यसिद्धिरित्यर्थः । **एतदपीति** । परमाण्वादिसाधकानुमानप्रामाण्ये सति परमाण्वादिसिद्धावयोगत्वं कल्प्यं, कल्पिते च परमाण्वाद्ययोग्यत्वे अनुपलम्भबाधाभावादनुमानप्रामाण्यसिद्धिरित्यन्योन्याश्रयत्वमपि सममित्यर्थः । **समाधिसाम्यमिति** । अननुभूयमानपरमाण्वादिकल्पनेऽपि गौरवमिति तुल्यमित्यर्थः ।

श्रीनिधि०— अत्र लवणादिरसपञ्चकव्यतिरिक्त स्वातिरिक्तरसान्योन्याभाववत् सप्तमरसान्योन्याभाववदिति चोक्ते साध्याप्रसिद्धिः दृष्टान्ताभावश्च । वस्तुत्वादित्युक्तेऽपि साध्याऽप्रसिद्धेरेव । तथा च कथं प्रयोग इत्यतो दर्शयति **मधुरो रस इति** । अत्रानभिमतसिद्ध्यार्थान्तरवारणाय लवणादिरसपञ्चकव्यतिरिक्तेति । लवणादीत्यनुक्त्वा रसपञ्चकव्यतिरिक्तेत्युक्ते पञ्चमध्ये मधुररस्यापि प्रवेशे लवणरसान्योन्याभावमादाय अर्थान्तरता स्यात् अतो लवणादीत्युक्तम् । अत्र दृष्टान्ते लवणादिरसपञ्चकव्यतिरिक्तो रसः मधुररसः । तदन्योन्याभावमादाय साध्यपर्यवसानम् । पक्षे तु सप्तरसान्योन्याभावमादाय इति द्रष्टव्यम् । **सप्तमरसादिसिद्धाविति** । सत्यां इति शेषः । **समाधिसाम्यम्** । समाधानसाम्यम् । **प्रमिते** महद्द्रव्यारम्भकत्वानुमानेन प्रमिते, सावयवत्वे ।

शे०वा०— नन्वन्यथेत्युत्तरभाष्यमनर्थकम् । न चैतत्पक्षेतरत्वस्य दूषणत्वाभावे बाधकोपदर्शनद्वारा तद्दूषणत्वसमर्थनपरत्वान्नानर्थक्यमिति वाच्यम् । तत्समर्थनस्यापि प्रकृते उपयोगादर्शनात् । न च परमाण्वादिसाधकानुमाने पक्षेतरत्वस्योपाधित्वसिद्धिस्तत्प्रयोजनमिति वाच्यम् । तत्रोपाधित्वप्रतिपादनस्याप्युपयोगादर्शनादित्यतो मीमांसासहकृतप्रत्यक्षस्य धूमाद्यनुमान इव परमाण्वाद्यनुमानेऽपि व्याप्तिनिश्चायकत्वसम्भवशङ्कानिरासार्थत्वेन तत्रोपाधिप्रतिपादनस्यार्थवत्त्वादित्यभिप्रेत्योक्तशङ्कानिरासाय तत्र पक्षेतरत्वस्योपाधिमुपदर्शयितुं तदनङ्गीकारे बाधकसमर्पकतयाऽन्यथेत्याद्युत्तरभाष्यं योजयितुं परमाण्वाद्यनुमानस्य धूमाद्यनुमानसाम्यशङ्कामुत्थापयति **नन्विति** । **अनेनैव न्यायेनेति** । यथा धूमस्य वह्निना सम्बन्धग्राहिणः प्रत्यक्षस्यापि मीमांसासहकारात् तद्व्यभिचाराभावनिश्चायकत्वं, तथा महदारम्भकत्वादेः सावयवत्वादिना सम्बन्धग्राहिणः प्रत्यक्षस्याप्युक्तविधमीमांसासहकारेण तद्व्यभिचाराभावनिश्चायकत्वस्य मयाऽपि वक्तुं शक्यत्वादित्यर्थः । **अथेति** । अनुमानमात्रोच्छेदकत्वादिति भावः ।

प्रमाणान्तरासहकृतेनैवेति । नन्वनेनैव न्यायेनेत्यादिशङ्काग्रन्थे धूमस्याग्निनेव महदारम्भकत्वादेः सावयवत्वादिना व्याप्तिग्राहकप्रत्यक्षादिप्रमाणान्तरसद्भावप्रतिपादनात् कथं प्रमाणान्तरासहकृतानुमानेनेत्यनुवाद, इति चेन्न । व्याप्तिग्राहकत्वेन तत्सत्त्वाभ्युपगमेऽपि संवादकतया प्रत्यक्षादिप्रमाणाभावाभिप्रायेणैतद्ग्रन्थप्रवृत्तेः अविकलत्वात् । **लवणादीति** । एतच्च चित्ररसाभावपक्षमाश्रित्योक्तम् । तत्सद्भावपक्षे तु लवणादिरसषट्कव्यतिरिक्तेति प्रयोक्तव्यम् । अत्र लवणादिरसपञ्चकव्यतिरिक्तपक्षीकृतमधुररसान्योन्याभाववत्त्वस्य लवणादेः सत्त्वात् दृष्टान्ते साध्यपर्यवसानं, पक्षे च लवणादिरसपञ्चकव्यतिरिक्तत्वस्य सत्त्वेऽपि तत्प्रतियोगिका-

न्योन्याभावस्य बाधितत्वेनासम्भवाद्धेतोः पक्षधर्मताबलेन पक्षे साध्यं सिद्ध्यदप्रसिद्धं रसान्तरमादायैव पर्यवस्यतीति सप्तमरसस्य सिद्धिः । एवमेवाष्टमरससिद्धिरित्यवधेयम् । **अनुपलम्भादिबाधितत्वादिति** । तथा च बाधोन्नीतपक्षेतरत्वस्य सर्वत्रासम्भवान्नानुमानमात्रोच्छेदः इति भावः । **समं प्रकृतेऽपीति** । परमाण्वाद्यनुमानानामपि पक्षेतरत्वोपाधिदुष्टत्वमिति सममित्यर्थः । साम्यमेवोपदर्शयति **परमाण्वादेरिति** । परमाण्वादेरयोग्यतया तदनुपलम्भस्यान्यथासिद्धत्वान्न बाधकत्वमिति न पक्षेतरत्वोपाधिदुष्टत्वं परमाण्वाद्यनुमानानामित्याशङ्कते **अयोग्यमिति** । सप्तमरसस्याप्ययोग्यतया तदनुपलम्भस्यान्यथासिद्धत्वान्न बाधकत्वमिति न पक्षेतरत्वोपाधिदुष्टत्वं सप्तमरसाद्यनुमानानामिति तुल्यमित्याह **तुल्यमिति** । तर्ह्यनुमानप्रामाण्ये परमाण्वादिसिद्धावयोग्यत्वं कल्प्यं, कल्पिते च तस्मिन्ननुमानप्रामाण्यमित्यन्योन्याश्रयत्वमिति तुल्यमेवेत्याह **एतदपीति** । **समाधीति** । अनुपभोग्यस्य परमाण्वादेरपि कल्पने गौरवस्याविशिष्टत्वादिति भावः ।

वा०र०— अविकलत्वादीति । अदुष्टत्वादित्यर्थः । क्वचित् अदोषादिति पाठः ।

स०व्र०— अनेनैव न्यायेनेति । मीमांसासहकृतं प्रत्यक्षं महदारम्भकत्वादेः सावयवत्वादिसम्बन्धं गृण्हत् व्यभिचाराभावमाकलयतीति न्यायेनेत्यर्थः । **प्रमाणान्तरासहकृतेनेति** । एतच्च संवादकप्रमाणराहित्याभिप्रायेण, न तु सर्वथा प्रमाणान्तरराहित्याभिप्रायेण, अनेनैव न्यायेनेत्यादिपूर्वग्रन्थविरोधादिति ध्येयम् । **मधुरो रस इति** । अत्र लवणादिरसपञ्चकव्यतिरिक्तपक्षीकृतमधुररसान्योन्याभाववत्त्वस्य लवणादिरसे सत्त्वात् पक्षे च लवणादिपञ्चकव्यतिरिक्तत्वस्य सत्त्वेन तत्प्रतियोगिकान्योन्याभाववत्त्वस्य तत्र बाधितत्वात् अप्रसिद्धरसमादाय पक्षे साध्यपर्यवसानं द्रष्टव्यम् । **लवणादीति** । चित्ररसाभावपक्षे एतत्साध्यम् । तत्सद्भावमते तु लवणादिषट्कव्यतिरिक्तरसान्योन्याभाववानिति साध्यं द्रष्टव्यम् ।

विठ्ठल०— मधुरो रस इति । अत्र दृष्टान्ते लवणादिरसपञ्चकव्यतिरिक्तो यः पक्षीकृतो मधुररसः तदन्योन्याभावमादाय साध्यपर्यवसानम् । पक्षे तु लवणादिरसपञ्चकव्यतिरिक्तो मधुररसो यो गृहीतुं शक्यः तदन्योन्याभावस्य तत्र बाधितत्वेनाप्रसिद्धो यः सप्तमो रसः तदन्योन्याभावमादायैव साध्यपर्यवसानमिति ध्येयम् ।

॥ इति महदारम्भकत्वादीनामपि तादृशव्याप्तिमत्वशङ्का तन्निरासश्च ॥

॥ इति उक्तप्रतिबन्दीग्रहणस्य समर्थनम् ॥

॥ इति आगममनादृत्येश्वरधर्मानुमानस्यापि शशशृङ्गाद्यनुमानप्रतिबन्दीग्रस्तत्वादयुक्तता ॥

* * *

॥ अथ च तत्र परमाण्वादेः साक्षिवेद्यत्वेन प्रथमसूत्रार्थोपसंहारः ॥

१२० सु०— तस्मात्परमाण्वादेः साक्षिवेद्यत्वमङ्गीकृत्य प्रतिबन्दी मोचनीयेति कथं न तस्य साक्षिवेद्यत्वमिति ॥

परि०— 'यदि साक्षिमितं नैतदि'त्यादिनोक्तमुपसंहरति **तस्मादिति** ।

वं०प०— **तस्मात्** एवं केवलानुमानवेद्यत्वेऽतिप्रसङ्गात् । **प्रतिबन्दी** सप्तमरसादिकं न साक्षिसिद्ध-मिति तदनुमानाप्रामाण्यं परमाण्वादिकं तु साक्षिसिद्धमिति तदनुमानं प्रमाणमित्युक्त्वा सा प्रतिबन्दी मोचनीयेत्यर्थः ।

शे०वा०— यदि साक्षीत्यादिनोक्तमर्थमुपसंहरति **तस्मादिति** ।

चषक— यदि साक्षिमितमित्यादिनोक्तं निगमयति **तस्मादिति** ।

॥ इति परमाण्वादेः साक्षिवेद्यत्वेन प्रथमसूत्रार्थोपसंहारः ॥
॥ इति उक्तसमन्वयरूपार्थस्य वैशेषिकादिमतविरोधप्रयुक्तान्यथात्वशङ्काद्वयनिरासश्च ॥
॥ इति एतदधिकरणस्य प्रथमसूत्र(ॐ महद्दीर्घवद्वा ह्रस्वपरिमण्डलाभ्याम् ॐ)व्याख्यानम् ॥

* * *

॥ अथ तत एतदधिकरणस्य तृतीयसूत्रव्याख्यानम् (ॐ समवायाभ्युपगमाच्च साम्यानवस्थितेः ॐ) ॥
॥ अथ तत्रादौ द्वितीयसूत्रव्याख्यानाभावे कारणम् ॥
॥ अथ ततस्तत्र तृतीयसूत्रगतशब्दार्थनिरूपणम् ॥
॥ अथ तत्रादौ एतत्सूत्रघटकस्य 'समवायाभ्युपगमाच्च' इति शब्दस्य व्याख्यानम् ॥

१२१ सु०— ॐ समवायाभ्युपगमाच्च साम्यादनवस्थितेः ॐ ॥

ॐ उभयथाऽपि न कर्मातस्तदभावः ॐ इति सूत्रम्, तत् 'नित्यमेव च भावादि'त्यागामिसूत्रव्याख्यानन्यायेनैव व्याख्यातं भविष्यतीति मन्वानस्तदपहाय हेत्वन्तरेण वैशेषिकादिसमयमपाकुर्वन्(त्) 'समवायाभ्युपगमाच्च साम्यादनवस्थितेरि'त्येतत्सूत्रं व्याचष्टे **कार्येति** ।

अनु०— कार्यकारणयोश्चैव

'समवाय ईर्यत' इति वक्ष्यमाणमत्रापि सम्बध्यते । अनेन समवायप्रतिपादकं परेषां 'इहेति यतः कार्यकारणयोः स समवाय' इति सूत्रमर्थतोऽनुवदति ।

अत्र कार्यकारणशब्दावावयव्यवयववाचकौ । तौ चोपलक्षणपराविति सूचनार्थः चशब्दः । एवशब्दः समवायस्येहप्रत्ययसिद्धत्वं सूचयति ।

परि०— इत्यागामिसूत्रव्याख्यानन्यायेनेति । 'नित्येच्छत्वात्परेशस्य परमाणुसदात्वत' इत्यादिनेति भावः । **अत्रापीति** । 'कार्यकारणयोश्चे'त्येतदनन्तरमित्यर्थः । अर्थतोऽनुवादत्वं व्यनक्ति **अत्रेति** । **तौ चेति** । सूत्रस्थौ । **इहप्रत्ययेति** । स चाग्रे विवरिष्यते । एतच्च समवाय एवेत्यन्वये सति सिद्ध्यतीति भावः ।

गु०दी०— इहेति यतः कार्यकारणयोः इत्यस्येह कार्यकारणयोर्मध्ये कार्यस्य पटादेस्तन्त्वादि-कारणेष्विह तन्तुषु पट इत्यादिरूपेहेति प्रतीतिर्यतो भवति स समवाय इत्यर्थः ।

यादु०— उपलक्षणपराविति । गुणगुण्यादीनामिति शेषः । **एवशब्द इति** । एवशब्दस्य समवाय ईर्यत एवेति सम्बन्धे तेन समवायरूपार्थविधारणलाभादर्थविधारणस्य च प्रमाणसिद्धत्वं विनाऽसम्भवात् समवाये प्रमाणस्य चान्यस्यादर्शनादिहेतिप्रत्ययसिद्धत्वमेव तस्येति सूचयतीत्यर्थः । तथा च कार्यकारणयोरित्यनेन परकीयसमग्रसूत्रार्थानुवादो लब्ध इति भावः ।

वं०प०— कार्यकारणयोः सम्बन्धः समवाय इत्युक्ते निमित्तकारणेनापि कार्यस्य सम्बन्धः समवायः स्यादतो व्याचष्टे **कार्यकारणशब्दाविति** । **सूचयतीति** । तथा च समवाय एवेर्यते न संयोगः । सयवाय-श्चेहप्रत्ययसिद्ध इति भावः ।

कं०रा०— अत्रापीति । कार्यकारणयोश्चेत्यत्रापीत्यर्थः । **अनेनेति** । 'कार्यकारणयोश्चैव समवाय इतीर्यत' इत्यनेन इहेति यतः कार्यकारणयोः सः समवाय इति समवायप्रतिपादकं परेषां सूत्रमर्थतोऽनुवदती-त्यर्थः । सूत्रार्थस्तु कार्यकारणयोर्विषये इहेदमिति प्रत्ययो यतो भवति सः समवाय इति । **तौ चेति** । कार्यकारणशब्दौ च गुणगुणिक्रियाक्रियावन्तजातिव्यक्तिविशेषनित्यद्रव्याणामुपलक्षणपराविति सूचनार्थश्चशब्द इत्यर्थः ।

श्रीनिधि०— इहेति यत इति । अयं सूत्रार्थः । कार्यकारणयोः इति नेति उपलक्षणमिदं गुण-गुण्यादेः । इहेदमितिप्रत्ययो यतो भवति यन्निमित्तकः सम्बन्धसमवाय इति । ननु तुरीपटसम्बन्धे अतिव्याप्तिः

तत्रापि इह तुर्यादौ च 'ट' इति प्रत्ययसम्भवात् तयोः कार्यकारणभावाश्चेत्यत आह **अत्र कार्य-कारणशब्दाविति** । ननु समवाय इति पदमनुकृष्य भिन्नवाक्यतामङ्गीकृत्य गुणादेरित्यस्य तद्विवरणपरत्वं किमर्थमङ्गीक्रियते । एकवाक्यत्वस्यापि सम्भवात् सूत्रस्यार्थतो अनुवादाविधानाच्च सम्भवत्येवेत्यत वाक्यत्वे वाक्यभेदो हि दूषणमिति चेन्न । एकवाक्यत्वे हि कार्यकारणयोः गुणादेश्चतुष्टयस्य एवं च पञ्चकस्येति व्याख्येयम् । यद्यपि एवंचेत्यस्यात्र पक्षे अध्याहारः वाक्यभेदपक्षे वाक्यभेदः अनुकर्षश्चाधिकः तथाऽपि यथाश्रुतनिर्देशात् सामस्त्यभयेन वाक्यभेद एवाङ्गीकृत इति द्रष्टव्यम् ।

शे०वा०— ननु कार्यकारणयोरित्युत्तरभाष्यमनर्थकम् । न चैतत्समवायाभ्युगमाच्चेत्येतत्सूत्रव्याख्यान-रूपत्वान्नानर्थकमिति वाच्यम् । वैशेषिकसमयस्य पूर्वसूत्रेणैव निरस्तत्वेन तस्य सूत्रस्याप्यनर्थकत्वात् । कथञ्चिदर्थवत्त्वे वोभयथाऽपीत्येतत्सूत्रोत्तरत्वात् तस्य तद्व्याख्यानपूर्वकमेव व्याख्येयतया तदव्याख्याय एतन्मात्रव्याख्याने निमित्ताभावाच्चेत्यतस्तदव्याख्याने निमित्तप्रदर्शनपूर्वकं 'समवायेति' सूत्रस्यार्थवत्तामुप-दर्शयन्नेव तत्सूत्रार्थकथनपरतयोत्तरभाष्यं योजयति **उभयथाऽपीत्यादिना** । कार्यकारणयोर्गुणादिपञ्चका-न्तर्गतत्वेन गुणादेः पञ्चकस्येत्यनेनैव सङ्गृहीततया कार्यकारणयोश्चेति पृथक् तद्ग्रहणानर्थक्यप्रसक्त्या कार्य-कारणयोः गुणादेः पञ्चकस्य च समवाय ईर्यत इति यथाश्रुतैकवाक्यतया योजनाया असम्भवात् कार्य-कारणयोश्चैवेत्येकोऽत्र योगः, गुणादेरित्यादिकश्चापर इति वाक्यभेदमाश्रित्यात्रपक्षे साकाङ्क्षतया प्रसक्त-वाक्याभासशङ्कापरिहारायापेक्षितं पूरयति **समवाय ईर्यत इति** । अत्र भाष्येऽयुतसिद्धयोरित्येव वक्तव्ये तथाऽनुक्त्वा कार्यकारणयोरित्युक्तौ किंनिमित्तमित्यतः समवायनिरूपणपरवैशेषिकसूत्रे कार्यकारणयोरित्येवोक्ते-स्तदनुवादरूपेऽत्र भाष्ये तथोक्तिर्युक्तेत्यभिप्रेत्य किं तत्सूत्रं यदनुवादत्वमस्योच्यत इत्यतस्तदुदाहरणपूर्वकमस्य तदनुवादतां दर्शयति **अनेनेति** । आनुपूर्व्या अन्यादृशत्वेन शब्दतोऽनुवादताया बाधितत्वादाह **अर्थत इति** । दण्डघटयोः समवायानभ्युपगमात् कार्यकारणशब्दयोः कार्यकारणमात्रपरत्वस्यानुपपन्नत्वात् तदर्थमाह **अत्र कार्येति** । ननु कार्यकारणपदाभ्यामवयवावयविनोः कारणत्वेन कार्यत्वेन च सामान्येन रूपेणोपस्थितेः कार्यकारणपदयोस्तद्वाचकत्ववत् क्रियाक्रियावतोरपि ताभ्यां सामान्येन रूपेणोपस्थितेस्तद्वाचकत्वस्याप्यङ्गी-कर्तव्यत्वात् क्रियात्वेन क्रियावत्त्वेन च रूपेण तदुपस्थितिदशायां कार्यकारणशब्दयोः क्रियातद्वदुपलक्षणत्वात तद्वाचकत्वाभावाभिप्राये चावयवत्वेनावयवित्वेन च रूपेणावयवावयिनोरप्युपस्थितिदशायां तदुपलक्षणत्वेन तद्वाचकत्वस्याप्यसम्भवात् कथमवयवावयविमात्रवाचकत्वाभिधानमिति चेत् । अत्र वदन्ति । अवयवा-वयविनोर्विशेषरूपेण वाच्यत्वासम्भवेऽपि विशेषस्यापि कार्यत्वेन कारणत्वेन च सामान्यरूपेण वाच्यत्वात् तदभिप्रायेणैतद्ग्रन्थप्रवृत्त्युपपत्तेः । न चैवं क्रियातद्वतोरप्युक्तरूपेण तद्वाच्यत्वापत्तिरिति वाच्यम् । तत्त्वेऽपि तयोर्विशेषरूपेणैवोपस्थित्यर्थं तत्र लक्षणाश्रयणात् । न च तेनैव रूपेणोपस्थितेरपि न प्रयोजनं किञ्चिदिति वाच्यम् । क्रियातद्वतोर्गुणगुण्यादिसमानयोगक्षेमत्वोपदर्शनस्यैव तत्प्रयोजनत्वात् । अन्यथाऽवयवावयवि-समानयोगक्षेमत्वप्रसक्त्याऽवयविन इव क्रियाया अप्यवयवमात्रनिष्ठत्वमेव न तु गुणादेरिव सकलनिष्ठत्वमिति

प्रसङ्गादिति । कार्यकारणयोश्चेति चशब्दवैयर्थ्यमाशङ्क्य कार्यकारणशब्दयोः अवयवावयविवाचकतया गुण-गुण्यादिपरत्वाभावेन, गुणगुण्यादेः समवायाभावशङ्कावारणाय तयोः गुणगुण्याद्युपलक्षणपरत्वसूचनार्थत्वात् न तदित्याह **तौ चेति** । तथाऽपि भाष्ये एवेत्यंशवैयर्थ्यमाशङ्क्य तत्सूत्रोक्तायाः समवायस्येहप्रत्ययसिद्धताया अत्रानुक्तेर्न कार्यकारणयोरित्यादिभाष्यस्यार्थतः समवायप्रतिपादकसूत्रानुवादत्वं सम्भवतीति शङ्कापरिहाराय समवायस्येहप्रत्ययसिद्धत्वसूचनार्थत्वान्न वैयर्थ्यमित्यभिप्रेत्यैवकारस्यार्थमाह **एवशब्द इति** । यद्यपि कार्य-कारणयोः समवाय एवेर्यत इति सम्बन्धे समवायरूपार्थावधारणेन समवायस्य प्रामाणिकत्वमेव सिद्ध्यति तन्मात्रेणैवार्थावधारणनिर्वाहात्, न त्विहप्रत्ययसिद्धत्वम् । तथाऽप्यन्यस्य तत्साधकस्य प्रमाणस्यादर्शनात् सामान्यसिद्धेर्विशेषपर्यवसायित्वमभिप्रेत्यैतदुक्तम् । अत एव सूचयतीत्युक्तमित्यवधेयम् ।

वा०र०— गुणगुण्यादिसमानयोगक्षेमेति । अनेन तौ च उपलक्षणपराविति वाक्ये क्रियागुणादीनां क्रियावयवादीनां च क्रियात्वादिना क्रियावयवत्वादिना च विशेषेणोपस्थित्यर्थमुपलक्षणाश्रयणमित्युक्तं भवति । यद्यप्यत्र क्रियातद्वतोरिव गुणगुणिनोरपि कार्यकारणपदाभ्यां सामान्यरूपेण ग्रहणं सम्भवतीति तदप्याशङ्कनीयं तथापि गुणगुणिनोः विशेषोपस्थित्यर्थं लक्षणामङ्गीकृत्य तद्वतोस्तदनङ्गीकारिणं प्रति तन्न्यायेन न तदलक्षणा-श्रयणावयवकत्वमुपपादितमिति ध्येयम् । ततश्चावयववावयविनोऽवयवमात्रनिष्ठत्ववत् गुणक्रिययोरपि तन्मात्र-निष्ठत्वपरिहाराय कार्यकारणपदाभ्यां उपपादनपरित्यागे अकार्यकारणभूतजातिव्यक्तिविशेषनित्यद्रव्य सलक्षणा-योपपादनमिति तात्पर्यार्थः ।

स०व्र०— कार्यकारणशब्दाविति । ननु कार्यकारणपदाभ्याम् अवयव्यवयवयोः कार्यत्वेन कारणत्वेन च सामान्यधर्मेणोपस्थितिदशायां तद्वाचकत्वाभाववत् अवयवित्वादिविशेषरूपेण तदुपस्थिति-दशायामवयवावयविवाचकत्वस्याप्यभावेन साम्यात् कथमवयव्यवयववाचकत्वमुच्यत इति चेन्न । अवय-व्यादेर्विशेषरूपेणोपस्थितिदशायां तद्वाचकत्वाभावेऽपि कार्यत्वादिसामान्यरूपेणोपस्थितिदशायां तद्वाचकत्वो-पपत्तेः । न च तर्हि क्रियादेरपि सामान्यरूपेणोपस्थितिदशायां कार्यकारणशब्दयोः तद्वाचित्वस्यापि सत्त्वात् कथं लक्ष्यत्वाभिधानमिति वाच्यम् । क्रियात्वादिविशेषरूपेणोपस्थित्यर्थं लक्षणाया आवश्यकत्वात् । न च तद्रूपेणोपस्थितेरपि निष्प्रयोजनत्वाल्लक्षणा व्यर्थेति वाच्यम् । क्रियाक्रियावतोः गुणगुण्यादिसमानयोगक्षेमत्व-स्यैव तत्प्रयोजनत्वात् । अन्यथा अवयविसमानयोगक्षेमत्वापत्त्या गुणादिवत् अवयवावयव्यादिसकलनिष्ठत्वं न ज्ञायेतेति तज्ज्ञानार्थं विशेषरूपेणैवोपस्थितिर्वाच्या । सा च न लक्षणां विनेति लक्षणोक्तिर्युक्तैवेति भावः ।

विठ्ठल०— समवाय ईर्यत इतीति । तथा च कार्यकारणयोश्चैवेति भिन्नं वाक्यम् । न चैव-मनन्वयः । समवाय ईर्यत इतीति वक्ष्यमाणस्यात्र सम्बन्धादिति भावः । नन्वेकवाक्यत्वेन किं नाश्रीयत इति चेन्न । कार्यकारणातिरिक्तगुणादिपञ्चकाभावेनासामञ्जस्यप्राप्तेः भिन्नवाक्यत्वेऽप्युपयोगो नास्तीति चेन्न । परकीयसूत्रानुवादार्थत्वादित्याशयेनाह **अनेनेति** । **कार्यकारणशब्दाविति** । इहेति परकीयसूत्रगतावित्यर्थः ।

उपलक्षणपराविति । गुणगुण्यादीनामिति शेषः । **एवशब्द इति** । एवशब्दस्य समवायीर्यते एवेति सम्बन्धः समवायिरूपार्थावधारणस्य प्रमाणसिद्धत्वं विनासम्भवात् समवाये च प्रमाणस्यान्यस्य सर्वात्मना अभावादिहेति प्रत्ययसिद्धत्वं तस्येवशब्दः सूचयतीत्यर्थः । तथा च कार्यकारणयोश्चैवेत्यनेन समग्रसूत्रार्थो लब्ध इति भावः । ततश्चायं सूत्रार्थः यतः कारणादिह तन्तुषु पटः इह पटे रूपमित्यादि प्रत्ययोऽनुभूयते । अतोऽवयवावयविनोर्गुणगुण्यादीनां च सम्बन्धः समवाय इति । **तद्दर्शनं** तत्सिद्धान्तः ।

॥ इति द्वितीयसूत्रव्याख्यानाभावे कारणम् ॥

* * *

१२२ **सु०— तदेतत्स्वयमेव विवृणोति गुणादेरिति ।**

अनु०— गुणादेः पञ्चकस्य च ।
भिन्नस्यैव तु सम्बन्धः समवायोऽन्य ईर्यते ॥

गुणादेः पञ्चकस्येति गुणावयविक्रियासामान्यविशेषाणामित्यर्थः । **चशब्देन** गुण्यादिपञ्चकस्य चेति समुच्चिनोति । ननु गुणगुण्यादिकमभिन्नं भिन्नाभिन्नं वा, तत्किं समवायेनेत्यत उक्तं **भिन्नस्यैवेति** । **तु**शब्दो विशेषार्थः, 'न ययोः कयोश्चिद्गुणगुणिनोः समवायः, किन्त्वयुतसिद्धयोरेवे'ति । स गुणगुण्यादिस्वभाव एव चेत्, न पदार्थान्तरसिद्धिः, इत्यत उक्तम् **अन्य इति** । **ईर्यते** वैशेषिकादिभिः 'अतोऽपि तद्दर्शनमयुक्तमि'ति शेषः ।

अयमर्थः । **वैशेषिकादयोऽवयवावयविनोर्गुणगुणिनोः क्रियाक्रियावतोर्जातिव्यक्त्योः विशेषनित्यद्रव्ययोरत्यन्तभेदमभ्युपगम्यात्यन्तभिन्नमेव समवायाख्यं सम्बन्धमभ्युपगच्छन्ति । ततोऽप्यनुपपन्नभाषिण इति ।**

परि०— तदेतदिति । कार्यकारणशब्दावयव्यवयवपराविति तौ चोपलक्षणपराविति प्राक्चशब्दसूचितं चेत्यर्थः । **गुण्यादीति** । गुणि-अवयवि-क्रियाश्रयजात्याश्रयविशेषाश्रयाणामित्यर्थः । **अयुतसिद्धयोरिति** । एतल्लक्षणं तन्मतोपन्यासव्याख्यावसरे विवृतम् । **पदार्थान्तरेति** । षट्पदार्थमध्यस्थपदार्थान्तरेत्यर्थः ।

गु०दी०— रक्तिमपटयोः परम्परासम्बन्ध एव न समवाय इत्यतः **न ययोः कयोश्चित्** इत्युक्तम् । तस्य च रजकेन प्रक्षालने कृते सत्यपगमान्नायुतसिद्धत्वमिति भावः ।

यादु०— **विवृणोतीति** । गुणादिपञ्चकमध्ये कार्यकारणयोः पुनर्ग्रहणादेवं व्याख्यातमिति द्रष्टव्यम् ।

वं०प०— **अभिन्नमिति** । तथा चेहप्रत्ययस्यैवाभावेन किं समवायेनेत्यर्थः । **भिन्नाभिन्नमिति** । तथा च भेदस्य सत्त्वात्तेनैवेहप्रत्ययोपपत्तौ न समवायेन कृत्यमित्यर्थः । तमेव विशेषं व्यनक्ति **न ययोरिति** । तथा च यदि भेदसद्भावमात्रेणैवेहप्रत्ययः तदा मेरुनिष्ठगुणेनापि मन्दरो गुणी स्यात् । अतो भेदेऽपि पुनर्गुण-गुण्यादिव्यवहारनिर्वाहाय समवायोऽङ्गीकार्य इत्यर्थः । **पदार्थान्तरेति** । षट्कसङ्ख्यापूरकसमवायरूपेत्यर्थः ।

श्रीनिधि०— **न ययोः कयोश्चिदिति** । न पटनिष्ठगुणादेः घटादेश्चेत्यर्थः । उपलक्षणमिदम् । भाष्ये गुणस्यादौ मुखत उपात्तत्वेन अत्रापि गुणग्रहणं कृतमित्यवधेयम् । एवं पदार्थमुक्त्वा वाक्यार्थमाह **अयमर्थ इति** । **अन्य** इत्यस्यार्थो भिन्नमेवेति ।

शे०वा०— तर्हि कार्यकारणयोश्चैवेत्येतावतैव समवायप्रतिपादकसमग्रसूत्रार्थानुवादसिद्धेर्गुणादे-रित्युत्तरवाक्यस्य वैयर्थ्यमित्याशङ्क्य कार्यकारणपदोपलक्ष्यार्थप्रदर्शनेन तद्विवरणरूपत्वान्न तदित्याशयेन तत्पर-तयोत्तरभाष्यं योजयति **तदेतदिति** । गुणादेः पञ्चकस्येत्यस्य गुणगुण्यादिपञ्चकपरत्वे समुच्चेयाभावेन समुच्चयार्थकभाष्यस्थचशब्दवैयर्थ्यप्रसङ्गात् तदवैयर्थ्यायाधेयपञ्चकपरतया तद्वचाचष्टे **गुणादेरिति** । **तत्किं समवायेनेतीति** । गुणगुण्यादेरत्यन्तभेदवादेऽबाधितेहप्रत्ययरूपसम्बन्धकार्यानुरोधेन तन्निमित्तसम्बन्धत्वेन समवायस्यावश्याङ्गीकार्यत्वेऽपि तदभेदवादे इहेदमिति प्रत्ययस्यायथार्थत्वेनाबाधितेहप्रत्ययरूपसम्बन्धकार्या-भावान्न तन्निमित्तसम्बन्धतया समवायोऽङ्गीकार्य इति भावः । मूले तुशब्दस्यावधारणार्थत्वनिर्देशार्थत्वयो-रनुपपत्तेस्तद्वैयर्थ्यमाशङ्क्य गुणगुण्यादेरयुतसिद्धत्वरूपविशेषद्योतनार्थत्वान्न तदिति भावेन तदर्थमाह **तुशब्द इति** । तुशब्दद्योतितं विशेषमेव दर्शयति **न ययोरिति** । तथाऽपि मूले समवायस्यान्यत्वकथनमनर्थकमित्या-शङ्क्य समवायस्य गुणगुण्यादिसम्बन्ध्यन्यत्वप्रतिपादनार्थं तदित्यभिप्रेत्य तत्प्रतिपादनस्य निष्प्रयोजनतां परिहरति **स इति** । अत्रापेक्षितपूरणेन साकाङ्क्षत्वप्रयुक्तवाक्याभासतां परिहरति **अतोऽपीति** । बुद्ध्यारोहाय वाक्यद्वयस्य तात्पर्यमाह **अयमर्थ इति** ।

वा०र०— मूले उपलक्षणशब्देनाजहत्स्वार्थलक्षणेति सूचनात् गुणादेः पञ्चकस्येत्यनेनाजहत्स्वार्थ-लक्षणया प्राक् पञ्चानां विवरणं कृतं भवतीति गुणावयवीत्यादीत्युत्तरमूलकारीयोक्तियुक्ता कार्यकारणपदोप-लक्षणार्थप्रदर्शनेनेत्यत्र टीकावाक्येऽपि पञ्चानामुपलक्ष्यत्वोक्तिश्च युक्तेति ध्येयम् । गुणेषु नित्यत्वानित्य-त्वयोरुभयोरपि सत्त्वेन कार्यकारणपदाभ्यां अशेषगुणगुणिग्रहणायोगात् तत्परित्यागेनानित्यैकरूपत्वेन पराङ्गीकृत-क्रियायाः तदाश्रयस्यैव च कार्यकारणपदाभ्यां ग्रहणसम्भवं मनसि कृत्वा क्रियातद्वतोरेव शङ्कितमिति तु

वयमालोचयामः । यद्यपि कार्यकारणपदाभ्यां लक्षणया गृहीतगुणगुण्यादिचतुष्टयस्य वाचनिकावयविरूपेण पञ्चत्वं भवतीति तद्विवरणत्वं गुणादेः पञ्चकस्येत्यस्य युक्तम् । वृत्तिद्वयविरोधस्तु गङ्गायां मत्स्यो घोषश्च इत्यादाविव नास्ति । तथापि काकेभ्यः इत्यादाविव एकयैव वृत्त्याऽनेकबोधोपपत्तौ किं वृत्तिद्वयाभिप्रायेणेति भावेन पञ्चानामप्युपलक्ष्यत्वमत्रोक्तमिति ध्येयम् ।

॥ इति एतत्सूत्रघटकस्य 'समवायाभ्युपगमाच्च' इति शब्दस्य व्याख्यानम् ॥

* * *

॥ अथ तत्र तन्मतोक्तसमवायसम्बन्धस्य असिद्धता ॥
॥ अथ तत्रादौ द्रव्याद्गुणादीनामत्यन्तभेदेऽपि तत्सम्बन्धस्य अपरसमवायत्वरूपत्वाभावः ॥
॥ अथ तत्राप्यादौ एतत्सूत्रगत 'साम्यात्' इति शब्दस्य व्याख्यानम् ॥

१२३ **सु०** — "ननु च गुणगुण्यादीनामत्यन्तभेदस्तावद्व्यपदेशभेदादिप्रमाणसिद्धः, अन्यथा स्तम्भकुम्भादीनामप्यत्यन्तभेदो न स्यात् । अस्ति 'चेह तन्तषु पटः, इह पटे रूपम्', 'इह मूर्ते कर्म', 'इह गवि गोत्वम्', 'इह नित्यद्रव्ये विशेषः' इत्यबाधितः प्रत्ययः । न च 'इहेदमि'ति प्रत्ययो विनाऽतिरिक्तेन सम्बन्धेनोपपद्यते, 'इह कुण्डे बदराणी'ति प्रत्ययस्य संयोगपूर्वकत्वदर्शनात् । स चायमयुतसिद्धयोः सम्बन्ध इति संयोगाद्विद्यते । युतसिद्धयोर्हि सम्बन्धः संयोगः, द्रव्यमात्रवृत्तिश्च ।" तदेवं प्रमितस्य समवायस्याभ्युपगमे कथमयुक्तवादित्वं वैशेषिकादीनामित्यत आह **भिन्नत्वेति** ।

अनु०— भिन्नत्वसाम्यतस्तस्य ताभ्यां योगो भवेद्ध्रुवम् ।

भिन्नत्वसाम्यत इत्युपलक्षणम्, 'इह प्रत्ययसाम्यतश्चे'त्यपि द्रष्टव्यम् । **तस्य** समवायस्य । **ताभ्याम्** अवयवावयव्यादिसम्बन्धिभ्यां, सह । **योगः** सम्बन्धः ।

एतदुक्तं भवति । " 'इह तन्तुषु पटः' इत्यादिप्रत्ययः, सम्बन्धपूर्वकोऽबाधितेह-प्रत्ययत्वादिह कुण्डे बदराणीति प्रत्ययवदि"ति समवायमनुमिमानेन 'योऽबाधितेहप्रत्ययः, स सम्बन्धपूर्वकः' इति व्याप्तिरवश्यमङ्गीकरणीया । विद्यते च 'इह तन्तुपटयोः समवायः' इत्यबाधित-इहप्रत्ययः । तेन समवायस्यापि तन्तुपटाभ्यां समवायोऽभ्युपगन्तव्य एव स्यात् । न चाभ्युपगम्यते । अतस्तत्र अनैकान्तिकमनुमानमिति ।

ननु तन्तुपटयोः समवायः सिद्धो न वा । सिद्धश्चेत् किमुत्तरकालभाविनाऽनैकान्त्येन, न चेत् क्वानैकान्त्यम् । मैवम् । आपाततः प्रतीते सम्बन्धे व्यभिचारं दृष्ट्वा परावृत्तेरावश्यकत्वस्य विवक्षितत्वात् ।

परि०— द्विवचननिर्वाहायाह **सम्बन्धिभ्यामिति** । कोऽनेन दोष उक्त इत्यत आह **एतदुक्तमिति** । इह गगने नीलिमेत्यादौ अव्यभिचारायाबाधितेति हेतुविशेषणम् । सम्बन्धपूर्वकत्वं च सम्बन्धजन्यत्वं वा सम्बन्धप्रतीतिपूर्वकत्वं वा । **आपातत इति** । दोषावमर्शात्प्राक्प्रतीतेऽनुमिते सति विमर्शिते व्यभिचारं दृष्ट्वा परावृत्तेः समवायानुमितितो निवृत्तेरित्यर्थः । यद्वा आपाततः प्रतीते सम्बन्धे व्यभिचारं पश्यतो व्याप्तिग्रहवैमुख्येन तद्ग्रहासम्भवादिति तर्कताण्डवरीत्याऽर्थः ।

यादु०— आपाततः प्रतीत इति । व्यभिचारानुपस्थितिदशायां सम्बन्धानुमितौ सत्यां तत्र व्यभिचारोपलम्भे पूर्वोत्पन्नानुमितौ दुष्टकरणजन्यतानिश्चयेनाप्रामाण्यनिश्चये तद्विषयपरित्यागस्यावश्यकताया विवक्षितत्वादित्यर्थः ।

वं०प०— अन्यथेति । व्यपदेशभेदादिरूपे प्रमाणे सत्यपि यदि भेदो नेत्यर्थः । **द्रव्यमात्रेति** । अयं तु समवायो गुणादावप्यस्तीति भावः ।

कं०रा०— व्यपदेशभेदादिति । आदिशब्देनार्थक्रियाभेदादिकं गृह्यते । **अन्यथेति** । व्यपदेशभेदादिके सत्यपि गुणगुण्यादीनामत्यन्तभेदाभाव इत्यर्थः । नन्ववयव्यवयवादिष्वबाधितेहप्रत्ययस्यातिरिक्तसम्बन्धेन विनाऽनुपपत्त्यातिरिक्तसम्बन्धसिद्धावपि तस्य संयोगाद्भेदः कुत इत्यत आह **स चायमिति** । **द्रव्यमात्रेति** । द्रव्यमात्रवृत्तिश्च संयोगः समवायस्तु न तथा । तथा च ततोऽपि समवायस्य संयोगाद्भेद इति भावः ।

श्रीनिधि०— व्यपदेशभेदादीति । गुणगुणी । रूपादिः घट इति व्यपदेशभेदः । आदिपदेन षष्ठीप्रयोगो घटस्य रूपमिति । ज्ञातत्वाज्ञातत्वे एकत्वानेकत्वे इत्यादयो गृह्यन्त । प्रमाणान्तरं वक्तुमुपोद्घातमाह **अस्ति चेति** । **अतिरिक्तेन सम्बन्धेनेति** । गुणगुण्यतिरिक्तेन तत्र च सम्बन्धित्वेन विना नोपपद्यत इत्यर्थः । तर्हि संयोगमादाय अर्थान्तरं किं न स्यादित्यत आह **स चायमिति** । बाधादेव नार्थान्तरमिति भावः । **द्रव्यमात्रवृत्तिश्चेति** । तथा च गुणगुण्यादिसम्बन्धः संयोगातिरिक्त एवाभ्युपगन्तव्य इति, बाधात् नार्थान्तरत्वमिति भावः । इह घटत्वे घटत्वमिति प्रत्यये व्यभिचारपरिहाराय अबाधितेति विशेषणम् । **हेतौ आपाततः प्रतीत इति** । वादिविवादादिना प्रतीत इत्यर्थः ।

शे०वा०— व्यपदेशभेदप्रमाणस्य गुणगुण्यादावत्यन्तभेदासाधकत्वे बाधकमाह **अन्यथेति** । व्यपदेशभेदाद्यतिरिक्तस्य स्तम्भकुम्भादिभेदप्रमाणस्याभावादिति भावः । अस्तु गुणगुण्यादीनामत्यन्तभेदस्तथाऽपि न तावन्मात्रेण तत्र समवायः सिद्ध्यति । तथा सति मेरुमन्दरयोरपि तत्प्रसङ्गादित्यतो नात्यन्तभेदमात्रस्य समवायप्रयोजकत्वं वयमभ्युपगच्छामो येनोक्तदोषः स्यात् । किन्त्वबाधितेहप्रत्ययसहकृतस्यैव तस्येति नाति-प्रसङ्ग इत्यभिप्रेत्य गुणगुण्यादावबाधितेहप्रत्ययस्वरूपमुपदर्शयति **अस्ति चेति** । अप्रयोजकत्वमाशङ्क्य हेतूच्छित्तिमेव विपक्षे बाधकत्वेनाह **न चेति** । तर्हीह कुण्डे बदराणीति प्रत्ययस्येव इह तन्तुषु पट इत्यादीह-प्रत्ययस्यापि संयोगपूर्वकत्वेन प्रकृतप्रतिज्ञातार्थोपपत्तेरर्थान्तरत्वमित्याशङ्क्य बाधादेव न तदित्याह **स चेति** । तावताऽपि कथं संयोगभेदसिद्धिरित्यत आह **युतसिद्धयोरिति** । प्रकारान्तरेण संयोगवैलक्षण्यमुपदर्शयति **द्रव्येति** । अयं च गुणगुण्यादिवृत्तिरपीति भावः । किमेतावता पूर्वानुमाने दूषणमुक्तं भवतीत्यत आह **एतदुक्तं भवतीति** । **अवश्यमङ्गीकरणीयेति** । अन्यथा व्याप्तिविकलतयाऽनुमानस्याभासत्वप्रसङ्गादिति भावः ।

आपातत इति । व्यभिचारानुपस्थितिदशायामनुत्पन्नाया अपि सम्बन्धानुमितेः अनन्तरभाविना व्यभिचारोपलम्भेन दुष्टकरणजन्यतानिश्चयात् अप्रामाण्यनिश्चये तद्विषयपरित्यागस्यावश्यकत्वस्य विवक्षित-त्वादित्यर्थः ।

वा०२०— व्यपदेशभेदादिप्रमाणस्येति । तन्तुपटः इत्यादि व्यपदेशभेदः । आदिपदेन तु तन्तवः अनेके पटस्त्वेकः इति सङ्ख्याभेदस्य तन्तुभिः हिमनिवारणं न भवति पटेन तु तत् भवतीत्यादेः भेदस्य परिग्रहः । स्पष्टं चेदम् । 'विशेषस्तद्गतत्वादि'ति अनुव्याख्यानसम्बन्धिमूले इति ज्ञेयम् ।

स०ना०— समवायपरम्पराप्रयुक्तानवस्थैवात्रोक्तेति मत्वा परिहरति **तन्तुपटयोः समवाय इतीति** ।

विट्ठल०— व्यपदेशभेदादीति । गुणः गुणीत्यादि अपर्यायनामभेदः आधाराधेयभावः गुणिनो ज्ञातत्वेऽपि गुणादीनामज्ञातत्वमित्यादिरादिशब्दार्थः । समवायसाधकानुमानस्य किमनेन दूषणं लब्धमित्यत आह **एतदुक्तं भवतीति** । इहाकाशे नीलिमेत्यादि व्यभिचारवारणाय अबाधितेति हेतुविशेषणम् । अतस्तत्रेति उक्तहेतुमिति तन्तुपटयोः समवाय इति प्रत्यये साध्यानभ्युपगमादित्यर्थः । **अनैकान्त्यमिति** । तन्तुपटयोः समवाय इत्यस्यासिद्धौ व्यभिचारस्थलस्यैव बुद्ध्यनारोपितादिति भावः । **आपातत इति** । व्यभिचारा-नुपस्थितिदशायामापाततः साहचर्यदर्शनमात्रजनितानुमानेन सम्बन्धे प्रतीते पश्चाद्विमर्शतो व्यभिचारं पश्यतः पूर्वोत्पन्नानुमानाप्रामाण्यनिश्चयेनेहप्रत्ययस्य सम्बन्धपूर्वकतानियमाभ्युपगमात्परावृत्तेरावश्यकत्वादित्यर्थः ।

चषक— अबाधितः प्रत्यय इति । तन्तुपटादीनां आधाराधेयभावप्रत्ययस्तद्व्यतिरेकरूपबाध-प्रत्ययविनिर्मुक्तोऽस्तीत्यर्थः । **सम्बन्धपूर्वः** मतभेदेन सम्बन्धजन्यः तत्प्रतीतिजन्य इति वार्थः । **उत्तरकाल-भाविना** सम्बन्धानुमित्युत्तरकालीनप्रतीतिगोचरानैकान्त्येन । **आपाततः प्रतीत इति** । हेतुसाध्ययोः

सहचारादिग्रहदशायामुत्पन्नव्यभिचार प्रतिसन्धानस्यानुमित्यौपयिकव्याप्तिग्रहविघटकतया तत्प्रतिबन्धकत्वेऽप्यनुमित्युत्तरकालीनानैकान्त्यप्रतिसंहितेरुक्तदिशा तद्विरोधिताविरहेण तदप्रतिबद्धपूर्वोत्पन्नसम्बन्धानुमितिधर्मिकेण तादृशानुमित्यनन्तर भाविव्यभिचारोपलब्धिनियन्त्रितभ्रमात्मकपरामर्शजन्यतानिर्णयाधीनाप्रामाण्यनिश्चयेनास्कन्दितानुमित्यविषयत्वसमर्थनादिति भावः ।

१२४ सु०— नन्वत्र भिन्नत्वसाम्यं किमर्थमुपन्यस्तम् । न हि भिन्नत्वं हेतूकृतमिति । सत्यम् । अबाधितत्वद्योतनार्थं भिन्नत्वग्रहणम् । विभिन्नवस्त्वभावे खलु 'इह'प्रत्ययो बाधितः स्यात् । 'इह तन्तुपटयोः समवायः' इति प्रत्ययोऽपि सम्बन्धपूर्वक एव तन्तुपटसमवायस्यैतत्कारणत्वादिति चेन्न; आधाराधेयतया प्रतीयमानयोः सम्बन्धस्य परेण सिसाधयिषितत्वात्, अन्यथा स्थाणुश्येनयोः संयोग इत्यत्र समवायासिद्धिप्रसङ्गात्, इन्द्रियार्थसन्निकर्षादिना सिद्धसाधनतापत्तेश्च ।

परि०— न हि भिन्नत्वमिति । किन्त्विहप्रत्ययसाम्यमेवेति भावः । **अबाधितत्वद्योतनार्थमिति** । इह तन्तुपटयोः समवाय इति इहप्रत्ययस्येति भावः । तद्व्यनक्ति **विभिन्नेति** । व्यभिचारोद्धारमाशङ्कते **इहेति** । तस्य विवरणं **तन्तुपटयोरिति** । साध्यसत्त्वं व्यनक्ति **तन्तुपटेति** । इह तन्तुपटयोः समवाय इत्यत्र यस्तन्तुपटसम्बन्धितया समवायत्वप्रकारेण च सम्बन्धो भासते तस्य विषयतया जनकत्वात् तत्पूर्वकत्वेनैव तत्रापि साध्यसत्त्वेन नानैकान्त्यम् । पूर्वानुमाने सम्बन्धपूर्वक इत्येव सामान्यतः साध्यकरणादिति शङ्कार्थः । परिहारस्य तन्तुपटावाधारत्वेन समवायो ह्याधेयतया तन्तुपटयोः समवाय इत्यत्र प्रतीयते । तत्राधाराधेयभावनिर्वाहकीभूतः सम्बन्धोऽन्य एव वाच्यः । तादृशस्यैव पूर्वोक्तानुमाने तवाभिमतत्वात् स च नेत्यनैकान्त्यं तदवस्थितमेवेति । **आधाराधेयभावतया प्रतीयमानयोरिति** । तथा प्रतीयमानयोः सम्बन्धिनोः सम्बन्धस्येत्यर्थः । कुत एवं सिसाधयिषितत्वमित्यत आह **अन्यथेति** । सामान्यतः सम्बन्धपूर्वकत्वमात्रसाधन इत्यर्थः । **संयोग इत्यत्रेति** । संयोगप्रत्ययः सम्बन्धपूर्वक इति प्रतिज्ञायामित्यर्थः । बाधकान्तरं चाह **इन्द्रियेति** । अन्यथेत्यनुषङ्गः ।

गु०दी०— विभिन्नवस्त्वभावे खल्विहप्रत्यय इत्यत्रेह घटे प्रमेयत्वमित्याद्यभिन्नधर्मव्यवहारे इहप्रत्ययस्य बाधितत्वादित्यर्थः । **इन्द्रियार्थसन्निकर्षादिना** इत्यत्र आधाराधेययोः सम्बन्धं विना यस्य कस्यचित्सम्बन्धस्य जनकत्वमात्रेणोपयोगकथने सतीत्युपस्कर्तव्यम् ।

यादु०— अबाधितत्वद्योतनार्थमिति । इहप्रत्ययस्येति शेषः । तथा च विपक्षे हेतुविशेषणोपपादनार्थं भिन्नत्वग्रहणमिति भावः । **अन्यथेति** । आधाराधेयतया प्रतीयमानयोर्योऽतिरिक्तस्सम्बन्धस्तत्पूर्वक इति साध्यस्यासिषाधयिषितत्वे, इह स्थाणुश्येनयोः संयोग इति विशिष्टप्रत्ययस्यापि पक्षत्वेन तत्रापि संयोगपूर्वकतामादायैव साध्यपर्यवसाने तदंशे समवायासिद्धिप्रसङ्गादित्यर्थः ।

वं०प०— तदुपपादयति **विभिन्नेति** । **विभिन्नवस्त्वभावे,** वस्तुनि भेदाभाव इति यावत् । प्रकृते च भेदस्यैव सत्त्वादिहप्रत्ययोऽबाधित एवेति भावः । **तन्तुपटसमवायस्य** इह तन्तुषु पट इति तन्त्वाधारकपटाधेयकविशिष्टप्रत्ययनिर्वाहकस्य । **एतदिति** । एतस्य इह तन्तुपटयोः समवाय इति विशिष्टप्रत्ययस्येत्यर्थः । तं प्रतीति यावत् । **सिषाधयिषितत्वादिति** । तथा च तन्तुपटयोः समवाय इति तन्तुपटाधारकसमवायाधेयकविशिष्टप्रत्ययनिर्वाहकः कश्चिदाधेयादन्य एव समवायोऽङ्गीकार्यो न तु स एवेत्यर्थः । इह तन्तुषु पट इत्यादिविशिष्टप्रत्ययः सम्बन्धपूर्वक इति साध्ये दूषणान्तरमाह **इन्द्रियेति** । इन्द्रियार्थसन्निकर्षस्यापि विशिष्टप्रत्ययजनकत्वादित्यर्थः ।

कं०रा०— अन्यथेति । इह तन्तुषु पट इत्यादि प्रत्ययः सम्बन्धपूर्वक इत्येव साधने स्थाणुः श्येन इत्येतयोः संयोग इति प्रत्यये समवायपूर्वकत्वं न सिद्धयेत् । सम्बन्धपूर्वक इति प्रतिज्ञायाः तस्मिन्प्रत्यये संयोगस्य कारणत्वेन तत्पूर्वकत्वमादाय पर्यवसानसम्भवादित्यर्थः । **इन्द्रियार्थेति** । इह तन्तुषु पट इत्यादि प्रत्ययः सम्बन्धपूर्वक इत्येव साधने तत्प्रत्यये इन्द्रियार्थसन्निकर्षात्ममनःसंयोगादेः कारणतया सम्बन्धपूर्वकत्वस्य सिद्धत्वात् सिद्धसाधनापत्तेश्च न तथा साधनं युक्तमिति भावः ।

श्रीनिधि०— व्यभिचारपरिहारं शङ्कते **इह तन्तुपटयोरिति** । ननु तत्प्रत्ययकारणं समवायान्तरं नाभ्युपगम्यते तत्कथमेवमुच्यते इत्यत आह **तन्तुपटसमवायस्येति** । पूर्वेणान्वयः । अत्र वक्तव्यम् । इह तन्तुषु पट इत्यादिप्रत्ययादिना आधाराधेयतया प्रतीयमानयोः तत्प्रयोजकः सम्बन्धः सिसाधयिषितो वा उत सम्बन्धमात्रं आद्य आह **आधाराधेयतया प्रतीयमानयोरिति** । तथा चेह तन्तुपटयोः समवाय इत्यत्र न समवायस्याधेयताप्रयोजकसम्बन्धः स्वयं भवतीति अन्यत्र एव वक्तव्ये तत्र व्यभिचार इति भावः । द्वितीय आह **अन्यथेति** । **समवायासिद्धीति** । स्थाणुश्येनयोः संयोग इत्यत्रापि त्वदुक्तरीत्या संयोगस्यैव तत्कारणत्वसम्भवादिति भावः । दूषणान्तरमाह **इन्द्रियार्थसन्निकर्षादिनेति** । इह तन्तुषु पट इत्यादि प्रत्ययः सम्बन्धपूर्वक इत्यनुमानस्येति शेषः । इन्द्रियार्थसन्निकर्षस्यापि इह तन्तुषु पट इत्यादि प्रत्ययकारणत्वादिति भावः । तदर्थं तन्तुपटसम्बन्धपूर्वक इति साधने दृष्टान्ताभावो अप्रसिद्धविशेषणता चेति द्रष्टव्यम् ।

शे०वा०— अत्रेति । साम्यादिति सूत्रे भिन्नत्वसाम्यत इति भाष्ये चेत्यर्थः । ननु व्यभिचारोपपादकहेतुवृत्तेरुपपादनार्थत्वान्न तदुपन्यासानर्थक्यमित्याशङ्क्य भवेदेतदेवं कथञ्चिद्यत्र भिन्नत्वं हेतूकृतं

स्यान्न चैतदस्तीत्याह **न हीति** । **अबाधितत्वद्योतनार्थमिति** । इहप्रत्ययस्येति शेषः । तथा च विपक्षे हेतुविशेषणाबाधितत्वोपदर्शनार्थत्वाद्भिन्नत्वसाम्यस्य न सूत्रभाष्ययोस्तदुपन्यासवैयर्थ्यमिति भावः । आशयमजानानः सम्बन्धपूर्वकत्वमात्रं साध्यमिति मन्यमानः साध्यस्यापि सद्भावान्न व्यभिचार इति शङ्कते **इह तन्तुपटयोरिति** । आशयमुद्घाटयति **नाधारेति** । तन्तुपटसमवायश्चाधारतया प्रतीयमानयोस्तन्तुपटयोराधेयतया प्रतीयमानस्य समवायस्य च न सम्बन्ध इति सम्बन्धपूर्वकत्वाभावाद्व्यभिचार एवेत्यर्थः । सम्बन्धपूर्वकत्वमात्रस्यैव साध्यत्वसम्भवे किमाधाराधेयतया प्रतीयमानयोरिति तद्विशेषणेनेत्यतस्तन्मात्रस्य *साध्यत्वे* बाधकमाह **अन्यथेति** । इहप्रत्यये सम्बन्धपूर्वकत्वमात्रस्यैव साध्यत्वाभ्युपगम इत्यर्थः । इह तन्तुपटयोः समवाय इति प्रत्यये तन्तुपटसमवायस्येवेह स्थाणुश्येनयोः संयोग इति प्रत्ययेऽपि स्थाणुश्येनसंयोगस्यैव कारणताया वक्तुं शक्यत्वात् तन्तुपटयोः समवायस्य च समवायान्तरासिद्धिवत् स्थाणुश्येनयोः संयोगस्य च समवायसिद्धिप्रसङ्गादित्यर्थः ।

स०व्र०— अबाधितत्त्वद्योतनार्थमिति । इहप्रत्ययस्येति शेषः ।

विष्णु०— न हि भिन्नत्वमिति । किन्त्विहप्रत्ययसाम्यमेवेति भावः । **अबाधितत्वद्योतनार्थमिति** । इह तन्तुपटयोः समवाय इति प्रत्ययस्येति शेषः । तद्व्यनक्ति **भिन्नेति** । तथा च विपक्षे हेतुविशेषणोपपादनार्थं भिन्नत्वमिति ग्रहणमिति भावः । व्यभिचारपरिहारमाशङ्कते **इहेति** । **एतत्कारणत्वादिति** । इह तन्तुपटयोः समवाय इति प्रत्ययकारणत्वादित्यर्थः । तथा चाबाधित इहप्रत्ययत्वरूपहेतुमति इह तन्तुपटयोः समवाय इति प्रत्यये सम्बन्धपूर्वकत्वरूपसाध्यस्य सत्त्वान्न व्यभिचार इति शङ्काभिप्रायः । तन्तुपटयोः समवाय इत्यत्र तन्तुपटयोराधारत्वेन समवायस्याधेयतया च प्रत्ययोऽनुभूयते तत्र तन्तुपटयोः समवायस्य वा आधाराधेयभावनिर्वाहको यः सम्बन्धः स एव परेण वक्तव्यः । इह तन्तुषु पट इत्यादौ तादृशस्यैव परेण सिसाधयिषितत्वात् न चासौ परेणाङ्गीक्रियते । तथा चेह तन्तुपटयोः समवाय इति प्रत्यये सम्बन्धपूर्वकत्वरूपसाध्याभावाद्व्यभिचारस्तदवस्थ एवेत्याशयेन परिहरति **नेति** । आधाराधेयतया प्रतीयमानयोः यः सम्बन्धः तत्पूर्वकत्वं सिसाधयिषितमित्यकारे बाधकमाह **अन्यथेति** । इह स्थाणुश्येनयोः संयोग इति विशिष्टप्रत्ययस्यापि समवायसाधने पक्षत्वेन तत्राप्याधेयसंयोगपूर्वकतामादाय साध्यपर्यवसाध्यप्राप्यसमवायस्यासिद्धिप्रसङ्गादिति भावः । बाधकान्तरमाह **इन्द्रियेति** । उक्तविशिष्टप्रत्यये पक्षभूतेन्द्रियार्थयोः सम्बन्धस्तत्पूर्वकतायाः सिद्धत्वादिति भावः ।

चषक— अन्यथा सप्तम्यन्तार्थानुयोगिकसम्बन्धविषयकत्वस्यासिषाधयिषितत्वे ।

॥ इति एतत्सूत्रगत 'साम्यात्' इति शब्दस्य व्याख्यानम् ॥

* * *

॥ अथ तत्रान्ते एतत्सूत्रगत 'अनवस्थितेः' इति शब्दस्य व्याख्यानम् ॥

१२५ सु०— ननु 'अनवस्थितेरि'ति सूत्रं कथम् । इत्थम् । यदि व्यभिचारपरिहाराय समवायस्यापि समवायान्तरमुपेयते, तदाऽनवस्थितिरिति ।

इह केचित्समवायं प्रत्यक्षमाचक्षाणाः, यत इति च विषयसप्तमीं व्याचक्षाणाः, तत्स्थेम्ने अनुमानमाचक्षते । तेषाम् 'इह'प्रत्ययस्य सम्बन्धपूर्वकत्वं नाम तत्प्रतीतिपूर्वकत्वमेव । तन्मते स्फुटैवानवस्था ।

ये तु प्रत्यक्षतां नाभ्युपगच्छन्ति, सम्बन्धस्य सत्तामात्रेणेहप्रत्ययकारणवत्वमाहुस्तेषाम्; 'अवस्थितिः = सिद्धान्तः' तद्विरोधोऽनवस्थितिः इत्यनवस्थितिशब्दोऽपसिद्धान्तवाची व्याख्यायते;

यद्वेह कुण्डे बदराणीतिवत् सम्बन्धस्य प्रतीत्यैवेहप्रत्ययकारणत्वादत्रापि प्रतीतिमापाद्यानवस्थैव वक्तव्या । कुण्डबदरसंयोगस्य योग्यतया अवर्जनीयतया प्रतीतिर्नेहप्रत्ययकारणमिति कुत एषा कल्पना । सत्तामात्रेणेहप्रत्ययकारणत्वोपपत्तौ प्रतीतेरपि कारणत्वकल्पकाभावादिति चेन्न, 'सत्यपि संयोगे कुतश्चिद्बाधवधानादप्रतीयमाने नेह बुद्धिर्भवति । भवति चासत्यपि संयोगे तद्विपर्ययादि'त्यन्वयव्यतिरेकयोः कल्पकत्वात् । स्वस्वामिभावादयोऽपि हि ज्ञाता एव सम्बन्धनिमित्तव्यवहारहेतवो दृष्टा नान्यथा । न ते सम्बन्धा अद्विष्ठत्वादिति चेन्न, संयोगस्याप्यद्विष्ठताया वक्ष्यमाणत्वात् । किञ्चैवं समवायोऽपि न सम्बन्धः स्यात्, तस्यानाश्रितत्वाभ्युपगमात् ।

नन्वेवं तर्हि नानैकान्त्यम्, अनवस्थयैव बाधितत्वेनाबाधित'इह'प्रत्ययत्वस्य तत्रावृत्तेरिति चेन्न, अनवस्थायाः साध्यबाधकत्वेन साधनाबाधकत्वात् । साध्यबाधेनैव साधनबाधनाभ्युपगमस्य व्याप्तिनिश्चयोत्तरकालीनत्वात् ॥ तन्तुपटयोः समवाय इति प्रतीतिरपि सम्बन्धपूर्विकैव । किन्त्वारोपित एवासौ सम्बन्ध इति चेन्न, अनवस्थाऽनिस्तारात् । आरोपितसम्बन्धपूर्वकत्वं हि सम्बन्धारोपपूर्वकत्वमेव, प्रतीतौ चेयमनवस्थोक्तेति कथं (तन्निस्ता)निस्तारः ॥ किञ्चैवं वदता सत्तयैव सम्बन्धस्य कारणत्वमिति मतं त्यक्तं स्यात् ।

अपि चाबाधितोऽपि 'इह'प्रत्ययो यदि सम्बन्धारोपमात्रेण भवेत् तदा तन्तुपटादावपि किन्न भवेदिति समवायासिद्धिः । क्वचित्सिद्धस्य क्वचिदारोपः कुत्राप्यभावे तदसिद्धिरिति चेन्न, स्थाणुश्येनयोः सम्बन्धस्य सत्त्वात् । अन्यथा समवायेऽपि समवायान्तरारोपो न स्यात्, समवायान्तरस्य क्वाप्य(सत्त्वात्)सम्भवात् ।

समवाये भेद एवारोप्यते न समवायान्तरमिति चेन्न, तावन्मात्रेण 'इह'प्रत्ययायोगात् । सम्बन्धिसम्बन्धभावोऽप्यारोप्यत इति चेन्न, तर्हि तन्तुपटादावपि तदारोपमात्रेणेहप्रत्ययोपपत्तौ किं समवायेनेति ।

परि०— सूत्रं कथमिति । सूत्रांशः कथं व्याख्येय इत्यर्थः । साम्यादित्यस्य भिन्नत्वसाम्यात् तत एवाबाधितेहप्रत्ययसाम्यादिति सौत्रपदस्य द्वेधार्थकथनेनानैकान्त्यस्य प्राप्तत्वादिति भावः । तदा अनवस्थितेरित्युक्तानवस्थितिशब्दार्थं द्वेधा विवृणोति **इहेत्यादिना व्याख्यायत इत्यन्तेन** । **विषयेति** । यतो यत्र यद्विषये इहेति प्रत्यक्षप्रत्ययः स सम्बन्धः कार्यकारणयोः समवाय इति व्याचक्षाणा इत्यर्थः । **तत्स्थेम्ने** तत्प्रत्यक्षत्वस्थैर्यायेत्यर्थः । स्थेमशब्दनिर्वाहश्च जगज्जन्मस्थेमेत्याद्यपद्यव्याख्यावसरे दर्शितः । **अनुमानं** प्रागुक्तानुमानमित्यर्थः । **तत्प्रतीतिपूर्वकत्वमिति** । सम्बन्धप्रतीतिजन्यत्वमित्यर्थः । स्वसम्बन्धस्य पूर्वं प्रत्यक्षतः प्रतीतौ सिद्धायामेव प्राक्पक्षीकृतेहप्रत्ययानां तज्जन्यत्वं सिद्ध्यतीति तत्स्थेम्ने इत्युक्तमिति भावः । **स्फुटेवैति** । इह तन्तुपटयोः समवाय इति बुद्धौ अव्यभिचाराय तत्रापि सम्बन्धप्रतीतिपूर्वकत्वे तत्राप्येवमित्यनेकसम्बन्धप्रतीत्यसिद्ध्या प्रकृतप्रत्यये तत्पूर्वकत्वे सिद्धे व्यभिचारस्तदवस्थ एवेति व्यभिचारोपपादकत्वेनैवानवस्थितिपदं (व्याख्येयं) इत्यर्थः । **अनवस्थितिशब्द इति** । अत्रादौ यदीत्यादितदेत्यन्तं वाक्यं योज्यम् । अपसिद्धान्तवाचित्वं क्लिष्टमित्यत आह **यद्वेति** । **इहप्रत्ययेति** । आधाराधेयभावप्रत्ययेत्यर्थः । **आपाद्येति** । इह तन्तुपटयोः समवाय इति प्रत्ययोऽपीहप्रत्ययत्वादिह कुण्डे बदराणीति प्रत्ययवत् सम्बन्धप्रतीतिपूर्वक इत्यापाद्येत्यर्थः । नेह बुद्धिरिति पदविभागः । **सम्बन्धनिमित्तव्यवहारेति** । अस्येदं स्वं अस्यायं पुत्रः अस्येयं भार्या अस्यायं नप्तेत्यादिव्यवहारहेतव इत्यर्थः । **वक्ष्यमाणत्वादिति** । 'संयोगश्च विभागश्च भेदश्चैव पृथक्पृथगि'त्यत्रेति भावः । ननु व्यापकबाधे तद्व्याप्यहेतोः कथं न बाधः । अन्यथा व्यापकभावायोगादित्यत आह **साध्येति** । शङ्कते **तन्त्विति** । ननु स्था(णोः)णुश्येननिरूपित-

यादु०— अबाधितत्वद्योतनार्थमिति । इहप्रत्ययस्येति शेषः । तथा च विपक्षे हेतुविशेषणोपपादनार्थं भिन्नत्वग्रहणमिति भावः । **अन्यथेति** । आधाराधेयतया प्रतीयमानयोर्योऽतिरिक्तस्सम्बन्धस्तत्पूर्वक इति साध्यस्यासिषाधयिषितत्वे, इह स्थाणुश्येनयोः संयोग इति विशिष्टप्रत्ययस्यापि पक्षत्वेन तत्रापि संयोगपूर्वकतामादायैव साध्यपर्यवसाने तदंशे समवायासिद्धिप्रसङ्गादित्यर्थः ।

वं०प०— तदुपपादयति **विभिन्नेति** । **विभिन्नवस्त्वभावे,** वस्तुनि भेदाभाव इति यावत् । प्रकृते च भेदस्यैव सत्त्वादिहप्रत्ययोऽबाधित एवेति भावः । **तन्तुपटसमवायस्य** इह तन्तुषु पट इति तन्त्वाधारकपटाधेयकविशिष्टप्रत्ययनिर्वाहकस्य । **एतदिति** । एतस्य इह तन्तुपटयोः समवाय इति विशिष्टप्रत्ययस्येत्यर्थः । तं प्रतीति यावत् । **सिषाधयिषितत्वादिति** । तथा च तन्तुपटयोः समवाय इति तन्तुपटाधारकसमवायाधेयकविशिष्टप्रत्ययनिर्वाहकः कश्चिदाधेयादन्य एव समवायोऽङ्गीकार्यो न तु स एवेत्यर्थः । इह तन्तुषु पट इत्यादिविशिष्टप्रत्ययः सम्बन्धपूर्वक इति साध्ये दूषणान्तरमाह **इन्द्रियेति** । इन्द्रियार्थसन्निकर्षस्यापि विशिष्टप्रत्ययजनकत्वादित्यर्थः ।

कं०रा०— अन्यथेति । इह तन्तुषु पट इत्यादि प्रत्ययः सम्बन्धपूर्वक इत्येव साधने स्थाणुः श्येन इत्येतयोः संयोग इति प्रत्यये समवायपूर्वकत्वं न सिद्धचेत् । सम्बन्धपूर्वक इति प्रतिज्ञायाः तस्मिन्प्रत्यये संयोगस्य कारणत्वेन तत्पूर्वकत्वमादाय पर्यवसानसम्भवादित्यर्थः । **इन्द्रियार्थेति** । इह तन्तुषु पट इत्यादि प्रत्ययः सम्बन्धपूर्वक इत्येव साधने तत्प्रत्यये इन्द्रियार्थसन्निकर्षात्ममनःसंयोगादेः कारणतया सम्बन्धपूर्वकत्वस्य सिद्धत्वात् सिद्धसाधनापत्तेश्च न तथा साधनं युक्तमिति भावः ।

श्रीनिधि०— व्यभिचारपरिहारं शङ्कते **इह तन्तुपटयोरिति** । ननु तत्प्रत्ययकारणं समवायान्तरं नाभ्युपगम्यते तत्कथमेवमुच्यते इत्यत आह **तन्तुपटसमवायस्येति** । पूर्वेणान्वयः । अत्र वक्तव्यम् । इह तन्तुषु पट इत्यादिप्रत्ययादिना आधाराधेयतया प्रतीयमानयोः तत्प्रयोजकः सम्बन्धः सिसाधयिषितो वा उत सम्बन्धमात्रं आद्य आह **आधाराधेयतया प्रतीयमानयोरिति** । तथा चेह तन्तुपटयोः समवाय इत्यत्र न समवायस्याधेयताप्रयोजकसम्बन्धः स्वयं भवतीति अन्यत्र एव वक्तव्ये तत्र व्यभिचार इति भावः । द्वितीय आह **अन्यथेति** । **समवायासिद्धीति** । स्थाणुश्येनयोः संयोग इत्यत्रापि त्वदुक्तरीत्या संयोगस्यैव तत्कारणत्वसम्भवादिति भावः । दूषणान्तरमाह **इन्द्रियार्थसन्निकर्षादिनेति** । इह तन्तुषु पट इत्यादि प्रत्ययः सम्बन्धपूर्वक इत्यनुमानस्येति शेषः । इन्द्रियार्थसन्निकर्षस्यापि इह तन्तुषु पट इत्यादि प्रत्ययकारणत्वादिति भावः । तदर्थं तन्तुपटसम्बन्धपूर्वक इति साधने दृष्टान्ताभावो अप्रसिद्धविशेषणता चेति द्रष्टव्यम् ।

शे०वा०— अत्रेति । साम्यादिति सूत्रे भिन्नत्वसाम्यत इति भाष्ये चेत्यर्थः । ननु व्यभिचारोपपादकहेतुवृत्तेरुपपादनार्थत्वान्न तदुपन्यासानर्थक्यमित्याशङ्क्य भवेदेतदेवं कथञ्चिद्यत्र भिन्नत्वं हेतूकृतं

स्यान्न चैतदस्तीत्याह **न हीति** । **अबाधितत्वद्योतनार्थमिति** । इहप्रत्ययस्येति शेषः । तथा च विपक्षे हेतुविशेषणाबाधितत्वोपदर्शनार्थत्वाद्भिन्नत्वसाम्यस्य न सूत्रभाष्ययोस्तदुपन्यासवैयर्थ्यमिति भावः । आशयमजानानः सम्बन्धपूर्वकत्वमात्रं साध्यमिति मन्यमानः साध्यस्यापि सद्भावान्न व्यभिचार इति शङ्कते **इह तन्तुपटयोरिति** । आशयमुद्घाटयति **नाधारेति** । तन्तुपटसमवायश्चाधारतया प्रतीयमानयोस्तन्तुपटयोराधेयतया प्रतीयमानस्य समवायस्य च न सम्बन्ध इति सम्बन्धपूर्वकत्वाभावाद्व्यभिचार एवेत्यर्थः । सम्बन्धपूर्वकत्वमात्रस्यैव साध्यत्वसम्भवे किमाधाराधेयतया प्रतीयमानयोरिति तद्विशेषणेनेत्यतस्तन्मात्रस्य साध्यत्वे बाधकमाह **अन्यथेति** । इहप्रत्यये सम्बन्धपूर्वकत्वमात्रस्यैव साध्यत्वाभ्युपगम इत्यर्थः । इह तन्तुपटयोः समवाय इति प्रत्यये तन्तुपटसमवायस्येवेह स्थाणुश्येनयोः संयोग इति प्रत्ययेऽपि स्थाणुश्येनसंयोगस्यैव कारणताया वक्तुं शक्यत्वात् तन्तुपटयोः समवायस्य च समवायान्तरासिद्धिवत् स्थाणुश्येनयोः संयोगस्य च समवायसिद्धिप्रसङ्गादित्यर्थः ।

स०व्र०— अबाधितत्त्वद्योतनार्थमिति । इहप्रत्ययस्येति शेषः ।

वि०कु०— न हि भिन्नत्वमिति । किन्त्विहप्रत्ययसाम्यमेवेति भावः । **अबाधितत्वद्योतनार्थमिति** । इह तन्तुपटयोः समवाय इति प्रत्ययस्येति शेषः । तद्व्यनक्ति **भिन्नेति** । तथा च विपक्षे हेतुविशेषणोपपादनार्थं भिन्नत्वमिति ग्रहणमिति भावः । व्यभिचारपरिहारमाशङ्कते **इहेति** । **एतत्कारणत्वादिति** । इह तन्तुपटयोः समवाय इति प्रत्ययकारणत्वादित्यर्थः । तथा चाबाधित इहप्रत्ययत्वरूपहेतुमति इह तन्तुपटयोः समवाय इति प्रत्यये सम्बन्धपूर्वकत्वरूपसाध्यस्य सत्त्वान्न व्यभिचार इति शङ्काभिप्रायः । तन्तुपटयोः समवाय इत्यत्र तन्तुपटयोराधारत्वेन समवायस्याधेयतया च प्रत्ययोऽनुभूयते तत्र तन्तुपटयोः समवायस्य वा आधाराधेयभावनिर्वाहको यः सम्बन्धः स एव परेण वक्तव्यः । इह तन्तुषु पट इत्यादौ तादृशस्यैव परेण सिसाधयिषितत्वात् न चासौ परेणाङ्गीक्रियते । तथा चेह तन्तुपटयोः समवाय इति प्रत्यये सम्बन्धपूर्वकत्वरूपसाध्याभावाद्व्यभिचारस्तदवस्थ एवेत्याशयेन परिहरति **नेति** । आधाराधेयतया प्रतीयमानयोः यः सम्बन्धः तत्पूर्वकत्वं सिसाधयिषितमित्यकारे बाधकमाह **अन्यथेति** । इह स्थाणुश्येनयोः संयोग इति विशिष्टप्रत्ययस्यापि समवायसाधने पक्षत्वेन तत्राप्याधेयसंयोगपूर्वकतामादाय साध्यपर्यवसाध्यप्राप्यसमवायस्यासिद्धिप्रसङ्गादिति भावः । बाधकान्तरमाह **इन्द्रियेति** । उक्तविशिष्टप्रत्यये पक्षभूतेन्द्रियार्थयोः सम्बन्धस्तत्पूर्वकतायाः सिद्धत्वादिति भावः ।

चषक— अन्यथा सप्तम्यन्तार्थानुयोगिकसम्बन्धविषयकत्वस्यासिषाधयिषितत्वे ।

॥ इति एतत्सूत्रगत 'साम्यात्' इति शब्दस्य व्याख्यानम् ॥

* * *

॥ अथ तत्रान्ते एतत्सूत्रगत 'अनवस्थितेः' इति शब्दस्य व्याख्यानम् ॥

१२५ सु०— ननु 'अनवस्थितेरि'ति सूत्रं कथम् । इत्थम् । यदि व्यभिचारपरिहाराय समवायस्यापि समवायान्तरमुपेयते, तदाऽनवस्थितिरिति ।

इह केचित्समवायं प्रत्यक्षमाचक्षाणाः, यत इति च विषयसप्तमीं व्याचक्षाणाः, तत्स्थेभ्ये अनुमानमाचक्षते । तेषाम् 'इह'प्रत्ययस्य सम्बन्धपूर्वकत्वं नाम तत्प्रतीतिपूर्वकत्वमेव । तन्मते स्फुटैवानवस्था ।

ये तु प्रत्यक्षतां नाभ्युपगच्छन्ति, सम्बन्धस्य सत्तामात्रेणेहप्रत्ययकारणवत्वमाहुस्तेषाम्; 'अवस्थितिः = सिद्धान्तः' तद्विरोधोऽनवस्थितिः इत्यनवस्थितिशब्दोऽपसिद्धान्तवाची व्याख्यायते;

यद्वेह कुण्डे बदराणीतिवत् सम्बन्धस्य प्रतीत्यैवेहप्रत्ययकारणत्वादत्रापि प्रतीतिमापाद्यानवस्थैव वक्तव्या । कुण्डबदरसंयोगस्य योग्यतया अवर्जनीयतया प्रतीतिर्नेहप्रत्ययकारणमिति कुत एषा कल्पना । सत्तामात्रेणेहप्रत्ययकारणत्वोपपत्तौ प्रतीतेरपि कारणत्वकल्पकाभावादिति चेन्न, 'सत्यपि संयोगे कुतश्चिद्व्यवधानादप्रतीयमाने नेह बुद्धिर्भवति । भवति चासत्यपि संयोगे तद्विपर्ययादि'त्यन्वयव्यतिरेकयोः कल्पकत्वात् । स्वस्वामिभावादयोऽपि हि ज्ञाता एव सम्बन्धनिमित्तव्यवहारहेतवो दृष्टा नान्यथा । न ते सम्बन्धा अद्विष्ठत्वादिति चेन्न, संयोगस्याप्यद्विष्ठताया वक्ष्यमाणत्वात् । किञ्चैवं समवायोऽपि न सम्बन्धः स्यात्, तस्यानाश्रितत्वाभ्युपगमात् ।

नन्वेवं तर्हि नानैकान्त्यम्, अनवस्थयैव बाधितत्वेनाबाधित'इह'प्रत्ययत्वस्य तत्रावृत्तेरिति चेन्न, अनवस्थायाः साध्यबाधकत्वेन साधनाबाधकत्वात् । साध्यबाधेनैव साधनबाधनाभ्युपगमस्य व्याप्तिनिश्चयोत्तरकालीनत्वात् ॥ तन्तुपटयोः समवाय इति प्रतीतिरपि सम्बन्धपूर्विकैव । किन्त्वारोपित एवासौ सम्बन्ध इति चेन्न, अनवस्थाऽनिस्तारात् । आरोपितसम्बन्धपूर्वकत्वं हि सम्बन्धारोपपूर्वकत्वमेव, प्रतीतौ चेयमनवस्थोक्तेति कथं (तन्निस्ता)निस्तारः ॥ किञ्चैवं वदता सत्तयैव सम्बन्धस्य कारणत्वमिति मतं त्यक्तं स्यात् ।

अपि चाबाधितोऽपि 'इह'प्रत्ययो यदि सम्बन्धारोपमात्रेण भवेत् तदा तन्तुपटादावपि किन्न भवेदिति समवायासिद्धिः । क्वचित्सिद्धस्य क्वचिदारोपः कुत्राप्यभावे तदसिद्धिरिति चेन्न, स्थाणुश्येनयोः सम्बन्धस्य सत्त्वात् । अन्यथा समवायेऽपि समवायान्तरारोपो न स्यात्, समवायान्तरस्य क्वाप्य(सत्त्वात्)सम्भवात् ।

समवाये भेद एवारोप्यते न समवायान्तरमिति चेन्न, तावन्मात्रेण 'इह'प्रत्ययायोगात् । सम्बन्धिसम्बन्धभावोऽप्यारोप्यत इति चेन्न, तर्हि तन्तुपटादावपि तदारोपमात्रेणेहप्रत्ययोपपत्तौ किं समवायेनेति ।

परि०— सूत्रं कथमिति । सूत्रांशः कथं व्याख्येय इत्यर्थः । साम्यादित्यस्य भिन्नत्वसाम्यात् तत एवाबाधितेहप्रत्ययसाम्यादिति सौत्रपदस्य द्वेधार्थकथनेनानैकान्त्यस्य प्राप्तत्वादिति भावः । तदा अनवस्थितेरित्युक्तानवस्थितिशब्दार्थं द्वेधा विवृणोति **इहेत्यादिना व्याख्यायत इत्यन्तेन** । **विषयेति** । यतो यत्र यद्विषये इहेति प्रत्यक्षप्रत्ययः स सम्बन्धः कार्यकारणयोः समवाय इति व्याचक्षाणा इत्यर्थः । **तत्स्थेम्ने** तत्प्रत्यक्षत्वस्थैर्यायेत्यर्थः । स्थेमशब्दनिर्वाहश्च जगज्जन्मस्थेमेत्याद्यपद्यव्याख्यावसरे दर्शितः । **अनुमानं** प्रागुक्तानुमानमित्यर्थः । **तत्प्रतीतिपूर्वकत्वमिति** । सम्बन्धप्रतीतिजन्यत्वमित्यर्थः । स्वसम्बन्धस्य पूर्वं प्रत्यक्षतः प्रतीतौ सिद्धायामेव प्राक्पक्षीकृतेहप्रत्ययानां तज्जन्यत्वं सिद्ध्यतीति तत्स्थेम्ने इत्युक्तमिति भावः । **स्फुटेवैति** । इह तन्तुपटयोः समवाय इति बुद्धौ अव्यभिचाराय तत्रापि सम्बन्धप्रतीतिपूर्वकत्वे तत्राप्येवमित्यनेकसम्बन्धप्रतीत्यसिद्ध्या प्रकृतप्रत्यये तत्पूर्वकत्वे सिद्धे व्यभिचारस्तदवस्थ एवेति व्यभिचारोपपादकत्वेनैवानवस्थितिपदं (व्याख्येयं) इत्यर्थः । **अनवस्थितिशब्द इति** । अत्रादौ यदीत्यादितदेत्यन्तं वाक्यं योज्यम् । अपसिद्धान्तवाचित्वं क्लिष्टमित्यत आह **यद्वेति** । **इहप्रत्ययेति** । आधाराधेयभावप्रत्ययेत्यर्थः । **आपाद्येति** । इह तन्तुपटयोः समवाय इति प्रत्ययोऽपीहप्रत्ययत्वादिह कुण्डे बदराणीति प्रत्ययवत् सम्बन्धप्रतीतिपूर्वक इत्यापाद्येत्यर्थः । नेह बुद्धिरिति पदविभागः । **सम्बन्धनिमित्तव्यवहारेति** । अस्येदं स्वं अस्यायं पुत्रः अस्येयं भार्या अस्यायं नप्तेत्यादिव्यवहारहेतव इत्यर्थः । **वक्ष्यमाणत्वादिति** । 'संयोगश्च विभागश्च भेदश्चैव पृथक्पृथगि'त्यत्रेति भावः । ननु व्यापकबाधे तद्व्याप्यहेतोः कथं न बाधः । अन्यथा व्यापकभावायोगादित्यत आह **साध्येति** । शङ्कते **तन्त्विति** । ननु स्था(णोः)णुश्येननिरूपित-

सम्बन्धसत्त्वेऽपि तन्तुपटनिरूपितसम्बन्धो न सिद्ध इत्यत आह **अन्यथेति** । आरोपितरूपेणैव सत्त्वापेक्षायामित्यर्थः । **तावन्मात्रेणेति** । समवायो भिन्न इत्यारोपमात्रेणेत्यर्थः । **सम्बन्धि-सम्बन्धभाव इति** । समवायिसमवायनिरूपितत्वमपीत्यर्थः ।

गु०दी०— उत्पत्तिज्ञप्तिप्रतिबन्धिकैवानवस्था दूषणम् । समवायश्च नित्यः । नित्ये च समवाये उत्पत्तिप्रतिबन्धकत्वायोगात् प्रतीतिप्रतिबन्धकत्वसङ्कटनाय एकदेशमतमुपन्यस्यति **केचिदिति** । सूत्रकारस्य तु सिद्धे वस्तुन्युत्पत्तिज्ञप्तिप्रतिबन्धकानवस्थातोऽपि समवायपरम्परामनङ्गीकुर्वता तार्किकेण औत्तरेहप्रत्ययेषु समवायानङ्गीकारात् तेष्वेवेहप्रत्ययस्य व्यभिचरितत्वेन प्राथमिकेहप्रत्ययेऽपि समवायो न सिद्ध्येत् । एवं च स्वरूपस्यैव विघटिकाऽनवस्था महादूषणमिति भावः । उक्तरीत्या सौत्रानवस्थितेरेव सुवचत्वात् । **अपसिद्धान्त-वाची व्याख्यायते** इत्यभ्युपगमवादोऽयम् । **यद्वा इह कुण्डे बदराणि** इत्यादिकमपि सम्बन्धप्रतीतेरेव इहेति प्रतीतौ कारणत्वं वदतां मतानुवादोऽयम् । वस्तुतस्त्विह भूतले घटो नास्तीत्यादीहप्रत्ययेऽपि भूतलघटसम्बन्धादेः सहैव प्रतीतिः न तु प्राक् प्रतीति नियमः । अयं घट इति प्रतीतिरपि हि घटत्ववानयं घट इत्येवमाकारिका । विशेषणज्ञानस्य कारणतां वदन्तोऽपि तार्किकाः संसर्गस्तु संसर्गमर्यादयैव भासते न तु तस्यापि प्राक् ज्ञानमित्याहुः । सौत्र्यनवस्था तूक्तविधया सुस्थैव । एवं च विशेषणस्यापि सहैव प्रतीतिः न तु प्राक् प्रतीतिरिति वदतामस्माकं नात्र महानाग्रह इति ज्ञेयम् । तथा च वक्ष्यति **किं चैवं वदतेति** ।

यादु०— सूत्रं कथम् । सूत्रांशः किमर्थः । व्यभिचारोपपादनस्य पूर्वभागेनैव जातत्वादिति भावः । **तदाऽनवस्थितिरिति** । तथा च विपक्षे समवाये साध्याभावोपपादनद्वारा व्यभिचारोपपादक एवायमप्यंश इति भावः । ननूत्पत्तिज्ञप्त्यप्रतिबन्धकत्वात् कथमियमनवस्था दूषणमित्याशङ्कायां ज्ञप्तिप्रतिबन्धकतामुपपादयितुमाह **इह केचिदित्यादिना** । ननु समवायस्यातीन्द्रियत्वेनानुमानात्प्रागप्रतीतौ कथमिहेतिप्रत्ययस्य सम्बन्धप्रतीति-पूर्वकत्वं साधयितुं शक्यमित्यत उक्तं **समवायं प्रत्यक्षमाचक्षाणा इति** । नन्विहेतिप्रत्ययस्य समवायप्रतीति-पूर्वकतासाधने सूत्रविरोधः । तत्रेहेति यत इतीहप्रत्ययस्य स्वरूपसत्समवायसाध्यत्वस्योक्तत्वादित्यत उक्तं **यत इति च विषयसप्तमीमिति** । तथा च सूत्रं समवायस्य प्रत्यक्षविषयत्वमेव प्रतिपादयति न तज्जनकत्वमतो न विरोध इति भावः । ननु समवायस्य प्रत्यक्षत्वे उक्तानुमानवैयर्थ्यमित्यत उक्तं **तत्स्थेम्न इति** । प्रत्यक्षप्रामाण्यस्थैर्याय तन्निश्चयायेति यावत् । अनुवादसंवादमाचक्षतेऽतो न वैयर्थ्यमित्यर्थः । **स्फुटैवेति** । जनकीभूतसम्बन्धप्रतीतिपरम्पराया अपर्यवसाने पूर्वपूर्वसम्बन्धप्रतीत्यनुपपत्त्योत्तरोत्तरसम्बन्धप्रतीतेरनुपपत्तौ प्रकृतेहप्रत्ययस्यानुपपत्तिरिति ज्ञप्तिप्रतिबन्धसम्भवादिति भावः । **अपसिद्धान्तवाचीति** । यदि व्यभिचार-परिहाराय समवायेऽपि समवायान्तरमङ्गीक्रियते तदाऽनवस्थितिरपसिद्धान्त इति व्याख्यायत इत्यर्थः । तत्त्वम्भावेनेतिसूत्रेण समवायैकत्वस्य तेनोक्तत्वादिति भावः । न चात्रापि व्यभिचारपरिहाराय तत्र तत्र समवायपरम्परास्वीकारेऽनवस्थैव कुतोऽनवस्थितिपदार्थतया न व्याख्यात इति वाच्यम् । समवायबाहुल्यप्राप्ता-

वुत्पत्तिज्ञास्यतिबन्धकतया मूलक्षयाभावेन तस्या अत्र वक्तुमनुचितत्वादित्याशयात् । **प्रतीतिमापाद्येति** । तन्तुपटादिसम्बन्धः प्रतीत्यैवेह प्रत्ययजनकः सम्बन्धत्वात् कुण्डबदरसम्बन्धवदिति कारणीभूतप्रतीतिमनुमायेत्यर्थः । समवायातीन्द्रियत्वं तु त्याज्यमेवेति भावः । **अनवस्थैवेति** । एवं सति मूलक्षयस्य वक्तुं शक्यत्वादिति भावः । **सम्बन्धनिमित्तव्यवहारहेतव इति** । अत्र व्यवहारोऽभिज्ञारूपः । तथा च विशिष्टप्रत्ययहेतव इत्यर्थः । एतच्च सम्बन्धस्य प्रतीत्यैव विशिष्टप्रत्ययकारणत्वसमर्थनं यत्रात्यन्तभिन्नयोरेव विशेषणविशेष्यभावप्रतीतिस्तत्रैव, न तु सर्वत्र । गुणगुण्यादीनां सम्बन्धाभावेन तदज्ञानेऽपि सविशेषाभेदमात्रेण विशिष्टप्रत्ययस्य सिद्धान्ते सत्त्वात् । अत एव नास्मन्मतेऽनवस्था । विशेषणविशेष्यसम्बन्धस्य तदभिन्नत्वेन तद्विशिष्टप्रतीतौ सम्बन्धप्रतीत्यनपेक्षणादिति ज्ञातव्यम् । **वक्ष्यमाणत्वादिति** । संयोगश्च विभागश्च भेदश्चैव पृथक् पृथगि'त्यत्रेति शेषः । **अनाश्रितत्वाभ्युपगमेति** । संयोगवत्स्वातिरिक्तसम्बन्धेनाश्रितत्वाभावादिति भावः । ननु साध्यस्य व्यापकत्वात् तद्बाधे व्याप्यस्य साधनस्यापि बाध आवश्यक इत्यत आह **साध्यबाधनेनेति** । प्रकृते चाधुनाऽपि न व्याप्तिनिश्चय इति भावः । शङ्कते **तन्तुपट्योरिति** । **स्थाणुश्येनयोरिति** । स्थाणुश्येनयोः संयोगः सम्बन्धतया गृहीतस्तन्तुपटादावारोप्यत इत्यर्थः । ननु तन्तुपटादौ प्रतीयमानः सम्बन्धः समवायतयैव प्रतीयते । न च स्थाणुश्येनसम्बन्धस्तथा प्रतीतोऽतः कथमयमारोप इत्यत आह **अन्यथेति** । आरोप्यमाणः सम्बन्धो येन रूपेण प्रतीयते तेनैव तस्यान्यत्र प्रसिद्ध्यपेक्षायामित्यर्थः । **आरोपो न स्यादिति** । इह तन्तुपटयोस्समवाय इति इहप्रत्ययनियामकत्वेन उक्तः सम्बन्धारोपोऽपि न स्यादित्यर्थः । कुत इत्यत आह **समवायान्तरस्येति** । **तावन्मात्रेणेति** । समवायो भेदवानित्यारोपमात्रेणेत्यर्थः । समवाये भेदारोपेण ह्यन्यः समवायोऽस्तीत्येव ज्ञातं, न तु तस्मिन्समवायानुयोगिकतन्तुपटप्रतियोगिकसम्बन्धत्वमपि । अतस्तावन्मात्रेण कथमयमिहप्रत्यय इत्यर्थः ।

वं०प०— विषयसप्तमीमिति । तसेः सार्वविभक्तिकत्वात् सप्तम्यर्थे तसिः । सा च विषयत्वार्थिका । तथा चेहेतिप्रत्ययो यद्विषय इत्युक्त्या समवायस्य प्रतीतिविषयत्वं लभ्यत इत्यर्थः । **तत्प्रतीतीति** । अप्रतीतस्य कारणत्वेऽतिप्रसङ्गो वक्ष्यमाणो ज्ञेयः । **यद्वेति** । विमतः समवायसम्बन्धः प्रतीतः सन्नेवेहप्रत्ययकारणं, सम्बन्धत्वात्, इह कुण्डे बदराणीति विशिष्टप्रत्ययनियामकसंयोगवदित्यनुमानं द्रष्टव्यम् । अत्र साध्यवैकल्यमाशङ्कते **कुण्डेति** । **तद्विपर्ययात** संयोगभ्रमेण । ननु विमतः संयोगः, न प्रतीतः सन्निहप्रत्ययादिव्यवहारकारणं, सम्बन्धत्वात् स्वस्वामिभावादिसम्बन्धवदित्यनुमानेन संयोगस्याप्रतीतस्येहप्रत्ययकारणत्वसिद्धेः पुनरुक्तानुमाने साध्यवैकल्यमित्याशङ्क्याह दृष्टान्ते साध्यवैकल्यमित्याह **स्वस्वामीति** । तथा च प्रत्युत सम्बन्धत्वेन हेतुना स्वस्वामिभावसम्बन्धदृष्टान्तेन संयोगस्यापि प्रतीतस्यैवेहप्रत्ययादिव्यवहारकारणत्वमनुमेयमित्याशयः । अत्र साधनवैकल्यमाशङ्कते **न त इति** । तर्हि स्वस्वामिभावादिदृष्टान्तेन सम्बन्धत्वेन हेतुना संयोगस्य प्रतीत्या इहप्रत्ययहेतुत्वाभावसाधकानुमाने स्वरूपासिद्धिरित्याह **संयोगस्यापीति** । तथा च न तत्र सम्बन्धत्वहेतुरस्तीति भावः । किञ्च स्वस्वामिभावादीनामद्विष्ठत्वेन सम्बन्धत्वाभावमङ्गीकृत्योक्तानुमाने

साधनवैकल्यं यद्युच्येत तर्हि समवायस्यापि सम्बन्धत्वं न स्यात् । 'तावाश्रित' इत्युक्तसम्बन्धलक्षणाभावात् । तथा चेह तन्तुषु पट इत्यादिविशिष्टप्रत्ययः सम्बन्धपूर्वक इति त्वदीयानुमानं बाधितविषयं स्यादित्याह **किञ्चैवमिति** । **एवं तर्हीति** । एतावता प्रबन्धेन प्रतीतस्यैवेहप्रत्ययकारणतामुपपाद्यानवस्था यदि दीयत इत्यर्थः । **नानैकान्त्यमिति** । इह तन्तुपटयोः समवाय इतीहप्रत्यये । **साध्येति** । सम्बन्धपूर्वकत्वरूप-साध्येत्यर्थः । **साधनेति** । इहप्रत्ययत्वरूपसाधनेत्यर्थः । तथा चाबाधितेहप्रत्ययत्वप्राप्याऽनैकान्त्यानु-कूलैवेयमनवस्थेत्यर्थः । **साध्यबाधनेनैव साधनेति** । तन्निरूपितव्याप्युपेतेहप्रत्ययत्वरूपसाधनेत्यर्थः । तथा चाबाधितेहप्रत्ययत्वाभावान्नानैकान्त्यमिति भावः । अनवस्थेत्यतःपूर्वमारोपितसम्बन्धपरम्परयाऽपीति शेषः । तदुपपादयति **आरोपितेति** । **प्रतीतौ चेति** । तथा चारोपस्यापि प्रतीतित्वेन तत्परम्पराया अपि प्रतीति-परम्परात्वादिति भावः । **एवं वदतेति** । विशिष्टप्रत्ययस्य सम्बन्धारोपपूर्वकत्वमेव, सम्बन्धस्य न स्वरूपेण सत्त्वमित्येवं वदतेत्यर्थः । **इहप्रत्ययः** इह तन्तुपटयोः समवाय इतीहप्रत्ययः । **तन्तुपटादौ** इह तन्तुषु पट इत्यादौ । **क्वचित्सिद्धस्य** अन्यत्र विद्यमानस्य । **तदसिद्धिः** आरोपासिद्धिः । प्रधानाभावादिति भावः । तथा च यदीह तन्तुषु पट इत्यत्र स्वरूपेण समवायः सिद्धः स्यात् तदैव तत्र सिद्धस्य समवायस्येह तन्तुपटयोः समवाय इत्यत्राप्यारोपः स्यादन्यथा नेति समवायसिद्धिर्नेति भावः । **तन्तुपटादावपि तदारोपमात्रेणेति** । इह तन्तुषु पट इत्यत्रापि सम्बन्धिसम्बन्धभावारोपमात्रेणेत्यर्थः ।

कं०रा०— यत इतीति । इहेति यतः कार्यकारणयोः समवाय इत्यत्र यत इत्यस्य सार्वविभ-क्तिकतसिप्रत्ययान्तत्वेन तसिप्रत्ययस्य च सप्तम्यादेशरूपत्वाद्विषयसप्तमीत्वमिति भावः । **स्फुटैवानवस्थेति** । इह तन्तुषु पट इत्यादेरिहप्रत्ययस्येहप्रत्ययत्वेन सम्बन्धपूर्वकत्वसाधने सम्बन्धप्रतीतेरपि इह तन्तुपटयोः समवाय इत्याद्याकारत्वेनेहप्रत्ययरूपतया सम्बन्धप्रतीत्यन्तरपूर्वकता वाच्या । एवं तस्य तस्यापीत्यनवस्था स्फुटैवे-त्यर्थः । **तद्विरोध इति** । समवायप्रत्यक्षत्वस्य सिद्धान्तितत्वेन तदप्रत्यक्षत्वाभ्युपगमे सिद्धान्तविरोध इति भावः । **संयोगस्यापीति** । घटनिरूपितसंयोगः पटे पटनिरूपितसंयोगश्च घट इति संयोगद्वयमेव न त्वेक एव संयोग उभयवृत्तिरिति संयोगस्याप्यद्विष्टतायाः 'संयोगश्च विभागश्च भेदश्चैव पृथक् पृथगि'त्यत्र वक्ष्यमाण-त्वादित्यर्थः । **तस्येति** । समवायस्याश्रितत्वप्रयोजकसम्बन्धाभावेनानाश्रितत्वस्य परेणाभ्युपगततया तस्या-प्यद्विष्टत्वाभावादिति भावः । **तत्रेति** । इह तन्तुपटयोः समवाय इति प्रत्यय इत्यर्थः । **अनवस्थाया इति** । उक्तानवस्थायाः सम्बन्धपूर्वकत्वरूपसाध्यबाधकत्वेनेहप्रत्ययत्वरूपसाधनाबाधकत्वादित्यर्थः । नन्वनवस्थया साध्ये बाधिते साधनस्यापि बाधो भवत्येव, व्यापकबाधे व्याप्यबाधावश्यम्भावादित्यत आह **साध्यबाधे-नैवेति** । साध्यबाधेनैव साधनबाधाभ्युपगमस्य सम्बन्धपूर्वकत्वेहप्रत्ययत्वयोर्व्याप्तिनिश्चयोत्तरकालीनत्वाव्याप्ति-निश्चयस्य च समवायगोचरेहप्रत्ययेनैकान्त्येनायुक्तताया उच्यमानत्वादिति भावः । समवायगोचरेहप्रत्यये-नैकान्त्यपरिहारं शङ्कते **तन्तुपटयोरिति** । **कथं तन्निस्तार इति** । तथा चानवस्थायाः सम्बन्धप्रतीतिपूर्वकत्वस्य समवायगोचरेहप्रत्ययेऽनुपपन्नत्वादनेकान्त्यतादवस्थ्यमेवेति भावः । **एवं वदतेति** । समवायगोचरेहप्रत्ययस्य

सम्बन्धारोपपूर्वकत्वं वदतेत्यर्थः । **तदसिद्धिरिति** । आरोपासिद्धिरित्यर्थः । **स्थाणुश्येनयोरिति** । स्थाणुश्येनादौ सन्तः सम्बन्धस्य तन्तुपटादावारोपसम्भवात् समवायासिद्धिरेवेत्यर्थः । **अन्यथेति** । स्थाणुश्येनादौ समवायस्याप्रसिद्धत्वेन तन्तुपटादौ तदारोपसम्भव इत्यर्थः । **तावन्मात्रेणेति** । समवायभेदारोपमात्रेण इह तन्तुषु पटसमवाय इति प्रत्ययस्यायोगादित्यर्थः ।

श्रीनिधि०— नन्वनवस्थितेरिति सूत्रं कथमिति । सूत्रं सूत्रखण्डः तत्रोक्तानवस्थेति यावत् । **केचित्** नैय्यायिकैकदेशिकः । **विषयसप्तमीं व्याचक्षाणा इति** । तथा च कार्यकारणयोरिहेतिप्रत्ययः यतः सार्वविभक्तिकः तसिः यद्विषयकः । सम्बन्ध्यतिरिक्तं यं विषयं उल्लिखन्नेव भवतीति यावत् । स सम्बन्धः समवायः यद्विषयक इत्यनेन प्रत्यक्षत्वं उक्तं द्रष्टव्यम् । **तत्स्थेऽग्ने** प्रत्यक्षत्वस्थेऽग्ने । ननु सम्बन्धपूर्वकमित्यनुमितौ कथं प्रतीतिसिद्धिः । तथा च कथं प्रत्यक्षत्वस्थिरतेत्यत आह **तेषामिहप्रत्ययस्य सम्बन्धपूर्वकत्वं नामेति** । सूत्रेण प्रत्यक्षत्वे प्रतिज्ञाते तत्समर्थनं कृतमनुमानेन व्याख्यातृभिः । यद्यपि सम्बन्धोल्लेखीत्यनुमितावपि प्रत्यक्षत्वसिद्धिः तथापि कुतश्चित् व्यवधानादिना सम्बन्धाप्रतीतौ इहेतिप्रत्ययादर्शनादेवं उक्तम् **तन्मते स्फुटैवानवस्थेति** । सम्बन्धः प्रतीयमानोऽनयोः सम्बन्ध इति प्रतीयते । एवञ्च सम्बन्धिभ्यां सम्बन्धतया ज्ञातस्य तस्य तत्सम्बन्धबुद्धिविषयत्वम् । उदासीनतया ज्ञातस्य वा अन्तरसम्बन्धतया ज्ञातस्य वा । नान्यः, गोत्वस्यापि अण्वाश्वत्वसम्बन्धबुद्धिविषयतापत्तेः । तस्मादाद्य एव कल्पः अङ्गीकार्यः तथा च सोऽप्येवं सोऽप्येवमित्यनवस्थेत्यर्थः । **ये तु प्रत्यक्षतां नाभ्युपगच्छन्तीति** । तन्मते तन्तुषु पटसमवायः । तन्तुपटयोः समवायादिप्रत्ययबलात् अपर्यवसितव्यक्तिपरम्परासाम्येऽपि तज्ज्ञानानङ्गीकारेण ज्ञप्तिप्रतिबन्धाभावान्नानवस्थादोषः । मूलक्षयाभावात् । उत्पत्तिर्ज्ञप्तिर्मूलम्, अतस्तन्मते कथमयं दोष इत्यत आह **तेषां चावस्थितिः सिद्धान्त इति** । नन्वभ्युपगमविरुद्धाङ्गीकारेऽपसिद्धान्तः । सम्बन्धस्यानुमेयत्वं सत्तामात्रेणेहप्रत्ययकारणत्वं च तदभ्युपगम एव । तथा च कथमपसिद्धान्त इति चेदुच्यते 'समवायस्तु सम्बन्धो नित्यः स्यादेक एव स' इति तस्याभिन्नत्वमभ्युपगतम् । एवञ्चेहप्रत्ययबलेन समवायं साधयता समवायान्तरमभ्युपगन्तव्यं अन्यथा व्यभिचारापत्तेः । तथा चापसिद्धान्त इति । तद्विपर्ययात्यन्ताव्यवधानात् । **स्वस्वामिभावादयोऽपीति** । अनेन अन्वयव्यतिरेकयोरव्यभिचारप्रदर्शनपरेणैव ग्रन्थेन इह देवदत्तधनमितीहप्रत्यये व्यभिचारोऽपि परिहृतो भवति । प्रकारान्तरेण व्यभिचारं शङ्कते **न ते सम्बन्धा इति** । तथा च सम्बन्धप्रतीतिपूर्वकत्वं नास्तीति भावः । प्रतिबन्द्या परिहरति **नेति** । तथा चेह कुण्डे बदराणीतिप्रत्यये दृष्टान्ते साध्यविकलतेति भावः । **वक्ष्यमाणत्वादिति** । 'संयोगत्वविभागत्वभेदश्चैव पृथक्पृथक्' इत्यत्रेति भावः । **किञ्चैवमिति** । सम्बन्धो हि सम्बन्धिभ्यां भिन्नस्तौ आश्रितश्चैकश्चेति सम्बन्धलक्षणं अनाश्रितत्वाभ्युपगमे च सम्बन्धत्वं न स्यात् इत्यर्थः । अनाश्रितत्वं कथमभ्युपगतमिति चेत् । आधेयताप्रयोजकसम्बन्धानभ्युपगमादिति ब्रूमः । संयोगसमवायौ तत्प्रयोजकौ सम्बन्धौ । तत्राद्यौव्यत्वेनाद्यः अनवस्थाभयाच्च द्वितीयोऽपि नाङ्गीकृत इति । एवं चानुमानस्य बाध इति द्रष्टव्यम् । **इहप्रत्ययस्य तत्रावृत्तेरिति** । आधेये समवाये सति खलु इह तन्तुपटयोः समवाय इति प्रत्ययः

स्यात् स च बाधित एवाऽनवस्थया । न ह्यविद्यमानस्याधेयता भवतीत्यर्थः । **साधनाबाधकत्वादिति** । तथा च सति साधनेनैकान्त्यमिति भावः । **व्याप्तिनिश्चयोत्तरकालीनत्वादिति** । 'साध्यबाधेन साधनबाध' इति वदतः इहप्रत्ययस्य सम्बन्धप्रतीतिपूर्वकत्वनियमात् सम्बन्धस्य बाधे कारणाभावात् कार्याभाव इत्याशयः । न चायं युज्यते । व्यभिचारचोदनया व्याप्तिनिश्चयप्रतिबन्धात् व्यभिचाराभावस्य व्याप्तिनिश्चयोत्तरकालीनत्वात् । तथा च व्यभिचाराभावे व्याप्तिर्युक्तैवेति भावः । बाधाद् व्यभिचाराभावः व्यभिचाराभावे सिद्धे सत्येव व्याप्तिनिश्चय इत्यन्योन्याश्रयत्वं स्यादिति द्रष्टव्यम् । 'क्वचित् सिद्धस्य क्वचित् आरोप' इति वदता वक्तव्यम् । किं स्वयं यद्धर्मविशिष्टतयाऽरोप्यते तद्धर्मविशिष्टस्यान्यत्र सिद्धिरभिप्रेता । किं वारोप्यजातीयस्यान्यत्र सिद्धिः । आद्यं आह **स्थाणुश्येनयोरिति** । आरोप्यतावच्छेदकसम्बन्धत्वस्य तत्रापि सत्त्वादिति भावः । द्वितीयमाह **अन्यथेति** । तत्कुत इत्यत आरोप्यसजातीयस्याऽप्रसिद्धेरित्याह **समवायान्तरस्येति** । तत्रारोप्यतावच्छेदकं समवायत्वमेव न सम्बन्धान्तरत्वमिति चेत् तर्हि लाघवात्सम्बन्धत्वमेव तदवच्छेदकं न समवायत्वमित्युक्त एव दोषः । **न समवायान्तरमिति** । तथा च नोक्तदोषः, भेदश्चान्यत्र क्वचित् सिद्ध इति भावः ।

शे०वा०— ननु भिन्नत्वसाम्यस्य हेतुविशेषणाबाधितत्वोपपादनद्वाराऽबाधितेहप्रत्ययत्वरूपहेतोर्विपक्षे वृत्तिप्रतिपादकत्वेनानैकान्तिकत्वोपपादकत्वात् सार्थक्येऽपि पूर्वभागेनैव व्यभिचारोपपादनसिद्ध्या 'अनवस्थितेरि'-त्यंशस्य तदुपपादकत्वाभावाद्वैयर्थ्यमेवेत्याशयेन शङ्कते **नन्विति** । **सूत्रं** सूत्रखण्डः । **कथं** प्रकृतान्वयीति शेषः । **इत्थमिति** । तथा चानवस्थापरिहाराय तत्र समवायपूर्वकत्वाभावस्यैव वाच्यतया विपक्षे साध्याभावोपपादकत्वेनानवस्थितेरित्यस्यापि व्यभिचारोपपादकत्वान्न वैयर्थ्यमिति भावः ।

ननु चोत्पत्तिज्ञास्यप्रतिबन्धकत्वान्नेयमनवस्था दूषणमित्यतो ज्ञप्तिप्रतिबन्धकतया तस्या दूषणतामुपदर्शयितुमाह **इहेति** । ननु समवायस्यातीन्द्रियत्वेनानुमानात्प्रागनवगतेर्नेहेतिप्रत्ययस्य सम्बन्धप्रतीतिपूर्वकत्वं साधयितुं शक्यमित्यत उक्तं **समवायप्रत्यक्षमाचक्षाणा इति** । नन्विहेतिप्रत्ययस्य समवायप्रतीतिपूर्वकतासाधने वैशेषिकसूत्रविरोधः । तत्र 'इहेति यतः' इति स्वरूपसत्समवायसाध्यत्वस्योक्तत्वादित्यत उक्तं **यत इति च विषयसप्तमीमिति** । तथा च समवायस्य प्रत्यक्षविषयत्वप्रतिपादकत्वेन सूत्रस्य तज्जनकत्वप्रतिपादकत्वाभावान्न तद्विरोध इति भावः । नन्वेवं प्रत्यक्षेणैव समवायसिद्धावुक्तानुमानवैयर्थ्यमित्यत उक्तं **तत्स्थेम्न इति** । प्रत्यक्षेण तत्सिद्धावपि तत्साधकप्रत्यक्षप्रामाण्यस्थैर्याय अनुमानसंवादोऽप्यपेक्षित इति न तद्वैयर्थ्यमिति भावः । **स्फुटैवेति** । इहप्रत्ययकारणीभूतसम्बन्धप्रत्ययस्यापीहप्रत्ययत्वेन सम्बन्धप्रतीतिपूर्वकत्वावश्यम्भावात् तज्जनकीभूतसम्बन्धप्रतीतेरनुपपत्तौ प्रकृतेहप्रत्यस्याप्यनुपपत्तिप्रसक्त्या ज्ञप्तिप्रतिबन्धकत्वादिति भावः ।

ये त्विति । नन्वत्र भाष्योक्तदिशा वस्त्वनवस्थाया एव वक्तुं शक्यत्वात् किमर्थमनवस्थाशब्दस्यापसिद्धान्तवाचित्वाश्रयणमिति चेत् । उच्यते । अवयवावयविनोर्विशेषणविशेष्यभावप्रतीत्युपपादकत्वेन स्वीकृतस्य समवायस्य स्वेन रूपेण सतः प्रतीत्युपपादकत्वाभावात्प्रतीतस्यैव तस्य तथात्वं वाच्यम् ।

तत्प्रतीतिरपि विशेषणविशेष्यभावेनेति तदुपपत्तये समवायान्तरमङ्गीकार्यमित्येवमेव तत्र तत्रापीति सम्बन्ध-प्रतीतिपूर्वकत्वपक्ष एवानवस्थाया भाष्येऽभिप्रेतत्वेन वस्त्वनवस्थायास्तत्राप्यसम्मतत्वात् । अपि च नात्र वस्त्वनवस्था वक्तुं युक्ता । इह तन्तुपटयोः समवाय इतीहप्रत्यये सम्बन्धपूर्वकत्वसत्त्वेऽपि तत्प्रतीत्यनपेक्ष-त्वात् । ननु तत्कारणीभूतसम्बन्धस्यापीहप्रत्ययविषयत्वेन सम्बन्धप्रतीतिपूर्वकत्वमवर्जनीयमित्यनवस्थैवेति चेत् । सत्यमियं वस्तुगतिः । न तु समवाये इहप्रत्ययस्य सम्बन्धप्रतीतिसापेक्षत्वं, तदभावे च कथमनवस्था अनवस्थितासिद्धकारणपरम्परायामेवानवस्थाया अङ्गीकारात् । तथा च वस्त्वनवस्थाऽनुपपत्त्या भाष्येऽपि प्रतीत्यपेक्षयैव तस्या अभिप्रेतत्वात् स्वरूपसत्तयैव समवायस्येहप्रत्ययकारणत्वेऽनवस्थाया असम्भवेनाप-सिद्धान्तवाचित्वस्यावश्याश्रयणीयत्वात् । एवं चात्र सम्बन्धप्रतीतिपूर्वकत्ववादिमते यथास्थितानवस्थापर एव सूत्रस्थोऽनवस्थितिशब्दः । सत्तयैव सम्बन्धस्योपयोग इति मते तु प्रसिद्धानवस्थापरत्वासम्भवेऽपि तत्त्वं भावेनेति सूत्रात् समवायस्यैकत्वेन समवाये समवायान्तरस्य सिद्धान्तविरुद्धत्वादनवस्थितिशब्दोऽपसिद्धान्तपर इति द्वेधाऽनवस्थितिशब्दः सौत्रो व्याख्यातो द्रष्टव्यः ।

अस्मिन्पक्षेऽनवस्थितिशब्दस्य प्रसिद्धार्थपरित्यागो भवतीत्यरुचिं मनसि निधाय पक्षान्तरमाह **यद्वेति** । **प्रतीतिमापाद्येति** । तन्तुपटादिसम्बन्धः प्रतीत्यैव इहप्रत्ययजनकः सम्बन्धत्वात् कुण्डबदरसम्बन्धवदिति कारणीभूतप्रतीतिमनुमायेत्यर्थः । समवायस्यातीन्द्रियत्वं त्वयुक्तमेवेति भावः । **अनवस्थैवेति** । अत्र पक्षे मूलक्षयस्य वक्तुं शक्यत्वादिति भावः । नन्वेवं 'धर्मस्य धर्मसन्तानादनवस्थाकरो भवेदि'ति वक्ष्यमाण-धर्मानवस्थाऽपि दूषणं न स्यादविशेषादिति चेत् । अत्र वदन्ति । विषमोऽयमुपन्यासः । सन्गौरिति प्रतीतेर्गवि सत्त्वस्यैव सद्गोत्वमिति प्रतीत्या गोत्वेऽपि सत्त्वस्याङ्गीकार्यत्वात् । तथा सत्त्वं सदित्यपि प्रतीत्या सत्त्वेऽपि तत्सिद्धेरनवस्थासम्भवेऽपीहप्रत्ययस्य समवायजन्यत्वपक्षे जनकीभूतसमवाये इहप्रत्ययाभावेन तन्निर्वाहकतया समवायान्तरस्यानङ्गीकर्तव्यतया तत्रानवस्थाया असम्भवादिति । संयोगो, ज्ञातः सन् सम्बन्धनिमित्तव्यवहार-हेतुः, सम्बन्धत्वात् स्वस्वामिभावसम्बन्धवदित्यनुमानं मनसि निधाय दृष्टान्ते साध्यवैकल्यं परिहरति **स्वस्वामिभावादय इति** । अत्र नान्यथेत्यतःपरं अतः संयोगोऽपि ज्ञात एव सम्बन्धनिमित्तव्यवहारहेतुरिति वाक्यशेषः । सम्बन्धनिमित्तव्यवहारहेतुः इत्यत्र व्यवहारशब्दोऽभिज्ञापरः । ततश्च विशिष्टप्रत्ययहेतव इत्यर्थः । अत्र सम्बन्धस्य प्रतीत्यैव विशिष्टप्रत्ययकारणत्वसमर्थनं यत्रात्यन्तभिन्नयोरेव विशेषणविशेष्यभावप्रतीतिस्तत्रैव, न तु सर्वत्र । गुणगुण्यादीनां सम्बन्धाभावेन तदज्ञानेऽपि सविशेषाभेदमात्रेण विशिष्टप्रत्ययस्य सिद्धान्ते स्वीकारात् । अत एव नास्मन्मतेऽनवस्था । विशेषणविशेष्यसम्बन्धस्य तदभिन्नत्वेन तद्विशिष्टप्रतीतौ सम्बन्धप्रतीत्यनपेक्षणादिति ज्ञातव्यम् । माऽस्तु साध्यवैकल्यम् । साधनवैकल्यं तु स्यादेवेत्यभिप्रेत्य तेषा-मसम्बन्धत्वमेव कुतः इत्यतः सम्बन्धित्वविरोधिनोऽद्विष्ठत्वात्तत्सिद्धिरित्याह **न त इति** । नानेनासम्बन्धत्व-सिद्धिः स्वस्वामिभावादीनां स्यात् । तथा सति तत एव संयोगस्याप्यद्विष्ठत्वेनास्यासम्बन्धत्वप्रसक्त्या-ऽसिद्ध्यादिप्रसङ्गादित्यभिप्रेत्य घटपटयोः संयोगो घटपटौ संयुक्ताविति द्विष्ठतया प्रतीयमानस्य कथं न द्विष्ठत्व-

मित्याशङ्कामपाकरोति **संयोगस्यापीति** । **वक्ष्यमाणत्वादिति** । 'संयोगश्च विभागश्च भेदश्चैव पृथक् पृथगि'-त्यादिनेति शेषः । यत्तु ''संयोगपक्षकोक्तानुमाने उपाधिमाशङ्कते **न त इति** । अनेनासम्बद्धत्वमुपाधिरित्युक्तं भवति । नन्वसम्बद्धत्वस्यैवासम्भवात् साध्याव्यापकत्वमित्यत आह **अद्विष्ठत्वादिति** । तथा चाद्विष्ठत्वेन स्वस्वामिभावादीनामसम्बद्धत्वस्य सिद्धत्वान्न तत्र साध्याव्यापकत्वमिति भावः । **संयोगस्यापीति** । तथा च पक्षादव्यावृत्तत्वान्नोपाधित्वमि''त्युपाधिशङ्कानिरासपरतयैतद्ग्रन्थख्याख्यानम् । तन्न । तथा सति स्वोक्तानुमाने-ऽप्यसिद्धिप्रसङ्गात् । **अनाश्रितत्वाभ्युपगमादिति** । न च 'आश्रितत्वं चान्यत्र नित्यद्रव्येभ्य' इति वचना-दुत्तरग्रन्थविरोधः । तत्र समवायस्याश्रितत्वाभिधानादिति वाच्यम् । यथा न विरोधस्तथा तद्ग्रन्थव्याख्यानावसर एव वक्ष्यमाणत्वात् ।

ननु साध्यस्य साधनव्यापकत्वेन साध्यबाधे साधनबाधस्याप्यवर्जनीयत्वात् कथमनवस्थायाः साधनाबाधकत्वमित्यतः सत्यमेवैतत् यत्साध्यबाधे साधनबाध इति । किन्तु यत्र साध्यसाधनयो-र्व्याप्तिनिश्चयस्तत्रैव साध्यबाधे साधनबाधो न तु सर्वत्र । ततश्च प्रकृते तदनिश्चयान्न साध्यबाधेऽपि साधन-बाध इत्याह **साध्यबाधेनेति** । ननु तन्तुपटयोः समवाय इति प्रतीतिरपि सम्बन्धपूर्विकैवेत्यङ्गीक्रियते न सम्बन्धप्रतीतिपूर्विका ततश्च नानवस्था । तस्य सम्बन्धस्यारोपितत्वाङ्गीकारेण वस्तुतः समवाये समवाया-न्तरानङ्गीकारेण तदनवकाशादित्याशयेन शङ्कते **तन्तुपटयोरिति** । ननु सम्बन्धप्रतीतिपूर्वकत्वानङ्गीकारात् कथमनवस्थेत्यत आह **आरोपितेति** । **एवं वदता** आरोपितसम्बन्धपूर्वकत्वं वदता । **त्यक्तं स्यादिति** । आरोपितसम्बन्धपूर्वकत्वस्य सम्बन्धारोपपूर्वकत्व एव पर्यवसन्नत्वादिति भावः ।

अबाधितेहप्रत्ययस्य वास्तवसम्बन्धकार्यत्वान्नारोपितसम्बन्धेन तन्तुपटयोः समवाय इति प्रतीतिनिर्वाह इति व्यभिचार एवेत्यभिप्रेत्यारोपितसम्बन्धेन तन्निर्वहि बाधकमाह **अपि चेति** । तन्तुपटादावबाधि-(नारोपि)तेहप्रत्ययस्यारोपितसम्बन्धमात्रेण निर्वहिऽपि न समवायासिद्धिः । क्वचित्सत एव क्वचिदारोप्यत्वेन समवायस्य क्वाप्यसत्त्वे आरोपानुपपत्त्या तदन्यथाऽनुपपत्त्यैव क्वचिद्वास्तवत्वस्यावश्यकत्वादिति शङ्कते **क्वचिदिति** । यद्यपि जिज्ञासाधिकरणे आरोपितस्यान्यत्र सत्त्वे मानाभावादित्यादिना आरोपितस्य क्वचिदपि सत्त्वं नापेक्षितमिति पराभिमतान्यत्रसत्त्वग्राहकप्रमाणनिरासेन व्युत्पादितमित्युक्तनियमासिद्धेरित्येव वक्तुमुचितम् । तथाऽपि स्पष्टत्वात्तदनुक्त्वा परप्रक्रियामङ्गीकृत्यैव समवायारोपमुपपादयति **स्थाणुश्येनयोरिति** । ननु स्थाणु-श्येनयोर्यः संयोगः सम्बन्धोऽस्ति, न तस्य तन्तुपटादावारोप इष्यते । यस्य च समवायस्य स इष्यते नासौ स्थाणुश्येनयोरस्तीति कथमन्यत्र सिद्धस्य सम्बन्धस्य तन्तुपटादावारोपः स्यादित्यतस्तर्हि समवाये समवा-यान्तरारोपस्याप्यनुपपत्तिः समवायान्तरस्य क्वाप्यसत्त्वात् । यदि च समवायान्तरस्य समवायान्तरत्वेन क्वचिदप्यसत्त्वेऽपि समवायत्वेन रूपेण सत्त्वात् तदारोप इति मन्यसे तर्हि समवायस्यापि समवायत्वरूपेण स्थाणुश्येनादावसत्त्वेऽपि सम्बन्धत्वेन रूपेण सत्त्वाद्युक्तस्तन्तुपटादावारोप इत्याह **अन्यथेत्यादिना** । नन्वन्यत्र सत एवारोपः । न चैवं समवायान्तरस्य समवाये आरोपो न स्यादिति वाच्यम् । अन्यत्र सतो भेदस्यैव

तत्रारोपाभ्युपगमेन समवायान्तरारोपस्यानभ्युपगमात् तदभावापादनस्येष्टापादनत्वादिति शङ्कते **समवाय इति** । **तावन्मात्रेणेति** । समवायो भेदवानिति समवाये भेदारोपमात्रेणेत्यर्थः । समवाये भेदारोपेण ह्यन्यः समवायोऽस्तीत्येव ज्ञातं न तु तस्मिन्समवायानुयोगिकतन्तुपटप्रतियोगिकसम्बन्धत्वमिति कथं तावन्मात्रेणायमिह तन्तुपटयोः समवाय इतीहप्रत्ययः स्यादिति भावः । **तदारोपेति** । सम्बन्धिसम्बन्धभावारोपेत्यर्थः । **इहप्रत्ययेति** । इह तन्तुषु पट इतीहप्रत्ययेत्यर्थः ।

वा०र०— भिन्नत्वसाम्यस्येति । भिन्नत्वसाम्यार्थके सौत्रसाम्यादित्यस्येत्यर्थः । तेन सार्थक्येऽपीत्यन्वयोपपत्तिः । यद्वा साम्यादित्येतदर्थभूतस्य भिन्नत्वसाम्यस्येत्यर्थः । उपपादकत्वादित्यनन्तरं च साम्यादित्यस्येति शेषः पूरणीयः । **इह केचिदिति** । मूले केचित् इत्यस्य नैयायिका इत्यर्थः । **अतीन्द्रियत्वेनेति** । वैशेषिकैः तस्य तत्त्वाङ्गीकारात् इति भावः । **आचक्षाण इति** मूलम् । तैः प्रत्यक्ष एव समवायः जातिव्यक्तिभ्यां सहैव उपलक्ष्यत इति स्वीकारादिति भावः । **तत्र इहेति यत इति** । स्वरूपसदिति इहेदमिति यतः कार्यकारणयोः समवाय इति वैशेषिकसूत्रव्याख्यानावसरे सूत्रोपस्कारेऽयुतसिद्धानां आधार्याधारभूतानां यः सम्बन्धो इहेति प्रत्ययहेतुः समवाय इति पदार्थप्रकाशाख्यप्रकरणस्थं वाक्यं सूत्रार्थकथनरूपं प्रमाणीकृतम् । अयुतसिद्धानां इत्यादिरूपेण प्रशस्तदेवेनापि न लक्षणमुक्तम् । तदुपपादनं च किरणावल्यादौ उक्तोभयग्रन्थयोश्च ज्ञेयम् । तत्र समवायस्य इहप्रत्ययकारणत्वोक्त्या स्वरूपसत एव कारणता लब्धा न तत्प्रत्ययस्येति भावः । **तथा च समवायस्येति** । नैयायिकैः यतः यस्मिन्विषये इहेति बुद्धिर्भवति सः कार्यकारणयोः समवाय इति व्याख्यानेन इहेति बुद्धिविषयत्वस्यैव सूत्रार्थत्वलाभात् इति भावः । यथा चैतत् तथा वात्स्यायनभाष्यादौ अवधेयम् । **ये त्विति** मूलम् । वैशेषिका इत्यर्थः । तैः समवायस्यातीन्द्रियत्वाभ्युपगमादिति भावः । नैयायिकोक्तप्रत्यक्षत्वनिरासकानुमानं तु समवायः अतीन्द्रियः आत्मान्यत्वे सति असमवेतभावत्वात् मनः कालादिवत् । इत्येवं रूपं उपस्कारकृता उक्तं बोध्यम् । **अवयवावयविनोः विशेषणविशेष्यभावेति** । आधार्याधारभूतानां इह आधारे इदं आधार इति प्रत्ययहेतुरित्युक्ते विशेषणविशेष्यभावप्रतीत्युपपादकत्वं लब्धमिति भावः । **प्रतीत्युपपादकत्वेति** । अपि चेति वक्ष्यमाणरीत्या इति भावः । एवं प्रतीतिपूर्वकत्वे एवानवस्थाप्रसङ्गं उपपाद्य सम्बन्धपूर्वकत्वे तदभावमुपपादयति **अपि च नात्रेति** । तन्तुपटयोः इत्यतः प्राक् यथा सतीति शेषः । तत्प्रतीत्यनपेक्षत्वादित्यस्य च प्रसङ्गादित्यर्थः । ततश्च अयमर्थः । यदि इहेदं इति प्रत्ययः सम्बन्धपूर्वकः सोऽपि सम्बन्धपूर्वकः इति परम्परयाऽनवस्था उच्येत तर्हि न सानवस्था वक्तुं शक्या विशेषणविशेष्यभावप्रतीत्युपपादकत्वेन स्वीकृतसमवायरूपसम्बन्धस्य इहेदमिति प्रत्ययकारणत्वमात्रप्राप्तावपि समवाये हेतुत्वेन समवायान्तरापेक्षणानापत्त्या प्रतीतिपूर्वकत्वस्य चानङ्गीकारेण अनवस्थापादकप्रतीतिसापेक्षत्वाभावप्रसङ्गादिति । सम्बन्धस्याहेतुत्वाभ्युपगमेऽपि वस्तुतः तस्यापि इहप्रत्ययविषयत्वेन तत्प्रतीतिरस्य वेति तत्पूर्वकत्वप्राप्तेः स्यादेवानवस्था इत्याशङ्कते **ननु तदिति** । इहेतिप्रत्ययस्य समवायपूर्वकत्वं वदता इहेतिप्रत्ययात्प्राक् समवायप्रतीतिसद्भावमात्रस्वीकारेऽपि तस्याः कारणत्वाङ्गीकारेण

तत्परम्परयाऽनवस्था न स्यादेवेति समाधत्ते **सत्यमियमिति** । तथा च समवायस्यापि समवायान्तरं इत्युक्तानवस्थाभावात् । सत्तयैव हेत्तुत्ववादिमते अनवस्थाशब्दो मुख्यार्थो न सम्भवतीति । अर्थान्तरपर एव स्वीकार्यः इत्याह **सत्तयैव सम्बन्धस्येति** । **तत्त्वंभावेनेति सूत्रादिति** । तत्त्वं एकत्वं भावेन सत्तया व्याख्यातमिति शेषः । यथा एकैव सत्ता सर्वत्र स बुद्धिपूर्वका एवं एकः स एव समवायः सर्वत्र समवेतं बुद्धिपूर्वक इत्यादिना अस्य सूत्रस्यापस्कारे व्याख्यातत्वादिति भावः । एतत्सूत्र.....ध्यायस्थम् । अन्यत्रगस्य तु अर्थान्तरपरत्वमिति बोध्यम् । **समवायातीन्द्रियत्वं त्विति** । यथा चैतत् तथा निबन्धादौ । सम्बन्धित्वविरोधिन इति पञ्चमी ।

स०व्र०— नन्वत्र भिन्नत्वसाम्यस्याबाधितेहप्रत्ययत्वरूपहेतोः विपक्षे सत्त्वप्रतिपादकत्वेन अनैकान्त्योपपादकत्वेन सार्थकत्वेऽपि अनवस्थितेरित्यस्य तदुपपादकत्वस्याप्रतीतेः तस्य वैयर्थ्यमिति शङ्कते **नन्विति** । तथा चानवस्थापरिहाराय समवायपूर्वकत्वाभावस्य वाच्यत्वात् साध्याभावोपपादकत्वेन अनैकान्त्योपपादकत्वमिति परिहर्तुरभिप्रायः । **स्फुटैवेति** । सम्बन्धप्रतीतेरपि इहप्रत्ययत्वावश्यम्भावात् पुनरत्र सम्बन्धप्रतीतिपूर्वकत्वोक्तौ अनवस्थैवेत्यर्थः । ननु सूत्रस्य द्वेधा व्याख्यानान्नापसिद्धान्त इत्यत आह **यद्वेति** । **वक्ष्यमाणत्वादिति** । 'संयोगश्च विभागश्च भेदश्चैव पृथक् पृथक्' इत्यादिनेति शेषः । **तस्यानाश्रितत्वाभ्युपगमादिति** । ननु न 'चाश्रितत्वं चान्यत्र नित्यद्रव्येभ्य' इति वचनेन तस्यान्याश्रितत्वात् कथमनाश्रितत्वादित्युच्यते इति चेन्न । संयोगादेः स्वातिरिक्तसम्बन्धेन आधारसन्निकृष्टत्ववत् समवायस्य स्वातिरिक्तसम्बन्धेनाधारसन्निकृष्टत्वाभावात् अनाश्रितत्वोपपत्तिरिति भावः । न चोत्तरग्रन्थविरोधः । तस्य परिहरिष्यमाणत्वादिति ध्येयम् । ननु साध्यबाधे साधनबाधस्याप्यावश्यकत्वात् अनवस्थायाः साधनबाधकत्वमावश्यकमित्यत आह **साध्येति** । साध्यसाधनयोर्व्यासौ निश्चितायां साध्यबाधे साधनबाधस्यावश्यकत्वेऽपि प्रकृते साध्यसाधनबाधस्यानुपपन्नत्वादिति भावः । **क्वचिदिति** । य एव हि समवायः अवयवादिषु अवयव्यादीनां सम्बन्धः, स एव अवयव्यादिषु आत्मनः सम्बन्ध इति परेणोक्तेरिति भावः ।

स०ना०— **किं त्वारोपित इति** । न ब्रूमो वयमत्र समवायान्तरमस्तीति येनोत्तरत्रापि तथैव समवायपरम्पराङ्गीकारप्रसङ्गेनानवस्था स्यात् । किं नाम कालान्तरवर्त्यपि यागादिः कालान्तरवाचिनः स्वर्गादिः अदृष्टद्वारेणेव पदार्थान्तर्गतोऽपि समवायः स्वारोपद्वारा इह समवाय इति प्रतीतेर्हेतुरिति । न चैवं सत्यप्यनवस्थाप्रसङ्गो भवतीति भावः ।

विट्ठल०— नन्वेवं समवायसाधकानुमानेनैकान्तिकमिति यदि सूत्रकाराभिमतं तर्ह्यनवस्थितेरिति सूत्रखण्डस्य वैय्यर्थ्यम् । व्यभिचारोपपादनस्य समवायाभ्युपगमाच्चेत्यादिपूर्वांशेनैव जातत्वादिति शङ्कते **नन्विति** । तदानवस्थितिः तथा च विपक्षे समवाये साध्याभावोपपादनद्वारा व्यभिचारोपपादनार्थमेव सूत्रखण्डप्रकृतिरित्याशयः । ज्ञप्तिप्रतिबन्धकत्वादियमनवस्था भवत्येव दूषणमिति वक्तुमाह **इह केचित्यादिना** ।

यत इति चेति । वैशेषिकसूत्रगतं यत इति पदं यत्र विषये प्रत्यक्षप्रत्ययः स सम्बन्धः कार्यकारणयोः समवाय इति व्याचक्षाणा इत्यर्थः । समवायस्य प्रत्यक्षत्वे उक्तानुमानवैय्यर्थ्यमित्यत उक्तं **तत्स्थेम्न इति** । प्रत्यक्षाप्रामाण्ये स्थैर्यायेति यावत् । **स्फुटैवेति** । इह तन्तुपटयोः समवाय इति बुद्धावव्यभिचाराय तत्रापि सम्बन्धप्रतीतिपूर्वकत्वे इहसम्बन्ध इति प्रतीतेरवर्जनीयत्वेन तत्राप्येवमिति सम्बन्धप्रतीतिपरम्पराया अपर्यवसाने पूर्वपूर्वसम्बन्धप्रतीतिरनुपपत्त्योत्तरोत्तरसम्बन्धप्रतीतेरप्यनुपपत्तेः प्रकृतेहप्रत्ययस्यानुपपत्तिरिति ज्ञप्तिप्रतिबन्धकत्वसम्भवादिति भावः । **अपसिद्धान्तवाचीति** । एतन्मते समवायस्यातीन्द्रियत्वेनेह तन्तुपटयोः समवाय इति प्रत्ययाभावात् समवायान्तराभ्युपगतेन ज्ञप्तिप्रतिबन्धकानवस्थाभावेऽपीह तन्तुपटयोः समवाय इति व्यभिचारं प्रति सत्तामात्रेणापि समवायान्तरस्य कारणतया यस्याभ्युपगन्तृत्वेन समवायपरम्परावर्जनीयैव परन्तूत्पत्तिज्ञत्यन्यतरप्रतिबन्धकत्वस्यात्र स्फुटमप्रतीतेर्मूलक्षयाभावेनानवस्थाया वक्तुमशक्यत्वादपसिद्धान्त एवोक्तः । तत्त्वंभावेनेति सूत्रे समुदायस्यैकत्वस्य तेनोक्तत्वादिति ज्ञेयम् । अपसिद्धान्तवाचित्वमित्यतः प्रकारान्तरमाह **यद्वेति** । प्रतीतिमापाद्येति तन्तुपटयोः सम्बन्धः प्रतीत्यैवेहप्रत्ययजनकसम्बन्धत्वाच्च इह कुण्डे बदराणीतिवदिति कारणभूतप्रतीतिमनुमायेत्यर्थः । समवायातीन्द्रियत्वं तु त्याज्य एवेति भावः । शङ्कते **कुण्डे बदरेति** । प्रत्यक्षयोग्यतयेत्यर्थः । **सम्बन्धनिमित्तव्यवहारेति** । अस्येदं स्वं अस्यायं स्वीयमित्यादि स्वस्वामिभावपितापुत्रादिभावादिरूपो यः सम्बन्धः तन्निमित्तो यो व्यवहारोऽभिज्ञापलपनं च तद्धेतवो दृष्टा इत्यर्थः । नन्वेवमस्मन्मते सर्वत्रापि विशिष्टव्यवहारस्य विशेषणविशेष्ययोः सम्बन्धप्रतीतिपूर्वकत्वेनानयोः सम्बन्ध इति प्रत्ययस्यापि तादृशत्वादनवस्थेति चेन्न । अस्मन्मते सम्बन्धस्य सम्बन्ध्यभिन्नत्वेन तत्र विशेषभेदमात्रेण विशिष्टप्रत्ययोपपत्तिः शुक्लपटश्चलति पट इत्यादि व्यवहारोऽपीयमेव गतिरिति ध्येयम् । **वक्ष्यमाणत्वादिति** । 'संयोगश्च विभागश्च भेदश्चैव पृथक् पृथक्' इत्यत्रेति शेषः । **अनाश्रितत्वाभ्युपगमादिति** । संयोगवत् स्वाश्रितत्वादित्यर्थः । इह तन्तुषु पट इत्यादि प्रत्ययः सम्बन्धपूर्वकोपाधिते कप्रत्ययत्वादित्यस्य इह तन्तुपटयोः समवाय इति प्रत्ययेनैकान्त्यमिति । एतदयुक्तमिति शङ्कते **नन्वेवमिति** । **बाधितत्वेनेति** । समवायस्येति शेषः । ननु व्यापकीभूतसाध्यबाधे तद्व्याप्यसाधनस्य सुतरां बाध आवश्यक इत्यत आह **साध्येति** । **प्रतीतौ चेति** । तथा च ज्ञप्तिप्रतिबन्धकेयमनवस्थितिरिति भावः । सत्तयैव कारणत्वमित्युक्तं **त्यक्तमिति** । आरोपस्य प्रतीतिरूपत्वादिति भावः । क्वचित्सिद्धस्येति देशान्तरे सत एवान्यत्रारोप इति तैरभ्युपगमादिति भावः । **स्थाणुश्येनयोरिति** । स्थाणुश्येनयोः संयोगसम्बन्धतया गृहीतस्तन्तुपटादावारोप्यत इत्यर्थः । ननु स्थाणुश्येनसम्बन्धः संयोगतया गृहीतः स कथं तन्तुपटादौ प्रतीयमानसमवायतयारोप्यतेत्यत आह **अन्यथेति** । आरोप्यमाणसम्बन्धो येन रूपेण प्रतीयते तेनैव रूपेणान्यत्रप्रतीतिरावश्यकीत्यङ्गीकारे तन्तुपटयोः समवाय इति प्रतीतेः सम्बन्धपूर्वकत्वनिर्वाहाय । यस्तन्तुपटसमवायेऽसमवायान्तरारोपोऽभिलषितः स न स्यात् । आरोपमाणसमवायान्तरत्वप्रकारान्तरस्य कुत्राप्यसत्त्वादित्यर्थः । न समवायसमवायान्तरारोपः किन्तु समवायभेद एव भेदश्चान्यत्र प्रसिद्धः । अतो नोक्तदोष इत्याशयेन शङ्कते **समवाये भेद एवेति** । **तावन्मात्रेणेति** । इह तन्तुपटयोः समवाय इतीहप्रत्ययस्तावदाधारयोराधेयस्य समवायस्य च सम्बन्धज्ञानेन

भवतीति विवादम् । इह कुण्डे बदराणीत्यत्र तथादृष्टत्वात् तथा च समवाये भेदारोपमात्रेण कथमिहप्रत्ययो युज्यतेत्यर्थः । न समवाये भेदमात्रमारोप्यते किन्तु भिन्नयोस्तयोः सम्बन्धसम्बन्धिभावरूपसम्बन्धोऽप्यारोप्यते तथा चेहप्रत्ययोपपत्तिरिति शङ्कते **सम्बन्धीति** । **तर्हीति** । आरोपितभेदभिन्ने समवाये सम्बन्धत्वारोपमात्रेणेहप्रत्ययोपपत्तिरित्यङ्गीकारे इह तन्तुपट इत्यादावपि यत्किञ्चित्सम्बन्धारोपमात्रेणेहप्रत्ययोपपत्तेः समवायकल्पनमेवायुक्तं स्यात् । न च वाच्यं सम्बन्धारोपायापि समवायः कल्प्य इति । कुण्डबदरादौ सम्बन्धस्य प्रतीतत्वेनात्र सम्बन्धारोपोपपत्तेरिति भावः ।

चषक— उत्पत्त्यप्रतिबन्धकत्वेऽपि ज्ञप्तिप्रतिबन्धकतया अनवस्थायाः दूषणत्वं घटयति **इह हि केचिदिति** । तत्स्थेम्ने प्रत्यक्षप्रामाण्यावधृतौ । **वक्ष्यमाणत्वात्** । 'संयोगश्च विभागश्च भेदश्चैव पृथक् पृथगि'त्यादिनाऽभिधास्यमानत्वात् । **अनाश्रितत्वाभ्युपगमात्** । संयोगस्येव स्वातिरिक्तसंसर्गावच्छिन्नकिञ्चिन्निरूपिताधेयताविशेषितत्वाभावात् । **साध्यबाधेनैव** व्यापकबाधेनैव । **साधनबाधनाभ्युपगमस्य** व्याप्यबाधानङ्गीकारस्य । शङ्कते **सम्बन्धेति** ।

१२६ सु०— ननु समवायेऽपि 'इहेदम्' इति प्रत्ययः समवायाधीन एव । न चापसिद्धान्तोऽनवस्था वा, तस्यैव समवायस्य स्वनिर्वाहकत्वात् । य एव हि समवायोऽवयवादिष्ववयव्यादीनां सम्बन्धः, स एवावयवावयव्यादिष्वात्मना सम्बन्ध इत्याशङ्कते स इति ।

अनु०— स स्वनिर्वाहकश्चेत्स्यात्

सः अवयवावयव्यादिसमवायः ।

एवं तर्हि किं समवायेन; द्रव्यस्यैव स्वनिर्वाहकत्वोपपत्तेरिति परिहरति द्रव्यमेवेति ।

द्रव्यमेव तथा न किम् ।

तर्हीति शेषः । तथा स्वनिर्वाहकम् । किं कस्मात् ।

अयमाशयः । यदि 'इहेदमि'ति बुद्धिर्नावश्यं स्वातिरिक्तसम्बन्धसापेक्षा, क्वचित् स्वनिर्वाहकत्वात्; तर्हि द्रव्यगुणादीनाम् 'इहेदमि'ति प्रत्ययोऽपि नातिरिक्तसम्बन्धा-

धीनोऽङ्गीकार्यः, द्रव्यस्यैव स्वनिर्वाहकतयाऽपि तदुपपत्तेरिति । समवायः सम्बन्धात्मकत्वात् स्वनिर्वाहकः, न द्रव्यमिति चेन्न; तदसिद्धौ सम्बन्धत्वस्याप्यसिद्धेः, संयोगस्यापि स्वनिर्वाहकतापत्तेश्च । तस्यानित्यत्वान्नेति चेन्न, समवायनित्यत्वस्यासिद्धेरिति ।

परि०— 'किमि'त्यनुवादः 'कस्मादि'ति व्याख्या । **तदसिद्धाविति** । समवायासिद्धाविति वा स्वनिर्वाहकत्वासिद्धाविति वार्थः ।

गु०दी०— **तदसिद्धौ तत्सम्बन्धत्वस्याप्यसिद्धेः** इत्युपलक्षणम् । सम्बन्धापेक्षया सम्बन्धिनः प्राधान्येव द्रव्यस्यैव स्वनिर्वाहकत्वसम्भवाच्चेत्यपि द्रष्टव्यम् । अस्माकं तु भेदहीनेऽपरस्मिन् भेदकार्यकरणाय कल्प्यमानो विशेषो भेदहीने भेदकार्यकारित्वस्वभावबलात् परप्रकाशकदीपस्य सुतरां स्वप्रकाशकत्ववदसति भेदे सति च स्वस्मिन् भेदकार्ये तदपि निर्वहेदेव । न तु दीपो दीपान्तरमिव विशेषान्तरमपेक्षते । न हि परेषामन्नदायी स्वान्नार्थमपरं याचमानः क्वापि दृष्ट इति न कश्चित्क्षुद्रोपद्रवः । परस्य तु सम्बन्धहीने सम्बन्धव्यवहाराय न समवायकल्पनम् । येन सम्बन्धान्तरहीने स्वस्मिन् सम्बन्धव्यवहारे सम्बन्धान्तरापेक्षां धिक्कुर्यात् । किन्तु सम्प्रतिपन्नसंयोगाख्यसम्बन्धान्तरहीने गुणगुण्यादौ सम्बन्धव्यवहाराय सम्बन्धान्तरतयैव कल्प्यते । स च सम्बन्धहीने गुणगुण्यादौ सम्बन्धान्तररूपं स्वात्मानमिव सम्बन्धान्तरहीने स्वस्मिन्नप्यपूर्वं सम्बन्धान्तरमेव घटयेत् । न तु सम्बन्धान्तरमुपेक्ष्य केवलं तद्व्यवहारसङ्कटनायालम् । एकत्र क्लृप्तस्वभावस्यैवान्यत्रापि कल्पनीयत्वात् । अतो नास्मत्प्रतिबन्दी । **समवायनित्यत्वस्यासिद्धेः** इत्युपलक्षणम् । नित्यस्यापि गगनस्य स्वनिर्वाहकत्वदर्शनेन नित्यत्वेऽपि स्वनिर्वाहकत्वासम्भवस्य साम्यादित्यपि द्रष्टव्यम् ।

यादु०— **तदसिद्धाविति** । समवायस्यैवासिद्धावित्यर्थः । **संयोगस्यापीति** । तथा च स्वनिर्वाहकत्वसाधकसम्बन्धत्वस्य व्यभिचार इति भावः ।

वं०प०— **आत्मनः** समवायस्य । कुतो नावश्यं स्वातिरिक्तसम्बन्धसापेक्षतेत्यत आह **क्वचिदिति** । इह तन्तुपटयोः समवाय इत्यत्रेत्यर्थः । **स्वनिर्वाहकः** स्वस्मिन्नाश्रयाश्रयिभावनिर्वाहक इत्यर्थः ।

कं०रा०— **तदसिद्धाविति** । समवायस्यासिद्धौ तस्य सम्बन्धत्वस्याप्यसिद्धेरित्यर्थः ।

श्रीनिधि०— **न चापसिद्धान्तोऽनवस्था वेति** । समवायान्तराभ्युपगमप्रयुक्त अपसिद्धान्तः सम्बन्धज्ञानमिहप्रत्ययकारणमिति पक्षे सम्बन्धत्वेन ज्ञातस्यैव सम्बन्धस्य तथात्वात् । अद्रव्यत्वेन संयोगासम्भवात् । समवाय एव वक्तव्ये तत्राप्येवं तत्राप्येवमित्यनवस्था च नेत्यर्थः । स्वनिर्वाहकत्वं नाम

किमित्यतस्तद्व्याख्याति **य एव हि समवाय इति** । अनेन स्वातिरिक्तसम्बन्धमन्तरेण सम्बन्धव्यवहारगोचरत्वं सम्बन्धस्य स्वनिर्वाहकत्वमित्युक्तं भवति । ननु द्रव्यस्य स्वनिर्वाहकत्वं किमर्थमङ्गीक्रियते । भेदप्रतीत्यर्थमतिरिक्तसम्बन्धस्यावश्यकत्वात् तदभावे तदभावात् तथा च तदभ्युपगमो व्यर्थ इत्यतोऽभिप्रायमाह **अयमाशय इति** । **सम्बन्धत्वस्याप्यसिद्धेरिति** । धर्मसिद्धे धर्मिसिद्धयधीनत्वादिति भावः । **संयोगस्यापीति** । तथा च तस्य समवायो न सिद्धयेदिति भावः । **नित्यत्वस्यासिद्धेरिति** । उपलक्षणमिदम् । नित्यत्वस्य स्वनिर्वाहकतायामनुपयोगश्चेत्यपि द्रष्टव्यम् ।

शे०वा०— यद्यपि न चापसिद्धान्तोऽनवस्थेत्युभयाभावः प्रतिज्ञातः, तथाऽप्यत्र सम्बन्धप्रतीतिपूर्वकत्वानङ्गीकारेणानवस्थापरिहारस्य स्पष्टत्वात् तमनुपपाद्यैवापसिद्धान्ताभावमेव विवृणोति **तस्यैवेति** । 'स स्वनिर्वाहकश्चेत्स्यादि'ति पूर्ववाक्ये चेच्छब्दश्रवणादाह **तर्हीति शेष इति** । **क्वचिदिति** । अवयवादिष्ववयव्यादीनां सम्बन्धभूतस्यैव समवायस्यावयव्यादिष्वात्मनः सम्बन्धत्वाभ्युपगमादिति भावः । **संयोगस्यापीति** । अन्यथा तत्र व्यभिचारापातादित्यर्थः । न चेष्टापत्तिरिति वाच्यम् । तथा सति संयोगस्य द्रव्येण सह समवायाभावप्रसङ्गादिति भावः । ननु नित्यसम्बन्धत्वस्यैव हेतुत्वाङ्गीकारान्नानैकान्त्यमित्याशयेन शङ्कते **तस्येति** । एवं तर्हि माऽस्त्वनैकान्त्यं, मानाभावेन तन्नित्यत्वासिद्धेर्विशेषणासिद्धिः स्यादेवेत्याशयेनाह **समवायेति** ।

स०व्र०— संयोगस्येति । तथा च संयोगस्य द्रव्येण समवायानभ्युपगमापातादिति भावः ।

विष्टल०— तस्यैवेति । अनेकसमवायकल्पने खल्वपसिद्धान्तादि दोषः । एकस्यैव समवायस्य स्वनिर्वाहकत्वाङ्गीकारादित्यर्थः । नन्विहेति प्रतीतेः सम्बन्धप्रतीतिसापेक्षत्वात्समवायमङ्गीकृत्य तस्य स्वनिर्वाहकताङ्गीक्रियते । तत्र द्रव्यस्य स्वनिर्वाहत्वोक्तेः क उपयोगः । तस्य सम्बन्धरूपत्वाभावात् । अतो नायं परिहारो युक्त इत्यत आह **अयमाशय इति** । **तदसिद्धाविति** । संयोगसमवायस्यैवासिद्धावित्यर्थः । अस्तु वा सम्बन्धात्मकत्वं तथापि न स्वनिर्वाहकत्वं संयोगे तद्दर्शनादिति भावेनाह **संयोगस्यापीति** । संयोगस्यापि सम्बन्धरूपत्वेन स्वनिर्वाहकतोपपत्तेरिह कुण्डबदरयोः संयोग इति प्रत्ययनिर्वाहान्यथानुपपत्त्या न समवायः सिद्धयतीति भावः ।

॥ इति एतत्सूत्रगत 'अनवस्थितेः' इति शब्दस्य व्याख्यानम् ॥

॥ इति द्व्यादुणादीनामत्यन्तभेदेऽपि तत्सम्बन्धस्य अपरसमवायत्वरूपत्वाभावः ॥

* * *

॥ अथ तत्र गुणादीनां द्रव्यात् अत्यन्तभेदाभावाच्च न समवायसिद्धिः ॥

१२७ **सु०—** एवं द्रव्याद्गुणादीनामत्यन्तभेदेऽपि न तत्सम्बन्धः समवायलक्षणोऽपरः सिद्ध्यति; समवायवत् द्रव्यस्यैव स्वनिर्वाहकत्वोपपत्तेः, कल्पनालाघव(त्व)ाच्चेत्युक्तम् । इदानीं गुणादीनां द्रव्यादत्यन्तभेदाभावाच्च न समवायसिद्धिरित्याशयवांस्तदत्यन्तभेदे परोपन्यस्तान् हेतूनपाकर्तुं तावदुपोद्घातमाह **विशेष इति** ।

अनु०— विशेषस्तद्गतत्वादिर्यद्यभिन्नेऽवसीयते ।
गुणक्रियादिरूपस्य निषेधः केन हेतुना ॥

अभिन्ने समवाय इति शेषः । **अवसीयते** अङ्गीक्रियत इति यावत् । **गुणक्रियादिरूपस्य** विशेषस्येति शेषः । **केन हेतुना** न केनापि ।

इदमुक्तं भवति । समवाये तावदवयवावयव्यादिगतत्वमङ्गीकृतम्, 'आश्रितत्वं चान्यत्र नित्यद्रव्येभ्य' इति वचनात् । न चानित्यद्रव्यगुणकर्मसामान्यविशेषाणामिव समवायस्य तद्गतत्वं नाम समवायलक्षणवृत्तिः सम्भवति, तस्याभिन्नत्वात् । अतस्तद्गतत्वं (नाम) समवायस्वरूपमेवेत्यङ्गीकर्तव्यम् । परतन्त्रतयोपलब्धिस्तद्गतत्वमिति चेन्न, तस्याः समवायधर्मत्वानुपपत्तेः । तद्विषयत्वात् तद्धर्मत्वमिति चेन्न, विषयत्वस्यापि समवायस्वरूप(त्व)ानतिरेकात् ।

परि०— इतिवचनादित्युक्ततार्किकवचनस्थान्यत्रशब्दार्थं विवृण्वन्नेवाश्रितत्वस्वरूपं व्यनक्ति **न चानित्यद्रव्येत्यादिना** । **समवायलक्षणवृत्तिरिति** । समवायलक्षणसम्बन्धेनाधेयतया वर्तमानमित्यर्थः । एतदभिप्रायेण प्राक् तस्यानाश्रितत्वाभ्युपगमादित्युक्तमिति भावः ।

गु०दी०— समवायस्य तद्गतत्वं नाम इत्यस्य समवायनिष्ठो यस्तद्गतत्वाख्यो धर्मः तस्य समवायेन सह समवायाख्या वृत्तिर्न हि सम्भवतीत्यर्थः ।

यादु०— ननु समवायस्यानाश्रितत्वाभ्युपगमादिति पूर्वमुक्तत्वात् कथमवयव्यादिगतत्वमङ्गीकृतमित्युच्यत इत्यत आह **आश्रितत्वं चेति** । समवायेनाधेयत्वमाश्रितत्वमिह विवक्षितम् । नित्यद्रव्याणि विहाय भावपदार्थानामिदं साधर्म्यमुक्तमिति तद्वचनार्थः । ननु समवाये समवायेनाधेयता नास्तीत्यसङ्गतमेतदिति चेन्न ।

समवाये हि स्वरूपतासम्बन्धेनाधेयत्वं वाच्यं, सम्बन्धभूतं स्वरूपं च समवाय एव, तस्य स्वनिर्वाहकत्वात् । एवं च समवायेऽपि समवायेनाधेयता प्राप्तैव । इयांस्तु विशेषः । अनित्यद्रव्यगुणकर्मादौ स्वातिरिक्तेन समवायेनाधेयता, समवाये तु स्वाभिन्नेनैव सा, समवायस्यानाश्रितत्वाभ्युपगमस्तु स्वातिरिक्तसम्बन्धेनाधेयत्वाभावाभिप्राय इति न कोऽपि विरोध इत्याशयात् । **समवायलक्षणेति** । स्वातिरिक्तसमवायलक्षणेत्यर्थः । **अभिन्नत्वात्** एकत्वात् । **परतन्त्रेति** । तदाश्रितत्वेनोपलब्धिरेव तद्गतत्वम् । उपलब्धिश्चात्मगुणत्वान्न समवायरूपमिति भावः । अत एवाह **तस्या इति** ।

वं०प०— समवायलक्षणवृत्तिरिति । समवायसम्बन्ध इत्यर्थः । **तस्याभिन्नत्वादिति** । समवायस्यैकत्वादित्यर्थः । **तस्या इति** । आत्मधर्मभूताया उपलब्धेरित्यर्थः ।

कं०रा०— आश्रितत्वं चेति । नित्यद्रव्येभ्योऽन्यत्राश्रितत्वमिति परकीयवचनान्नित्यद्रव्यान्यस्य समवायस्यावयव्यादिगतत्वं परेणाङ्गीकृतमिति ज्ञायत इति भावः । **तस्या इति** । परं तत्र तथोपलब्धेरात्मनिष्ठत्वेन समवायधर्मत्वानुपपत्तेरित्यर्थः । पारतन्त्र्योपलब्धिविषयत्वात्समवायस्योपलब्धेः समवायधर्मत्वमिति शङ्कते **तद्विषयत्वादिति** ।

श्रीनिधि०— हेतूनपाकर्तुमिति । व्यभिचारेणापाकर्तुमित्यर्थः । **उपोद्घातमिति** । व्यभिचारोद्भावनार्थं व्यभिचारभूमिं प्रदर्शयतीत्यर्थः । **अन्यत्र नित्यद्रव्येभ्य इति** । नित्यद्रव्यातिरिक्त इत्यर्थः । **वृत्तिः** सम्बन्धः । **तस्याभिन्नत्वादिति** । एकत्वादित्यर्थः । **परतन्त्रतयोपलब्धिः** पराधीनतयोपलब्धिः । घटः पट इतिवन्न स्वातन्त्र्येण प्रतीयते । किन्तु निरूपके ज्ञायमान एव ज्ञायते इति भावः ।

शे०वा०— ननु 'विशेषस्तद्गतत्वादिरि'त्युत्तरवाक्यमनर्थकम् । न च समवायनिष्ठतद्गतत्वादिधर्माणां तद्विशेषत्वप्रतिबन्धा द्रव्यनिष्ठगुणक्रियादीनां द्रव्यविशेषत्वप्रतिपादनार्थत्वान्न तदिति वाच्यम् । तत्प्रतिपादनस्य प्रकृतेऽसङ्गतत्वात् । न च गुणादीनां द्रव्यादत्यन्तभेदसाधकव्यपदेशभेदादिहेतूनामन्यथासिद्ध्यादिनाऽपाकरणाय अस्योपोद्घातरूपत्वान्न प्रकृतासङ्गतिरिति वाच्यम् । तदपाकरणस्यापि प्रयोजनाप्रतिभासात् । न च गुणादीनां द्रव्यादत्यन्तभेदाभावसिद्धिरेव तत्प्रयोजनमिति वाच्यम् । तत्सिद्धेरपि प्रयोजनाप्रतिभासात् । न च समवायाभावसिद्धिरेव तत्प्रयोजनमिति वाच्यम् । तद्भेदेऽपि समवायाभावसिद्धेर्वर्णितत्वेन समवायाभावसिद्ध्यर्थं तद्भेदाभावस्यावर्णनीयत्वादित्याशङ्क्य भेदमङ्गीकृत्य समवायनिराकरणसिद्धावपि प्रकारान्तरेणापि तन्निराकरणार्थत्वाद्भेदनिराकरणस्य नानुपपत्तिरिति भावेन वृत्तवर्तिष्यमाणार्थप्रदर्शनपूर्वकं भेदसाधकहेत्वपाकरणपरतयोत्तरग्रन्थं सङ्गमयितुं तदुपोद्घातरूपतया तावद्गुणादेर्द्रव्यविशेषत्वप्रतिपादकमव्यवहितग्रन्थं सङ्गमयति **एवमित्यादिना** । तद्गतत्वादेः समवायाभिन्नस्यापि तद्विशेषत्वमित्यस्यार्थस्य मूलारूढतासिद्ध्यर्थमपेक्षितं पूरयति **समवाय इति** ।

ननु समवायस्यावयव्यादिगतत्वस्यैव परं प्रत्यसम्मतेः कथञ्चित्सम्मतावप्यनित्यद्रव्यगुणकर्मादिवदतत्स्वरूपस्यैव तद्गतत्वस्य वक्तुं शक्यत्वेन तस्य समवायस्वरूपत्वस्यैवासिद्धेः स्वरूपत्वेऽपि वा तत्स्वरूपमात्रत्वस्यैवाभ्युपगमे बाधकाभावेन समवायविशेषत्वस्याप्यसिद्धत्वात् कथं तत्प्रतिबन्धा गुणक्रियादेर्द्रव्यस्वरूपस्यैव तद्विशेषत्वसिद्धिरित्यत आह **इदमुक्तं भवतीति** । कथं पराङ्गीकारस्य परं प्रति सिद्धिरित्यतस्तद्वाक्यादेवेति भावेन विवक्षितार्थोपपादकं प्रशस्तदेवाचार्यवाक्यमुदाहरति **आश्रितत्वं चान्यत्रेति** । नित्यद्रव्याणि विहाय भावपदार्थानामिदं साधर्म्यमित्यर्थः । ननु संयोगवृत्त्या नित्यद्रव्याण्यप्याश्रितान्येवेति तद्व्यावृत्तिरयुक्तेति चेन्न । समवायेनाधेयताया एवेहाश्रितत्वरूपतया विवक्षितत्वेन संयोगेनाधेयानामपि तेषां समवायेनाधेयताविरहेण तद्व्यावृत्तेरुपपन्नत्वात् । न चैवं समवायस्यापि समवायेनाधेयताविरहेण नित्यद्रव्यतुल्यतयाऽनाश्रितत्वप्रसङ्गेन समवायस्य तद्गतत्वसाधकत्वाभावादस्य वाक्यस्य सम्मतितयोपन्यासः कथमिति वाच्यम् । समवायो हि स्वरूपसम्बन्धेन वर्तत इति तावदविवादम् । स्वरूपसम्बन्धस्तु धर्म्यात्मक एवेति न तस्य समवायेनाधेयताविरहः । ततश्च समवायेनाधेयतासाधकत्वादुदाहृतग्रन्थस्य युक्त एवात्र तदुपन्यासः । इयांस्तु विशेषः । नित्यद्रव्याणि विहाय भावमात्रसाधारण्येऽपि समवायेनाधेयताऽनित्यद्रव्यगुणकर्मादौ स्वातिरिक्तेन समवायेनास्ति समवायस्य तु स्वेनैव समवायेनेति । अत एव च न तस्यानाश्रितत्वादिति पूर्वग्रन्थविरोधोऽपि । स्वभावत आधारसन्निकृष्टस्यापि समवायस्य गुणकर्मादीनामिव स्वातिरिक्तसन्निकर्षाभावाभिप्रायेण पूर्वग्रन्थस्य, स्वभावत आधारसन्निकृष्टत्वाद्वृत्तिमत्त्वमित्यभिप्रायेण चैतद्ग्रन्थस्य प्रवृत्तेरित्यवधेयम् । **समवायलक्षणेति** । स्वातिरिक्तसमवायलक्षणेत्यर्थः । **तस्येति** । वृत्तिप्रयोजकसम्बन्धस्य समवायस्वरूपत्वेन तदतिरिक्तत्वाभावादित्यर्थः । **परतन्त्रेति** । तदाश्रितत्वेनोपलब्धिरेव तद्गतत्वम् । सा चात्मगुणत्वान्न समवायस्वरूपमिति भावः । **तस्या इति** । आत्मवृत्तित्वेन तद्धर्मत्वेऽप्युपलब्धेः समवायावृत्तित्वेन तद्धर्मत्वायोगादित्यर्थः । उपलब्धेः समवायेनात्ममात्रवृत्तित्वेऽपि विषयतासम्बन्धेन समवायवृत्तित्वात् तद्धर्मत्वोपपत्तिरिति भावेन शङ्कते **तद्विषयत्वादिति** ।

वा०२०— तद्विशेषत्वप्रतिबन्धेति । समवायः तच्छब्दार्थः । **न तदिति** । नानर्थकमित्यर्थः । **भेदमङ्गीकृत्य समवायेति** । भेदपक्षमङ्गीकृत्यापि समवायेति योज्यम् । **तन्निराकरणेति** । समवायनिराकरणेत्यर्थः आश्रितत्वाच्चान्यत्रेतिसूत्रीयोपस्काराद्यनुसारेण शङ्का समाधत्ते **ननु संयोगवृत्त्येत्यादि** । **अनाश्रितत्वादिति पूर्वग्रन्थेति** । अनाश्रितत्वाभ्युपगमादित्यस्य फलतोऽनुवादः । अनवस्थितेः इत्येतत्सूत्रखण्डोपपादनावसरे स्वस्वामिभावादिः सम्बन्धो न भवति इत्याशङ्कापरिहाराय समवायस्यापि सम्बन्धत्वं तर्हि नास्ति । तस्यानाश्रितत्वाभ्युपगमात् इति प्रागुक्तेरिति ज्ञेयम् । समवायलक्षणेत्यस्वस्थाख्यसमवायलक्षणेति प्रतीतिवारणाय आह **स्वातिरिक्तेति** । ननु तद्गतत्वस्य स्वरूपत्वोपपादनाय समवायात् भेदखण्डनीये तन्निर्वचनखण्डनं कृत इति चेत् न । अनित्यद्रव्यगुणादीनां तद्गतत्वं नाम समवायाख्यवृत्तिरेव द्रव्याद्यतिरिक्तास्ति । एवं समवायेऽपीति चेत् तद्वृत्तिः स्यात् । तर्हि कुतः तद्गतत्वस्य समवायात् भेदस्य खण्डनं भवेत्

अतस्तद्गतत्वस्य समवायस्वरूपत्वोपपादनाय भेदखण्डनार्थमेव प्रकारान्तरेण निर्वचनखण्डनं क्रियत इति न दोषः । न ह्यत्र धर्मिणां धर्मिभेदाभावरूपसामान्ययुक्तिः अभिधेयतयाऽस्ति । अपि तु परसम्मत्यैव समवायगतत्तद्गतत्वादीनां समवायाभिन्नत्वमिति प्रतिपादनमिह विवक्षितम् । प्रतिबन्दीसमर्थनार्थत्वात् । तदर्थं च परसम्मतप्रकारेणैव समवायगतत्तद्गतत्वादीनां समवायान्तरत्वादिरूपत्वनिराकरणपूर्वकं समवायाभिन्नत्वप्रतिपादनम् । अत एव टीकायां स्वातिरिक्तेति शेषपूरणं कृतम् । अत एव च विषयत्वस्य स्वरूपानतिरेकादिति वक्ष्यत इति ज्ञेयम् । **अतिरिक्तत्वाभावादित्यर्थ इति** । एतदर्थं च समवायस्य एकत्वाभ्युपगमात् इत्यप्यर्थोऽभिहितत्वादित्यस्य व्याख्येयः ।

स०व्र०— आश्रितत्वं चान्यत्र नित्यद्रव्येभ्य इति । नित्यद्रव्याणि विहाय इदं साधर्म्यमुक्तमित्यर्थः । ननु समवायेऽप्येतन्नास्ति । अन्यथा तस्यानाश्रितत्वाभ्युपगमादित्यादिपूर्वग्रन्थविरोधापातादिति चेन्न । समवायस्य समवायान्तराभावेऽपि स्वभावत आधारसन्निकृष्टत्वेन स्वातिरिक्तसम्बन्धेनाधारसन्निकर्षाभावाभिप्रायेण तस्यानाश्रितत्वाभ्युपगमादिति पूर्वग्रन्थस्य च प्रवृत्तत्वेन अत्र च स्वभावत आधारसन्निकर्षसद्भावाभिप्रायेण वृत्तिमत्त्वाभिधानेनाविरोधादिति भावः ।

विठ्ठल०— ननु समवाये तद्गतत्वादि धर्माः नाङ्गीक्रियन्त एव । अस्तु वा तदङ्गीकारः, तथापि तदभिन्नत्वं कृतोऽङ्गीकार्यमित्याशङ्कानिरासायाह **इदमुक्तं भवतीति** । **आश्रितत्वं चेति** । नित्यद्रव्येभ्योऽन्यत्र नित्यद्रव्याणि विहायान्येषां भावपदार्थानां क्वचिदाश्रितत्वं वर्तत इति तद्वचनार्थः । ननु समवायस्य सम्बन्धितत्वं न समवायसम्बन्धेन विवक्षितम् । न च समवाये समवायोऽस्ति । अतः नाश्रितत्वमेव तस्येति चेन्न । अथ अनित्यद्रव्यगुणकर्मादावाश्रितता समवायेन तथा समवायस्याप्याश्रितता समवायेनैव परन्तु गुणादौ स्वभिन्नेन समवायेन समवाये तु स्वनिर्वाहतया स्वेनैवेति । अतः समवायसम्बन्धेनैवाश्रितत्वं समवायस्येति परस्याशय इति । अस्त्वेवं तद्गतत्वाख्यः समवाये धर्मः तस्य धर्मस्य समवायाभिन्नत्वं कुल इत्यत आह **न चेति** । समवाये समवायलक्षणावृत्तिः कुतो न सम्भवतीत्यत आह **तस्याभिन्नत्वादिति** । समवायस्येकत्वेन तत्र भेदाभावादित्यर्थः । अस्त्वेवं ततः किमित्यत आह **अत इति** । समवाये भेदाभावात् समवायस्य सम्बन्धिगतत्वं स्वनिर्वाहकत्वं वदता समवायस्वरूपमेवेत्यङ्गीकार्यमिति सिद्ध्यतीति भावः । न तद्गतत्वं समवायस्वरूपं तन्तुपटयोः समवाय इति तत्त्वादिप्रतीत्यपेक्षया प्रतीत्यतिरेकेण तद्गतत्वस्याभावादिति शङ्कते **परतन्त्रतयेति** । **तस्या इति** । उपलब्धेर्ज्ञातृपुरुषे धर्मत्वादिति भावः । **विषयत्वस्यापीति** । तथा च तद्गतत्वेन किमपराद्ध इति भावः ।

॥ इति गुणादीनां द्रव्यात् अत्यन्तभेदाभावाच्च न समवायसिद्धिः ॥

* * *

॥ अथ तत्र तद्धर्माणामपि अत्यन्तभेदाभावाच्च न समवायसिद्धिः ॥

१२८ **सु०— एवमस्तित्वाभिधेयत्वज्ञेयत्वसम्बन्धत्वादयोऽपि समवायेऽभ्युपगताः, न समवायस्वरूपाद्विद्यन्ते । भेदे हि तेषां समवायेन सम्बन्धो वक्तव्यः, अन्यथा कथमेते तत्र स्युः । न च सम्बन्धो युक्तः; संयोगस्य गुणत्वेन द्रव्यमात्रवृत्तेः, समवायस्य चाभिन्नत्वात् ॥ तत्र पृच्छामः । समवायस्य तद्गतत्वादिधर्माणां चाभेदे कथम् अपर्यायशब्दवाच्यत्वं, धर्मधर्मिभावः, षष्ठीप्रयोगो, ज्ञातत्वाज्ञातत्वम्, एकत्वानेकत्वमित्यादि युज्यत इति । न ह्य(चा)त्रोपचारादिकल्पना युक्ता, मुख्यप्रयोगादेरदर्शनात् । न तद्गतत्वादि समवायतन्मात्रं येनानुपपत्तिः स्यात्, किन्तु समवायाभिन्नमपि तद्विशेषात्मकम्, अतो व्यपदेशभेदादि युज्यते । विशेषस्य भेदप्रतिनिधित्वादित्येवागतिकतया तत्र समाधिरभिधानीयः । तथा च यद्यभिन्नेऽपि समवाये तद्गतत्वादिविशेषोऽङ्गीक्रियते तदा गुणक्रियादिकमपि द्रव्यस्वरूपमेव सद्विशेषात्मकं भवतु न तु तन्मात्रम्; समवायधर्मस्तद्विशेषाः, गुणादयस्तु न द्रव्यविशेषा इत्यत्र विशेषहेत्वभावात् इति ।**

परि०— तत्र पृच्छाम इत्यत्र तच्छब्दार्थं व्यनक्ति **समवायस्य तद्गतत्वादिधर्माणां चाभेद इति** । पृच्छाम इत्येतद्वचनक्ति **कथमित्यादिना** । मार्गाश्चलन्ति, मञ्चाः क्रोशन्तीत्यादाविव समवायस्य तद्गतत्वमिति षष्ठीप्रयोगादिरुपचारेणास्त्वित्यत आह **न ह्यत्रेति** । आदिपदेन भ्रान्तिमूलत्वग्रहः । **मुख्यप्रयोगादेरिति** । आदिपदेन बाधग्रहः । मार्गे पुरुषाश्चलन्तीति, मञ्चगताः पुरुषाः क्रोशन्तीति कदाचिन्मुख्यप्रयोगस्य, मार्गे चलनं नास्ति मञ्चेषु क्रोशनं नास्तीति च बाधस्य च भावात् तत्रोपचारकल्पनेऽपीह समवाय एव तद्गतत्वमित्यभेदप्रत्ययरूपादिमुख्यप्रयोगबाधयोरदर्शानान्नोपचारकल्पनेत्यर्थः । कथं तर्हि तत्र निर्वाह इत्यत आह **नेति** । विशेषहेत्वभावादितीतिशब्दस्येदमुक्तं भवतीति पूर्वेणान्वयः ।

यादु०— अत्र अपर्यायशब्दवाच्यत्वादावित्यर्थः । **उपचारादिकल्पनेति** । आदिपदेन भ्रान्तिमूलकत्वसङ्ग्रहः । **मुख्यप्रयोगादेरिति** । अत्रादिपदेन बाधकप्रमासङ्ग्रहः । देवदत्तः सिंहो नेतिवत् समवायः तद्गतत्वात् इमान्नेत्यादिरूपो यदि मुख्यप्रयोगो बाधकप्रमा वा कदाचिद् दृश्येत तदाऽत्रोपचारादिकल्पना युक्ता स्यान्न ह्येवं कदाचिद् दृश्यते इत्यर्थः । **समवायतन्मात्रमिति** । यथा रूपं न गुणमात्रं अपि तु गुणविशेषः । एवं तद्गतत्वादिकं न समवायमात्रमपि तु तद्विशेष इति सामान्यविशेषभावमेवाभिप्रेत्येत्थमुक्तं,

न तु धर्माणामेव भेदकार्यनिर्वाहकविशेषरूपत्वमात्रमभिप्रेतम् । सामान्यविशेषरूपयोर्धर्मधर्मिणोरभेदे भेदकार्य-निर्वाहकस्य वस्तुस्वभावविशेषरूपस्य तस्य तृतीयस्यैवात्रान्यत्र च बहुशो व्यवहारादिति ज्ञातव्यम् । **विशेषस्येति** । सामान्यविशेषयोरभेदेऽपि भेदकार्यनिर्वाहकसमवायस्य स्वभावविशेषस्येत्यर्थः । एवं गुण-क्रियादिकमपि द्रव्यस्य स्वरूपमेव सद्विशेषात्मकं भवत्वित्यादावपि सामान्यविशेषभाव एवाभिप्रेतो न गुणादीनामेव भेदप्रतिनिधिविशेषरूपत्वं, अग्रे तस्य तृतीयस्यैव वक्ष्यमाणत्वादित्यवगन्तव्यम् । **आहेति** । परोपन्यस्तहेतूनां अप्रयोजकतामाहेत्यर्थः ।

वं०प०— अन्यथेति । तद्गतत्वादेः समवायस्वरूपत्वेऽङ्गीकृते सतीत्यर्थः । **समवायस्य चेति** । तथा च तद्गतत्वादिधर्मैर्बहुभिरेकस्य समवायस्य च सम्बन्धरूपः समवाय एक एव न युक्त इत्यर्थः । **तत्र पृच्छाम इति** । तद्गतत्वादेः समवायस्वरूपत्वे सिद्धे सतीत्यर्थः । **कल्पनेति** । अपर्यायशब्दवाच्यतादेः । **मुख्येति** । तथा सदा तीरादौ गङ्गादिशब्दव्यवहाराभावेऽपि कदाचिन्मुख्यभूतप्रवाहे गङ्गादिशब्दव्यवहारोऽस्ति, तद्वत्प्रकृतेऽपर्यायशब्दव्यवहारादेरौपचारिकत्वं कल्पयता कदाचित्पर्यायशब्दवाच्यता समवायतद्धर्माणां वाच्या । न चासावस्तीत्यर्थः । नेत्यारभ्य समाध्यभिधानप्रकारः । **अनुपपत्तिः** अपर्यायशब्दव्यवहारादेः । **विशेषात्मकं** सविशेषभिन्नम् । इदानीं मूलं योजयति **तथा चेति** । **तन्मात्रं** निर्विशेषाभिन्नम् । **तद्विशेषाः** समवायेन सविशेषाभिन्नाः । **न द्रव्यविशेषाः** द्रव्येण न सविशेषभिन्ना इत्यर्थः ।

श्रीनिधि०— एकत्वानेकत्वमिति । समवाय एकः अस्तित्वाभिधेयत्वादय अनेके इति द्रष्टव्यम् । **उपचारादीति** । आदिपदेन भ्रान्तिमूलत्वं व्यवहारः । **मुख्यप्रयोगादेरिति** । समवायस्यास्तित्वमित्यादि-प्रयोगस्योपचारिकत्वे समवायोऽस्तित्वमित्यादि मुख्यप्रयोगः स्यादित्यर्थः । **आदि**पदेन समवायास्थितत्व-मित्यादि प्रतीतेरदर्शनं ऊह्यते । **विशेषस्य भेदप्रतिनिधित्वादिति** । तदभेदतद्विशेषात्मकत्वं घटकविशेषमन्तरा न सम्भवति । स च भेदप्रतिनिधिरिति विशेषस्य भेदप्रतिनिधित्वादिति सिद्धवत्कृत्योक्तम् । **विशेषहेत्व-भावात्** विशेषनियामकाभावात् ।

शे०वा०— तद्गतत्वस्य समवाये वृत्तिं तत्स्वरूपानतिरिक्तत्वं चोपपाद्य 'तद्गतत्वादिरि'ति मूले आदिपदसङ्गृहीतधर्माणां तदुभयमुपपादयितुमाह **एवमित्यादिना** । **अभ्युपगता इति** । अन्यथाऽस्तित्वज्ञेय-त्वादेः अकेवलान्वयित्वप्रसक्तेः । सम्बन्धत्वाभावे च समवायस्य च तद्विशेषत्वानुपपत्तेरिति भावः । अस्तु अभिधेयत्वादीनां समवाये वृत्तिः तत्स्वरूपाद्भेदाभावस्तु कुत इत्यत आह **भेदे हीति** । **अन्यथेति** । सम्बन्धाभाव इत्यर्थः । अस्तु तर्हि तेषां धर्माणां समवायेन सम्बन्धोऽपीत्यत आह **न चेति** । **अभिन्नत्वात्** एकत्वात् । अस्तु तद्गतत्वादीनां समवायस्वरूपत्वं, तावताऽपि कुतस्तद्विशेषत्वमित्यत आह **तत्रेति** । ननु समवायस्तद्गत इत्यादिव्यवहारस्यौपचारिकतया भ्रान्तिमूलकतया वोपपत्तेर्नोक्तव्यवहारः तद्गतत्वादीनां समवाय-मात्रत्वे बाधक इत्याशङ्क्याह **न हीति** । आदिपदेन भ्रान्त्यादिमूलत्वपरिग्रहः । मुख्यप्रयोगादेरित्यत्रादिपदेन

बाधकप्रमाणसङ्ग्रहः । देवदत्तः सिंहो नेत्यपि व्यवहारदर्शनेन सदा देवदत्तादौ सिंहादिव्यवहाराभावात् सिंहो देवदत्त इत्यादिव्यवहारस्यौपचारिकत्वादेः कल्पनसम्भवेऽपि समवायस्तद्गतो नेति कदाऽप्यव्यवहारेण समवायस्तद्गत इत्येव च सर्वदा व्यवहारेणोक्तव्यवहारस्यौपचारिकत्वादिकल्पनमनुचितमिति भावः । किं तावताऽपि सिद्धमित्यत आह **नेति** । अत्र तस्मादिति शेषः । **समवायतन्मात्रमिति** । समवायेन निर्विशेषाभिन्नमित्यर्थः । **अनुपपत्तिः** व्यवहारानुपपत्तिः । **तद्विशेषात्मकमिति** । तेन सह सविशेषाभिन्नमित्यर्थः । भेदप्रतिनिधिभूतविशेषाश्रयीभूतधर्मरूपमिति यावत् । **अत इति** । तद्गतत्वादेः समवायेन सविशेषाभेदस्य सद्भावादित्यर्थः । ननु भेदकार्यस्य व्यपदेशभेदादेः कथं तदभावे विशेषमात्रेणोपपत्तिरित्यतो भेदप्रतिनिधित्वेन भेदकार्यकारित्वाद्विशेषस्य युक्तः तेन व्यपदेशभेदादिनिर्वाह इत्याह **विशेषस्येति** । **द्रव्यस्वरूपमेवेति** । द्रव्येणात्यन्ताभिन्नमित्यर्थः । एतच्च यावद्द्रव्यभाविगुणक्रियादिकमभिप्रेत्योक्तम् । अयावद्द्रव्यभाविगुणादेर्द्रव्येण भेदाभेदयोर्वक्ष्यमाणत्वेनात्यन्ताभेदाभावादित्यवधेयम् । वस्तुतो न त्वत्यन्ताभिन्नमित्यर्थः । ततश्च न कश्चित्क्षुद्रोपद्रवः । **विशेषात्मकमिति** । भेदप्रतिनिधिरूपविशेषाश्रयीभूतधर्मरूपमेवेत्यर्थः । धर्मधर्मिपदार्थातिरिक्ततृतीयपादार्थस्यैव भेदप्रतिनिधिविशेषत्वस्योत्तरत्र वक्ष्यमाणतया गुणक्रियादिधर्ममात्रस्य भेदकार्यकारित्वरूपविशेषताया बाधितत्वादित्यवधेयम् । केचित्तु । एतद्ग्रन्थानुरोधाद् गुणक्रियादिधर्ममात्रस्यैव भेदकार्यकारिविशेषत्वं, न तु ततोऽतिरिक्तो विशेषोऽस्तीत्याहुः । **समवायधर्मा इति** । तद्गतत्वादय इत्यर्थः । **तद्विशेषाः** भेदप्रतिनिधिविशेषाश्रयीभूतधर्मरूपा इत्यर्थः । **द्रव्यविशेषाः** विशेषाश्रयीभूतद्रव्यधर्मरूपाः ।

वा०र०— अनभ्युपगमे बाधकं अनेकरूपमाह **अन्यथास्तित्वेति** । देवदत्तः सिंहो नेत्यपीति इदं पदार्थो रजतं नेति बाधकदर्शनेन इत्यस्योपलक्षणमिदम् । तेन सदा देवदत्तादौ सिंहादि इत्यादिपदमुपपन्नमिति ज्ञेयम् । गुणक्रियादिकमेव विशेषपदार्थः इति प्रतीतिनिवारणाय व्याचष्टे **भेदप्रतिनिधीति** । यथाश्रुते बाधमाह **धर्मधर्मि इति** । **वक्ष्यमाणतयेति** । 'अभेदेन प्रतीतिश्च कार्यकारणे'त्युत्तरभाष्यमूले वक्ष्यमाणतयेत्यर्थः । विशेषपदार्थविषये तत्र तत्र मूलटीकोक्तयोः विरुद्धाः प्रतीयन्ते । तथा हि । अत्र प्रकरणे तावत् मूले स्वभावभेदापरनाम्नेति स्वभावविशेषादेवेति चोच्यते । **धर्मधर्मीव्यतिरिक्ततृतीयपदार्थस्यैवेति** । धर्मधर्मिव्यतिरिक्तस्वभावविशेषेणैवेति च टीकायां व्यवहारः । 'स्वरूपेऽपि विशेषोऽस्ति' इत्येतत् तत्त्वनिर्णयटीकायां विशेषो नाम कश्चित् वस्तुनः शक्तिरित्युक्तम् । एवं बहुस्थलेषु अन्यथोक्तयो जन्माधिकरणेऽस्माभिरुपदर्शितप्रकारेण ज्ञेयाः । टीकानुसारेण तु निर्णयः कार्योऽस्ति । **आहुरिति** । अभेदेन प्रतीतिश्च इत्युत्तरभाष्यमूलविरोधः स्पष्टः इत्यस्वरसबीजम् । धर्मः धर्मधर्मिपदार्थातिरिक्तस्येत्युक्तमित्यभिप्रेत्य व्याचष्टे **भेदप्रतिनिधीति** । एवमुत्तरत्रापि ।

स०व्र०— **समवायस्येति** । समवायस्यैकत्वेन समवाये आश्रितत्वादेः समवायानुपपत्तिरिति भावः । **उपचारादिकल्पनेति** । आदिपदेन भ्रान्तिमूलत्वपरिग्रहः । **मुख्यप्रयोगादेरिति** । आदिपदेन बाधकप्रत्ययाभावपरिग्रहः ।

विठ्ठल०— अन्यथेति । तद्गतत्वास्तित्वादीनां समवायेन सम्बन्धाभावेत्यर्थः । तत्र समवाये अस्तु तत्रापि कश्चन सम्बन्ध इत्यत आह **न चेति** । अस्त्वेवं समवाये तद्गतत्वविषयत्वादिधर्माणां समवायस्वरूपत्वं ततः किमित्यत आह **तत्रेति** । उपचारादीत्यादिशब्देन भ्रान्तिमूलत्वसङ्ग्रहः । **मुख्यप्रयोगादेरिति** । आदिबाधकप्रमासङ्ग्रहः देवदत्तः सिंहो न किन्तु तत्सदृश इत्यादि मुख्यप्रयोगदर्शनात् तथा देवदत्तस्य सिंहाभेदे बाधकसद्भावाच्च सिंहो देवदत्त इति प्रयोगस्यौपचारिकभ्रान्तित्वं वा कल्प्यते । न चैव प्रकृते समवाय एव तद्गतत्वमित्यभेदव्यपदेशो वा अपर्यायशब्दवाच्यत्वादेर्बाधकं वा दृश्यते । अतो नात्रौपचारिकत्वादिकल्पना युक्तेति भावः । उत्तरार्धोक्तं स्वपक्षं वक्तुं पृष्टस्य परिहारपरमुखेन वाचयति **न तद्गतत्वादीति** ।

॥ इति तद्धर्माणामपि अत्यन्तभेदाभावाच्च न समवायसिद्धिः ॥

* * *

॥ अथ च उक्तार्थतात्पर्यम् ॥
॥ अथ तत्रादौ उपोद्घातत्वेन तात्पर्यम् ॥

१२९ **सु०— किमतो यद्येवमित्यत आह द्रव्यमेवेति ।**

अनु०— द्रव्यमेव ततोऽनन्तविशेषात्मतया सदा । नानाव्यवहृतेर्हेतुः

समवायधर्मवद्गुणादीनां द्रव्यविशेषत्वादित्यर्थः । अनन्तशब्दो यत्र यावन्तो व्यवहाराः तावतामुपलक्षकः । नानाव्यवहृतेः व्यपदेशभेदादेरित्यर्थः ।

कं०रा०— 'द्रव्यमेव ततोऽनन्तविशेषात्मतया सदा । नानाव्यवहृतेर्हेतुरि'त्यत्र द्रव्यस्यानन्तविशेषात्मकत्वकथनमयुक्तं द्रव्येऽनन्तव्यवहाराणामभावादित्यत आह **अनन्तशब्द इति** ।

श्रीनिधि०— आनन्त्ये तारतम्यमभिप्रेत्याह **अनन्तशब्दो यत्रेति** ।

शे०वा०— **द्रव्यविशेषत्वात्** विशेषाश्रयीभूतद्रव्यधर्मरूपत्वादित्यर्थः । ईश्वराख्यद्रव्यविशेषस्यानन्तधर्मवत्तया अनन्तविशेषात्मकत्वसम्भवेऽपि तदन्यत्र तदसम्भवादाह **अनन्तशब्द इति** ।

वा०र०— मूले **यत्र यावन्त** इत्यत्र यत्रेत्यादि प्रतीतेः 'अनन्तत्वविशेषतः' इत्युत्तरभाष्यमूलानुसारेणाह **ईश्वराख्यद्रव्येत्यादि** । ननु ईश्वरे यथानन्ताः व्यवहाराः अनन्तधर्मनिमित्तकाः तथा घटादावपि

अनन्तपरमाणुसंयोगाः अनन्तेश्वररूपसम्बन्धाः सन्त्येव । ततः तन्निबन्धनानन्तव्यवहाराणामनिवार्यत्वात् तन्निर्वाहकतया अनन्तविशेषाणां घटादावपि अङ्गीकार्यत्वात् सर्वत्रापि आनन्त्ये समाने यत्र यावन्त इत्यादि मूलटीकाग्रन्थौ कथमिति चेत् । अत्र ब्रूमः । यद्यपि एकस्मिन् संयोगे अनन्तप्रतिमायोगिकत्वमादाया-नन्तासंयोगस्य प्राप्ता तथापि स्वरूपतः संयोग एक एव । तथा च घटादौ तथाविधसंयोगविभागादि कतिपयधर्मा एव सन्तीति कतिपयव्यवहारनिर्वाहकाः विशेषाः अपि तत्सङ्ख्याका एव प्राप्ताः । ईश्वरे तु उक्तरीत्या क्रोडीकृतसंयोगादयो ज्ञानैश्वर्यशक्तिवीर्यसुखऔदार्यादयो धर्माः स्वत एवानन्ताः इति तद्व्यवहा-राणामपि स्वाभाविकानन्त्यात् तन्निर्वाहकविशेषाणां अनन्तत्वमावश्यकमेव । घटादिसंयोगस्य अनन्तप्रति-योगिकत्वेनानन्ता एव तथाविध अनन्तधर्माणां प्रत्येकमानन्त्यात् अनन्तानि प्राप्तानि इति साम्याभाव एवेति यत्र यावन्त इति मूलादि अनुपपन्नमिति । एवमीश्वराख्येत्युत्तरमूलेऽपि ज्ञेयम् । एवं च यत्र यावन्त इति मूलस्य ईश्वरेऽनन्ताः तदन्यत्रानेके इति मूलार्थो लब्धः इति ज्ञेयम् ।

विठ्ठल०— किमतो यद्येवमिति । परोपन्यस्तान् हेतूनपाकर्तुमुपोद्घातमाहेत्युक्तम् । अस्त्वेवमुपोद्घातः स्वतः किमित्यर्थः । **अत इति** । तत इत्यस्येति शेषः । सर्वत्र विशेषसङ्ख्याणामभावादाह **अनन्त इति** ।

१३० सु०— एतदुक्तं भवति । गुणगुण्यादेः अत्यन्तभेदे सिद्धे हि तत्सम्बन्धः समवायः सिद्ध्यति । गुणगुण्याद्यत्यन्तभेदस्तु न प्रामाणिकः । तथा हि । न तावत् तत्र प्रत्यक्षं प्रमाणं, गवाश्वादिवदनुपलम्भात् । अतो 'गुणगुणिनावत्यन्तभिन्नावपर्यायशब्दवाच्यत्वात् घटपटवदि'त्याद्यनुमानमेव वक्तव्यम्; तच्चानैकान्तिकम्, समवायस्य तद्धर्माणां (च) भेदाभावेऽप्यपर्यायशब्दवाच्यत्वादन्यथासिद्धं च । यथा समवाये तद्गतत्वादिधर्माणां भेदाभावेऽपि विशेषापरनामकात्स्वभावविशेषादेवापर्यायशब्दवाच्यत्वादिकं उपपादनीयं गत्यन्तराभावात् तथा गुणगुण्यादीनाम(त्यन्ता)भेदेऽपि गुणादीनां द्रव्यविशेषत्वे(न द्र) तद्द्रव्यमेव विशेषशक्त्यैवापर्यायशब्दवाच्यत्वादिव्यवहारहेतुः भविष्यति । तथा च विपक्षे बाधकाभावादप्रयोजकत्वं हेतूनामिति ।

परि०— ननु गुणगुण्यादेर्भेदस्य प्रमितत्वेन समवायेन विना विशिष्टप्रत्ययानिर्वाहात् कथमेवमुक्तिः, विशेषस्तद्गतत्वादिरित्यादेः कथं प्रकृतोपयोगः, येनोपोद्घातत्वं तस्येत्यत आह **एतदुक्तमिति** । **इत्यादीति** । आदिपदेन धर्मधर्मिभावापन्नत्वज्ञाताज्ञातभावापन्नत्वादिहेतुग्रहः । अन्यथासिद्धं चेत्युक्तं व्यनक्ति **यथेत्यादि** । **हेतूनामितीति** । गुणगुण्यादिभेदसाधकप्रागुक्त-हेतूनामित्यर्थः । इतिशब्दस्यैतदुक्तमिति पूर्वेणान्वयः ।

कं०रा०— गवाश्वादिवदिति । गवाश्वादाविव गुणगुण्यादिषु भेदस्यानुपलम्भादित्यर्थः । **अनैकान्तिकमिति** । समवायतद्धर्मेष्विति शेषः । अनैकान्तिकत्वमेवोपपादयति **समवायस्येति** । अन्यथासिद्धं चेत्यनेनोक्तमप्रयोजकत्वं दर्शयति **यथेत्यादिना** ।

श्रीनिधि०— इत्याद्यनुमानमिति । आदिपदेन विरुद्धधर्माधिकरणत्वं गृह्यते । विशेषस्तद्गतत्वादिरिति श्लोकस्य द्रव्यमेवेत्यादि त्रिपाद्याश्च नार्थभेदोऽस्ति पुनरुक्तिः । एवञ्चेत्यतः पूर्वश्लोके व्यभिचारान्यथासिद्धयोः सूचनम् । त्रिपाद्यां तु स्पष्टनमित्यभिप्रायेण किमतो यद्येवमिति त्रिपाद्यवतारिता । इदानीं सूक्ष्ममतीनां श्लोक एव तयोः स्पष्टता ।

शे०वा०— ननु प्रमाणमात्राभावस्यैव वस्त्वभावव्यवस्थापकत्वेन तद्विशेषाभावस्य तदव्यवस्थापकत्वाद् गुणादेर्द्रव्येणात्यन्तभेदाभावसाधकतयाऽपि प्रमाणमात्राभाव एव वक्तव्यः तत्कथं भेदसाधकपरोपन्यस्तानुमानमात्रनिरासेन कृतार्थता । किञ्चानेनानुमानस्य दूषणमुक्तं भवतीत्यतोऽत्यन्तभेदाभावसाधकप्रमाणाभावं प्रत्यक्षदूषणं च बहिरेव प्रदर्श्य विवक्षितमनुमानदूषणं प्रदर्शयितुं तात्पर्यमाह **एतदुक्तं भवतीति** । इत्याद्यनुमानमित्यत्रादिपदेन गुणगुणिनावत्यन्तभिन्नौ धर्मधर्मिभावेन प्रतीयमानत्वादेकत्वानेकत्वरूपविरुद्धधर्माधिकरणत्वादित्यादेः सङ्ग्रहः । अनैकान्तिकत्वमेव विशदयति **समवायस्येति** । **अन्यथासिद्धत्वं चेति** । यद्यप्यन्यथासिद्धेर्व्याप्यत्वासिद्धतया दूषणत्वेन पृथग्दूषणत्वाभावाद्व्यभिचारोद्भावनानन्तरं न तदुद्भावनमुचितम् । तथाऽपि पृथग्दोषत्वमभ्युपेत्यायं ग्रन्थः प्रवृत्त इत्यवधेयम् । केचित्तु । निमित्तान्तराभावे सत्यपर्यायशब्दवाच्यत्वस्यैव हेतुत्वाश्रयणात् समवाये च विशेषरूपनिमित्तान्तरसद्भावान्नानैकान्त्यमित्यत आह **अन्यथासिद्धत्वं च** इत्यवतारमाहुः । तन्न । तथा सति समवायवद् गुणगुण्यादिस्थलेऽपि विशेषरूपनिमित्तान्तरसद्भावेन हेतुविशेषणासिद्धिप्रसक्त्या सविशेषणहेत्वङ्गीकारेण व्यभिचारपरिहारचोदनायाः कर्तुमशक्यत्वात् । शक्यत्वे वोत्तरग्रन्थे सविशेषणहेतोरेवान्यथासिद्धेरुपवर्णनीयतया निर्विशेषहेतोस्तद्वर्णनासाङ्गत्यप्रसङ्गाच्चेति । अन्यथासिद्धिमेव प्रकटयति **यथेत्यादिना** । **विपक्षे बाधकाभावादिति** । अनुकूलतर्कवत एव हेतोः प्रयोजकत्वेन तद्धीनस्याप्रयोजकत्वमित्यर्थः ।

वा०र०— प्रमाणमात्राभावस्यैवेति । यावत्प्रमाणाभावस्यैवेत्यर्थः । एवमुत्तरत्रापि । यद्वक्ष्यति । अनुमानमात्रनिरासेन कृतार्थतेति । **तद्विशेषाभावस्येति** । यत्किञ्चिद्विशेषाभावस्येत्यर्थः । **किञ्चानेनेति** । अनुमानदूषणं च किमुक्तं भवतीति सम्बन्धः । प्रमाणाभावं यावत्प्रमाणाभावम् । अतःपरं वक्तुं तत्प्रतिज्ञापूर्वकं इति शेषः । **प्रत्यक्षदूषणं चेति** । चशब्दो निर्देशार्थः । आगमश्चासम्भावित इति न दूषित इति भावः । **अन्यथासिद्धेः व्याप्यत्वासिद्धतयेति** । मूले अन्यथाप्रकारेणासिद्धिहेतोर्घटना अन्यथासिद्धिरिति या विवक्षिता या तु अन्यथासिद्धिः व्यर्थविशेषणत्वाद्यसिद्धिविशेषणे वैय्यर्थ्ये एकासिद्धौ चेत्यादिना सन्ध्यस्य भाष्ये वक्ष्यमाणान्यथासिद्धिः सा चाभिप्रेत्य युक्तिपादे अन्यथासिद्धे दूषणत्वस्य प्रकारान्तरेण वक्ष्यमाणत्वादित्युक्तम् । सात्र

मूलेनाभिप्रेता व्यर्थविशेषणत्वादेरप्रसक्तेः । अभिप्रेताया अपि दूषणत्वं अप्रयोजकत्वरूपदूषणविभागतया । यथा चैतत्तथा एवं चाप्रयोजकोऽन्यथासिद्धो व्याप्यत्वासिद्धो वा वाक्यत्वादिहेतुरिति तत्त्वनिर्णयटीकावाक्य-व्याख्यानावसरे अस्माभिरुपपादितम् । इहापि मूले अन्यथासिद्धं चेति प्रतिज्ञायोपपाद्य च विपक्षे बाधका-भावात् अप्रयोजकत्वं हेतूनामित्युपसंहारः तदुत्तरत्राप्रयोजकत्वान्यथासिद्धयोः सङ्करेण व्यवहाराश्चेममेवार्थं सूचयति । टीकापि तत्परत्वेन योज्या । जिज्ञासाधिकरणटीकाव्याख्यानेऽपि प्रकारान्तरेण घटनारूपान्यथा-सिद्धिविचारोऽस्मदीयोऽस्ति । **इत्याद्यनुमानमिति** । पूर्वोक्तादिपदाभिप्रायेण हेतूनामिति बहुवचनं उपसंहारमूले । एतदाशयेनैव टीकाकृता आदिपदेनानुमानद्वयसङ्ग्रहो व्याख्यातः । स्वयमित्यादेरित्यादिपदं च प्रयुक्तमिति ज्ञेयम् ।

स०व्र०— अन्यथासिद्धं चेति । व्यभिचारकथनानन्तरमपि उपाधिकथनात् तद्वत् व्यभिचार-कथनानन्तरमपि अन्यथासिद्धयुद्भावनं युक्तम् ।

विट्ठल०— गुणगुण्यादीनां द्रव्येणात्यन्तभेदे परेऽपि न्यस्ता हेतवः के तेषां च किं दूषण-मनेनोक्तमित्यत आह **एतदुक्तं भवतीति** । **अत्यन्तभेदे सिद्धे हीति** । अभेदस्य सम्बन्धविरोधित्वादिति भावः । **अन्यथासिद्धत्वं स्फुट इति** । यथा समवाय इति गुणादीनां द्रव्यविशेषत्वेनेति । अत्र द्रव्यगुणक्रियादय एव स्वनिर्वाहकविशेषरूपा इत्येकः सम्प्रदायः द्रव्यतद्धर्मभूतगुणाद्व्यतिरेके अपर्यायशब्द-वाच्यत्वादिघटकसमवायतुल्यः स्वनिर्वाहस्तृतीयो विशेष इत्यपरः । टीकाकारैस्तत्र तत्रोभयथा व्यवहृते वर्तते । तत्र निष्कर्षस्तत्त्वरत्नप्रकाशे मया सप्रमाणमुदितो द्रष्टव्यः ।

॥ इति उपोद्घातत्वेन तात्पर्यम् ॥

* * *

॥ अथ तत्रान्ते प्रकारान्तरेण च तात्पर्यम् ॥

१३१ सु०— यद्वा 'विशेषस्तद्वतत्वादिरित्यनेनैव गुणगुण्याद्यत्यन्तभेदसाधकानां हेतूनामनैकान्त्याप्रयोजकत्वे वर्णिते । यदि तद्वतत्वादिधर्माभिन्ने समवाये तद्वतत्वादि-विशेषोऽभ्युपेयते विशेषेणैव च व्यवहारा निर्वहिष्यन्ते, तदा व्यपदेशभेदादिहेतूनां व्यभि-चारान्यथासिद्धिभ्यां आभासत्वात् केन हेतुना द्रव्यस्य गुणक्रियादिरूपस्य गुणक्रियादि-स्वरूपत्वस्य निषेधः (करिष्यते) क्रियते । गुणगुण्याद्यत्यन्तभेदः केन हेतुना साधयिष्यत इति यावत् ।

परि०— प्रागुक्तोपोद्घातत्वेन व्याख्यातमधुना प्रकारान्तरेण व्याचष्टे **यद्वेत्यादिना भविष्यतीत्यन्तेन** । **निर्वहिष्यन्त इति** । वहतेरनिट्त्वेऽपि स्पष्टार्थमेवमुक्तम् । निर्वक्ष्यत इत्युक्तौ निर्वचनभ्रान्त्यापत्तेः ।

यादु०— विशेषेणैव चेति । तृतीयेन समवायस्वभावविशेषेणैवेत्यर्थः ।

श्रीनिधि०— एवञ्च पुनरुक्तिरित्यभिप्रेत्य प्रकारान्तरेण व्याचष्टे **यद्वेति** ।

शे०वा०— अत्र पक्षे विशेषस्तद्गतत्वादिरित्याद्यवाक्यस्योपोद्घातत्वकल्पना भवतीत्यपरितोषादाह **यद्वेति** । तद्वर्णनप्रकारमेव दर्शयति **यदीति** । **विशेषो** विशेषाश्रयीभूतधर्मरूपः । **विशेषेणैवेति** । धर्मधर्मिव्यतिरिक्तस्वभावविशेषेणैवेत्यर्थः । तर्हि पूर्ववाक्येनैव परोपन्यस्तहेतूनामनैकान्त्यान्यथासिद्धिभ्यामाभासत्वसिद्धेः 'द्रव्यमेवे'त्युत्तरवाक्यानर्थक्यमित्याशङ्क्य पूर्वोक्तान्यथासिद्धिप्रकारप्रदर्शनपूर्वकमुपसंहारार्थतया तत्कथन्ताशङ्कापरिहारार्थत्वान्न तदिति भावेन तत्परतयोत्तरभाष्यं सङ्गमयति **अन्यथेति** ।

वा०र०— निर्वहिष्यन्त इति मूलम् । विशेष एव निर्वहिष्यतीति जन्माधिकरणमूलस्थपदवदयं प्रयोग उपपाद्यः । **गुणक्रियाद्यनन्तेति** । अनन्तशब्द ईश्वरे मुख्यः इत्यादिकं पूर्वमूले स्पष्टम् । **सविशेषणहेत्वङ्गीकारेणेति** । तथा सति असिद्धेरेव आपत्त्या एकं सन्धित्सतोऽपरं प्रच्यवते इति न्यायविषयत्वं स्यात् इति भावः । असिद्धयज्ञानेन शङ्केत्यत आह **शक्यत्वे चेति** ।

विठ्ठल०— प्रागुपोद्घाततया व्याख्यातं मूलमधुना परोक्तहेतुदूषकत्वेनापि व्याचष्टे **यद्वेति** । वर्णिते इत्युक्तं विशदयति **यदि तद्गतत्वादीति** । **निर्वहिष्यन्त इति** । वह हेरनित्येति स्पष्टार्थमेवमुक्ति निर्वक्ष्यत इत्युक्तौ निर्वचनभ्रान्त्यापत्तेः ।

॥ इति प्रकारान्तरेण च तात्पर्यम् ॥
॥ इति उक्तार्थतात्पर्यम् ॥

* * *

॥ अथ तत्र उपसंहारः ॥

१३२ **सु०— अन्यथासिद्धिमेव प्रकटयन्नुपसंहरति द्रव्यमेवेति । 'समवायवदि'ति वक्ष्यमाणमत्रापि सम्बध्यते । यथा समवायस्य तद्गतत्वादिविशेषात्मतया व्यपदेशभेदादिव्यवहारहेतुत्वम्, तथा द्रव्यमेव घटादिकं गुणक्रियाद्यनन्तविशेषात्मतया नानाव्यवहृतेर्हेतुर्भवतीति ।**

नन्वौपचारिकत्वं वा भ्रान्तिमूलत्वं वा व्यवहाराणामङ्गीकृत्य हेतूनां दूषणं शक्यम्, तत्किं विशेषाङ्गीकारेण । नैवं शक्यम् । औपचारिकत्वादौ हि कदाचिन्मुख्यो व्यवहारः स्यात्, न हि तीरादौ सदा गङ्गादिव्यवहारोऽस्ति; न चैवं प्रकृते, सदैवा-पर्यायशब्दवाच्यत्वादेः सत्त्वात् । यदाप्यभेदबोधाय रूपमेव घट इति वा विज्ञानं ब्रह्मेति वा व्यवहियते तदापि न पर्यायतामुपेत्य, तथाऽननुभवात् । अतो वक्तव्यमेवात्र निमित्तम् । तदिदमुक्तं सदेति ।

परि०— मूलोक्ते परकीयहेतुदूषणेऽनौचित्याशयेनाशङ्क्य निराह **नन्वित्यादिना** । उपचार-कल्पने मुख्यव्यवहारः कुत इत्यतस्तद्दर्शनादित्याह **न हीति** । **व्यवहारोऽस्तीति** । किन्तु गङ्गातीरे ग्रामः गङ्गाकूले वृक्ष इत्यादिमुख्योऽप्यस्तीति भावः । **न चैवं प्रकृत इति** । गुणगुण्यादौ घटादि-द्रव्यं गुणा इति, तन्तवः पट इति, मूर्तं क्रियेत्यादिर्वा द्रव्यमस्तीति वाच्ये कदाचिद्गुणोऽस्ती-त्यादिपर्यायतया वा मुख्यो व्यवहारश्चेत् कदाचित् स्यात् तदा परं भेदव्यपदेशादिरुपचरितो वा भ्रान्तिमूलो वेति कल्प्यम् । न चैवमस्तीत्यर्थः । **अत्र निमित्तमिति** । सदा भेदेन व्यवहारे हेतुर्वाच्य इत्यर्थः ।

यादु०— **व्यवहाराणां** गुणगुण्यादावपर्यायशब्दव्यवहाराणाम् । **दूषणम्** औपचारिकत्वादित्यादिना अन्यथासिद्धत्वात् नात्यन्तभेदसाधकत्वरूपमित्यर्थः । **औपचारिकत्वादौ** गङ्गायां घोष इत्यादिस्थले । **मुख्यो व्यवहार इति** । तीरं गङ्गा नेत्यादिमुख्यव्यवहारवदित्यर्थः ।

वं०प०— **प्रकृत इति** । कदाचिद्वा मुख्यः पर्यायव्यवहार इत्यर्थः । अस्ति कदाचिन्मुख्यो व्यवहार इत्यौपचारिकत्वं कल्प्यमिति युक्तमित्याशङ्क्य निषेधति **यदाऽपीति** । **अत इति** । तच्च विशेष एवेति शेषः । सदा नानाव्यवहृतेरपर्यायव्यवहारस्य हेतुर्न कदापि पर्यायव्यवहारस्येत्यर्थः इत्याह **सदेति** ।

श्रीनिधि०— अत एवाह **उपसंहरतीति** । **कदाचित् मुख्यो व्यवहारः स्यादिति** । अमुख्यव्यवहार एव सर्वदा किन्न स्यादित्यत आह **न हि तीरादाविति** । **तीरादौ** तीरादिमुख्यप्रयोगवत् । अत्रापि समवायो ज्ञातत्वमिति पर्यायप्रयोगे औपचारिकत्वादिकं शक्यकल्पनमित्यत आह **न चैवं प्रकृत इति** । ननु सदैव पर्यायशब्दवाच्यत्वादेः सत्त्वादित्युक्तमयुक्तम् । गुणादीनां द्रव्यभेदमङ्गीकुर्वद्भिः तदभेदो बाधनीयः । रूपं घटः, विज्ञानं ब्रह्मेति । तत्र च पदानां पर्यायताया अङ्गीकर्तव्यत्वादन्यथा भेदबोधनायोगादित्यत आह **यदाप्यभेदबोधायेति** । न चाभेदबोधनानुपपत्तिः । तन्मात्रताबोधने ह्ययं दोषः । नैवम् । किं तर्हि तादात्म्यं बोध्यत इति हि तत्त्वविदां पन्था इति सन्तोष्टव्यमायुष्मता । **अतो वक्तव्यमेवात्र निमित्तमिति** । **अत्र**

विचित्रव्यवहारे । **तदिदमुक्तमिति** । **तदिदं** व्यवहाराणां औपचारिकत्वं वा भ्रान्तिमूलत्वं वा न । तथा सति कदाचित् मुख्यो व्यवहारः स्यात् । न च सोऽस्तीत्याद्युक्तम् । उक्तं सूचितं **सदा** सार्वकालीनो यो विचित्रव्यवहारः अपर्यायपदप्रयोगादिः । तद्धेतुरित्युक्त्याऽस्यार्थस्य सूचनात् ।

शे०वा०— अन्यथासिद्धिप्रकाशप्रपञ्चकत्वस्य मूलारूढतासिद्धयर्थमपेक्षितं पूरयति **समवायवदितीति** । **वक्ष्यमाणम्** उत्तरवाक्य इति शेषः । मूले सदापदवैयर्थ्यमाशङ्क्य तन्निवर्तनीयां शङ्कामुत्थापयति **नन्विति** । औपचारिकत्वादावित्यादिपदेन भ्रान्तिमूलत्वपरिग्रहः । **मुख्यो व्यवहार इति** । घटो न रूपीत्येवंरूप इत्यर्थः । **न हीति** । तीरं न गङ्गेत्यपि व्यवहारदर्शनादिति भावः ।

विट्ठल०— मूलेनौचित्यमाशङ्क्य परिहरति **नन्वित्यादिना** । औपचारिकत्वादौ कदाचिन्मुख्यो व्यवहारोऽप्यावश्यक इत्येतत्कुत इत्यत आह **न हीति** । **न चैवं प्रकृत इति** । 'घटादिद्रव्यगुणा' इति तन्तवः पट इत्यादिर्वा द्रव्यमस्तीति वक्तव्ये कदाचिद्गुणोऽस्तीत्यादिर्वा पर्यायतया मुख्यो व्यवहारः कदाचित्स्यात् तदा भेदव्यवहारादेरुपचरितत्वं भ्रान्तित्वं वा कल्पनीयं न चैवमस्तीत्यर्थः । गुणादेर्गुण्याद्यभेदव्यवहारोऽपि पर्यायताज्ञापकोऽस्तीत्यतस्तस्य विप्रतिपन्नं प्रत्यभेदबोधनार्थत्वेनान्यथासिद्धत्वादित्यत आह **यदापीति** । न पर्याययोरभेदो बोध्यते । तथेहापीति भावः ।

॥ इति उपसंहारः ॥

* * *

॥ अथ उक्तार्थसमर्थनम् ॥

॥ अथ तत्रादौ उक्तार्थस्य व्याहतताशङ्का तन्निरसनं च ॥

१३३ सु०— नन्वनन्तविशेषात्मकमेकमेव द्रव्यमिति व्याहतमिति चेत्; किं माता वन्ध्येतिवत् साक्षाद्विरोधः, किंवा कृतकं नित्यमितिवद्व्याप्त्या । नाद्यः; यतोऽनन्तत्वं सङ्ख्याविशेषः, एकत्वं चाभेदः । न द्वितीयः; यत्रानेकत्वं तत्रावश्यं भेद इति व्याप्तौ हि स स्यात्, न चैवम्, भेदप्रतिनिधिना विशेषेणैव अनेकत्वसङ्ख्यानिर्वाहात् । इत्याह अनन्तत्वमिति ।

अनु०— अनन्तत्वं विशेषतः ।

ईश्वराख्यद्रव्यविशेषाणाम् **अनन्तत्वम्** अन्यत्रानेकत्वमिति द्रष्टव्यम् । अत्रापि 'समवायवदि'ति सम्बध्यते । एक एव हि समवायोऽनेकधर्मात्मकोऽङ्गीयते ।

परि०— साक्षाद्विरोध इति । *परस्परनिषेधतयेत्यर्थः* । ***विशेषेणैवेति*** । *एतेन मूले* विशेषत इति तृतीयार्थे तसिरिति दर्शितम् । **अन्यत्रानेकत्वमिति** । भेदेन *व्यपदिश्यमानानां* गुणक्रियादीनामेवेह प्रकरणप्राप्तत्वात् तदभिप्रायेणानेकत्वमित्युक्तम् ।

यादु०— साक्षाद्विरोध इति । परस्परविरहप्रतिपादकतया विरोध इत्यर्थः ।

वं०प०— स स्यादिति । यत्रानेकत्वं तत्राभेदापरपर्यायमेकत्वमिति विरोधः स्यादित्यर्थः । **न चैवमिति** । यत्रानेकत्वं तत्र भेद इति न व्याप्तिरप्रयोजकत्वादित्यर्थः । ननु भेदाभावेऽनेकत्वमेव न स्यादिति हेतूच्छित्तिरूपबाधकसद्भावान्नाप्रयोजकतेति चेत्तत्राह **भेदप्रतिनिधिनेति** । भेदाभावेऽपीति शेषः । तथा च तर्कोऽप्यन्यथासिद्ध्याऽप्रयोजक एवेत्याशयः । **ईश्वराख्येति** । ईश्वररूपे द्रव्ये विद्यमानानां तेनाभिन्नतां ज्ञानादि-धर्माणाम् । **अन्यत्र** ईश्वररूपद्रव्यभिन्नद्रव्यस्थितानां विशेषाणां धर्माणामनन्तत्वं नामानेकत्वमित्यर्थः ।

कं०रा०— साक्षादिति । परस्परविरहरूपत्वेनेत्यर्थः । **व्याप्तेति** । परस्परविरहव्याप्तेत्यर्थः । **न चैव-मिति** । यत्रानेकत्वं तत्रावश्यं भेद इति व्याप्तिर्नैवेत्यर्थः । **अत्रापीति** । 'अनन्तत्वं विशेषतः' इत्यत्रापि 'विशेषश्च विशेषी चे'त्युत्तरत्र वक्ष्यमाणं समवायवदित्येतत्सम्बन्धत इत्यर्थः । नन्वेकस्यैव समवायस्या-नेकात्मकत्वे हि समवायवदित्यस्य प्रकृते सम्बन्धो युज्यते । तत्तु कथमित्यत आह **एक एव हीति** ।

श्रीनिधि०— ईश्वराख्यद्रव्यविशेषणानामिति । ईश्वराख्यं यद्द्रव्यं तन्निष्ठविशेषणानां इत्यर्थः । अभिसन्धिः प्राग्वत् ।

शे०वा०— ननु 'अनन्तत्वं विशेषतः' इत्युत्तरवाक्यमनर्थकम् । न चानन्तत्वस्य विशेषाधीनत्व-प्रतिपादनार्थमेतदिति वाच्यम् । तत्प्रतिपादनस्याप्यनर्थकत्वात् । न चानन्तत्वस्य भेदाधीनत्वाभावप्रति-पादनार्थत्वान्न तदिति वाच्यम् । तत्प्रतिपादनस्याप्यनर्थकत्वात् । न च यत्रानन्तत्वं तत्रावश्यं भेद इति व्याप्त्यभावप्रतिपादनार्थत्वान्न तस्यानर्थक्यमिति वाच्यम् । व्याप्त्यभावप्रतिपादनस्याप्यनर्थकत्वात् । न च व्याघातशङ्कापरिहारार्थत्वान्न तदिति वाच्यम् । तावता व्याप्तिमूलकव्याघातशङ्कापरिहारेऽपि साक्षाद्विरोधरूप-व्याघातशङ्काया अनेनापरिहारेणास्य तत्परिहारकत्वायोगादित्यतो नेदं साक्षाद्विरोधशङ्कापरिहारकतयाऽभिमतं किन्तु व्याप्तिमूलकतच्छङ्काया एव । साक्षाद्विरोधशङ्कायास्तु प्रकारान्तरेणैव परिहार इत्यभिप्रेत्य तत्कथ-मित्यतः साम्मुख्येन व्याघातशङ्कामुत्थाप्य तत्र सम्भावितविकल्पद्वयप्रदर्शनपूर्वकमाद्यपक्षं बहिरेव प्रदूष्य द्वितीयपक्षदूषणतया मूलं योजयति **नन्वित्यादिना** । **साक्षाद्विरोध इति** । परस्परविरहात्मकत्वलक्षण इत्यर्थः ।

विचित्रव्यवहारे । **तदिदमुक्तमिति** । **तदिदं** व्यवहाराणां औपचारिकत्वं वा भ्रान्तिमूलत्वं वा न । तथा सति कदाचित् मुख्यो व्यवहारः स्यात् । न च सोऽस्तीत्याद्युक्तम् । उक्तं सूचितं **सदा** सार्वकालीनो यो विचित्रव्यवहारः अपर्यायपदप्रयोगादिः । तद्धेतुरित्युक्त्याऽस्यार्थस्य सूचनात् ।

शे०वा०— अन्यथासिद्धिप्रकारप्रपञ्चकत्वस्य मूलारूढतासिद्ध्यर्थमपेक्षितं पूरयति **समवायवदितीति** । **वक्ष्यमाणम्** उत्तरवाक्य इति शेषः । मूले सदापदवैयर्थ्यमाशङ्क्य तन्निवर्तनीयां शङ्कामुत्थापयति **नन्विति** । औपचारिकत्वादावित्यादिपदेन भ्रान्तिमूलत्वपरिग्रहः । **मुख्यो व्यवहार इति** । घटो न रूपीत्येवंरूप इत्यर्थः । **न हीति** । तीरं न गङ्गेत्यपि व्यवहारदर्शनादिति भावः ।

विष्टल०— मूलेनौचित्यमाशङ्क्य परिहरति **नन्वित्यादिना** । औपचारिकत्वादौ कदाचिन्मुख्यो व्यवहारोऽप्यावश्यक इत्येतत्कुत इत्यत आह **न हीति** । **न चैवं प्रकृत इति** । 'घटादिद्रव्यगुणा' इति तन्तवः पट इत्यादिर्वा द्रव्यमस्तीति वक्तव्ये कदाचिद्गुणोऽस्तीत्यादिर्वा पर्यायतया मुख्यो व्यवहारः कदाचित्स्यात् तदा भेदव्यवहारादेरुपचरितत्वं भ्रान्तित्वं वा कल्पनीयं न चैवमस्तीत्यर्थः । गुणादेर्गुण्याद्यभेदव्यवहारोऽपि पर्यायताज्ञापकोऽस्तीत्यतस्तस्य विप्रतिपन्नं प्रत्यभेदबोधनार्थत्वेनान्यथासिद्धत्वादित्यत आह **यदापीति** । न पर्याययोरभेदो बोध्यते । तथेहापीति भावः ।

॥ इति उपसंहारः ॥

* * *

॥ अथ उक्तार्थसमर्थनम् ॥
॥ अथ तत्रादौ उक्तार्थस्य व्याहतताशङ्का तन्निरसनं च ॥

१३३ सु०— नन्वनन्तविशेषात्मकमेकमेव द्रव्यमिति व्याहतमिति चेत्; किं माता वन्ध्येतिवत् साक्षाद्विरोधः, किंवा कृतकं नित्यमितिवद्व्याप्या । नाद्यः; यतोऽनन्तत्वं सङ्ख्याविशेषः, एकत्वं चाभेदः । न द्वितीयः; यत्रानेकत्वं तत्रावश्यं भेद इति व्याप्तौ हि स स्यात्, न चैवम्, भेदप्रतिनिधिना विशेषेणैव अनेकत्वसङ्ख्यानिर्वाहात् । इत्याह अनन्तत्वमिति ।

अनु०— अनन्तत्वं विशेषतः ।

ईश्वराख्यद्रव्यविशेषाणाम् **अनन्तत्वम्** अन्यत्रानेकत्वमिति द्रष्टव्यम् । अत्रापि 'समवायवदि'ति सम्बध्यते । एक एव हि समवायोऽनेकधर्मात्मकोऽङ्गीयते ।

परि०— साक्षाद्विरोध इति । परस्परनिषेधतयेत्यर्थः । **विशेषेणैवेति** । एतेन मूले विशेषत इति तृतीयार्थे तसिरिति दर्शितम् । **अन्यत्रानेकत्वमिति** । भेदेन व्यपदिश्यमानानां गुणक्रियादीनामेवेह प्रकरणप्राप्तत्वात् तदभिप्रायेणानेकत्वमित्युक्तम् ।

यादु०— साक्षाद्विरोध इति । परस्परविरहप्रतिपादकतया विरोध इत्यर्थः ।

वं०प०— स स्यादिति । यत्रानेकत्वं तत्राभेदापरपर्यायमेकत्वमिति विरोधः स्यादित्यर्थः । **न चैवमिति** । यत्रानेकत्वं तत्र भेद इति न व्याप्तिरप्रयोजकत्वादित्यर्थः । ननु भेदाभावेऽनेकत्वमेव न स्यादिति हेतूच्छित्तिरूपबाधकसद्भावान्नाप्रयोजकतेति चेत्तत्राह **भेदप्रतिनिधिनेति** । भेदाभावेऽपीति शेषः । तथा च तर्कोऽप्यन्यथासिद्ध्याऽप्रयोजक एवेत्याशयः । **ईश्वराख्येति** । ईश्वररूपे द्रव्ये विद्यमानानां तेनाभिन्नतां ज्ञानादिधर्माणाम् । **अन्यत्र** ईश्वररूपद्रव्यभिन्नद्रव्यस्थितानां विशेषाणां धर्माणामनन्तत्वं नामानेकत्वमित्यर्थः ।

कं०रा०— साक्षादिति । परस्परविरहरूपत्वेनेत्यर्थः । **व्याप्तेति** । परस्परविरहव्याप्तेत्यर्थः । **न चैवमिति** । यत्रानेकत्वं तत्रावश्यं भेद इति व्याप्तिर्नैवेत्यर्थः । **अत्रापीति** । 'अनन्तत्वं विशेषतः' इत्यत्रापि 'विशेषश्च विशेषी चे'त्युत्तरत्र वक्ष्यमाणं समवायवदित्येतत्सम्बन्धत इत्यर्थः । नन्वेकस्यैव समवायस्यानेकात्मकत्वे हि समवायवदित्यस्य प्रकृते सम्बन्धो युज्यते । तत्तु कथमित्यत आह **एक एव हीति** ।

श्रीनिधि०— ईश्वराख्यद्रव्यविशेषणानामिति । ईश्वराख्यं यद्द्रव्यं तन्निष्ठविशेषणानां इत्यर्थः । अभिसन्धिः प्राग्वत् ।

शे०वा०— ननु 'अनन्तत्वं विशेषतः' इत्युत्तरवाक्यमनर्थकम् । न चानन्तत्वस्य विशेषाधीनत्वप्रतिपादनार्थमेतदिति वाच्यम् । तत्प्रतिपादनस्याप्यनर्थकत्वात् । न चानन्तत्वस्य भेदाधीनत्वाभावप्रतिपादनार्थत्वान्न तदिति वाच्यम् । तत्प्रतिपादनस्याप्यनर्थकत्वात् । न च यत्रानन्तत्वं तत्रावश्यं भेद इति व्याप्त्यभावप्रतिपादनार्थत्वान्न तस्यानर्थक्यमिति वाच्यम् । व्याप्त्यभावप्रतिपादनस्याप्यनर्थकत्वात् । न च व्याघातशङ्कापरिहारार्थत्वान्न तदिति वाच्यम् । तावता व्याप्तिमूलकव्याघातशङ्कापरिहारेऽपि साक्षाद्विरोधरूपव्याघातशङ्काया अनेनापरिहारेणास्य तत्परिहारकत्वायोगादित्यतो नेदं साक्षाद्विरोधशङ्कापरिहारकतयाऽभिमतं किन्तु व्याप्तिमूलकतच्छङ्काया एव । साक्षाद्विरोधशङ्कायास्तु प्रकारान्तरेणैव परिहार इत्यभिप्रेत्य तत्कथमित्यतः साम्मुग्ध्येन व्याघातशङ्कामुत्थाप्य तत्र सम्भावितविकल्पद्वयप्रदर्शनपूर्वकमाद्यपक्षं बहिरेव प्रदूष्य द्वितीयपक्षदूषणतया मूलं योजयति **नन्वित्यादिना** । **साक्षाद्विरोध इति** । परस्परविरहात्मकत्वलक्षण इत्यर्थः ।

विट्ठल०— अन्यत्रानेकत्वमिति । ईश्वरवन्निरवधिकानन्त्याभावादेवमुक्तिः । वस्तुतस्तु 'अनन्ताश्च गुणास्तेषां अन्यजीवव्यपेक्षये'त्याद्युक्तेर्ब्रह्मादावप्यनन्तविशेषवत्वं सावधिकमस्तीति बोध्यम् ।

॥ इति उक्तार्थस्य व्याहतताशङ्का तन्निरसनं च ॥

* * *

॥ अथ तत्र उक्तार्थे अनवस्थाशङ्का तन्निरसनं च ॥

१३४ सु०— नन्वयं नानाव्यवहारनिर्वाहहेतुर्विशेषो यदि द्रव्यात्मैव कथं तर्हि (तद्द्रव्य) द्रव्यस्य विशेषः स्यात्, तदीयताया भेदव्याप्तत्वात् । मैवम्, विनाऽपि भेदेन तत्प्रतिनिधिना विशेषेणैव विशेषस्य तदीयतोपपत्तेः । एवं तर्हि तस्यापि विशेषस्य विशेषत्वसिद्धये विशेषान्तरमङ्गीकर्तव्यमित्यनवस्थेत्यत आह विशेषश्चेति ।

अनु०— विशेषश्च विशेषी स स्वेनैव समवायवत् ।

यथा 'समवायः स्वेनैव समवायी, न सम्बन्धान्तरेणे'त्यभ्युपगम्यानवस्था परेण पराक्रियते, तथा स द्रव्येऽनेकव्यवहारनिर्वाहहेतुः, विशेषश्च स्वेनैव विशेषी न पुनर्विशेषान्तरेण; अतो न कश्चिद्दोष इति ।

समवायवत् इत्युपलक्षणम्, सत्तान्त्यविशेषवच्चेत्यपि द्रष्टव्यम् । **यथा द्रव्यगुणकर्मसु सद्व्यवहारहेतुः सत्ता स्वेनैव सती स्वीकृता, यथा च नित्यद्रव्येष्वत्यन्तव्यावृत्तिप्रत्यये हेतुः 'अन्त्यो विशेषः' स्वेनैवात्यन्तव्यावृत्तस्तथैवेति ।**

गु०दी०— यथा द्रव्यगुणकर्मसु इत्यत्र तर्हि ममापि सत्त्ववद्विशेषवच्च समवायोऽपि स्वनिर्वाहकः स्यादिति परेण न सन्तोष्टव्यम् । प्रागस्माभिरुक्तरीत्या प्रतिबन्धा मोचितत्वादुपपादकाभावे दृष्टान्तमात्रस्यार्थासाधकत्वाच्चेति ज्ञेयम् ।

वं०प०— विशेषत्वसिद्धय धर्मत्वसिद्धये ।

श्रीनिधि०— विशेषत्वसिद्धये तदीयविशेषत्वसिद्धये । **यथा समवायः स्वेनेति** । तत्तद्धर्मप्राप्तौ अन्यानपेक्षत्वमात्रे दृष्टान्तोऽयं **सत्ता** । **स्वेनैवेति** । स्वस्वरूपेणैवेत्यर्थः । अतो न लिङ्गव्यत्ययदोषः ।

शे०वा०— विशेषत्वसिद्धय इति । विशेषस्य तदीयतासिद्धय इत्यर्थः । **विशेषान्तरमिति** । भेदस्य तत्रानङ्गीकारेण तेन तदीयताया अनिर्वाहादिति भावः । **कश्चिदिति** । तदीयत्वानुपपत्तिलक्षणो वाऽनवस्थालक्षणो वेत्येवं कश्चिदित्यर्थः । **स्वीकृतेति** । अन्यथा सद्व्यवहारहेतोः सत्तायास्तत्र विरहात् सता सतीति व्यवहारानुपपत्तिप्रसङ्गात् सत्तान्तराङ्गीकारे चानवस्थानादिति भावः । **स्वेनैवात्यन्तव्यावृत्त इति** । अन्यथा व्यावृत्तिबुद्धिहेतोर्व्यावर्तकान्तरस्य च तत्राभावाद्व्यावृत्तधीस्तत्र न स्यादिति भावः ।

॥ इति उक्तार्थे अनवस्थाशङ्का तन्निरसनं च ॥

* * *

॥ अथ तत्र भेदपरित्यागेनाभेदस्यैव स्वीकाराय भेदाभेदपक्षयोः साम्यशङ्कानिरासश्च ॥
॥ अथ च तत्र अवयवावयव्यादीनामभेदस्य निरूपणम् ॥

१३५ **सु०—** अथाऽपि स्यात् ॥ गुणगुण्यादिभेदमभ्युपगच्छता मया 'इहेदमि'ति व्यवहारनिर्वाहाय समवायोऽङ्गीक्रियते, तस्य चानवस्थापरिहाराय स्वनिर्वाहकत्वम्; अभेदं (अभ्यु)चाभ्युपगच्छता त्वयाऽपर्यायशब्दवाच्यतादिसिद्धये विशेषोऽङ्गीक्रियते, तस्य चानवस्थानिरासाय स्वनिर्वाहकत्वम्; इति पक्षद्वये समाने को विशेषोऽभेदपक्षे, येन स परिगृह्यते । समवायस्याप्रामाणिकत्वमिति चेत्, समं विशेषेऽपि । अपर्यायव्यवहारादिना स सिद्ध इति चेत्, तर्हि समवायोऽपि 'इहेदमि'त्यादिना सिद्ध इति तुल्यम् । तदनैकान्तिकमित्युक्तमिति चेत्, अपर्यायव्यवहारादिकमपि घटपटादावनैकान्तिकमिति समानम् । अस्तु तर्हि गुणगुण्यादिभेदे प्रमाणाभावो विशेष इति चेन्न, अभेदेऽपि प्रमाणाभावात् । गवाश्वादिवद्विवेकेनानुपलम्भो अभेदे प्रमाणमिति चेत्, तर्हि व्यपदेशभेदादि भेदे प्रमाणमस्तीति समाधिसाम्यम् । तद्व्यभिचारान्यथासिद्धिभ्यां निरस्तमिति चेत्; अभेदप्रमाणमपि तादृगेव, तस्यापि क्षीरनीरादौ व्यभिचारात्, अयुतसिद्धत्वेनान्यथासिद्धेश्च ॥ तस्मान्निर्निमित्तोऽयमभेदपक्षपात इत्यत आह **कल्पनेति** ।

अनु०— कल्पनागुरुतादोषात्पदार्थान्तरता न हि ।

पदार्थान्तरता गुणगुण्यादीनामिति शेषः । यद्यपि भेदाभेदपक्षयोः स्वनिर्वाहकसमवायविशेषाङ्गीकारेण साम्यं, तथाऽपि भेदपक्षे **कल्पनागुरुतादोषात्** गुणगुण्यादीनां **पदार्थान्तरता न** अङ्गीक्रियते, कल्पनालाघवादभेद एवोपेयत इति ।

परि०— अनैकान्तिकमित्युक्तमितीति । इह तन्तुपटयोः समवाय इत्यादाविति भावः । **घटपटादाविति** । तत्र भेदेनैव तद्व्यवहारो न विशेषेणेति भावः । **व्यभिचारान्यथासिद्धिभ्यामिति** । समवायतद्धर्मेषु व्यभिचारेण भेदप्रतिनिधिविशेषकृतान्यथासिद्ध्या च निरस्तमित्यर्थः । **क्षीरनीरादाविति** । आदिपदेन माषराशिस्थमाष्यादाविति सङ्गृह्यते । तत्र हंसादिकृतविवेकोपलम्भेन भेदस्यैव तत्र सत्त्वेनाभेदस्याभावादिति भावः । **अन्यथासिद्धेश्चेति** । गवाश्वादिवद्विवेकेनानुपलम्भस्येति योज्यम् । तथा च न तस्य गुणगुण्याद्यभेदसाधकत्वमिति भावः । **स्वनिर्वाहकसमवायविशेषेति** । स्वनिर्वाहकयोः समवायविशेषयोरङ्गीकारेणेत्यर्थः ।

यादु०— स्वनिर्वाहकसमवायविशेषेति । स्वनिर्वाहकौ च तौ समवायविशेषौ च, तयोरङ्गीकारेणेत्यर्थः ।

वं०प०— तदनैकान्तिकं इहप्रत्ययस्य न समवायसाधकत्वमिह कुण्डे बदराणीत्यत्र भूतले घटो नास्तीत्यत्र च व्यभिचारादित्यर्थः । **अपर्यायव्यवहारादिकं** विशेषसाधकमिति शेषः । न हि घटपटयोरपर्यायशब्दवाच्यत्वान्यथाऽनुपपत्त्या विशेषः कल्प्यते । तस्मादपर्यायव्यवहारादिना सविशेषः सिद्ध इति न वाच्यमिति भावः । **व्यपदेशभेदादि** अपर्यायशब्दव्यवहारः । **तदिति** । समवायस्य तद्गततत्त्वादिधर्माणां च भेदाभावेऽप्यपर्यायशब्दवाच्यत्वस्य सत्त्वात् समवाये व्यभिचारः । भेदं विना विशेषेणैवापर्यायशब्दव्यवहारोऽन्यथासिद्धश्चेत्यर्थः । **अभेदप्रमाणमपीति** । गवाश्वादिवद्विवेकेनानुपलम्भरूपम् अभेदसाधकं प्रमाणमपि, तादृक् व्यभिचार्यन्यथासिद्धं चेत्यर्थः । व्यभिचारः कुत्रेत्यत आह **तस्यापीति** । **अन्यथासिद्धेः** विवेकेनानुपलम्भस्याभेदसाधकस्य हेतोरभेदं विनाऽयुतसिद्धत्वेनान्यथासिद्धमित्यर्थः ।

कं०रा०— अभेदप्रमाणमपीति । गवाश्वादिवद्यदानुपलम्भरूपमभेदप्रमाणमपि व्यभिचारान्यथासिद्धिभ्यां निरस्तमित्यर्थः । अभेदप्रमाणस्य व्यभिचारान्यथासिद्धी दर्शयति **तस्यापीत्यादिना** । **भेदाभेदपक्षयोरिति** । गुणगुण्यादीनां भेदपक्षे स्वनिर्वाहकसमवायस्याङ्गीकारात् तयोः साम्यमित्यर्थः ।

श्रीनिधि०— स्वनिर्वाहकसमवायविशेषाङ्गीकारेणेति । समवायश्च विशेषश्च समवायविशेषौ स्वनिर्वाहकौ तौ च तथोक्तौ ।

शे०वा०— ननु 'कल्पनागुरुता' इत्युत्तरग्रन्थे गुणगुण्यादीनां पदार्थान्तरत्वाङ्गीकारे कल्पनागौरवं नियामकतया कथ्यते । तदनर्थकम् । न च भेदपरित्यागेनाभेदस्यैव स्वीकाराय भेदाभेदपक्षयोः साम्यशङ्कापरिहारार्थमेतदिति वाच्यम् । प्रापकाभावेन तच्छङ्काया एवानुदयात् । कथञ्चिदुदयेऽपि वा समवायस्य गुणगुणिभेदस्य वाऽप्रामाणिकत्वेनाभेदादेश्च प्रामाणिकत्वेनैव तच्छङ्कापरिहारसम्भवेन तत्परिहाराय कल्पना-

गौरवपर्यन्तधावनानर्थक्यमित्यतोऽत्र निमित्तान्तरेण वैषम्यशङ्कानिरासपूर्वकं साम्यशङ्कामुत्थाप्य तन्निरास-परतयोत्तरग्रन्थं सङ्गमयति **अथाऽपि स्यादित्यादिना** । **व्यवहारनिर्वाहायेति** । इह कुण्डे बदराणीत्यादि-व्यवहारस्य सम्बन्धपूर्वकत्वदर्शनादिह तन्तुषु पट इत्यादिव्यवहारस्यापि तन्तुपटसम्बन्धं विनाऽयोगादन्यस्य चासम्भवादित्यर्थः । **अनवस्थापरिहारायेति** । इह तन्तुषु पट इत्यादिप्रत्ययवत् इह तन्तुपटयोः समवाय इति समवाये इहेदमिति प्रत्ययस्याप्याधाराधेयतया प्रतीयमानयोस्तन्तुपटसमवाययोस्तप्रयोजकसम्बन्धपूर्वकत्वे समवायेऽपि समवायप्रसक्त्याऽनवस्थाप्रसङ्गादिति भावः । **विशेष इति** । अपर्याप्यशब्दवाच्यत्वादेर्भेदकार्यस्य गुणगुण्यादावसता भेदेन कर्तुमशक्यत्वादिति भावः । **अनवस्थेति** । तदीयताया भेदव्याप्तत्वेन विशेषे विशेषानङ्गीकारे विशेषस्य तदीयताया अनिर्वाहादिति भावः । **तादृगेवेति** । व्यभिचारान्यथासिद्धिभ्यां निरस्त-मेवेत्यर्थः । तत्कथमित्यतो तावद्व्यभिचारमुपदर्शयति **तस्यापीति** । अन्यथासिद्धिमप्युपदर्शयति **अयुत-सिद्धत्वेनेति** । **स्वनिर्वाहकसमवायविशेषेति** । स्वनिर्वाहकौ च तौ समवायविशेषौ च, तयोरङ्गीकारेणे-त्यर्थः ।

वा०र०— ननु कल्प इत्युत्तरग्रन्थ इति । अत्र ननु कल्पनागुरुतेत्युत्तरेति पाठः । मूलकोशे तथैव सत्त्वात् । अन्यादृशस्तु लेखकागतः इति बोध्यम् । केचित्तु कल्पनागौरवस्य तत्रैवोपपादनेन प्रतिज्ञा-वाक्यपरित्यागेन उपपादनवाक्यमेवोपात्तमित्याहुः । तन्न । अथापि स्यादित्यादि शङ्कामूलस्य कल्पना गुरुता इत्येतदवतारतया उक्तमूलावतारिकारूपनन्वित्यादेः उत्तरग्रन्थं सङ्गमयन्ति इत्यन्तस्य टीकाग्रन्थस्यापि कल्पना गुरुता इत्येतदनुव्याख्यानसङ्गत्यप्रतिपादकत्वेन कल्पयित्वेति तदुत्तरानुव्याख्यानसम्बन्धित्वाभावात् । पूर्वेणैव सिद्धेः उत्तरग्रन्थेत्यादिना उत्तरटीकाकृतौ वैकल्पयित्वेत्येतत् उत्तरानुव्याख्यानस्य स्वातन्त्र्येणैव वैय्यर्थ्य-शङ्कादेः कृतत्वाच्च । **स्वीकारायेति** । स्वीकाराय यः साम्यशङ्कापरिहारः तदर्थमिति योजना । **निमित्ता-न्तरेणेति** । तेन या वैषम्यशङ्केति योज्यम् । सविशेषश्चेदिति पूर्वत्र स इत्यस्य विचित्रव्यवहारहेतुरित्यर्थ-कथनादत्र तस्येत्यनेन स इत्युक्तस्य विचित्रव्यवहारहेतोरित्यर्थलाभेऽपि समवायस्याप्युक्तहेतुत्वेन प्रकृततया तद्व्यावृत्त्यर्थं विशेषस्येति वक्तव्यत्वमित्याशयेन मूले तस्येति भाष्यपदमनूद्य विशेषस्येति पूरितम् । समवायस्यापि विचित्रव्यवहारहेतुत्वेन प्रकृतत्वे सति विशेषस्यैव कुत उपादानं मूले व्याख्यातमित्यत आह **विचित्रेति** । पूर्वत्रेत्यस्याव्यवहितपूर्वत्रेत्यर्थः । एतेन तस्येति भाष्यपदस्य विशेषस्येति व्याख्यानं मूले कृतमिति प्रतीतिरप्यपाकृता । तथा सति विचित्रव्यवहारहेतोर्विशेषस्येति व्याख्यानापातात् । टीकायामपि विचित्रेत्यादिविशेषणोपादानेनेदमेवाभिप्रेतम् । पूर्वपरामर्शमात्रोपपादनभावे विशेषस्यैवेत्येवावक्ष्यदिति ज्ञेयम् ।

विठ्ठल०— पक्षद्वये समान इति । गुणगुणादिभेदवादिपक्षभेदः समवायः तस्य स्वनिर्वाहकत्वमिति त्रयं स्वीक्रियते । अभेदवादिपक्षे तु अभेदः विशेषः । तस्य स्वनिर्वाहकत्वमित्यर्थत्रयमपि पक्षद्वये समान इत्यर्थः । वैषम्यमाशङ्कते **समवायस्येति** । **अनैकान्तिकत्वमित्युक्तमितीति** । इह तन्तुपटयोः समवाय इत्यादाविति भावः । **घटपटादाविति** । तत्र भेदेनैव तद्व्यवहारो न विशेषेणेति भावः । **व्यभिचारान्यथा-**

सिद्धिभ्यामिति । समवायतद्धर्मेषु व्यभिचारेण भेदप्रतिनिधिकृतविशेषकृतान्यथासिद्ध्या चेति । तथा च साभावानपि कल्पयित्वेत्यत्र सविशेषणे हीति न्यायेन कल्पनमभावमेवोपसङ्क्रामति । षण्णामभावसाहित्य-वचनादभावस्य सप्तमत्वमर्थाल्लभ्यते ततश्च भावाख्यं सप्तमं पदार्थं कल्पयित्वेति मूलार्थः पर्यवसितो भवतीति ज्ञेयम् ।

* * *

॥ अथ तत्राप्यादौ भेदपक्षे कल्पनागौरवस्य अभेदपक्षे च तल्लाघवस्य साधनम् ॥

१३६ **सु०— कथं भेदवादे कल्पनागौरवमित्यत आह कल्पयित्वेति ।**

अनु०— कल्पयित्वा षट्पदार्थान्साभावानपि केवलम् ।
एकस्मिन्स विशेषश्चेत्किं पूर्वं तस्य विस्मृतिः ॥

'केवलमि'त्येतत् 'षडि'त्यनेन 'एकस्मिन्' इत्यनेन च सम्बध्यते । एकस्मिन् समवाये, सः 'विचित्रव्यवहारहेतुश्चेदङ्गीक्रियते' इति शेषः । किं कस्मात् । पूर्वं द्रव्य इत्यर्थः । तस्य विशेषस्य ।

परि०— **'स'** इत्यनुवादः । **'विचित्रे'**ति व्याख्या । **'किमिति, पूर्वमि'**त्यनुवादः । **'कस्मादिति, द्रव्य इति'** च व्याख्या ।

श्रीनिधि०— द्विधाकल्पनप्रदर्शनार्थमाह **केवलमिति** । पूर्वं द्रव्य इति द्रव्यगुणकर्मसामान्येत्यत्र सर्वापेक्षया पूर्वं द्रव्यस्य परिगणितत्वादेवमुक्तं इति भावः ।

शे०वा०— पूर्वेणैव सिद्धेरुत्तरग्रन्थवैय्यर्थ्यमाशङ्क्य प्रतिज्ञातकल्पनागौरवप्रकारदर्शनार्थत्वान्न तदिति भावेन तत्प्रतिपादकतयोत्तरग्रन्थं सङ्गमयितुं तत्कथन्ताशङ्कामुत्थापयति **कथमिति** । **केवलमित्येतदिति** । केवलमित्येकस्मिन्नित्यनेन सन्निधानेऽप्यन्वये योग्यताया एव प्रयोजकत्वेन 'अर्थतो ह्यसमर्थानामानन्तर्य-मकारणमि'ति न्यायेन सन्निधानस्याप्रयोजकत्वाद्योग्यतायाश्च वक्ष्यमाणरीत्योभयत्रापि अविशिष्टत्वात् सम-प्रयोजनत्वाच्चोभयत्र सम्बन्धाश्रयणमिति ध्येयम् । विशेष इत्येतावता पूर्तेः स इति तद्विशेषणवैयर्थ्यमित्याशङ्क्य विशेषस्य विचित्रव्यवहारहेतुत्वसूचनार्थत्वान्न तदिति भावेन स इत्यस्यार्थमाह **स विचित्रव्यवहारहेतुरिति** । **तस्य विशेषस्येति** । विचित्रव्यवहारनिर्वाहकतया विशेषस्यैव पूर्वत्र प्रकृतत्वादिति भावः ।

* * *

॥ अथ तत्रापि उक्तार्थाभिसन्धिः ॥

१३७ **सु०—** अयमभिसन्धिः । व्यपदेशभेदादिप्रमाणमवलम्ब्य वैशेषिकादिभिः द्रव्यादयो भावपदार्थाः षडेव, अभावोऽपि सप्तम' इति कल्पितम्, 'समवाये प्रतीतं तद्गतत्वादिकं तु न समवायातिरिक्तम्, किन्तु स्वभावभेदापरनाम्ना विशेषेणैव तत्र व्यपदेशभेदाद्युत्पत्तिरि'ति च । तत्रान्ततोऽप्यङ्गीकर्तव्येन व्यपदेशभेदादिनिर्वाहकेण विशेषेणैव द्रव्येऽपि तन्निर्वाहो वक्तव्यः, सप्तपदार्थीनिरूपणं न कर्तव्यम् ॥ यद्वा द्रव्यवत्समवायेऽपि तद्गतत्वादीनां भेद एव स्वीकार्यः । तेषां च द्रव्यादिष्वन्तर्भावासम्भवे सप्तपदार्थनियमस्त्याज्यः । विशेषकारणेन विना क्वचिद्भेदस्य क्वचिद्विशेषस्याभ्युपगमे कथं कल्पनागौरवं न स्यात् । तदभावे वाऽभेदवादे कथं कल्पनालाघवं न भवेदिति ।

भेदप्रतीत्यप्रतीतिभ्यां विशेष इत्यादि तु निराकरिष्यते ।

अत्र द्विधाकल्पनप्रदर्शनार्थेनैव पूर्वार्धेन समवाये विशेषस्याङ्गीकर्तव्यताऽपि समर्थिता वेदितव्या । अत एव केवलशब्दसम्बन्धः । सप्तैव हि पदार्थाः । न च तेषु समवायधर्माणामन्तर्भावः सम्भवतीति विशेषा एव तैर(तेऽ)ङ्गीकर्तव्या इति ।

परि०— अस्फुटत्वादाह **अयमभिसन्धिरिति** । ननु व्यपदेशभेदादिति मानस्योक्तत्वात् कथं केवलमित्युक्तिरित्यतस्तस्यान्यथासिद्धिमाह **व्यपदेशेति** । केवलपदमेवशब्दार्थमित्युपेत्योक्तं **षडेवेति** । साभावानपीत्यस्य तात्पर्यम् **अभावोऽपि सप्तम इतीति** । अयमितिशब्दः षडेवेत्यत्रान्वेति । सप्तमत्वकल्पनायामेव तात्पर्यमिति ज्ञापनाय सप्तम इत्युक्तिः । अभावस्य प्रामाणिकत्वात् । तृतीयपादाशयः **समवाय इत्यादि** । **इति चेति** । कल्पितमित्यनुषङ्गः । चतुर्थपादतात्पर्यं **तत्रान्ततोऽपीत्यादि** । **सप्तपदार्थीति** । समाहारद्विगुः । द्विगोरिति ङीप् । ननु सप्तपदार्थ्या अन्योन्यं भेदः प्रतीयते । समवायधर्मेषु नैवमितीदमेव विशेषकारणमित्यत आह **भेदप्रतीतीति** । 'अभेदेन प्रतीतिश्चेदि'त्यादिव्याख्यावसरे आदिपदोपात्तं समवायस्य प्रामाणिकत्वं विशेषस्याप्रामाणिकत्वं च ततः समीपग्रन्थ एव निरसिष्यत इत्यर्थः । ननु समवायधर्माणां तद्विशेषत्वाङ्गीकारोऽसिद्धः येन द्रव्यादिषु भेदोऽभेदश्च समवायतद्धर्माणामिति द्विधाकल्पनादत्र गौरवमित्यत आह **अत्र द्विधेति** । **पूर्वार्धेनेति** । कल्पयित्वेत्यर्धेनेत्यर्थः । **समर्थितेति** । एवार्थककेवलपदेन तदङ्गीकारे युक्तेः सूचनादिति भावः । **समवाये विशेषस्येति** । समवायधर्माणां समवायस्वभावविशेषत्व-

स्याङ्गीकर्तव्यतापीत्यर्थः । **अत एवेति** । एवमुक्तार्थस्य समर्थनीयत्वादेव । केवलं षट् षडेव भावपदार्थाः इत्यर्थकथनाय केवलपदान्वयः अन्यथा तत्पदं व्यर्थमेव स्यादिति भावः । समर्थन-प्रकारमेव व्यनक्ति **सप्तैवेति** । केवलशब्दार्थः **एवेति** । **विशेषा एवेति** । समवायधर्माः समवाय-स्वभावविशेषा एवेत्यर्थः ।

यादु०— अभावोऽपि सप्तम इति । अनेन साभावानपीत्यपिशब्दः कल्पयित्वेत्यस्यानुकर्षणार्थः । एवं चाभावसहितेषु विधीयमानं कल्पनं सविशेषणे हीति न्यायेनाभावमेवोपसङ्क्रामति । षट्सु चाभावसाहित्य-वचनेऽभावस्य सप्तमत्वमर्थाल्लभ्यते । ततश्चाभावं सप्तमं कल्पयित्वेति मूलार्थ उक्तो भवतीति ज्ञातव्यम् । तर्हि व्यपदेशभेदादिकं कथमुपपद्यत इति पृच्छति **किन्त्विति** । उत्तरमाह **स्वभावभेदेति** । ननु गुणगुण्यादौ भेदः प्रतीयते न समवायतद्गतत्वादावतो विशेष इत्यत आह **भेदप्रतीत्यप्रतीतिभ्यामिति** । आदिपदेन समवायस्य बहुप्रमाणसिद्धत्वं न विशेषस्येत्यादिर्विशेषो ग्राह्यः । **निराकरिष्यत इति** । अनुपदमेवेति शेषः । **द्विधा-कल्पनेति** । गुणगुण्यादौ समवायतद्गतत्वादौ च गौरवोपपादनायोक्तरीत्या द्विधाकल्पनप्रदर्शनार्थेनेत्यर्थः । **समर्थितेति** । समर्थनयुक्तिः सूचिता वेदितव्येत्यर्थः । **अत एवेति** । समर्थनयुक्तेः सूचनीयत्वादेवेत्यर्थः । अन्यथा न केवलशब्देन कृत्यमिति भावः । युक्तिसूचनाप्रकारमेवाह **सप्तैवेति** । **विशेषा एवेति** । समवाय-विशेषा एवेत्यर्थः ।

वं०प०— स्वभावभेदेति । स्वभावविशेषेत्यर्थः । ननु भेदाङ्गीकारे द्रव्यादिष्वन्तर्भावो न सम्भवती-त्यभेदः स्वीकार्य इति चेत् तत्राह **तेषां चेति** । **क्वचिद्** गुणगुण्यादौ । **क्वचित्** समवायनिष्ठे तद्गतत्वादौ । अभेदवादे तदभाव इत्यन्वयः । अभेदपक्षे तत्कल्पनागौरवस्याभावे च सतीत्यर्थः । ननु गुणगुण्यादौ भेदस्य प्रतीयमानत्वात् तमङ्गीकृत्य समवायोऽङ्गीकार्यः । तद्गतत्वादेः समवायेन भेदस्य अप्रतीयमानत्वात् समवाय-मनङ्गीकृत्य विशेष एवाङ्गीकार्य इत्यस्त्येव विशेषकारणमित्याशङ्क्य निषेधति **भेदेति** । प्रत्युत गुणादे-र्गुण्यादिनाऽभेद एव प्रतीयते न भेद इति वक्ष्यामः ।

श्रीनिधि०— न समवायातिरिक्तं किन्त्विति । अत्र समवायाभिन्नमिति शेषः । **निराकरिष्यत इति** । 'अभेदेन प्रतीतिश्च कार्यकारणपूर्विके' इत्यत्रेति भावः । ननु तेन पदार्थानां साप्तविद्यामङ्गीकारेण भेद एव कल्पितो न विशेषः । तथा च कथं कल्पनागौरवम् । कल्प्यानेकत्वे हि कल्पनागौरवमेवेत्यत आह **अत्र द्विधाकल्पनप्रदर्शनार्थेनेति** । आपाद्यदूषणमेतदिति भावः । **अत एव** । विशेषस्याङ्गीकर्तव्यतासमर्थन-स्योद्दिष्टत्वादेव । केवलशब्दसम्बन्धकृत इति शेषः । कथं केवलशब्दसम्बन्धेन तत्समर्थनमित्यतस्तद्दर्शयति **सप्तैव हीति** । **समवायधर्माणाम्** अस्तित्वतद्गतत्वादीनाम् ।

शे०वा०— नन्वेतावताऽपि कथं भेदपक्षे कल्पनागौरवसिद्धिः, अभेदपक्षे च तल्लाघवसिद्धिरित्यत-स्तदुभयं दर्शयितुमाह **अयमभिसन्धिरिति** । **षडेवेति** । इति कल्पितमिति वक्ष्यमाणेन सम्बधः । एतच्च कल्पयित्वा षट्पदार्थानित्यस्य तात्पर्यकथनम् । अनेन च द्रव्यादिभावपदार्थान् षडेवेति कल्पयित्वेत्युद्देश्य-विधेयभावेन मूलयोजना सूचिता भवति । **अभावोऽपीति** । एतच्च साभावानपीत्यस्य तात्पर्यकथनम् । साभावानपि षट्पदार्थान्कल्पयित्वेत्येकवाक्यतया योजनायां कृष्णासहिता षट् पाण्डवा इत्यादाविवाभावस्यैव षष्ठत्वस्य प्राप्त्या सप्तपदार्थीनियमकल्पनाऽलाभात् तल्लाभाय 'अपिः पदार्थसम्भावने'त्यभियुक्तोक्तेर्मधुनाऽपि स्यादित्यादौ तदर्थतया दर्शनाद्देवानामपि पूर्यत इत्यादौ टीकाकारैरपि (उपासनापादे) तदाश्रयणाच्चेहाप्यपि-शब्दो योग्यस्याभावनिष्ठसप्तम्यरूपार्थान्तरस्य प्रतिपादक इति भावेन 'अभावोऽपि सप्तम इति कल्पितमि'ति वाक्यभेदाश्रयणमिति ध्येयम् । केचित्तु साभावानपीत्यपिशब्दः कल्पयित्वेत्यस्यानुकर्षणार्थः । एवं च अभाव-सहितान् कल्पयित्वेति वचनव्यक्तिपर्यवसानादभावसहितेषु द्रव्यादिषु विधीयमानं कल्पनं 'सविशेषणे ही'ति न्यायेन विशेषणमभावमुपसङ्क्रामति । तत्र द्रव्यादीनां षण्णामभावसाहित्यवचनेऽभावस्य सप्तमताया अर्था-ल्लाभात्सप्तम इत्युक्तम् । अभावोऽपीत्यपिशब्दस्य तु न केवलं द्रव्यादयो भावपदार्थाः षडेवेत्येव कल्पितं किन्त्वभावोऽपि सप्तम इति कल्पितमिति सम्बन्धः । ततश्चाभावं सप्तमं कल्पयित्वेति योजना सूचिता भवतीत्यभिप्राय इत्याहुः । कथं तर्हि व्यपदेशभेदाद्युपपत्तिरिति पृच्छति **किन्त्विति** । उत्तरमाह **स्वभावेति** । इति चेत्यतःपरं कल्पितमिति शेषः । अस्त्वेवं ततः किमित्यत आह **सप्तेति** । तथा सति गुणक्रियादीनां द्रव्यादिरूपत्वापत्त्या गुणक्रियादिरूपपदार्थान्तरविरहप्रसङ्गात् सप्तैव पदार्था इति नियमभङ्गप्रसङ्ग इत्यर्थः । रीत्यन्तरेणापि सप्तपदार्थनियमभङ्गमुपपादयति **यद्वेति** । अस्त्वेवं ततः किमित्यतः तथा सति तेषां द्रव्यादि-ष्वन्तर्भावासम्भवात् पदार्थान्तरत्वप्रसङ्गेन पदार्थानामधिकसङ्ख्यावत्त्वप्रसङ्गात् सप्तैव पदार्था इति नियमभङ्ग एवेत्याह **तेषां चेति** । **क्वचिद्भेदस्येति** । द्रव्यस्य गुणक्रियादिभिर्भेदस्येत्यर्थः । **क्वचिद्विशेषस्येति** । सम-वायस्य तद्गतत्वादिना सविशेषाभेदस्येत्यर्थः । ननु गुणगुण्यादौ भेदः प्रतीयते न समवायतद्गतत्वादौ अतो भेदप्रतीत्यप्रतीतिलक्षणविशेषकारणसद्भावात् समवायवद्विशेषस्य बहुप्रमाणसिद्धत्वाभावेन बहुप्रमाणसिद्धत्व-तदसिद्धत्वलक्षणविशेषकारणसद्भावाच्च न तदभाव इत्यत आह **भेदप्रतीत्यप्रतीतिभ्यामिति** । **निराकरिष्यत इति** । अनुपदमेवेति शेषः । **द्विधाकल्पनेति** । गुणगुण्यादौ समवायतद्गतत्वादौ च गौरवोपपादनायोक्तरीत्या द्विधाकल्पनप्रदर्शनार्थेनेत्यर्थः । **समर्थितेति** । समर्थनयुक्तिः सूचिता वेदितव्येत्यर्थः । **अत एवेति** । तत्समर्थनयुक्तिसूचनार्थमेवेत्यर्थः । अन्यथा न तेन किञ्चित्कृत्यमिति भावः । सूचितां युक्तिमेवाह **सप्तैवे-त्यादिना** ।

वा०र०— अपिः पदार्थसम्भावनेत्यभियुक्तोक्तेरिति । अपिः पदार्थसम्भावनान्वयसंसर्गगर्वसमुच्चयेषु इति प्रथमस्य चतुर्थे पाणिनिना अप्रयुज्यमानस्य पदान्तरस्यार्थलक्षणपदार्थे अपिशब्दस्य वृत्तेरुक्तत्वादित्यर्थः ।

मधुनोऽपीत्यादि । अत्र तदर्थतायाः इत्यादौ तच्छब्देनाभियुक्तोक्तेः इत्यनेनोक्ता अप्रयुज्यमानपदस्यार्थलक्षण-पदार्थपरिग्रहः । यद्वार्थान्तरस्येति वक्ष्यमाणतया बुद्धिप्रकृतस्याप्रयुज्यमानपदार्थभूतार्थान्तरस्य परामर्श इति न दोषः । मधुनः अपि मात्राबिन्दुरिति यावत् । **इत्यादौ** इत्यादिपदेन सर्पिषोऽपि स्यात् इत्यादेर्ग्रहणमिति द्रष्टव्यम् । **देवानामपि पर्युत इत्याविति** । देवानामपीत्यत्रापिशब्दस्य अप्रयुज्यमानशङ्कापदस्यार्थभूता-शङ्कार्थतायाः मूलकारोक्तरीत्या दर्शनादित्यर्थः । **टीकाकारैः** मूलकारैः । एतच्च तृतीयस्य देवानामपि पूर्यते इत्येतदनुव्याख्यानव्याख्यानरूपमूले स्पष्टम् । तदुपपादनं च टीकोक्तरीत्या उत्तरत्रैव ज्ञेयम् । **अर्थान्तरस्येति** । सप्तम इत्येतत्पदार्थभूतस्येति शेषः । **तथा सति गुणेति** । विशेषेणैव व्यपदेशाभेदाच्च इति चेत् द्रव्येऽपि निर्वाहाङ्गीकार इत्यर्थः । मूले **तदभाव इति** । उक्तोऽभ्युपगमाभावः इत्यर्थः । वाशब्दस्य कथं वा न भवेत् इति सम्बन्धः । **ननु गुणगुण्यादावित्यादि** । ननु नेयं शङ्का युक्ता । भेदप्रतीतिः प्रत्यक्षादिप्रमाणाभावेन नास्तीति गुणगुण्यादीनां समवायः तद्गतत्वादीनां च विशेष इति प्रागेव न ततोऽनन्तेतिवाक्यव्याख्याना-वसरेऽभिहितमिति तन्निराकरणस्य वक्ष्यमाणत्वस्यैव मूलेऽनुपपत्तिरिति चेत् न । अत्र भेदप्रतीत्यप्रतीत्यो-रुपलक्षणयाऽभेदाप्रतीतिपरत्वेन गुणगुण्यादावभेदाप्रतीतेश्चाभेदेन प्रतीतेश्च इत्युत्तरानुव्याख्यानव्याख्याननिरा-करणेऽपि प्रागनिवारणात् न दोषः । एवं चात्रापि टीकावाक्ये भेदः प्रतीयते इत्यादेरभेदो न प्रतीयते, प्रतीयते च समवायः तद्गतत्वादौ इत्येवंरूपेण व्याख्या द्रष्टव्या । यद्वा मूलेऽतद्गुणसंज्ञानबहुव्रीहिणा बहुप्रमाणसिद्ध-त्वाभ्यां विशेषस्यैव ग्रहणम् । टीकाकृता तु तथात्वस्य मूल एव स्पष्टत्वाभिप्रायेण वृत्त्यन्यपदार्थमात्रप्रदर्शनं कृतमित्यदोषः । **बहुप्रमाणेति** । अत्र बहुपदमनेकत्वोपलक्षणम् । प्रत्यक्षार्थापत्त्योरेव उत्तरत्र कथनात् इति बोध्यम् । भेदप्रतीत्यप्रतीतिभ्यामिति इति प्रतीकोपादानानन्तरं गुणगुण्यादौ भेदप्रमाणाभावोक्तिपूर्वकमभेद-प्रतीतेरसद्भावोपपादकाभावेन प्रतीतिश्च कार्यकारणपूर्वके इत्याद्युत्तरानुव्याख्यानव्याख्यानावसरे गुणगुण्यादावभेद-प्रतीतिसमर्थनात् गुणगुण्यादौ तदप्रतीतिः समवायतद्गतत्वादौ च तत्प्रतीतिरिति वैषम्यायोग इति निराकरिष्यते । आदिपदोपात्तः प्रामाणिकत्वाप्रामाणिकत्वाभ्यां विशेषस्तु 'येन प्रत्यक्षसिद्धेनेति' इत्येतद्व्याख्यानार्थं प्रवृत्तेन तदुक्तविशेषप्रामाणिकत्वोपयोगि तदप्रामाणिकत्वशङ्कोत्थापकतया समवायाप्रामाणिकत्वस्य उक्तत्वेन प्रामाणिक-त्वाप्रामाणिकत्वाभ्यां विशेषस्य वैपरीत्यमिति निराकरिष्यत इति पूरणीयम् । **द्विधाकल्पनप्रदर्शनार्थेनेत्यर्थ इति** । ननु यद्यपि पूर्वार्ध एव पदार्थाः षडेवेति विकल्पितं अभावोऽपि सप्तम इति च कल्पितमिति कल्पना-द्वैविध्यप्रदर्शनपरतया व्याख्यात इति द्विधाकल्पनग्रहणेनोत्तरापेक्षा । तथापि तत्र एकवाक्यतया योजनानुपपत्त्या वाक्यभेदाश्रयणेऽपि वस्तुतः तत्कल्पनद्वयं मिलित्वा एककल्पनमेव । विशेषाभावस्थलत्वात् अपरं तु कल्पनं एकस्मिन्नविशेषश्चेत् इत्युक्तमेव । अत एव द्विधा कल्पनागौरवोपपादनाय क्वचिद्भेदस्य क्वचिद्विशेषस्येत्येव कल्पनाद्वयमभिहितं मूले । तादृशकल्पनाद्वयाभावादेव तल्लाघवं स्वपक्षे उक्तं मूले । ततश्च मूलानुसारी द्विधाकल्पनस्यैव ग्राह्यत्वात् न तत्प्रदर्शकत्वं पूर्वार्धमात्रस्येति कथं मूले तत्त्वोक्तिः कथं चात्र टीकायां तदुक्तिरिति चेत् अत्र ब्रूमः । सत्यं द्विधा कल्पनं मूलानुसार्येव ग्राह्यमिति, किन्तु उत्तरार्धपूर्वपादसहितेन

पूर्वार्धेन द्विधा कल्पनं प्रदर्शितं भवति इत्यत्र ग्रन्थकृतः तात्पर्यात् न दोष इति । केचित्तु सोत्तरपादेनेति शेषं पूरयन्ति ।

स०व्र०— अभावोऽपि सप्तम इतीति । अत्र साभावानपि षट्पदार्थान्, इत्यन्वये अभावस्यैव षष्ठत्वं प्राप्नोति । अतः 'अपिस्सम्भावना' इत्युक्तेः 'मधुनोऽपि स्यात्' इत्यादाविव अपिशब्दः सप्तम इत्यस्यार्थान्तरस्य योग्यस्य प्रतिपादक इति भावः । ननु गुणगुण्यादौ भेदस्य समवायतद्गतत्वादौ च विशेषस्याभ्युपगमेऽपि न कल्पनागौरवम् । द्रव्यस्य गुणादिना भेदस्यैव मानान्तरेण सिद्धत्वेन तस्यैव व्यपदेशभेदादिनिर्वाहकत्वौचित्यात् तद्गतत्वादेश्च समवायेन भेदस्यासिद्धत्वेन वैचित्र्योपपत्तेरित्यत आह **भेदप्रतीत्यप्रतीतिभ्यां विशेष इतीति** ।

स०ना०— अत एव केवलशब्दसम्बन्ध इति । समवाये विशेषाङ्गीकारसमर्थनार्थमेव अवधारणार्थे न केवलशब्देन षडित्यस्य सम्बन्धः कृतः । तदेव दर्शयति **ससैव हीति** ।

विट्ठल०— तद्गतत्वादेः समवायानतिरिक्तत्वे कथं व्यपदेशभेदादिकमिति पृच्छति **किन्त्विति** । उत्तरमाह **स्वभावभेदेति** । उपपत्तिरिति चेत्यतःपरं स्वीकृतमिति ग्राह्यम् । एवं सति गौरवं स्पष्टमित्याह **तत्रान्तत इति** । वक्तव्य इत्यतःपरं लाघवादिति शेषः । किं पूर्वं तस्य विस्मृतिरित्यनेन सूचितं गौरवमभिधाय कल्पयित्वेत्यादिना सूचितमपि वक्तुमाह **यद्वेति** । **तदभाव इति** । क्वचिद्भेदः क्वचिद्विशेषः इत्यभ्युपगमाभावे सर्वत्र विशेषाभ्युपगम इति यावत् । ननु गुणगुण्यादिषु भेदप्रतीतेः सप्तपदार्थकल्पनं समवाये तद्गतत्वादिधर्माणां भेदाप्रतीतेर्विशेषकल्पनमित्यत आह **भेदप्रतीत्यप्रतीतिभ्यामिति** । आदिपदेन समवायस्य प्रमाणसिद्धत्वं न विशेषस्येति विशेषसङ्ग्रहः । **निराकरिष्यत इति** । अनुपममेवेति शेषः । परेण समवाये विशेषस्यानभ्युपगमात् कथं गौरवोपपादनमित्यत आह **द्विधाकल्पनेति** । द्रव्यादिगतानां तद्गतत्वादीनां भेदः समवायगतानां समवायत्वभेद इति द्विधाकल्पनप्रदर्शनार्थेनेत्यर्थः । **अत एवेति** । समर्थनयुक्तेः सूचयनीयत्वादेवेत्यर्थः । सम्बन्धषडित्यनेनेत्यर्थः । केवलशब्दसूचितां समर्थनयुक्तिं दर्शयति **ससैवेति** । एवेति केवलशब्दार्थः । **विशेषा एवेति** । समवायस्वरूपविशेषा एवेत्यर्थः ।

॥ इति उक्तार्थाभिसन्धिः ॥

॥ इति भेदपक्षे कल्पनागौरवस्य अभेदपक्षे च तल्लाघवस्य साधनम् ॥

* * *

॥ अथ तत्र चान्ते भेदपक्षमपहायाभेदपक्षपाते न केवलं कल्पनागौरवं कारणम् अपि तु समवाये प्रमाणाभावोऽपि तत्र कारणम् ॥

॥ अथ तत्र समवायनिराकरणम् ॥

॥ अथ तत्रादौ समवायस्य स्वरूपतो निराकरणम् ॥

॥ अथ तत्राप्यादौ समवाये (प्रत्यक्षानुमान)प्रमाणाभावः ॥

१३८ सु०— न केवलं सर्वथाऽङ्गीकार्येण विशेषेणैव गुणगुण्यादिव्यपदेशभेदाद्युपपत्तौ द्रव्यभेदमङ्गीकृत्य समवाय (एव) एकस्मिन्विशेषाभ्युपगमे कल्पनागौरवमिति भेदमतमपहार्याभेदपक्षपातः क्रियते, किन्तु समवाये प्रमाणाभावादपि ।

परि०— कल्पयित्वेति कल्पनापदस्वारस्यं केवलपदस्य मानेन विनेत्यर्थान्तरं चाप्युपेत्याह **न केवलमिति** । क्रियत इत्यनेनान्वयः ।

शे०वा०— ननु विशेषस्य 'येन प्रत्यक्षसिद्धेने'त्यादिना प्रत्यक्षादिसिद्धत्वमुच्यते तदनर्थकम् । न च विशेषस्याप्रामाणिकत्वशङ्कानिरासार्थं तदिति वाच्यम् । प्रसञ्जकाभावेन तदप्रामाणिकत्वशङ्काया एव परस्यानुदयेन तन्निरासार्थत्वायोगात् । न च समवायाप्रामाणिकत्वोक्तिरेव तत्प्रसञ्जिकेति वाच्यम् । तदप्रामाणिकत्ववर्णनस्यापि प्रकृतोपयोगादर्शनेन सिद्धान्तिना तस्यावक्तव्यत्वेन तदुक्तेरप्यसिद्धया तस्यास्तत्प्रसञ्जकत्वायोगात् । न च भेदपरित्यागेन द्रव्यस्य गुणाद्यभेदपक्षपरिग्रहसिद्धिरेव तदप्रामाणिकत्वोक्तिप्रयोजनमिति वाच्यम् । भेदपक्षे कल्पनागौरवस्य तदभेदपक्षे तल्लाघवस्य च कल्पयित्वेत्यादिपूर्वग्रन्थ एवोपवर्णितत्वेन तत एव तत्सिद्धया तदर्थत्वायोगादित्यतो न केवलं भेदपक्षे कल्पनागौरवात् तत्त्यागेन तल्लाघवादभेदपक्षपरिग्रहः । किन्तु समवायस्याप्रामाणिकत्वादपीत्येवं युक्त्यन्तरपरतया सिद्धान्तिनः समवायाप्रामाणिकत्ववर्णनस्य सङ्गतत्वेन तस्यैव च विशेषाप्रामाणिकत्वशङ्काप्रसञ्जकतया तच्छङ्कायाः सम्भावितत्वेन तन्निरासार्थत्वात् तत्प्रामाणिकत्ववर्णनस्य न तत्परोत्तरग्रन्थस्यासङ्गतिरित्यभिप्रेत्योक्तरीत्या तद्योजयितुं वृत्तानुवादपूर्वकं समवायाप्रामाणिकत्वोक्तिं तावत् पूरयति **न केवलमित्यादिना** ।

वा०र०— न केवलं इत्यादिग्रन्थस्य पूर्वशेषत्वभ्रान्तिवारणाय येन प्रत्यक्षेत्युत्तरानुव्याख्यानशेषत्वमिति दर्शयितुं तद्भाष्यवैय्यर्थ्यशङ्कामुखेन एतद्ग्रन्थस्य तच्छेषत्वमाह **ननु विशेषस्य येनेत्यादिना** । समवायाप्रामाणिकत्वोक्तिः पूरितत्वात् उत्तरानुव्याख्यानस्य विशिष्टार्थप्रतिपादकत्वादेव सिद्धान्तिना सिद्धान्तिनः इति पदाभ्यां भाष्यकारग्रहणं कृतम् । अत एवोत्तरत्र विशिष्य निरासोऽपि भगवता भाष्यकारेण कर्तव्यः स्यात् इत्युक्तम् । 'येन प्रत्यक्षसिद्धेन' इत्येतदवतारमूलावतारेऽपि एवमभेदेत्यादिकं टीकायां उक्ताशयेन एवेति ध्येयम् ।

* * *

॥ अथ च तत्रादौ समवाये न प्रत्यक्षं प्रमाणम् ॥
॥ अथ च तत्र उक्तार्थसमर्थनम् ॥
॥ अथ च तत्राप्यादौ समवायाप्रतीतेः संयोगप्रतीतिसाम्याभावः ॥

१३९ सु०— तथा हि । न तावत् तत्र प्रत्यक्षं प्रमाणम्, कुण्डदध्नोः संयोग इतिवत् तन्तुपटयोः समवाय इत्यप्रतीतेः । सम्बन्धप्रतीतिरेव तत्प्रतीतिरिति चेन्न । तस्या असम्मतेः ।

परि०— तस्या इति । सम्बन्धप्रतीतेरित्यर्थः । तयोरभेदादिति भावः ।

यादु०— असम्मतेरिति । तन्तुपटयोरभेदेन सम्बन्धस्यैवाभावादिति भावः ।

वं०प०— एकस्मिन्नेव समवाय इत्यन्वयः । **सम्बन्धप्रतीतिरेवेति** । तन्तुपटयोः समवाय इति प्रतीत्यभावेऽपि तन्तुपटयोः सम्बन्ध इति सम्बन्धप्रतीतिरेव समवायप्रतीतिरित्यर्थः । **तस्या इति** । सम्बन्धप्रतीतेरित्यर्थः । तयोरभेदाङ्गीकारादिति भावः ।

कं०रा०— ननु तन्तुपटयोः समवाय इत्यप्रतीतावपि तयोः सम्बन्धप्रतीतिस्तावदस्ति । तस्यैव च समवायप्रतीतिरिति प्रत्यक्षमेव समवाये प्रमाणमिति शङ्कते **सम्बन्धप्रतीतिरेवेति । तस्या इति** । तन्तुपटयोः सम्बन्धप्रतीतिरेवासम्मतेरित्यर्थः ।

श्रीनिधि०— तस्या असम्मतेरिति । सम्बन्धप्रतीतेरित्यर्थः ।

शे०वा०— ननु च प्रतिज्ञामात्रस्यासाधकत्वात् समवायसाधकप्रमाणानां विशिष्यानिरासेन तदसिद्धेः तत्साधकप्रमाणानां विशिष्य निरासोऽपि भगवता भाष्यकारेण कर्तव्यः स्यादिति तदनिरासो दोष इत्यतः स्पष्टतया शिष्यैरेव ज्ञातुं शक्यत्वान्न स दोषायेत्याशयेन स्वयं तन्निराकर्तुं प्रतिजानीते **तथा हीति** । समवाये प्रमाणं भवत् किं प्रत्यक्षम्, उत अनुमानमिति विकल्पं मनसि निधायाद्यं दूषयति **न तावदिति** । उत्तरानुमानस्यापि निरासात् तावदित्युक्तम् । तत्कथमित्यतः किमत्र क्लृप्तं प्रत्यक्षं, तत्साधकतयाऽभिमतं किंवा कल्प्यम् । आद्येऽपि किं तस्य साक्षात्समवायगोचरत्वमभिमतं, किंवा सम्बन्धमात्रगोचरस्यापि तस्य पर्यवसानगत्या तद्गोचरत्वमिति विकल्पान् मनसि निधायाद्यं प्रत्याचष्टे **कुण्डेति** । उपलक्षणं चैतत् । इमौ संयुक्ताविवदिमौ समवेताविवत्यप्रतीतेरित्यपि द्रष्टव्यम् । **अप्रतीतेरिति** । न च प्रतीत्यभावोऽसिद्धः । समवायं जानामीत्यनुव्यवसायाभावादेव तत्सिद्धेरिति भावः । आद्ये द्वितीयमाशङ्कते **सम्बन्धप्रतीतिरेवेति** । इह तन्तुषु पट इति तन्तुपटयोः, रूपी घट इति घटरूपयोश्च सम्बन्धप्रत्यक्षप्रतीतेरेवेत्यर्थः । तन्तुपटयोर्घटरूपयोश्च सम्बन्धान्तरानुपपत्त्या भासमानसम्बन्धस्य समवायत्वे पर्यवसानादिति भावः । अभाववद्भूतलमित्यादिसम्बन्ध-

प्रतीतिवत् स्वरूपसम्बन्धविषयत्वसम्भवेन भासमानसम्बन्धस्य समवायत्वे न पर्यवसानमिति सत्येव दोषे वस्तुस्थितिमनुरुध्याह **तस्या असम्मतेरिति** । तन्तुपटादेरभेदवादे सम्बन्धस्यैवाभावात् तत्प्रतीतेरभावादिति भावः ।

वा०र०— स्वयं तन्निराकर्तुमिति । यद्यपि उत्तरत्र प्रमाणं भवत् किं प्रत्यक्षं उतानुमानं इति विकल्पप्रदर्शनानुसारेण उत्तरनिराकरणानुसारेण च प्रमाणद्वयस्यैव शङ्कानिरासोऽत्र टीकायां प्रतीयते । आगमस्तु असम्भावितो न निराकृतश्चेति बहुवचनायोगः । तथापि अनुमानबाहुल्यात् बहुवचनमित्यत्र तात्पर्यमित्यदोषः । एवं प्रमाणानामिति पूर्वप्रयुक्तबहुवचनमुपपाद्यम् । **क्लृप्तमिति** । सिद्धमित्यर्थः । **कल्प्यमिति** । अनुमानेन साधितमित्यर्थः । **आद्यं प्रत्याचष्टे इति** । साक्षात्समवायगोचरं प्रत्यक्षमाद्यमित्यर्थः । उपलक्षणं चेदम् । मूलम् । इमौ संयुक्तौ इत्यादिवत् इमौ समवेताविति वा अनयोः समवायः इति वा ननु भगवान् इत्यादिकमपि तर्कताण्डवानुसारेण ज्ञेयमित्याह **उपलक्षणं चैतत् इति** । सम्बन्धप्रत्यक्षप्रतीतिरेव इत्यर्थ इति पाठः । ग्रन्थकाराचातुर्यं निमित्तोक्त्या परिहरन्नवतारयति **अभाववदिति** ।

विट्ठल०— असम्मतेरिति । 'तन्तुभ्योऽन्यः पटः साक्षात्कस्य दृष्टिपथं गत' इत्युक्तेः सम्बन्धस्यैवाभावादित्यर्थः ।

॥ इति समवायाप्रतीतेः संयोगप्रतीतिसाम्याभावः ॥

* * *

॥ अथ च तत्रान्ते समवायप्रत्यक्षत्वस्य अनुमानसाध्यत्वानुपपत्तिः ॥

१४० सु०— एतेन 'अयं तन्तुपटसम्बन्धप्रत्ययश्चक्षुर्जन्यो अनन्यथासिद्धतदन्वयव्यतिरेकानुविधायित्वात् पटप्रत्ययवत्, अयं तन्तुपटयोः सम्बन्धो योगजधर्माजन्यजन्यसाक्षात्कारविषयस्तन्तुपटसम्बन्धत्वादेतत्तन्तुपटान्तरसंयोगवदि'ति समवायप्रत्यक्षतासाधनमप्यपास्तम्, तन्तुपटसम्बन्धतत्प्रत्यययोः असिद्ध्या आश्रयासिद्धेः । सम्बन्धाप्रतीतौ 'शुक्लः पट' इति सामानाधिकरण्यप्रतीतिर्न स्यात् । दण्डीकुण्डलीत्यादौ तस्य तत्पूर्वकत्वदर्शनादिति चेन्न, समवायोऽस्तीत्यादौ व्यभिचारात् ।

परि०— अयमिति । अयुतसिद्धतन्तुपटसम्बन्धप्रत्ययलाभायायमित्युक्तिः । अन्यथाऽर्थान्तरतापत्तेः । एवमग्रेऽपि । अयं पर्वतोऽग्निमानित्याद्यनुमित्यादावव्यभिचारायानन्यथासिद्धेति च हेतुविशेषणम् । द्वितीयप्रयोगे ईश्वरप्रत्यक्षत्वेन योगजप्रत्यक्षत्वेन चार्थान्तरतावारणाय जन्येति

योगजधर्माजन्येति च साध्यविशेषणे । शङ्कते **सम्बन्धेति** । 'गुणवचनेभ्यो मतुपो लुबिष्ट' इति मतुपो लोपेन वा अर्श आद्यच्प्रत्ययान्तत्वेन वा शुक्ल इत्यस्य शुक्लवानित्यर्थः । **सामानाधिकरण्येति** । गुणजात्योरेकपटरूपद्रव्यविशेष्यकत्वधीर्न स्यादित्यर्थः । **दण्डी कुण्डलीति** । देवदत्त इति विशेष्यं ज्ञेयम् । **समवाय इति** । समवायत्वास्तित्वयोरेकविशेष्यकत्वप्रतीतावपि सम्बन्धप्रमितिपूर्वकत्वाभावादित्यर्थः । **समवायप्रत्यक्षनिरासः ॥**

गु०दी०— आश्रयासिद्धेः इत्युपलक्षणम् । संयोगातिरिक्तसम्बन्ध एव विवदमानं प्रति सम्बन्ध एव साधनीयः । तस्य प्रत्यक्षतासाधनं त्वनुत्पन्नबालस्य नामकरणमिवासङ्गतम् । अन्यथा तस्यैव घटस्य तेनैव सम्बन्धोऽपि कुतो न प्रत्यक्षोऽनुमीयते । किञ्च तन्तुपटयोरत्यन्तभेदवादिनाऽपि 'धर्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः' इत्यादिवचनेष्वेकस्थानगतत्वादिसम्बन्धविशेषस्यैव समवायतया व्यवहरणादिहापि संयोगविशेषस्यैव कुतो नैतत्प्रत्यक्षम् । 'अवश्यमेकपराश्रितमेवावतिष्ठत' इति नियमस्य नियमेन स्तम्भाश्रितगृहेषु जलाश्रितमीनेषु विश्वरूपाख्यभगवन्मूर्तावाश्रितत्रैलोक्ये च समवायाकल्पकत्ववदिहापि तदकल्पकत्वेनार्थान्तरत्वात् । तव मते नित्यानां घटत्वादिजातीनां घटादिव्यक्तावाश्रितत्वनियमाभावेन समवायेऽप्युक्तलक्षणभङ्गाच्चेत्यपि द्रष्टव्यम् । **सम्बन्धाप्रतीतौ शुक्लः पट इति सामानाधिकरण्यप्रतीतिः** इत्यत्र सामानाधिकरण्यप्रतीत्याऽपि कृष्ण एव राम इत्यादिवदभेद एवोल्लिख्यते । न तु तयोस्सम्बन्धः । अन्यथा दण्डी देवदत्त इतिवद्दण्डो देवदत्त इत्यपि कुतो न प्रतीतिरित्यर्थः ।

यादु०— सामानाधिकरण्येति । शुल्कत्वपटत्वयोरेकस्मिन्नधिकरणे सम्बन्धे एव हि तयोः सामानाधिकरण्यम् । सम्बन्धाभावे च तत्प्रतीतिर्न स्यादित्यर्थः । **दण्डी कुण्डलीति** । एकस्मिन्देवदत्ते दण्डकुण्डलनिरूपितसंयोगद्वयस्यैव तत्र सामानाधिकरण्यघटकत्वादिति भावः । **समवायोऽस्तीति** । समवायत्वास्तित्वयोरेकस्मिन्समवायेऽतिरिक्तसम्बन्धाप्रतीतावपि सामानाधिकरण्यप्रतीतिदर्शनेनोक्ततर्के व्यभिचारादित्यर्थः ।

वं०प०— ईश्वरसाक्षात्कारविषयत्वेन सिद्धसाधनतापरिहाराय **जन्य**पदम् । योगिसाक्षात्कारविषयत्वेन सिद्धसाधनतापरिहाराय योगजधर्माजन्येत्युक्तम् । **सम्बन्धतत्प्रत्यययोरिति** । सम्बन्धस्यैवासिद्ध्या द्वितीयानुमाने आश्रयासिद्धिः । तत्प्रत्ययस्यैवासिद्ध्या प्रथमानुमान इति विवेकः ।

कं०रा०— योगजधर्मेति । यद्यपि तन्तुपटसम्बन्धः साक्षात्कारविषय इति साधनेऽपि समवायस्य प्रत्यक्षता सिद्ध्यति तथापि योगजधर्मजन्ययोगिनिष्ठासाक्षात्कारस्येश्वरनिष्ठाजन्यसाक्षात्कारस्य च अस्मदादीन्प्रति असाधकतया अस्मदादीन् प्रति साधकस्य योगजधर्माद्यजन्यस्य अस्मदादिनिष्ठसाक्षात्कारस्यैव साधनीयत्वात् योगजधर्माजन्यजन्येत्युक्तं **तन्तुपटसम्बन्धेति** । तन्तुपटसम्बन्धस्यासिद्ध्या द्वितीयानुमानस्य आश्रयासिद्धिः

तत्प्रत्ययस्यासिद्ध्या तु प्रथमानुमानस्याश्रयासिद्धिरिति द्रष्टव्यम् । **तस्येति** । सामानाधिकरण्यप्रत्ययस्य सम्बन्धप्रतीतिपूर्वकत्वदर्शनादित्यर्थः ।

श्रीनिधि०— अनन्यथासिद्धतदन्वयव्यतिरेकानुविधायित्वादिति । अत्रान्वयव्यतिरेकानुविधायित्वादित्येवोक्ते तन्तुरूपान्वयव्यतिरेकानुविधायिनि पटे व्यभिचारः । अतः अनन्यथासिद्धेति विशेषणम् । तन्तुरूपान्वयव्यतिरेकौ च पटरूपं प्रति कारणताग्रहोपक्षीणौ अतो न व्यभिचारः । **तदन्वयव्यतिरेकानुविधायित्वं** नाम तदन्वयव्यतिरेकौ अनु = अनुसृत्य विधत्ते । स्वावयवव्यतिरेकौ यदन्वयेन यस्यान्वयो यद्व्यतिरेके च यस्य व्यतिरेकः सः तदन्वयव्यतिरेकानुविधायीति यावत् । तस्य भावः तत्त्वम् । **योगजधर्माजन्यजन्यसाक्षात्कारविषय इति** । अत्रानभिमतसिद्ध्यर्थान्तरवारणाय विशेषणद्वयम् । अन्यथा अन्यस्य धर्मादिसाधारण्येन प्रत्यक्षतासाधनमनुपयुक्तं स्यादिति ।

शे०वा०— आद्यद्वितीयमुत्थाप्यातिदेशेन दूषयति **एतेनेति** । **अयं तन्तुपटेत्यादि** । आरभ्यारम्भकभावापन्नतन्तुपटसम्बन्धप्रत्यय इत्यर्थः । अन्यथा तन्तुपटसंयोगप्रत्ययस्यापि तत्सम्बन्धप्रत्ययत्वेन पक्षत्वापत्त्या तस्य चक्षुर्जन्यतायाः परेणापि स्वीकारेण सिद्धसाधनत्वप्रसङ्गादिति भावः । **अनन्यथासिद्धेति** । चक्षुरन्वयव्यतिरेकानुविधायित्वमात्रं चक्षुर्जन्यधूमादिज्ञानजन्यवह्न्याद्यनुमितावप्यस्तीति तत्र व्यभिचारवारणायोक्तमनन्यथासिद्धेति । चक्षुस्तु धूमादिग्रहे उपक्षीणत्वादन्यथासिद्धमेवेति नानन्यथासिद्धचक्षुरन्वयव्यतिरेकानुविधायित्वमनुमितेरिति न तत्र व्यभिचारः । न च धूमादिज्ञानस्य चक्षुरवान्तरव्यापारत्वान्न तत्रोपक्षयः । यद्धि यज्जनयित्वैव यज्जनयति तस्य तदवान्तरव्यापारत्वात् । चक्षुषो लिङ्गज्ञानमन्तरेणापि लिङ्गिज्ञाने सामर्थ्योपलम्भेन तज्ज्ञानस्य तदवान्तरव्यापारत्वायोगादिति भावः । **अयमिति** । अत्राप्यारभ्यारम्भकभावापन्नतन्तुपटसम्बन्धस्यैव पक्षत्वान्न तादृग्रूपतन्तुपटसंयोगमादाय सिद्धसाधनत्वमिति द्रष्टव्यम् । साध्ये योगिसाक्षात्कारविषयतयेश्वरसाक्षात्कारविषयतया च सिद्धसाधनतावारणाय क्रमेण विशेषणद्वयम् । एतेनेत्यतिदिष्टं दूषणमेवाह **तन्तुपटेति** । एतच्च द्वितीयानुमानमाश्रित्योक्तम् । प्रथमानुमानमप्याश्रित्याह **तत्प्रत्ययेति** । उपादानोपादेयाभेदवाद इति शेषः । तद्भेदवादे तु घटाभावभूतलयोरिवेहापि स्वरूपसम्बन्धस्य चाक्षुषत्वेनार्थान्तरत्वादिति दूषणं द्रष्टव्यम् । अस्तु तर्हि, गुणादेर्गुण्यादिना सह रूपी घट इत्यादिरूपः सम्बन्धप्रत्ययश्चक्षुर्जन्यः अनन्यथासिद्धतदन्वयव्यतिरेकानुविधायित्वात् घटप्रत्ययवदिति समवायप्रत्यक्षतासाधनम् । न चात्रापि गुणगुणिसम्बन्धप्रत्ययासिद्ध्या आश्रयासिद्धिरिति वाच्यम् । सामानाधिकरण्यव्यवहाररूपकार्येण तस्य सिद्ध्या तदनवकाशादिति भावेन सम्बन्धाप्रतीतौ सामानाधिकरण्यव्यवहारानुपपत्तिं बाधकत्वेन शङ्कते **सम्बन्धेति** । गुणादेर्गुण्यादिना सम्बन्धाप्रतीताविति्यर्थः । **सामानाधिकरण्यप्रतीतिः** सामानाधिकरण्यव्यवहारः । 'नन्वभेदश्चेत्प्रत्यक्षेणैवेक्ष्यते तदा कथं शुक्लः पट इति सामानाधिकरण्यव्यवहार' इत्युत्तरग्रन्थानुरोधात् । अत एव चोत्तरत्र तस्येति पुल्लिङ्गप्रयोगः । अन्यथा हि प्रतीतिपरिग्रहाय तस्या इत्येव वक्तव्यतया तस्येति पुल्लिङ्गप्रयोगानुपपत्तिप्रसङ्गात् इति द्रष्टव्यम् । भवेत्सम्बन्धा-

प्रतीतौ सामानाधिकरण्यव्यवहारानुपपत्तिर्बाधिका यदि सामानाधिकरण्यव्यवहारस्य सम्बन्धविषयत्वं स्यात् । न च तदस्ति । तस्य तादात्म्यमात्रविषयत्वेन सम्बन्धविषयत्वाभावात् । ततश्च सम्बन्धाप्रतीतावपि तादात्म्यप्रतीतिमात्रेण तादात्म्यावलम्बनस्य सामानाधिकरण्यव्यवहारस्योपपत्तेर्न तदनुपपत्तिप्रसङ्ग इत्यतः शुक्लः पट इति सामानाधिकरण्यव्यवहारस्य शौक्ल्याश्रयपटत्वाश्रययोस्तादात्म्यावलम्बनत्वेऽपि दण्डी देवदत्त इत्यादौ दण्डादेर्देवदत्तेनैव शौक्ल्यस्य पटेन सम्बन्धमात्रावगाहित्वेन न तत्तादात्म्यावलम्बनत्वम् । अन्यथा दण्डी देवदत्त इत्यादेरपि दण्डदेवदत्ततत्तादात्म्यावलम्बनत्वापातात् । न च दण्डीत्यादिसामानाधिकरण्यव्यवहारे सम्बन्धार्थक-इनिप्रत्ययायोगात् तस्य सम्बन्धावगाहित्वेऽपि शुक्लः पट इत्यादौ तददर्शनान्न तस्य सम्बन्धावगाहित्वमिति वैषम्यमिति वाच्यम् । शुक्लगुणोऽस्यास्तीत्यर्थे 'अर्श आदिभ्योऽजि'त्यच्प्रत्ययविधानादत्रापि सम्बन्धार्थक-प्रत्ययसद्भावेन शुक्लः पट इत्युक्त्वा शौक्ल्यं पटस्येत्यभियुक्तव्याख्यानानुरोधेन च शौक्ल्यपटसम्बन्धावगाहित्व-स्योपपन्नत्वात् । ततश्च सम्बन्धविषयकसामानाधिकरण्यव्यवहारस्य सम्बन्धप्रतीतिकार्यतया तदभावेनासम्भवा-द्भवेदेव सम्बन्धाप्रतीतौ समानाधिकरण्यव्यवहारानुपपत्तिर्बाधिकेत्याशयवानाह **दण्डीत्यादिना** । सत्त्वस्य समवायेनातिरिक्तसम्बन्धाप्रतीतावपि समवायोऽस्तीत्यादिसामानाधिकरण्यव्यवहारदर्शनेन तर्कमूलभूतव्याप्ति-शैथिल्येन सामानाधिकरण्यव्यवहारस्य सम्बन्धप्रतीतिकार्यत्वासिद्ध्या तेन गुणगुणिनोः सम्बन्धप्रतीत्यसिद्धे-रत्राप्याश्रयासिद्धिरेवेत्याशयवान् समाधत्ते **नेति** ।

वा०र०— आद्यद्वितीयमुत्थाप्येति । क्लृप्तं वा कल्प्यं वेति प्रथमविकल्पस्य कल्प्यमिति द्वितीय-मुत्थाप्येत्यर्थः । अयमित्येतद्व्याचष्टे **आरभ्यारम्भकेति** । यैस्तन्तुभिः पटः आरभ्यः तन्तुपटयोः सम्बन्ध इत्यर्थः । **अन्यथेति** । अयमित्यनुक्तावित्यर्थः । तदुक्तसामर्थ्यप्राप्ततन्तुपटविशेषालाभादिति भावः । **तन्तुपट-संयोगेति** । पटान्तरारम्भकतन्तुभिः तदन्यतन्त्वारब्धपटस्य यः संयोगः तत्प्रत्ययस्यापीत्यर्थः । परिहरति **यद्धीति** । **लिङ्गज्ञानमिति** । अनुमानाप्रवृत्तिस्थलेत्यर्थः । **पक्षत्वादिति** । पक्षतायाः अयं इत्येतत् सामर्थ्य-लब्धत्वादित्यर्थः । मूले उक्तिलाघवाय सम्बन्धतत्प्रत्यययोः इत्युक्तावपि क्रमो विवक्षितः इत्याह **एतच्चेति** । द्विवचनान्तेन उपात्तयोरपि बुद्ध्या विवेकेन एकैकं प्रतीकतयाह **तन्तुपटेतीति** । तत्प्रत्ययेतीति च । तर्हि तद्भेदवादे दोषाभावः इत्यतः तत्र दोषं स्वयं दर्शयति **तद्भेदवादे त्विति** । तन्तुपटसम्बन्धतत्प्रत्ययपक्षका-नुमानेऽभिहिताश्रयासिद्ध्युद्धाराय सम्बन्धाप्रतीतावित्याशङ्काग्रन्थ इति प्रतीयते । तच्च शुक्लः इत्युक्ते न संभवति इत्यतो विवक्षितप्रयोगान्तरे तदसिद्ध्युद्धारायोत्तरग्रन्थप्रवृत्तिरिति न दोषः इत्याशयेन प्रयोगान्तरं दर्शयन् तत्राश्रयासिद्धिनिरासकतयोत्तरग्रन्थं योजयति **अस्तु तर्हीति** । गुणादेः गुण्यादिना सह सम्बन्धप्रत्ययः इति सम्बन्धः । सह यः सम्बन्धः तत् प्रत्यय इत्यर्थः । तदाकारप्रदर्शनं **रूपी घट इत्यादिरूप इति** । यद्यपि ज्ञानत्वादिरूपेण प्रतीतिनिर्देश इत्यादिपदेन चलति पटः द्रव्यं पट इत्यादेर्ग्रहणम् । घटप्रत्ययवदिति पाठः । अत्र टीकायामादिपदोपादानेन शुक्लः पट इति मूलमुपलक्षणमिति सूच्यते । **उत्तरग्रन्थेति** । 'सविशेषावसीयते' इत्युत्तरभाष्यतात्पर्यकथनमूलग्रन्थेत्यर्थः । **उत्तरत्रेति** । आदिपदेन चलति पटः द्रव्यं पटः इत्यादेर्ग्रहणम् ।

घटप्रत्ययवत् इति पाठः । अत्र टीकायां आदिपदोपादानेन शुक्लः पटः इत्युपलक्षणम् । **इति सूच्यते** उत्तरवाक्येत्यर्थः । यद्यपि ज्ञानत्वादिरूपेण प्रतीतिनिर्देशः इत्याश्रयणे तस्येत्येतत् नासङ्गतम् । तथापि ननु इत्याद्युत्तरग्रन्थानुसारेण सिद्धे प्रतीतिपदस्य व्यवहारपरत्वमस्येति वा लिङ्गमपि साधकतया आश्रितमित्यदोषः । ननु यदि सम्बन्धविषयत्वाभावः तर्हि निर्विषय एवासाविति प्राप्तम् । विषयान्तरानिरूपणादित्यत आह **तस्य तदास्येति** । सम्बन्धविषयत्वाभावाभ्युपगमादित्यर्थः । न तु निर्विषयत्वेन तदभ्युपगम इति भावः । एतेन न च तदस्ति इत्युक्तस्यैव हेतुत्वेनाभिधानम् । कथमिति शङ्कानवकाशः । तस्य तादात्म्यमात्रालम्बनत्वमित्यसत् शौक्ल्यस्याश्रयपरत्वाश्रययोः सम्बन्धितया अभिमतत्वपक्षे तदुभयतादात्म्यालम्बनत्वोपपत्तावपि शौक्ल्यपरयोस्तत्त्वेनाभिमतपक्षे तत्तदात्म्यालम्बनत्वायोगात् । शौक्ल्यपटयोः सम्बन्धित्वपक्षे दण्डी देवदत्त इत्यादौ दण्डदेवदत्तयोः सम्बन्धमात्रस्येव शौक्ल्यपटयोः सम्बन्धमात्रस्यैव भावेन तादात्म्याभानात् । अन्यथा दण्डीत्यादावपि दण्डदेवदत्ततादात्म्यस्येव भानापत्तेरित्याह **शुक्लपट इतीत्यादिना** । एतच्चाख्यातिवादीयात्र केचित् प्रलपितम् । एवं खण्डो गौः शुक्लः पट इत्यादयः सर्व एव सविकल्पप्रत्ययाः विभ्रमाः प्रसज्येरन् समानाधिकरण्यप्रत्ययस्य तादात्म्यालम्बनत्वात्तस्य चात्राभावादिति । तदतीव मन्दम् । तथाहीत्यादि मूलानुसारेणोक्तं **शुक्लगुणोऽस्यास्तीत्यर्थे नाशमिति** । एतन्मूलटीकायां व्युत्पादितं तद्व्युत्पादनमिति प्रागस्माभिः कृतम् । तत एव प्रतिपत्तव्यम् । **तर्कमूलेति** । यत्र सम्बन्धप्रतीत्यभावस्तत्रसमानाधिकरण्यव्यवहाराभाव इति व्याप्तीत्यर्थः । **अत्रापीति** । सम्बन्धप्रतीताविति मूलाभिप्रेते गुणगुण्यादिसम्बन्धप्रत्ययपक्षकप्रागुदाहृतेऽनुमानेऽपीत्यर्थः ।

विट्ठल०— अयमिति । अयुतसिद्धतन्तुपटलाभायेति पक्षविशेषणं अन्यथार्थान्तरतापातात् । धूमानुमानेऽपि लिङ्गादिग्रहणे चक्षुषोऽन्वयव्यतिरेकानुविधायित्वात् तदनुमित्यादौ व्यभिचारवारणायानन्यथासिद्धेति हेतुविशेषणम् । द्वितीयप्रयोगे ईश्वरप्रत्यक्षत्वेनार्थान्तरतावारणाय **जन्येति** । योगिप्रत्यक्षत्वेन तद्वारणाय योगजधर्मजन्येति च विशेषणं शङ्कते **सम्बन्धाप्रतीताविति** । मतुब्लोपेन वार्थादित्वेन वा शुद्ध इत्यस्या शुक्लरूपवानित्यर्थः । **सामानाधिकरण्येति** । शुक्लत्वपटत्वयोरेकस्मिन्नधिकरणे सम्बन्धरूपसामानाधिकरण्यात् तत्प्रतीतिर्न स्यादित्यर्थः । **दण्डीति** । दण्डी कुण्डली च देवदत्त इत्यादि सामानाधिकरण्यप्रतीतेर्दण्डकुण्डलनिरूपितसम्बन्धप्रतीतिपूर्वकत्वदर्शनादिति भावः । समवायोऽस्तीति सामानाधिकरण्यप्रतीतेर्न सम्बन्धप्रतीतिपूर्वकत्वनियमः । तन्तुषु पटसमवायोऽस्तीत्यत्र समवायास्तित्वयोः परस्परसम्बन्धाभावेन सम्बन्धाप्रतीतावपि सामानाधिकरण्यप्रतीतेः तदुक्ततर्के व्यभिचार इत्यर्थः ।

चषक— गुणवचनेभ्यो मतुपो लुगिति तल्लोपात्, अर्शआद्यजन्तत्वाद्वा शुक्ल इत्यस्य शुक्लरूपरूपवानित्यर्थः । **सामानाधिकरण्येति** । शुक्लत्वपटत्वयोरेकस्मिन्नधिकरणे सम्बन्धे एव हि तयोः सामानाधिकरण्यम् । सम्बन्धाभावे च तत्प्रतीतिर्न स्यादित्यर्थः । गुणजात्योरेकपटरूपद्रव्यविशेष्यकत्वधीर्न तदित्यर्थ इत्यप्यर्थापयन्ति । **दण्डी कुण्डलीति** । एकस्मिन् धर्मणि दण्डकुण्डलप्रतियोगिकसंयोगद्वयस्यैव सामानाधि-

करण्यरूपत्वादिति हृदयम् । **समवायेति** । समवायत्वास्तित्वयोरेकधर्मिगतत्वप्रतीतावपि सम्बन्धप्रतीति-पूर्वकत्वाभावादित्यर्थः । **समवायप्रत्यक्षन्यक्कारः** ॥

॥ इति समवायप्रत्यक्षत्वस्य अनुमानसाध्यत्वानुपपत्तिः ॥
॥ इति उक्तार्थसमर्थनम् ॥
॥ इति समवाये न प्रत्यक्षं प्रमाणम् ॥

* * *

॥ अथ समवायस्य स्वरूपतो निराकरणे, समवाये नानुमानमपि प्रमाणम् ॥
॥ अथ च तत्रादौ इहेदमितिप्रत्ययस्य तत्रानुमानत्वेऽनुपपत्तिः ॥

१४१ सु०— नाप्यनुमानम् । 'इहेदमि'ति प्रत्ययस्य दूषितत्वात्, 'इह भूतले घटाभाव' इति प्रत्यये व्यभिचाराच्च । भावमात्रविषयत्वेन विशेषणाददोष इति चेन्न, अभाववद्भावेऽप्युपपत्तौ अन्यथासिद्धेः, 'इह घटे ज्ञानमि'ति प्रत्यये व्यभिचारापरिहाराच्च । बाधितोऽयमिति चेन्न, अन्यथाप्रत्ययानुपलब्धेः ।

परि०— इह तन्तुषु पट इति प्रत्ययः सम्बन्धपूर्वकः अबाधितेहप्रत्ययत्वादित्यनुमान-माशङ्क्य निराह **नापीति** । **दूषितत्वादिति** । इह तन्तुपटयोः समवाय इति प्रत्यये व्यभिचाराद्युक्त्या दूषितत्वादिति । **इह भूतल इति** । भूतलघटाभावप्रत्यये अबाधितेहप्रत्ययत्वरूपहेतुसत्त्वेऽपि भूतलघटाभावयोः सम्बन्धान्तराभावादिति भावः । **अभाववदिति** । सम्बन्धान्तराभावेऽप्यभावे इहेति प्रत्ययवदिह तन्तुषु पटः इह पटे रूपमिह मूर्ते क्रिया इत्यादिप्रत्ययोपपत्तावुक्तसम्बन्धपूर्वकत्वसाध्येन विनोक्तहेतोः सिद्धत्वेनाप्रयोजकत्वमित्यर्थः । **इह घट इति** । भावमात्रविषयत्वेन हेतुविशेषणेऽपीति योज्यम् । **बाधितोऽयमिति** । तथा च विवक्षितहेतोरभावान्न व्यभिचार इति भावः । **अन्यथा-प्रत्ययेति** । नेह घटे ज्ञानमिति विपरीतबुद्धेरभावात् तदधीनत्वात् बाधितत्वनिश्चयस्येति भावः ।

यादु०— बाधित इति । तथा च बाधितेहप्रत्ययरूपहेतोरभावान्न व्यभिचार इति भावः । **अन्यथा-प्रत्ययेति** । बाधकप्रत्ययेत्यर्थः ।

वं०प०— नाप्यनुमानं तन्तुपटप्रत्ययस्य सम्बन्धपूर्वकत्वसाधकमिति शेषः । **इहेदमितिप्रत्यय-स्येति** । अतिरिक्तसम्बन्धपूर्वकत्वसाधकाबाधितेहप्रत्ययत्वस्येत्यर्थः । **दूषितत्वादिति** । इह तन्तुपटयोः समवाय इत्यत्र व्यभिचारेणेत्यर्थः । **अभाववदिति** ।

कं०रा०— इहेदमितीति । इह तन्तुष्टु पट इत्यादिप्रत्ययः सम्बन्धपूर्वकः अबाधितेहप्रत्ययत्वादित्यनुमानस्येह तन्तुपटयोः समवाय इति प्रत्यये व्यभिचारेण दूषितत्वादित्यर्थः । स्थलान्तरेऽपि व्यभिचारमाह **इह भूतल इति** । इह घटज्ञानमिति प्रत्यये भावमात्रविषयकत्वस्य सत्त्वेऽपि तस्य बाधितत्वेनाबाधितेहप्रत्ययत्वरूपविशेष्यस्य तत्राभावान्न व्यभिचार इति शङ्कते **बाधितोऽयमिति** । नेह घटे ज्ञानमिति विपरीतप्रमायानुपलब्धेरिह घटे ज्ञानमिति प्रत्ययस्य बाधितत्वमिति परिहरति **नेति** ।

श्रीनिधि०— दूषितत्वादिति । इह तन्तुपटयोः समवाय इति प्रत्ययस्य व्यभिचारकथनेनेत्यर्थः । स्थलान्तरे व्यभिचारमाह **इह भूतल इति** । भूतलाभावयोः उभयोः अद्रव्यत्वेनायुतसिद्धत्वाभावत्वेन च संयोगसमवायानङ्गीकारादिति । **अभाववद्भावेऽप्युपपत्ताविति** । सम्बन्धाभावेऽपि भेदमिति प्रत्ययोपपत्तावित्यर्थः । तथा च विशेषणोपादानं व्यर्थमिति भावः । अस्तु वा विशेषणं, तथाऽपि नानैकान्त्योद्धार इत्याह **इह घटे ज्ञानमिति प्रत्यय इति** । **अन्यथाप्रत्ययानुपलब्धेरिति** । अन्यथाप्रत्ययो घटे ज्ञानाभावावगाहिप्रत्ययः । बाधकप्रत्यय इति यावत् ।

शे०वा०— अस्तु तर्ह्यनुमानमेव तत्र मानमिति द्वितीयो निरवद्यत्वादित्याशङ्क्य तत्प्रतिबद्धलिङ्गाभावान्न तदपि मानमित्याशयेनाह **नापीति** । नन्विह कुण्डे बदराणीत्यबाधितेहप्रत्ययस्याधाराधेययोः कुण्डबदरयोः संयोगरूपातिरिक्तसम्बन्धपूर्वकत्वदर्शनात् इह तन्तुषु पट इत्यादेरपि इहेदमिति प्रत्ययस्याबाधितेहप्रत्ययत्वेनाधाराधेययोस्तन्तुपटयोरतिरिक्तसम्बन्धपूर्वकत्वसिद्धौ तस्य सम्बन्धस्यायुतसिद्धयोः सम्बन्धतया द्रव्यादिवृत्तितया चायुतसिद्धयोः सम्बन्धाद्द्रव्यमात्रवृत्तेश्च संयोगादन्यत्वसिद्धया समवायत्वसिद्धिरिति समवायसाधकस्याबाधितेहप्रत्ययत्वस्यैव लिङ्गस्य सत्त्वात् कथं तदभाव इत्याशङ्क्य भवेदबाधितेहप्रत्ययत्वेन सम्बन्धपूर्वकत्वसिद्धिर्यदि योऽबाधितेहप्रत्ययः स आधाराधेययोरतिरिक्तसम्बन्धपूर्वकः इत्यनुमानमूलभूता व्याप्तिः सिद्धा स्यात् । न चैतदस्ति । इह तन्तुपटयोः समवाय इतीहप्रत्ययस्याबाधितेहप्रत्ययत्वेऽपि समवायस्य तन्तुपटाभ्यामतिरिक्तसम्बन्धानभ्युपगमेन आधाराधेययोरतिरिक्तसम्बन्धपूर्वकत्वाभावेन तत्र व्यभिचारादिति 'भिन्नत्वसाम्यतस्तस्य ताभ्यामि'त्यादिना पूर्वमेव समर्थितत्वेनाबाधितेहप्रत्ययत्वस्य लिङ्गत्वानुपपत्तिरित्याशयेनाह **इहेदमिति । प्रत्ययस्येति** । अबाधितेहेदमितिप्रत्ययस्येत्यर्थः । अन्यथा बाधितेहरजतत्वमितीहप्रत्यये व्यभिचारप्रसक्तेरिति द्रष्टव्यम् । ननु तन्तुपटयोः समवायः सिद्धश्चेत् किमुत्तरभाविनाऽनैकान्त्येन । असिद्धश्चेत् स्वानैकान्त्यमित्युभयतः पाशारज्जुरिति चेत् । आपाततः प्रतीते सम्बन्धे व्यभिचारं दृष्ट्वा परावृत्तेरावश्यकत्वस्य विवक्षितत्वात् । यद्वा एतदस्वरसादेव दोषान्तरमाह **इह भूतल इति** । उक्तप्रत्यये सत्यप्यबाधितेहेदमितिप्रत्ययत्वे आधाराधेययोर्भूतलघटाभावयोरतिरिक्तसम्बन्धपूर्वकत्वाभावादिति भावः । **भावमात्रेति** । तथा चेह भूतले घटाभाव इतीहप्रत्ययस्याभावभावविषयतया भावमात्रविषयकाबाधितेहप्रत्ययत्वरूपहेतोरेव तत्रागमनान्न

व्यभिचार इति भावः । भावमात्रविषयकत्वेनेहप्रत्ययविशेषणमनर्थकम् । न चेह भूतले घटाभाव इतीहप्रत्यये व्यभिचारपरिहारार्थं तदिति वाच्यम् । तत्परिहारस्यापि प्रयोजनाभावात् । न चानुमानस्यादुष्टत्वसम्पादनद्वारा समवायसाधकत्वसमर्थनमेतत्प्रयोजनमिति वाच्यम् । व्यभिचाराभावेऽप्यन्यथासिद्धिग्रस्ततयाऽनुमानस्य दुष्टत्वेन तदसम्भवादित्याह **अभाववदिति** । अङ्गीकृत्य चेदमुदितम् । वस्तुतस्तु न व्यभिचारवारकत्वमपि सम्भवति । उदाहरणस्यानादरणीयत्वेनैवोदाहरणनिरासेऽप्युदाहरणान्तरानिरासादित्याशयेन व्यभिचारमप्याह **इहेति** । **बाधित इति** । तथा च तत्र भावमात्रविषयकेहप्रत्ययत्वसत्त्वेऽप्यबाधितेहप्रत्ययत्वरूपहेत्वगमनान्न व्यभिचार इति भावः । अबाधितत्वविशिष्टहेतोरपि सत्त्वाद्व्यभिचार एवेत्यभिप्रेत्य कुतोऽत्र बाधकाभावसिद्धिरित्यतो योग्यानुपलब्धेरेवेत्याशयेनाह **अन्यथेति** ।

वा०र०— संयोगरूपेति । संयोगरूपो यः कुण्डबदरातिरिक्तः सम्बन्ध इति योज्यम् । **अतिरिक्तेति** । स्वातिरिक्तेत्यर्थः । **व्यभिचारादिति** । समर्थितत्वेनेति सम्बन्धः । प्रत्ययस्येत्पदेन मूलगतं प्रत्ययपदं भावप्रधानमिति सूचितम् । समवाये प्रमाणभङ्गाय तर्काताण्डवेन च समवायस्येत्यादिकमुक्तम् । तदनुसारेणाह **ननु तन्तुपटयोरिति** । **विवक्षितत्वादिति** । अन्यथा तवापि निर्विकल्पकसाधके विशिष्टप्रत्ययत्वादिति हेतौ विशिष्टपदं व्यर्थं स्यादिति भावः । **भूतलघटाभावयोरिति** । भूतलघटाभावयोः यः स्वातिरिक्तः सम्बन्धः तत्पूर्वकत्वाभावादिति योजना । एतदाश्रयत्वात् । स्वजन्यपटाश्रयत्वादित्यर्थ इति पाठः । मूलकोशे सत्त्वात् । अन्यादृशस्तु लेखकप्रमादात् । अत एवोत्तरानुव्याख्याने व्याख्यानं पूर्ववदिति वक्ष्यते **पूर्ववदिति** । स्वजनकतन्त्वाश्रितत्वादित्येवं स्वपदाद्यन्तर्भविन व्याख्यानं पूर्ववत्कार्यमित्यर्थः ।

विट्ठल०— इह तन्तुषु पट इति प्रत्ययः सम्बन्धपूर्वकः अबाधितेहप्रत्ययत्वादित्याद्यनुमानमाशङ्क्य निराह **नापीति** । **दूषितत्वादिति** । इह तन्तुपटयोः समवाय इति प्रत्यये व्यभिचारादिना दूषितमित्यर्थः । **इह भूतल इति** । इह भूतले घटाभाव इति प्रत्यये अबाधितेहप्रत्ययत्वरूपत्वे तु सत्त्वेऽपि भूतलघटाभावयोः सम्बन्धाभावेन सम्बन्धपूर्वकत्वरूपसाध्याभावादिति भावः । भूतले घटाभाव इति प्रत्यये भूतलरूपभावविषयत्वमस्त्येवेति दोषतादवस्थ्यमित्यतो मात्रेत्युक्तं **विशेषणादिति** । इहप्रत्ययत्वस्येति शेषः । **अभाववदिति** । सम्बन्धान्तराभावेऽप्यभावे इहप्रत्ययोपत्तिवदिह तन्तुषु पटः इह पटे रूपमिति प्रत्ययस्य सम्बन्धपूर्वकत्वरूपसाध्येन विनाभ्युपपत्तेरप्रयोजकत्वमित्यर्थः । इह घट इति भावमात्रविषयेहप्रत्ययत्वस्येह घटे ज्ञानमिति प्रत्यये सत्त्वेऽपि घटज्ञानयोः सम्बन्धाभावेन साध्याभावाद्व्यभिचार इति भावः । ज्ञानस्यात्मसमवेतत्वेन इह घटे ज्ञानमिति प्रत्ययो बाधितः । तथा चाबाधितेहप्रत्ययत्वरूपहेत्वभावान्न व्यभिचार इत्याशयेन शङ्कते **बाधितोऽयमिति** । नेह घटज्ञानमिति बाधकप्रत्ययसद्भावे स्याद्बाधितत्वं तदनुपलब्धेनायं प्रत्ययो बाधितमिति परिहरति **अन्यथाप्रत्ययेति** । अन्यथाप्रत्ययो बाधकप्रत्ययः ।

चषक— व्यभिचाराच्चेति । नैयायिकाभिमतविशेषणविशेष्यभावस्य तदुभयस्वरूपानतिरिक्तत्वादिति भावः । **अन्यथासिद्धेः** साध्यमन्तरेणापि हेतुसत्त्वोपपत्तेः । **अन्यथाप्रत्ययेति** । नेह घटे ज्ञानमिति बाधक-प्रत्ययेत्यर्थः ।

॥ इति इहेदमितिप्रत्ययस्य तत्रानुमानत्वेऽनुपपत्तिः ॥

* * *

॥ अथ समवाये अनुमानप्रमाणाभावप्रदर्शने लीलावत्युक्तानुमानेऽपि उक्तदूषणातिदेशः (भावमात्रविषयाबाधितविशिष्टव्यवहारत्वानुमानस्य दूषणम्) ॥

१४२ सु०— एतेन 'जात्यादिगोचरो विशिष्टव्यवहारः सम्बन्धनियतो भावमात्रविषया-बाधितविशिष्टव्यवहारत्वात् सघटं भूतलमिति व्यवहारवदि'त्यपास्तम्, 'ज्ञातो घटः', 'अस्ति समवायः' इत्यादौ व्यभिचारात् ।

परि०— जात्यादीति । ब्राह्मणोऽयं, शुक्लः पट इत्यादि व्यवहार इत्यर्थः । अभाववद्भूतलं नीलं नभ इत्यादिव्यवहारे निर्विकल्पकव्यवहारे चाव्यभिचाराय क्रमाद्विशेषणत्रयम् । **ज्ञात इति** । ज्ञानविशेषणकघटविशेष्यकादिव्यवहारे स्वरूपसम्बन्धान्यसम्बन्धाभावादिति भावः ।

कं०रा०— एतच्छब्दपरामृष्टं हेतुमाह **ज्ञात इति** ।

श्रीनिधि०— सम्बन्धनियत इति । सम्बन्धपूर्वक इत्यर्थः । **भावमात्रविषयकाबाधितविशिष्ट-व्यवहारत्वादिति** । किञ्चिदिदमिति निर्विकल्पकव्यवहारे व्यभिचारवारणाय **विशिष्टेति** । इह घटे अयं घट इति विशिष्टव्यवहारे व्यभिचारवारणाय **अबाधितेति** । इह भूतले घटाभाव इति व्यवहारे तत्परिहाराय **भावेति** । एवमपि भूतलस्य भावत्वे तद्विषयत्वात् व्यभिचारतादवस्थ्यमित्यत उक्तम् **मात्रेति** ।

शे०वा०— माऽस्त्वबाधितेहप्रत्ययस्तत्र लिङ्गम् । लिङ्गान्तरं तु भविष्यतीत्यतो लीलावत्युक्तमनुमानं तावदुपन्यस्य उक्तदूषणातिदेशेन दूषयति **एतेनेत्यादिना** । जात्यादीत्यादिपदेन गुणादेः परिग्रहः । अघटं भूतलमित्यादिषु बाधपरिहारार्थं जात्यादिगोचर इति पक्षे विशेषणं, विशिष्टपदं च स्वरूपसङ्कीर्तनम् । व्यवहार-मात्रस्य विशिष्टव्यवहारत्वेनाविशिष्टव्यवहारस्यैवासिद्ध्या व्यावर्त्याभावेनाव्यावर्तकत्वात् । **सम्बन्धनियतः** अतिरिक्तसम्बन्धनियतः । अत एव हेतौ भावमात्रविषयकत्वविशेषणमर्थवत् । अन्यथा अघटं भूतलमिति विशिष्टव्यवहारे स्वरूपसम्बन्धनियतत्वमादाय साध्यस्यापि सत्त्वाद्व्यभिचाराप्रसक्तेस्तद्वारणाय हेतौ भावमात्र-

विषयकत्वविशेषणवैयर्थ्यप्रसङ्गात् । एवञ्चाघटं भूतलमिति विशिष्टव्यवहारेऽनैकान्त्यनिरासाय **भावमात्रेति** । पीतः शङ्ख इत्यादिव्यवहारे तन्निरासायाबाधितेत्युक्तम् । विशिष्टपदं च पूर्ववत्स्वरूपसङ्कीर्तनम् । **सघटं भूतलमिति व्यवहारवदिति** । सघटं भूतलमित्यबाधितव्यवहारवदित्यर्थः । अन्यथा बाधिते तत्राबाधितत्व-घटितोक्तहेत्वभावेन साधनवैकल्यप्रसङ्गादिति द्रष्टव्यम् । एतेनेत्यतिदिष्टं दूषणं विशदयति **ज्ञातो घट इति** । तद्व्यवहारस्याबाधितत्वं चान्यथाप्रत्ययानुपलब्ध्या सिद्धमिति ध्येयम् । अभ्युपेत्यापि तस्य बाधितत्वमन्यत्र व्यभिचारमाह **अस्ति समवाय इत्यादाविति** ।

विट्ठल०— विशिष्टव्यवहार इति । ब्राह्मणोऽयं शुक्लोऽयमित्यादि विशिष्टव्यवहार इत्यर्थः । अभाववद्भूतलमिति व्यवहारे नीलं नभ इति व्यवहारे निर्विकल्पकव्यवहारे च व्यभिचारेण वारणाय हेतोः क्रमेण विशेषणत्रयम् । **ज्ञातो घट इति** । ज्ञानघटयोः समवायोऽस्तित्वयोश्च सम्बन्धाभावादिति भावः । विषय-विषयीभावादि सम्बन्धसद्भावेऽप्यतिरिक्तसम्बन्धस्यैवेह साध्यत्वाद्व्यभिचार इति ज्ञेयम् । भूतलविशेषणे ज्ञान इति ज्ञातं भूतलमित्यादिव्यवहारसिद्ध इति योज्यम् ।

॥ इति समवाये अनुमानप्रमाणाभावप्रदर्शने लीलावत्युक्तानुमानेऽपि उक्तदूषणातिदेशः (भावमात्रविषयाबाधितविशिष्टव्यवहारत्वानुमानस्य दूषणम्) ॥

* * *

॥। अथ समवाये अनुमानप्रमाणाभावप्रदर्शने एतदाश्रयत्व-एतदाश्रितत्वाद्यनुमानस्यापि दूषणम् ॥

१४३ सु०— 'एते तन्तव एतत्पटसम्बद्धा एतदाश्रयत्वात् भूतलवत्, अयं पट एतत्तन्तुसम्बद्ध एतदाश्रितत्वादेतदाश्रिततृणादिवदि'त्यप्यसत्, तन्तुपटयोराश्रयाश्रयि-भावासिद्धेः । इह तन्तुष्वयं पट इति व्यवहारसिद्धतत्प्रत्ययात् तत्सिद्धिरिति चेन्न, इह समवायेऽस्तित्वमित्यादौ व्यभिचारात् ।

परि०— तत्प्रत्ययादिति । आश्रयाश्रयिभावप्रत्ययात् तत्सिद्धिरित्यर्थः ।

वं०प०— इह भूतले घटो नेत्यत्रेहप्रत्ययो यथाऽतिरिक्तसम्बन्धपूर्वकत्वाभावेऽपि स्वरूपसम्बन्धेन अन्यथासिद्धः तथा भावेऽप्यस्तित्वप्रयोजकत्वरूपान्यथासिद्धिर्नेत्याशङ्कते **इह तन्तुष्विति** । अनेनाश्रयत्वं प्रतीयते । अयं पट इत्याश्रितत्वं प्रतीयत इति नोक्तानुमानद्वये स्वरूपसिद्धिरित्यर्थः । **तदिति** । आश्रय-त्वाश्रितत्वेत्यर्थः । **तत्सिद्धिः** आश्रयत्वाश्रितत्वरूपहेत्वोः सिद्धिः ।

कं०रा०— इह तन्तुष्विति । इह तन्तुष्वयं पट इति यो व्यवहारः तेन सिद्धस्तन्तुपटयोर्य आश्रयाश्रयिभावप्रत्ययः ततस्तयोराश्रयाश्रयिभावसिद्धिः तथा च एतदाश्रयत्वादित्यादेर्न असिद्धिरिति भावः ।

श्रीनिधि०— तत्प्रत्ययादिति । आश्रयाश्रयिभावप्रत्ययादित्यर्थः । **तत्सिद्धिः** आश्रयाश्रयिभावसिद्धिः । **इह समवाये स्थितत्वमित्यादौ व्यभिचारादिति** । तत्राश्रयाश्रयिभावाभावेऽपि तत्प्रत्ययस्तदभावेऽपि तद्व्यवहारश्च दृष्ट इति न तस्योक्तार्थसाधकत्वमिति ।

शे०वा०— एते तन्तव इति । एतत्पटारम्भकास्तन्तव इत्यर्थः । **एतत्पटसम्बद्धाः** स्वजन्यपटसम्बद्धाः । **एतदाश्रयत्वात्** स्वजन्यपटाश्रयत्वादित्यर्थः । कारणपक्षकमनुमानमुक्त्वा कार्यपक्षकमनुमानमप्याह **अयं पट इति** । व्याख्यानं पूर्ववत् । न तन्तुपटयोराश्रयाश्रयिभावासिद्धिः वक्तुं शक्या । तत्प्रत्ययादेव तत्सिद्धिसम्भवात् । न च तस्यैवासिद्धेर्न तेन तत्सिद्धिरिति वाच्यम् । आश्रयाश्रयिभावविषयकव्यवहारस्य तत्कार्यतया तेन विनाऽनुपपत्त्या कार्येण व्यवहारेणैव तत्प्रत्ययस्य सिद्धिसम्भवात् कथं हेत्वसिद्धिरित्याशङ्कते **इहेति** । भवेदेतदेवं यद्याश्रयाश्रयिभावव्यवहारस्य तत्प्रत्ययपूर्वकत्वं स्यात् । न चैतदस्ति । समवायास्तित्वयोराश्रयाश्रयिभावप्रत्ययाभावेऽप्याश्रयाश्रयिभावव्यवहारदर्शनेन व्यभिचरिततया तेन तत्प्रत्ययासिद्धेरित्याशयेनाह **समवाय इति** ।

॥ इति समवाये अनुमानप्रमाणाभावप्रदर्शने एतदाश्रयत्व-एतदाश्रितत्वाद्यनुमानस्यापि दूषणम् ॥

* * *

॥ अथ समवाये अनुमानप्रमाणाभावप्रदर्शने भूतलविशेषणत्वानुमानस्यापि दूषणम् ॥

१४४ सु०— भूतलरूपादयो भूतलसम्बद्धा भूतलविशेषणत्वात् घटवदित्यपि, भूतलविशेषणे ज्ञाने व्यभिचारादयुक्तम् ।

परि०— भूतलविशेषणे ज्ञान इति । ज्ञातं भूतलमित्यादिव्यवहारसिद्धम् इति योज्यम् ।

वं०प०— भूतलविशेषण भूतलं प्रति विशेषणे । तथा च ज्ञातं भूतलमित्यत्र व्यभिचारो ज्ञानस्यात्मसम्बन्धित्वेन भूतलसम्बन्धित्वाभावादित्यर्थः ।

कं०रा०— भूतलविशेषण इति । ज्ञातं भूतलमित्यत्र भूतलापेक्षया ज्ञानस्यापि विशेषणत्वात् तस्य च भूतलेनातिरिक्तसम्बन्धाभावाच्च व्यभिचार इति भावः ।

॥ इति समवाये अनुमानप्रमाणाभावप्रदर्शने भूतलविशेषणत्वानुमानस्यापि दूषणम् ॥

* * *

॥ अथ समवाये अनुमानप्रमाणाभावप्रदर्शने इहेतिप्रत्ययानुमानस्यापि दूषणम् ॥

१४५ सु०— 'इह तन्तुषु पट' इत्यादिप्रत्यय एतज्जनकसंयोगत्वरहितसम्बन्धजन्य इहेतिप्रत्ययत्वात् 'इह कुण्डे बदराणी'ति प्रत्ययवत्, न चेह भूतले घटाभाव इति प्रत्यये व्यभिचारः, तत्रापि चक्षुर्भूतलसंयोगादिजन्यत्वस्य सत्त्वात्; इत्यपि न युक्तम्, अयं पट एतज्जनकतन्तुत्वरहितोपादानजन्यः पटत्वात् पटान्तरवदित्याभाससमानयोगक्षेमत्वात् ।

परि०— एतज्जनकेति । इह तन्तुषु पट इति प्रत्ययजनको यः संयोगः चक्षुःसंयोगः तत्त्वरहितो यः सम्बन्धः तज्जन्य इत्यर्थः । चक्षुस्संयोगेनार्थान्तरनिरासाय रहितान्तं विशेषणम् । अन्यजनकसंयोगत्वरहितैतज्जनकसंयोगेनार्थान्तरनिरासायैतज्जनकेति संयोगविशेषणम् । दृष्टान्ते एतज्जनकभिन्नसंयोगान्तरजन्यत्वात् साध्यानुगमः । **इत्याभासेति** । तत्र तन्तुत्वहीनवस्तुसमवायिकारणत्वस्यानिष्टस्यापि साध्यतापत्तेर्नेदमनुमानमपि युक्तमित्यर्थः ।

गु०दी०— इह तन्तुषु पट इत्यादिप्रत्यय इत्यत्रैतज्जनकेति विशेषणं दृष्टान्ते साध्यवैकल्यपरिहारार्थम् । तत्र यद्यपि संयोगत्वरहितसम्बन्धो नास्ति । तथाऽप्येतज्जनकसंयोगत्वराहित्यमस्तीति भावः ।

यादु०— एतज्जनकेति । अत्र सम्बन्धजन्य इत्येवोक्ते समवायासिद्ध्याऽर्थान्तरता स्यादतः संयोगत्वरहितेति सम्बन्धविशेषणम् । तावत्युक्ते कुण्डबदरसम्बन्धे संयोगत्वराहित्याभावेन साध्यवैकल्यमत एतज्जनकेति संयोगविशेषणम् । तथा चैतज्जनको यः संयोगः, तत्त्वराहित्यमेतज्जनकत्वरूपविशेषणाभावेन कुण्डबदरसम्बन्धेऽस्तीति न साध्यवैकल्यम् । तन्तुपटसम्बन्धे चैतज्जनकत्वरूपविशेषणस्य सत्त्वात् संयोगत्वाभावेनैव साध्यपर्यवसाने समवायसिद्धिरिति द्रष्टव्यम् ।

कं०रा०— एतज्जनकेति । अत्रैतच्छब्देन पक्षीभूतः इह तन्तुषु पट इत्यादि प्रत्यय उच्यते । एतज्जनकेति च प्रतियोगिकोटौ विशेषणं तथा चैतज्जनकत्वे सति यत्संयोगत्वं तद्रहितो यः सम्बन्धः तज्जन्य इति साध्यार्थः । दृष्टान्तीकृतस्य इह कुण्डे बदराणीति प्रत्ययस्य कुण्डबदरसंयोगजन्यत्वेऽपि तस्य संयोगस्यैतज्जनकत्वाभावे नैतज्जनकसंयोगत्वरहिततया एतज्जनकसंयोगत्वरहितसम्बन्धजन्यत्वरूपसाध्यं दृष्टान्तेऽस्ति पक्षे त्वेतज्जनकत्वरूपविशेषणाभावमादाय एतज्जनकसंयोगत्वराहित्यरूपविशिष्टाभावस्य बाधेन पर्यवसानानुपपत्तेः संयोगत्वरूपविशेष्याभावमादायैव पर्यवसानावश्यम्भावात् समवायजन्यत्वसिद्धिरिति भावः । **तत्रापीति** । भूतले घटाभाव इति प्रत्ययेऽपि चक्षुर्भूतलसंयोगादेर्जनकत्वात् तस्य च इह तन्तुषु पट इत्यादि प्रत्ययजनकत्वाभावेन एतज्जनकसंयोगत्वरहिततया तादृशसम्बन्धजन्यत्वरूपसाध्यस्य सत्त्वान्न व्यभिचार इति भावः । **एतज्जनकतन्तुत्वरहितेति** । अत्र 'एतत्'शब्देन पक्षीकृतः घटविशेष उच्यते । तथा चैतज्जनकत्वे सति

यत्तन्तुत्वं तद्रहितं यदुपादानं तज्जन्य इत्यर्थः । दृष्टान्तीकृतपटान्तरस्य तन्तूपादानकत्वेऽपि तस्य तन्तोरेतज्जनकत्वाभावेन एतज्जनकतन्तुत्वरहितोपादानजन्यत्वरूपसाध्यस्य तत्र सत्त्वात् दृष्टान्तावष्टम्भेन पक्षीकृतपटविशेषे एतज्जनकतन्तुत्वरहितोपादानजन्यत्वसाधने एतज्जनकतन्तुराहित्यरूपविशिष्टाभावस्य बाधादेव विशेषणाभावमादाय पर्यवसानस्यायोगेन विशेष्याभावमादायैव पर्यवसानस्यावश्यम्भावादतन्तूपादानकत्वं सिद्ध्येदिति भावः ।

श्रीनिधि०— एतज्जनकसंयोगत्वरहितसम्बन्धजन्य इति । तत्र पक्षे जनकसम्बन्धे संयोगत्वराहित्यमादाय साध्यपर्यवसानं न त्वेतज्जनकत्वराहित्यमादाय । सम्बन्ध ऊह्य इत्यनेन व्याहतेः । दृष्टान्ते तु एतज्जनकत्वराहित्यमादाय । कुण्डबदरसंयोगस्य इह तन्तुषु पट इत्यादि प्रत्ययाजनकत्वेन व्याहत्यभावात् । न तु संयोगत्वराहित्यमादाय बाधादिति द्रष्टव्यम् । एवं सर्वत्र विशिष्टव्यतिरेकिषु विवेको द्रष्टव्यः ।

शे०वा०— एतज्जनकेति । अत्रैतज्जनको यः संयोगस्तस्य भावस्तत्त्वं तद्रहितो यः सम्बन्धः तज्जन्य इति साध्यार्थः । अत्र चेह कुण्डे बदराणीति प्रत्ययजनककुण्डबदरसम्बन्धस्य संयोगतया संयोगत्वराहित्यस्य तत्राभावेऽपि तस्य पक्षीकृतेहप्रत्ययाजनकत्वेन एतज्जनकत्वरूपविशेषणाभावप्रयुक्तैतज्जनकसंयोगत्वरूपविशिष्टाभाववत्त्वेन एतज्जनकसंयोगत्वरहितसम्बन्धजनकत्वस्येह कुण्डे बदराणीति प्रत्यये सत्त्वाद्युक्तं तस्य दृष्टान्तत्वम् । इह तन्तुषु पट इति पक्षीकृतेहप्रत्ययकारणतन्तुपटसम्बन्धस्यैतत्प्रत्ययजनकत्वेन तत्रैतज्जनकत्वरूपविशेषणाभावप्रयुक्तैतज्जनकसंयोगत्वरूपविशिष्टाभावस्य बाधितत्वाद्धेतोः पक्षधर्मताबलेन संयोगत्वरूपविशेष्याभावप्रयुक्तोक्तरूपविशिष्टाभावस्यैव तत्र वक्तव्यत्वात् एतज्जनकसंयोगत्वरहितसम्बन्धजन्यत्वस्य पक्षे सिद्धौ *समवायसिद्धिरिति* द्रष्टव्यम् । **व्यभिचार इति** । विशेषणाभावप्रयुक्तविशिष्टाभाववद्भूतलघटाभावसंयोगरूपसम्बन्धजन्यत्वस्य तत्राभावादिति भावः । न च विशेषणविशेष्योभयाभावप्रयुक्तोक्तविशिष्टाभाववद्विशेषणविशेष्यभावरूपसम्बन्धजन्यत्वस्य तत्रापि सत्त्वान्न व्यभिचार इति वाच्यम् । विशेषणविशेष्यभावस्य परेण सम्बन्धत्वानभ्युपगमेन तमादाय साध्यसद्भावोपपादनासम्भवात् । अङ्गीकारे वा तेनैवार्थान्तरत्वादित्याशयात् । **चक्षुर्भूतलसंयोगेति** । तस्याप्येतज्जनकत्वरूपविशेषणाभावप्रयुक्तोक्तविधविशिष्टाभाववत्त्वादिति भावः । **एतज्जनकेति** । अत्र च पटान्तरोपादानस्य तन्तोस्तन्तुत्वरहितत्वाभावेऽपि तस्यैतज्जनकत्वाभावात् एतज्जनकत्वरूपविशेषणाभावप्रयुक्तैतज्जनकतन्तुत्वरूपविशिष्टाभाववत्त्वान्न दृष्टान्ते साध्यवैकल्यम् । पक्षे चैतज्जनकत्वरूपविशेषणाभावप्रयुक्तविशिष्टाभाववदुपादानजन्यत्वस्य बाधितत्वेन हेतोः पक्षधर्मताबलात् तन्तुत्वरूपविशेष्याभावप्रयुक्तविशिष्टाभाववदुपादानजन्यत्वमादायैव पक्षे साध्यपर्यवसानप्राप्त्या पटस्याप्यतन्तुजन्यत्वसिद्धिप्रसङ्गादित्यर्थः ।

वा०र०— एतज्जनको यः संयोग इति । ननु तत्संयोगस्य प्रसिद्धत्वात् । कथमेतदिति चेन्न । एवंजातीयकप्रयोगान् परामृश्य संयोगेति पर्यवसानसिद्धोऽर्थः । सम्बन्धेति विवक्षितमिति समाधानं लेख्यमस्ति ।

समवायासिद्धिरितीति । एतत्प्रत्ययजनकसम्बन्धस्य योगात् राहित्ये उक्तसमवायमादायैव पर्यवसानादिति भावः । संयोगरूपसम्बन्धजन्यत्वस्य तत्राभावादिति । कुण्डबदरादिस्थल इव भूतलघटाभावयोर्यः संयोगः प्राप्तः स नास्तीति तज्जन्यत्वस्य सुतरामभावादिति योज्यम् । पक्षातिरिक्तस्थले विशेषणाभावप्रयुक्त एव विशिष्टाभावः सम्भवतीति भावेनेदम् । वस्तुतस्तु तत्रोभयाभावप्रयुक्तविशिष्टाभावसम्बन्धजन्यत्वमेव नेत्यर्थः । तज्जनक-सम्बन्धस्यैवाभावात् । विशेषणविशेष्याभावसम्बन्धस्तु न विवक्षणीयः । अत एवोत्तरत्र तमाशङ्क्य परिहार इति तात्पर्यम् । एतज्जनको यस्तन्तुः तस्य भावः तत्वं तद्रहितेत्यर्थं मनसि कृत्वाह **अत्र चेति** । **तद्धत्व-सम्भवादिति** । सम्बन्धादीत्यादिपदार्थविवरणमेतत् ।

स०व्र०— एतज्जनकेति । एतज्जनकत्वे सति तत्संयोगत्वं तद्रहितो यः सम्बन्धः तज्जन्य इत्यर्थः । एतच्छब्देन पक्षीभूतस्य तन्तुषु पट इति प्रत्ययस्यैव परामर्शः । तथोत्तरत्रापि । अत्र एतज्जनकत्व-रूपविशेषणाभावप्रयुक्तः एतज्जनकसंयोगत्वरूपविशिष्टस्याभावः इह कुण्डे बदराणीति प्रत्ययजनकसंयोग-रूपसम्बन्धे अस्तीति दृष्टान्ते साध्यपर्यवसानम् । पक्षीभूततन्तुषु पट इत्याकारप्रत्ययजनकसम्बन्धे एतज्जन-कत्वरूपविशेषणसद्भावेन तदभावप्रयुक्तविशिष्टाभावस्यानुपपत्त्या संयोगत्वरूपविशेष्याभावप्रयुक्तस्यैव तस्य वाच्यत्वात् संयोगत्वरहितसम्बन्धसिद्धौ समवायसिद्धिरिति भावः ।

विठ्ठल०— एतज्जनकेति । एतस्य इह तन्तुषु पट इति प्रत्ययस्य जनको यः संयोगः चक्षुः-पटसंयोगः तत्त्वरहितो यः सम्बन्धः तज्जन्य इत्यर्थः । एतज्जनकसंयोगत्वं विशिष्टतद्राहित्यं द्वेधा घटते संयोगत्वरूपविशेष्यराहित्येन वा एतज्जनकत्वेति विशेषणराहित्येन वा तत्र पक्षे एतज्जनकत्वरूपविशेषणस्य सत्त्वात्संयोगत्वरूपविशेष्यव्यतिरेकेण विशिष्टराहित्यमादाय साध्यपर्यवसानेन संयोगादन्यः समवायः सिद्ध्यति । दृष्टान्तीकृते यः कुण्डे बदराणीति प्रत्यये संयोगजन्यतासत्त्वेऽप्येतज्जनकतारहितेन साध्यपर्यवसानमिति द्रष्टव्यम् । अत्र सम्बन्धजन्य इत्येवोक्ते संयोगसिद्ध्या अर्थान्तरता स्यादतः संयोगत्वरहितेति सम्बन्ध-विशेषणम् । तावत्युक्ते कुण्डबदरसम्बन्धे संयोगत्वराहित्याभावेन साध्यवैकल्यम् । अत एतज्जनकेति संयोग-विशेषणम् । तथा च कुण्डबदरसम्बन्धे संयोगत्वस्य सत्त्वेऽपि । एतज्जनकत्वरूपविशेषणाभावेन साध्य-वैकल्यपरिहारः भूतलसंयोगादीत्यादिशब्देन विशेषविशेष्यभावग्रहणम् । तस्यापि क्वचित्सम्बन्धत्वाङ्गीकारात् । **इत्याभासेति** । तन्तुत्वरहितोपादानजन्यत्वस्य पक्षभूतपटे पर्यवसाने मृदाद्युपादानकत्वापत्तेराभासत्वमिति ज्ञेयम् । **समवायेति** । समवायस्य समवायिना अभावस्य भूतलादिना च सम्बन्धानङ्गीकारादिति भावः । अर्थान्तरत्वमिति भावः ।

चषक— एतज्जनकेति । साध्यशरीरे रहितान्तानुपादाने समीहितासिद्धिप्रसङ्गेन तद्विधूनाय तदुपादानम् । निदर्शने साध्यवैकल्यमपहस्तयितुं जनकान्तेन संयोगो विशेषितः । तथा च कुण्डबदरसंयोगे

एतज्जनकत्वरूपविशेषणाभावनिबन्धनतद्विशेषितसंयोगत्वराहित्यमक्षतमिति नोक्तक्षतिरिति भावः । पक्षे साध्यसङ्गमनं तु समवायमादायैवेति समीहितसिद्धिरवसेया ।

॥ इति समवाये अनुमानप्रमाणाभावप्रदर्शने इहेतिप्रत्ययानुमानस्यापि दूषणम् ॥

* * *

॥ अथ समवाये अनुमानप्रमाणाभावप्रदर्शने प्रमेयत्वानुमानस्यापि दूषणम् ॥

१४६ सु०— रूपादयः सम्बन्धवन्तः प्रमेयत्वात् घटवदित्यप्यनुपपन्नम्, समवायाभावयोर्व्यभिचारात् । तत्रापि विशेषणविशेष्यभावाभ्युपगमान्नेति चेन्न; तस्य परेण सम्बन्धत्वानङ्गीकारात्, अङ्गीकारे वा तेनैवार्थान्तरत्वात्, मतुबर्थस्याभावाद्बाधितविषयत्वाच्च । समवायः स्वेनैव सम्बन्धी (इत्यादि) स्यादिति निरस्तम् ।

परि०— मतुबर्थस्येति । सम्बन्धवन्त इति साध्ये मतुबर्थस्य सम्बन्धघटितत्वात् तस्य च तत्राभावादिति भावः । ननु रूपादिसम्बन्धस्य समवायत्वेऽपि तस्य स्वनिर्वाहकत्वान्न मत्वर्थो बाधित इत्यत आह **समवाय इति** । 'स स्वनिर्वाहकश्चेत्स्याद्द्रव्यमेव तथा न किमि'त्येतद्व्याख्यावसरे निरस्तमित्यर्थः ।

यादु०— मतुबर्थस्येति । सम्बन्धस्येति शेषः । समवायेऽतिरिक्तसम्बन्धाभावादिति भावः ।

वं०प०— समवायाभावयोरिति । समवायतद्गतत्वधर्मयोरभावभूतलयोश्चेति योज्यम् । साध्यस्यापि सत्वान्न व्यभिचार इत्याशङ्कते **तत्रापीति** । **तस्येति** । सम्बन्धिभिन्नत्वघटितत्वलक्षणाभावादिति भावः । ननु सम्बन्धवन्त इत्यत्र मतुबर्थः सम्बन्धः स्वयं समवाय एवेत्याशङ्क्याह **समवाय इति** । **निरस्तं** 'स स्वनिर्वाहकश्चेत्स्यादि'त्यनेनेत्यर्थः ।

कं०रा०— मतुबर्थस्येति । रूपादयः सम्बन्धवन्त इत्यत्र यूपादिषु सम्बन्धशब्दितसमवायनिरूपितस्य मत्वर्थस्य सम्बन्धाभावेन बाधितविषयत्वाच्च नोक्तानुमानं युक्तमित्यर्थः । ननु समवायस्य स्वनिर्वाहकत्वेन स्वस्मिन् स्वस्यैव सम्बन्धरूपतया मत्वर्थसत्त्वान्न बाधितविषयत्वमित्यत आह **समवाय इति** ।

श्रीनिधि०— मतुबर्थस्याभावादिति । सम्बन्धवन्त इत्यनेन सम्बन्धस्य रूपादेश्च सम्बन्धः प्रतीयते । तत्र न तयोः सम्बन्धसमवायः । समवायान्तराभावात् । नापि संयोगः । उभयोः द्रव्यत्वात् तथा च बाध इति निरस्तमिति । स्वनिर्वाहकश्चेत् स्यादित्यनेनेति द्रष्टव्यम् ।

शे०वा०— तस्य परेणेति । सम्बन्धो हि सम्बन्धिभ्यां भिन्नस्तदाश्रितः स्वयमेकश्चेति सम्बन्ध-लक्षणानाक्रान्तत्वादिति भावः । **मतुबर्थस्येति** । सम्बन्धस्येत्यर्थः । रूपादिषु समवायरूपसम्बन्धेन सहान्यस्य सम्बन्धस्याभावात् तत्साधने बाध इति भावः ।

ननु समवायस्य स्वनिर्वाहकत्वेन रूपादीनां घटादिभिर्यः समवायस्तस्यैव समवायेन सह रूपादीनां सम्बन्धत्वसम्भवेन रूपादीनां तद्वत्त्वसम्भवान्न बाधितविषयत्वमित्यत आह **समवाय इति** । **निरस्तमिति** । 'द्रव्यमेव तथा न किमि'त्यादिनेति शेषः ।

स०व्र०— निरस्तं 'द्रव्यमेव तथा न किमि'त्यादिनेति शेषः ।

विट्ठल०— सम्बन्धवन्त इति । विवक्षितसमवायवत्त्वे साध्ये मतुबर्थस्य सम्बन्धघटितत्वेन तस्य समवाये अभावादित्यर्थः । ननु सम्बन्धवत्त्वरूपसाध्यस्य न बाधितत्वं समवायस्य स्वनिर्वाहकत्वेन स्वेनैव स्वत्त्वोपपत्तेरित्यत आह **समवाय इति** । स स्वनिर्वाहकश्चेत्स्यादद्रव्यमेव तथा न किमित्यत्रेत्यर्थः ।

चषक— मतुबर्थस्य समवायप्रतियोगिकसम्बन्धान्तरस्य ।

॥ इति समवाये अनुमानप्रमाणाभावप्रदर्शने प्रमेयत्वानुमानस्यापि दूषणम् ॥

* * *

॥ अथ समवाये अनुमानप्रमाणाभावप्रदर्शने चक्षुष्ट्वानुमानस्यापि दूषणम् ॥

१४७ सु०— 'इदं चक्षुरेतज्जन्यसंयोगज्ञानत्वरहितसम्बन्धज्ञानजनकं चक्षुष्ट्वादन्य-चक्षुर्वत्', 'अहं मन्निष्ठसंयोगज्ञानत्वरहितसबन्धज्ञानवानात्मत्वादात्मान्तरवत्', 'अयं काल इदानीन्तनसंयोगज्ञानत्वरहितसम्बन्धज्ञानवान् कालत्वादन्यकालवत्' इत्यादीनि आभास-समानयोगक्षेमत्वात्, विशेषणविशेष्यभावादिनाऽर्थान्तरत्वाच्चापास्तानि ।

परि०— इदं चक्षुरिति । बुद्धिस्थं चैत्रीयं चक्षुरित्यर्थः । एतज्जन्यं यत्संयोगविषयक-ज्ञानं तत्त्वरहितं यत्सम्बन्धज्ञानं तज्जनकमित्यर्थः । संयोगज्ञानजनकत्वेनार्थान्तरवारणाय रहितान्तं विशेषणम् । अन्यजन्यसंयोगज्ञानत्वराहित्येनार्थान्तरनिरासायैतज्जन्येति । **अन्यचक्षुर्वदिति** । मैत्रीयचक्षुर्वदित्यर्थः । चैत्रीयचक्षुर्जन्यसंयोगज्ञानभिन्नसंयोगज्ञानजनकत्वेन तत्र साध्यानुगमो ध्येयः । अहमिति पक्षः । मन्निष्ठं यत्संयोगज्ञानं तत्त्वरहितं यत्सम्बन्धज्ञानं तद्वानित्यर्थः । अत्रापि पूर्ववत्साध्यपदकृत्यं दृष्टान्ते साध्यानुगमश्च ज्ञेयः । **आभाससमानेति** । इदं चक्षुरेतज्जन्यरूपव-

द्घटज्ञानत्वरहितघटज्ञानजनकं चक्षुष्त्वादन्यचक्षुर्वत् । अहं मन्निष्ठरूपवद्घटज्ञानत्वरहितघटज्ञानवान् आत्मत्वात् । आत्मान्तरवत् । अयं कालः इदानीन्तनरूपरसगन्धवद्घटज्ञानत्वरहितघटज्ञानवान् कालत्वादन्यकालवत् इत्यादिभिः रूपरसादिहीनचक्षुर्ग्राह्यघटादिसाधकैराभासैः समानयोगक्षेमत्वादित्यर्थः । न च तेषु तादृशघटादेरभावाद्बाध इति चेत् तत्प्रयोगेऽपि तथैवेति साम्याद्विपक्षे बाधकाभावेनाप्रयोजकत्वमित्यस्यापि साम्यादिति भावः । **विशेषणविशेष्यभावादिनेति** । आदिपदेन स्वस्वामिभावः जगदाधारताप्रयोजकत्वस्वरूपसम्बन्धादिश्च ग्राह्यः ।

यादु०— इदं चक्षुरिति । अत्र सम्बन्धज्ञानजनकमित्येवोक्ते संयोगज्ञानजनकत्वेन सिद्धसाध्यता अतः संयोगज्ञानत्वरहितेति सम्बन्धज्ञानविशेषणम् । दृष्टान्ते साध्यवैकल्यपरिहारायैतज्जन्येति संयोगज्ञानविशेषणम् । तथा चान्यचक्षुर्जन्यसम्बन्धज्ञाने संयोगज्ञानत्वसत्त्वेऽप्येतज्जन्यत्वरूपविशेषणाभावेन विशिष्टाभावसत्त्वान्न साध्यवैकल्यम् । एतच्चक्षुर्जन्यसम्बन्धज्ञाने चैतज्जन्यत्वरूपविशेषणस्य सत्त्वात् संयोगज्ञानत्वराहित्यमादायैव साध्यपर्यवसाने समवायसिद्धिरिति द्रष्टव्यम् । अहं मन्निष्ठेत्यत्रापि सिद्धसाध्यतावारणाय संयोगज्ञानत्वरहितेति सम्बन्धज्ञानविशेषणम् । साध्यवैकल्यवारणाय मन्निष्ठेति संयोगज्ञानविशेषणम् । एवं चात्मान्तरगते सम्बन्धज्ञाने संयोगज्ञानत्वसत्त्वेऽपि मन्निष्ठत्वरूपविशेषणाभावेन विशिष्टाभावसत्त्वान्न दृष्टान्ते साध्यवैकल्यम् । मदीयसम्बन्धज्ञाने च मन्निष्ठत्वरूपविशेषणस्य सत्त्वात् संयोगज्ञानत्वराहित्यमादायैव साध्यपर्यवसाने समवायसिद्धिरिति ज्ञातव्यम् । एवमयं काल इत्यत्रापि सिद्धसाध्यतावारणाय संयोगज्ञानत्वरहितेति सम्बन्धज्ञानविशेषणम् । साध्यवैकल्यपरिहाराय चेदानीन्तनेति संयोगज्ञानविशेषणम् । एवं चान्यकालगतसम्बन्धज्ञाने संयोगज्ञानत्वसत्त्वेऽपि इदानीन्तनत्वरूपविशेषणाभावेन विशिष्टाभावसत्त्वान्न साध्यवैकल्यम् । एतत्कालीनसम्बन्धज्ञाने चेदानीन्तनत्वरूपविशेषणस्य सत्त्वात् संयोगज्ञानत्वराहित्यमादायैव साध्यपर्यवसाने समवायसिद्धिरिति ज्ञातव्यम् । **आभाससमानेति** । इदं चक्षुरेतज्जन्यसंयोगसमवायज्ञानत्वरहितसम्बन्धज्ञानजनकमित्यादिरूपेणापि प्रयोक्तुं शक्यत्वेन तृतीयस्यापि सम्बन्धस्य तेन सिद्धिप्रसङ्गादित्यर्थः । अयं पट एतज्जनकतन्तुत्वरहितोपादानजन्यः पटत्वात्पटान्तरवदित्याभाससमानयोगक्षेमत्वादित्यर्थ इत्यप्याहुः ।

कं०रा०— एतज्जन्येति । अत्रैतत्पदं पक्षीकृतचक्षुर्विशेषपरं तथा चैतज्जन्यत्वे सति यत्संयोगज्ञानजन्यत्वं तद्रहितं यत्सम्बन्धज्ञानं तज्जनकमित्यर्थः । दृष्टान्तीकृतचक्षुरन्तरजन्यसम्बन्धज्ञानस्य संयोगज्ञानरूपत्वेऽपि तस्य पक्षीकृतचक्षुर्विशेषजन्यत्वाभावेन एतज्जन्यः संयोगज्ञानत्वरहितसम्बन्धज्ञानजनकत्वसिद्धिदशायां सम्बन्धज्ञाने एतज्जन्यसंयोगज्ञानत्वराहित्यरूपविशिष्टाभावस्य बाधेन विशेषणाभावमादाय पर्यवसानानुपपत्त्या विशेष्याभावमादाय पर्यवसानावश्यंभावात्संयोगज्ञानत्वरहितसमवायज्ञानजनकत्वं सिद्ध्यतीति समवायसिद्धिरिति भावः । **मन्निष्ठेति** । मन्निष्ठत्वे सति यत्संयोगज्ञानत्वं तद्रहितं यत्सम्बन्धज्ञानं तद्वानित्यर्थः । दृष्टान्तीकृतात्मान्तरनिष्ठसम्बन्धज्ञानस्य मन्निष्ठत्वाभावेन मन्निष्ठसंयोगज्ञानत्वरूपविशेष्याभावमादायैव विशिष्टा-

भावस्य पर्यवसानावश्यम्भावात्संयोगज्ञानत्वरहितसमवायज्ञानवत्वं सिद्ध्यतीति समवायसिद्धिरिति भावः । **इदानींतनेति** । इदानींतनत्वविशिष्टं यत्संयोगज्ञानत्वं तद्रहितयत्सम्बन्धज्ञानं तद्वानित्यर्थः । दृष्टान्तीकृतान्यकालनिष्ठसंयोगज्ञानस्येदानींतनत्वाभावेनेदानींतनसंयोगज्ञानत्वरहिततया तादृशसम्बन्धज्ञानवत्वरूपसाध्यदृष्टान्ते अस्ति पक्षे तु संयोगज्ञानत्वे रूपविशेष्याभावमादायैव विशिष्टाभावस्य पर्यवसानावश्यम्भावात् संयोगज्ञानत्वरहितसमवायज्ञानवत्वं सिद्ध्यतीति समवायसिद्धिरिति भावः । **आभाससमानयोगक्षेमत्वादिति** । इदं चक्षुरेतज्जन्यसंयोगसमवायान्यतरज्ञानत्वरहितसम्बन्धज्ञानजनकं चक्षुष्त्वादन्यचक्षुर्वदित्याद्याभाससमानयोगक्षेमत्वात् इत्यर्थः ।

श्रीनिधि०— आभाससमानयोगक्षेमत्वादिति । अयं तन्तुः एतज्जन्यपटत्वं हि तद्व्यजनकः तन्तुत्वात् त्वन्तरवत् । अहं मन्निष्ठसम्बन्धज्ञानत्वरहितसम्बन्धज्ञानवान् आत्मत्वात् आत्मान्तरवत् । अयं कालः इदानीन्तनसम्बन्धज्ञानत्वरहितसम्बन्धज्ञानवान् कालत्वात् इत्याभासानुमानं ऊह्यम् ।

शे०वा०— इदं चक्षुरिति । अत्रान्यचक्षुर्जन्यसम्बन्धज्ञानस्य संयोगज्ञानत्वेन तद्राहित्यस्य तत्राभावेऽप्येतज्जन्यत्वरूपविशेषणाभावप्रयुक्तैतज्जन्यसंयोगज्ञानत्वरूपविशिष्टाभावसत्त्वान्न दृष्टान्ते साध्यवैकल्यम् । एतच्चक्षुर्जन्यसम्बन्धज्ञाने चैतज्जन्यत्वरूपविशेषणस्य सत्त्वेन तदभावप्रयुक्तविशिष्टाभावस्य तत्र बाधितत्वेन हेतोः पक्षधर्मताबलात् संयोगज्ञानत्वरूपविशेष्याभावप्रयुक्तविशिष्टाभावमादायैव साध्यपर्यवसानात् समवायसिद्धिरिति ध्येयम् । **मन्निष्ठेति** । मन्निष्ठं यत्संयोगज्ञानं तस्य भावस्तत्त्वं तद्रहितं यत्सम्बन्धज्ञानं तद्वानिति साध्यार्थः । ततश्चात्मान्तरगते सम्बन्धज्ञाने संयोगज्ञानत्वरूपविशेष्यस्य सत्त्वेन तदभावप्रयुक्तविशिष्टाभावस्य तत्रासम्भवेऽपि तस्य मन्निष्ठत्वाभावेन मन्निष्ठत्वरूपविशेषणाभावप्रयुक्तमन्निष्ठसंयोगज्ञानत्वरूपविशिष्टाभावस्य सम्भवान्न दृष्टान्ते साध्यवैकल्यम् । मन्निष्ठसम्बन्धज्ञाने च मन्निष्ठत्वरूपविशेषणसद्भावेन तदभावस्य तत्र बाधिततया विशेषणाभावप्रयुक्तोक्तरूपविशिष्टाभावासम्भवेऽपि हेतोः पक्षधर्मताबलात् संयोगज्ञानत्वरूपविशेष्याभावप्रयुक्तोक्तविशिष्टाभावमादायैव साध्यपर्यवसानात् समवायसिद्धिरिति द्रष्टव्यम् । **अयं काल इति** । इदानीन्तनं यत्संयोगज्ञानं तस्य भावस्तत्त्वं तद्रहितं यत्सम्बन्धज्ञानं तद्वानिति साध्यार्थः । अत्र चान्यकालगतसम्बन्धज्ञाने संयोगज्ञानत्वसत्त्वेन तदभावप्रयुक्तोक्तविधविशिष्टाभावासम्भवेऽपि तस्येदानीन्तनत्वाभावेनेदानीन्तनत्वरूपविशेषणाभावप्रयुक्तेदानीन्तनसंयोगज्ञानत्वरूपविशिष्टाभावसत्त्वान्न दृष्टान्ते साध्यवैकल्यम् । एतत्कालसम्बन्धगतज्ञाने चेदानीन्तनत्वरूपविशेषणसद्भावेन तदभावप्रयुक्तविशिष्टाभावासम्भवाद्धेतोः पक्षधर्मताबलात् पक्षे साध्यं सिद्ध्यत् संयोगज्ञानत्वरूपविशेष्याभावप्रयुक्तविशिष्टाभावमादायैव पर्यवस्यतीति संयोगज्ञानत्वरहितसम्बन्धज्ञानसिद्ध्या समवायसिद्धिरिति द्रष्टव्यम् । इत्यादीत्यादिपदेनायं देश एतद्देशगतसंयोगज्ञानत्वरहितसम्बन्धज्ञानवान् देशत्वाद्देशान्तरवदित्यादिपरिग्रहः । **आभाससमानयोगक्षेमत्वादिति** । इदं चक्षुरेतज्जन्यसंयोगसमवायज्ञानत्वरहितसम्बन्धज्ञानजनकं चक्षुष्त्वादन्यचक्षुर्वत् । अहं मन्निष्ठसंयोगसमवायज्ञानत्व-

रहितसम्बन्धज्ञानवानात्मत्वादात्मान्तरवत् । अयं काल इदानीन्तनसंयोगसमवायज्ञानत्वरहितसम्बन्धज्ञानवान् कालत्वादन्यकालवदित्यादिरूपेणापि प्रयोक्तुं शक्यत्वादुक्तविधया समवायस्येव संयोगसमवायभिन्नस्य तृतीयस्यापि सम्बन्धस्य सिद्धिः स्यादित्यर्थः । **विशेषणेति** । एतज्जन्यसंयोगज्ञानत्वरहितसम्बन्धज्ञानजनकत्वसिद्धावपि न समवायः सिद्ध्यति । तादृशविशेषणविशेष्यभावादिरूपसम्बन्धज्ञानजनकत्वेनापि प्रतिज्ञार्थपर्यवसानादिति भावः । न चाद्विष्ठत्वेन तेषामसम्बन्धत्वान्न तज्ज्ञानजनकत्वेन प्रतिज्ञार्थोपपत्तिरिति वाच्यम् । संयोगस्याप्यद्विष्ठताया वक्ष्यमाणत्वेन द्विष्ठत्वस्य सम्बन्धत्वसाधकत्वाभावादित्याशयात् ।

वा०र०— एतज्जन्यं यत्संयोगज्ञानस्य भावस्तत्त्वमिति सिद्धं कृत्वाह **अत्र चान्येति** । **सम्बन्धज्ञानस्येति** । घटपटौ संयुक्ताविति सम्बन्धज्ञानस्येत्यर्थः । **न समवायेति** । घटादिभेदेनाप्युपपत्तेरिति भावः ।

स०व्र०— **इदं चक्षुरिति** । अत्र एतज्जन्यत्वे सति संयोगज्ञानत्वरूपविशिष्टस्याभावः दृष्टान्तीकृतेऽन्यचक्षुषि एतज्जन्यत्वरूपविशेषणाभावप्रयुक्तः । पक्षे तु एतज्जन्यत्वरहितसम्बन्धज्ञानजन्यत्वानुपपत्त्या संयोगज्ञानत्वरूपविशेष्याभावप्रयुक्त इति द्रष्टव्यम् । एवमेवोत्तरव्यतिरेकेष्वपि विशिष्टव्यतिरेको द्रष्टव्यः । **आभाससमानयोगक्षेमत्वादिति** । अयं पटः एतज्जनकतन्तुत्वरहितोपादानजन्यः । पटत्वात् पटान्तरवदित्याभाससमानयोगक्षेमत्वादित्यर्थः ।

विष्ठल०— **इदं चक्षुरिति** । अत्रैतज्जन्यसंयोगज्ञानत्वं विशिष्टम् । तत्रैतज्जन्यत्वरूपविशेषराहित्ये दृष्टान्ते विशेषराहित्येन पक्षे विशिष्टराहित्यम् । एवमुत्तरत्रापि । अत्र सम्बन्धज्ञानजनकमित्येवोक्ते संयोगज्ञानजनकत्वेन सिद्धसाधनता । अतः संयोगज्ञानत्वरहितेति सम्बन्धज्ञानविशेषणम् । दृष्टान्ते साध्यवैकल्यपरिहाराय एतज्जन्येति संयोगज्ञानविशेषणम् । तथा चान्यचक्षुर्जन्यसंयोगज्ञाने संयोगजन्यज्ञानत्वस्य सत्त्वेऽप्येतज्जन्यतारूपविशेषणाभावेन विशिष्टराहित्यस्य सत्त्वान्न साध्यवैकल्यम् । एतच्चक्षुर्जन्यसम्बन्धज्ञाने एतज्जन्यत्वरूपविशेषणस्य सत्त्वात्संयोगत्वराहित्यमादाय साध्यपर्यवसानेन संयोगातिरिक्तं सम्बन्धासिद्ध्या समवायसिद्धिरिति द्रष्टव्यम् । अहं मन्निष्ठेत्यत्रापि सिद्धसाधनतावारणाय संयोगज्ञानत्वरहितेति सम्बन्धज्ञानत्वविशेषणम् । साध्यवैकल्यवारणाय **मन्निष्ठेति** । संयोगज्ञानविशेषणम् । एवं चात्मान्तरगते सम्बन्धज्ञाने संयोगत्वस्य सत्त्वेऽपि मन्निष्ठत्वरूपविशेषणाभावेन विशिष्टाभावस्य सत्त्वान्न दृष्टान्ते साध्यवैकल्यम् । मदीयसम्बन्धज्ञाने मन्निष्ठत्वरूपविशेषणस्य सत्त्वे संयोगज्ञानत्वराहित्यमादायैव साध्यपर्यवसानेन समवायसिद्धिरिति ज्ञातव्यम् । एवमयं काल इत्यत्रापि सिद्धसाधनतावारणाय संयोगज्ञानत्वरहितेति सम्बन्धज्ञानविशेषणम् । साध्यवैकल्यपरिहाराय इदानींतनेति संयोगज्ञानविशेषणम् । एवं चान्यकालगतसम्बन्धज्ञाने संयोगज्ञानत्वस्य सत्त्वेऽपीदानीन्तनत्वरूपविशेषणाभावेन विशिष्टाभावस्य सत्त्वान्न साध्यवैकल्यम् । एतत्कालसम्बन्धज्ञाने वेदानीन्तनत्वरूपविशेषणस्य सत्त्वेऽपि संयोगज्ञानत्वरूपविशेषणराहित्यमादायैव सिद्ध्यपर्यवसानेन समवायसिद्धिरिति ज्ञातव्यम् । **आभासेति** । इदं चक्षुरेतज्जन्यसंयोगसमवायत्वरहितज्ञानजनकं चक्षुष्त्वात् । अहं

मन्निष्ठसंयोगसमवायज्ञानत्वरहितसम्बन्धज्ञानवानित्यादि रूपेण साधने तृतीयसम्बन्धस्यापि सिद्धिप्रसङ्गात् । तथा चेदं चक्षुरेतज्जन्यरूपवद्घटज्ञानत्वरहितघटज्ञानजनकम् । चक्षुष्त्वादन्यच्चक्षुविदित्यादिसाधने रूपादिहीनचक्षुग्राह्य-घटादिसिद्धिप्रसङ्गात् । तथा अयं पट एतत्तन्तुत्वरहितोपादानजन्यः पटत्वात्पटान्तरवदिति साधने पटान्तरा-पादनतन्तुजन्यत्वस्य वा सिद्धिप्रसङ्गादिति भावः ।

चषक— इदं चक्षुरिति । पुरोवर्ति चक्षुरित्यर्थः । समीहितासिद्धिनिरासाय सम्बन्धज्ञानविशेषण-तया रहितान्तं निदर्शने साध्यवैकल्यपरिहाराय संयोगज्ञानविशेषणतयैतज्जन्यान्तमुपात्तम् । अनिदंचक्षुर्जन्यज्ञाने विशेषणाभावनिबन्धनतद्विशेषिताभावसत्त्वात्साध्यसङ्गमनं निदर्शनेऽवसेयम् । पक्षे तु समवायज्ञाने विशेष्या-भावनियन्त्रितविशिष्टाभावमादायैव साध्यं सङ्गमनीयमिति समीहितसिद्धिरिति मन्तव्यम् । अनयैव दिशा शिष्टानुमानयोरपि पदप्रयोजनान्यवसेयानि । **आभाससमानेति** । इदं चक्षुरेतज्जन्यसंयोगसमवायज्ञानत्वरहित-सम्बन्धज्ञानजनकमित्यादिरूपेणापि प्रयोक्तुं सुशकतया तृतीयस्यापि सम्बन्धस्य सिद्धिः प्रसज्येतेति भावः ।

॥ इति समवाये अनुमानप्रमाणाभावप्रदर्शने चक्षुष्त्वानुमानस्यापि दूषणम् ॥

* * *

॥ अथ समवाये अनुमानप्रमाणाभावप्रदर्शने जातित्वानुमानस्यापि दूषणम् ॥

१४८ सु०— 'संयोगत्वं सम्बन्धव्यावृत्तं जातित्वाद्गोत्ववदि'ति सिद्धसाधनम्, जातेः प्रतिव्यक्तिनियतत्वस्य वक्ष्यमाणत्वेनैकस्य संयोगत्वस्य संयोगान्तराद्व्यावृत्तेः, विशेषण-विशेष्यभावादितो व्यावृत्तेश्च । 'विवादाध्यासिता मृद्घटसम्बद्धा द्रव्यत्वादाकाशवदि'ति च घटान्तरसंयोगेनार्थान्तरम्, एतद्घटसम्बद्धेति निर्देशेऽप्येतद्घटसम्बन्धमलब्ध्वा विनष्टद्रव्ये-ऽनैकान्तिकम् । तत्रापि परम्परासम्बन्धोऽस्तीति चेत्, तर्हि सिद्धसाधनम्, मृत्संयुक्त-भूतलस्य घटसंयुक्तत्वात् ।

परि०— सिद्धसाधनमित्युक्तं व्यनक्ति **जातेरिति** । 'नरत्वादिकमप्येवं तत्तद्धर्मतयेयते' इत्यत्र वक्ष्यमाणत्वेनेत्यर्थः । मृदित्यन्तं पक्षः । घटसम्बद्धेति साध्यम् । **परम्परेति** । एतद्घट-सम्बद्धभूतलाकाशात्मादिसम्बन्ध इत्यर्थः ।

गु०दी०— संयोगत्वं सम्बन्धव्यावृत्तम् इत्यत्र घटत्वं घटव्यावृत्तं जातित्वात्पटवदित्याभास-समानयोगक्षेमत्वाच्च न युक्तमिति ज्ञातव्यम् ।

वं०प०— व्यावृत्तेश्चेति । ततश्चार्थान्तरतेत्यर्थः । एतद्घटसम्बन्धमलब्ध्वा स्थितेऽपि घटे एतद्घट-सम्बन्धयोग्यता वर्तत एवेति न व्यभिचार इत्यतो योग्यताया अप्यभावं सूचयितुं विनष्ट इत्युक्तम् । नन्वेतद्घटसम्बद्धमलब्ध्वेत्ययुक्तम् । तत्स्थितिदशायामेतद्घटसम्बन्धभूतलसम्बन्धसत्त्वेन परम्परासम्बन्धस्य सत्त्वादिति शङ्कते **तत्रापीति** । **मृदिति** । मृत्संयुक्तभूतलस्य घटसम्बद्धत्वान्मृद्घटसम्बद्धेत्युच्यत इति सिद्ध-साधनतेत्यर्थः ।

कं०रा०— संयोगत्वमिति । संयोगत्वस्य संयोगावृत्तित्वायोगेन सम्बन्धव्यावृत्तत्वं सिध्यत्समवाय-व्यावृत्तत्वमादायैव पर्यवस्यतीति समवायसिद्धिरिति भावः । प्रकारान्तरेण सिद्धसाधनत्वमुपपादयति **विशेषण-विशेष्यभावादित इति** ।

श्रीनिधि०— संयोगत्वं सम्बन्धाद्व्यावृत्तमिति । यस्मात्सम्बन्धाद्व्यावृत्तं स समवाय इति भावः । **वक्ष्यमाणत्वेनेति** । 'नरत्वादिकमप्येवमि'त्यनेनेति भावः । **परम्परासम्बन्धोऽस्तीति** । एतद्घट-सम्बन्धभूतलसम्बन्धादिति भावः । **सिद्धसाधनम्** इत्युपलक्षणम् । एतद्घटविनाशोत्तरभाविनि द्रव्येऽनैकान्तिकत्वं च द्रष्टव्यम् ।

शे०वा०— भवेत्संयोगत्वस्य संयोगान्तराद्व्यावृत्ततया सिद्धसाधनम् । यदि संयोगत्वस्य प्रति-व्यक्ति भिन्नत्वमेव भवेत् । न चैतदस्ति । तत्कथं सिद्धसाधनमित्यत उक्तं **जातेरिति** । **वक्ष्यमाणत्वेनेति** । 'नरत्वादिकमप्येवं तत्तद्धर्मतयेयते' इत्यादिनेति शेषः । वस्तुगतिमनुरुध्य चैतदुक्तम् । वस्तुतस्तु जातेः प्रतिव्यक्तिनियतत्वानङ्गीकारेऽपि नास्माकं काचित्क्षतिः । तावता संयोगत्वस्य संयोगान्तरादव्यावृत्तत्वप्राप्तावपि विशेषणविशेष्यभावादिरूपसम्बन्धव्यावृत्ततया सिद्धसाधनताऽनिस्तारादित्याशयेनाह **विशेषणेति** । मृदन्तर-स्यैतद्घटसंयोगित्वात् सिद्धसाधनमित्यत उक्तं **विवादाध्यासितेति** । एतद्घटारम्भिकेत्यर्थः । किमत्र घट-सम्बद्धत्वमात्रं साध्यं किं वैतद्घटसम्बद्धत्वमिति विकल्पद्वयं मनसि निधायाद्यं दूषयति **घटान्तरेति** । द्वितीयं दूषयति **एतद्घटेति** । **परम्परेति** । एतद्घटसंयुक्तभूतलसंयुक्तत्वात् तद्द्रव्यस्यैतद्घटेन परम्परासम्बन्ध इत्यर्थः । सिद्धसाधनत्वमेवोपपादयति **मृदिति** ।

विट्ठल०— सम्बन्धव्यावृत्तमिति । व्यावृत्तिप्रतियोगिभूतसम्बन्धः समवाय इति सिद्ध्यतीति भावः । **व्यावृत्तेश्चेति** । तथा च सिद्धसाधनमिति भावः । **परम्परेति** । एतद्घटसम्बन्धेनाकाशादिना सम्बन्धो-ऽस्तीत्यर्थः । **तर्हीति** । परम्परासम्बन्धस्य साध्यत्व इत्यर्थः । सिद्धसाधनत्वमुपपादयति **मृत्संयुक्तेति** ।

॥ इति समवाये अनुमानप्रमाणाभावप्रदर्शने जातित्वानुमानस्यापि दूषणम् ॥

* * *

॥ अथ समवाये अनुमानप्रमाणाभावप्रदर्शने द्रव्यत्वानुमानस्यापि दूषणम् ॥

१४९ सु०— 'तन्तुपटौ नित्यसम्बन्धसम्बद्धौ द्रव्यत्वादाकाशवदि'ति, दृष्टान्तस्य साध्यविकलत्वादपास्तम् । 'संयोगः स्वव्यतिरिक्तसम्बन्धाद्भिन्नः प्रमेयत्वात् घटवदि'त्यत्र स्वव्यतिरिक्तपदेन स्वान्योन्याभावविवक्षायां सिद्धसाधनता, एकस्य संयोगस्य संयोगान्तराद्भिन्नत्वात् । संयोगत्वरहितत्वविवक्षायामप्रसिद्धविशेषणत्वम् । विशेषणविशेष्यभावादिना तत्समाधाने तेनैव सिद्धसाधनम् ।

यादु०— स्वव्यतिरिक्तेति । अत्र संयोगे सम्बन्धभिन्नत्वाभावेन बाधप्रसक्तौ तद्वारणाय स्वव्यतिरिक्तेति विशेषणमिति ज्ञातव्यम् ।

वं०प०— साध्येति । अजसंयोगमादायाकाशे कालादिना सम्बद्धत्वमस्तीति शङ्कितुर्हृदयम् । साध्यवैकल्यं दातुश्चाजसंयोगो नास्तीति । **संयोगत्वेति** । स्वातिरिक्तेति स्थाने एतद्विशेषणदाने इत्यर्थः ।

श्रीनिधि०— साध्यविकलत्वादिति । नित्यसंयोगः परेण नाङ्गीकृतः सः शब्दादिना समवायस्तु अस्माभिः नाङ्गीकृतः । एवञ्च उभयाभिप्रायेऽपि अन्तरीत्या दृष्टान्तस्य साध्यविकलतेति भावः । **तत्समाधाने** अप्रसिद्धविशेषणतासमाधाने ।

शे०वा०— साध्यवैकल्यादिति । एतदनुमानात्पूर्वं समवायासिद्धेरजन्यसंयोगस्य चानङ्गीकारादाकाशे नित्यसम्बद्धत्वासिद्धेरिति भावः ।

संयोगस्य सम्बन्धत्वात् तस्मिन्सम्बन्धभिन्नत्वं बाधितमित्यतः स्वव्यतिरिक्तत्वेन सम्बन्धविशेषणं कृतम् । स्वव्यतिरिक्ताद्भिन्नत्वमात्रसाधने च न समवायसिद्धिरित्यत उक्तं **सम्बन्धेति** । **एकस्येति** । पक्षीकृतसंयोगस्येत्यर्थः । **संयोगान्तरात्** स्वान्योन्याभाववत्संयोगात् । ननु संयोगत्वरहितत्वमेव सम्बन्धस्य स्वव्यतिरिक्तत्वं विवक्ष्यते । ततश्च संयोगान्तरस्य पक्षीकृतसंयोगान्योन्याभाववत्त्वेऽपि स्वस्यापि संयोगत्वान्न संयोगत्वरहितत्वमस्तीति पक्षीभूतसंयोगस्य संयोगत्वरहितसम्बन्धभेदासिद्धेर्न सिद्धसाधनमित्यत आह **संयोगत्वेति** । **अप्रसिद्धेति** । एतदनुमानप्रवृत्तेः पूर्वं संयोगत्वरहितसम्बन्धस्यासिद्धत्वात् तद्भेदाप्रसिद्धेरिति भावः । ननु च संयोगत्वरहितसम्बन्धस्य विशेषणविशेष्यभावादिरूपस्यैतदनुमानात्प्रागपि सिद्धेर्नाप्रसिद्धविशेषणतेत्यत आह **विशेषणेति** ।

विट्ठल०— साध्यविकलत्वादिति । अजसंयोगस्य कुत्राप्यभावादिति भावः । **संयोग इति** । अत्र संयोगस्य सम्बन्धभिन्नत्वाभावाद्बाधः स्यात् । अतः स्वातिरिक्तेति विशेषणं अप्रसिद्धविशेषणत्वमिति ।

एतदनुमानप्रवृत्तेः प्राक् संयोगत्वरहितसम्बन्धस्य क्काप्यप्रसिद्धत्वादित्यर्थः । विशेषविशेष्यभावादौ सम्बन्धत्वस्य प्रसिद्धेर्नाप्रसिद्धविशेषणतेत्यत आह **विशेषणेति** । **तेनैवेति** । तद्भिन्नत्वसिद्धेत्यर्थः ।

॥ इति समवाये अनुमानप्रमाणाभावप्रदर्शने द्रव्यत्वानुमानस्यापि दूषणम् ॥

* * *

॥ अथ समवाये अनुमानप्रमाणाभावप्रदर्शने मेयत्वानुमानस्यापि दूषणम् ॥

१५० सु०— 'अयं संयोग एतदन्यसंयोगत्वरहितसम्बन्धान्यो मेयत्वाद्घटवत्' इत्याद्याश्च आभाससमानयोगक्षेमत्वादुपेक्षणीयाः ।

परि०— एतदन्येति । एतदन्यो यस्तत्र तत्त्वमस्ति तद्रहितो यः सम्बन्धः तदन्य इत्यर्थः । एतदन्यसंयोगत्वरहितसम्बन्धः पक्षीकृतसंयोगो भवति । दृष्टान्ते पक्षीकृतसंयोगादन्यत्वेन साध्यानुगमः । पक्षे च स्वान्यत्वस्य स्वस्मिन् बाधात् तदन्यसम्बन्धान्यत्वेन पर्यवसानात् समवाय-सिद्धिरिति भावः । **आभाससमानयोगक्षेमत्वादिति** । चैत्रीयो घटः एतदन्यघटत्वरहितघटादन्यः, चैत्रात्मा एतदन्यात्मत्वरहितात्मान्यः मेयत्वात् पटवत् मैत्रवत् इत्याभाससमानेत्यर्थः । एवं नवीनो-त्प्रेक्षितानुमानान्तरनिरासस्तु तर्कताण्डवे प्रथमपरिच्छेदे ध्येयः । **समवायेऽनुमाननिरासः ॥**

यादु०— अयं संयोग इति । अत्र साध्ये संयोगान्तरान्यत्वमादायार्थान्तरतावारणाय संयोगत्व-रहितेति सम्बन्धविशेषणम् । दृष्टान्ते साध्यवैकल्यपरिहारायैतदन्येति संयोगविशेषणम् । तथा चैतदन्यो यः संयोगत्वरहितः सम्बन्धः पक्षीकृत एव संयोगस्तद्भिन्नत्वमादाय दृष्टान्ते साध्यसत्त्वान्न साध्यवैकल्यम् । पक्षे च स्वान्यत्वस्य स्वस्मिन्बाधितत्वात् संयोगत्वरहितसम्बन्धान्तरान्यत्वमादायैव साध्यपर्यसाने समवायसिद्धिरिति ज्ञातव्यम् । **आभासेति** । इमौ संयोगसमवायौ एतदन्यसंयोगसमवायत्वरहितसम्बन्धान्यौ मेयत्वाद्घटवदित्यपि प्रयोक्तुं शक्यत्वेन तृतीयस्यापि सम्बन्धस्य सिद्धिप्रसङ्गादित्यर्थः ।

कं०रा०— संयोगे त्वस्येत्यनुषज्यते **एतदन्येति** । अत्र एतच्छब्देन पक्षीकृतसंयोगविशेष उच्यते । तथा चैतदन्यत्वे सति यत्संयोगत्वं तद्रहितो यत्सम्बन्धः तदन्य इत्यर्थः । एतदन्यत्वरूपविशेषणाभावेनैत-दन्यसंयोगत्वरहितसम्बन्धः पक्षीकृतसंयोगविशेषः तदन्यत्वमादाय दृष्टान्ते साध्यमस्ति पक्षे तु स्वस्मिन् वान्यत्वस्य बाधितत्वेन संयोगत्वरहितसमवायान्यत्वमादायैव साध्यं पर्यवस्यतीति समवायसिद्धिरिति भावः । **आभासेति** । अयं संयोग एतदन्यसंयोगसमवायान्यतरत्वरहितसम्बन्धान्यः मेयत्वाद्घटवदित्याद्याभाससमान-योगक्षेमत्वादित्यर्थः ।

श्रीनिधि०— एतदन्यसंयोगत्वरहितसम्बन्धान्य इति । अत्र पक्षे संयोगत्वरहितसम्बन्धान्यत्वमादाय साध्यपर्यवसानम् । दृष्टान्ते तु नैवम् । संयोगत्वरहितसम्बन्धस्य एतदनुमानात् प्रागसिद्धेः । किञ्चैतदन्यत्वरहितसम्बन्धान्यत्वमादाय एतदन्यत्वरहितः सम्बन्धः पक्षीकृतः संयोगः । तदन्यत्वं च सिद्धमेवेति द्रष्टव्यम् । **आभाससमानयोगक्षेमत्वादिति** । संयोगपदस्थाने सम्बन्धपदप्रक्षेपेणेति भावः ।

शे०वा०— एतदन्येति । एतदन्यो यः संयोगस्तस्य भावस्तत्त्वं तद्रहितो यः सम्बन्धस्तदन्य इति साध्यार्थः । अत्र चैतदन्यत्वरूपविशेषणाभावप्रयुक्तैतदन्यसंयोगत्वरूपविशिष्टाभाववत्पक्षीभूतसंयोगान्यत्वस्य घटे सत्त्वाद्युक्तं तस्य दृष्टान्तत्वम् । एतदन्यत्वरूपविशेषणाभावप्रयुक्तैतदन्यसंयोगत्वरूपविशिष्टाभावस्य पक्षीभूतसंयोगमात्रनिष्ठत्वेन तदन्यत्वरूपसाध्यस्य तत्र बाधितत्वेन हेतोः पक्षधर्मताबलात् संयोगत्वरूपविशेषणाभावप्रयुक्तोक्तविशिष्टाभाववत् यत्किञ्चित्सम्बन्धमादायैव तदन्यत्वरूपसाध्यस्य पक्षे सिद्धिरिति समवायसिद्धिरिति द्रष्टव्यम् । **आभाससमानयोगक्षेमत्वादिति** । इमौ संयोगसमवायावेतदन्यसंयोगसमवायत्वरहितसम्बन्धान्यौ मेयत्वाद्घटवदित्यपि प्रयोक्तुं शक्यत्वादेतदुभयविलक्षणसम्बन्धस्यापि सिद्धिप्रसङ्गादित्यर्थः ।

स०व्र०— एतदन्येति । एतदन्यत्वे सति यत्संयोगत्वं तद्रहितो यः सम्बन्धः तस्मादन्य इत्यर्थः । अत्र चैतदन्यत्वरूपविशेषणाभावप्रयुक्तैतदन्यसंयोगत्वरूपविशिष्टाभाववत्पक्षीभूतसंयोगान्यत्वस्य घटे सत्त्वात् युक्तं दृष्टान्तत्वम् । एतदन्यत्वरूपविशेषणाभावप्रयुक्तैतदन्यसंयोगत्वरूपविशिष्टाभावस्य पक्षीभूतसंयोगमात्रनिष्ठत्वेन तदन्यत्वरूपसाध्यस्य तत्र बाधितत्वेन हेतोः पक्षधर्मताबलात् संयोगत्वरूपविशेष्याभावप्रयुक्तविशिष्टाभाववत् सम्बन्धान्तरमादायैव तदन्यत्वरूपसाध्यस्य पक्षे सिद्धेः समवायसिद्धिरिति भावः । **आभासेति** । इमौ संयोगसमवायौ एतदन्यसंयोगत्वसमवायत्वरहितसम्बन्धान्यौ मेयत्वात् घटवदित्यपि प्रयोक्तुं शक्यत्वादुभयविलक्षणसम्बन्धान्तरमपि सिद्ध्येदिति भावः ।

विट्ठल०— एतदन्येति । एतदन्यः पक्षीकृतसंयोगादन्यो यः संयोगत्वविशिष्टं तद्रहितो यः सम्बन्धः तदन्य इत्यर्थः । एतदन्यसंयोगत्वसाहित्यं द्वेधा घटते । एतदन्यत्वरूपविशेषणराहित्येन वा संयोगत्वरूपविशेष्यराहित्येन वा । तत्र दृष्टान्ते विशेषणराहित्येन पक्षे तु विशेष्यराहित्येन साध्यपर्यवसानम् । तथा च एतदन्यो यः संयोगतत्वरहितः सम्बन्धपक्षीकृत एव संयोगः तत्वरहितः । सम्बन्धः संयोगान्तरं तदन्यत्वं दृष्टान्तीभूते घटेऽस्तीति न साध्यवैकल्यम् । पक्षीभूते तु संयोगे एतदन्यत्वरहितः सम्बन्धः स्वयमेवेति स्वस्मिन् स्वान्यत्वस्य बाधितत्वादेव तदन्यः संयोगत्वरहितो यः सम्बन्धः तदन्यत्वमादाय साध्यपर्यवसानेन संयोगत्वरहितः सम्बन्धः समवाय इति सिद्ध्यतीति द्रष्टव्यम् । अत्र सम्बन्धान्य इत्येवोक्ते संयोगान्तरान्यत्वमादाय अर्थान्तरात् तद्वारणाय संयोगत्वरहितेति सम्बन्धविशेषणम् । दृष्टान्ते साध्यवैकल्यवारणाय एतदन्यत्वेति संयोगविशेषणम् । **आभाससमानेति** । इमौ संयोगसमवायावेतदन्यसंयोगसमवायत्वरहितसम्बन्धान्यौ मेयत्वाद्घटव-

दित्यपि प्रयोक्तुं शक्यत्वात् तृतीयसम्बन्धस्यापि सिद्धिप्रसङ्गात् । तथा विमतं भूतलमेतद्घटाधारत्वरहितघटाधारान्यद्भूतलत्वाद्भूतलान्तरवदिति प्रयोगेन परिदृश्यमानघटाधारत्वाभावादिप्रसङ्गेनाभाससमानत्वादिति भावः ।

चषक— आभाससमानयोगक्षेमत्वादिति । अयं घट एतदन्यघटत्वरहितघटान्यः, चैत्रात्मा एतदन्यात्मत्वरहितात्मान्यः मेयत्वात् पटवन्मैत्रवदित्याद्याभाससमानेत्यर्थः ॥ **समवायसाधकानुमानानां प्रतिविहितिः ॥**

॥ इति समवाये अनुमानप्रमाणाभावप्रदर्शने मेयत्वानुमानस्यापि दूषणम् ॥
॥ इति समवाये नानुमानमपि प्रमाणम् ॥

* * *

॥ अथ समवाये प्रमाणाभावस्योपसंहारः ॥

१५१ **सु०— तदेवं समवाये प्रमाणाभावान्न भेदपक्षोऽङ्गीक्रियते ॥**

वं०प०— तदिति । अप्रसिद्धविशेषणतेत्यर्थः ।

॥ इति समवाये प्रमाणाभावस्योपसंहारः ॥
॥ इति समवाये (प्रत्यक्षानुमान)प्रमाणाभावः ॥
॥ इति भेदपक्षमपहायाभेदपक्षपाते न केवलं कल्पनागौरवं कारणम्
अपि तु समवाये प्रमाणाभावोऽपि तत्र कारणम् इत्यस्य भागशो निरूपणम् ॥

* * *

॥ अथ तथात्वे (समवायस्याप्रामाणिकत्वे) अभेदपक्षस्यापि 'विशेषे प्रमाणाभाव'शङ्कामूलकानङ्गीकार्यताशङ्का(पादनं) तन्निरासश्च ॥

१५२ **सु०—** ननूक्तमत्राभेदपक्षोऽपि तर्हि नाङ्गीकार्यो विशेषे प्रमाणाभावादिति, तत्राह **येनेति** ।

अनु०— येन प्रत्यक्षसिद्धेन व्यवहारोऽखिलो भवेत् ।
भावाभावविभागेन यं विना न कथञ्चन ।
एतादृशे विशेषेऽस्मिन्को द्वेषो वादिनां भवेत् ॥

प्रत्यक्षसिद्धेन इत्यनेन प्रत्यक्षसिद्ध इति लभ्यते । **येनाखिलो व्यवहारो भवेत् । यं विना न भवेत्** इत्यन्वयव्यतिरेकाभ्यां विशेषकार्यत्वं व्यवहारस्य दर्शयता, 'व्यवहारान्यथाऽनुपपत्तिश्च विशेषे प्रमाणं, तदनङ्गीकारे व्यवहारोच्छेदप्रसङ्गश्चे'त्युक्तं भवति । **अखिल** इत्यस्यैव विवरणं **भावाभावविभागेन** विधिनिषेधभेदेन (इति) । द्विविधस्तावदिति शेषः ।

'ननु भेदपक्षेऽपि समवायाभ्युपगमेनाखिलोऽपि व्यवहारो घटिष्यते । अत्यन्ताभेदेऽपि व्यावृत्तिस्वीकारेण भेदाभेदाभ्यां तु सुतराम् । तत्किं विशेषेणे'त्यत उक्तं **कथञ्चनेति** ।

एतादृशे सर्वव्यवहारनिर्वाहहेतौ, **को द्वेषः किन्निमित्ताऽनुपादित्सा** । प्रमाणाभावो ह्यनुपाददाननिमित्तम्, सति प्रमाणे नानुपाददाननिमित्तमस्तीत्यर्थः । मा भूद्व्यवहार इत्यत उक्तं **वादिनामिति** । उपलक्षणं चैतत् । ज्ञातृणां चेत्यपि द्रष्टव्यम् । विशिष्टविषयाभिज्ञाभिवदनलक्षणो ह्यत्र व्यवहारः प्रकृतः ।

परि०— प्रमाणाभावादिति वदन्तं प्रति प्रत्यक्षसिद्धेनेति कथमनुवाद इत्यत आह **इत्यनेनेति** । उपपादयिष्यते चैतदभेदेनेति श्लोके । **विधिनिषेधेति** । शुक्लः पटो, घटः पटो नेत्येवंरूपेणेत्यर्थः । सामान्यादिपदार्थेषु इत्यादौ वक्ष्यमाणव्यवहारान्तरापेक्षया तावच्छब्दः । **व्यावृत्तीति** । अन्यापोहस्वीकारेणेत्यर्थः । अखण्डवादे ज्ञानानन्दादेर्ब्रह्माभेदेऽप्यज्ञानदुःखादिव्यावृत्तिमात्रेण असङ्कीर्णव्यवहारोपगमादेवमुक्तम् । 'सत्यज्ञानादिकेऽप्येवं न व्यावृत्त्या प्रयोजनमि'त्युक्तेः । उपलक्षणे ज्ञापकमाह **विशिष्टविषयेति** । गुणक्रियादिविशिष्टविषयेत्यर्थः ।

गु०दी०— **अत्यन्ताभेदेऽपि व्यावृत्तिस्वीकारेण** इत्यत्र सामान्यसमवायादिगतप्रमेयत्वास्तित्वादिधर्माणामत्यन्ताभेदो नैयायिकैरङ्गीकृतः । तेषां च धर्मधर्मिभावघटनायान्योन्याभावपृथक्त्वातिरिक्तस्वरूपभेदरूपव्यावृत्तिस्वीकारादिति भावः ।

यादु०— ननु प्रमाणाभावादित्याशङ्कायां प्रत्यक्षसिद्धत्वस्य विधिरेव सङ्गतो नानुवाद इत्यत आह **प्रत्यक्षसिद्धेनेत्यनेनेति** । **विधिनिषेधभेदेनेति** । अत्र शुक्लः पट इत्यादिर्विधिव्यवहारो, घटः पटो नेत्यादिर्निषेधव्यवहारः, इत्यग्रे स्पष्टं भविष्यति । **व्यावृत्तिस्वीकारेणेति** । अतद्व्यावृत्तिबोधस्वीकारेणेत्यर्थः । तथा च

यथा सत्यज्ञानादीनां ब्रह्माभेदेऽपि न तद्वाचकपदानां पर्यायत्वादिकम् । तद्बोध्यानामनृतादिव्यावृत्तीनां भिन्नत्वात् । तथा गुणक्रियादीनां द्रव्याभेदेऽपि न तच्छब्दानां पर्यायत्वादिकं तत्तद्बोध्यातद्व्यावृत्तीनां भिन्नानामेव स्वीकारादित्यर्थः । ननु किमर्थं ज्ञातृणां चेत्युपलक्षणमित्यत आह **विशिष्टविषयेति** ।

कं०रा०— अत्यन्ताभेदेऽपीति । गुणगुण्यादीनामत्यन्ताभेदेऽपि गुण्यादिष्वगुण्यादिव्यावृत्तिस्वीकारेणाखिलोऽपि व्यवहारो घटिष्यत इत्यर्थः । **भेदाभेदाभ्यामिति** । भेदाभेदाभ्यां त्वखिलोऽपि व्यवहारः सुतरां घटिष्यत इत्यर्थः । **किन्निमित्तेति** । किं निमित्तं यस्याः सा किं निमित्तेत्यर्थः ।

श्रीनिधि०— ननु प्रमाणाभावान्नाङ्गीकार्य इति शङ्का प्रमाणप्रतिज्ञामन्तरा न शाम्यति । न चात्र तत्प्रतिज्ञा दृश्यते किन्त्वनुवाद एवेत्यत आह **प्रत्यक्षसिद्धेनेत्यनेनेति** । अनुवादस्य विधिमूलत्वादिति भावः । भावाभावविभागेन द्विविध इत्युक्ते भाव अभाव इति व्यवहार इति प्रतीयते । तथा चाखिल इत्यस्य विवरणरूपत्वं न स्यादित्यतो व्याख्याति **विधिनिषेधभेदेनेति** । न त्वर्थगोचरतद्गोचरव्यवहारभेदेनेत्यर्थः । एवञ्च तद्विवरणरूपत्वं सम्भवत्येव सर्वस्यापि व्यवहारस्य उक्तविधान्यतरत्वादिति । द्विविधरूपवदिति आक्षेप्य सिद्धिराक्षेपकाधीना तदसिद्धौ नाक्षेप्यसिद्धिः । अतः आक्षेपकसिद्धिं द्योतयत्यनेन । **अत्यन्ताभेदेऽपीति** । धर्मितन्मात्रत्वाद्यभ्युपगमेऽपीत्यर्थः । **सुतरामिति** । भेदमादाय षष्ठीप्रयोगादिः अभेदमादाय सम्बन्धानपेक्षणान्न समवायैकत्वाभ्युपगमविरोधोऽपीत्यभिप्रेत्य एवमुक्तम् । **कथञ्चनेति** । समवायाभ्युपगमेन वा । व्यावृत्तिस्वीकारेण वा भेदाभेदाभ्यां वा न केनापि प्रकारेणेत्यर्थः । अन्ततोऽपि विशेषस्याश्रयणीयत्वात् । तथा हि । समवायाभ्युपगमपक्षे समवायोऽस्ति ज्ञात इत्यादि व्यवहारो न विशेषमन्तरोपपद्यते । व्यावृत्तिस्वीकारपक्षेऽपि अस्यास्माद्व्यावृत्तिरिति व्यवहारो विशेषमूल एव । भेदाभेदाभ्युपगमे तु विरोधशामकं विशेषमन्तरा न विरुद्धयोः तयोरवस्थानं घटत इति सोऽङ्गीकार्यः । तथा चादावेव तदभ्युपगमोऽस्तु किं समवायाद्यभ्युपगमेनेति । **वादिनामितीति** । व्यवहर्तृणामित्यर्थः । अनेन व्यवहारानभ्युपगमः मूकोऽहमितिवत्स्वक्रियाविरुद्ध इत्युक्तं भवति । उपलक्षणपरतया व्याख्याने नियामकमाह **विशिष्टविषयाभिज्ञेति** । अत्र 'नानाव्यवहृतेर्हेतुः व्यवहारोऽखिलो भवेदि'त्यत्र सर्वत्रेत्यर्थः ।

शे०वा०— एवमभेदपक्षानङ्गीकारोपपादकविशेषाप्रामाणिकत्वशङ्कामुत्थापयितुं तत्प्रसञ्जकतया भेदपक्षानङ्गीकारोपपादकसमवायाप्रामाणिकतामुपपाद्य इदानीं तत्प्रसञ्जितां विशेषाप्रामाणिकत्वशङ्कामुत्थाप्य तत्परिहारकतयोत्तरग्रन्थं योजयति **नन्विति** । **प्रमाणाभावादिति** । अपर्यायव्यवहारादेर्घटपटादावनैकान्तिकत्वेन तत्राप्रमाणत्वादन्यस्य च तस्याभावादिति भावः । ननु येन व्यवहारो भवेद्यं विना न भवेदित्येतावन्मात्रेणैव व्यवहारस्यान्वयव्यतिरेकाभ्यां विशेषकार्यतासिद्धेः प्रत्यक्षसिद्धेनेत्यस्य वैयर्थ्यं, तदप्रामाणिकत्वं शङ्कमानं प्रति प्रत्यक्षसिद्धत्वस्यासिद्ध्या प्रत्यक्षसिद्धेनेत्यनुवादानुपपत्तिश्चेत्यतोऽस्य विशेषे प्रमाणान्तरोपदर्शकत्वान्न वैयर्थ्यम् । प्रत्यक्षसिद्धत्वविधौ तात्पर्येणानुवादत्वाभावान्न तदनुपपत्तिरपीति भावेन तदुपदर्शयति **प्रत्यक्षसिद्धेनेत्यनेनेति** ।

ननु तथापि विशेषस्याप्रामाणिकत्वं शङ्कमानं प्रति तत्र प्रमाणस्यैव वक्तव्यतया व्यवहारविशेषयोरन्वय-व्यतिरेकाभ्यां कार्यकारणभावव्युत्पादनमनर्थकमित्यतो विशेषसद्भावे व्यवहारान्यथाऽनुपपत्तिरूपप्रमाणस्य तदनङ्गीकारे व्यवहारोच्छेदरूपबाधकस्य च कथनार्थत्वान्नानर्थक्यमित्यभिप्रेत्य तत्तात्पर्यमाह **येनेत्यादिना** । अखिल इत्यनेन गतार्थत्वाद्भावाभावविभागेनेत्यस्य वैयर्थ्यमित्याशङ्क्य तद्व्याख्यानार्थत्वान्न तदित्याशयेनाह **अखिल इत्यस्यैवेति** । भावाभावविभागेनेत्यस्य व्याख्यानं **विधीति** । शुक्लः पट इत्यादिर्विधिव्यवहारो घटः, पटो नेत्यादिः निषेधव्यवहार इति द्रष्टव्यम् । भावाभावविभागेनेत्यस्य साकाङ्क्षत्वेन वाक्याभासत्वान्नाखिल-पदार्थविवरणत्वमित्यतोऽपेक्षितशेषपूरणेन तद्विवरणतां घटयति **द्विविध इति** ।

मूले कथञ्चनेत्यस्य वैयर्थ्यमाशङ्क्य व्यवहारस्यान्यथासिद्धिशङ्कानिरासेन विशेषस्य व्यवहारस्यान्यथा-ऽनुपपत्तिसिद्धत्वोपपादनार्थत्वान्न तदिति भावेन तत्परतया तद्योजयितुं तत्तद्वादिरीत्या व्यवहारस्यान्यथासिद्धि-शङ्कामुत्थापयति **नन्विति** । भेदपक्षे गुणक्रियादेर्द्रव्येणेति शेषः । **अखिलोऽपि व्यवहार इति** । विधि-निषेधभेदेन द्विविधोऽपि व्यवहार इत्यर्थः । **अत्यन्ताभेदेऽपीति** । अत्रापि गुणादेर्द्रव्येणेति शेषः । **व्यावृत्ति-स्वीकारेणेति** । अखिलोऽपि व्यवहारो घटिष्यत इत्यनुवर्तते । शुक्लः पट इत्यादौ शुक्लादिशब्दानां विधिवाचित्वे, विधीयमानानां शुक्लत्वादीनां पटादिद्रव्येणात्यन्ताभिन्नत्वेन पटादिद्रव्येऽभावात् स्वरूपमात्रस्यैकत्वात् पर्यायत्वं स्यात् । न चैवम् । अशुक्लत्वाद्यपोहवाचित्वात् । न चैवं सति वैयर्थ्यम् । पटादिद्रव्येऽशुक्लत्वादिविशेषणानां भ्रान्तिकल्पितत्वेन तन्निवारणार्थत्वात् । नापि शुक्लपदमशुक्लत्वस्येव तत्रारोपितस्याकारान्तरस्यापोहं वक्ति । येनैकेनैवालमिति स्यात् । तस्मान्न पर्यायत्वं वैयर्थ्यं चेत्याशयः । एतच्च तृतीयस्य द्वितीयेऽखण्डार्थतावादे आकर एव स्पष्टम् । **भेदाभेदाभ्यामिति** । अत्रापि पूर्ववच्छेषोऽनुवृत्तिश्च ।

मूले एतादृश इत्यस्यानर्थक्यमाशङ्क्य को द्वेषो भवेदित्युक्तार्थे हेतुसूचकत्वान्न तदिति भावेन तत्रा-पेक्षितहेतुसूचकतया तद्व्याचष्टे **एतादृश इति** । को द्वेष इत्यस्य प्रसिद्धार्थतायाः प्रकृतानुपयोगात् प्रकृतोप-युक्तमर्थमाह **को द्वेष इत्यादि** । व्यवहारनिर्वाहहेतुत्वस्यानुपादित्साऽयोगे कथं हेतुत्वमित्यतस्तन्निमित्तभूत-प्रमाणाभावस्यासिद्धिघटकत्वात् तस्य तत्र हेतुत्वमिति भावेन तदुपपादयति **प्रमाणाभाव इति** । तथाऽपि वादिनामित्यनर्थकमित्याशङ्क्य विशेषानङ्गीकारे बाधकतयाऽभिप्रेतस्य व्यवहारोच्छेदप्रसङ्गस्येष्टापादनतया आभा-सताशङ्कानिवारणार्थत्वान्न तदिति भावेनेष्टापत्तिशङ्कानिवर्तकत्वेन तद्योजयितुं तच्छङ्कामुत्थापयति **मा भूदिति** । ज्ञातृणां चेत्यस्योपलक्षणतया वादिशब्देन सङ्ग्राह्यतायां निमित्तमाह **विशिष्टविषयेति** । **प्रकृत इति** । उभय-विधस्यापि तस्य विशेषान्वयव्यतिरेकानुविधायित्वेन तत्कार्यतया तत्साधकत्वेनेत्यर्थः ।

वा०र०— उत्थापयितुमिति । उत्थापयितुं या पूरणीयत्वाशयेन भाष्योक्तप्रामाणिकतानामेवमुप-पाद्येति योजना । न केवलमित्योत्तरतदवतारस्थलीयाप्रामाणिकत्वोक्तेरुक्तोत्थापकतयोपयोगं स्मारयितुमिदमुक्तम् । **तत्राप्रमाणत्वादिति** । **तत्र** विशेषे **तस्येति** विशेषप्रमाणस्येत्यर्थः । नन्वत्यन्ताभेदे व्यावृत्तिस्वीकरणमप्यनु-

पपन्नम् । अपोहस्याप्यभिन्नत्वेन तदुपपादकतया तत्स्वीकारवैय्यर्थ्यात् । भिन्नत्वे शुक्लत्वादीनामत्यन्ताभेदानुपपत्तिरिति । मैवम् । शुक्लत्वादीनामत्यन्ताभेद एव नास्ति । यच्छुक्लादिशब्दप्रवृत्तिनिमित्तं तन्न शुक्लत्वादि अपि त्वशुक्लादिव्यावृत्तिरेवेति तदुपपत्तये अभेदः आवश्यक इति पराशयादित्याहुः । अन्ये तु शुक्लत्वादीनामत्यन्ताभेदवच्छुक्लादिशब्दवाच्यानामशुक्लत्वाद्यपोहानामभिन्नत्वाङ्गीकारेणाविरोधः । एतावत्परमवशिष्यते । गुणगुण्यादिसामानाधिकरण्यव्यवहारानुपपत्त्यभावेऽपि व्यपोहयोस्तदनुपपत्तिस्तु स्यादेवेति । तत्र विशेषदपोहस्य स्वनिर्वाहकत्वेनोपपत्तिरित्याशयः परस्येत्यादि किञ्चित्समानं कल्पनीयम् । अधिकं व्युत्पत्तिरपि हीत्येतदवतारमूलगत न चेत्सर्वमन्यापोहेति वाक्यटीकायां वक्ष्यमाणं ज्ञेयम् । मूलेऽत उक्तं **कथं नेतीति** । समवायः प्राक् दूषितः । अपोहवादभेदाभेदवादौ निराकरिष्येते इति भावेनोक्तमित्यर्थः । मा भूदितीति यः प्रतीकोपादानानन्तरं वा प्रकृत इत्येतद्व्याख्यानानन्तरं वा ततश्च विशिष्टविषयाभिज्ञाभिवदनव्यवहारवतां पुरुषाणां तदुच्छेदो अनिष्ट एवेति भाव इति पूरणीयम् ।

स०व्र०— अत्यन्ताभेदेऽपि व्यावृत्तिस्वीकारेण इत्यस्य विवरणं 'सत्यज्ञानादिकेऽप्येवं न व्यावृत्त्या प्रयोजनम्' इत्येतद्वाक्यव्याख्यानावसरे स्पष्टम् ।

विष्टल०— ननु प्रमाणाभावादिति वदन्तं प्रति प्रत्यक्षं प्रमाणमिति वक्तव्यम् । प्रत्यक्षसिद्धेनेत्यनुवादोऽनुपपन्न इत्यत आह **प्रत्यक्षसिद्धेनेति** । अनुवादमहिम्नैव विधिः लभ्यते । अप्राप्तस्यानुवादायोगादिति भावः । **विधिनिषेधभेदेनेति** । अत्र शुक्लः पट इत्यादिर्विधिर्व्यवहारः घटः पटो नेति विशेषव्यवहार इत्यग्रे स्फुटीभविष्यति । सामान्यादिपदार्थेष्वित्यादि वक्ष्यमाणव्यवहारान्तरापेक्षया तावच्छब्दः । **व्यावृत्तीति** । अतद्व्यावृत्तिस्वीकारेणेत्यर्थः । तथा च यथा मायिमते सत्यज्ञानादीनां ब्रह्माभिन्नत्वेऽप्यनृतादयोरेकत्रानवस्थानाभावादिति भावः । ज्ञातृणां चेत्युपलक्षणं कुतः कार्यमित्यत आह **विशिष्टविषयेति** । अभिज्ञाव्यवहारसिद्धये उपलक्षणकरणमित्युक्तं भवति । तथा च व्यवहारो मा भूदित्यङ्गीकारे वादित्वं च न स्यादिति भावः ।

॥ इति तथात्वे अभेदपक्षस्यापि 'विशेषे प्रमाणाभाव'शङ्कामूलका-
नङ्गीकार्यताशङ्का(पादनं) तन्निरासश्च ॥

* * *

॥ अथ समवायस्य स्वरूपतो निराकरणे, अभेदपक्षाङ्गीकारे
अवयवावयव्यादिभेदाप्रामाणिकत्वस्यापि कारणत्वम् ॥

१५३ **सु०— किञ्चावयवावयव्यादिभेदे प्रमाणाभावाच्च तं परित्यज्याभेदपक्षोऽङ्गीक्रियते । ननूक्तमत्राभेदेऽपि प्रमाणं नास्तीति, तत्राह अभेदेनेति ।**

अनु०— अभेदेन प्रतीतिश्च कार्यकारणपूर्वके ।
अभावान्ते पदार्थेऽस्मिन्सविशेषाऽवसीयते ॥

इहापि **कार्यकारणग्रहणेनावयव्यवयवावुच्येते । पूर्वशब्देन गुणगुण्यादिकम् । अभावशब्देनान्योन्याभावो गृह्यते, तस्यैव धर्म्यभिन्नत्वात् । यद्वाऽभावतद्धर्मावनेनोपलक्ष्येते । अवसीयते साक्षिणा ।**

परि०— इहापीति । न केवलं कार्यकारणयोश्चैवेत्यत्रेत्यपेरर्थः ।

गु०दी०— भगवतः सार्वज्ञादिगुणानां भगवदवताराणां 'चैकधैवानुद्रष्टव्यम्', 'नेह नानास्ति किञ्चने'-त्यादिश्रुतिबलादस्ति तावदत्यन्ताभेदः । एवकारेण किञ्चनेतिशब्देन च भेदमात्रनिषेधात् । अस्ति च गुणगुणिभावोऽवयवावयविभावो मूलरूपस्यैकत्वमवताराणामनन्तत्वं चेति विशेषः । तच्च नौपचारिकम् । 'विश्वतश्चक्षुरुत विश्वतोमुखः', 'मय्यनन्तगुणेऽनन्ते' इत्यादिश्रुतिस्मृतिषु बहुशः प्रयोगात् । 'वेदैश्च सर्वैरहमेव वेद्य' इति भगवद्वाक्यविरोधात् । 'तत्तु समन्वयादि'ति सूत्रकृतोक्तसमन्वयशब्दविरोधात् । अतः श्रुत्यभिमानिनी महालक्ष्मीरुक्तोभयविधव्यवहारनिर्वाहक-कञ्चन-सामर्थ्यविशेषं भगवति सर्वदा पश्यतीति गम्यते । रामः कृष्ण इतिवत् मृद्घटः, तन्तव एव पटः, शुक्लः पटो, नीलो घट इत्यादि सामानाधिकरण्यव्यवहारमूलीभूता कार्यकारणादीनामभेदप्रतीतिस्तावत् प्रत्यक्षेणैवोत्पन्ना । तथाप्यपर्यायशब्दादिनिर्वाहकविशेषप्रतीतिश्च तत्र 'खण्डिते भेद ऐक्यं चे'त्यादिवचनादेकसत्त्वेऽप्यपरनाशाख्यभेदकार्यपरामर्शवतां तयोर्भेदश्च प्रतीयते । तस्य भेदासाधारणकार्यत्वात् तस्यापि विशेषेणैव निर्वाहे भेदस्यैव नामान्तरं स्यात् । न तु भेदप्रतिनिधिर्विशेषः सिद्धयेत् । कृष्णरामाद्यकार्यद्रव्येषु यावद्द्रव्यभाविपटशौक्ल्यादिषु च केवलाभेद एवं च साक्षात्क्रियते न तु भेदः । भिन्नाभिन्नेऽपि वस्तुन्यभेदविरुद्धभेदस्यावसरदानाय विशेषोऽप्यङ्गीक्रियते । एवं च कार्यकारणादीनामभेदे विशेषे च प्रत्यक्षस्यैव प्रमाणत्वात् सर्वथा तदुभयमनङ्गीकुर्वन्न लौकिको नाप्यलौकिक इति भावेनाह भगवान् भाष्यकारः **अभेदेन प्रतीतिश्चेति** ।

वं०प०— अनेनेति । अभावशब्देनाभावस्तद्धर्मो ज्ञेयत्वादिधर्मश्चोपलक्ष्यत इत्यर्थः । अजहत्स्वार्थलक्षणायां स्वार्थस्यापि लक्ष्यत्वादिति भावः ।

श्रीनिधि०— इहापि कार्यकारणग्रहणेनेति । न केवलं कार्यकारणयोश्चैव गुणादेः पञ्चकस्य चेत्यत्रेत्यर्थः । कार्यपूर्वक इत्यनुक्त्वा कार्यकारणपूर्वक इति द्विषोर्ग्रहणं कृतम् । तत्स्वारस्याय अभावपदेनापि यथा द्विषो ग्रहणं स्यात् तथा पक्षान्तरमाह **यद्वेति** । अभाव तद्धर्मो इत्यनेन अजहल्लक्षणेत्याह । अत्राभावपदेन

संसर्गाभाव उच्यत इति द्रष्टव्यम् । एवं तर्ह्यभावतद्वतोरुपलक्षणया अन्योन्याभावग्रहणपक्षेऽपि द्विषोर्ग्रहणस्वारस्यमनुकूलितं भविष्यतीति चेन्न । अन्ते इत्यस्यास्वारस्यापत्तेः । तथा हि । अन्ते इत्येतत्परपरिगणनापेक्षया तेनाभावानन्तरं पदार्थस्यापरिगणनात् । न ह्यभावतोऽन्ते परिगणनमस्तीति ।

शे०वा०— नन्वभेदेन प्रतीतिश्चेत्युत्तरवाक्येऽवयवावयव्यादीनामभेदवर्णनं क्रियते, तदनर्थकम् । न च तद्भेदपक्षपरित्यागेन तदभेदपक्षस्याभ्युपगमनीयतासिद्ध्यर्थं तदिति वाच्यम् । अभेदपक्षे कल्पनालाघवस्य विशेषप्रामाणिकत्वस्य च प्रागुपपादितत्वेन तत एव तत्सिद्ध्या तदर्थं तदभेदप्रामाणिकत्ववर्णनस्यानपेक्षितत्वात् । न चाभेदपक्षे कल्पनागौरवशङ्कया विशेषाप्रामाणिकत्वशङ्कया च प्रसक्तायास्तदभेदस्यानभ्युपगमनीयताशङ्कायास्तेन निरासेऽपि तदभेदस्याप्रामाणिकत्वशङ्काप्रयुक्तायास्तस्यास्तेनानिरासात् तदर्थं तत्प्रामाणिकत्ववर्णनमप्यावश्यकमिति वाच्यम् । प्रसञ्जकाभावेन तदप्रामाणिकत्वशङ्काया एवानुदयेन तत्प्रसञ्जितानभ्युपगमनीयताशङ्कायाः सुतरामनुदयादित्यतोऽत्र मूले 'अभेदेन प्रतीतिश्चे'ति 'च'शब्दबलेन भेदपक्षानभ्युपगमहेतुतया तदप्रामाणिकत्वोक्तेरपि मध्येऽभिप्रेतत्वात् तस्या एव च तदभेदाप्रामाण्यशङ्कायाः प्रसञ्जकत्वेन तच्छङ्कायाः सम्भवात् तत्प्रसञ्जिततदभेदानभ्युपगमनीयताशङ्काया अप्युदयात् तन्निरासार्थं तदभेदप्रामाणिकत्ववर्णनस्याप्यवश्यकत्वान्नानुपपत्तिरिति भावेनात्राभिप्रेतोक्तिपूरणपूर्वकं तत्प्रसञ्जितावयवावयव्याद्यभेदाप्रामाणिकत्वशङ्कामुत्थाप्य तत्परिहारकतयोत्तरग्रन्थं योजयति **किञ्चेत्यादिना** ।

दण्डघटादेरभेदप्रतीतेरसम्प्रतिपत्त्या कार्यकारणशब्दयोः कार्यकारणमात्रपरत्वानुपपत्तेस्तदर्थमाह **इहापीति** । कार्यकारणयोश्चैवेत्यादिपूर्ववाक्यापेक्षयाऽपिशब्दः । अभावशब्दस्य सामान्यशब्दत्वेन सर्वपरत्वात् किमिति विशेषपरत्वाश्रयणमित्यत आह **तस्यैवेति** । प्रागभावादेर्धर्मिविनाशेऽप्यविनाशादिना धर्मिणोऽत्यन्तभिन्नत्वस्यादृश्यत्वाधिकरणे समर्थितत्वादिति भावः ।

वा०र०— अभेदेन **प्रतीतिश्चेति** चशब्दबलेनेति । अत एवोत्तरयोजनायामनुक्तसमुच्चयार्थश्चशब्द इति चशब्दप्रयोजनवर्णनेऽप्यत्र तदवर्णनं किञ्चेत्युक्तिपूर्वकमुपक्षेपकप्रमेयान्तरकथनं चेति भावः । अनेन भाष्यस्थ चेत्यस्य किञ्चेत्यर्थः । तस्यैव विवरणं **अवयवेत्यादि** । एतेन प्रमाणाभावाच्चेति चशब्दानर्थक्यशङ्कापि गतेति ज्ञेयम् । किञ्चेत्युक्त्यनन्तरमपि व्यभिचारश्चेत्यक्षराधिकरणीयोक्तिस्थले किञ्चेति निपातसमुदायः किमित्यर्थक इत्यादेष्टीकाकृता प्रतिपादनात् तदनुसारेणात्रापि किञ्च चेति निपातसमुदायस्य किञ्चेत्यर्थ इति न वैयर्थ्यं चशब्दस्येत्यप्याहुः । घटपटादिबुद्धितो वैलक्षण्योपपत्तेरित्यनेन मूलस्थसम्बन्धशब्दः तद्विषयत्वपरः । विशिष्यत इति विशेषवती विलक्षणेति व्याख्यातं भवति । न च संयोगादिन्यसम्बन्धविषयत्वेनेत्यादिकं जन्माधिकरणीयमूलतट्टीकान्यायामृतानुसारेण ।

विठ्ठल०— इहापीति । न केवलं कार्यकारणयोश्चेत्यत्रेत्यपेरर्थः । प्रागभावादिपरत्वेनापि व्याख्याति **यद्वेति** । अनेनाभावान्तर इत्यस्याभावतद्धर्मान्त इत्यर्थ उक्तो भवति । तथा च प्रागभावादेस्तद्धर्मस्य चाभेदेन प्रतीतेरनुभवात् तस्याभावपदेन ग्रहणं युक्तमिति भावः ।

* * *

॥ अथ तत्र अनुव्याख्यानोक्तार्थस्पष्टीकरणम् (अभेदस्याप्यप्रामाणिकत्वमितिशङ्कानिरासः) ॥

१५४ सु०— तथा हि । तन्तुपटादिविषया बुद्धिरत्यन्तभिन्नघटपटादिविषयबुद्धितो विलक्षणाऽनुव्यवसीयते उताविलक्षणा । न तावत् द्वितीयः, प्रतीत्यपलापानुपपत्तेः । आद्ये कथमभेदप्रतीतिर्नास्तीति शक्यं वक्तुम् । सम्बन्धेन वि(शे)शिष्यत इति चेन्न, कुण्डबदरप्रतीतितोऽपि वैलक्षण्यानुभवात् । सम्बन्धिनोरयुतसिद्धत्वात् तथेति चेन्न, आधाराधेयभावेनावस्थानसमये तस्याकिञ्चित्करत्वात् । अतस्तन्तुपटयोः कुण्डबदरयोश्च भेदे सम्बन्धे च समाने कालान्तरभाविनः सम्बन्धविनाशादेः सम्बन्धिविभागादेर्वा प्रत्यक्षप्रतीतिं प्रत्युपयोगा(योगा)भावाद्वैलक्षण्यं नानुभूयेत । अनुभूयते च तन्तुपटादि-बुद्धिः कुण्डबदरादिबुद्धेर्विलक्षणा । इत्यभेदविषयैव साऽवसीयते ।

परि०— कथमभेदप्रतीतिर्नास्तीति । वैलक्षण्यस्य विषयभेदाधीनत्वादि(ने)ति भावः । सम्बन्धविषयत्वेनायुतसम्बन्धिविषयकत्वेन वाऽस्तु वैलक्षण्यधीरिति क्रममाशङ्क्य निराह **सम्बन्धे-नेति** । **विशे(शि)ष्यते** विलक्षणीक्रियत इत्यर्थः । **आधाराधेयभावेनेति** । कुण्डबदरयोराधारा-धेयभावेन यथावस्थानं तथा तन्तुपटयोराधाराधेयभावेन सम्बद्धतयावस्थानकाले सतोऽप्ययुत-सिद्धत्वस्य तन्तु(त्व)पटत्वादिधर्मस्येव प्रतीतिवैलक्षण्यानापादकत्वादित्यर्थः । ननु तदानीमविशे-षेऽपि कालान्तरे कुण्डबदरसंयोगनाशोत्पादो वा संयोगविभागो न वर्तते न(तन्तुपटादे)तूपादानादे-रतोऽस्तु प्रतीतिवैलक्षण्यमित्याशङ्कां परिहरन् पर्यवसानमाह **अत इति** । तस्यैव विवरणं **उपयोगा-योगादित्यन्तम्** । **सम्बन्धे चेति** । आधाराधेयभावेनावस्थाने चेत्यपि ग्राह्यम् ।

यादु०— आधाराधेयेति । उभयत्राप्याधाराधेयभावेनावस्थानसमये संयोगनाशाभावरूपस्य विभागा-भावरूपस्य वा अयुतसिद्धत्वस्याविशेषेण प्रतीतिवैलक्षण्यानुपपादकत्वादित्यर्थः । नन्विदानीमविशेषेऽपि काला-न्तरे कुण्डबदरयोः संयोगनाशादिरूपं युतसिद्धत्वं भविष्यति न तन्तुपटादौ अतः प्रतीतिवैलक्षण्यमुपपद्यत इत्याशङ्कामपाकुर्वन्नुपसंहरति **अत इति** ।

वं०प०— सम्बन्धेनेति । तन्तुपटयोः सम्बन्धस्य सत्त्वेन घटपटादिबुद्धितस्तन्तुपटादिबुद्धिर्विशिष्यते घटपटयोः सम्बन्धाभावादित्यर्थः । **कुण्डबदरादिप्रतीतितोऽपि** सम्बद्धवस्तुप्रतीतितोऽपीत्यर्थः ।

कं०रा०— वैलक्षण्यानुभवादिति । तथा च तन्तुपटादिबुद्धेरन्यतो वैलक्षण्यस्य सम्बन्धविषयत्वं कृतत्वे कुण्डबदरादिबुद्धेरपि सम्बन्धविषयत्वात् ततो वैलक्षण्यं नानुभूयतेति भावः । **सम्बन्धिनोरिति** । सम्बन्धिनोस्तन्तुपटयोरयुतसिद्धित्वात् कुण्डबदरयोस्तु तदभावात् कुण्डबदरादिप्रतीतितस्तन्तुपटादिबुद्धेर्वैलक्षण्यानुभवो युक्तः इति भावः । **आधाराधेयेति** । तन्तुपटयोः कुण्डबदरयोश्चाधाराधेयभावेनावस्थानसमये तद्गोचरप्रतीतिद्वयेऽप्याधाराधेयभावेनावस्थानरूपायुतसिद्धत्वस्य प्रतीयमानत्वेन तस्य वैलक्षण्याप्रयोजकत्वादित्यर्थः । ननु कुण्डबदरादिषु कालान्तरभाविसम्बन्धविनाशः सम्बन्धिविभागो वास्ति तन्तुपटादिषु तु स चेति तत्प्रतीत्योर्वैलक्षण्यं भविष्यतीत्याशङ्कामुपसंहरन् परिहरति **अत इति** । **प्रत्यक्षप्रतीतिं प्रत्युपयोगायोगादिति** । कुण्डबदरादिषु कालान्तरे सम्बन्धविनाशः सम्बन्धिविभागो वा भविष्यति तन्तुपटादिषु स न भविष्यतीत्यस्यार्थस्य प्रत्यक्षज्ञानं प्रति विषयत्वायोगेन तद्वैलक्षण्यं प्रत्यनुपयुक्तत्वमिति भावः ।

श्रीनिधि०— सम्बन्धेन विशिष्यत इति । विलक्षणा भवतीत्यर्थः । **कुण्डबदरप्रतीतौ वैलक्षण्यानुभवादिति** । तस्मात् नियामकान्तरमेव वक्तव्यं अन्यथा स न स्यात् इति भावः । **अवस्थानसमय इति** । अवस्थान = अवस्थायामित्यर्थः । यद्वा आधाराधेयभावेनायुतसिद्धयोरप्यवस्थानमिति सिद्धान्त इत्यर्थः । अयुतसिद्धत्वस्याकिञ्चित्करत्वमुपपादयन् तन्तुपटादिविषया बुद्धिः न सम्बन्धेन विशिष्यते । सम्बन्धप्रतीतितो विलक्षणत्वेनानुभूयमानत्वादित्यत्र हेतोर्विपक्षे बाधककथनेनाप्रयोजकत्वं परिहरति **अत इति** । अतो वैलक्षण्यं नानुभूयेतेत्यन्वयः । अत इत्येतद्विवृणोति **तन्तुपटयोरित्यादिना** । अयुतसिद्धत्वं नाम सम्बन्धिनोः स्वविनाशातिरिक्तावस्थायां आश्रयाश्रयिभावेनैवावस्थानम् । इदं च कुण्डबदर्योर्नास्ति । तन्तुपटयोश्चास्तीति तत्प्रतीत्योर्वैलक्षण्यमिति हि परस्याशयः । इमौ चायुतसिद्धत्वतदभावौ आश्रयस्याश्रयसम्बन्धस्य वा नाशप्रयुक्तनाशवत्त्वतदभावावयवसन्तौ तत्र चाश्रयनाशः । तेषां परस्परं सम्बन्धनाशो वा कालान्तरभावीनप्रत्यक्षप्रतीतिं प्रत्युपयोगिनी प्रत्यक्षस्य सन्निकृष्टविषयत्वात् । कालान्तरभाविना च सन्निकर्षायोगात् तटस्थस्य व्यावर्तकत्वे चातिप्रसङ्गादिति घट्टार्थः । सम्बन्धिविनाशादेः सम्बन्धिविभागादेरित्यत्रोभयत्राप्यादिपदेनाश्रितनाशो गृह्यते ।

शे०वा०— आद्य इति । अभेदविषयत्वेन विना वैलक्षण्यानुभवस्यानिर्वाहादिति भावः । ननु तन्तुपटादिबुद्धेः सम्बन्धविषयत्वेनैवानेवंविधघटपटादिबुद्धितो वैलक्षण्योपपत्तेर्नाभेदविषयत्वमुदाहृतप्रतीतेः कल्पयितुमुचितमिति शङ्कते **सम्बन्धेनेति** । सम्बन्धविषयत्वेनोदाहृतप्रतीतेर्घटपटादिबुद्धितो वैलक्षण्यसिद्धावपि तद्विषयककुण्डबदरादिबुद्धितो वैलक्षण्यानुपपत्त्या ततो वैलक्षण्यसिद्ध्यर्थमभेदविषयत्वस्यावश्याश्रयणीयत्वान्न सम्बन्धविषयत्वेन वैलक्षण्यमुपपादनीयमित्याशयेन परिहरति **कुण्डेति** । न च संयोगादन्यसम्बन्धविषयत्वेनैव

ततोऽपि वैलक्षण्यसिद्धिसम्भवात् किमभेदविषयत्वाश्रयणेनेति वाच्यम् । घटतदज्ञानतदभावादिबुद्धिमतो वैलक्षण्यस्य तावताऽप्यसिद्ध्या तत्सिद्ध्यर्थमभेदविषयताया अवश्याश्रयणीयत्वात् । यदि च स्वरूप-प्रत्यासत्तिसंयोगान्योन्यसम्बन्धविषयत्वेनैवोदाहृतप्रतीतेः सर्ववैलक्षण्यसिद्धेर्नाभेदविषयत्वापेक्षेति मन्यसे तर्हि घटतद्धर्मिकान्योन्याभावबुद्धेर्घटपटादिबुद्धितो वैलक्षण्यं न स्यात् । तस्याः स्वरूपप्रत्यासत्तिसंयोगान्यसम्बन्ध-विषयत्वाभावादित्याशयात् । ननु तथाऽपि तन्तुपटयोरयुतसिद्धत्वात् कुण्डबदरयोश्च तदभावादयुतसिद्ध-तन्तुपटादिप्रतीतेर्युतसिद्धकुण्डबदरादिप्रतीतितो वैलक्षण्यस्यायुतसिद्धविषयत्वेन निर्वाहसम्भवान्न तदर्थं तस्या अभेदविषयत्वं कल्पनीयमित्याशङ्कते **सम्बन्धिनोरिति** । आधाराधेयभावेनावस्थानसमये सम्बन्धविनाशा-भावरूपस्य वा सम्बन्धिविभागाभावरूपस्य वा अयुतसिद्धत्वस्य तन्तुपटयोरिव कुण्डबदरयोरप्यविशिष्टत्वेन तन्तुपटादिप्रतीतेरिव कुण्डबदरादिप्रतीतेरप्युक्तरूपायुतसिद्धविषयत्वेन तदाश्रयणेनाप्युदाहृतप्रतीतेः कुण्डबदरादि-प्रतीतितो वैलक्षण्यानिर्वाहात् तन्निर्वाहार्थमभेदविषयकत्वकल्पनमावश्यकमित्यभिप्रायेण परिहरति **आधाराधेय-भावेनेति** । एवं वैलक्षण्यबुद्धेरन्यथोपपत्तिं निरस्य प्रकृततर्कस्य विपर्ययापर्यवसायित्वादाभासत्वमित्याशङ्का-निरासाय विपर्ययपर्यवसानं दर्शयन्नेवोपसंहरति **अत इति** । ननु तन्तुपटादिप्रतीतेः कुण्डबदरादिप्रतीते-श्चाधाराधेयभावसम्बन्धेनावस्थानकालानतत्सम्बन्धिनाशाभावादिविषयकत्वाविशेषेऽपि तन्तुपटादिप्रतीतेः कुण्ड-बदरादिप्रतीतितो वैलक्षण्यं विनाऽप्यभेदविषयकत्वेनोपपद्यते । तन्तुपटयोरुत्तरकालेऽपि सम्बन्धविनाशाभावस्य सम्बन्धिविभागाभावस्य च सत्त्वात् । कुण्डबदरयोश्च कालान्तरे सम्बन्धविनाशस्य सम्बन्धिविभागस्य च सत्त्वात् । कालान्तरभाविसम्बन्धविनाशादिविषयककुण्डबदरादिप्रतीत्यपेक्षया कालान्तरभाविसम्बन्धविनाशा-भावादिविषयकतन्तुपटादिबुद्धेर्वैलक्षण्यस्यान्यानपेक्षत्वादित्याशङ्क्य भवेदेवं यदि कुण्डबदरादिप्रतीतेः कालान्तर-भाविसम्बन्धविनाशादिविषयकत्वं तन्तुपटादेश्च तादृशसम्बन्धविनाशाभावादिविषयकत्वमेव स्यात् । न च तदस्ति । कुण्डबदरादिप्रतीतेः कुण्डबदरयोः सम्बन्धनाशो वा कुण्डबदरयोर्विभागो वा भविष्यतीत्याकारत्वे कालान्तरभाविसम्बन्धविनाशादिविषयकत्वस्य तन्तुपटादिप्रतीतेश्च तन्तुपटसम्बन्धविनाशो वा तन्तुपटविभागो वा न भविष्यतीत्याकारत्वे कालान्तरभाविसम्बन्धविनाशाभावादिविषयकत्वस्य च प्राप्तावपि प्रत्यक्षायाः कुण्ड-बदरादिप्रतीतेस्तन्तुपटादिबुद्धेश्चेह कुण्डे बदराणि अयं पट इत्येवमाकारतयोक्ताकारत्वासम्भवेनोक्तरीत्या विषय-वैलक्षण्यासम्भवेन तदुपपादकतया अभेदविषयकत्वस्यैवावश्याश्रयणीयत्वादिति भावेनोक्तं **कालान्तरभावेन** इत्यादि ।

वा०र०— विनाप्यभेदविषयत्वेनेति । अभेदविषयकत्वेन विनापीति सम्बन्धः । **प्रत्यक्षायाः कुण्डेत्यादि** । अनेन प्रत्यक्षप्रतीतिं प्रत्युपयोगाभावो नाम सम्बन्धविनाशादेः प्रत्यक्षप्रतीतिविषयत्वाभाव इति व्याख्यातं भवति ।

विट्ठल०— आद्ये कथमिति । तन्तुपटादिबुद्धेरभेदविषयकत्वं विना अत्यन्तभिन्न घटः पटादितो वैलक्षण्यस्य निरूपयितुमशक्यत्वादिति भावः । ननु तन्तुपटयोः सम्बन्धस्य सत्त्वाद्घटपटयोस्तदभावात्

तद्बुद्धिवैलक्षण्यमेतद्बुद्धेरिति ब्रूम इत्याशङ्क्य सम्बन्धवत्पदार्थप्रतीतोऽपि वैलक्षण्यानुभवादभेदविषयत्वमेवास्याः प्रतीतेरङ्गीकार्यमिति समाधत्ते **सम्बन्धेनेति** । सम्बन्धेन विषयभूतेन निमित्तेन विशिष्यते व्यावृत्त्यत इत्यर्थः । कुण्डबदरादिप्रतीतिवैलक्षण्ये नियमेनाश्रयाश्रयिभावेनावस्थानं निमित्तमित्याशङ्क्य निराचष्टे **अयुतसिद्धत्वादिति** । **आधाराधेयभावेनेति** । तन्तुपटयोराधाराधेयभावाङ्गीकारे कुण्डबदरयोराधाराधेयभावेनावस्थानसमये विशेषाभावेनायुतसिद्धत्वस्याकिञ्चित्करत्वादयुतसिद्धत्वादेर्न प्रकृते उपयोग इति भावः । नन्विदानीमविशेषेऽपि । कालान्तरे कुण्डबदरयोः संयोगनाशे विभक्ततयावस्थितत्वरूपं युतसिद्धत्वं भविष्यति । न तन्तुपटादौ संयोगनाशादौ पटाभावस्यैव प्राप्तेः अतः प्रतीतेः वैलक्षण्यमुपपद्यत इत्याशङ्कां परिहरन्नुपसंहरति **अत इति** ।

चषक— अनुव्यवसीयत अनुव्यवसायेन विषयीक्रियते । अनुव्यचोपसृष्टात् 'षो-अन्तकर्मणी'ति पठिताद्यकि 'आदेच' इत्यात्वे 'घुमास्थे'ति ईत्वे रूपनिष्पत्तिरवसेया । **सम्बन्धेन** सम्बन्धविषयकत्वेन । **विशेष्यत** व्यावर्त्यते । **सम्बन्धिनोः** तन्तुपटयोः । **तथा** व्यावर्त्यन्ते । **तस्य** अयुतसिद्धत्वस्य । **अकिञ्चित्करत्वात्** प्रतीतिवैलक्षण्यानापादकत्वात् । **अभेदविषयैवेति** । विषयवैचित्र्यं विषयतावैचित्र्यं वा अन्तरेण प्रतीतिवैचित्र्यायोगादिति भावः ।

* * *

॥ अथ अभेदपक्षेऽपि बहुप्रमाणसत्त्वम् ॥

१५५ सु०— किञ्च पटोत्पत्तेः प्राक् यावन्तं देशमवष्टभ्य तन्तवस्तिष्ठन्ति पटोऽपि तावन्तमेव । न च मूर्तयोः समानदेशत्वं युज्यते । तेन ज्ञायते तन्त्वभिन्नः पट इति । 'न चावयवावयविनो रूपरसादि(वत्)द्वैतमनुभूयत' इत्याद्यभेदप्रमाणं स्वयमूहनीयम् ।

परि०— रूपरसादिवद् द्वैतमिति । रूपरसादेर्भेदोऽनुभूयते यथा तथा तन्तुपटयोर्द्वैतं भेदो न चानुभूयत इत्यर्थः । क्वचिद्रूपरसादिद्वैतमिति पाठः । तदा रूपभेदो रसभेदो गुणत्वादिभेदश्च न चानुभूयत इत्यर्थः । आदिपदेनाग्रे वक्ष्यमाणगुणगुण्याद्यभेदसाधकप्रमाणग्रहः ।

यादु०— ननु भेदे व्यपदेशभेदादीनि बहूनि प्रमाणानि सन्ति अभेदे तु प्रत्यक्षमेकमेवातः कथमभेदपक्षोऽङ्गीक्रियत इत्यतोऽभेदेऽपि बहूनि प्रमाणानि सन्तीत्याह **किञ्च पटेति** । अनेन पटस्तन्त्वभिन्नो मूर्तत्वे सति तन्तुदेशत्वात् तन्तुरूपाद्यभिन्नरूपादिमत्त्वात् तन्तुवदित्यनुमानद्वयं कार्यकारणाभेदसाधकप्रमाणमुक्तमिति ज्ञातव्यम् । आदिपदेन गुणगुण्याद्यभेदसाधकानामनुमानागमानां ग्रहणम् । ते चाग्रे वक्ष्यन्ते ।

वं०प०— न चावयवेति । नापीत्यर्थः । यद्यवयवावयविनौ भिन्नौ स्यातां तर्ह्यवयवनिष्ठरूपाद्रसाद्वा अवयविनिष्ठरूपरसयोर्द्वैतत्वं भेदोऽनुभूयेत । न चानुभूयत इत्यर्थः ।

श्रीनिधि०— चशब्दसूचितप्रमाणमप्याह **किञ्चेति** । **द्वैतं** भेदः । **इत्याद्यभेदप्रमाणमिति** । आदिपदेनावयवनाशे अवयविनाशादिकं गृह्यते । न हि कार्यकारणयोर्भेद इदं घटते । कुलालादिनाशेऽपि घटादिनाशादृष्टेरिति ।

शे०वा०— नन्वनेकेष्वभेदप्रमाणेषु सत्सु तत्परित्यागेन प्रत्यक्षमात्रोपन्यासोऽनुचितो भाष्यकाराणामित्यतः प्रत्यक्षस्योक्तरीत्या बहूपपादनसापेक्षत्वेन दुर्ज्ञेयतया प्रमाणान्तराणां च स्पष्टतया शिष्यैरेव ज्ञातुं शक्यत्वेन युक्तः तत्परित्यागेन प्रत्यक्षमात्रोपन्यास इत्याशयवान् स्वयं तानि प्रमाणानि दर्शयन् पटस्तन्त्वभिन्नो मूर्तत्वे सति तत्समानदेशत्वात् तन्तुवदित्यनुमानं मनसि निधाय हेत्वसिद्धिं परिहरति **किञ्च पटोत्पत्तेरिति** । इह भूतले पट इति निर्बाधप्रतीतिबलादिति भावः । अप्रयोजकत्वं निराकरोति **न चेति** । फलं निगमयति **तेनेति** । नन्ववयवावयविभावानापन्नयोरेव मूर्तयोरसमानदेशत्वनियमाभ्युपगमात् तद्भावमापन्नयोस्तन्तुपटयोर्मूर्तत्वेऽपि समानदेशत्वोपपत्तेरप्रयोजकत्वमेवेत्यत आह **न चेति** । अनेन पटस्तन्त्वभिन्नस्तद्रूपरसादिभिन्नरूपरसादिशून्यत्वात् तन्तुवत् इत्यभिप्रेतानुमाने हेत्वसिद्धिः परिहृता भवति । न चावयविरूपादिभिरवयवरूपादेर्नाशादवयवावयिनोर्भेदेऽपि रूपरसादिद्वैतानुपलम्भसम्भवादप्रयोजकत्वमिति वाच्यम् । तथा सत्यसमवायिकारणनाशेन कार्यनाशध्रौव्यादवयविन्यपि रूपाद्यनुपलब्धिप्रसक्त्या तदनवकाशादित्याशयात् । इत्यादीत्यादिपदेन गुणगुण्याद्यभेदसाधकानुमानागमपरिग्रहः । केचित्तु अभेदेन प्रतीतिश्चेति चशब्दसङ्गृहीतमभेदप्रमाणं स्वयमुपदर्शयतीति किञ्चेत्यादिग्रन्थावतारं कृत्वा स्वयमूहनीयमित्यतः पूर्वं परस्ताच्च 'स्पष्टत्वाच्छिष्यैरेव', 'इति भावेन भाष्यकृता चशब्देन सङ्गृहीतं न तु स्वरूपेण प्रत्यक्षवदुपन्यस्तमि'ति च शेषमाहुः ।

वा०र०— अनेकेष्वभेदप्रमाणेष्विति । अत्र प्रत्यक्षानुमानत्रयप्रमाणद्वयोक्तावपि वक्ष्यमाणोक्तरीत्यानुमानागमबाहुल्यप्राप्तेर्बहुवचनं युक्तम् । एवमेव प्रमाणान्तराणां तानि प्रमाणानीत्याद्युपपादनीयम् । अत एवोत्तरमूले इत्याद्यभेदप्रमाणं स्वयमूहनीयमित्यादिपदमिति ध्येयम् । **अनेकेषु अभेदेति** । प्रत्यक्षातिरिक्तानेकभेदे प्रमाणेष्वित्यर्थः । तेन तत्परित्यागेनेति युक्तम् । यद्वा प्रत्यक्षत्वादिरूपेष्वित्येवार्थः । **तत्परित्यागेन** इत्यस्य तावतामपि प्रमाणानामुपन्यासमकृत्वेत्यर्थः । तेन प्रत्यक्षस्यैवोपन्यासात् कथं तत्परित्याग इति शङ्कानवकाशः । **तद्रूपरसादिभिन्नरूपरसादिशून्यत्वादिति** । तस्य तद्रूपरसादितद्भिन्नं यदित्येवं योज्यम् । एतच्च सार्वत्रिकरूपरसादिद्वैतमिति पाठानुसारेण । क्वचिन्मूले रूपरसादिव द्वैतमिति पाठः तत्रायमर्थः । द्वैतशब्दो लक्षणपरः । ततश्चावयवी अवयवेनाभिन्नः रूपादेः रसादिनेव तेन वैलक्षण्यशून्यत्वात् । येन यो विवक्षितवैलक्षण्यशून्यः स तेनाभिन्नः यथा घटो घटेनेति प्रयोगो ध्येयः । पूर्ववदत्रापि हेत्वसिद्धिपरिहारार्थमनुभूत इत्युक्तम् । तत्र रूपादिपर्यन्तं धावनं तु रूपादौ सर्वथा तदगोचरसाक्षात्कारविषयरूपं यद्वैलक्षण्यं तच्छून्यत्वमिहाभेदसाधकमिति

दर्शयितुम् । तेन सर्वथा तदगोचरसाक्षात्कारविषयत्वशून्यत्वस्य हेतुतया लाभे मिश्रितक्षीरनीरयोर्घटादिवद्यद्वैलक्षण्यं तच्छून्यत्वेऽपि प्राक्पश्चाच्चान्यतगोचरसाक्षात्कारविषयतया रूपादिवद्यद्वैलक्षण्यं तच्छून्यत्वाभावान्न व्यभिचार इति प्रागुक्तक्षीरनीरयोर्व्यभिचारपरिहृता भवतीति ध्येयम् । यद्यपि स्वयं प्रमाणानि दर्शयन्निति पूर्वोक्त्यनुसारेण किञ्च घटात्यन्ताविति पूर्ववाक्यस्य पटस्तन्त्वभिन्ने मूर्तत्वे सति समानदेशत्वात् तन्तुवदित्यनुमानमित्याद्यवतारादरिव न चावयवेति वाक्यस्यापि अनुमानान्तरमाहेत्यवतारपूर्वकं नापीत्यर्थः । **इत्युक्त्वा** टीकाकृता अनेन पटस्तन्त्वभिन्नं इत्यादिकं तात्पर्यं वर्णनीयम् । मूर्तयोरसमानदेशता सङ्कोचेनाप्रयोजकतोक्तेस्त्वनेन परिहारः प्रतीयत इति न प्रकारान्तरेणावतारो युक्त इति भाति । तथापि स्वयं तानि प्रमाणानीत्याद्युक्त्यनुसारेणोक्तरीत्याऽवतारः स्वयमेवोहनीय इति भावेन प्रवृत्तेर्नाद्यो दोषः । अप्रयोजकत्वोक्तेस्तु आलोकमण्डलव्याप्त एव देशे वा यः सञ्चारदर्शनादित्यादि पूर्वटीकानुसारेण मूर्तानां समानदेशतोक्तिरङ्गीकारवादेनेति पूर्वत्र स्वरसं सूचयितुमिति नान्त्योऽपीत्यदोषः । अत एवेत्यस्येत्यस्य रसादित्यर्थ इति ध्येयम् । **असमवायिकारणनाशेति** । अवयवगतरूपादेर्नाशे रूपादिरहितद्रव्यावस्थानानुपपत्त्यानुपाद्यन्तरोत्यङ्गीकारे च तत्प्रत्ययापत्त्या अवयविनां नाश एवेत्यप्युपलक्षणया ज्ञेयम् । निमित्तकारणनाशेन कार्यनाशाभावादुक्तं **असमवायिकारणेति** । अवयवरूपादीनामवयविरूपादिकं प्रत्यसमवायिकारणतायाः परेणाभ्युपगमादिति भावः । **गुणगुण्याद्यभेदसाधकानुमानागमेति** । अभेदेन प्रतीतिरित्युक्तानुमानातिरिक्तानुमानान्तरेत्यर्थः । तच्चेत्थम् । अवयव्यवयवेनाभिन्नः तत्कार्यभिन्नकारित्वाभावात् । **घटो घटेनेवेति** । आगमस्तु ब्रह्मरूपविषये विज्ञानमानन्दमित्यादिरुक्तो वक्ष्यमाणश्च ज्ञेयः । **पूर्वपरस्ताच्चेत्यादि** । स्पष्टत्वाच्छिष्यैरेवेत्येतत्पूर्वशेषः । पश्चात्तु इति भावेनेत्यादिः उपन्यस्तमित्यन्तः शेष इति सम्बन्धः । ततश्चेत्याद्यभेदप्रमाणं स्पष्टत्वाच्छिष्यैरेव स्वयमूहनीयमिति भावेन भाष्यकृतेत्यादिः उपन्यस्तमित्यन्तो वाक्यविन्यासो ध्येयः ।

विष्ठल०— ननु भेदेऽपि व्यपदेशभेदानीति प्रमाणानि सन्तीत्येतच्चशब्दसूचितं दूषणमाह **किं चेति** । एतेन पटस्तन्त्वभिन्नः मूर्तत्वे सति तन्तुदेशवर्तित्वात् तन्तुवदिति सूचितम् । वैलक्षण्यानुभवेन बाध इत्यत आह **न चेति** । यथा रूपरसयोरत्यन्तवैलक्षण्यमनुभूय तेन तथा तंन्तुपटयोः वैलक्षण्यमनुभूयत इत्यर्थः । रूपरसादिवैलक्षण्यमिति पाठे तु तन्तुरूपादिकमेव पटरूपादिकम् । न च तन्तुरूपापेक्षया पटरूपादेर्भेदोऽनुभूयत इत्यर्थः । अनेन पटस्तन्त्वभिन्नं तन्तुरूपाद्यभिन्नरूपादिमत्वात् तन्तुवदिति सूचितं भवति । आदिपदेनोत्तरत्र वक्ष्यमाणानुमानागमानां ग्रहणम् ।

चषक— पटस्तन्त्वभिन्नः मूर्तत्वे सति तन्तुदेशत्वात्, अवयवावयविनौ न परस्परं भिन्नौ भेदग्राहाविषयत्वादिति चानुमानमपि तत्र प्रमाणमभिप्रेत्याह **किञ्चेति** । **रूपरसादिवत्** । षष्ठ्यन्ताद्वतिः । उपमेये षष्ठीदर्शनात् 'लोटो लङ्वदि'तिवत् । **द्वैतं** भेदः ।

* * *

॥ अथ तत्रादौ अभेदस्य प्रत्यक्षप्रतीतिविषयत्वे अनुपपत्तिशङ्का तत्परिहारश्च ॥

१५६ **सु०— नन्वभेदश्चेत्प्रत्यक्षेणैवेक्ष्यते तदा कथं शुक्लः पटश्चलति (पट) इत्यादि-सामानाधिकरण्यादिव्यवहारः, तस्य दण्डी कुण्डलीतिवद्भेदविषयत्वात् । न हि प्रतीति-विरोधी व्यवहारो भवतीत्यत उक्तं सविशेषेति । विशेषेण विषयेण उपेता ।**

अयमर्थः । यत्र केवलमभेदः प्रतीयते न तत्र सामानाधिकरण्यव्यवहारो भवति, यथा घटः कलश इति । अत्र त्वभेदः प्रतीयमानो विशेषेण सहित एव प्रतीयते । विशेषश्च भेदप्रतिनिधिः सामानाधिकरण्यव्यवहारं प्रसूत इति ।

परि०— व्यवहारस्य तथात्वेऽपि प्रतीतौ किं प्राप्तमत आह **न हीति** ।

वं०प०— भेदविषयत्वात् भिन्नवस्तुविषयकत्वात् । **उपेता** अभेदप्रतीतिः ।

श्रीनिधि०— विशेषणसहित एव प्रतीयत इत्यनन्तरं तत्रेति शेषः ।

शे०वा०— भाष्येऽभेदप्रतीतेः सविशेषेति विशेषविषयत्वमुक्तम् । तदनर्थकम् । तन्तुपटादि-प्रतीतेरभेदविषयत्वसिद्धिमात्रेण तदभेदस्य प्रामाणिकत्वसिद्ध्या तत्पक्षपरिग्रहसिद्धेस्तस्यानपेक्षितत्वादित्यतः प्रत्यक्षप्रतीतेरभेदविषयकत्वे प्राप्तानुपपत्तिपरिहारार्थत्वाद्विशेषविषयत्ववर्णनस्य नानुपपत्तिरिति भावेन तदनुपपत्ति-परिहारकतया तद्योजयितुमभेदस्य प्रत्यक्षप्रतीतिविषयत्वेऽनुपपत्तिशङ्कां तावदुपपादयति **नन्विति** । **सामानाधि-करण्यव्यवहार इति** । शौक्ल्यपटत्वयोः सामानाधिकरण्यव्यवहार इत्यर्थः । ननु सामानाधिकरण्यव्यवहारस्या-प्यभेदप्रतीत्यैव जननसम्भवात् का कथन्तेत्यतो व्यवहारस्य व्यवहर्तव्यज्ञानसाध्यत्वेन भेदविषयकोक्तव्यवहारस्य भेदज्ञानसाध्यत्वान्न तदभेदप्रतीतिसाध्यत्वं सम्भवतीत्यभिप्रेत्याह **तस्य भेदविषयत्वादिति** । उक्तरूप-सामानाधिकरण्यव्यवहारस्य शौक्ल्यादीनामाश्रयणे परस्परं च भेदविषयत्वादित्यर्थः । ननु सामानाधिकरण्य-व्यवहारस्य तादात्म्यावलम्बनतायाः प्रसिद्धत्वाच्छुक्लः पट इति तद्व्यवहारस्यापि शौक्ल्यपटतादात्म्यविषयत्वमेवेति कथं तद्भेदविषयत्वे तस्येति चेन्न । तथा सति दण्डी देवदत्तः कुण्डली देवदत्त इत्यादेरपि सामानाधि-करण्यव्यवहारस्य दण्डदेवदत्ततादात्म्यविषयत्वापत्तेः । यदि च भेदाविनाभूतसम्बन्धार्थकस्य इनेः प्रयोगा-द्दण्डीत्यादिशब्दव्यवहारस्य भेदविषयकत्वमेवेति मन्यसे तर्हि शुक्लगुणोऽस्यास्तीत्यस्मिन्नर्थेऽर्श आदिभ्यो-ऽजित्यकारप्रत्ययविधानाच्छुक्लः पट इत्यादेरपि शाब्दव्यवहारस्य भेदविषयत्वमेवेति समानमेवेत्याशयेन सामानाधिकरण्यव्यवहारस्य भेदविषयतां दृष्टान्तोपदर्शनेनोपपादयति **दण्डी कुण्डलीतिवदिति** । ननु व्यव-हारस्य व्यवहर्तव्यज्ञानपूर्वकताया निर्निबन्धनत्वादभेदविषयकप्रतीत्याऽपि भेदविषयकव्यवहारोपपत्तेर्न तदनुप-पत्तिरित्यतः तथा सति घटकलशयोरभेदप्रतीत्याऽपि घटः कलश इति सामानाधिकरण्यव्यवहारजननप्रसङ्गान्न

प्रतीतेः स्वविरोधिव्यवहारजनकत्वमित्यभिप्रेत्याह **न हीति** । नन्वत्राभेदप्रतीतेः सविशेषत्वमेवोच्यते न तु विशेषविषयत्वं तत्कथमनेनोक्तशङ्कापरिहार इत्यतः प्रकृतोपयोगितया तद्व्याचष्टे **विशेषेणेति** । ननु विशेषविषयत्वेऽपि नाभेदप्रतीतेः सामानाधिकरण्यव्यवहारजनकत्वं युक्तम् । तथा सति घटकलशयोरभेदप्रतीत्याऽपि सामानाधिकरण्यव्यवहारजननप्रसङ्गादित्यतोऽभेदप्रतीतेः सामानाधिकरण्यव्यवहारजनकत्वं तद्व्यवहारजनकत्वं च तदुभयव्यवस्थापकोक्त्योपपादयति **अयमर्थ इति** । नन्वस्त्वभेदस्य विशेषसहितस्यैव प्रतीतेः सामानाधिकरण्यव्यवहारजनकत्वं प्रकृते केवलाभेदप्रतीत्यभावः । तथाऽपि कथं शुक्लः पट इति सामानाधिकरण्यव्यवहारः । तस्य भेदप्रतीतिसाध्यस्य तदभावेऽपि विशेषप्रतीत्याऽनिर्वाहादित्यत आह **विशेषश्चेति** ।

वा०र०— आश्रयणेत्येतावतैव पूर्तौ परस्परं चेत्यधिकाभिधानेन पटाभिन्नशुक्लतायाश्चलनाद्यभेदेन शुक्लश्चलतीत्यादि सामानाधिकरण्यव्यवहारानुपपत्तिरिति सामानाधिकरण्यान्तरानुपपत्तिमूले अभिप्रेतेति सूचयतीति ध्येयम् ।

विष्टल०— अभेदप्रतीतावपि भेदव्यवहारः किं न स्यादित्यत आह **न हीति** । दण्डीकुण्डलीत्यादिप्रतीतेर्भेदविषयत्वे शङ्किते प्रतीतेः सविशेषत्वोक्तिरयुक्तेत्यत आह **विशेषेण विषयेणोपेतेति** । स्वकार्यसामानाधिकरण्यव्यवहारम् । स्वकार्यं कथमित्यत्र तु घटकलशादिवदभेदव्यवहाररूपमित्यर्थः ।

चषक— **भेदविषयत्वात्** । बहुव्रीहेर्भावप्रत्ययः ।

॥ इति अभेदस्य प्रत्यक्षप्रतीतिविषयत्वे अनुपपत्तिशङ्का तत्परिहारश्च ॥

* * *

॥ अथ तत्रान्ते विशेषप्रतीत्या सामानाधिकरण्यव्यवहारोपपादनस्य समर्थनम् ॥

१५७ **सु०— नन्वभेदप्रतीतिमभिभूय विशेषप्रतीतिः स्वकार्यं कथं कुर्यात्, करोति चेदभेदप्रतीतिरपि विशेषप्रतीतिमभिभूय स्वकार्यं कथं न कुर्यात् । मैवम् । न हि प्रतीतिरस्तीत्येव व्यवहारः किन्तु प्रयोजनेऽपि सति । प्रयोजनं च सामानाधिकरण्यव्यवहारेणैव बहुलं लोकवेदयोः । यदा त्वभेदव्यवहारः प्रयोजनवान् तदा सोऽपि दृश्यत एव यथा विज्ञानमानन्दं ब्रह्मेत्यादि ॥**

परि०— **स्वकार्यमिति** । अभेदव्यवहाररूपं कथं न कुर्यादित्यर्थः । **प्रयोजनं चेति** । इतरव्यावृत्त्यादिप्रयोजनं च । **लोके** नीलं वृषमानय कपिलां गामानयेत्यादि । अरुणया पिङ्गाक्ष्या

एकहायन्या गवा सोमं क्रीणातीत्यादौ **वेदे** बहुलमस्तीत्यर्थः । इत्यादीत्यादिपदेन कं ब्रह्म खं ब्रह्मेत्यादिसङ्ग्रहः । **तन्तुपटाद्यभेदे प्रमाणोक्तिः ॥**

यादु०— स्वकार्यं सामानाधिकरण्यव्यवहाररूपम्, **स्वकार्यम्** घटकलशादाविवाभेदव्यवहाररूपम् ।

वं०प०— स्वकाय भेदव्यवहारम् । **स्वकार्यम्** अभेदव्यवहारम् । **व्यवहारेण** शुक्लः पटः इत्यादि-भेदव्यवहारेण, लोकवेदयोर्दृष्टः ।

श्रीनिधि०— सामानाधिकरण्यव्यवहारेणैव बहुलं लोकवेदयोरिति । शुक्लः पट इति सामानाधिकरण्यव्यवहारे नियमेन न शुक्लः पटानयनादिप्रयोजनसिद्धिः शौक्ल्यं पट इत्यभेदव्यवहारे तु नियमेन तन्न स्यात् यः किञ्चित् शुक्लानयनादिकं स्यात् । वेदेऽपि 'स हि सर्वस्य कर्ते'त्यादौ व्यावृत्तिबोधादिः प्रयोजनम् । सामानाधिकरण्यव्यवहारेणैव न त्वभेदव्यवहारेणेति द्रष्टव्यम् । बहुलं प्रायेणेत्यर्थः । बहुलमित्युक्तं तदाह **यदा त्विति । प्रयोजनवानिति** । भेदाभेदभ्रमनिरासादिप्रयोजनवानित्यर्थः ।

शे०वा०— ननु तथाऽपि नात्र विशेषप्रतीत्या सामानाधिकरण्यव्यवहार उपपादयितुं शक्यः, तथा सत्यभेदप्रतीतेरप्यत्र सद्भावेन तयाऽभेदव्यवहारस्यापि जननप्रसङ्गात् । न च विशेषप्रतीत्याऽभिभूतत्वान्नाभेद-प्रतीतिः स्वकार्यकारिणीति न तत्प्रसङ्ग इति वाच्यम् । तथा सत्यभेदप्रतीत्याऽभिभूतत्वेन विशेषप्रतीतेरपि स्वकार्याकारित्वेन तयोक्तव्यवहारासम्भवात् । न हि विना विनिगमकं विशेषप्रतीत्यैवाभेदप्रतीतेरभिभवो न त्वभेदप्रतीत्या विशेषप्रतीतेरिति नियन्तुं शक्यमिति कथमत्र सामानाधिकरण्यमात्रव्यवहार इति शङ्कते **नन्विति** । **अभिभूय** स्वप्रयोजनाक्षमीकृत्य । **स्वकाय** सामानाधिकरण्यव्यवहारम् । **स्वकार्यं** घटकलशा-दाविवाभेदकार्यम् । भवेदयं पर्यनुयोगो यदि प्रतीतिमात्रं स्वकार्यव्यवहारकारकमित्यभ्युपगम्येत । न चैवम् । किन्तु व्यवहारसाध्यप्रयोजनसहितैव प्रतीतिस्तत्कारणमिति । ततश्च प्रकृतोदाहरणे विशेषप्रतीतेस्तादृशत्वेन तया सामानाधिकरण्यव्यवहारजननेऽप्यभेदप्रतीतेरतादृशत्वेन तयाऽभेदव्यवहारजननासम्भवान्नातिप्रसङ्ग इत्याशयेन परिहरति **मैवमिति** । नन्वभेदप्रतीत्याऽभेदव्यवहारो यदि नाभ्युपेयते तर्हि 'विज्ञानमानन्दं ब्रह्मे'त्याद्यभेदव्यव-हारोऽप्यभेदप्रतीत्या न स्यादित्यतोऽत्राभेदप्रतीतेरभेदव्यवहारसाध्यप्रयोजनशून्यत्वात् शौक्ल्यपटयोरभेदव्यवहारा-जनकत्वेऽपि तत्राभेदव्यवहारसाध्यप्रयोजनवत्त्वादभेदप्रतीत्या तदभेदव्यवहारजननमुपपद्यत एवेत्याशयेनाह **यदा त्विति** ।

वा०र०— द्वितीयं स्वकार्यपदं व्याचष्टे **स्वकार्यव्यवहारकारकमिति** । विज्ञानं ब्रह्मेत्यादिपदेन यत्र भेदप्रतिपादनाय रूपमेव घट इति व्यवहरति तस्यापि सङ्ग्रहः । अत एव तद्धर्मतया सदेति पूर्वभाष्यमूले उक्त-मिति ज्ञेयम् । **अप्यभेदप्रतीतेरिति** । शुक्लः पट इत्याद्यभेदप्रतीतेरित्यर्थः । **तत्रेति** । विज्ञानानन्दादावित्यर्थः ।

विट्ठल०— न हि प्रतीतिरस्तीत्येतावतेति । पथि गच्छतः तृणादिप्रतीतावपि व्यवहारादर्शनात् किन्तु प्रतीतौ प्रयोजने च सत्येव व्यवहारो दृश्यते । प्रयोजनं चेतरव्यावृत्त्यादिरूपं कपिलां गामानय अरुणां पिङ्गाक्षां एकहायन्या गवा सोमं क्रीणातीत्यादौ बहुलं सामानाधिकरण्यं व्यवहारेणैव दृश्यते । तथा चाभेदविशेषं च युगपदुपलभमानः पुरुषः येनात्मनः प्रयोजनं तमेवानुसन्दधाने विशेषणसामानाधिकरण्यव्यवहारं करोति । न्यायं यत्र क्वचित् भेदभ्रमनिवृत्त्यादिः प्रयोजनम् । तत्राभेदमेवानुसन्धाय विज्ञानमानन्दं ब्रह्मेत्याद्यभेदव्यवहारमेव करोति तथा बहुलं लोके वेदे च विशेष एवाभेदप्रतीतिमभिभूय सामानाधिकरण्यादिव्यवहारप्रसूत इति भावः । कार्यकारणाद्यभेदे प्रमाणनिरूपणपरतया व्याख्यातम् ।

चषक— अभिभूय तिरस्कृत्य । **लोकवेदयोरिति** । नीलमुत्पलमित्यादि लोके, अरुणया, पिङ्गाक्ष्येत्यादि वेदे च तुल्यमस्तीत्यर्थः ॥ **तन्तुपटाद्यभेदे प्रमाणोक्तिः ॥ विशेषस्य प्रत्यक्षप्रमाणकतोक्तिः ॥**

॥ इति विशेषप्रतीत्या सामानाधिकरण्यव्यवहारोपपादनस्य समर्थनम् ॥
॥ इति अभेदपक्षेऽपि बहुप्रमाणसत्त्वम् ॥

* * *

॥ अथ अभेदस्याप्यप्रामाणिकत्वमिति शङ्कानिरासे अभेदपक्षीयविशेषस्य प्रत्यक्षार्थापत्तिसिद्धतायाः उपपादनम् ॥

१५८ **सु०—** यद्वा विशेषः प्रत्यक्षार्थापत्तिसिद्ध इत्युक्तम् । तत्कथमित्यतः प्रत्यक्षसिद्धतां तावदुपपादयति **अभेदेनेति** । अनुक्तसमुच्चयार्थश्चशब्दः । पदार्थ इत्येकवचनं जातिविषयम् । अस्ति यतः तस्मात् सा **सविशेषाऽवसीयत** इति योजना ।

ततश्चायमर्थः । अस्ति तावदवयवावयव्यादिपदार्थसार्थेऽभेदेन प्रतीतिः, कुण्डबदरादिप्रतीतितोऽस्या व्यावृत्ततयाऽध्यवसायात् । न च अभेदमन्तरेण व्यावृत्तिहेतुरस्ति । अतोऽसति निमित्तान्तरे सम्मतभेदवस्त्वन्तरप्रतीतितो व्यावृत्तेयमभेद एव विश्राम्यतीति ॥ अस्ति च तथाऽपि सामानाधिकरण्यादिव्यवहारः । तत्र यदीयमभेदमात्रविषया स्यात् तदा न सामानाधिकरण्यादिव्यवहारं कुर्यात्, घटः कलश इति व्यवहारादर्शनात् । ततो ज्ञायतेऽधिकोऽपि विषयोऽस्या विद्यत इति । न च भेदोऽसाविति वाच्यम्, भेदाभेदवादेऽप्यन्ततो विशेषस्याङ्गीकार्यत्वात् । तथा चेयमभेदप्रतीतिरिन्द्रियजा **सविशेषावसीयत** इति ।

परि०— अनुक्तसमुच्चयार्थश्चशब्द इति । सामानाधिकरण्यादिव्यवहारसमुच्चयार्थ इत्यर्थः । **अभेदेनेति** । अवयवावयविनोर्गुणगुणिनोः क्रियाक्रियावतोर्जातिशक्त्योर्विशेषनित्यद्रव्ययोः समवायतद्धर्मयोरभेदेन प्रतीतिरित्यर्थः । **असति निमित्तान्तर इति** । अयुतसिद्धत्वादिनिमित्तान्तरस्य प्राङ्निरासादिति भावः । सम्मतभेदेति बहुव्रीहिः । कुण्डबदरादिरूपवस्त्वन्तरेत्यर्थः । विश्राम्यतीति शब्दस्यायमर्थ इति पूर्वेणान्वयः । चशब्दसमुच्चितमाह **अस्ति चेति** । **सामानाधिकरण्यादीति** । शुक्लः पटः, पटस्य रूपं, तृणस्य चलनमित्यादिव्यवहारग्रहः । **इयमिति** । अभेदप्रतीतिरित्यर्थः । **भेदोऽसाविति** । अभेदादधिको विषय इत्यर्थः । तथा चाभेदभेदविषयत्वेन व्यवहारप्रतीत्योरुपपत्तौ किं विशेषेणेति भावः । **भेदाभेदवादेऽप्यन्तत इति** । गुणगुण्यादेर्भेदाभेदवादेऽपि भेदाभेदयोर्विरोधशान्त्यर्थमपि विशेषस्याङ्गीकार्यत्वादित्यर्थः । चतुर्थपादार्थमाह **तथा चेयमिति** । अस्यापीति शब्दस्यायमर्थ इति पूर्वेणान्वयः ॥ **विशेषस्य प्रत्यक्षत्वोपपादनम् ॥**

यादु०— अनुक्तसमुच्चयेति । सामानाधिकरण्यादिव्यवहारसमुच्चयार्थ इत्यर्थः । अनुक्तसमुच्चयार्थ इत्युक्तं दर्शयति **अस्ति चेति** । **इयमिति** । तन्तुपटाद्यवयवावयविप्रतीतिरित्यर्थः । **आधिको** विशेषरूपः । **अन्तत इति** । विरोधशान्त्यर्थमित्यर्थः ।

कं०रा०— ननु 'अभेदेन प्रतीतिनिश्चयकार्यकारणपूर्वके' इत्यत्र कार्यकारणपूर्वकेष्वभावान्तेषु पदार्थेष्विति बहुवचने प्रयोक्तव्ये अभावान्ते पदार्थ इत्येकवचनं कथं प्रायोजीत्यत आह **पदार्थ इत्येकवचनमिति** । **अन्तत इति** । भेदाभेदयोर्विरोधशामकत्वेन वस्तुस्वभावविशेषस्याङ्गीकार्यत्वादित्यर्थः ।

श्रीनिधि०— प्रत्यक्षार्थापत्तिसिद्ध इत्युक्तमिति । 'येन प्रत्यक्षसिद्धेन व्यवहारोऽखिलो भवेदि'त्यनेनेत्यर्थः । **प्रत्यक्षसिद्धतां तावदिति** । अत्रार्थापत्तिसिद्धत्वं सामान्यादिपदार्थेष्वित्यादिनोपपादयिष्यत इति तावदित्युक्तम् । **अनुक्तसमुच्चयार्थ इति** । अनुक्तस्य सामानाधिकरण्यादिव्यवहारस्येत्यर्थः । अत एव वक्ष्यति । अस्ति च तथाऽपि सामानाधिकरण्यादिव्यवहार इति । पदार्थ इत्येकवचनं **जातिविषयमिति** । **भेदाभेदवादेऽप्यन्ततो विशेषस्याङ्गीकार्यत्वादिति** । ननु न च भेदोऽसाविति परेण भेदस्यैव शङ्कितत्वात् कथं भेदाभेदवाद इति उच्यत इति चेन्न । अभेदमङ्गीकृत्यैव भेदस्य शङ्कितत्वात् प्रत्ययवैलक्षण्येन तस्यावश्यमङ्गीकार्यत्वात् । अत एव ततो ज्ञायतेऽधिकोऽपि विषयोऽस्याविद्यत इति अनन्तरं भेदोऽसाविति शङ्काधिकः अभेदापेक्षया अधिक इति हि तदर्थः । अभेदस्यैव पूर्वं प्रस्तुतत्वादिति । मूले कार्यस्य तत्तन्निष्ठमित्यत्र तत्तत्कार्यस्येत्यर्थः ।

शे०वा०— अवयवावयव्याद्यभेदस्य प्रत्यक्षसिद्धत्वोपपादकतया प्रकृतग्रन्थयोजनायामध्याहृतसङ्गतिराश्रयणीया भवतीत्यपरितोषात् श्रुतिसङ्गत्यैव योजयति **यद्वेति** । सामान्यादीत्युत्तरग्रन्थेनार्थापत्तिसिद्धताया

अप्युपपादनात् तावदित्युक्तम् । **अनुक्तसमुच्चयेति** । सामानाधिकरण्यव्यवहारसमुच्चयेत्यर्थः । अवयवावयव्याद्यभेदप्रतीतेः परं प्रत्यसिद्ध्या तदनुवादेन विशेषविषयकत्वमात्रविधायकतया प्रकृतग्रन्थयोजनाया असम्भवादयं ग्रन्थोऽवयवावयव्यादेरभेदप्रतीतेरपि विधायक एवेत्यभिप्रेत्य तल्लाभायापेक्षितं पूरयति **अस्ति यत इत्यादिना** । नन्ववयवावयव्यादिप्रतीतेर्नियामकाभावेनाभेदविषयकत्वस्याकल्पनीयत्वात् कल्पनीयत्वेऽपि वा केवलाभेदविषयकत्वसम्भवेन तदधिकविषयत्वस्याकल्पनीयत्वात् । कल्पनीयत्वेऽपि वा भेदविषयकत्वकल्पनयैव सर्वनिर्वाहान्न विशेषविषयतायाः कल्पकं किञ्चिदित्ययुक्तमेव तत्प्रतिज्ञाद्वयमित्यतोऽपेक्षितहेतुकथनेन तदुपपादयति **ततश्चेति** । ननु तन्तुपटावभिन्नावित्यप्रतीत्या तत्प्रतीतेस्तदभेदविषयत्वाभावात् कथं तत्राभेदेन प्रतीतिरुच्यत इत्यतस्तन्तुपटादिप्रतीतेरभेदविषयतामुपपादयति **कुण्डेति** । नन्वभेदविषयकत्वाभावेऽपि तद्व्यावर्तकविषयकत्वमात्रेण तन्तुपटादिप्रतीतेः कुण्डबदरादिप्रतीतितो वैलक्षण्यानुभवस्य सम्भवात् तेनाभेदविषयकत्वसाधनेऽप्रयोजकत्वं व्यावर्तकविषयकत्वमात्रसाधने चार्थान्तरत्वमित्याशङ्क्य व्यावर्तकविषयत्वमात्रसाधनान्नाप्रयोजकत्वं तत्साधनेऽपि तद्व्यावर्तकान्तरनिरासेनाभेदविषयकत्व एव पर्यवसानान्नार्थान्तरत्वमपीत्याशयेन व्यावर्तकान्तरं निराचष्टे **न चाभेदमन्तरेणेति** । सम्बन्धस्य कुण्डबदरादिसाधारणत्वेन तत्प्रतीतौ वैलक्षण्यानुपपादकत्वात् संयोगान्यसम्बन्धस्य च घटतदज्ञानतदभावादिसाधारणत्वेन तत्प्रतीतितो वैलक्षण्यानुपपादकत्वात् स्वरूपप्रत्यासत्तिसंयोगान्यसम्बन्धस्य च घटतद्धर्मिकान्योन्याभावादावसत्त्वेन तद्बुद्धेर्घटपटादिबुद्धितो वैलक्षण्यानुपपादकत्वात् तदानीन्तनस्याश्रयाश्रयिभावस्य कुण्डबदरादिप्रतीतावपि भानान्नियमस्य च तन्तुपटादिबुद्धावप्यभानेनाश्रयाश्रयिभावनियमरूपायुतसिद्धेरपि तद्वैलक्षण्यानुपपादकत्वात् तन्तुपटादिप्रतीतौ सम्बन्धनित्यत्वस्य सम्बन्ध्ययुतसिद्धत्वस्य वाऽस्फुरणेन समवायस्यापि तद्वैलक्षण्यानुपपादकत्वान्नाभेदातिरिक्तस्य व्यावर्तकत्वं सम्भवतीत्यर्थः । अस्त्वेवं किं तत इत्यतः परिशेषसिद्धमर्थं निगमयति **अत इति** । प्रथमप्रतिज्ञोपपादनसमाप्तावत्र इतिशब्दः । वक्ष्यमाणतर्के उपोद्घातत्वेनेष्टापत्तिं प्रथमं परिहरति **अस्ति चेति** । तर्कसिद्धमर्थं दर्शयति **तत इति** । **अन्तत इति** । विशेषं विना परस्परविरुद्धयोर्भेदाभेदयोरेकत्रावस्थानानुपपत्त्या तद्घटनार्थमपि विशेषस्यैवाश्रयणीयत्वादित्यर्थः । यद्वा भेदाभेदानवस्थापरिहारार्थं विशेषस्याङ्गीकर्तव्यत्वादित्यर्थः ।

वा०र०— अध्याहृतेति । किञ्चावयवावयव्यादिभेद इत्यादिनोक्तेत्यर्थः । **अवयवावयव्यादेरभेदप्रतीतेरपीति** । अवयवावयव्यादेर्या भेदप्रतीतिस्तस्या अपीत्यर्थः । तृतीयाध्याये भेदाभेदवादिना विशेषोऽङ्गीकारि ततस्तदनुसारेण व्याचष्टे **यद्वा भेदाभेदेति** ।

विष्ठल०— मूलं विशेषस्य प्रत्यक्षादिसिद्धतोपपादतया प्रकारान्तरेण व्याचष्टे **यद्वेति** । **अनुक्तसमुच्चयेति** । सामानाधिकरण्यादिव्यवहारसमुच्चयार्थ इत्यर्थः ।

॥ इति अभेदस्याप्यप्रामाणिकत्वमिति शङ्कानिरासे अभेदपक्षीयविशेषस्य प्रत्यक्षार्थापत्तिसिद्धतायाः उपपादनम् ॥

॥ अथ अभेदस्याप्यप्रामाणिकत्वमिति शङ्कानिरासे अभेदपक्षीयविशेषस्य व्यवहारान्यथानुपपत्तिसिद्धतायाश्चोपपादनम् ॥

॥ अथ तत्रादौ वस्तुषु अभिन्नानां तन्निष्ठत्वादिधर्माणां व्यवहारसिद्धत्वप्रपञ्चनम् ॥

१५९ **सु०—** 'प्रागुक्तं समवाये विशेषोऽङ्गी(कर्तव्य)क्रियत इति; तन्न तावदेव, किन्तु सर्वेष्वपि पदार्थेष्वि'ति दर्शयन्विशेषस्य व्यवहारान्यथाऽनुपपत्तिसिद्धतां चोपपादयति **सामान्यादीति** ।

अनु०— सामान्यादिपदार्थेषु तन्निष्ठत्वादयोऽखिलाः ।
कथं धर्मा निवार्यन्ते वस्त्वैक्येऽपि हि वादिभिः ॥

तन्निष्ठत्वादयः व्यक्तिनिष्ठत्वादयः । **कथम्** इत्याक्षेपे । **वस्त्वैक्येऽपि** धर्म्यैक्येऽपि । कुतो न निवार्यन्त इत्यत उक्तं **वादिभिरिति** । अविसंवादिव्यवहारसिद्धत्वादिति यावत् ।

परि०— प्रागुक्तमिति । 'विशेषस्तद्गतत्वादिर्यद्यभिन्न' इत्यत्रोक्तमित्यर्थः । वस्त्वैक्येऽपीत्यस्य व्याख्या **धर्म्यैक्येऽपीति** । धर्मिणा सहैक्येऽपीत्यर्थः ।

वं०प०— धर्म्यैक्येऽपि धर्मिणा तन्निष्ठत्वादिधर्माणामैक्येऽपि ।

शे०वा०— सामान्यादिपदार्थेषु तन्निष्ठत्वादिधर्माणां धर्म्यभिन्नत्वोपपादनपुरःसरमनिवारणीयत्वमुच्यते । तदनर्थकमित्याशङ्क्य सामान्यादिपदार्थेषु विशेषसमर्थनार्थत्वान्न तदित्यभिप्रायेण तत्र विशेषसमर्थनपरतया तद्योजयितुं तत्र विशेषसमर्थनस्यापि का सङ्गतिरित्यतस्तामाह **प्रागुक्तमिति** । 'विशेषस्तद्गतत्वादिर्यद्यभिन्नेऽवसीयते' इत्यादिनेति शेषः । एवं व्यवहितेन सङ्गतिमुक्त्वाऽव्यवहितेनापि तामाह **विशेषस्येति** । उत्तराभावेन कथमित्यस्य प्रश्नार्थत्वायोगादाह **आक्षेप इति** । वादिभिरित्यस्यानर्थक्यमित्याशङ्क्य निवार्यार्थत्वे हेतूक्त्यर्थत्वान्न तदिति भावेन तत्परतया तद्योजयितुं हेत्वाकाङ्क्षामुत्थापयति **कुत इति** । कथमनेन तदाकाङ्क्षापरिहार इत्यतोऽपेक्षितहेतुसमर्पकतया तत्तात्पर्यमाह **अविसंवादीति** ।

वा०र०— सामान्यादिपदार्थेष्विति । सामान्यादिपदार्थेष्वित्युत्तरानुव्याख्यानेति शेषः । कथमित्यस्याक्षेपार्थताया उक्तत्वात् न कथमपि निवारयितुं शक्यन्ते इत्युक्त्यनन्तरं कुत इत्येवं शङ्कोदयान्मूले कुत इत्युक्तम् । अत्रिसंवादीतीति प्रतीकोपादानानन्तरं तत्सिद्धस्याप्यनङ्गीकारे वादित्वमेव न स्यादिति शेषः

पूरणीयः । **इत्यपि बहुलोऽयमिति** । इत्याद्यतिबहुलोऽयमित्यर्थः । तेनोक्तधर्माणां द्वादशत्वप्राप्तावपि नातिबाहुल्यम् । किं वा गुणादेरिति भाष्योक्तादिपदस्य सत्यपदार्थसङ्ग्रहकत्वमवश्यं वाच्यम् । यदि च सामान्यस्येति वाक्योक्तसामान्यस्य गुणादेरित्यादिपदेन कर्मण इव ग्रहणमिति भावेन मूलकृता गुणकर्म-सामान्येष्वेव धर्माभिधानं कृतं नान्यत्रेत्युच्यते । तर्हि सर्वेष्वपीति प्रतिज्ञा । उत्तरत्र घटो न भवति पट इत्यत्राभावे धर्माधर्मिभावप्रतीत्युपन्यासः सर्वपदार्थेषु सप्तस्वपि पदार्थेष्वित्यादिकमुपपन्नं स्यात् । अतो मूलवाक्यस्योपलक्षणत्वमिति वाच्यम् । तथा च विशेषसमवायाभावनिष्ठानां नित्यद्रव्यमात्रनिष्ठत्वानन्तत्व-द्रव्यगुणकर्मसामान्यनिष्ठविशेषनिष्ठत्वैकत्वद्धर्मिगतत्वादीनामपि धर्माणां ग्रहणमावश्यकमिति तदनुपदर्शनायोग इति शङ्काद्वयं निरस्तं भवति । अन्त्योपादानेनैव विशेषसमवायाभावानां त्रयाणामपि उपादानं ज्ञेयमिति भावेनैव उत्तरत्राभावधर्मप्रतीतिरेवोपन्यस्ता । इतरसङ्ग्रहाय चादिपदं प्रयुक्तम् । अन्यथा तदसङ्गतिप्रसङ्गात् । एवमस्यो-पलक्षणत्वाभिप्राय एवोत्तरमूले कार्यद्रव्यविशेषसमवायानामित्युक्तिरुपपद्यते । तत्र विशेषादिवदभावस्य सङ्ग्रहाभावः उपलक्षणतया सुज्ञेयत्वाभिप्रायेण । पूर्वत्र कार्यद्रव्यगुणकर्मसामान्यविशेषसमवायानामित्युत्तरमूलानुसारेणातिबहुल इत्यादौ वक्तव्यस्य सर्वस्य सुज्ञेयत्वाभिप्रायेण तत्राभावस्योपलक्षणमेवात्राप्युपलक्षणया ग्रहणमिति भावेनोप-लक्षणत्वाभिधानं टीकायाम् । उक्ताभिप्रायेणैव च टीकायां आदिपदेन सङ्ग्राह्यत्वेन समवायान्तानामयुतसिद्धानां च वचनमुत्तरत्र । अतो न कश्चिद्दोष इति सूरयो विदांकुर्वन्ति ।

विट्ठल०— प्रागुक्तमिति । विशेषस्तद्गतत्वादिरित्यत्रेत्यर्थः । **धर्मैक्येऽपीति** । धर्मिसामान्याद्यैक्ये-ऽपीत्यर्थः ।

चषक— प्रागुक्तं 'विशेषस्तद्गतत्वादिर्यद्यभिन्न' इत्यत्राभिहितम् ।

१६० सु०— एतदेव प्रपञ्चयति कार्यस्येति ।

अनु०— कार्यस्य तत्तन्निष्ठत्वं गुणादेर्व्यापितादिकः । कथं विशेषो नैवास्ति

अस्ति तावदवयविनोऽवयवनिष्ठत्वं नाम धर्मः । गुणानां केषाञ्चिद्रूपादीनामाश्रय-व्यापित्वम्, केषाञ्चित्संयोगादीनां प्रदेशावृत्तित्वम्, रूपादीनामुद्भूतत्वम्, सर्वेषां चतुर्विंशति-त्वम्, कर्मणश्च आश्रयव्यापित्वमनित्यत्वं पञ्चत्वं मूर्तनिष्ठत्वम्, सामान्यस्यापि द्रव्य-गुणकर्मनिष्ठत्वं नित्यत्वमनुगतत्वं द्विविधत्वमित्यतिबहुलोऽयं पदार्थधर्मसमूहः । न चाय-माश्रयतो भिन्न एवेति युक्तम् । अस्ति च धर्मधर्म्यादिव्यवहारः, 'तन्तुषु पटः', 'प(घ)टो

न भवति घ(प)ट' इत्यादिः । स चायमत्यन्ताभेदेऽनुपपद्यमानः स्वोपपादकं विशेषमवगमयतीति सर्वपदार्थेषु कथं विशेषो नैवास्ति ।

परि०— न चेति । भिन्न एवेति न च युक्तमेवेत्येतदग्रे स्पष्टीभविष्यतीति भावः । धर्मधर्म्यादीत्यादिपदेन षष्ठ्यन्तादिव्यवहारग्रहः । 'कार्यकारणपूर्वके । अभावान्ते पदार्थे' इति प्राञ्मूलोपात्तयोराद्यन्तयोस्तावद्दर्शयति **तन्तुषु पट इति** । गुणगुण्यादौ तु स्पष्ट इति भावः । एतेन प्राग्विधिनिषेधभेदेन द्विविधो व्यवहार इत्युक्तं विवृतं ज्ञेयम् ।

गु०दी०— न चायमाश्रयतो भिन्न एव इत्यत्र सप्तपदार्थेष्वनन्तर्भविन तत्तद्रूपतायाः परेणैवाङ्गीकर्तव्यत्वादिति हेतुर्द्रष्टव्यः ।

यादु०— प्रत्याहारन्यायेन कार्यकारणयोरभावधर्मिणोश्च धर्मधर्म्यादिव्यवहारं दर्शयति **तन्तुषु पट इति** । आदिपदेनावयव्यादीनां तत्तन्निष्ठत्वादिधर्मसमूहेऽपि अवयविन्यवयवनिष्ठत्वमित्यादिरूपधर्मधर्म्यादिव्यवहारसङ्ग्रहः ।

वं०प०— तन्तुषु पट इति । पटेऽवयवनिष्ठत्वं धर्मतया प्रतीयत इत्यर्थः ।

कं०रा०— पञ्चत्वमिति । उत्क्षेपणापक्षेपणाकुञ्चनप्रसरणगतिभेदात् कर्मणः पञ्चत्वमिति भावः । **द्विविधत्वमिति** । द्विविधत्वमिति सामान्यं परमपरं चेति परेणोक्तत्वात् सामान्यस्य परापरभेदेन द्विविधत्वमिति भावः । **न चायमाश्रयत इति** । अवयव्यादिगतत्वस्यावयवनिष्ठत्वादिधर्मस्याश्रयतो भिन्नत्वे वक्ष्यमाणरीत्या षट्पदार्थनियमभङ्गप्रसङ्गादिति भावः ।

श्रीनिधि०— तन्तुषु पटः घटो न भवति पट इत्यादिरिति । यद्यपि कार्यस्य तत्तन्निष्ठत्वमित्यत्रान्यत्वं नोक्तम् । तथाप्यभेदेन प्रतीतिश्च कार्यकारणपूर्वके 'अभावान्त' इति पूर्वग्रन्थानुसारेण उपलक्षणमिदमिति घटो न भवति पट इत्युदाहृतमिति द्रष्टव्यम् ।

शे०वा०— सामान्यादीति पूर्ववाक्योक्तार्थस्य कार्यस्येत्युत्तरवाक्येन प्रतिपादनात् पौनरुक्त्यमित्याशङ्क्योक्तार्थप्रपञ्चकत्वान्न तदिति भावेनोक्तार्थप्रपञ्चकतया तद्योजयति **एतदेवेति** । प्रपञ्चकत्वं च सामान्यादीत्यादिपदसङ्ग्राह्यस्य तन्निष्ठत्वादय इत्यादिपदसङ्ग्राह्यस्य कथं विशेषो नैवास्तीत्यापादकस्य च कथनादित्यवगन्तव्यम् । **युक्तमिति** । तथा सत्युदाहृतधर्माणां षड्भ्यः पदार्थेभ्योऽतिरिक्तत्वेन षडेव पदार्था इति नियमभङ्गप्रसक्तेरिति भावः । अस्तु धर्मपदार्थस्य धर्मिणाऽभेदः स तु अत्यन्ताभेद एव किन्न स्यादित्यतस्तत्र

बाधकमाह **अस्ति चेति** । उक्तव्यवहारमेवाभिनयेन दर्शयति **तन्तुषु पट इत्यादिना** । **अनुपपद्यमान इति** । घटः कलश इति सामानाधिकरण्यव्यवहारदर्शनादिति भावः ।

वा०र०— अस्तु धर्मपदार्थस्य धर्मिणा भेद इति । तत्तद्रव्यत्वादिधर्मपदार्थस्य धर्मिभूतावयव्यादिनाऽभेद एवास्त्वित्यर्थः । **तत्र बाधकमाहेति** । ननु तन्तुषु पट इत्यादिप्रतीतिः तन्तुपटादिरूपधर्मधर्मिविषया तन्तुपटादीनां विशेषमाक्षिपति । न तु पटादिधर्मितन्तूगतत्वादिधर्माणां तद्विषयत्वाभावादिति चेदत्र ब्रूमः । तन्तुषु पट इत्यत्र हि तन्तुष्विति सप्तम्या तन्तूनामाधाराभावे उक्तैस्तद्बलात् पटस्याधेयाभावोऽपि लब्ध एव । पटस्याधेयतायाः तन्तुनिष्ठत्वातिरिक्ताया अभावेन पटे तन्तुनिष्ठत्वमपि प्रतीतमेव । यतोऽत्र सम्बन्धत्रयं प्रतीयते । एकस्य तन्तुपटयोः सम्बन्धः अपरः पटाश्रयत्वतन्त्वोरन्यश्च तन्तुनिष्ठत्वपटयोस्तेषु तन्तुपटयोः सम्बन्धः सप्तम्यैवाधाराधेयभावरूपः इरौ तु योग्यतया तद्रूपौ । घटपटरूपमित्युक्तेऽपि योग्यतया तद्रूपस्य त्वस्यैव प्रतीतेः । तथा च तन्तुषु पट इतिं प्रतीतेरुभयविषयत्वेन तन्तुषु पटेन पटे तन्तुनिष्ठत्वेन च विशेषमाक्षेसुमलम् ।

विठ्ठल०— कर्मणश्चाश्रयव्यापित्वमिति । यद्यपि वृक्षाग्रे चलनं न तु मूल इत्यव्याप्तित्वमेवानुभूयते तथापि अवयवकर्मजातं न त्ववयविनि ह्यवयवसंयोगावयविनि संयोगवदवयवकर्मणावयविनि कर्मोत्पद्यत इति परक्रिया अवयवकर्म च तद्व्याप्यवृत्तीति न दोषः । पञ्चत्वं उत्क्षेपणादिभेदेन द्विविधत्वं परापरसामान्यभेदेन । भेदव्यवहारं च दर्शयति **अस्ति चेति** । तत्रादौ अवयविनः पटस्यावयविनिष्ठत्वं नाम यो धर्मः तस्य तद्धर्मिणश्च धर्मधर्मिव्यवहारं दर्शयति **तन्तुषु पट इति** । अत्र पटो धर्मी तन्तुष्वित्यधिकरणसप्तमीबलादवयविभूततन्तुनिष्ठत्वं नाम धर्म इति धर्मधर्मिव्यवहारो दर्शितः । अभावान्ते पदार्थ इत्युक्तत्वादभावतद्धर्मिणो धर्मधर्म्यादिव्यवहारं दर्शयति **घटो न भवति पट इति** । आदिपदेन रूपमाश्रयव्यापीत्यादि धर्मधर्मिभावादिग्रहणं शङ्कते **स चायमिति** ।

चषक— आश्रयव्यापित्वम् आश्रयनिष्ठं निरवच्छिन्नाधिकरणतानिरूपकत्वं, तन्निरूपितनिरवच्छिन्नाधेयताशालित्वं वा । व्याप्यवृत्तेरवच्छेदकानुपगमादिति भावः । **प्रदेशावृत्तित्वं** देशविशेषावच्छिन्नाधिकरणतानिरूपकत्वं, तदवच्छिन्नाधेयताशालित्वं वा । अवच्छेद्याधिकरणसम्बन्धिन एवावच्छेदकतया नातादृशस्यावच्छेदकतेत्यवसेयम् । **मूर्तनिष्ठत्वं** परिच्छिन्नपरिमाणवन्निष्ठत्वम् ।

॥ इति वस्तुषु अभिन्नानां तन्निष्ठत्वादिधर्माणां व्यवहारसिद्धत्वप्रपञ्चनम् ॥

* * *

॥ अथ तत्रान्ते व्यवहारसिद्धानां तेषां धर्माणां वस्तुभिन्नत्वशङ्कायाः षट्पदार्थातिरेकापादनेन निराकरणम् ॥

१६१ **सु०—** 'सत्यम् । सन्त्येव द्रव्यादिषु सप्तस्वपि पदार्थेषु ते ते धर्माः, किन्नामाश्रयतो भिन्ना एव । तथा च तत्सम्बन्धनिबन्धनतयैवोपपद्यमानो व्यवहारः सर्वपदार्थेषु न विशेषमाक्षेसुमलमि'त्याशयेन शङ्कते **स चेति** ।

अनु०— **स च धर्मोऽपरो यदि ।**

न केवलं गुणादि द्रव्यादितो भिन्नम् । किन्तु **सः** तत्तन्निष्ठत्वादिधर्मः **च अपरः** स्वाश्रयाद्भिन्नो **यदि** अङ्गीक्रियत इत्यर्थः ।

निराकरोति **षडिति** ।

षट्पदार्थातिरेकः स्यात्

तर्हि धर्माणां षड्भ्यः पदार्थेभ्यः अतिरेकः स्यात् । तथा च षडेव पदार्था इति नियमो भज्येतेति ।

परि०— शङ्कते **सत्यमिति** ।

शे०वा०— स च धर्मोऽपर इत्यत्र चशब्दार्थमाह **न केवलमिति** । अस्त्वेवं धर्मपदार्थस्य षट्पदार्थातिरिक्तत्वं, किं तत इत्यतः पदार्थानियमेऽपि हीत्युत्तरग्रन्थात् तात्पर्यतो लब्धं षट्पदार्थनियमभङ्गं बाधकत्वेनाह **तथा चेति** ।

विष्टल०— **किं तु स एवेति** । यथा दण्डादयः पदार्था एव देवदत्तादि विशेषणीभूता धर्म इत्युच्यन्ते तथा पटादयः पदार्था एव तन्तुषु पट इत्यादिप्रकारकतत्त्वादिविशेषणीभूताः अवयविगताः तद्गतत्वादिधर्मरूपाः । एवं रूपस्याश्रयव्याप्तित्वमपि घटे रूपमिति विशेषणीभूतो रूपादिस्वरूपमेवेत्यादिरूपेण त एव द्रव्यगुणादिपदार्था एवान्योन्यविशेषणीभूताः सन्तो धर्मा इत्युच्यत इत्यर्थः ।

* * *

॥ अथ तत्रादौ किरणावलीकारमतानुसारेण षट्पदार्थातिरेकासिद्धिशङ्का तन्निरासश्च ॥

१६२ सु०— ननु स्वाश्रयतो विभिन्ना अपि धर्मा न ष(ड्भ्यः)ट्पदार्थेभ्योऽतिरिच्यन्ते, किन्तु त एवान्योन्यविशेषणीभूता धर्मा इत्युच्यन्ते । यथाऽऽह 'यद्यपि धर्माः षट्पदार्थेभ्यो न व्यतिरिच्यन्ते । किन्तु त एवान्योन्यापेक्षया धर्मधर्मिणश्च भवन्ती'ति । अन्यत्रापि 'तेषां धर्मास्त एव परस्परं विशेषणीभूताः' इति । तत्कथं नियमभङ्ग इति । मैवम्, तन्निष्ठत्वादीनां षट्सु पदार्थेष्वन्तर्भावयितुमशक्यत्वात् ।

परि०— किन्तु त एवेति । तन्त्वादय एव तन्तुषु पट इति पटे विशेषणीभूतावयविगताश्रितत्वरूपधर्मो नान्यः । रूपस्याश्रयव्यापित्वं नाम घटे रूपमिति विशेषणीभूतो घट एवेत्येवंरूपेण विशेषणीभूताः सन्तो धर्मा इत्युच्यन्त इत्यर्थः । तत्र तदीयसम्मतिमाह **यथाहेति** । इत्यभ्युपगतमित्यस्यावयवादिनिष्ठत्वमित्यन्वयः ।

वं०प०— त एव षट्पदार्था एव । **तेषां** पदार्थानाम् ।

श्रीनिधि०— अन्यत्रापि न्यायग्रन्थान्तरेऽपि । **परस्परं विशेषणीभूताः त एव** = द्रव्यादय एव । **तेषां** = द्रव्यादीनाम् । धर्मा इति सम्बन्धः । गुणादिवृत्त्यनुपपत्तेरित्येतद् यथासम्भवं द्रष्टव्यम् ।

शे०वा०— धर्माणामाश्रयतो भिन्नत्वेऽपि षट्पदार्थानतिरेकान्न पदार्थनियमभङ्ग इति किरणावलीकारमतमाशङ्कते **नन्विति** । अस्य पक्षस्य तत्सम्मतत्वं कुतोऽवगम्यत इत्यतस्तद्वाक्यादेवेत्याशयेन तद्वाक्यद्वयं पठति **यथाऽऽहेत्यादि** । 'षण्णामपि पदार्थानां साधर्म्यमस्तित्वाभिधेयत्वानी'ति प्रशस्तपादभाष्यव्याख्यानावसर इति शेषः । यद्यपि 'यद्यपि धर्मा अपि षट्पदार्थेभ्यो न व्यतिरिच्यन्ते तथाऽपि परस्परमङ्गतापन्नाः परस्परविवेकायोपयुज्यन्ते' इत्येव किरणावलीग्रन्थपाठः तथाऽपि तदर्थानुवादोऽयमित्यदोषः । अत एव स्पष्टमपि तद्वाक्यं पठति **अन्यत्रापीति** । पदार्थधर्मसङ्ग्रह इत्याद्यपद्यव्याख्यानावसर इति शेषः । **तेषां** द्रव्यादीनां धर्माः । **त एव** द्रव्यादय एव । अतो न सप्तपदार्थापत्तिरित्यर्थः । कथं तर्हि धर्मधर्मिभाव इत्यत उक्तं **परस्परमिति** । द्रव्यलक्षणं रूपादिकं गुणस्तल्लक्षणं गुणत्वं जातिरित्यादिक्रमेणान्योन्यं विशेषणविशेष्यभाव इति नोक्तदोष इति सम्मतिग्रन्थार्थः ।

वा०र०— साक्षात्सप्तम्युक्ताधाराधेयभाववत्तया पटतन्तुनिष्ठत्वयोः प्रतीतेरनुपन्यासस्तु साक्षात् तत्प्रतीतिरप्येतदुदाहरणेन सुज्ञेयेति भावेनेति न दोष इति ज्ञेयम् । मूले **धर्मधर्मिपदम्** अजहत्स्वार्थलक्षणयाश्रयापि परम् । तेन तन्तुधर्मता न पटस्य युक्ता धर्मताया उपसर्जनत्वरूपतया गुणादौ सम्भवेऽपि

पटे असम्भवात् । अत एव 'समुदायास्तु भिन्नग' इत्येतदनुव्याख्यानावतारूपमूलोपादानावसरे विशिष्टाकारस्य प्राधान्येन व्यावृत्तिर्वक्ष्यते । अत एव प्रतीतिकधर्मित्वादिभूतलप्रागभावैरपि सङ्ग्रहात्सर्वसाधारण्यम् । धर्म्यादीत्यादिपदं ज्ञातत्वाज्ञातत्वादिपरं द्रष्टव्यम् । यत्तु प्रत्यहारन्यायेनेति अभावप्रत्युपन्यासोपपादनमन्यथाख्यातौ तदसत् । भवता इतःप्राक् विशेषादिसङ्ग्रहस्यानभिहितत्वेन सर्वपदार्थसङ्ग्रहाभावे प्रत्याहारन्यायानवकाशात् । पूर्वोत्तरग्रन्थापर्यालोचनया उपलक्षणया अन्यस्य ज्ञातुं शक्यतयोपेक्षितस्य टीकाकारमन्येन भवताऽवश्यं वक्तव्यत्वाच्च । अन्यथा प्रत्यहारेत्यादेरप्यवक्तव्यत्वमेव । **इत्यादी**त्यादिपदस्य भवत्पक्षे सङ्ग्राह्यान्तरभावेनादिपदयोगश्च । यच्चादिपदेनावयव्यादीनां तत्तन्निष्ठत्वादिधर्मसमूहेऽपि अवयविनि अवयवनिष्ठत्वमित्यादिरूपधर्म्यादिव्यवहारसङ्ग्रह इति आदिपदसङ्ग्राह्यमुक्तम् । तदत्यन्तासत् । एतावता तन्तुषु पट इत्यादि प्रतीतिः न धर्माणां धर्मिनिष्ठत्वप्रतीतिः सा त्वन्येति तयोक्तं स्यात् । न चेदं युक्तम् । तथा सत्येतदुदाहरणस्य मूले असङ्गतत्वापातात् । न ह्यत्र तन्तुपटयोर्धर्मधर्मिणोर्विशेषसमर्थनं प्रकृतं येन तद्धर्मधर्मिणो धर्मधर्मिव्यवहारोदाहरणं ग्रन्थे निक्षेप्यम् । मूले धर्माणां षड्भ्यः पदार्थेभ्योऽतिरेकः स्यादिति किरणावल्यादिषु धर्मपदार्थस्य षट्पदार्थेष्वेवान्तर्भावस्योक्तत्वेन तन्निरासाय तत्प्रसञ्जकतया षट्पदार्थातिरेक एवापादित अनुव्याख्याने अतस्तदनुसारेण मूले तदनुसारेण टीकायां च तथोक्तिः । अत एव मूलकृता भाष्यानुक्तसप्तमपदार्थान्तर्भावे निराकरणे कश्चिदाहेत्यादिनानूद्य करिष्यते तथा च षडित्याद्या सर्वेषामुक्तिमुपपन्नेति ध्येयम् । **आद्यपद्येति** । आद्यपद्यखण्डेत्यर्थः । **सम्मतिग्रन्थार्थ इति** । एतद्रीत्यैव पूर्ववाक्यस्यापि व्याख्येयत्वे तात्पर्यान्न कश्चित्क्षुद्रोपद्रवः । ननु तावतान्यस्यान्यविशेषणकता न विशेषणस्यान्यविशेषणत्वेति क्रमेण तेषां तेषां भिन्नभिन्नतत्तद्विशेष्यविशेषणत्वप्राप्तावपि न परस्परविशेषणतापत्तिरिति नान्योन्यपदस्वारस्यमिति चेन्न । किरणावलीकारस्य धर्मपदार्थमन्तर्भावयितुं प्रवृत्तस्य तस्य तत्तद्विशेषणत्वाभिप्रायेणैवान्योन्यपदप्रयोग इति तदनुसारेणैवानुव्याख्यानमूलयोरपि तथोक्तेरदोष इति ध्येयम् ।

विष्टल०— तत्र तदीयसम्मतिमाह **यथाऽऽहेति** ।

चषक— उक्तार्थे तदीयवचनं प्रमाणयति **यथाहेति** ।

* * *

॥ अथ तत्र तन्निष्ठत्वादिधर्माणां षट्पदार्थेष्वन्तर्भावयितुमशक्यतायाः स्पष्टीकरणम् ॥
॥ अथ तत्रापि पदार्थषट्कनियमवादिनं प्रति नियमभङ्गापादनम् ॥
॥ अथ तत्राप्यादौ आश्रितत्वस्य द्रव्यावनन्तर्भावः ॥

१६३ **सु०— तथा हि । 'आश्रितत्वं चान्यत्र नित्यद्रव्येभ्यः' इत्यभ्युपगतं कार्यद्रव्यगुणकर्मसामान्यविशेषसमवायानामवयवादिनिष्ठत्वं न तावद् द्रव्यादिकम्, गुणादिवृत्त्यनुपपत्तेः;**

नापि समवायः, तस्य स्ववृत्त्यनुपपत्तेः, किञ्चाधार्याधारभूतयोः सम्बन्धः समवाय इष्यते, तथा च कथं स एवाधारित्वमाधारत्वं च स्यात् ।

परि०— अन्यत्र नित्यद्रव्येभ्य इत्यत्रानित्यद्रव्याणि कानीत्यतः तद्वक्ति **कार्यद्रव्येत्यादि** । आश्रितत्वमित्यस्यार्थोऽवयवादिनिष्ठत्वमिति । गुण्यादिनिष्ठत्वमादिपदार्थः । **द्रव्यादिकमिति** । द्रव्यादिविशेषान्तमित्यर्थः । **गुणादीति** । गुणादिविशेषान्तपदार्थसार्थेऽपि स्वस्वाश्रयनिष्ठत्वस्य सत्त्वादिति भावः । अयमर्थः । पटादेरवयविनस्तन्त्वादिरूपस्वाश्रयनिष्ठत्वं द्रव्यं चेद्गुणादावपि स्वाश्रयनिष्ठत्वं द्रव्यमिति वाच्यम् । तच्चायुक्तम् । गुणकर्मादौ द्रव्यस्य वृत्त्यनुपपत्तेः । नापि गुणकर्मसामान्यविशेषाः । गुणकर्मणोर्गुणकर्मविशेषाश्रयत्वाभावात् । नापि स्वाश्रयगतत्वं सामान्यन्तर्भूतम् । सामान्यविशेषयोरपि तस्य सत्त्वेन तयोः सामान्यविशेषाधारत्वाभावादिति । ननु पटादिकार्यद्रव्यगुणकर्मादीनां स्वस्वाश्रयनिष्ठत्वधर्मस्य गुणादिवृत्तित्वेन द्रव्यगुणादिष्वन्तर्भावायोगेऽपि समवायेऽन्तर्भावः सम्भवति । समवायस्य द्रव्यादिविशेषान्तपदार्थमात्रेऽपि सत्त्वेन गुणादिवृत्त्यनुपपत्तेरित्युक्तदोषाभावादिति भावेन तत्पृथगाशङ्क्य निराह **नापि समवाय इति** । **तस्येति** । स्वस्वाश्रयनिष्ठत्वस्य समवायान्तर्भवे सति समवायेऽपि समवायिनिष्ठत्वमस्तीति समवायेऽपि समवायोऽस्तीति प्राप्त्या समवायस्यैकत्वोपगमाच्च स्ववृत्तित्वं स्यात् । तच्चानुपपन्नमित्यर्थः । **तथा च कथं स एवेति** । पटादेः स्वस्वाश्रयनिष्ठत्वं नामाधाराधेयभाव एव तन्नियामकः समवायो नियम्यभूताधारत्वमाधारित्वं च कथं भवेदित्यर्थः ।

यादु०— **अवयवादिनिष्ठत्वमिति** । अत्रादिपदेन गुणिमूर्तव्यक्तिनित्यद्रव्यायुतसिद्धसम्बन्धिसङ्ग्रहः । **गुणादीति** । अवयवगुणिमूर्तव्यक्तिनित्यद्रव्यायुतसिद्धसम्बन्धिनिष्ठत्वानि न तावद्द्रव्यगुणकर्मविशेषरूपाणि । द्रव्यगुणकर्मविशेषाणां गुणवृत्त्यनुपपत्तेः । अवयवनिष्ठत्वादीनां च गुणेऽपि सत्त्वात् । नापि सामान्यरूपाणि । सामान्यानां सामान्यवृत्त्यनुपपत्तेः । अवयवनिष्ठत्वादीनां च सामान्येऽपि सत्त्वादित्यर्थः । **तस्य स्ववृत्तीति** । अवयवनिष्ठत्वादिधर्माणां समवायेऽपि सत्त्वादिति भावः । **किञ्चाधारीति** । आधाराधेयभावप्रयोजकतया हि समवायोऽङ्गीकृतः स एव कथं प्रयोज्यरूपाधाराधेयभावोऽपि स्यात् । प्रयोज्यस्य प्रयोजकभिन्नत्वनियमादित्यर्थः ।

वं०प०— कार्यद्रव्यादाववयवादिनिष्ठत्वमेव नास्ति अनाश्रितत्वाभ्युपगमादित्यतो नैवमङ्गीकृतं त्वयेत्याह **आश्रितत्वं चेति** । **स्ववृत्तीति** । अवयवादिनिष्ठत्वं समवायेऽपि तावदस्ति । यद्यं धर्मः समवायः स्यात् तर्हि स्ववृत्तिः समवायस्यात्माश्रयादयुक्तेत्यर्थः । **स एवेति** । समवाय एवेत्यर्थः । **किञ्चाधारीति** ।

अवयवावयविनोराधाराधेयभावनियामकसम्बन्धो हि समवायः । आधाराधेयभावरूपमेवावयवादिनिष्ठत्वं जातं नान्यत् । तथा चास्य समवायरूपत्वे आधारित्वमाधारित्वनियामकत्वमाधारत्वं तन्नियामकत्वं समवायस्य न स्यात् । नियम्यनियामकभावस्य भेदव्याप्तत्वेनाभेदे तदयोगादित्यर्थः ।

कं०रा०— तथा च कथमिति । समवायस्याधार्याधारयोः सम्बन्धरूपत्वे सति समवाय एव कथमाधारित्वमाधारत्वं स्यात् न कथञ्चित् आधार्याधारोभयवृत्तिसम्बन्धत्वस्याधारित्वादिरूपत्वे आधारित्वादेरुभयवृत्तित्वापातात् आधार्याधारसम्बन्धरूपस्य घटभूतलादिसंयोगस्याधारित्वतोऽन्यत्वदर्शनाच्चेत्यर्थः । अनेनावयवादिनिष्ठाधारत्वस्यावयवावयव्यादिगताधारित्वस्य च समवायेऽन्तर्भावो नेत्युक्तं भवति ।

श्रीनिधि०— स्ववृत्त्यनुपपत्तेरिति । समवायस्य तत्त्वानिष्ठत्वमस्ति तत्र तन्निष्ठत्वं न समवायः । समवायान्तरस्यानभ्युपगमात् स्वस्य च स्ववृत्तित्वं विरुद्धमित्यर्थः । **आधार्याधारभूतयोरिति** । आधार्याधेयभूतयोस्तन्तुपटादिकयोः सम्बन्धसमवायः । स च भिन्नः । तयोराधारत्वमाधारित्वं च भवति । न त्वाधेयस्यैवाधारित्वं चोक्तं स्यात् । स चाभ्युपगमविरुद्ध इत्यर्थः ।

शे०वा०— अवयवादिनिष्ठत्वमिति । अत्रादिपदेन गुणिमूर्तव्यक्तिनित्यद्रव्यायुतसिद्धसम्बन्धिनां सङ्ग्रहः । **गुणादीति** । अवयवगुणिमूर्तव्यक्तिनित्यद्रव्यायुतसिद्धसम्बन्धनिष्ठत्वादीनि न तावद्द्रव्यगुणकर्मविशेषरूपाणि । द्रव्यगुणकर्मविशेषाणां गुणवृत्त्यनुपपत्तेः । अवयवनिष्ठत्वादीनां च गुणेऽपि सत्त्वात् । नापि सामान्यरूपाणि । सामान्यानां सामान्यवृत्त्यनुपपत्तेः । अवयवनिष्ठत्वादीनां च सामान्येऽपि सत्त्वादित्यर्थः । **तस्य स्ववृत्तीति** । अवयवनिष्ठत्वादिधर्माणां च समवायेऽपि सत्त्वादित्यर्थः ।

किञ्चाधारीति । अवयवावयव्यादेराधाराधेयप्रयोजकतया हि समवायोऽङ्गीकृतः । तत्कथं स एव प्रयोज्यरूपाधाराधेयभावोऽपि स्यात् । प्रयोज्यस्य प्रयोजकभिन्नत्वनियमादित्यर्थः । केचित्तु । अवयवादिनिष्ठत्वस्य समवायरूपत्वे आधारित्वं समवाय इति प्राप्नोति । अवयवादिनिष्ठत्वमाधारत्वमित्यनर्थान्तरत्वात् । ततश्च तत्तुल्ययोगक्षेमत्वादाधारत्वमपि समवाय इत्येव स्यात् । न चैतद्युज्यते । आधार्याधारयोः सम्बन्धस्य समवायत्वमङ्गीकुर्वता परेणाधारित्वातिरिक्तस्यैव समवायत्वाङ्गीकारेणाधारित्वाधारत्वयोरेव समवायत्वस्य वक्तुमशक्यत्वादित्यर्थ इत्याहुः ।

वा०र०— अत्रादिपदेन गुणीति । अत्रायुतसिद्धसम्बन्धिनामिति पाठः । मूलकोशानुसारात् । अयुतसिद्धौ यौ सम्बन्धिनाविति तदर्थः । सिद्धीति लेखकप्रमादात् । एवमुत्तरत्रापि । अत्र चोपलक्षणया धर्म्यपि ग्राह्यः । तस्यापि प्राक् घटः पटो न भवतीति प्रतीत्युपन्यासेन स्वगततत्तन्निष्ठत्वादिना सविशेषाभेदस्य मूलेऽभिप्रेतत्वात् । वचनवृत्त्यानुपादानं तु कार्यद्रव्येति मूलानुसारेणेति ज्ञेयम् । **द्रव्यगुणकर्मविशेषाणामिति** । यद्यप्यादिपदेन कर्मादिवृत्तित्वनिराकरणमप्यभिप्रेतमिति तन्निराकरणप्रकारप्रदर्शनमपि कार्यम् । अन्यथा मूले

सामान्यवृत्तित्त्वमपि निराकार्यं स्यात् । तथापि गुणवृत्त्यनुपपत्तिप्रदर्शनप्रकारेण कर्मसामान्यविशेषवृत्तित्वमपि निराकार्यम् । सामान्यवृत्तित्वस्य पृथक् निराकरणं तु गुणकर्मवृत्त्यनुपपत्तिरूपदूषणस्य सामान्यरूपत्वाप्रसरात् । तत्रापि च विशेषसमवायाभाववृत्तिरपि बोध्या । एवं चादिपदेन मूले समवायाभावान्तनाग्रहणस्याभिप्रेतत्वेऽपि द्रव्यगुणकर्मविशेषरूपत्वे गुणकर्मसामान्यविशेषसमवायाभाववृत्तित्वानुपपत्तिः । सामान्यरूपत्वे सामान्यविशेष-समवायाभाववृत्तित्वानुपपत्तिः । समवायस्य स्ववृत्त्यनुपपत्त्या समवायत्वनिराकरणवदभावस्यापिस्थवृत्त्यनुप-पत्त्या तत्त्वमपि मूले निराकार्यमुपलक्षणया एतद्विशेषसूचनायैव सामान्यरूपत्वस्य पृथङ्निराकरणमूले ततश्च अनेन मूलग्रन्थेन यद्रूपत्वे यद्वृत्तित्वासम्भवस्तेन तद्रूपत्वं निराकार्यमिति सर्वत्र तत्तद्रूपत्वाभावसमर्थनं कृतमिति द्रष्टव्यम् । **आधाराधेयभावप्रयोजकतया हीति** । तन्तुषु पटाश्रयत्वमाधारत्वं पटस्य तन्तुनिष्ठत्वमाधेयत्वम् । ततश्च तन्तुनिष्ठत्वस्य समवायरूपत्वे प्रयोज्याभेदप्राप्तिरित्यर्थः । आधारित्वमित्यनर्थान्तरत्वादिति पाठो मूल-कोशाद्युक्तत्वाच्चेति ध्येयम् । आहुरिति अस्वरसोद्भावनम् । तद्बीजं तु आधारत्वस्य समवायस्य रूपत्वनिराकरणे स्वातन्त्र्येणैव सम्भवति सति तत्परित्यागेन योगक्षेमतौल्येन बलात्समवायतायापाद्य निराकरणत्वस्वीकारो न युक्त इति, कथं तर्हीत्यादिना सामान्यादौ सत्प्रत्ययानुपपत्तिमाशङ्क्य गुणादिषु सङ्ख्यादिप्रत्ययदृष्टान्तेन सत्तयेकार्थ-समवाये तत्प्रत्ययोपपादनपरकिरणावल्यानुसारेणाशङ्क्य निराकरोति **न तावदिति** मूलम् ।

स०व्र०— उक्तरीत्येति । तस्य स्ववृत्त्यनुपपत्तेरित्युक्तरीत्या निरस्त इत्यर्थः ।

विट्ठल०— तन्निष्ठत्वरूपधर्म एव नास्तिकस्यान्तर्भावयितुमशक्यत्वमुच्यत इत्यतोऽवयवादिनिष्ठत्वं पराभ्युपगतमित्याह **आश्रितत्वं चेति** । **अवयवादिनिष्ठत्वमिति** । अवयविगुणिमूर्तद्रव्यव्यक्तिनित्यद्रव्यायुत-सिद्धपदार्थनिष्ठत्वं न तावद्द्रव्यादिकं द्रव्यगुणकर्मविशेषस्वरूपमिति तावन्न भवति कुतः द्रव्यगुणादेर्गुणकर्मणि च वृत्त्यनुपपत्तेः अवयवनिष्ठत्वादेर्गुणादावपि सत्त्वात् नापि सामान्यस्वरूपं अवयवनिष्ठत्वादेः सामान्येऽपि सत्त्वात् । सामान्ये च सामान्याभावादित्यर्थः । **तस्य वृत्तीति** । अवयवादिनिष्ठत्वं समवायस्वरूपमिति वक्तुं न शक्यते समवायेऽप्यवयवादिनिष्ठत्वस्य विद्यमानं वा समवाये समवायस्य वृत्त्यनुपपत्तेरित्यर्थः । किं चावयवाद्याश्रितत्वं समवायस्वरूपमिति सर्वथा वक्तुं न शक्यते । तथा हि आधाराधेयभावस्तत्प्रयोजकः सम्बन्धो हि समवायः अत आधाराधेयभावभिन्नः तस्य च समवायस्यावयव्यादिनिष्ठतात्मकत्वे आधारित्वं अवयवनिष्ठतात्मकत्वं चाधाराधेयत्वं चापद्येतेति विरोध इत्याह **किं चेति** ।

चषक— अभ्युपगतमिति । एतदागामिनाऽवयवनिष्ठत्वमित्यनेनान्वेति । नित्यद्रव्याणि दर्शयति **कार्यद्रव्येत्यादि** ।

॥ इति आश्रितत्वस्य द्रव्याद्यनन्तर्भावः ॥

* * *

॥ अथ तत्र ततो रूपादीनामाश्रयव्यापित्वस्य द्रव्याद्यनन्तर्भावः ॥

१६४ सु०— तथा रूपादीनामाश्रयव्यापित्वं न द्रव्यादिष्वन्तर्भवति, तेषां गुणवृत्तित्वासम्भवात् । समवायस्तूक्तरीत्या निरस्तः ।

परि०— द्रव्यादिष्विति । द्रव्यगुणकर्मविशेषेष्वित्यर्थः । नापि सामान्येऽन्तर्भवति । तस्य सामान्यवृत्तित्वानुपपत्तेरित्यपि ध्येयम् । **समवायस्त्विति** । समवायान्तर्भावस्तु स्ववृत्तित्वानुपपत्तेरित्युक्तरीत्या निरस्त इत्यर्थः । समवायेऽपि स्वाश्रयव्यापित्वसत्त्वादिति भावः ।

यादु०— तेषां गुणवृत्तित्वेति । गुणादिवृत्तित्वेत्यर्थः । ततश्चायमर्थः । आश्रयव्यापित्वं न तावद्द्रव्यगुणकर्मविशेषेष्वन्तर्भवति । तेषां द्रव्यादीनां गुणवृत्तित्वासम्भवात् । अस्य च गुणवृत्तित्वात् । नापि सामान्ये, सामान्यस्य सामान्यवृत्तित्वासम्भवात् । अस्य च सामान्यवृत्तित्वादिति ।

वं०प०— उक्तरीत्येति । आश्रयव्यापित्वस्य समवायेऽपि सत्त्वेन तस्य समवायत्वे तस्य स्ववृत्त्यनुपपत्तेरित्युक्तरीत्येत्यर्थः ।

कं०रा०— द्रव्यादिष्विति । द्रव्यगुणकर्मविशेषेष्वित्यर्थः । **तेषामिति** । द्रव्यगुणकर्मविशेषाणामित्यर्थः । आश्रयव्यापित्वस्यानेकपदार्थगर्भितत्वेन सामान्यान्तर्भावो नाशङ्कनीय इति भावः । ननु द्रव्यगुणकर्मविशेषाणां गुणवृत्तित्वासम्भवेन रूपादिनिष्ठाश्रयव्यापित्वस्य द्रव्याद्यन्तर्भावासम्भवेऽपि समवायस्य गुणवृत्तित्वात् तदन्तर्भावोऽस्त्वित्यत आह **समवायस्त्विति** । आश्रयव्यापित्वस्य समवायेऽपि सत्त्वात् तस्य स्ववृत्त्यनुपपत्तेः समवायान्तर्भावो निरस्त इत्यर्थः ।

श्रीनिधि०— समवायस्तूक्तरीत्या निरस्त इति । स्ववृत्तिविरोधादिना निरस्त इत्यर्थः । तथा हि रूपसमवायस्य रूपिणि व्याप्यवृत्तित्वं वक्तव्यं अन्यथा यत्र रूपसमवायो नास्ति तत्र रूपाभावापत्त्या रूपस्य व्याप्यवृत्तित्वानुपपत्तेः । तथा चोक्तो दोष इति ।

शे०वा०— तेषां गुणवृत्तित्वेति । गुणादिवृत्तित्वेत्यर्थः । द्रव्यगुणकर्मविशेषाणां गुणवृत्तित्वाभावेनाश्रयव्यापित्वस्य गुणवृत्तित्वाभावापत्त्या द्रव्यगुणकर्मविशेषेषु, सामान्यस्य सामान्यवृत्तित्वाभावेनाश्रयव्यापित्वस्यापि सामान्यवृत्तित्वाभावप्रसङ्गेन सामान्ये च न तदन्तर्भावः सम्भवतीति भावः । **उक्तरीत्येति** । तस्य स्ववृत्तित्वानुपपत्तेरित्युक्तरीत्येत्यर्थः ।

विठ्ठल०— तेषामिति । द्रव्यादीनामित्यर्थः । आश्रयव्यापित्वस्य सामान्येऽन्तर्भावः सम्भवति । तस्य गुणादिवृत्तित्वोपपत्तेरिति न वाच्यम् । सामान्यस्याप्याश्रयव्यापित्वेन सामान्येऽन्तर्भावायोगात् । सामान्ये

सामान्याभावात् । तर्हि समवायेऽन्तर्भाव इत्यत आह **समवायस्त्विति** । तस्य स्ववृत्त्यनुपपत्तेः किं चाधार्याधारभूतयोरित्युक्तरीत्येत्यर्थः ।

* * *

॥ अथ तत्राप्यादौ समवायपदार्थविकल्पेन तदनन्तर्भावः ॥

१६५ सु०— अपि च वृत्तित्वमात्रं समवायः, व्याप्यवृत्तित्वं त्वतिरिक्तं निर्वक्तव्य(र्वाच्य)म् । कृत्स्ने स्वाश्रये समवायस्तदिति चेन्न, द्रव्यस्यासमुदितत्वेन कृत्स्नत्वाद्यनवकाशात् । स्वाभावेन सहानवस्थानं व्याप्यवृत्तित्वमिति चेन्न, तस्याप्यन्तर्भाव्यत्वात् । अभावोऽसाविति चेन्न, निराकरिष्यमाणत्वात् ।

परि०— असमुदितत्वेनेति । राशिवनसेनादिवदनेकसमुदायरूपत्वाभावेनेत्यर्थः । परमाणुपुञ्जवादे हि कृत्स्ने स्वाश्रये सर्वस्मिन् आश्रय इत्यादि युज्यते । न ह्येवं त्वन्मत इति भावः । **निराकरिष्यमाणत्वादिति** । स्वाभावेन सहानवस्थानरूपस्वाश्रयव्यापित्वस्याभावेऽपि सत्त्वेनाभावेऽप्यभावानङ्गीकारेणेत्युपरितनग्रन्थेन अभावे अभावसत्वस्य निराकरिष्यमाणत्वात् तस्य तत्रान्तर्भावो न युक्त इत्यर्थः ।

गु०दी०— द्रव्यस्यासमुदितत्वेन इत्यत्र असमुदितत्वेनैकस्यैव द्रव्यस्य बहुद्रव्यसमुदायात्मकत्वे सर्वद्रव्यसङ्ग्रहणाय कृत्स्नपदं सार्थकं स्यात् । एकस्मिन् द्रव्ये कृत्स्नपदोपादानं व्यर्थम् । न ह्येकं घटमानयेति वदन् कृत्स्नं घटमानयेति ब्रूते इत्यर्थः । सामान्यं द्विविधं नित्यमनित्यं चेति मते 'नित्यमेकमनेकानुगतं सामान्यमि'ति सूत्रोक्तलक्षणविरुद्धत्वाद्भावस्य स्वरूपमेवावस्थाभेदेनास्तित्वं ज्ञेयत्वमभिधेयत्वं चोच्यत इति पूर्वाचार्यवाक्यविरोधाच्च अविवेकमूलम् । किं च नित्यमपि सामान्यं वदन् प्रष्टव्यः । किं तदेकमेवानेकाश्रितमुत प्रत्येकवृत्तीति । नाद्यः । अतीतानागतसकलपदार्थेषु वर्तमानस्यैकैकवस्तुनाशेऽप्यनश्यमानस्य च नित्यत्वापरिहारात् । द्वितीये सामान्यत्वासम्भवः । अनेकेषु पदार्थेषु साधारणं हि सामान्यम् । किञ्च जात्यतिरिक्तं तत्सामान्यं भिन्नमभिन्नं वा । द्वितीयमङ्गीकुर्मः । प्रथमे सम्बन्धो वक्तव्यः । न च संयोगः अद्रव्यत्वात् । नापि समवायः । अवयवावयविनौ गुणगुणिनौ क्रियाक्रियावन्तौ जातिव्यक्ती विशेषनित्यद्रव्ये चेति पञ्चस्वेव समवायनिरूपणात् । अनित्यस्य समवायश्च न युक्तियुक्तः । पदार्थद्वयसम्बन्धरूपसमवायस्यैकनाशे संयोगवन्नाशावश्यम्भावात् । कथं तर्हि गुणगुणिनोः समवाय इति चेन्न कथञ्चिदिति ब्रूमः । द्विधर्मिकत्वाभावे न सम्बन्धत्वम् । अतोऽपसिद्धान्तत्वादिदोषग्रस्तत्वान्नेदं मतमाशङ्कितं टीकाकृता ।

यादु०— असमुदितत्वेनेति । अनेकसमुदायरूपत्वाभावेनेत्यर्थः । यत् अनेकसमुदायात्मकं वस्तु, तत्रैव कृत्स्नपदप्रवृत्तिनिमित्तस्य कृत्स्नत्वस्यावकाशो नैकस्मिन्नपि वस्तुनि । घटसमुदायस्थले कृत्स्नं घटमानयेतिवदेकस्मिन्घटे कृत्स्नपदाप्रयोगादिति भावः । आदिपदेन सर्वत्वादिसङ्ग्रहः । तेन सर्वस्मिन् स्वाश्रये समवायः तदित्यादिकमपि निराकृतमिति ज्ञातव्यम् । **निराकरिष्यमाणत्वादिति** । अभावेऽभावानङ्गीकारेणाश्रयव्यापित्वस्याभावरूपत्वेऽभावगतत्वानुपपत्तेरिति निराकरिष्यमाणत्वादित्यर्थः ।

वं०प०— वृत्तित्वमात्रं आश्रयवृत्तिमात्रघटक एव समवायो न व्यापित्वघटक इत्यर्थः । **अतिरिक्तं** समवायात् । **तत** आश्रयव्यापित्वम् । **तस्यापि** उक्तधर्मस्यापि ।

कं०रा०— अतिरिक्तमिति । समवायातिरिक्तमित्यर्थः । **तदिति** । आश्रयव्यापित्वमित्यर्थः ।

श्रीनिधि०— वृत्तिमात्रं समवाय इति । रूपादेरिति शेषः । **असमुदितत्वेनेति** । अबन्धत्वाभ्युपगमेन न निरंशत्वाभ्युपगमादित्यर्थः । **कृत्स्नत्वादीति** । आदिपदेन एकदेशत्वं गृह्यते । **तस्यापीति** । अनवस्थातस्यापीत्यर्थः । **निराकरिष्यमाणत्वादिति** । अनुपदमेव कश्चिदाहेत्याद्येकदेशिपक्षनिराकरणसमये इत्यर्थः ।

शे०वा०— असमुदितत्वेनेति । अनेकसमुदायरूपत्वाभावेनेत्यर्थः । यदेव ह्यनेकसमुदायात्मकं वस्तु तत्रैव कृत्स्नपदप्रवृत्तिनिमित्तकृत्स्नत्वस्यावकाशो न पुनरेकस्मिन्नपि वस्तुनि । समुदायस्थले कृत्स्नपदप्रयोगवदेकस्मिन्नर्थे तदप्रयोगादिति भावः । आदिपदेन सर्वत्वादिपरिग्रहः । तेन सर्वस्मिन्नपि स्वाश्रये समवायस्तदित्यादिकमपि निरस्तं भवतीति ज्ञातव्यम् । **स्वाभावेनेति** । स्वात्यन्ताभावेनेत्यर्थः । अन्यथा स्वप्रागभावादिना सहावस्थायिनो रूपादेः स्वाभावेन सहानवस्थायित्वरूपाश्रयव्यापित्वस्यासम्भवप्रसङ्गात् इत्यवधेयम् । स्वाभावेन सहानवस्थानस्य तादृशावस्थानाभावरूपत्वादाश्रयव्यापित्वमभाव एव भविष्यतीत्याशयेन शङ्कते **अभाव इति** । **निराकरिष्यमाणत्वादिति** । अभावेऽभावानङ्गीकारेणाश्रयव्यापित्वस्याभावत्वे तस्य भाववृत्तित्वाभावप्रसङ्ग इत्यनुपदमेवात्र कश्चिदाहेत्यादिनोद्भाव्य निराकरिष्यमाणत्वादित्यर्थः ।

स०व्र०— निराकरिष्यमाणत्वादिति । 'निषेधविधिबोध्यत्वाभावात्' इत्यादिनेति शेषः ।

विट्ठल०— वृत्तित्वमात्रं समवाय इति । सम्बन्धत्वादिति भावः । संयोगेऽपि वृत्तिमत्वस्य सत्वात् तस्य च द्रव्याव्याप्यवृत्तित्वाभिप्रायेण मात्रपदमिति बोध्यम् । **असमुदितत्वेनेति** । यदनेकसमुदायात्मकं वस्तु सेनावनादि तत्रैव कृत्स्नादिपदप्रयोगः । न च रूपाद्याश्रयीभूतमेकैकघटादि समुदितरूपम् । तस्य परमाणुपुञ्जवादनिरासाय अखण्डत्वाभ्युपगमात् । अतस्तस्य कृत्स्नत्वमयुक्तमिति भावः । **निराकरिष्यमाणत्वादिति** । आश्रयव्यापित्वस्य स्वाभावेन सहानवस्थानरूपाभावत्वे अभावेऽप्याश्रयव्यापित्वस्य सत्त्वेनास्याभावे भावानङ्गीकारेणेत्युपरितनग्रन्थे निराकरिष्यमाणत्वादित्यर्थः ।

चषक— निराकरिष्यमाणत्वादिति । अभावे अभावानङ्गीकारेण आश्रयाश्रयित्वस्य अभावरूपत्वेऽभावगतत्वानुपपत्तेरिति प्रतिविधास्यमानत्वादित्यर्थः ।

॥ इति समवायपदार्थविकल्पेन तदनन्तर्भावः ॥

* * *

॥ अथ तत्र ततः संयोगादीनां प्रदेशवृत्तित्वस्य निरासः ॥

१६६ सु०— एवं संयोगादीनां प्रदेशावृत्तित्वं निरस्तम् ।

परि०— एवं संयोगादीनां प्रदेशावृत्तित्वमिति । तन्न तावद्द्रव्यगुणकर्मविशेषेष्वन्तर्भवति । संयोगादिगुणेषु द्रव्यगुणादेः (दि)वृत्तित्वानुपपत्तेः । नापि समवायाभावेष्वन्तर्भावः । संयोगाद्यभावेऽप्येकदेशावृत्तित्वसत्त्वादिति निरस्तमित्यर्थः । प्रदेशावृत्तित्वस्य समवायत्वेऽभाववृत्तित्वं न स्यात् । तस्यायुतसिद्धमात्रनिष्ठत्वेनाभावस्य च अनयुतसिद्धत्वात् । अभावत्वे त्वभाववृत्तित्वं न स्यात् । अभावेऽभावानङ्गीकारात् । अभावे च प्रदेशावृत्तित्वसत्त्वादिति भावः ।

यादु०— एवं संयोगादीनामिति । प्रदेशावृत्तित्वं न तावद्द्रव्यगुणकर्मविशेषेष्वन्तर्भवति । द्रव्यादीनां गुणवृत्तित्वाभावादस्य च गुणवृत्तित्वात् । नापि सामान्ये । सामान्यस्य चाभावावृत्तित्वादस्य च संयोगाद्यभावेऽपि सत्त्वात् । नापि समवाये संयोगवत् तत्समवायेऽपि प्रदेशावृत्तित्वसत्त्वेन स्ववृत्त्यनुपपत्तेः । अपि च वृत्तिमात्रं समवायः प्रदेशावृत्तित्वं त्वतिरिक्तं निर्वक्तव्यम् । स्वाश्रयैकदेशे समवायस्तदिति चेन्न । आकाशपरमाणुसंयोगे तदसम्भवात् । स्वाभावेन सहावस्थानं तदिति चेत् । तस्याप्यन्तर्भाव्यत्वादिति निरस्तप्रायमित्यर्थः ।

वं०प०— एवमिति । प्रदेशावृत्तित्वस्य द्रव्यादौ नान्तर्भावः । गुणादावपि सत्त्वादित्युक्तरीत्या निरस्तमित्यर्थः ।

कं०रा०— एवमिति । संयोगादिगतप्रदेशावृत्तित्वस्योक्तरीत्या द्रव्यादिष्वन्तर्भावयितुमशक्यत्वादित्यर्थः ।

शे०वा०— एवं संयोगादीनामिति । प्रदेशावृत्तित्वं न तावद्द्रव्यगुणकर्मविशेषेष्वन्तर्भवति । तथा सति द्रव्यादीनां गुणवृत्तित्वाभावेनास्य गुणवृत्तित्वाभावप्रसङ्गात् । नापि सामान्ये । तस्याभाववृत्त्यभावेन संयोगाभावस्य प्रदेशावृत्तित्वाभावप्रसङ्गात् । नापि समवाये । संयोगवत्तत्समवायस्यापि प्रदेशावृत्तित्वेन

स्ववृत्त्यनुपपत्तिप्रसङ्गात् । अपि च वृत्तिमात्रं समवायः प्रदेशवृत्तित्वं त्वतिरिक्तमेव निर्वक्तव्यम् । स्वाश्रयैकदेशे समवायस्तदिति चेत् । आकाशपरमाणुसंयोगे तदसम्भवात् । स्वाभावेन सहावस्थानं तदिति चेन्न । तस्याप्यन्तर्भाव्यत्वात् । अभावोऽसाविति चेन्न । निषेधबुद्धिबोध्यत्वाभावात् । अभावेऽभावानङ्गीकारेण संयोगाद्यभावस्य प्रदेशवृत्तित्वाभावप्रसङ्गाच्चेति निराकरिष्यमाणत्वादिति पूर्वोक्तन्यायेन निरस्तप्रायमित्यर्थः ।

स०व्र०— एवं संयोगादीनामिति । निराकरिष्यमाणत्वादेवेत्यर्थः ।

विट्ठल०— एवं संयोगादीनामिति । प्रदेशवृत्तित्वं नाम न तावद्द्रव्यगुणकर्मविशेषेष्वन्तर्भवति तेषां गुणवृत्तित्वाभावात् । नापि सामान्ये सामान्यस्य भावमात्रवृत्तित्वादस्य च संयोगाद्यभावेऽपि वृत्तिमत्वात् । नापि समवाये । संयोगवत्समवायस्यापि प्रदेशवृत्तित्वेन स्ववृत्त्यनुपपत्तेरित्यादि दूषणेन निरस्तप्रायमित्यर्थः ।

॥ इति संयोगादीनां प्रदेशवृत्तित्वस्य निरासः ॥

* * *

॥ अथ तत्र ततो रूपादिगतोद्भूतत्वादिधर्मस्यापि द्रव्याद्यनन्तर्भावः ॥

१६७ सु०— उद्भूतत्वं च न जातिविशेषः, रूपत्वादिना परापरभावानुपपत्तेः । यदि हि रूपत्वं परं स्यात् तदा स्पर्शस्योद्भूतत्वं न स्यात् । यदि चोद्भूतत्वं परं भवेत् तदा सर्वमपि रूपमुद्भूतमिति चक्षुरादेरपि प्रतीतिः स्यात् ।

परि०— रूपादिगतोद्भूतत्वधर्मस्यापि द्रव्यादिष्वन्तर्भावोऽसम्भावित इति जातित्वमेव निराचष्टे **उद्भूतत्वं चेति** । **परापरभावेति** । व्यापकव्याप्यभाव इत्यर्थः । तस्य रूपत्वादिजातिं प्रत्यधिकवृत्तित्वे वा न्यूनवृत्तित्वे वा जातित्वं सम्भवति । नान्यथा । जातित्वबाधकसाङ्कर्यापातादिति भावः । साङ्कर्यं चाग्रे विवरिष्यामः । परापरभावायोगं व्यनक्ति **यदि हीति** । परमिति व्यापकं तत्प्रत्युद्भूतत्वं व्याप्यं यदि स्यादित्यर्थः । **परं भवेदिति** । रूपत्वं प्रति व्यापकं भवेदित्यर्थः । **प्रतीतिः** साक्षात्कार इत्यर्थः ।

यादु०— परं व्यापकम् ।

कं०रा०— यदि हीति । यदि ह्युद्भूतत्वस्य रूपत्वव्यापकं स्यात् तथा स्पर्शस्योद्भूतत्वं न स्यात् स्पर्शे उद्भूतत्वस्याव्यापकस्य रूपत्वभावेनोद्भूतत्वावश्यम्भावादिति भावः । **यदि चेति** । यदि चोद्भूतत्वं

रूपत्वस्य व्यापकं भवेत्तदा व्याप्यवृत्तिव्यापकसत्त्वावश्यम्भावेन सर्वमपि रूपमुद्भूतमिति चक्षुरादेरपि महत्त्व-समानाधिकरणोद्भूतरूपवत्वाच्चाक्षुषत्वं स्यादित्यर्थः ।

श्रीनिधि०— यदि चोद्भूतत्वं परं भवेदिति । रूपत्वव्यापकं भवेदित्यर्थः ।

शे०वा०— परापरभावानुपपत्तिमेव प्रथयति **यदि हीति** । **परमिति** । व्यापकमित्यर्थः । **उद्भूतत्वं न स्यादिति** । तद्व्यापकस्य रूपत्वस्य स्पर्शेऽभावात् । व्यापकनिवृत्तौ च व्याप्यनिवृत्तेरावश्यकत्वादित्यर्थः । **सर्वमपि रूपमिति** । उद्भूतत्वाभावे रूपत्वाभावप्राप्त्या सर्वमपि रूपमुद्भूतमेव स्यादित्यर्थः । **चक्षुरादेरिति** । घटादेरिव महत्त्वसमानाधिकरणोद्भूतरूपवत्त्वाविशेषादिति भावः ।

विट्ठल०— रूपादिगतं यदुद्भूतत्वं तस्य न तावद्द्रव्यादिष्वन्तर्भावः रूपादिगतत्वायोगात् । तर्हि जातिविशेष एवोद्भूतत्वमिति ब्रूम इत्यत आह **उद्भूतत्वं चेति** । **परापरभावेति** । तस्य रूपत्वादिजाति-प्रत्यधिकवृत्तित्वे न्यूनवृत्तित्वे वा जातित्वं सम्भवति नान्यथा जातिबन्धकसाङ्कर्यापातात् परापरभावस्य नानुपपत्तेरिति भावः । परापरभावानुपपत्तिं विशदयति **यदि हि रूपत्वमिति** । **चक्षुरादेरपीति** । चक्षुषो वारिस्थतेजसश्च रूपित्वादिति भावः ।

चषक— परापरभावानुपपत्तेः व्याप्यव्यापकभावानुपपत्तेः ।

॥ इति रूपादिगतोद्भूतत्वादिधर्मस्यापि द्रव्याद्यनन्तर्भावः ॥

* * *

॥ अथ तत्र ततः सर्वेषां गुणानां चतुर्विंशतित्वानुपपत्तिः ॥

१६८ सु०— चतुर्विंशतित्वं च न सङ्ख्या, गुणानां निर्गुणत्वाङ्गीकारात् । उपचारो-ऽयमिति चेन्न, निमित्ताभावात् । न तावदेकार्थसमवायो निमित्तम्, द्रव्ये चतुर्विंशति-त्वनियमाभावात्, प्रत्येकं रूपादिषु तत्प्रसङ्गाच्च । अपर्यायचतुर्विंशतिशब्दवाच्यत्वमिति चेन्न, शब्देऽपि चतुर्विंशतित्वाभावात् । चतुर्विंशतिपुरुषोच्चारितापर्यायशब्दवाच्यत्वमिति चेन्न, बधिरादीनां रूपादिषु सङ्ख्याव्यवहाराभावप्रसङ्गात् ।

परि०— एकार्थेति । द्रव्येषु चतुर्विंशतित्वमस्ति रूपादयो गुणाश्च सन्तीत्येकाश्रयत्वा-द्गुणाश्चतुर्विंशतिरित्युपचर्यत इत्यर्थः । **अपर्यायेति** । अपर्यायाः ये चतुर्विंशती रूपरसादिशब्दाः

तद्वाच्यत्वमेव चतुर्विंशतित्वमित्यर्थः । **बधिरादीनामिति** । पुरुषगतचतुर्विंशतित्वाज्ञानिनां अन्धानामित्यादिपदार्थः ।

यादु०— एकार्थसमवाय इति । चतुर्विंशतिद्रव्येषु चतुर्विंशतित्वसङ्ख्यया चतुर्विंशतिगुणानां सामानाधिकरण्यमित्यर्थः । **बधिरादीनामिति** । तेषां शब्दघटितोक्तप्रवृत्तिनिमित्तज्ञानासम्भवेन चतुर्विंशति-सङ्ख्याव्यवहाराभावप्रसङ्गादित्यर्थः । आदिपदेन पुरुषगतचतुर्विंशतित्वाज्ञानिनामन्धादीनां सङ्ग्रहः ।

वं०प०— एकार्थेति । द्रव्येषु चतुर्विंशतित्वं गुणश्चेत्येतदुभयमेकस्मिन्नर्थे द्रव्ये समवेतमित्यर्थः । **प्रत्येकमिति** । तथा च चतुर्विंशतित्वरूपयोरुभयोरप्येकस्मिन्द्रव्ये समवेतत्वेनोक्तनिमित्तसत्त्वादेकस्मिन् रूपेऽपि चतुर्विंशतित्वव्यवहारः स्यादित्यर्थः । **अपर्यायेति** । इदं गुणेषु सर्वेषु रूपरसाद्यपर्यायचतुर्विंशतिशब्दवाच्यत्व-मस्तीति तत्र चतुर्विंशतित्वव्यवहारोऽस्ति न रूपेऽपर्यायचतुर्विंशतिशब्दवाच्यत्वरूपनिमित्ताभावादिति भावः । **शब्देऽपीति** । शब्दस्य गुणत्वेन तत्र सङ्ख्याया अभावेनापर्यायचतुर्विंशतिशब्देत्येतद्वचनमयुक्तमिति भावः । शब्दे चतुर्विंशतित्वं घटयितुं निमित्तं व्याख्याति **चतुर्विंशतीति** । वाच्यत्वमित्यत्र निमित्तं गुणेषु चतु-र्विंशतित्वव्यवहार इति शेषः । **बधिरेति** । चतुर्विंशतित्वस्य सङ्ख्यात्वान्निरुक्तशब्दघटितनिमित्तज्ञानाभावेऽपि बधिरस्य रूपादिषु चतुर्विंशतित्वसङ्ख्याव्यवहारस्य जायमानत्वेन नात्रैतन्निमित्तमित्यर्थः । आदिपदेनाव्युत्पन्न-स्यैतन्निमित्तज्ञानाभावेऽपि चतुर्विंशतिसङ्ख्याका एते घटा इति व्यवहारस्य जायमानत्वान्नेदमत्र निमित्तमिति भावः ।

कं०रा०— एकार्थसमवाय इति । चतुर्विंशतित्वसङ्ख्यासामानाधिकरण्यमित्यर्थः । **द्रव्य इति** । द्रव्याणां चतुर्विंशतिनियमाभावेन गुणेषु चतुर्विंशतित्वसामानाधिकरण्याभावात् तस्योपचारनिमित्तत्वे गुणे-ष्वौपचारिकमपि चतुर्विंशतित्वं न स्यादिति भावः । **प्रत्येकमिति** । यद्यपि रूपस्य पृथिव्यादित्रयवृत्तित्वेन चतुर्विंशतित्वसामानाधिकरण्यं नास्ति चतुर्विंशतिघटादिवृत्तित्वेन चतुर्विंशतित्वसामानाधिकरण्यसम्पादन-त्वेकस्य रूपस्य चतुर्विंशतिवृत्तित्वाभावात् तत्र चतुर्विंशतित्वव्यवहारापादानमयुक्तमिवाभाति तथाप्येकस्य रूपस्य चतुर्विंशतित्वपर्याप्त्यधिकरणवृत्तित्वाभावेनापि चतुर्विंशतित्वाधिकरणवृत्तित्वमात्ररूपस्य तत्सामानाधि-करण्यस्य सत्त्वात् तदापादानं युक्तमेवेति ध्येयम् । **अपर्यायेति** । अपर्याया ये रूपरसगन्धस्पर्शेत्यादि चतुर्विंशतिशब्दाः तद्वाच्यत्वमौपचारिकचतुर्विंशतित्वव्यवहारे निमित्तमित्यर्थः । **शब्देऽपीति** । रूपरसेत्यादि-शब्दानां गुणत्वेन तेष्वपि चतुर्विंशतित्वसङ्ख्याया अभावादपर्यायचतुर्विंशतिशब्दवाच्यत्वमुपचारनिमित्तमिति वक्तुं न शक्यत इति भावः । **बधिरादीनामिति** । आदिशब्देन वाच्यवाचकभावसम्बन्धज्ञानरहिता गृह्यन्ते । बधिराणां शब्दज्ञानाभावादेव चतुर्विंशति पुरुषोच्चारितापर्यायशब्दवाच्यत्वज्ञानाभावादबधिराणामपि केषाञ्चिच्छब्दज्ञाने सत्यपि तद्वाच्यत्वज्ञानाभावेनोपचारनिमित्तज्ञानाभावात् तेषामौपचारिकोऽपि चतुर्विंशतित्वव्यवहारो रूपादिषु न स्यादिति भावः ।

श्रीनिधि०— एकार्थसमवाय इति । रूपादेश्चतुर्विंशतिसङ्ख्यासमवायरूपं सामानाधिकरण्यमित्यर्थः । **चतुर्विंशतित्वनियमाभावादिति** । घटपटादिभेदेन द्रव्यस्यानन्तत्वादिति भावः । तथा च द्रव्ये पञ्चविंशतित्वादेरपि समवेतत्वेन तत्सामानाधिकरण्येन रूपादीनां पञ्चविंशतित्वादिकमपि स्यादिति भावः । **तत्प्रसङ्गात्** चतुर्विंशतित्वप्रसङ्गात् । रूपस्यापि चतुर्विंशतिद्रव्येष्वपि समवायादित्यर्थः । **अपर्यायचतुर्विंशतिशब्दवाच्यत्वमिति** । चतुर्विंशतिसङ्ख्याकशब्दवाच्यत्वमित्यर्थः । यत्र यावच्छब्दवाच्यत्वं तत्र तावत्सङ्ख्यत्वमिति नास्ति । पर्यायानेकशब्दवाच्ये तदभावादत उक्तम् **अपर्यायेति** । **सङ्ख्याव्यवहाराभावप्रसङ्गादिति** । सङ्ख्याज्ञानस्योच्चारणघटितत्वाद् बधिरस्य चोच्चारणज्ञानाभावादिति भावः ।

शे०वा०— चतुर्विंशतित्वस्य सङ्ख्यारूपत्वे गुणवृत्तित्वानुपपत्तिरित्यभिप्रेत्य तत्र हेतुमाह **गुणानामिति** । तथा च गुणास्तु चतुर्विंशतिरेवेत्यादिव्यवहारानुपपत्तिरिति भावः । **उपचारोऽयमितीति** । तथा च चतुर्विंशतिरित्यादिर्न मुख्यव्यवहारो येन प्रवृत्तिनिमित्तविरहाद् गुणेषु तदनुपपत्तिः प्रसज्येत । किन्तु सिंहो देवदत्त इत्यादिव्यवहारवदौपचारिक एव । तस्य च न प्रवृत्तिनिमित्तापेक्षत्वमिति न तदनुपपत्तिरिति भावः । औपचारिकत्वाद्व्यवहारस्य प्रवृत्तिनिमित्तधर्मानपेक्षत्वेऽपि न सर्वथा निर्निमित्तत्वमतिप्रसङ्गादिति सिंहसादृश्यादिवदिह निमित्तान्तराभावेनौपचारिकव्यवहारस्याप्यनुपपत्तिरेवेत्याह **निमित्ताभावादिति** । तत्कथमित्यतः किमत्र चतुर्विंशतित्वसङ्ख्ययैकस्मिन्नर्थे गुणानां सामानाधिकरण्यं निमित्तं किं वाऽपर्यायचतुर्विंशतिशब्दवाच्यत्वमात्रं, किं वा चतुर्विंशतिपुरुषोच्चारितापर्यायशब्दवाच्यत्वम् । आद्येऽपि किं सामानाधिकरण्यनियमोऽभिमतः सामानाधिकरण्यमात्रं वेति विकल्पान् मनसि निधायाद्यं दूषयति **द्रव्य इति** । तथा च गुणाश्रयस्य द्रव्यस्य चतुर्विंशतित्वनियमाभावेन गुणानां चतुर्विंशतित्वसङ्ख्यासमानाधिकरण्यनियमाभावान्न तस्योक्तव्यवहारनिमित्तत्वमिति भावः । द्वितीयं प्रत्याह **प्रत्येकमिति** । गुणादीनामिव रूपादीनामपि प्रत्येकं चतुर्विंशतित्वसङ्ख्यासामानाधिकरण्यात् तत्रापि प्रत्येकं चतुर्विंशतित्वव्यवहारः स्यादित्यर्थः । यद्यपि मुख्यप्रयोग एव निमित्तानुसारी तत्र निमित्तस्य सामग्रीत्वेन कार्याव्यभिचरिततया तस्य निमित्तानुसारित्वकल्पनाया न्याय्यत्वात् । न त्वमुख्यप्रयोगोऽपि । तत्र निमित्तस्य सामग्र्येकदेशत्वेन कार्याव्यभिचाराभावेन प्रयोगस्य निमित्तानुसारित्वासम्भवात् । अन्यथा सिंहसादृश्यस्य माणवक इव शार्दूलेऽपि सत्त्वेन तत्रापि सिंहशब्दप्रयोगापातात् । किन्तु तत्र निमित्तमेव प्रयोगानुसारीति गुणास्तु चतुर्विंशतिरेवेत्यादिव्यवहारानुसारेण गुणानां चतुर्विंशतित्वसङ्ख्यया सह सामानाधिकरण्यस्य गुणेषु तद्व्यवहारे निमित्तत्वकल्पनमुचितम् । न तु प्रत्येकं रूपादिषु रूपादीनां चतुर्विंशतित्वसङ्ख्यया सामानाधिकरण्यस्य रूपादौ तद्व्यवहारे निमित्तत्वकल्पनमिति नात्र निमित्तानुसारेण प्रयोगापादनमुचितम् । तथाऽपि निमित्तस्याप्यमुख्यप्रयोगे सामग्रीत्वमेवेत्यभिप्रायेणैतदापादनमिति ध्येयम् । द्वितीयमाशङ्कते **अपर्याय इति** । **शब्देऽपीति** । तस्य गुणत्वेन निर्गुणत्वाभ्युपगमादिति भावः । तृतीयमाशङ्कते **चतुर्विंशतीति** । **बधिरादीनामिति** । जातिबधिराणामित्यर्थः । तेषां रूपादिषु शब्दघटितोक्तप्रवृत्तिनिमित्त-

ज्ञानासम्भवेन तत्र चतुर्विंशतिसङ्ख्याव्यवहाराभावप्रसङ्गादित्यर्थः । आदिपदेन पुरुषगतचतुर्विंशतित्वाज्ञानिनामन्धानां परिग्रहः ।

वा०र०— 'भृत्यबन्धादिकं राज्ञी'ति तदधीनत्वादित्येतत्सूत्रानुव्याख्यानमूलानुसारेणाह **यद्यपि मुख्यप्रयोग एवेति** । अयमर्थ इत्यत्र गुणवृत्तित्वानुपपत्त्यादिकथनावसरे पूर्वोक्तरीत्योपलक्षणार्थान्तरमपि यथासम्भवं ग्राह्यम् ।

विट्ठल०— एकार्थसमवाय इति । चतुर्विंशतिसङ्ख्यावत्सु द्रव्येषु गुणानामपि समवायाद्गुणेषु चतुर्विंशतितोपचारः प्रत्येकमिति रूपादीनामपि घटपटादि चतुर्विंशतिद्रव्यवृत्तित्वादिति भावः । **अपर्यायेति** । रूपरसगन्धस्पर्शेत्याद्यपर्यायचतुर्विंशतिशब्दवाच्यत्वमित्यर्थः । **शब्देऽपीति** । शब्दसगुणत्वेन गुणे गुणानङ्गीकारादिति भावः । **बधिरादीनामिति** । अपर्यायशब्दज्ञानशून्यानां बधिरजदतुलपुरुषादीनां रूपादिषु गुणेषु सङ्ख्याविषयकाभिज्ञा हस्तव्यापारादिव्यवहाराभावप्रसङ्गादित्यर्थः । आदिपदेन पुरुषगतचतुर्विंशतित्वाज्ञानिनां ग्रहणम् ।

चषक— एकार्थसमवायः एकस्मिन्नर्थे गुणसङ्ख्ययोः समवायः । **बधिरादीनामिति** । शब्दघटितोक्तप्रवृत्तिनिमित्ताप्रतिसन्धानादिति भावः ।

॥ इति सर्वेषां गुणानां चतुर्विंशतित्वानुपपत्तिः ॥

* * *

॥ अथ तत्रान्ते उक्तातिदेशेन अनित्यत्वादीनामन्यधर्माणामपि द्रव्याद्यनन्तर्भावः ॥

१६९ सु०— एवमन्येषामपि धर्माणामन्तर्भावो निरसनीयः ।

परि०— एवमन्येषामिति । नित्यत्वानुगतत्वादिप्रागुक्तधर्मान्तराणां गुणादिवृत्तित्वानुपपत्त्या द्रव्यादिष्वन्तर्भावो निरसनीय इत्यर्थः ।

यादु०— एवमन्येषामिति । नित्यत्वानुगतत्वद्विविधत्वादिधर्माणामित्यर्थः । तेषामपि न द्रव्यादिरूपत्वम् । गुणादिवृत्त्यनुपपत्तेरित्यन्तर्भावो निरसनीय इत्यर्थः । अनुगतत्वं कथं गुणवृत्तीति चेन्न । द्वित्वबहुत्वादावनेकसमवेतत्वरूपानुगतत्वस्य सत्त्वात् ।

श्रीनिधि०— एवमन्येषामपीति । उक्तन्यायेन मूर्तनिष्ठत्वादीनामित्यर्थः । द्रव्यादीनां षण्णां यानि लक्षणानि तद्राहित्यमभावत्वमित्युक्ते द्रव्यादेरप्यभावत्वं स्यात् । द्रव्यादेर्लक्षणस्य गुणादावभावादत अन्यतमेत्युक्तम् । अन्यतमराहित्यं तु नास्त्येव । द्रव्यलक्षणस्य द्रव्ये सत्त्वात् । एवं गुणादावपि ।

शे०वा०— एवमन्येषामपीति । अनित्यत्वनित्यत्वानुगतत्वादीनामित्यर्थः । अनित्यत्वादिकमपि न द्रव्यादिष्वन्तर्भवति गुणादिवृत्तित्वानुपपत्तेरिति निरासकन्यायसूचनायैवमित्युक्तम् । अयमर्थः । अनित्यत्वं न द्रव्यगुणकर्मविशेषान्यतमम्, तेषां गुणवृत्तित्वासम्भवात् । अस्य च गुणेऽपि सत्त्वात् । नापि सामान्यम्, अभावेऽपि वृत्तेः । अत एव न समवायोऽपि । एवं नित्यत्वेऽपि न द्रव्यादिष्वन्तर्भवति । तेषां गुणवृत्तित्वानुपपत्तेः । अस्य च गुणेऽपि वृत्तेः । नापि सामान्यसमवाययोः । तयोः स्ववृत्तित्वासम्भवात् । अस्य च सामान्यसमवाययोरपि वृत्तेः । एवमनुगतत्वमपि न द्रव्यादिरूपम् । गुणादिवृत्तित्वानुपपत्तेः । नापि सामान्यम् । स्ववृत्त्यनुपपत्तेः । अत एव न समवायः । एवं द्विविधत्वमपि न द्रव्यादिरूपम् । गुणवृत्तित्वानुपपत्तेः । नापि सामान्यम्, अभाववृत्तित्वानुपपत्तेः । अत एव न समवायोऽपीति ।

विट्ठल०— एवमन्येषामिति । नित्यत्वानुगतत्वादिधर्माणामपि न द्रव्यादित्वं गुणादिवृत्त्यनुपपत्तेरित्यर्थः । द्वित्वादिगुणेष्वनेकसमवेतत्वरूपानुगतत्वं परैरङ्गीकृतमिति ज्ञेयम् ।

॥ इति उक्तातिदेशेन अनित्यत्वादीनामन्यधर्माणामपि द्रव्याद्यनन्तर्भावः ॥
॥ इति रूपादीनामाश्रयव्यापित्वस्य द्रव्याद्यनन्तर्भावः ॥

* * *

॥ अथ पदार्थषट्कनियमवादिनं प्रति नियमभङ्गापादने पूर्वदोषोपमर्देन एकदेशिमतोत्थापनम्, तन्निरासश्च ॥
॥ अथ तत्रापि च धर्मपदार्थस्य अभावेऽन्तर्भावे बाधकानुपन्यासात् तत्रान्तर्भावे षट्पदार्थातिरेकेऽपि नियमभङ्गाभाव इति शङ्का, तन्निरासश्च ॥

१७० सु०— कश्चिदाह, धर्मपदार्थोऽभावेऽन्तर्भवतीति । तदसत्, निषेधबुद्धिबोध्यत्वाभावात्, अभावेऽभावानङ्गीकारेण तद्धर्माणामभावत्वायोगाच्च । द्रव्यादिषड्लक्षणान्यतमराहित्यमभावत्वम्, न तु निषेधबुद्धिबोध्यत्वमिति चेन्न; लोकप्रतीतिमवधूय स्वकल्पनादरणे 'द्रव्यमेव भावः', 'तल्लक्षणरहितोऽभाव' इत्यपि कल्पनाप्रसङ्गात् । अतस्तत्तन्निष्ठत्वादयो द्रव्यादिधर्मास्तदात्मान एवाङ्गीकार्याः । तथा चाह 'भावस्य स्वरूपमेवावस्थाभेदेनास्तित्वं ज्ञेयत्वमभिधेयत्वं चोच्यत' इति । न च विशेषमपहाय अवस्थाभेदः शक्यनिरूपणः ।

गु०दी०— अस्तित्वं न ज्ञेयं नाभिधेयम् इत्यत्र अस्तित्वं नासदित्यपि ग्राह्यम् । तथा चास्तित्वे असन्न ज्ञेयं न अभिधेयं नेत्यसत्त्वादिधर्मनिषेधं कुर्वता असत्त्वनिषेधापरपर्यायसत्त्वस्य अस्तित्वमविज्ञाय अस्तित्वमनभिधाय च न ज्ञेयं नाभिधेयमिति च निषेधायोगेन अस्तित्वेऽप्यस्तित्वादिधर्माणामङ्गीकार्यत्वादित्यर्थः ।

यादु०— भावस्य पदार्थस्य । **अवस्थाभेद इति** । भावरूपाणामपि अस्तित्वादीनामित्यर्थः ।

वं०प०— धर्मेति । तन्निष्ठत्वादित्यर्थः । **अभाव इति** । द्रव्यादिषु षड्लक्षणान्यतमराहित्यमेवाभावत्वमभिप्रेतमतस्तन्निष्ठत्वादिरूपधर्मपदार्थस्याभावेऽन्तर्भावो युक्त इत्यभिप्राय इति ध्येयम् । **तद्धर्माणाम्** अभावनिष्ठानां तन्निष्ठत्वादिधर्माणाम् । **भाव इत्यपीति** । ततश्च गुणादेरप्यभावत्वं स्यादिति भावः । अवस्थाप्रयुक्तो द्रव्ये भेदो **अवस्थाभेदः** ।

कं०रा०— द्रव्यादीति । द्रव्यादीनां यानि षट् लक्षणानि तदन्यतमराहित्यमित्यर्थः । **अस्तित्वादिकमिति** । अस्तित्वज्ञेयत्वाभिधेयत्वादिकमित्यर्थः । **अस्तित्वं न ज्ञेयमिति** । अस्तित्वज्ञानार्थमस्तित्वपदं प्रयुञ्जानस्तेन तदभिदधानश्चास्तित्वं न ज्ञेयं नाभिधेयमिति यदि ब्रूयात् तदा स्वक्रियाविरोध इति भावः ।

श्रीनिधि०— निषेधबुद्धिबोध्यत्वाभावादिति । युक्तयेति द्रष्टव्यम् । **तथा चाहेति** । नैय्यायिक इत्यर्थः । न च विशेषमपहाय अवनस्थाभेदः शक्यनिरूपणतज्जातीयानां च इति । अवस्थाभेदो नामावस्थितिभेदः । सत्तायोगेनावस्थितं अस्तित्वमित्युच्यते । ज्ञानविषयत्वेनावस्थितं ज्ञेयमित्युच्यते । अभिधाविषयत्वेनावस्थितमभिधेयमित्युच्यते इति वक्तव्यम् । एवं च यदि विशेषाभावेऽप्यभेदस्तदा तन्मात्रत्वेनावस्थितिभेद एव न स्यात् । एवं विशेषः तदर्थं वाऽङ्गीकार्यः । स च भेदकार्यकारीत्युक्तमिति ।

शे०वा०— ननु धर्मपदार्थस्योक्तरीत्या षट्पदार्थान्तर्भावासम्भवेऽप्यभावेऽन्तर्भवि बाधकानुपन्यासात् तत्रान्तर्भावो भविष्यतीति न धर्माणां षड्भ्यः पदार्थेभ्योऽतिरेकेऽपि न षडेव पदार्था इति नियमभङ्ग इति पूर्वदोषोपमर्देन एकदेशिमतमुत्थापयति **कश्चिदाहेति** । केचित्तु । द्रव्यादिषड्लक्षणराहित्यरूपाभावलक्षणाक्रान्तत्वादभावत्वमेव धर्मपदार्थस्येति गूढाभिसन्धेरियमाशङ्क्येत्याहुः । धर्मपदार्थस्याभावेऽन्तर्भावं वदतः किमभावत्वमभिमतं निषेधबुद्धिबोध्यत्वं वा द्रव्यादिषड्लक्षणान्यतमराहित्यं वेति विकल्पद्वयं मनसि निधायाद्यं दूषयति **निषेधेति** । धर्मपदार्थस्याभावलक्षणानाक्रान्तत्वान्नाभावत्वमित्यर्थः । तत्तन्निष्ठत्वादेर्निषेधबुद्धिबोध्यत्वाभावेनाभावत्वनिरासस्सम्भवेऽपि स्वात्यन्ताभावेन सहावस्थानाभावरूपस्य स्वाश्रयव्यापित्वस्य तद्बुद्धिबोध्यत्वेन तस्याभावत्वनिरासे एतद्युक्तेरप्रवृत्तेस्तत्साधारणदूषणमाह **अभावेऽभावानङ्गीकारेणेति** । आश्रयोऽभाव आश्रितादभावान्न तावद्भिन्नः । तथा सत्यनवस्थानात् । तत्रापि तन्नास्तिताप्रतीत्या तत्सिद्धेरकुण्ठितत्वात् । नाप्यभिन्नः । आत्माश्रयप्रसङ्गादिति युक्तयेति शेषः । द्वितीयमाशङ्कत **द्रव्यादीति** । **अत इति** । तन्निष्ठत्वादेः

स्वाश्रयादत्यन्तभेदेऽपि द्रव्यादिष्वनन्तर्भूतत्वेन षट्पदार्थनियमस्योक्तरीत्याऽसम्भवादेवेत्यर्थः । धर्मपदार्थस्य द्रव्याद्यात्मकत्वं न केवलं युक्तिसिद्धत्वादेवाङ्गीकार्यं किन्तु परस्य सम्मतं चेत्याह **तथा चाहेति** । तद्वाक्यं पठति **भावस्वरूपमेवेति** । अविचित्रस्य वस्तुस्वरूपस्य कथमस्तित्वादिविचित्रव्यवहारालम्बनत्वमित्यत उक्तं **अवस्थाभेदेनेति** ।

वा०र०— तन्निष्ठत्वादेः स्वाश्रयादिति । अत्यन्तभेदेऽपि यद्द्रव्यादिष्वन्तर्भूतत्वं तदङ्गीकारेण यो नियतस्तस्येति योजना । भावस्य रूपमेवेति वाक्यं तु ..... ।

विट्ठल०— धर्माणां धर्मितादात्म्यमङ्गीकृतं च परेणेत्याह **तथा चाहेति** ।

चषक— धर्मपदार्थः धर्मरूपः पदार्थः । **अवधूय** तिरस्कृत्य ।

॥ इति धर्मपदार्थस्य अभावेऽन्तर्भावे बाधकानुपन्यासात् तत्रान्तर्भावे षट्पदार्थातिरेकेऽपि नियमभङ्गाभाव इति शङ्का, तन्निरासश्च ।
॥ इति पूर्वदोषोपमर्देन एकदेशिमतोत्थापनम्, तन्निरासश्च ॥
॥ इति पदार्थषट्कनियमवादिनं प्रति नियमभङ्गापादनम् ॥
॥ इति तन्निष्ठत्वादिधर्माणां षट्पदार्थेष्वन्तर्भावयितुमशक्यतायाः स्पष्टीकरणम् ॥
॥ इति किरणावलीकारमतानुसारेण षट्पदार्थातिरेकासिद्धिशङ्का तन्निरासश्च ॥

* * *

॥ अथ 'तन्निष्ठत्वादिधर्माणां वस्तुभिन्नत्व'शङ्कानिराकरणे पदार्थषट्कानियमवादिनं नैयायिकं प्रत्यपि धर्मस्य धर्मसन्तानात् अनवस्थाप्रसङ्गेन, भेदनिराकरणस्यार्थवत्त्वम् ॥
॥ अथ तत्रादौ पदार्थषट्कानियमवादिनं नैयायिकं प्रत्यपि धर्मस्य धर्मसन्तानात् अनवस्थाप्रसङ्गः, तस्य च प्रकृतसमन्वयः ॥

१७१ **सु०—** ननु धर्मा धर्मितो भिन्ना एव । न चोक्तदोषः, नैयायिकादिभिः परमाण्वारम्भवादिभिः षडेव पदार्था इति नियमस्यानङ्गीकृतत्वात्, धर्मपदार्थस्य पृथगङ्गीकृतत्वाच्च । तथा च भिन्नधर्मसंसर्गवशात् सर्वव्यवहारोपपत्तौ न तदन्यथाऽनुपपत्त्या विशेषसिद्धिरित्यत आह **पदार्थेति** ।

अनु०— पदार्थानियमेऽपि हि ।
धर्मस्य धर्मसन्तानादनवस्था(ऽऽकरो)-

खनिर्भवेत् ॥

पदार्थानां षडेवेति नियमाभावपक्षेऽपि हि यस्मात् धर्मस्य धर्मसन्तानादनवस्थाया आकरो भवेत् अयं पक्षः, तस्माद्धर्मधर्माणामाश्रयाभेदेऽवश्यमङ्गीकार्ये तत्र धर्मधर्म्यादिव्यवहारान्यथाऽनुपपत्त्या विशेषोऽङ्गीकरणीय इति योज्यम् । खनिः आकरः ।

परि०— वैशेषिकपरीक्षायां नैयायिकादिदूषणमनुचितमित्यत उक्तं **परमाण्वारम्भवादिभिरिति** । उभयेषामप्यारम्भवादित्वाददोष इति भावः । **धर्मपदार्थस्येति** । तद्गतत्वादिप्रागुक्तधर्मपदार्थस्येत्यर्थः । **सर्वव्यवहार इति** । तन्तुषु पटः शुक्लः पट इत्यादिप्रागुक्त इत्यर्थः ।

यादु०— नैयायिकादिभिरिति । वैशेषिकभिन्नैस्तार्किकादिभिरित्यर्थः ।

वं०प०— उक्तदोषः द्रव्यत्वाद्यन्तर्भावसम्बन्धरूपः ।

कं०रा०— अन्यथेति । अस्तित्वादिधर्मेष्वस्तित्वज्ञेयत्वाद्यभाव इत्यर्थः ।

श्रीनिधि०— नैय्यायिकादिभिरिति । न्यायशास्त्रव्याख्यातॄणां बहुत्वादादिपदप्रयोगो बहुवचनं च । वैशेषिकादिभिरनङ्गीकारेऽपीति शेषः । **धर्मसन्तानादिति** । धर्मपरम्परायाः प्राप्ताया हेतोरित्यर्थः । **खनिः आकर इति** । यस्योत्पत्तिस्थाने उत्पन्न बहु सजातीयपरम्पराया अविच्छेदः स तस्य खनिरित्युच्यते । प्रकृते सर्वथाप्येनं पक्षं अनवस्था न त्यजतीत्येवमुक्तम् ।

शे०वा०— ननु 'पदार्थानियमेऽपि ही'त्युत्तरवाक्ये धर्मानवस्थाप्रसङ्गेन धर्माणां स्वाश्रयतोऽत्यन्तभिन्नत्वनिराकरणं क्रियते । तदनर्थकम् । प्रकृतानुपयोगात् । न चात्यन्तभिन्नधर्मसंसर्गवशाद्विशेषसाधकव्यवहारोपपत्तिशङ्कानिरासार्थं तदिति वाच्यम् । षट्पदार्थातिरेकः स्यादिति पूर्वग्रन्थे पदार्थनियमभङ्गापादनेनैव धर्माणां स्वाश्रयतोऽत्यन्तभिन्नत्वनिराससिद्ध्या पुनस्तदाश्रयणेनान्यथासिद्धिशङ्कानुदयात् इत्यतो नियमवादिनं प्रति नियमभङ्गापादनसम्भवेन तेन धर्माणां स्वाश्रयतोऽत्यन्तभेदनिरासासिद्ध्या तदाश्रयणेन पुनस्तस्यान्यथासिद्धिशङ्कानुदयेऽपि पदार्थानियमवादिनं नैयायिकं प्रति तन्नियमभङ्गस्येष्टापादनतयाऽसम्भवेन तेन धर्माणां स्वाश्रयतोऽत्यन्तभेदनिरासासिद्ध्याऽनियमवादिनस्तदाश्रयणेन विशेषसाधकव्यवहारस्यान्यथासिद्धिशङ्कासम्भवेन तन्निरासार्थतया तं प्रत्यप्यनवस्थाप्रसङ्गेन भेदनिराकरणस्यार्थवत्त्वान्न तत्परोत्तरभाष्यवैयर्थ्यमित्यभिप्रेत्य अनियमपक्षेऽपि तद्भेदनिरासपरतयोत्तरभाष्यं योजयितुमनियमपक्षमाश्रित्यान्यथासिद्धिशङ्कामुत्थापयति **नन्विति** । ननु धर्माणां षड्भ्योऽतिरेके षडेवेति नियमभङ्गप्रसङ्गादनतिरेके च षट्स्वन्तर्भावानुपपत्तेर्न धर्मिणो भिन्नत्वाश्रयणं

युक्तमित्याशङ्क्य निषेधति **न चेति** । तत्कुत इत्यतोऽतिरिक्तत्वपक्षोक्तं दोषं परिहरति **नैयायिकादिभिरिति** । आदिपदेन तदेकदेशिमतपरिग्रहः । परमाण्वारम्भवादिभिरिति क्वचित्पठ्यते तत्स्वरूपकथनमित्यवधेयम् । धर्मपदार्थस्य पृथगङ्गीकारेणानतिरेकानभ्युपगमान्न तत्पक्षोक्तान्तर्भावानुपपत्तिरपीत्याह **धर्मपदार्थस्येति** । **सर्वव्यवहारेति** । धर्मधर्म्यादिव्यवहारेत्यर्थः ।

वा०र०— नियमावादिनं प्रतीति । वैशेषिकं प्रतीत्यर्थः । **अर्थवत्वान्न तत्परेति** । अत्रार्थवत्वादित्यनन्तरं तस्मादिति पूरणीयम् । **बुद्ध्या** विवेकेनार्थवत्वम् । ततश्च तत्परेति वा योज्यम् । **धर्मा-धर्म्यादिव्यवहारेत्यर्थ इति** । ज्ञातत्वाज्ञातत्वादिव्यवहार आदिपदार्थः ।

स०व्र०— न चोक्तदोष इति । षट्पदार्थातिरेकलक्षण इत्यर्थः ।

विष्ठल०— नैयायिकादिभिरिति । वैशेषिकभिन्नैस्तार्किकादिभिरित्यर्थः । वैशेषिकपरीक्षायां नैय्यायिकादिदूषणमसङ्गतमित्यतः परमाण्वारम्भादि न निरसनीयपक्षसाम्यादशेष इति भावेनोक्तं **परमाण्वारम्भवादिभिरिति** । **धर्मपदार्थस्येति** । तन्निष्ठत्वादिरूपस्येत्यर्थः । **धर्मधर्माणामिति** । धर्मगतधर्माणामित्यर्थः ।

चषक— नैयायिकादिभिः वैशेषिकान्यैर्न्यायमधीयानैस्तं प्रतिसन्दधानैर्वा ।

* * *

॥ अथ उक्तार्थस्पष्टीकरणम् ॥

१७२ सु०— एतदुक्तं भवति । धर्मपदार्थं द्रव्यादिभ्यो भिन्नमभ्युपगच्छन् प्रष्टव्यः अस्तित्वादिधर्मेष्वप्यस्तित्वादिकमस्ति न वा । नेति पक्षेऽनुभवविरोधः, अस्तित्वं न ज्ञेयं नाभिधेयमिति स्वक्रियाविरोधश्च; अन्यथा द्रव्यादिष्वपि तदभावापत्तिः । आद्ये तदाश्रयतो भिन्नमभिन्नं वा । आद्ये तत्राप्यस्तित्वाद्यन्तरमित्यनवस्था स्यात् । द्वितीये त्वस्ति तावत् तत्रापि धर्मधर्म्यादिव्यवहारः, स चानुपपद्यमानो विशेषं गमयतीति । किञ्च धर्मगता धर्मा यदि आश्रयाभिन्नाः तदा किं द्रव्यादिगतास्तित्वादिधर्मैरपराद्धं येन ते द्रव्यादितो भिद्येरन्, योगक्षेमसाम्यात् । ततस्तेषामेव द्रव्याद्यभेदे सति पुनर्व्यवहारान्यथाऽनुपपत्त्या द्रव्यादिष्वेव विशेषसिद्धिः (इति) ।

परि०— योगक्षेमेति । धर्मे धर्मान्तरमस्तीति धर्मे धर्मान्तर(स्य)योगः तथा(भिप्राया-त्तादा)प्यनवस्थाभिया तत्र तादात्म्याङ्गीकारेऽपि धर्मधर्म्यादिव्यवहारबलेनान्यतरपरिलोपाभावरूपः

क्षेमो यथा तथा द्रव्येऽपि रूपादिगुणयोगः तयोरभेदेऽप्यन्यतरलोपाभावरूपक्षेमश्च सम इति योगक्षेम-साम्यादित्युक्तम् । साधकबाधकाभावसाम्यादित्यर्थ इत्येके ।

यादु०— तत् अस्तित्वादिधर्मजातम् । **योगक्षेमेति** । अप्राप्तप्राप्तिवाचकयोगशब्देनात्र बाधकाभावो ग्राह्यः । प्राप्तपरिरक्षणपरेण क्षेमशब्देन साधकसद्भावः तयोः साम्यादित्यर्थः ।

वं०प०— स्वक्रियेति । अस्तित्वमिति व्यवहारेणास्तित्वज्ञानस्य सत्त्वेन न ज्ञेयमित्युक्ते स्वक्रियाविरोधः । अस्तित्वमित्युक्ते तच्छब्देनैवाभिधेयत्वप्राप्त्या नाभिधेयमित्युक्तेऽपि तथेति ज्ञेयम् । **अन्यथेति** । अस्तित्वादिधर्मेष्वस्तित्वादिकमनुभवसिद्धमपि यदि नाङ्गीक्रियत इत्यर्थः । **धर्मगताः** अस्तित्वादि-धर्मगताः **धमाः** अस्तित्वादिधर्माः । **अभिन्ना इति** । अभिन्नधर्माः इत्यर्थः ।

श्रीनिधि०— अस्तित्वं न ज्ञेयं नाभिधेयमिति स्वक्रियाविरोधश्चेति । अत्र नाभिधेयमिती-त्यनन्तरं वदत इति शेषः । अन्यथानुभवविरोधस्वक्रियाविरोधयोरनादरेण । **योगक्षेमसाम्यादिति** । योग अगन्तुकालाभावः । क्षेमः विद्यमान परियाचनं तयोरुभयत्र साम्यात् । दूषणभूषणयोः साम्यादित्यत्र तात्पर्यम् ।

शे०वा०— ननु द्रव्यादिधर्माणामाश्रयतो भिन्नत्वेऽपि धर्मवत्त्वासिद्धेस्तत्सिद्धावपि तन्मात्रस्या-प्रयोजकत्वाद्भिन्नधर्मवत्वाभिप्राये च तदसिद्ध्या आपादकासिद्धिप्रसङ्गेन धर्मानवस्थाया अप्रसङ्गात् कथञ्चि-दापादकसिद्ध्या तेन तदापादनसम्भवेऽपि धर्मधर्माणां धर्माभेदसिद्ध्या तत्र सामानाधिकरण्यव्यवहारानुपपत्त्या विशेषसिद्धावपि प्रकृतद्रव्याणां तदभेदासिद्ध्या तत्रोक्तव्यवहारेण विशेषासिद्धेः कथमुक्तशङ्कापरिहार इत्यतो धर्माणां धर्मवत्त्वसाधनप्रणाड्योक्तशङ्कापरिहारं दर्शयितुमाह **एतदुक्तं भवतीति** । अनुभवमतिक्रामन्तं प्रति दूषणान्तरमाह **अस्तित्वमिति** । यथा मूकोऽहमिति वचनक्रियया मूकपदोक्तवचननिषेधो विरुध्यते तथाऽस्तित्वं न ज्ञेयं नाभिधेयमित्यस्तित्वसम्बन्धित्वेन ज्ञेयत्वाभिधेयत्वनिषेधकास्तित्वविषयकज्ञानाभिधानक्रियया नेति-पदोक्तस्तन्निषेधो विरुध्यत इत्यर्थः । उभयमप्यवगणयन्तं प्रत्यनिष्टान्तरमाह **अन्यथेति** । अस्तित्वादिधर्मे-ष्वस्तित्वाद्यभावे द्रव्यादिष्वपि तदभावापत्तिरनुभवविरोधादेरुभयत्राप्यविशिष्टत्वादन्यस्य नियामकस्य चाभावादिति भावः । गमयतीत्यत्रत्यस्थेतिशब्दस्य द्रव्यादिष्वेव विशेषसिद्धिरिति वक्ष्यमाणेनान्वयः । तत्रत्यस्य चेत्येतदुक्तं भवतीति सम्बन्धः । केचित्तु गमयतीत्यत्रत्यस्येतिशब्दस्येतदुक्तं भवतीति पूर्वेण सम्बन्धमङ्गीकृत्य नन्वस्तु धर्मधर्माणां धर्माभिन्नतया तत्र विशेषसिद्धिः । द्रव्यादिधर्माणां तु तदभेदासिद्ध्या तत्र विशेषासिद्धेः कथ-मुक्ताक्षेपपरिहार इत्यत आहेति किञ्चेत्यादिग्रन्थावतारमाहुः । **योगक्षेमेति** । अप्राप्तप्राप्तिवाचकयोगशब्देन साधनसद्भावोऽभिमतः । प्राप्तसंरक्षणपरेण क्षेमशब्देन च बाधकाभावोऽभिमतः । ततश्च साधकबाधकाभावयोः साम्यादित्यर्थः ।

वा०र०— तन्मात्रस्य प्रयोजकत्वादिति । धर्माणां स्वभेदाङ्गीकारादिति भावः । **तेन** धर्माणां भिन्नधर्मत्वेवंरूपापादकेनेत्यर्थः । **तदापादनेति** । अनवस्थापादनेत्यर्थः । **धर्मभेदेति** । अनवस्थाप्रसङ्गभिया तस्याङ्गीकर्तव्यत्वमिति भावः । **द्रव्यादिष्वेव विशेषसिद्धिरिति वक्ष्यमाणेनान्वय इति** । अनेन द्रव्यादिष्वेव विशेषसिद्धौ गमयतीत्यन्तेन एको हेतुरुक्तः । पुनर्व्यवहारान्यथानुपपत्त्येत्यादिनोक्तश्चापर इति सूचितं भवति । **तत्रत्यस्य चेति** । इति शब्दस्येति वर्तते । अनेन विशेषसिद्धिरितीतिशब्दान्तः पाठः इति सूचयति । इति शब्दरहितोऽपि पाठः तदनुसारेणाह **केचित्त्विति** । अयं चौत्प्रेक्षिकः पक्षः पाठान्तरव्याख्यान इति ध्येयम् ।

विठ्ठल०— स्वनिरुह्यति....भूमिः धर्मसन्तानादिकमुपपादयितुमाह **एतदुक्तं भवतीति** । **योग-क्षेमेति** । यथास्तित्वादिधर्मेष्वस्तित्वादिधर्माणां प्राप्तिरूपो योगस्तथा द्रव्येष्वस्तित्वादि धर्माणां योगः धर्मेषु धर्मान्तराङ्गीकारे अवस्थाभये तादात्म्यमङ्गीकृत्य धर्मधर्म्यादिव्यवहारान्यथानुपपत्त्या प्राप्ततादात्म्यपरिरक्षणाय विशेषस्वीकारेण क्षेमश्च तथा द्रव्यादिष्वेवास्तित्वादिधर्मतादात्म्यमङ्गीकृत्य विशेषेण क्षेमश्च समान इत्यर्थः । यद्वा अप्राप्त्यप्राप्तिवाचकयोगशब्देन बाधकाभावो ग्राह्यः प्राप्तपरिक्षणपरक्षेमशब्देन साधकसद्भावश्च तत्साम्या-दित्यर्थः । **ततस्तेषामिति** । एवं योगक्षेमसाम्ये सति कल्पनालाघवाद्द्रव्यादिष्वेव विशेषाङ्गीकारो युक्त इति भावः ।

॥ इति उक्तार्थस्पष्टीकरणम् ॥
॥ इति पदार्थषट्कानियमवादिनं नैयायिकं प्रत्यपि धर्मस्य धर्मसन्तानात् अनवस्थाप्रसङ्गः, तस्य च प्रकृतसमन्वयः ॥

* * *

॥ अथ च तत्र धर्मे धर्मानङ्गीकारे उक्तायाः अनवस्थायाः विपक्षे बाधकोपदर्शनमुखेन दूषणत्वम् ॥
॥ अथ तत्रादौ तस्याः अनवस्थायाः दूषणत्वपरा अनुव्याख्यानस्य पदार्थयोजना ॥

१७३ सु०— नन्वस्त्येव द्रव्यादिधर्मेष्वस्तित्वादिष्वप्यस्तित्वादिकम् । तच्चाश्रयतो भिन्नमेव । न चैवं धर्मस्यानवधिकधर्मसन्तानादनवस्थादोषः, उत्पत्तिज्ञप्तिप्रतिबन्धकत्वा-भावेनादोषत्वात् । यथाऽऽहुः 'मूलक्षयकरीं प्राहुरनवस्थां हि दूषणमि'ति । यदर्थमुत्तरो-त्तरानुसरणं तन्मूलमुत्पत्तिर्ज्ञप्तिर्वा । ततो भिन्ननिमित्ततयोपपद्यमानो व्यवहारो न विशेष-माक्षेप्तुमलमित्यत आह सामान्यस्यापीति ।

अनु०— सामान्यस्यापि सामान्यं गुणस्यापि गुणो ह्यतः ।
नाङ्गीकृतः

सामान्यस्य गोत्वादेः, सामान्यं सत्तालक्षणम्, गुणस्य च रूपादेः, सङ्ख्या-पृथक्त्वादिगुणः, अतः अनवस्थाभयादेव, हि नाङ्गीकृतः ।

परि०— ननु मूलक्षयेति वाक्ये उत्पत्तिज्ञप्तिक्षयकरत्वं न प्रतीयत इत्यत आह **यदर्थमिति** । ततः किमित्यत आह **तत इति** । अनवस्थायाः मूलक्षयकरत्वाभावादित्यर्थः । **भिन्ननिमित्ततयेति** । धर्मणामाश्रयतो भिन्नत्वहेतुनेत्यर्थः ।

शे०वा०— ननूत्तरग्रन्थे सामान्यादौ सामान्याद्यनभ्युपगमस्यानवस्थानिमित्तकत्वमुच्यते तदनर्थकमित्याशङ्क्य धर्मानवस्थाया विपक्षे बाधकोपदर्शनमुखेन दूषणत्वोपपादनार्थत्वान्न तदिति भावेन तत्परतयोत्तरग्रन्थं योजयितुं धर्मानवस्थाया दूषणत्वानुपपत्तिशङ्कामुत्थापयति **नन्विति** । उत्पत्तिज्ञप्तिप्रतिबन्धकत्वेनानवस्थाया दूषणत्वे नियामकमाह **यथाऽऽहुरिति** ।

नन्वत्र मूलक्षयकरत्वमनवस्थाया दूषणत्वे नियामकमुक्तं न तूत्पत्तिज्ञप्तिप्रतिबन्धकमिति कथमस्योक्तार्थनियामकत्वेनोपन्यास इत्यत आह **यदर्थमिति** । **व्यवहार इति** । द्रव्यादिधर्माणां द्रव्येण, धर्मधर्माणां च स्वाश्रयेण सामानाधिकरण्यव्यवहार इत्यर्थः । **विशेषमिति** । द्रव्यादिषु द्रव्यादिधर्मेषु चेति शेषः ।

वा०र०— **विभिन्ननिमित्ततयेति** मूले गुणगुण्यादिषु गुणगुण्याद्यन्तरेणेव धर्मिणो गुणादिनापि भेदेन व्यवहारोऽभिप्रेतः । अवस्थाभावसम्पादकत्वेन धर्मिणामारभ्यैव निमित्तभेदमङ्गीकृत्य व्यवहारस्योपपादनीयत्वमावश्यकमिति भावेन व्याख्याति **द्रव्यादिधर्माणामिति** । उक्तनिमित्तादेव शेषं पूरयति **द्रव्यादिष्विति** ।

विठ्ठल०— स्वोक्तमुदाहृतवाक्यारूढं करोति **यदर्थमिति** । **तत इति** । यत एवं बीजाङ्कुरानवस्थावदस्मादुत्पत्त्याद्यप्रतिबन्धकत्वं तत इत्यर्थः । **विभिन्ननिमित्ततयेति** । धर्माणामाश्रयतो भिन्नत्वेन हेतुनेत्यर्थः ।

* * *

॥ अथ उक्तार्थस्पष्टीकरणम् ॥

१७४ **सु०**— **अयमाशयः । सामान्यस्यापि सामान्यं तावत्परेण नाङ्गीकृतम्, तथा गुणस्यापि गुणो नाङ्गीकृतः; तत्कस्मादिति वक्तव्यम् ।**

न तावत्प्रतीत्यभावात्, 'सद्गोत्वं', 'चतुर्विंशतिगुणाः', 'रूपाद्रसः पृथगि'ति प्रतिभासस्य दुरपह्नवत्वात् । न च 'न सद्गोत्वमि'त्यादि बाधकमस्ति, येन प्रतीतस्यापि

वा०र०— तन्मात्रस्य प्रयोजकत्वादिति । धर्माणां स्वभेदाङ्गीकारादिति भावः । **तेन** धर्माणां भिन्नधर्मत्वेवंरूपापादकेनेत्यर्थः । **तदापादनेति** । अनवस्थापादनेत्यर्थः । **धर्मभेदेति** । अनवस्थाप्रसङ्गभिया तस्याङ्गीकर्तव्यत्वमिति भावः । **द्रव्यादिष्वेव विशेषसिद्धिरिति वक्ष्यमाणेनान्वय इति** । अनेन द्रव्यादिष्वेव विशेषसिद्धौ गमयतीत्यन्तेन एको हेतुरुक्तः । पुनर्व्यवहारान्यथानुपपत्त्येत्यादिनोक्तश्चापर इति सूचितं भवति । **तत्रत्यस्य चेति** । इति शब्दस्येति वर्तते । अनेन विशेषसिद्धिरितीतिशब्दान्तः पाठः इति सूचयति । इति शब्दरहितोऽपि पाठः तदनुसारेणाह **केचित्त्विति** । अयं चौत्प्रेक्षिकः पक्षः पाठान्तरव्याख्यान इति ध्येयम् ।

विठ्ठल०— स्वनिरुह्यति....भूमिः धर्मसन्तानादिकमुपपादयितुमाह **एतदुक्तं भवतीति** । **योग-क्षेमेति** । यथास्तित्वादिधर्मेष्वस्तित्वादिधर्माणां प्राप्तिरूपो योगस्तथा द्रव्येष्वस्तित्वादि धर्माणां योगः धर्मेषु धर्मान्तराङ्गीकारे अवस्थाभये तादात्म्यमङ्गीकृत्य धर्मधर्म्यादिव्यवहारान्यथानुपपत्त्या प्राप्ततादात्म्यपरिरक्षणाय विशेषस्वीकारेण क्षेमश्च तथा द्रव्यादिष्वेवास्तित्वादिधर्मतादात्म्यमङ्गीकृत्य विशेषेण क्षेमश्च समान इत्यर्थः । यद्वा अप्राप्यप्राप्तिवाचकयोगशब्देन बाधकाभावो ग्राह्यः प्राप्तपरिक्षणपरक्षेमशब्देन साधकसद्भावश्च तत्साम्या-दित्यर्थः । **ततस्तेषामिति** । एवं योगक्षेमसाम्ये सति कल्पनालाघवाद्द्रव्यादिष्वेव विशेषाङ्गीकारो युक्त इति भावः ।

॥ इति उक्तार्थस्पष्टीकरणम् ॥

॥ इति पदार्थषट्कानियमवादिनं नैयायिकं प्रत्यपि धर्मस्य धर्मसन्तानात् अनवस्थाप्रसङ्गः, तस्य च प्रकृतसमन्वयः ॥

* * *

॥ अथ च तत्र धर्मे धर्मानङ्गीकारे उक्तायाः अनवस्थायाः विपक्षे बाधकोपदर्शनमुखेन दूषणत्वम् ॥

॥ अथ तत्रादौ तस्याः अनवस्थायाः दूषणत्वपरा अनुव्याख्यानस्य पदार्थयोजना ॥

१७३ सु०— नन्वस्त्येव द्रव्यादिधर्मेष्वस्तित्वादिष्वप्यस्तित्वादिकम् । तच्चाश्रयतो भिन्नमेव । न चैवं धर्मस्यानवधिकधर्मसन्तानादनवस्थादोषः, उत्पत्तिज्ञप्तिप्रतिबन्धकत्वा-भावेनादोषत्वात् । यथाऽऽहुः 'मूलक्षयकरीं प्राहुरनवस्थां हि दूषणमि'ति । यदर्थमुत्तरो-त्तरानुसरणं तन्मूलमुत्पत्तिर्ज्ञप्तिर्वा । ततो भिन्ननिमित्ततयोपपद्यमानो व्यवहारो न विशेष-माक्षेसुमलमित्यत आह सामान्यस्यापीति ।

अनु०— सामान्यस्यापि सामान्यं गुणस्यापि गुणो ह्यतः ।
नाङ्गीकृतः

सामान्यस्य गोत्वादेः, **सामान्यं** सत्तालक्षणम्, **गुणस्य** च रूपादेः, **सङ्ख्या-पृथक्त्वादिगुणः, अतः अनवस्थाभयादेव, हि नाङ्गीकृतः ।**

परि०— ननु मूलक्षयेति वाक्ये उत्पत्तिज्ञप्तिक्षयकरत्वं न प्रतीयत इत्यत आह **यदर्थमिति** । ततः किमित्यत आह **तत इति** । अनवस्थायाः मूलक्षयकरत्वाभावादित्यर्थः । **भिन्ननिमित्ततयेति** । धर्मणामाश्रयतो भिन्नत्वहेतुनेत्यर्थः ।

शे०वा०— ननूत्तरग्रन्थे सामान्यादौ सामान्याद्यनभ्युपगमस्यानवस्थानिमित्तकत्वमुच्यते तदनर्थकमित्याशङ्क्य धर्मानवस्थाया विपक्षे बाधकोपदर्शनमुखेन दूषणत्वोपपादनार्थत्वान्न तदिति भावेन तत्परतयोत्तरग्रन्थं योजयितुं धर्मानवस्थाया दूषणत्वानुपपत्तिशङ्कामुत्थापयति **नन्विति** । उत्पत्तिज्ञप्तिप्रतिबन्धकत्वेनानवस्थाया दूषणत्वे नियामकमाह **यथाऽऽहुरिति** ।

नन्वत्र मूलक्षयकरत्वमनवस्थाया दूषणत्वे नियामकमुक्तं न तूत्पत्तिज्ञप्तिप्रतिबन्धकमिति कथमस्योक्तार्थनियामकत्वेनोपन्यास इत्यत आह **यदर्थमिति । व्यवहार इति** । द्रव्यादिधर्माणां द्रव्येण, धर्मधर्माणां च स्वाश्रयेण सामानाधिकरण्यव्यवहार इत्यर्थः । **विशेषमिति** । द्रव्यादिषु द्रव्यादिधर्मेषु चेति शेषः ।

वा०र०— **विभिन्ननिमित्ततयेति** मूले गुणगुण्यादिषु गुणगुण्याद्यन्तरेणेव धर्मिणो गुणादिनापि भेदेन व्यवहारोऽभिप्रेतः । अवस्थाभावसम्पादकत्वेन धर्मिणामारभ्यैव निमित्तभेदमङ्गीकृत्य व्यवहारस्योपपादनीयत्वमावश्यकमिति भावेन व्याख्याति **द्रव्यादिधर्माणामिति** । उक्तनिमित्तादेव शेषं पूरयति **द्रव्यादिष्विति** ।

विट्ठल०— स्वोक्तमुदाहृतवाक्यारूढं करोति **यदर्थमिति** । **तत इति** । यत एवं बीजाङ्कुरानवस्थावदस्मादुत्पत्त्याद्यप्रतिबन्धकत्वं तत इत्यर्थः । **विभिन्ननिमित्ततयेति** । धर्माणामाश्रयतो भिन्नत्वेन हेतुनेत्यर्थः ।

* * *

॥ अथ उक्तार्थस्पष्टीकरणम् ॥

१७४ **सु०— अयमाशयः । सामान्यस्यापि सामान्यं तावत्परेण नाङ्गीकृतम्, तथा गुणस्यापि गुणो नाङ्गीकृतः; तत्कस्मादिति वक्तव्यम् ।**

न तावत्प्रतीत्यभावात्, 'सद्गोत्वं', 'चतुर्विंशतिगुणाः', 'रूपाद्रसः पृथगि'ति प्रतिभासस्य दुरपह्नवत्वात् । न च 'न सद्गोत्वमि'त्यादि बाधकमस्ति, येन प्रतीतस्यापि

परित्यागः । 'गोत्वं न सत्तावदपरसामान्यशून्यत्वाद्विशेषवत्', 'गुणा न गुणवन्तोऽद्रव्यत्वात् क्रियावदि'त्यादि बाधकमस्तीति चेन्न, विपक्षे बाधकाभावेनाप्रयोजकत्वात्, दृष्टान्तयोः(श्च) साध्यविकलत्वाच्च ॥ यदि गोत्वादौ सत्ता स्यात् तदा सत्तायामपि स्यात् तथा चात्माश्रयत्वमिति चेन्न, सत्तान्तरत्वोपपत्तेः ॥ किञ्च प्रतीते किमात्माश्रयता करिष्यति, अन्यथा प्रमेयत्वादीनां केवलान्वयित्वं न स्यात्, आत्माश्रयभयाद्यतः प्रमेयत्वादिव्यावृत्तिः तस्यैव विपक्षत्वात् । उक्तं च 'कथं स्ववृत्तिरिष्टा चेद्यथाऽन्यत्रेति गृह्यताम् । प्रमाणं शरणं वृत्तौ न भिन्नाभिन्नतेयते' इति ॥ गुणानामपि गुणवत्त्वे द्रव्यलक्षणयोगाद् द्रव्यतापत्तिरिति चेन्न, प्रतीतिमनुरुध्य लक्षणान्तरस्य कर्तव्यत्वात् ।

तस्मात्सामान्ये सामान्यं गुणे च गुणः अनवस्थाभयादेव नाङ्गीक्रियत इत्येव वक्तव्यम् । यथाऽऽह 'व्यक्तेरभेदस्तुल्यत्वं सङ्करोऽथानवस्थितिः । रूपहानिरसम्बन्धो जातिबाधकसङ्ग्रहः' इति ।

परि०— दृष्टान्तयोश्चेति । विशेषवत्क्रियावदित्युक्तविशेषक्रिययोरित्यर्थः । विशेषे सत्तायाः, क्रियायां कर्माण्युत्क्षेपणादिभेदेन पचेति पञ्चत्वसङ्ख्यायाः एतत्क्रियातः सा क्रिया पृथगिति पृथक्त्वस्य गुणस्य, सत्त्वादित्यर्थः । किञ्चेत्यादिनोक्तं प्रमेयं तार्किकवाक्येन संवादयति **उक्तं चेति** । प्रमेयत्वादीनां स्ववृत्तिरिष्टा चेत् कथं ज्ञातव्या सेति चेत् अन्यत्र घटादौ घटत्वादिवृत्तिर्यथा तथा गृह्यताम् । ननु तत्र भेदाद्घटत्वादेर्घटादौ वृत्तिः सुग्रहा । प्रमेयत्वादिष्वभेदात् कथमित्यत उक्तं प्रमाणं शरणं वृत्तौ । धर्माणां क्वचिदाश्रितत्वे प्रमाणं प्रमितिरेव कारणं न तु भिन्नत्वाभिन्नत्वे वृत्त्यवृत्तिनिमित्ते यतः अतोऽभेदेऽपि प्रमितत्वात् स्ववृत्तिरिष्टैवेत्यर्थः । **व्यक्तेरभेद इति** । आकाशत्वं न जातिः तत्र व्यक्तेरेकत्वेनानेकानुगतत्वरूपजातिलक्षणाभावात् । **तुल्यत्वं** तुल्याश्रयकत्वमन्यूनानधिकदेशवृत्तित्वमिति यावत् । घटत्वेन तुल्याश्रयकत्वं करीरत्वकलशत्वकम्बुग्रीवत्वपृथुबुध्नोदराकारत्वादीनां जातित्वे बाधकम् । सङ्करो नाम परस्परपरिहारेण वर्तमानयोरेकत्र समावेशः । यथा प्रागुक्तोद्भूतत्वं रूपत्वं विना(उद्भूत) स्पर्शे । रूपत्वं चोद्भूतत्वं विनानुद्भूतरूपे । रूपत्वं उद्भूतत्वं चोद्भूतरूप इति रूपत्वेन साङ्कर्यमुद्भूतत्वस्य जातित्वे बाधकम् । जातौ जात्यङ्गीकारेऽनवस्था बाधिका । विशेषे जात्यङ्गीकारेऽत्यन्तव्यावर्तकत्वरूपविशेषस्वरूपहानिर्बाधिका । समवायत्वस्य जातित्वे सम्बन्धाभावो बाधक इति जातिबाधकसङ्ग्रह इत्यर्थः ।

गु०दी०— विपक्षे बाधकाभावेनाप्रयोजकत्वात् इत्युपलक्षणम् । गोत्वे सत्ताजातिमङ्गीकुर्वता जातित्वाख्यापरजातेरङ्गीकाराद्धेतोस्स्वरूपासिद्धिश्च ।

यादु०— कथं स्ववृत्तिरिति । प्रमेयत्वादीनां स्ववृत्तिरिष्टा चेत् सा कथम् । आश्रयाश्रयिभावस्य भेदव्याप्तत्वादिति शङ्काभिप्रायः । उत्तरमाह **यथाऽन्यत्रेति** । यथाऽन्यत्र स्वभिन्ने वृत्तिः तथा स्वस्मिन्नपि वृत्तिर्भविष्यतीत्यर्थः । ननु वृत्तिप्रयोजकस्य भेदस्याभावात् कथमिदमुच्यत इत्यत आह **प्रमाणमिति** । इदमुपलक्षणम् । अवृत्तौ प्रमाणाभाव एव शरणमित्यपि द्रष्टव्यम् । न भिन्नाभिन्नते वृत्त्यवृत्तिप्रयोजके इति शेषः । सामान्ये सामान्याङ्गीकारेऽनवस्था बाधिकेत्यत्र उदयनसम्मतिमाह **यथाऽऽहेति** । **व्यक्तेरभेद इति** । अस्यार्थः । अनेकासु व्यक्तिष्वानन्त्यव्यभिचाराभ्यां सङ्गतिग्रहणादेरशक्यतया तदर्थमनुवृत्तप्रत्ययनिर्वाहार्थं च जातिरङ्गीकार्या । व्यक्तिभेदाभावे तु तत्स्वरूपेणैव सर्वस्य निर्वाहाद्व्यर्था जातिरिति व्यक्त्यभेदो जातिबाधकः । तुल्यत्वं नाम जात्याश्रयव्यक्तीनामन्यूनानधिकत्वम् । घटादिष्वेकयैव घटत्वजात्या सङ्गतिग्रहणाद्युपपत्तौ परापरभावानापन्नतावद्व्यक्तिमात्रवृत्तिकरीरत्वादिरूपद्वितीयजात्यङ्गीकारो निष्प्रमाणक इति तत्र तुल्यत्वं जात्यन्तरसद्भावे बाधकम् । परस्परपरिहारेण वर्तमानयोर्जात्योरेकत्र समावेशः सङ्करः । सोऽपि जतिबाधकः । अन्यथा गोत्वाश्वत्वयोरप्येकत्र समावेशसम्भावनया गौस्तिष्ठतीत्युक्ते तत्राश्वत्वस्यापि शङ्कितत्वात् नाश्व इति निश्चयासम्भवेन न निष्कम्पा प्रवृत्तिः स्यादिति । अनवस्थितिश्च जातौ जात्यङ्गीकारे बाधिका । विशेषेषु सामान्यसद्भावे समानजात्याक्रान्तत्वेन कदाचित्संशयहेतुत्वस्यापि सम्भवात् अत्यन्तव्यावृत्तिबुद्धिजनकत्वाभावेन विशेषरूपताहानिर्बाधिका । समवाये जात्यङ्गीकारे व्यक्त्यभेदस्तावदेको बाधकोऽपरश्च सम्बन्धाभावः । समवायतन्निष्ठजात्योरद्रव्यत्वेन संयोगासम्भवे समवाय एव वाच्यः । न च सोऽपि युक्तः । तस्यात्माश्रयत्वप्रसङ्गभीत्याऽन्यत्वे तत्रापि समवायनिष्ठजात्या भवितव्यम् । अन्यथा सकलसमवायावृत्तौ तस्या जातिताव्याघातात् । तदर्थं च तत्रापि समवायान्तराङ्गीकारेऽनवस्थाप्रसङ्गः । अतः सम्बन्धाभावः समवाये जातिस्वीकारे बाधक इति ।

वं०प०— अत एव नाङ्गीकृत इत्युक्तमुपपादयितुं परिशेषमाह **न तावदित्यादिना** । **सत्तान्तरेति** । सत्तानिष्ठा सत्ता न स्वयमेव, येनात्माश्रयः किन्त्वन्यैवेत्यर्थः । **प्रतीते** सत्ता सतीति सत्तायां सत्तावत्त्वे प्रतीते सतीत्यर्थः । **अन्यथेति** । स्वनिष्ठत्वेन प्रतीतत्वेऽपि यद्यात्माश्रयत्वं दोष इत्यर्थः । **यतः** प्रमेयत्वात् । **विपक्षत्वादिति** । शब्दः प्रमेयोऽभिधेयत्वादित्यत्र प्रमेयत्वस्यैव विपक्षत्वेन व्यभिचार इति भावः ।

कं०रा०— दृष्टान्तयोरिति । विशेषः सन्निधिरतीति बलेन विशेषस्य सत्त्वात् क्रियागुणादितः पृथगित्यादित्यादिप्रतीतिबलेन क्रियायाः पृथक्त्वादिगुणवत्वाच्च दृष्टान्तयोः साध्यवैकल्यमिति भावः । गोत्वं न स तावदित्यनुमाने विपक्षे बाधकमस्तीति शङ्कते **यदि गोत्वादाविति** । **सद्गोत्वमिति** । प्रतीतिसत्त्वेऽपि बाधकसद्भावादगोत्वादौ सत्ता नाङ्गीक्रियत इत्याशयेन वा शङ्कते **यदि गोत्वादाविति** । **सत्तान्तरत्वोप-**

पत्तेरिति । सत्तागतसत्तायाः सत्तान्तरत्वोपपत्तेनात्माश्रयत्वोपपत्तिरिति भावः । **तस्यैव विपक्षत्वादिति** । तथा च सद्विपक्षत्वाभावेन प्रमेयत्वादेः केवलान्वयित्वं न स्यादिति भावः । **कथं स्ववृत्तिरिति** । स्ववृत्तिः कथमिष्टेति चेत् यथान्यत्र प्रमेयत्वादौ स्ववृत्तिरिष्टा तथेति गृह्यतां कथं प्रमेयत्वादावपि स्ववृत्तिरित्यत आह **प्रमाणमिति** । यतो वृत्तितदभावयोः प्रमाणं कारणं न भिन्नाभिन्नत्वे प्रमाणं च प्रमेयत्वं प्रमेयमित्यादिकं प्रमेयमित्यादेः स्ववृत्तित्वग्राहकमस्ति तस्मात्स्ववृत्तित्वं युक्तमिति भावः । गुणेषु च चतुर्विंशतित्वादिप्रतिभासे सत्यपि बाधकान्तरबाधात् चतुर्विंशतित्वादिगुणवत्वं नाङ्गीक्रियत इति शङ्कते **गुणानामपीति** । सामान्ये सामान्यमनवस्था तस्मादेव नाङ्गीक्रियत इत्यत्र सम्मतिमाह **यथाहेति** । आकाशे आकाशत्वरूपजातोर्व्यक्तत्वभेदो बाधकः अनुगतबुद्धेर्व्यक्तयैक्येनोपपत्त्या जातिकल्पनानवकाशात् घटत्वकलशत्वरूपजातिद्वये मन्युना अनधिकवृत्तित्वरूपतुल्यत्वं बाधकं एकयैव जात्यानुगतबुद्ध्युपपत्तौ जातिद्वयकल्पनाया अयोगात् इन्द्रियत्वस्य जातित्वे पृथिवीत्वादिना सङ्करो बाधकः जातौ जात्यन्तरसत्त्वेनावस्थितिर्बाधिका । विशेषे विशेषत्वरूपसामान्ये स्वरूपहानिर्बाधिका । विशेषे विशेषत्वरूपव्यावर्तकाङ्गीकारे व्यावर्तकशिरोमणित्वरूपविशेषहानिप्रसङ्गेन तत्र जात्यङ्गीकारायोगात् समवाये समवायत्वरूपजातावसम्बन्धो बाधकः । समवाये जात्यङ्गीकारे तयोः समवायरूपसम्बन्धस्य वक्तव्यत्वात् तत्समवाये च समवायरूपसम्बन्धाभावेन तत्र जात्यङ्गीकारायोगात् तथा च 'व्यक्तेरभेदस्तुल्यत्वं सङ्करोत्थानवस्थितिः रूपहानिरसम्बन्ध' इति जातिबाधकानां सङ्ग्रह इति कारिकार्थः ।

श्रीनिधि०— अपरसामान्यशून्यत्वादिति । व्याप्यजातिशून्यत्वादित्यर्थः । **विशेषवदिति** । विशेषे सामान्यमात्रशून्ये व्याप्यसामान्यशून्यत्वं सुतरामिति भावः । **इत्यादिबाधकमिति** । इत्यादीत्यनन्तरं प्रमाणमिति शेषः । **साध्यविकलत्वादिति** । प्रतिवादिरीत्येति भावः । अस्तु वा सैव सत्ता तथाऽपि न किञ्चिद्बाधकमस्ति इत्याह **किञ्चेति** । **अन्यथेति** । प्रतीतिमप्यभिभूय स्ववृत्तित्वत्याग इत्यर्थः । **केवलान्वयित्वं न स्यादिति** । विपक्षशून्यत्वं हि केवलान्वयित्वमिति भावः । प्रमेयत्वस्य विपक्षाभावात् केवलान्वयित्वं भज्यतेत्यत आह **आत्माश्रयभयादिति** । **तस्यैव विपक्षत्वादिति** । स्वव्यावृत्त्यधिकरणत्वं विपक्षत्वमिति भावः । **उक्तं चेति** । प्रतीतिमनुसृत्य प्रमेयत्वाभिधेयत्वादीनां स्ववृत्तित्वं न केवलं युक्त्या ग्राह्यमित्युच्यते । किन्तु उक्तं च तैः स्ववृत्तित्वमतोऽपि ग्राह्यमित्यर्थः । अनिष्टा स्ववृत्तिः कथं गृह्यताम् आत्माश्रयत्वादिति प्रश्नः । उत्तरमाह **इति चेत् यथान्यत्रेतीति** । इति तथेत्यर्थः । कुण्डबदराविवेति भावः । ननु कुण्डबदरयोः भेदात् अन्यस्यान्यवृत्तित्वं सम्भवति नात्राभेदादित्यत आह **मामिति** । भिन्नतावृत्तौ कारणं न भवति किन्तु प्रमाणं यतः अतः प्रमाणे सति काऽत्र कथन्तेत्यर्थः । यद्वा स्ववृत्तिरिष्टा चेत् कथमिति यथाश्रुतं सम्बन्धो द्रष्टव्यः । **व्यक्तेरभेद इत्यादि** । आकाशत्वं नाम जातिर्नाभ्युपगन्तुं युक्ता, व्यक्तेराश्रयस्य एकत्वात् । एवमपि कुतो न जातित्वमिति चेत् । लक्षणहानेरिति ब्रूमः । तथा हि । नित्यमेकमनेकानुगतं सामान्यमिति तल्लक्षणम् । न चाकाशत्वस्यानेकानुगतत्वं सम्भवति । व्यक्तयैक्यादिति । करीरत्वादिकं न । जातितुल्यत्वात् । तुल्यव्यक्तित्वात् । घटत्वं यावति वर्तते तावत्येव करीरत्वम् । एवमपि कुतो न जातित्वमिति चेत् । परापराभावानुपपत्तेरिति ब्रूमः । यत्र जात्यन्तरमस्ति

तत्र तद्व्याप्यत्वं वा तद्व्यापकत्वं वा दृष्टम् । न चानयोस्तथा सम्भवति । तुल्यव्यक्तिवृत्तित्वेन न्यूनाधिकवृत्तित्वासम्भवात् । अनुभवत्वं न जातिः । परोक्षत्वादिना सङ्करप्रसङ्गात् । तथा हि अनुभवत्वं विहाय परोक्षत्वं स्मृतौ वर्तते । परोक्षत्वं विहायानुभवत्वं अपरोक्षानुभवे वर्तते । तयोरेकत्र परोक्षानुभवे समावेशात् । एवमपि कुतो न जातित्वमिति चेत् परापरभावानुपपत्तेरिति । तथा हि । यदि परोक्षत्वं परं स्यात् तदा सर्वोऽप्यनुभवः परोक्षः स्यात् । यदि चानुभवत्वं परं स्यात् तदा सर्वस्यापि ज्ञानस्यानुभवत्वं स्यात् । व्याप्यवति व्यापकसत्त्वनियमात् । सत्तायां न सत्ताजातिरस्ति अनवस्थितेः । अनवस्थितिश्च दूषणम् । ज्ञप्तिप्रतिबन्धेन मूलक्षयात् । विशेषेषु विशेषत्वं न जातिः । रूपहानेः । व्यावर्त्यकान्तरशून्यत्वे सति व्यावर्तत्वं हि तत्स्वरूपम् । जात्यङ्गीकारे च तद्भङ्ग इति । समवाये समवायत्वं न जातिः । सम्बन्धासम्भवात् समवायस्यैकत्वात् । दूषणत्वं वाऽस्य समवायेनानेकानुगतत्वलक्षणाभावेनेति द्रष्टव्यम् ।

शे०वा०— ननु सामान्यादौ सामान्याद्यनभ्युपगमस्य तत्साधकप्रमाणाभावबाधकप्रमाणसद्भावनिबन्धनत्वात् अनवस्थानिबन्धनत्वमेव तावदसिद्धम् । तन्निबन्धनत्वेऽपि वा सामान्यानवस्थाया उत्पत्त्यादिप्रतिबन्धकत्वेनैव दूषणत्वसम्भवात् तदप्रतिबन्धकत्वेऽपि दूषणत्वासिद्धेरेव तदप्रतिबन्धकत्वेऽपि वा तस्या अप्यदूषणत्वमिष्टमेवेति कथं तद्दृष्टान्तेन धर्मानवस्थाया दूषणत्वसिद्धिरित्यतस्तदुपपादयति **अयमाशय इति** । सामान्यादौ सामान्याद्यनङ्गीकारः किं साधकाभावनिबन्धनः किं वा बाधकसद्भावनिबन्धन इति विकल्पद्वयं मनसि निधायाद्यमनूद्य दूषयति **न तावदिति** । बाधकमपि न सद्गोत्वमित्यादिप्रत्यक्षं वाऽभिमतमनुमानं वेति विकल्पद्वयं मनसि निधायाद्यं दूषयति **न चेति** । आदिपदेन न चतुर्विंशतिगुणा न रूपाद्रसः पृथगित्यादिप्रत्यक्षपरिग्रहः । योग्यानुपलम्भबाधेन तादृशप्रत्यक्षासिद्धेर्न तद्बाधकमिति भावः । द्वितीयमाशङ्कते **गोत्वमिति** । **दृष्टान्तयोरिति** । विशेषस्य सत्ताशून्यतायाः क्रियायाश्च गुणशून्यतायाः प्रतिवादिनो ममासिद्धेरिति भावः । आद्यप्रयोगेऽप्रयोजकत्वपरिहारमाशङ्कते **यदीति** । **सत्तायामपि स्यादिति** । अविशेषादिति भावः । इष्टापत्तिं परिहरति **तथा चेति** । **सत्तान्तरत्वेति** । तथा च नात्माश्रयत्वमिति भावः । अङ्गीकृत्य चैतदुक्तम् । वस्तुतस्तु तत्सत्तावत्त्वापादनेऽपि नानुपपत्तिरित्यभिप्रेत्यात्माश्रयत्वस्यादोषतां विपक्षे बाधकदर्शनेन उपपादयति **किञ्चेति** । **स्ववृत्तिरिति** । प्रमेयत्वादेः स्ववृत्तिप्रसङ्गे तदाक्षेपोऽयं प्रमेयत्वादीनां स्ववृत्तिः कथमिष्टेति चेदिति । आश्रयाश्रयिभावस्य भेदव्याप्तत्वान्न स्ववृत्तिः सम्भवतीति भावः । उत्तरमाह **यथेति** । यथाऽन्यत्र स्वभिन्ने घटादौ प्रमेयत्वस्य वृत्तिरिष्यते तथा स्वस्मिन्नपि वृत्तिर्गृह्यतां स्वीक्रियतामित्यर्थः । तत्र वृत्तिप्रयोजकस्य भेदस्य सत्त्वादुपपद्यते वृत्तिः, अत्र तु न तथेत्याशङ्क्याह **प्रमाणमिति** । उपलक्षणमेतत् । अवृत्तौ प्रमाणाभाव एव शरणमित्यपि द्रष्टव्यम् । यतः प्रमाणमेव वृत्तौ शरणं न भेदो यतश्च प्रमाणाभाव एवावृत्तौ शरणं नाभेद इति । ततश्च वृत्तौ प्रमाणस्यैव नियामकत्वेन भेदस्यानियामकत्वादभेदेऽपि प्रमाणबलात् स्ववृत्तिरुपपन्नेति भावः । द्वितीयानुमानेऽप्यप्रयोजकत्वमाशङ्क्य परिहरति **गुणानामपीत्यादिना** । एवं सामान्यादौ सामान्याद्यनभ्युपगमस्यान्यनिमित्ततां परिहृत्य अनवस्थानिमित्ततां निगमयति **तस्मादिति** ।

सामान्ये सामान्यानङ्गीकारस्यानवस्थामूलकत्वमुदयनसम्मतं चेत्यभिप्रेत्य तद्वाक्यमुदाहरति **यथा-ऽऽहेति** । अस्यार्थः । अनेकासु व्यक्तिषु सङ्गतिग्रहणस्यानन्त्यव्यभिचाराभ्यामशक्यत्वात् तदर्थमनुवृत्तप्रत्यय-निर्वाहाय च जातिरङ्गीकरणीया । व्यक्तिभेदाभावे तु स्वरूपेणैव निर्वाहाद्व्यर्था जातिरिति व्यत्त्यभेदो जातिबाधकः । तुल्यत्वं नाम जात्याश्रयव्यक्तीनामन्यूनानधिकत्वम् । अयं भावः । घटादिष्वेकयैव जात्या सङ्गतिग्रहणाद्युपपत्तौ परापरभावानापन्नतावन्मात्रव्यक्तिवृत्तिकरीरत्वादिरूपद्वितीयजात्यङ्गीकारो निष्प्रामाणिक इति तुल्यत्वं जात्यन्तरसद्भावे बाधकम् । परस्परपरिहारेणैव वर्तमानयोर्जात्योरेकत्र समावेशः सङ्करः । स च जाति-बाधकः । अन्यथा गोत्वाश्वत्वयोरप्येकत्र समावेशसम्भावनया गौस्तिष्ठतीत्युक्ते तत्राश्वत्वस्यापि शङ्कितत्वा-न्नाश्व इति निश्चयाभावेन क्वापि प्रवृत्तिनिवृत्ती न स्यातामिति । तथाऽनवस्थितिरपि सामान्यनिष्ठजातेर्बाधिका । तथा हि । अनुवृत्तप्रत्ययनिर्वाहाय व्यक्ताविव जातावपि यदि जातिः कल्प्येत तदा कल्पितायामपि जातौ तन्निर्वाहाय जातिरङ्गीकरणीयेत्यनन्तजातिकल्पनायामनवस्था । तथा विशेषेषु जातिसद्भावे समानधर्माक्रान्तत्वेन कदाचित्संशयहेतुत्वस्यापि सम्भवादत्यन्तव्यावृत्तिबुद्धिजनकत्वाभावेन विशेषरूपताव्याघातो बाधकः । समवाये सामान्याभ्युपगमे व्यक्तेरभेदस्तावदेको बाधकः । सम्बन्धाभावश्चापरः । समवायतन्निष्ठजातिरूपसम्बन्धिनो-रद्रव्यत्वेन संयोगाभावात् समवाय एव हि तत्र सम्बन्धो वाच्यः । तत्र जात्याश्रयत्वेनाभिमतसमवायव्यतिरिक्त-समवायान्तरानङ्गीकारे स्वात्मनि वृत्तिः प्रसज्येत । तदङ्गीकारे तु तत्रापि समवायनिष्ठजात्या वर्तितव्यमेव । अवृत्तौ सकलसमवायावृत्त्या जातिरूपताव्याघातात् । तथा चान्योन्याश्रयत्वमिति समवाये सामान्यस्य सम्बन्धाभावो जातिबाधक इति ।

वा०र०— कुसुमाञ्जलिं व्याख्याति **प्रमेयत्वादेः स्ववृत्तिप्रसङ्गे तदाक्षेपोऽयमित्यादिना** । **तद्वाक्यमुदाहरतीति** । किरणावलीवाक्यमित्यर्थः । वर्धमानाद्यनुसारेण व्याख्याति **अयमर्थमित्यादिना जातिबाधक इतीत्यन्तेन** ।

स०व्र०— **उक्तं चेति** । यथा अन्यवृत्तिस्तथा स्वस्मिन्नपि वृत्तिरिष्टेति चेत् तर्हि कथं गृह्यताम्, न कथमपि । आत्माश्रयस्य ज्ञप्तिप्रतिबन्धकस्य सत्त्वादित्याशयः । प्रामाणिकेऽर्थे बीजाङ्कुरपरम्परावत् अप्रतिबन्धकत्वान्नोक्तदोष इति परिहरति **प्रमाणमिति** ।

विट्ठल०— सामान्यादेः सामान्यादिकमनवस्थाभयादेव नाङ्गीकृतमिति कुतः निमित्तान्तरणेति किं न स्यादित्याशङ्कां परिहरन्नत्रानवस्थाया दूषणत्वमुपपादयति **अयमाशय इति** । यतः प्रमेयत्वादेर्व्यावृत्तिरित्यत्र यस्मात्प्रमेयत्वादेरित्यर्थः । **तस्यैव विपक्षत्वादिति** । तस्य प्रमेयत्वादेरेव प्रमेयत्वरूपसाध्यरहितस्थलत्वा-दित्यर्थः । किञ्चेत्यादिनोक्तार्थे परसम्मतिमाह **उक्तं चेति** । स्ववृत्तिः प्रमेयादौ प्रमेयत्वादिकमस्तीति स्वाधारता कथमिष्टाभिमता कथं सिद्ध्यति । आश्रयाश्रयिभावस्य भेदव्याप्तत्वेन स्वस्मिन् स्ववृत्तेरात्माश्रयग्रस्तत्वेनायुक्त-त्वादिति चेन्नेति शेषः । कुत इत्यत आह **यथान्यत्रेति** । स्वस्मादन्यत्रात्यन्तभिन्ने यथा स्वस्य वृत्तिस्तथा

स्वस्मिन्नपि तपीति गृह्यताम् । ननु भेद एव वृत्तिप्रयोजकाभेदाश्रयाश्रयिभावप्रतिबन्धक इत्यत आह **प्रमाणमिति** । वृत्तावाश्रयाश्रयिभावे प्रमाणमेव कारणं नियामकः यतः अतो भिन्नत्वमभिन्नत्वं चाकिञ्चित्करमित्यर्थः । अनुरुद्धेत्यस्यानुसृत्येत्यर्थः । सामान्ये सामान्याङ्गीकारे अनवस्थेत्यत्राप्युदयनसम्मतिमाह **यथाऽऽहेति** । व्यक्तेरभेदे जातिबाधक अत आकाशत्वं न जातिः अनेकानुगतत्वरूपलक्षणाभावात् । आनन्त्यव्यभिचाराभ्यां सङ्गतिव्यास्यादेर्गृहीतुं संशयत्वात् तदर्थं जातिमङ्गीकार्येत्यनेकानुगतत्वमेव लक्षणमिति । तुल्यत्वं नाम जात्याश्रयव्यक्तीनामन्यूनानधिकत्वम् । अतो घटत्वापेक्षया करीरत्वं स्पष्टकूजातित्वं एकयैव घटत्वं जात्या सङ्गतिग्रहणाद्युपपत्तौ तु जात्यान्तरवैय्यर्थ्यात् तुल्यत्वं जात्यन्तरबाधकपरस्परपरिहारेण वर्तमानयोर्जात्योरेकत्र समावेशः सङ्करः यथोद्भूतत्वं विना रूपत्वमनुद्भूतरूपे रूपत्वं विनोद्भूतत्वं उद्भूतस्पर्शे तयोस्तत्तादयःपिण्डाग्नौ समावेशः । अतो नोद्भूतरूपत्वं जातिः अन्यथारूपाप्रतीतौ नियमेनोद्भूतता अप्रतीतिप्रसङ्गादिति । जातां जात्यन्तराङ्गीकारे अवस्थाबाधिकाविशेषे जात्यङ्गीकारे समानजात्याक्रान्ततया संशयादिहेतुत्वप्रसक्त्या अत्यन्तव्यावृत्तकत्वरूपविशेषस्थरूपहानिः समवाये जात्यङ्गीकारे सम्बन्धाभावो बाधकः अद्रव्यत्वेन संयोगायोगात् । नापि समवायः । समवाये समवायस्यात्माश्रयदुष्टत्वात् । समवायान्तराङ्गीकारे तत्रापि जातेः स्वीकार्यत्वेनानवस्थाप्रसङ्गात् । अतः सम्बन्धाभावो जातिबाधक इति ।

चषक— अभिहितार्थे उदयनवचनं प्रमाणयति **यथाऽऽहेति** । स्वाश्रयव्यक्तैरैक्यादाकाशत्वं, घटत्वेन समनैयत्या करीरत्वादिकं, उद्भूतत्वं रूपत्वेन तदनधिकरणवृत्तित्वावच्छिन्नतत्सामानाधिकरण्यरूपसाङ्कर्यात् । जातौ जातित्वादिकमनवस्थातः, विशेषाणामत्यन्तव्यावर्तकत्वरूपलक्षणहान्यापत्त्या विशेषत्वम्, अभावत्वमसम्बन्धान्न जातिरिति तदर्थोऽवधेयः । **कथञ्चिदिति** । जात्यादिरूपविशेषणज्ञानत्वावच्छेदेन स्वगतजात्याद्यन्तरविशिष्टविषयकत्वानुपगमेन जात्यादिरूपविशेषणज्ञानत्वसामानाधिकरण्येन निर्विकल्पकत्वोपगत्यापि सामअस्यान्नागृहीतविशेषणाविशेष्ये बुद्धिरुदेतीति न्यायस्य सविकल्पकपरत्वादित्याशयः ।

* * *

॥ अथ स्पष्टीकृतोक्तार्थतात्पर्यम् ॥

१७५ सु०— न चानवच्छिन्ना सामान्यपरम्परा गुणपरम्परा चोत्पत्तिज्ञप्तिप्रतिबन्धे हेतुः । तथा च यथा सा दूषणं तथा प्रकृताऽपि दूषणमेव । न चेत्साऽपि न स्यात् । इति सामान्यादेरपि सामान्याद्यङ्गीकार्यं स्यात् ।

यदि कथञ्चिज्ज्ञप्तिप्रतिबन्धकत्वं तत्र व्युत्पाद्येत, तर्हि वयमप्यत्र तद् व्युत्पादयिष्याम इति ।

परि०— नन्वस्त्वेवमनवस्थाभयाज्जात्यादौ जात्यन्तराद्यनङ्गीकारः, तावता धर्मसन्तानानवस्थोत्पत्त्याद्यप्रतिबन्धकत्वान्न दोष इत्यस्य किमुत्तरमनेन प्राप्तमित्यत आह **न चानवच्छिन्नेति** । अपर्यवसितेत्यर्थः । **प्रकृताऽपीति** । धर्मस्य धर्मसन्तानरूपेत्यर्थः । **न चेदिति** । प्रकृतदूषणं न चेत् सामान्याद्यनवस्थापि दूषणं न स्यादिति हेतोरित्यर्थः । **यदि कथञ्चिदिति** । सामान्यादौ तन्निष्ठोत्तरोत्तरसामान्याद्यन्तरज्ञानं विना पूर्वपूर्वसामान्यादिज्ञानं नोत्पत्तुमर्हति । 'नागृहीतविशेषणा विशेष्ये धीरि'ति न्यायादिति व्युत्पादनमस्माकमपि समानमित्यर्थः ।

यादु०— **यदि कथञ्चिदिति** । इयं जातिरियं जातिरित्यनुवृत्तप्रत्ययनिर्वाहाय यदि जातिषु जातिः कल्प्येत तर्हि तासु कल्पितायामपि जातावनुवृत्तप्रत्ययनिर्वाहाय जात्यन्तरमङ्गीकरणीयम् । एवं तत्र तत्रेत्यनन्ता जातयः कल्पनीयाः स्युर्न चेदं सम्भवति । ततश्च 'नागृहीतविशेषणविशेष्ये बुद्धिरुदेती'ति न्यायेन पूर्वपूर्वजातिविषयविशिष्टबुद्ध्यनुपपत्ताविय जातिरिति प्रत्ययस्याप्यनुपपत्तिरिति जात्यनवस्थायां ज्ञप्तिप्रतिबन्धकत्वम् । तथा गुणाश्चतुर्विंशतिरित्यादिप्रत्ययनिर्वाहाय यदि गुणेषु गुणाः कल्प्यन्ते तर्हि कल्पितेषु गुणेष्वपि सङ्ख्यादिप्रत्ययनिर्वाहायान्ये गुणाः कल्पनीयाः । एवं तत्र तत्रेत्यनन्ता गुणाः कल्पनीयाः स्युः । न चेदं सम्भवति । ततश्च नागृहीतविशेषणान्यायेन पूर्वपूर्वसङ्ख्यादिविषयविशिष्टबुद्ध्यनुपपत्तौ चतुर्विंशतिगुणा इत्यादिप्रत्ययस्याप्यनुपपत्तिरिति गुणानवस्थायामपि ज्ञप्तिप्रतिबन्धकत्वं यदि व्युत्पाद्येतेत्यर्थः । स्यादियं जातिगुणविशिष्टबुद्ध्यनुपपत्तिर्यदि जात्यादिरूपविशेषणज्ञानस्यापि स्वगतजात्याद्यन्तरविशिष्टविषयकतानियमः स्यात् । न चैवम् । क्वचिज्जात्यादिरूपविशेषणज्ञानस्य निर्विकल्पकत्वेऽपि क्षत्यभावात् । नागृहीतविशेषणान्यायस्य सविकल्पकबुद्धिपरत्वादित्याशयेनोक्तं **कथञ्चिदिति** । **तर्हि वयमपीति** । यद्यस्तित्वमस्तीत्यादिप्रत्ययनिर्वाहाय अस्तित्वादावप्यस्तित्वादिकं कल्पते तर्हि कल्पितेष्वप्यस्तित्वादिषु तन्निर्वाहायास्तित्वाद्यन्तरं कल्पनीयम् । एवं तत्र तत्रेत्यनन्ता धर्माः कल्पनीयाः स्युः । न च तथा सम्भवति । ततश्च नागृहीतविशेषणान्यायेन पूर्वपूर्वास्तित्वादिविषयविशिष्टबुद्ध्यनुपपत्तौ अस्तित्वमस्तीत्यादिबुद्धेरप्यनुपपत्तिरिति तत् कथञ्चिज्ज्ञप्तिप्रतिबन्धकत्वं व्युत्पादयिष्याम इत्यर्थः ।

कं०रा०— **अनवच्छिन्नेति** । अपर्यवसितेत्यर्थः ।

श्रीनिधि०— **यदि कथञ्चिदिति** । सत्तायामपि सत्ताङ्गीकारे सत्त्वेन ज्ञाततया एव तस्यास्तस्यास्तत्तद्विशेषणत्वं ज्ञातुं शक्यं नान्यथेति पूर्वपूर्वविशिष्टज्ञानम् उत्तरोत्तरविशेषणज्ञानसाध्यमिति अपर्यवसितपरम्पराङ्गीकारे ज्ञप्तिप्रतिबन्धः । एवं गुणेऽपि पृथक्त्वादिगुणाङ्गीकारे तस्य तस्यापि पृथक्त्वादिना ज्ञातस्यैव विशेषणत्वं ज्ञातुं शक्यमिति नान्यथेति पूर्ववज्ज्ञप्तिप्रतिबन्धो द्रष्टव्यः । **तर्हि वयमपीति** । अस्तित्वादिकमप्यस्तित्वादिना ज्ञातमेव तस्य तस्य विशेषणतया ज्ञातुं शक्यं नान्यथेति पूर्ववदेव ज्ञप्तिप्रतिबन्धः । एवं सदित्यादि प्रतीतौ सत्तादौ सत्तान्तरप्रतीतिपूर्वकत्वस्यानुभवविरुद्धत्वात् कथञ्चिदित्युक्तम् ।

शे०वा०— तथा चेति । उत्पत्त्याद्यप्रतिबन्धकत्वेऽपीत्यर्थः । **सेति** । अनवच्छिन्नसामान्यपरम्परेत्यर्थः । **तथा प्रकृताऽपीति** । उत्पत्त्याद्यप्रतिबन्धकत्वेऽपि धर्मानवस्थाऽपि दूषणमेवेत्यर्थः । **न चेदिति** । उत्पत्त्याद्यप्रतिबन्धकत्वाद्धर्मानवस्थाया अदूषणत्वे तत एवानवच्छिन्नसामान्यपरम्पराया अपि दूषणत्वं न स्यात् इत्यर्थः । इष्टापत्तिं परिहरति **इतीति** ।

यदि कथञ्चिदिति । जातिरियं जातिरियमित्यनुवृत्तप्रत्ययनिर्वाहाय जातिषु यदि जातिः कल्प्येत तर्हि कल्पितायामपि जातावियं जातिरित्यनुवृत्तप्रत्ययनिर्वाहाय जातिरङ्गीकरणीयेत्यनन्ता जातयः कल्पनीयाः स्युः । ततश्च 'नागृहीतविशेषणा विशेष्ये बुद्धिरुदेती'ति न्यायेन तत्तज्जातिविषयविशिष्टबुद्ध्यनुपपत्तौ इयं जातिरिति ज्ञानं न स्यादिति जात्यनवस्थाया ज्ञप्तिप्रतिबन्धकत्वम् । तथा गुणास्तु चतुर्विंशतिरित्यादिप्रत्ययनिर्वाहाय गुणेषु गुणाः कल्प्यन्ते तर्हि कल्पितेषु गुणेष्वपि सङ्ख्यादिप्रत्ययनिर्वाहायान्ये गुणाः कल्पनीयाः । एवं तत्र तत्रेत्यनन्तगुणाः कल्पनीयाः स्युः । ततश्च नागृहीतविशेषणान्यायेन तत्तत्सङ्ख्यादिविषयविशिष्टबुद्ध्यनुपपत्तौ चतुर्विंशतिगुणा इति प्रत्ययस्याप्यनुपपत्तिरिति गुणानवस्थाया ज्ञप्तिप्रतिबन्धकत्वं यदि व्युत्पाद्येतेत्यर्थः । स्यादियं जातिगुणविशिष्टबुद्ध्यनुपपत्तिर्यदि जात्यादिरूपविशेषणज्ञानस्य स्वगतजात्याद्यन्तरविशिष्टविषयकतानियमः स्यात् । न चैवम् । क्वचिज्जात्यादिरूपविशेषणज्ञानस्य निर्विकल्पकत्वेऽपि क्षत्यभावात् । नागृहीत--विशेषणान्यायस्य सविकल्पकबुद्धिविषयत्वादित्याशयेनोक्तं **कथञ्चिदिति** । **तर्हीति** । यद्यस्तित्वमस्तीत्यादिप्रत्ययनिर्वाहायास्तित्वादावप्यस्तित्वादिकं कल्प्येत तर्हि कल्पितेष्वस्तित्वादिषु तन्निर्वाहायास्तित्वाद्यन्तरं कल्पनीयम् । एवं तत्र तत्रेत्यनन्तधर्माः कल्पनीयाः स्युः । ततश्च नागृहीतविशेषणान्यायेन तत्तदस्तित्वादिविषयकविशिष्टबुद्ध्यनुपपत्तावस्तित्वमस्तीत्यादिबुद्धेरप्यनुपपत्तिरिति धर्मानवस्थाया अपि ज्ञप्तिप्रतिबन्धकत्वं व्युत्पादयिष्याम इत्यर्थः । इतीत्यस्येत्ययमिति पूर्वेणान्वयः ।

वा०र०— जातिरियं जातिरियमित्यनुवृत्तीति । एतस्य तत्र चेदनवस्थितिरिति उत्तरानुव्याख्यान-मूलयोः स्पष्टं स्यादियं जातीति ।

विट्ठल०— नन्वस्त्वेवमनवस्थाभिया सामान्ये सामान्यानङ्गीकारो गुणे च गुणानङ्गीकारः तथापि धर्मस्यानवधिकधर्मसन्तानाभ्युपगमे कथं दोषत्वं उत्पत्त्याद्यप्रतिबन्धकस्योक्तत्वादित्यत आह **न चेति** । अनवच्छिन्नेत्यस्यानवधिकेत्यर्थः । तथा च सामान्यादौ सामान्याद्यङ्गीकारोऽप्यदोषः स्यादविशेषादिति भावः । तत्र सामान्यादौ सामान्याद्यन्तरस्य परम्पराकल्पकप्रामाणिकत्वाद्दोषत्वमिति चेत्तर्हि द्रव्यास्तित्वादावस्तित्वादेरप्यप्रामाणिकत्वाद्दूषणत्वमेवेति समानम् । धर्मेऽपि धर्माणां प्रामाणिकत्वाभ्युपगमेनादूषणत्वे सामान्यादेरपि सामान्याद्यङ्गीकारः स्यादित्याह **तथा चेति** । ननु सामान्ये सामान्याद्यङ्गीकर्तुमुचितम्, ज्ञप्तिप्रतिबन्धकत्वात् । तथाहि । इयं जातिरियं जातिरित्यनुवृत्तप्रत्ययानिर्वाहाय जातौ यदि जातिः कल्प्यते तर्हि कल्प्यमानजातावप्यनुवृत्तप्रत्ययनिर्वाहाय जात्यन्तरमित्येवमनन्ता जातयः कल्पनीयाः । तथा चापर्यवसानेन बुद्ध्यनारोहा-

न्नागृहीतविशेषा बुद्धिर्विशेष्ये जायत इति न्यायेन कुत्रापि जातिविशिष्टधीजननायोगाद्घटो नित्याद्यनुवृत्तप्रत्ययो न स्यात् । अतो जात्यनवस्थाः ज्ञप्तिप्रतिबन्धकत्वम् । तथा गुणाश्चतुर्विंशतिरित्यादि व्यवहारनिर्वाहाय गुणेषु गुणकल्पने तेष्वपि गुणेषु सङ्ख्यादिप्रत्ययनिर्वाहाय गुणान्तरकल्पनमित्यपर्यवसानान्न गृहीतविशेषणा-न्यायेन कुत्रापि सङ्ख्यादिविशिष्टधीजननानुपपत्तेर्गुणानवस्थाया अपि ज्ञप्तिप्रतिबन्धकत्वं, तस्मान्न सामान्यादौ सामान्या-द्यङ्गीकर्तुमुचितमित्याशयेन शङ्कते **यदि कथञ्चिदिति** । अत्र क्वचिज्जात्यादिरूपविशेषणज्ञानस्य निर्विकल्पकत्वे विशिष्टप्रत्ययाभावेन नागृहीतविशेषणेति न्यायानवकाशादज्ञप्तिप्रतिबन्धकत्वाभावाभिप्रायेण कथञ्चिदित्युक्तं **तर्हि वयमपीति** । यद्यस्तित्वमस्तीत्यादिव्यवहारः अस्तित्वादावस्तित्वे कल्पे तत्तदा कल्पितेष्वप्यत्वादिषु तथैवास्तित्वाद्यन्तरं कल्पनीयमित्यपर्यवसानान्नागृहीतविशेषणबुद्धिविशेष्य उदेतीति न्यायेन कुत्राप्यस्तित्वविशिष्टविषयबुद्ध्यनुत्पत्तेरस्ति घट इत्यादि बुद्धेरनुदय एवेति ज्ञप्तिप्रतिबन्धकत्वं व्युत्पादयिष्याम इत्यर्थः ।

॥ इति स्पष्टीकृतोक्तार्थतात्पर्यम् ॥
॥ इति उक्तार्थस्पष्टीकरणम् ॥
॥ इति तस्याः अनवस्थायाः दूषणत्वपरा अनुव्याख्यानस्य पदार्थयोजना ॥

* * *

॥ अथ तत्रान्ते त'द्विपक्षे बाधकोपदर्शन'स्य अप्रसक्तत्वशङ्का तन्निरसनं च ॥
॥ अथ च तत्रादौ तस्याः अप्रसक्तत्वशङ्कायाः प्रदर्शनपूर्वकं अविशेष(साम्य)रूपहेतुबलेन तन्निरासकतया अनुव्याख्यानपदार्थयोजना ॥

१७६ **सु०— यदि कश्चिद्ब्रूयात्याद् ब्रूयात् 'अस्त्येव सामान्यस्यापि सामान्यं गुणस्यापि गुणो निर्बाधप्रतीतिसिद्धत्वात्, उत्पत्तिज्ञस्यप्रतिबन्धहेतोरनवस्थाया दोषत्वायोगात्, अतो नैतन्न्यायेन धर्मपरम्परा अनवस्थाभयान्निवारणीये'ति; तत्राह स चेति ।**

अनु०— स च यदि नानवस्था क्वचिद्भवेत् ।

स च गुणस्यापि गुणः । **च**शब्दात्सामान्यस्यापि सामान्यं, **यदि** अङ्गीक्रियते, तदा ब्रूमो **नानवस्था क्वचिद्भवेदिति** ।

परि०— अतो नैतन्न्यायेनेति । सामान्यादिपरम्परा यथाऽनवस्थाभयान्निवार्यते तथास्ति-त्वादिधर्मपरम्पराऽपि निवारणीयेति न (च) वाच्यमित्यर्थः ।

शे०वा०— ननु स चेत्युत्तरवाक्यवैयर्थ्यम् । न च सामान्यादेः सामान्यादिमत्त्वानिरासाय तत्पक्षे बाधकोपदर्शकत्वान्न तदिति वाच्यम् । अपसिद्धान्तप्रसङ्गेन साधकाभावेन सामान्याद्यनवस्थाग्रस्ततया च तस्याप्रसक्तत्वेनानिरसनीयत्वादित्यतः प्रसञ्जकोपदर्शनेन सामान्यादेरपि सामान्यादिमत्ताप्रसक्तिमुपदर्शयति **यदीति** । अनन्वयदोषपरिहाराय यदीत्यादिश्रवणाल्लब्धं शेषमाह **तदेति** ।

वा०र०— **तस्याप्रसक्तत्वेनेति** । सामान्यादिमत्वनिरासायेत्यतो बुद्ध्या विवेकेन सामान्यादिमत्वस्येतस्येत्यनेन परामर्शः । तस्येत्यनन्तरमनाशङ्कनीयतया प्रसञ्जकान्तराभावेनाप्रसक्तत्वेनेति योज्यम् । **प्रसक्तिमिति** । वैय्यात्येनाशङ्कोपपत्त्या प्रसक्तिरित्युपदर्शयतीत्यर्थः ।

चषक— **वैयात्यात्** धौत्यात् । **व्यवहारान्यथानुपपत्त्या विशेषसमर्थनम् ॥**

॥ इति तस्याः अप्रसक्तत्वशङ्कायाः प्रदर्शनपूर्वकं अविशेष(साम्य)रूपहेतुबलेन तन्निरासकतया अनुव्याख्यानपदार्थयोजना ॥

* * *

॥ अथ उक्तार्थस्य तात्पर्यम् ॥

॥ अथ तत्रादौ तच्छङ्कानिरसने अविशेष(साम्य)रूपहेतूपयोगः ॥

१७७ सु०— अयमाशयः । एवं वदन् क्वचिदनवस्थादूषणमङ्गीकरोति न वेति वाच्यम् ॥ न चेत् दूषणान्तरमपि नाङ्गीकुर्यात्, अविशेषात् । तथा च कथायां नाधिकारी स्यात् ॥ नाद्यः, धर्मसामान्यगुणानवस्थाया अदूषणत्वे विमताया अपि दूषणत्वायोगात् । विशेषहेतोरभावात् ।

परि०— **धर्मसामान्यगुणानवस्थाया इति** । दूषणत्वेन त्वदङ्गीकृताया इत्यर्थः । धर्मानवस्थायाः सामान्यानवस्थायाः गुणानवस्थाया इत्यर्थः । **विमताया इति** । दूषणत्वेन त्वदङ्गीकृताया इत्यर्थः ।

यादु०— **क्वचिदिति** । परमाणोरवयवपरम्पराङ्गीकारस्थले इत्यर्थः ।

वं०प०— **न चेत्** प्रकृतानवस्थादूषणं न चेदित्यर्थः । **धर्मेति** । अस्मदुक्तधर्मानवस्था सामान्यानवस्था गुणानवस्था च । तस्या इति जात्येकवचनम् । **विमतायाः** त्वया दूषणत्वेनाङ्गीकृताया अप्यनवस्थायाः ।

कं०रा०— धर्मसामान्येति । धर्मानवस्थायाः सामान्यानवस्थायाः गुणावस्थायाश्चेत्यर्थः । **विमताया अपीति** । क्वचिद्दूषणत्वेन पराभ्युपगताया अनवस्थाया अपीत्यर्थः ।

श्रीनिधि०— विमतायान्तरापीति । यानवस्थापरेण दूषणमित्युच्यते तस्या इत्यर्थः ।

शे०वा०— नन्वनवस्थायाः क्वचिदप्यदूषणत्वमिष्टमेवेति नानवस्था क्वचिद्भवेदित्यापादनानुपपत्तिः । यत्र सामान्याद्यनवस्थाया अदोषत्वं तत्रानवस्थान्तरस्याप्यदोषत्वमिति विशेषव्याप्तेः दृष्टान्ताभावेनायोगादुत्पत्त्यादिप्रतिबन्धकत्वभावाभावाभ्यां विशेषेणाविशेषमूलकव्याप्तेरप्ययोगाद्व्याप्तिवैकल्यं चेत्यतस्तदुभयं परिहर्तुमाह **अयमिति** । नन्वनवस्थाया दूषणत्वानङ्गीकारेण दूषणान्तरस्यापि तत्त्वेनाङ्गीकारापादनमयुक्तम्, व्याप्तिवैकल्यादित्यतो विशेषव्याप्त्यभावेऽपि सामान्यव्याप्तिसद्भावान्नानुपपत्तिरित्याह **अविशेषादिति** । इष्टापत्तिं परिहरति **तथा चेति** । **धर्मेति** । धर्मानवस्थायाः सामान्यानवस्थाया गुणावस्थाया इति सम्बन्धः । अत्रापि विशेषव्याप्तौ दृष्टान्ताभावेन तदसम्भवाद्व्याप्तिवैकल्यमित्याशङ्क्य विशेषव्याप्त्यभावेऽपि सामान्यव्याप्तिसद्भावान्नानुपपत्तिरित्याह **विशेषेति** ।

वा०र०— प्राग्विशिष्टस्यावतारोऽभिहितः । अथ तत्तद्व्यावर्त्यशङ्कोत्थापनपूर्वकं योजयति **नन्वनवस्थाया दूषणत्व इत्यादिना** । **इतीति** । प्रत्येकमिति शेषः ।

विट्ठल०— धर्मसामान्यगुणानवस्थाया इत्यत्र धर्मानवस्थायां गुणानवस्थाया इत्यर्थः । विमताया इत्यस्य दूषणतया त्वदभ्युपगतानवस्थाया इत्यर्थः ।

॥ इति तच्छङ्कानिरसने अविशेष(साम्य)रूपहेतूपयोगः ॥

* * *

॥ अथ तत्रान्ते उक्ताविशेष(साम्य)रूपहेतोः असिद्धिशङ्का तन्निरसनं च ॥

१७८ सु०— नन्वपर्यवसितपरम्परामात्रसाम्येऽपि यत्रोत्पत्त्यादिप्रतिबन्धकत्वं तत्र दूषणत्वम्, यत्र तदभावस्तत्रादूषणत्वमिति चेत्; किमर्थमुत्पत्त्यादिप्रतिबन्धकत्वमनुसरणीयम् । अनवस्था हि तर्कविशेषः, तर्कश्चानिष्टप्रसञ्जनम्, उत्पत्त्यादिप्रतिबन्धश्च अनिष्टः प्रामाणिकपरित्यागरूपत्वात्, उत्पत्त्यादेः प्रामाणिकत्वात्; अतस्तदप्रतिबन्धे तर्कत्वायोगात् कथं दूषणत्वम् ॥ एवमेव दूषणत्वेऽतिप्रसङ्ग इति चेत्, किं प्रामाणिकपरित्याग एवानिष्ट उत अप्रामाणिकस्वीकारोऽपि । नाद्यः, नियामकाभावात् । द्वितीये,

कथं न प्रकृतानवस्था दूषणम्, अत्यन्तभिन्नधर्मपरम्पराया अप्यप्रामाणिकत्वात् । अथाप्रामाणिकस्वीकारो न दूषणम्, तर्हि प्रामाणिकपरित्यागोऽपि न (दूषणं) स्यादिति नानवस्था क्वचिद्दूषणं भवेत् ॥ अथानिष्टापत्तिहेतुरनवस्थादूषणं न पुनरनिष्टरूपेति चेन्न, 'अनिष्टरूपैवानवस्था दूषणम्, न त्वनिष्टापत्तिहेतुरि'त्यपि वक्तुं शक्यत्वेन क्वचिदङ्गीकृताऽप्यनवस्था न दूषणं भवेत् । तस्मात् प्रामाणिकपरित्यागाप्रामाणिकपरिग्रहरूपा वा तद्धेतुर्वाऽनवच्छिन्नपरम्पराऽनवस्थेति वाच्यम् । अत एव नातिप्रसङ्गः ।

तथा च धर्मपरम्पराया अप्यनवस्थात्वेनाभेद एवाङ्गीकार्यः ।

एवं चोक्तन्यायेन व्यवहारान्यथाऽनुपपत्त्या विशेषसिद्धिरिति ॥

परि०— किमर्थमिति प्रश्नोत्तरमाह **अनवस्था हीति** । **एवमेवेति** । अनिष्टापादनत्वाभावेऽपि दोषत्वे बीजाङ्कुराद्यनवस्थाया अपि दोषत्वप्रसङ्गादित्यर्थः । **कथं न प्रकृतेति** । धर्माद्यनवस्थेत्यर्थः । **अनिष्टापत्तिहेतुरिति** । उत्पत्तिज्ञप्तिप्रतिबन्धकानवस्थैवोत्पत्तिज्ञप्त्यभावरूपानिष्टस्यापादकत्वात् अनिष्टापत्तिहेतुर्नान्येति भावः । **क्वचिदङ्गीकृतापीति** । प्रामाण्यपरतस्त्वादावङ्गीकृतापीत्यर्थः । **अत एवेति** । त्रिविधानवस्थायाः दोषत्वं नान्यस्या इत्यङ्गीकारादेव बीजाङ्कुरानवस्थादेरपि दोषत्वरूपप्रागुक्तातिप्रसङ्गो नेत्यर्थः ॥ **व्यवहारान्यथानुपपत्तिरूपार्थापत्त्या विशेषसमर्थनम् ॥**

यादु०— **उत्पत्त्यादिप्रतिबन्धश्चेति** । तथा चोत्पत्त्यादिप्रतिबन्धप्रसञ्जनमेव योगेनात्रानवस्थारूपतर्कतया विवक्षितं अन्यथाऽनवस्था हि तर्कविशेष इत्युपक्रमविरोधादिति ज्ञेयम् । अत एवोक्तं पद्धतौ । 'मूलक्षयापरनामिका प्रकृतकार्यविलोपलक्षणाऽनवस्थे'ति । **एवमेवेति** । उत्पत्त्याद्यप्रतिबन्धेऽप्यपर्यवसितपरम्परासाम्यमात्रेण दूषणत्वे बीजाङ्कुरानवस्थाया अपि दूषणत्वं स्यादित्यतिप्रसङ्ग इत्यर्थः । ननु प्रामाणिकस्योत्पत्त्यादेः परित्यागे नानवस्थाशब्दो रूढ्या प्रवृत्तः, किन्तूत्पत्त्यादेरवस्थित्यभाव इति योगेनैव । तद्धेतुभूतापर्यवसितपरम्परायामेव तु रूढः । रूढार्थस्यैव ग्राह्यत्वात् प्रामाणिकपरित्यागरूपमूलक्षयरूपानिष्टहेतुभूतैवानवस्था दूषणम्, अत एवाहुः 'मूलक्षयकरीं प्राहुरनवस्थां हि दूषणमि'त्याशङ्कते **अथानिष्टापत्तीति** । **अनिष्टरूपैवेति** । रूढिसाम्यात् उदाहृतवचनस्य क्वाचित्काभिप्रायकत्वाच्चेति भावः । **न दूषणं भवेदिति** । घटादिकार्यानुत्पत्तिरूपमूलक्षयरूपानिष्टापत्तिहेतुत्वादिति भावः । **तस्मादिति** । अनिष्टरूपतायां विशेषाभावादित्यर्थः । अत्राप्युक्तरीत्या प्रामाणिकपरित्यागस्यानवस्थात्वं यौगिकमेवेति ज्ञातव्यम् । प्रामाणिकपरित्यागरूपाया रूढ्या अपर्यवसितपरम्पराया उदाहरणाभावेन क्वाप्यदर्शनात् । तद्धेतुर्वेत्यत्र तच्छब्देन प्रामाणिकपरित्यागमात्रपरामर्शः । अप्रामा-

णिकपरिग्रहहेतुरूपापर्यवसितपरम्पराया अपि क्काप्यदर्शनात् । ततश्च योगेन प्रामाणिकस्योत्पत्त्यादेः परित्याग-रूपैकाऽनवस्था । रूढ्या चाप्रामाणिकपरिग्रहरूपा प्रामाणिकपरित्यागहेतुरूपा चेति द्विविधेति त्रिविधैवा-नवस्थाऽत्रोक्तेति ज्ञातव्यम् । **उक्तन्यायेनेति** अस्तित्वादिधर्मेष्वपि अस्तित्वादिकमस्ति । अस्ति चेत् तत्रापि धर्मधर्म्यादिव्यवहारः । स चानुपपद्यमानो विशेषं गमयतीत्युक्तन्यायेनेत्यर्थः ।

वं०प०— अनुसरणीयतामाशङ्कते **अनवस्थेति** । **एवमेव** प्रामाणिकपरित्यागरूपत्वाभावेऽपीत्यर्थः । **अतिप्रसङ्ग इति** । शशविषाणपरित्यागस्यापि दूषणत्वं स्यादित्यर्थः । न स्यादित्यत्र दूषणमित्यनुवर्तते । **न पुनरिति** । तथा च धर्मसामान्यपरम्परा चानिष्टरूपेति न दूषणमिति हृदयम् । **अत एव** प्रामाणिक-परित्यागादिरूपत्वादेव । शशविषाणपरित्यागस्य तथात्वाभावादिति भावः । **व्यवहारेति** । भेदकार्यसामानाधि-करण्यव्यवहारेत्यर्थः ।

कं०रा०— न च पर्यवसितधर्मपरम्पराया अप्रामाणिकत्वेनानिष्टरूपत्वेऽप्यनिष्टापत्तिहेतुत्वाभावान्न दूषणत्वमनिष्टापत्तिहेतोरेवानवस्थाया दूषणत्वादनिष्टरूपायाश्चादूषणत्वादित्याशयेन शङ्कते **अथेति** । **अन्यथेति** । 'भेदो नाशे भवेत्तथे'त्यत्र नाशशब्देन यत्र सत्स्वेवावयवादिष्ववयव्यादीनामभाव इत्यभावमात्रस्यानुपलक्षण इत्यर्थः । नाशशब्देनाभावमात्रोपलक्षणे तु यत्रावयवावयव्यादीनां युगपद्विनाशः तत्र भेदाभेदकल्पकस्यावयवादिषु सत्स्वेवावयव्यादीनां नाशस्याभावेऽप्यवयवाद्युपपत्तेः प्रागवयवादिषु सत्त्वेनावयव्यादीनामभावस्य तत्कल्पकस्य सत्त्वाद्भेदाभेदावुक्तौ भवत इति भावः ।

श्रीनिधि०— अतिप्रसङ्गादिति । कर्मपरम्परानवस्थाया अपि दूषणत्वप्रसङ्गादित्यर्थः । **अनिष्टा-पत्तिहेतुरिति** । उत्पत्त्यादिप्रतिबन्धानिष्टः तत्प्राप्तिहेतुरित्यर्थः । तस्मात्प्रामाणिकपरित्यागप्रामाणिकपरिग्रहरूपा तद्धेतुर्वेति प्रामाणिकपरित्यागरूपानवस्था । यथा सत्तायाः स्वनिर्वाहकत्वं प्रामाणिकं तत्त्यागार्थं भिन्नापर्यवसिता सत्ता परम्पराङ्गीक्रियमाणा प्रामाणिकपरित्यागरूपा भवति । अप्रामाणिक..... । गुणाद्या इति आदिपदेन क्रियापि गृहीता प्रतीयेत । न च तथा युक्तम् । सद्गोत्वं चतुर्विंशतिगुणा इतिवत् गमनं चलतीति प्रत्यया-भावात् ।

शे०वा०— उत्पत्त्यादिप्रतिबन्धकत्वभावाभावाभ्यां विशेषादविशेषोऽसिद्ध इति भावेन शङ्कत **नन्विति** । भवेदेतदेवं यद्युत्पत्तिज्ञप्तिप्रतिबन्धकत्वं तद्दूषणत्वौपयिकं स्यात् । न चैतदस्ति । तर्कत्वसम्पा-दकतया चरितार्थस्योत्पत्त्यादिप्रतिबन्धकत्वस्य तद्दूषणत्वौपयिकत्वकल्पने मानाभावात् । ततश्च यत्रोत्प-त्त्यादिप्रतिबन्धस्तत्र तदप्रतिबन्धकत्वे तर्कत्वासिद्धेस्तत्सिद्ध्यर्थतयोत्पत्त्यादिप्रतिबन्धकत्वस्यानुसरणीयत्वेऽपि यत्र पुनस्तदप्रतिबन्धकत्वेऽपि प्रकारान्तरेणैव तर्कत्वनिर्वाहः तत्रोत्पत्त्यादिप्रतिबन्धकत्वस्याननुसरणीयत्वात् । धर्मानवस्थायाश्च प्रकारान्तरेण तत्सिद्धेर्नोत्पत्त्यादिप्रतिबन्धकत्वस्य तत्रानुसरणीयतेति नोत्पत्त्यादिप्रतिबन्ध-

कत्वतदप्रतिबन्धकत्वकृतोऽपि विशेषोऽनवस्थाद्वयस्येति न तदसिद्धिर्दोष इत्यभिप्रेत्योत्पत्त्यादिप्रतिबन्धकत्वस्य तर्कत्वसम्पादकतयाऽनुसरणीयतां परमुखेनैव वाचयितुं गूढाभिसन्धिस्तत्प्रयोजनं पृच्छति **किमर्थमिति** । आशयमविद्वान् शङ्कते **अनवस्था हीति** । अत्रानवस्थाशब्दस्तत्प्रसञ्जनोपलक्षणम् । अन्यथा तत्प्रसञ्जनस्यैव तर्कविशेषतयाऽनवस्थायास्तर्कविशेषत्वाभिधानानौचित्यादिति द्रष्टव्यम् । अपर्यवसितपरम्पराया अनिष्टत्वोपपादकत्वेनोत्पत्त्यादिप्रतिबन्धकत्वस्य तर्कत्वोपयोगित्वं वक्तुं तर्कस्वरूपज्ञाने तज्ज्ञानासम्भवात् तल्लक्षणमाह **तर्कश्चेति** । ततश्चानिष्टरूपानवस्थाप्रसञ्जनरूपत्वादनवस्थाप्रसङ्गस्य तर्कविशेषत्वमित्युक्तं भवति । ननु च कथमपर्यवसितपरम्परारूपाया अनवस्थाया अनिष्टत्वं येन तत्प्रसञ्जनस्यानिष्टप्रसञ्जनत्वात् तर्कविशेषत्वं स्यादित्यतः स्वतोऽनिष्टत्वाभावेऽपि तस्यास्तादृशानिष्टसम्पादकत्वात् तदिति भावेन तत्सम्पाद्यस्योत्पत्त्यादिप्रतिबन्धस्य स्वतोऽनिष्टतामाह **उत्पत्त्यादीति** । **एवमेवेति** । उत्पत्त्याद्यप्रतिबन्धेऽप्यपर्यवसितपरम्परासाम्यमात्रेण दूषणत्वे बीजाङ्कुरपरम्पराया अपि दूषणत्वं स्यादित्यतिप्रसङ्ग इत्यर्थः । एवं तर्ह्युत्पत्त्याद्यप्रतिबन्धकत्वेऽप्यप्रामाणिकस्वीकाररूपतया प्रकृतधर्मपरम्पराया अप्यनिष्टत्वेन तत्प्रसञ्जनस्य तर्कत्वाद्दूषणं भविष्यतीत्याशयेनाप्रामाणिकस्वीकारस्यानिष्टतां विकल्पमुखेनोपपादयति **किमित्यादिना** । प्रामाणिकपरित्याग एवानिष्ट इत्याद्येऽपि किं प्रामाणिकपरित्यागत्वमेवोक्तार्थनियामकं किंवाऽन्यत्किञ्चिदिति विकल्पद्वयं मनसि निधाय द्वितीयमसिद्ध्या दूषयति **नाद्यो नियामकाभावादिति** । अप्रामाणिकस्वीकारोऽपीति द्वितीयं दूषयति **द्वितीय इति** । आद्ये आद्यमाशङ्कते **अथेति** । अनिष्टताप्रयोजकीभूतप्रामाणिकपरित्यागतायास्तत्राभावादिति भावः । अत्र प्रामाणिकपरित्यागत्वमेवानिष्टताप्रयोजकमित्यर्थसिद्धौ तच्छून्यत्वादप्रामाणिकस्वीकारस्यानिष्टत्वाभावसिद्धिः तत्सिद्धौ च तत्सिद्धिरित्यन्योन्याश्रयप्रसङ्ग इति सत्येव दोषेऽतिप्रसङ्गरूपं दोषान्तरमाह **तर्हीति** । अप्रामाणिकस्वीकारत्वरूपानिष्टताप्रयोजकधर्मानाक्रान्तत्वादित्यर्थः । अनिष्टापत्तिहेतुत्वस्यैवानवस्थाया दूषणत्वे प्रयोजकत्वात् तद्वत्तयोत्पत्त्यादिप्रतिबन्धकानवस्थाया दूषणत्वेऽपि न प्रकृतानवस्थाया दूषणत्वम् । तस्या अप्रामाणिकस्वीकाररूपानिष्टरूपत्वेनानिष्टापत्तिहेतुत्वाभावादित्याशयेन शङ्कते **अथेति** । अनिष्टापत्तिहेतुत्वमेव दूषणतानियामकमित्यर्थसिद्धौ तच्छून्यत्वात् प्रकृतानवस्थाया अदूषणत्वसिद्धिः तत्सिद्धौ च तत्सिद्धिरिति स्फुटमत्रेतरेतराश्रयत्वमिति सत्येव दोषेऽतिप्रसङ्गेनैव दूषयति **नानिष्टरूपैवेत्यादिना** । अतिप्रसङ्गाभिधानेन सिद्धमर्थमुपसंहारव्याजेनाह **तस्मादिति** । प्रामाणिकपरित्याग एवानिष्टो न त्वप्रामाणिकस्वीकार इति अनिष्टापत्तिहेतुरेवानवस्थादोषो न त्वनिष्टरूपेति वा नियमस्य नियामकाभावेनासम्भवदुक्तिकत्वादित्यर्थः । तद्धेतुर्वेत्यत्र तच्छब्देन प्रामाणिकपरित्यागमात्रपरामर्शः । अप्रामाणिकपरिग्रहहेतुरूपापर्यवसितपरम्पराया अप्रसिद्धत्वेनोभयपरामर्शस्यायोगादिति द्रष्टव्यम् । **अत एवेति** । अपर्यवसितपरम्परामात्रस्यानवस्थात्वाभावादेवेत्यर्थः । **नातिप्रसङ्ग इति** । बीजाङ्कुरपरम्पराया अपि दूषणत्वं स्यादित्यप्रसङ्गो नेत्यर्थः । अपर्यवसितपरम्परामात्रस्य दूषणत्वाभ्युपगमे तत्प्रसक्तावपि तस्मादित्यादिनोक्तप्रकाराश्रयणे तदप्रसङ्गादिति भावः । **अभेद एवेति** । अत्यन्तभिन्नधर्मपरम्पराया अप्रामाणिकपरिग्रहरूपत्वेन दूषणतया भेदपक्षस्याश्रयितुमशक्यत्वादित्यर्थः । इतिशब्दस्य इत्ययमिति पूर्वेणान्वयः ।

वा०र०— तर्कत्वसम्पादकतयेति । अनिष्टप्रसञ्जनत्वरूपतर्कत्वसम्पादकतयेत्यर्थः । यद्यपि तर्कविशेषस्य तर्कत्वसम्पादने अस्योपयोगे तेनैव दूषणता च प्राप्ता भवत्येव । तथापि अनिष्टप्रसञ्जनत्वरूपतर्कत्वस्यानेकप्रकारनिर्बाधत्वेनोत्पत्त्यादिप्रतिबन्धकत्वस्य न तर्कमात्रदूषणता प्रयोजकत्वम् । विशेषप्रयोजकत्वेऽपि च न तदभावेन तर्कत्वमात्रानुपपत्तिर्युज्यत इति तात्पर्यम् । एवं चोत्पत्त्यादिप्रतिबन्धस्य प्रामाणिकपरित्यागरूपत्वेनानिष्टत्वे सम्पादिते तत्प्रसञ्जनरूपस्यानिष्टप्रसञ्जनत्वसम्पादनमिति भावः । **यत्रोत्पत्त्यादिप्रतिबन्ध इति** । तद्रूपानिष्टमित्यर्थः । **प्रकारान्तरेणैव** इत्यस्य अप्रामाणिकस्वीकाररूपत्वेनेत्यर्थः । **ननु तर्कत्वसम्पादकतयेति** । उत्पत्त्यादिप्रतिबन्धस्थलीयतर्कत्वेत्यर्थः । तत्र तदर्थमनुसरणीयत्वे उक्ते इतरत्र तदनावश्यकत्वं सुज्ञानमिति भावः ।

स०व्र०— एवमेवेति । उत्पत्त्यादिप्रतिबन्धकत्वाभावेऽपि अपर्यवसितपरम्परामात्रसाम्येनानवस्थाया दूषणत्वे बीजाङ्कुरपरम्पराया अपि दूषणत्वमित्यतिप्रसङ्ग इत्यर्थः । **अत एव नातिप्रसङ्ग इति** । प्रामाणिकपरित्यागाप्रामाणिकपरिग्रहरूपा वा तद्धेतुर्वाऽनवच्छिन्नपरम्परा इति यतोऽत एव बीजाङ्कुरपरम्पराया अपि दूषणत्वमित्यतिप्रसङ्गपरिहार इत्यर्थः ।

विष्टल०— अनुसरणीयमेवेति शङ्कते **अनवस्था हीति** । **एवमेवेति** । उत्पाद्याद्यप्रतिबन्धेऽपि दूषणत्वे बीजाङ्कुरानवस्थाया अपि दूषणत्वे स्यादित्यतिप्रसङ्ग इत्यर्थः । ननु यानवस्था अनिष्टान्तरप्राप्तिहेतुभूता सैवानवस्था दूषणं न त्वनिष्टान्तरं प्रत्यहेतुभूता अप्रामाणिका पर्यवसितपरम्परात्वेन स्वयमेवानिष्टरूपादूषणम् । तथा च धर्मसामान्यगुणानवस्थायाः स्वयमनिष्टरूपत्वेऽप्युत्पत्त्यादिप्रतिबन्धरूपनिष्टान्तराहेतुत्वान्न दूषणत्वमित्याशयेन शङ्कते **अथानिष्टापत्तिहेतुरिति** । **क्वचिदङ्गीकृतेति** । प्रामाण्यपरतस्त्वादौ दूषणत्वेन सम्मतापीत्यर्थः । **अत एवेति** । प्रामाणिकपरित्यागाप्रामाणिकस्वीकाररूपयोः प्रामाणिकपरित्यागहेतुभूताश्चेत्येवं त्रिविधानवस्थाया एव दूषणत्वाङ्गीकारादेव बीजाङ्कुरानवस्थायाद्यपि दूषणत्वमित्यतिप्रसङ्गो नेत्यर्थः ।

॥ इति उक्ताविशेष(साम्य)रूपहेतोः असिद्धिशङ्का तन्निरसनं च ॥
॥ इति उक्तार्थस्य तात्पर्यम् ॥
॥ इति त'द्विपक्षे बाधकोपदर्शन'स्य अप्रसक्तत्वशङ्का तन्निरसनं च ॥
॥ इति धर्मे धर्मानङ्गीकारे उक्तायाः अनवस्थायाः विपक्षे बाधकोपदर्शनमुखेन दूषणत्वम् ॥
॥ इति पदार्थषट्कानियमवादिनं नैयायिकं प्रत्यपि धर्मस्य धर्मसन्तानात् अनवस्थाप्रसङ्गेन, भेदनिराकरणस्यार्थवत्त्वम् ॥
॥ इति व्यवहारसिद्धानां तेषां धर्माणां वस्तुभिन्नत्वशङ्कायाः षट्पदार्थातिरेकापादनेन निराकरणम् ॥
॥ इति अभेदपक्षीयविशेषस्य व्यवहारान्यथानुपपत्तिसिद्धतायाश्चोपपादनम् ॥

* * *

॥ अथ अभेदस्याप्रामाणिकत्वमितिशङ्कानिरासे धर्मधर्मिणोर्भेदपक्षपरित्यागेनाभेदपक्षपरिग्रहे निमित्तान्तरम् ॥

१७९ **सु०—** 'अपि च यो धर्मधर्मिणोर्भेदं समवायं चाङ्गीकृत्याभेदं विशेषं चावजानाति तेनानवस्थातो बिभ्यता गुणसामान्ययोर्गुणसामान्यप्रतीतिरेवापलपनीया, विनैव बाधकेन भ्रान्तिर्वा वाच्या । प्रतीत्यपलापादितो वा बिभ्यतोऽनवस्था स्यादित्येकं सन्धित्सतोऽन्य(त्प्र)च्यवते । अभेदं विशेषं चाङ्गीकुर्वतां तु नेदं दूषणद्वयमतोऽपि तत्पक्षपातः' इत्याशयवानाह **अस्मत्पक्ष इति** ।

अनु०— अस्मत्पक्षे गुणाद्याश्च तद्वन्तो हि विशेषतः । अनन्यत्वान्नानवस्था

धर्मधर्मिणोः सविशेषाभेदवादिनां पक्ष इत्यर्थः । **गुणाद्या** गुणाः सामान्यानि **च** । **तद्वन्तो** गुणवन्तः सामान्यवन्ति च । तेन 'चतुर्विंशतिगुणाः', 'सद्गोत्वमि'त्यादिप्रतीतिविरोधो नास्तीति शेषः । **अनन्यत्वात्** धर्मधर्मिणोरिति शेषः । अप्रामाणिकापर्यवसितपरम्परारूपा ह्येषा । अनन्यत्वे कथं तद्वत्त्वमिति तदवस्थः प्रतीतिविरोध इत्यत उक्तं **विशेषतो हि तद्वन्त इति** । भेदसम्बन्धकार्यकारी हि विशेष इति ।

परि०— एकं सन्धित्सत इति । प्रतीतितदभ्रान्तित्वे सन्धातुमिच्छतः अन्यदनवस्थाराहित्यं प्रच्यवते । तत्सन्धित्सतः प्रतीत्यादिकं प्रच्यवतेऽपयातीत्यर्थः । मूलस्थानवस्थापदार्थमाह **अप्रामाणिकापर्यवसितपरम्परारूपेति** । धर्मपरम्परारूपेत्यर्थः ।

गु०दी०— गुणसामान्ययोः गुणसामान्यप्रतीतिः इत्यत्र गुणे गुणप्रतीतिः सामान्ये सामान्यप्रतीतिरित्यर्थः ।

वं०प०— प्रतीत्यपलापादित इत्यत्रादिपदेन विनैव बाधकेन भ्रान्तित्वकथनाच्च बिभ्यत इत्यर्थः । प्रतीत्यनुसारेण गुणसामान्यादौ गुणसामान्याद्यनुसरण इति यावत् । **एकमिति** । **अनवस्थाया** दूषणत्वाङ्गीकारे तद्वयेन प्रतीत्यपलापो दोषः स्यात् । प्रतीत्यपलापभयेन तदादरे चानवस्था स्यादित्यर्थः । द्वयं प्रतीत्यपलापानवस्थारूपम् । मूले नानवस्थेत्युक्तम् । कुतो नानवस्थेत्यत आह **अप्रामाणिकेति** । **एषा** अनवस्था ।

तथा च गुणादीनां तद्वत्त्वं प्रतीतिसिद्धमिति नाप्रामाणिकत्वं परम्परायाः । तेषां चानन्यत्वाङ्गीकारान्नापर्यवसितपरम्परेत्यर्थः ।

श्रीनिधि०— अत आदिपदगृहीतं दर्शयति **सामान्यानि चेति** । तर्हि गुणाद्य इत्येकवचनमेव स्यादित्यतः व्यक्तिबाहुल्याभिप्रायेण बहुवचनमित्याह **गुणाद्याः सामान्यानि चेति** । अनन्यत्वे कथं परिहार इत्यत आह **अप्रामाणिकेति** ।

शे०वा०— 'अस्मत्पक्षे गुणाद्या' इति स्वपक्षे प्रतीतिविरोधाद्यभाववर्णनस्य पूर्वेण सङ्गत्यभावादानर्थक्यम् । न च धर्मधर्मिणोर्भेदपक्षपरित्यागेनाभेदपक्षपरिग्रहे को हेतुरित्यतः तत्र हेतुकथनार्थत्वेन तेन सङ्गतिसम्भवान्नानर्थक्यमिति वाच्यम् । 'कल्पनागुरुतादोषादि'त्यादिनैव तत्र हेतुकथनेन तच्छङ्कायाः प्रागेव निरस्तत्वेन तादर्थ्यायोगादित्याशङ्क्य तत्र निमित्तान्तराभिधायकत्वान्नानर्थक्यमिति भावेन व्यवहितसङ्गतिप्रदर्शनपूर्वकं निमित्तान्तराभिधायकतया तद्योजयति **अपि चेति** ।

विठ्ठल०— एकं सन्धित्सतोरिति । धर्मधर्मिणोर्भेदसमवायाभ्युपगन्तुरनवस्थापरिहारेण स्वोक्तार्थं सन्धित्सन्तः गुणसामान्ययोर्गुणसामान्यप्रतीतिस्तस्याः प्रमात्वं प्रच्यते । प्रतीत्यादिकं सन्धित्सतोऽनवस्थाभयेनोक्तार्थश्च बत इत्यर्थः । मूलगतस्थानवस्थापदस्यार्थमाह **अप्रामाणिकेति** ।

॥ इति अभेदस्याप्रामाणिकत्वमितिशङ्कानिरासे धर्मधर्मिणोर्भेदपक्षपरित्यागेनाभेदपक्षपरिग्रहे निमित्तान्तरम् ॥
॥ इति अनुव्याख्यानोक्तार्थस्पष्टीकरणम् (अभेदस्याप्यप्रामाणिकत्वमितिशङ्कानिरासः) भागशः ॥
॥ इति अभेदपक्षाङ्गीकारे अवयवावयव्यादिभेदाप्रामाणिकत्वस्यापि कारणत्वम् भागशः ॥
॥ इति अवयवावयव्यादीनामभेदस्य निरूपणम् ॥

* * *

॥ अथ अभेदस्याप्रामाणिकत्वमितिशङ्कानिरासे अपवादकप्रमाणशून्यत्वेन प्रसक्तं यदभेदस्यात्यन्तिकत्वं तदपवादकत्वेन क्वचिद् भेदाभेददर्शनम् ॥

१८० **सु०—** एवमवयवावयव्यादीनामभेदोऽत्र निरूपितः । इदानीं 'क्वचिद्भेदाभेदावपि भवत' इति तदपवादमाह **भेद इति** ।

अनु०— भेदो नाशो भवेत्तथा ।

यद्वा यद्यवयव्यादयोऽवयवाद्यभिन्नाः, कथं तर्हि सत्स्वेवावयवादिषु विनश्यन्तीत्यत आह **भेद इति** ।

तथाशब्दः समुच्चये । अवयवादिषु सत्स्वेवावयव्यादीनां नाशे भेदः अभेदश्च भवेदित्यर्थः । अत्र नाश इत्युपलक्षणम् । यत्र सत्स्वेवावयवेष्ववयविनोऽभावः सति गुणिनि गुणस्याभावस्तत्र भेदाभेदावित्यादि द्रष्टव्यम् । अन्यथा यत्रावयवावयव्यादीनां युगपद्विनाशः तत्र भेदाभेदावुक्तौ न स्याताम् ।

परि०— क्वचिद्भेदाभेदावपीति । एतेन भेदो नाश इत्यत्र क्वचिदित्यनुवृत्तिं सूचयति । तथाशब्दः समुच्चय इत्युक्तं व्यनक्ति **भेदोऽभेदश्चेति** । **उपलक्षणमिति** । प्रागभावप्रध्वंससाधारण्येन अभावमात्रस्योपलक्षणमित्यर्थः । **इत्यादि द्रष्टव्यमिति** । यत्र सत्यप्याश्रये क्रियाभावः सत्यां व्यक्तौ जातेरभावः तत्र भेदाभेदाविति द्रष्टव्यमित्यर्थः । ननु नाशपदस्योपलक्षणत्वमुपेत्यावयविनोऽभावः गुणस्याभावः तत्र भेदाभेदाविति कुतो व्याख्येयम् । यत्रावयवेषु सत्सु अवयविनो नाशः गुणिनि सति गुणस्य नाश इत्येव कुतो न व्याख्यायत, इत्यत आह **अन्यथेति** । अभावोपलक्षणत्वानङ्गीकार इत्यर्थः । **उक्तौ न स्यातामिति** । युगपन्नाशस्थलेऽपि भेदाभेदयोर्वाच्यत्वात् नाशपदस्याभावपरत्वे पूर्वं तन्तुषु सत्स्वपि पटस्याभावाद्भेदाभेदौ तत्राप्युक्तौ स्याताम् । अत एवमाश्रयणीयमिति भावः ।

गु०दी०— यत्र अवयवावयव्यादीनां युगपद्विनाश इत्यत्र अवयवयैस्सह विनष्टेऽवयविनि प्रतियोगिसमानदेशप्रध्वंसायोगात् सत्यवयवावयवे अवयवनाशमात्रसम्भवेऽपि अवयविनो नाशायोगेन नष्टघटस्य भूतलेऽभाववदभावस्य वक्तव्यत्वादिति भावः ।

यादु०— उपलक्षणमिति । प्रागभावस्यापीति शेषः ।

वं०प०— तदिति । अभेदस्येत्यर्थः । **यद्वेति** । तथा च सत्यपि तस्मिन्नसत्त्वेन हेतुनाऽवयवावयव्यादीनां भेद एव साध्यत इत्यर्थः । **समुच्चये** अभेदस्य । उपलक्षणं कस्मात्कार्यमित्यत आह **अन्यथेति** । यत्र सति धर्मिणि धर्मस्य नाशस्तत्र भेद इत्येवोक्त इत्यर्थः । उपलक्षणं कृत्वा यत्र सत्स्ववयवेष्ववयविनोऽभाव इति सामान्येनैवोक्तौ यत्र युगपद्विनाशस्तत्राप्यवयव्युत्पत्तेः प्राक् सति धर्मिणि धर्मस्याभावः प्रागभावो वर्तत एवेति तत्सङ्गहोऽपि जात एवेति भावः ।

श्रीनिधि०— तथाशब्दः समुच्चय इति । अनुक्तस्याभेदस्य समुच्चय इत्यर्थः । **सत्स्वेवावयवेष्ववयविनोऽभाव इति** । अत्राभावः प्रागभावो द्रष्टव्यः । **भेदाभेदावित्यादि द्रष्टव्यमिति** । अत्रादिपदेन यत्र सत्येव क्रियावति क्रियाया अभावः सत्यामेव च व्यक्तौ जातेरभावः तेषां ग्रहणम् । ब्राह्मणादेरपि बहुकालं

च बालान्नोपभोगादिना च बालत्वोत्पत्तिर्दर्शनेन जातेरपि पूर्वं खण्डितत्वं द्रष्टव्यम् । उपलक्षणतया व्याख्यानं किमर्थमित्यतः विपक्षे बाधकमाह **अन्यथेति** । भेदाभेदावुक्तौ न स्यातामिति तत्रोत्तरखण्डितत्वभावात् भवितव्यं च तत्र भेदाभेदाभ्याम् । पूर्वं खण्डितत्वादन्यथा खण्डितत्वस्य भेदाभेदावच्छेदकत्वं न स्यादतिरिक्तवृत्तित्वादिति भावः ।

शे०वा०— निरूपित इति । 'अभेदेन प्रतीतिश्चे'त्यादिनेति शेषः । **तदपवादमिति** । यद्यप्ययं नाभेदापवादः । प्रागुक्तस्याभेदस्यात्रानिषेधात् । तथापि अपवादकप्रमाणशून्यत्वेन प्रसक्तं यदभेदस्यात्यन्तिकत्वं तदपवादत्वाभिप्रायेणेयमपवादत्वोक्तिरिति ध्येयम् । अत्र पक्षे भेदाभेदप्रतिपादनस्य प्रासङ्गिकत्वं भवतीत्यपरितोषात् पक्षान्तरमाह **यद्वेति** । अत्र नाश इत्यस्य नाशमात्रार्थप्रतीतिनिरासायाह **अत्रेति उपलक्षणमिति** । अभावस्येति शेषः । नाशशब्दस्य विशेषपरत्वे सम्भवति सति किमिति सामान्योपलक्षकत्वमित्यतो विशेषपरत्वे बाधकमाह **अन्यथेति** । **उक्तौ न स्यातामिति** । तत्र सत्स्वेवावयवादिष्ववयव्यादीनां नाशरूपस्य भेदाभेदप्रयोजकस्याभावादित्यर्थः । सामान्योपलक्षणत्वे च तत्राप्यवयवादिष्ववयव्यादिप्रागभावसद्भावेनोक्तप्रयोजकलाभाद्भेदाभेदाभिधानसिद्धिरिति भावः ।

वा०र०— अभावस्येतीति । *अभावसामान्यस्येत्यर्थः* । **सामान्योपलक्षणत्वे चेति** । न च तर्हि नाशपदं प्रागभावमात्रोपलक्षणमस्तु *सहैव विनिष्टावयवावयव्यादिष्वपि अवयव्याद्युपपत्तेः प्राक् सत्स्वेवावयवादिषु अवयव्यादेः प्रागभावस्यासत्त्वेन भेदाभेदप्रयोजकत्वे सत्त्वादिति* वाच्यम् । तावतोक्तस्थलसङ्गहसम्भवेऽपि यत्र युगपदुत्पन्नगुणगुण्यादिषु सत्स्वेव गुण्यादिषु गुणक्रियादेर्नाशः तत्रोक्तिनियमाभावेन भेदाभेदाभावापत्त्या नाशस्यापि भेदाभेदप्रयोजकतया स्वीकार्यत्वेनाभावसामान्यस्यैव प्रयोजकत्वादित्यभिसन्धिसद्भावात् । अवयवसंयोगनाशादवयविनाशस्थले उत्पत्तेः प्रागिव विनाशोत्तरमपि तस्मिन्सत्यपीति युक्त्या प्राप्तभेदसाधनस्य सम्भवतः सङ्गहलाभाभिप्रायाच्च ।

विष्टल०— उपलक्षणमिति । ध्वंसपरनाशपदेव प्राग्भावस्याप्युपलक्षणमित्यर्थः । **इत्यादि द्रष्टव्यमिति** । यत्र सत्यप्याश्रये क्रियाभावः सत्यां व्यक्तौ जातेरभावस्तत्र भेदाभेदाविति द्रष्टव्यमित्यर्थः । **अन्यथेति** । नाशपदस्य प्राग्भावोपलक्षकत्वानङ्गीकारे युगपन्नाशस्थलेऽपि भेदाभेदयोर्वाच्यत्वात् तत्र सत्स्ववयवादिष्ववयव्यादिनाशाभावेन भेदाभेदा उक्तौ न स्यात् । अभावपरत्वे सत्स्वपि तन्तुषु प्राक्पाठस्याभावात् सत्यपि चूतफले प्राप्तितोभावाद्भेदाभेदादित्युक्तं स्यादत उपलक्षणत्वं वाच्यमित्यर्थः ।

* * *

॥ अथ तत्र उक्तार्थस्पष्टीकरणम् ॥

१८१ **सु०— इदमुक्तं भवति । सत्यपि तस्मिन्नसत्त्वादित्यनेन हेतुनाऽवयव्यादीनामवयवादिभ्यो भेदमात्रं वा साध्यतेऽत्यन्तभेदो वा ॥ आद्ये सिद्धसाधनता भागासिद्धिश्च । तथा हि । सत्यप्यु(त्यु)पादाने कदाचिदुपादेयमसत्, यथा पटः । एवं सत्यपि द्रव्ये केचिद्गुणा असन्तो यथा पाकजादयः । तथा सत्यप्या(त्येवा)श्रये काश्चित् क्रिया असत्यो, यथा पटचलनादयः । जातिश्च काचित् सति जातिमत्यसती, यथा ब्राह्मण्यम् । तत्र भेदाभेदयोरङ्गीकारात् भेदसाधनं सिद्धविषयम् । गगनतद्भागयोरीश्वराद्याश्रितज्ञानादिगुणक्रियाजातिष्वभावात् भागासिद्धत्वं हेतोः इति ॥ न द्वितीयः, कालात्ययापदिष्टत्वात् । अभेदस्य प्रागुपपादितत्वादुपपादयिष्यमाणत्वाच्चेति ।**

परि०— ननु यद्यवयव्यादय इत्यादिना कृतचोद्यस्य किमुत्तरमुक्तमित्यत आह **इदमुक्तमिति** । **पाकजादय इति** । पाकजरूपरसादयः । आदिपदात् संयोगादयः । **यथा ब्राह्मण्यमिति** । गाधिजस्य विश्वामित्रस्य तपसा प्रागसत्या एव ब्राह्मणत्वजातेरुत्पत्तेर्महापातकादिना क्वचिन्नाशाच्चेति भावः । **प्रागुपपादितत्वादिति** । 'अभेदेन प्रतीतिश्चे'त्यादिग्रन्थव्याख्यावसर इति भावः । **उपपादयिष्यमाणत्वाच्चेति** । 'दृष्टिप्रमाणतश्चे'त्यादिग्रन्थ इति भावः । इतिशब्दस्य इदमुक्तमिति पूर्वेणान्वयः ।

गु०दी०— **इदमुक्तं भवति** इत्यस्य **नाशे** एकसत्त्वेऽप्यपरनाशेऽवयवावयव्यादीनां **तथा** अभेदवदभेदोऽपि भवेदित्यनेनेदं वक्ष्यमाणम् **उक्तम्** उक्तप्रायं भवतीत्यर्थः ।

वं०प०— सिद्धसाधनतामुपपादयति **सत्युपादान इति** । भागासिद्धिमुपपादयति **गगनेत्यादिना** ।

कं०रा०— **यथा ब्राह्मण्यमिति** । व्यक्तिसत्त्वेऽपि महापातकादिना ब्राह्मणत्वविनाशाद्ब्राह्मणत्वजातिर्जातिमति सत्त्वेऽप्यसतीति भावः ।

श्रीनिधि०— **यथा ब्राह्मण्यमिति** । तत्र महापातकादिना ब्राह्मण्यस्यापायादिति भावः । **गगनतद्भागयोरिति** । अपर्यवसितिश्चाणोरित्यादिना गगनादेर्भागस्य साधितत्वादेवमुक्तम् । **उपपादितत्वादुपपादयिष्यमाणत्वाच्चेति** । अभेदेन प्रतीतिश्चेत्यनेन उपपादितत्वात्, भावे त एवेत्यादिनोपपादयिष्यमाणत्वाच्चेत्यर्थः ।

शे०वा०— भेदसाधकानुमानस्य किमनेन दूषणमुक्तं भवतीत्यतस्तद्दर्शयितुमाह **इदमुक्तं भवतीति** । नन्वेकदेशे भेदसिद्धावप्यवयवादिमात्रे तदसिद्धेर्न सिद्धसाधनम् । एकदेशमात्रपक्षत्वे च न भागासिद्धिरिति कथमेतदित्यतो नेदं दूषणद्वयमेकपक्षविषयकम् । नाप्यव्यवस्थितयत्किञ्चिद्विषयकम् । किन्तु व्यवस्थितपक्षमेवेति नानुपपत्तिरित्यभिप्रायेण व्यवस्थितविषयतया तद्योजयितुं प्रतिजानीते **तथा हीति** । तत्कथमित्यतस्तस्मिन्सत्यप्यसत्त्वादिति हेतुर्यावति विश्राम्यति तावत एव पक्षत्वे सिद्धसाधनत्वमित्यभिप्रेत्य तद्विश्रान्त्यधिकरणमवयव्यादिकं शृङ्गिग्राहकतयोपदर्शयन्नेव सिद्धसाधनत्वमुपपादयति **सत्यप्युपादान इत्यादिना सिद्धविषयमित्यन्तेन** । एवं सिद्धसाधनतामुपपाद्य तत्परिहारायावयव्यादिमात्रपक्षीकारे भागासिद्धिरित्यभिप्रेत्योक्तहेतोः पक्षैकदेशवृत्तेः सिद्धसाधनत्वप्रपञ्चावसर एवोपवर्णितत्वेन तामनुक्त्वा एकदेशेऽवृत्त्युपवर्णनपूर्वकं तामाह **गगनतद्भागयोरित्यादिना** । अत्र इतिशब्दः प्रतिज्ञातदोषद्वयोपपादनसमाप्त्यर्थः । **प्रागिति** । 'अभेदेन प्रतीतिश्चे'त्यादिनेति शेषः । **उपपादयिष्यमाणत्वाच्चेतीति** । 'सामस्त्योच्छेदिनोऽन्यत्र धर्मा उभयरूपका' इत्यादिनेति शेषः । अत्रेतिशब्दस्य इदमुक्तं भवतीति पूर्वेणान्वयः ।

विठ्ठल०— प्रागुक्तशङ्कायाः स्पष्टं समाधानाप्रतीतेस्तदुपपादयितुमाह **इदमुक्तं भवतीति** । पाकजादय इत्यत्र पाकरूपादयः संयोगादयश्चोच्यन्ते । **यथा ब्राह्मण्यमिति** । ब्रह्महत्यादिना जातेरपायात् विश्वामित्रस्य प्राग्ब्राह्मण्याभावाच्च । **ईश्वराद्याश्रितेति** । यद्यपीश्वरे क्रियैव नाङ्गीकृता । जीवेषु ज्ञानादिनित्यत्वं च परैर्नाङ्गीकृतम् । तथापि प्रमाणैः साधितत्वात्साधयिष्यमाणत्वाच्चैवमुक्तिरिति ज्ञेयम् ।

* * *

॥ अथ तत्रादौ भेदाभेदस्यापि विशेषेणैव वैयर्थ्यशङ्का, तत्समाधानं च ॥

१८२ सु०— स्यादेतत् । यथा भेदसाधकानां व्यपदेशभेदादीनां विशेषाश्रयेणैवान्यथासिद्धिरुक्ता, तथा सत्यपि तस्मिन्नसत्त्वस्यापि विशेषेणैव निर्वाहः क्रियताम्, किं भेदाभेदाभ्युपगमेन ।

मैवम्, विशेषस्य भेदकार्यव्यवहारमात्रनिर्वाहकत्वेन विनाशं प्रत्यनिर्वाहकत्वात्, सकलभेदकार्यकारित्वे विशेषो भेद एव न तत्प्रतिनिधिः स्यात् ।

किञ्चानेकाश्रितस्यावयविनो द्वित्वादेश्चाश्रयेणात्यन्ताभेदे सत्याश्रयाणामपि परस्परभेदः प्रसज्यते, तत्परिहारार्थं तावदवश्यं तत्र भेदोऽङ्गीकरणीयः । न चावच्छेदकेन विना भेदाभेदभूमेः सङ्ग्रहः स्यादित्ययावदाश्रयभावित्वमेव ग्राह्यम् । तत्रापि विशेष एव सङ्करं वारयिष्यतीति तु निरस्तम् ।

किञ्च प्रमाणानुसारिणी व्यवस्था न तु स्वेच्छानुसारिणी । प्रमाणं तु भेदाभेदावगाहत इति वक्ष्यते ।

ननु अनित्यद्रव्याश्रिता एकत्वादयोऽपि गुणाः किं भेदवन्तः, तेषामपि द्रव्यकार्यतया तदुत्तरक्षणभावित्वादिति । मैवम्, उक्तोत्तरत्वात् । उक्तं ह्येतत् 'उपादानद्रव्यं गुणवदुपादेयतया परिणमत' इति ।

परि०— आश्रयाणामपि परस्परमिति । तन्त्वभिन्नपटाभिन्नत्वात् तन्त्वन्तरस्य घटाभिन्नद्वित्वत्रित्वाद्यभिन्नत्वात् पटस्येति हेतोः यो यदभि(न्नाभिन्नस्स)न्नधर्माभिन्नः स तदभिन्नो यथा घटो घटेनेति व्याप्त्यादिसम्भवादिति भावः । **भेदाभेदभूमेरिति** । भेदाभेदाङ्गीकारस्थलस्य इत्यर्थः । इतिशब्दो हेत्वर्थः । **तत्रापीति** । अयावद्द्रव्यभाविस्थल इत्यर्थः । **निरस्तमिति** । सकलभेदकार्यकारित्व इति ग्रन्थे निरस्तमित्यर्थः । **वक्ष्यत इति** । 'दृष्टिप्रमाणतश्चैव विरोधो दर्शनि कथमि'त्यादाविति भावः । उक्तोत्तरत्वादित्युक्तं व्यनक्ति **उक्तं ह्येतदिति** । 'न चेन्महत्वतश्चैव दीर्घत्वादपि नो भवेदि'त्येतद्वाक्यव्याख्यावसरे उक्तमित्यर्थः । तथा च पौर्वापर्याभावेन गुणिनि सत्येकत्वाभाव इत्यस्य तत्रायोगान्न भेदाभेदावुपेयौ तत्रेति भावः ।

यादु०— निरस्तमिति । सकलभेदकार्यकारित्वे विशेषोऽपि भेद एव स्यान्न तत्प्रतिनिधिरित्यनेन निरस्तमित्यर्थः । **वक्ष्यत इति** । 'दृष्टिप्रमाणतश्चैवे'त्यत्रेति शेषः । **उक्तं ह्येतदिति** । 'न चेन्महत्त्वतश्चैव दीर्घत्वादपि नो भवेदि'त्यनुव्याख्याव्याख्यावसरे 'यद्यपि परिणामवादिनां नायं पन्थाः । किन्तूपादानानि स्वगुणयुक्तानि तथाविधकार्यतामापद्यन्त' इत्युक्तमित्यर्थः । तथा च समानकालीनत्वादनित्यद्रव्यतद्गुणयोर्न कार्यकारणभाव इति भावः ।

वं०प०— निर्वाह इत्यनन्तरमभेदमेवाङ्गीकृत्येति शेषः । **विनाशं** भेदकार्यभूतम् । **सकलेति** । व्यवहारविनाशरूपोभयेत्यर्थः । **प्रसज्यते** यत् यदभिन्नाभिन्नं तत्तेनाभिन्नं यथा रामरूपाभिन्ननारायणाभिन्नं कृष्णरूपं रामरूपेणाभिन्नमिति व्याप्तिबलादित्यर्थः । **भूमेः** एतादृशस्थले भेदाभेदाविति भेदाभेदस्थल इत्यर्थः । **ग्राह्यं** सङ्ग्राहकत्वेनेत्यर्थः । ननु द्वित्वादीनामत्यन्ताभेद एवावयविनाऽस्तु न भेद आश्रयाणां परस्पराभेदरूपं सङ्करं च विशेष एव निवारयिष्यतीत्याशङ्क्याह **तत्रापीति** । सकलभेदकार्यकारित्वे विशेषो भेद एव स्यात् न तत्प्रतिनिधिरिति निरस्तमित्यर्थः । **किं भेदवन्त इति** । एकत्वपरिमाणगुरुत्वादीनामनित्यद्रव्याश्रितानामप्यत्यन्ताभेद एव भवद्भिः स्वीकृतः । तेऽपि धर्माः किमर्थं न भेदवन्तो भवन्ति । तस्मिन्सत्यप्यसत्त्वरूपभेद-

साधकयुक्तेरत्रापि सत्त्वादित्यत आह **तेषामपीति** । प्रथमं निर्गुणमेव द्रव्यमुत्पद्यते । पश्चात्तत्समवेता गुणा उत्पद्यन्त इति स्थितेरिति भावः ।

कं०रा०— तत्रापीति । अनेकाश्रितस्यावयव्यादेराश्रयेणात्यन्ताभेदे सत्याश्रयाणामपि परस्परमभेदः स्यादिति पूर्वोक्तस्थले प्राप्तं सङ्करं विशेष एव निराकरिष्यति अतो न तत्र भेदोऽङ्गीकार्य इति चोद्यं तु विशेषस्य सकलभेदकार्यकारित्वे विशेषो भेद एव स्यान्न तत्प्रतिनिधिरित्यनेन निरस्तमित्यर्थः । **तेषामपीति** । अनित्यद्रव्याश्रितैकत्वादीनामपि द्रव्यकार्यत्वेन तदुत्तरक्षणभावितया भेदनिर्वाह्यस्य तस्मिन् सत्यद्यत्वस्य तत्र-द्यत्वात् तेऽपि भेदवन्तः । **उक्तोत्तरत्वादिति** । उपादानं द्रव्यं गुणवदुपादेयात्मना परिणमत इति कार्यद्रव्येण सहोत्पत्तेरुक्ततयोक्तोत्तरत्वादिति भावः ।

श्रीनिधि०— आश्रयाणामपि परस्परमभेदः प्रसज्येतेति । तेषां परस्परमभेदमन्तरा एकवस्त्व-भेदानुपपत्तेः । तेषां परस्परमभेदे च प्रतीतिव्यवहारसाङ्कर्यं स्यादिति भावः । **न चावच्छेदकेन विनेति** । तर्हि यत्रैवं बाधकमस्ति तत्रास्तां भेदाभेदौ । नान्यत्रेत्यत आह **न चावच्छेदकेन विनेति** । भूमेराश्रयस्य नन्वनेकाश्रितस्यावयव्यादेः अवयवाद्यैरत्यन्ताभेद अवयवादीनां अपि परस्परमभेद एव । तर्हि यावत्तन्तु-व्यतिरेकेण पटानुपलम्भवत् एकतन्त्वतिरेकेण तन्त्वन्तरोपलब्धिर्न स्यात् । द्वित्वाद्याश्रयाणां अन्यतरादि-व्यतिरेकेणान्यतराद्युपलब्धिश्च न स्यात् । प्रत्युत य एव तन्तुरूर्ध्वाधरीभावेन तिष्ठति । स एव तिर्यग्भावेन स्थितोऽपीति घटपटौ द्वाविति प्रतीत्यनन्तरं घट एव पट इति च प्रतीतिप्रयोगौ स्याताम् । तथा च प्रतीतिव्यवहारसाङ्कर्यमेव स्यादिति चेन्न । विशेषेणैव सङ्करवारणसम्भवादित्यत आह **तत्रापीति** । एकाश्रया-नेकावयववादावपि । **सङ्करं** प्रतीतिव्यवहारसङ्करम् । **निरस्तमिति** । सकलभेदकार्यकारित्वे भेद एव स्यात् । न तत्प्रतिनिधिरिति निरस्तमित्यर्थः । **भेदाभेदावगाहत इति वक्ष्यत इति** । अंशिनोंऽशैरभेदोऽयमित्यत्रेति भावः । **एकत्वादयोऽपीति** । आदिपदेन एकपृथक्त्वपरिमाणानि गृह्यन्ते । **तदुत्तरक्षणभावित्वादिति** । एवं पूर्वखण्डितत्वमस्तीति भावः । उक्तोत्रत्वादित्युक्तम् । तर्हि यत्रैवं बाधकमस्ति तत्रास्तां भेदाभेदौ । नान्यत्रे-त्यत आह **न चावच्छेदकेन विनेति** । **भूमे**राश्रयस्य । नन्वनेकाश्रितस्य अवयव्यादेरवयवाद्यैरत्यन्ताभेदा-वयवादीनामपि परस्परमभेद एव । तर्हि यावत्तन्तुव्यतिरेकेण पटानुपलम्भवत् एकतन्त्वतिरेकेण तन्त्वन्तरोपलब्धिर्न स्यात् । द्वित्वाद्याश्रयाणामन्यतरादिव्यतिरेकेणान्यतराद्युपलब्धिश्च न स्यात् । प्रत्युत यन्त्रवत्तन्तुरूर्ध्वाधरीभावेन तिष्ठति स एव तिर्यग्भावेन स्थितोऽपीति घटपटौ द्वाविति प्रतीत्यन्तरं घट एव पट इति च प्रतीतिप्रयोगौ स्याताम् । तदेव स्मारयति **उक्तं ह्येतदिति** । 'कारणस्य गुणास्तेन भवेयुः कार्यगा अपी'त्यत्रेति भावः । एवं च पूर्वखण्डितत्वमसिद्धं द्रष्टव्यम् ।

शे०वा०— 'भेदो नाशे भवेत्तथे'ति तस्मिन्सत्यप्यसत्त्वरूपभेदकार्यनिर्वाहाय अयावदाश्रयभाविष्ववय-व्यादिष्ववयवादिभिर्भेदाभेदाभ्युपगमेन प्रसक्तां भाष्यकाराणामचातुरीं तत्र तदभ्युपगमे कारणविशेषोक्त्या परिहर्तुं

तस्मिन्सत्यप्यसत्त्वस्यान्यथासिद्धिव्युत्पादनेन तस्यानभ्युपगमनीयतां शिष्यमुखेन शङ्कते **स्यादेतदिति** । यावदाश्रयभाविनामवयव्यादीनामिव अयावदाश्रयभाविनामपि तेषामवयवादिभिः सविशेषाभेदाभ्युपगमेनैव सकलभेदकार्यनिर्वाहसम्भवे क्वचित्सविशेषाभेदस्य क्वचिद्भेदाभेदाभ्युपगमो निर्निबन्धन इत्याशयः । द्विविधं भेदकार्यं साधारणमसाधारणं च । तत्र साधारणं प्रतिनिधिसाध्यं नासाधारणमपि । लोके तथा दर्शनात् । ततश्च यावदाश्रयभाविष्ववयव्यादिषु व्यपदेशादिरूपसाधारणकार्यस्यैव सत्त्वात् तस्य च भेदप्रतिनिधिना विशेषेणापि निर्वाहाद्भेदमात्रसाध्यस्यासाधारणकार्यस्य चाभावात्तत्र भेदाभेदाभ्युपगमः । अयावदाश्रयभाविषु तु प्रतिनिध्य-साध्यस्य तस्मिन्सत्यप्यसत्त्वरूपासाधारणभेदकार्यस्य सत्त्वात् तन्निर्वाहाय भेदाभेदाभ्युपगमस्यार्थवत्त्वादिति भावेन भेदकार्यस्योक्तरूपेण द्वैविध्यं सूचयन्नेव विशेषस्य साधारणासाधारणतत्कार्यनिर्वाहकत्वतदभावावाह **मैवमिति** । ननु किमनया कल्पनया विशेषस्यैव साधारणासाधारणभेदभिन्नभेदकार्यमात्रनिर्वाहकत्वसम्भवेन कल्पकाभावादित्यत आह **सकलेति** । **आश्रयाणामपि परस्परमिति** । यद्यदत्यन्ताभिन्नेनात्यन्ताभिन्नं तत्तेना-त्यन्ताभिन्नमिति नियमादिति भावः । नन्वस्तु तर्हि तत्र भेदः । अयावदाश्रयभाव्यवयव्यादिमात्रे तु कुतः स इत्यत आह **न चेति** । नन्वनेकाश्रितस्यावयव्यादेरवयवादिभिरत्यन्ताभेदेऽपि विशेषबलादेवैकेन पटेना-त्यन्ताभिन्नानां तन्तूनामभेदाभावरूपस्य तद्भेदकार्यस्य निर्वाहान्न तत्रापि भेदोऽभ्युपगन्तव्य इत्याशङ्क्य निराकरोति **तत्रापीति** । **निरस्तमिति** । सकलभेदकार्यकारित्वे विशेषस्य भेदत्वापत्त्या प्रतिनिधित्वाभाव-प्रसङ्गात् सकलभेदकार्यकारिणस्तत्प्रतिनिधिताया लोकवेदविरुद्धत्वादिति निरस्तमित्यर्थः । अयावदाश्रयभाव्यव-यव्यादेरवयवादिभिर्भेदाभेदयोरेव प्रमाणसिद्धत्वाच्च तदभ्युपगम इत्याह **किञ्चेति** । **नेति** । विपरीतेच्छया विप(र्यय)रीतस्यापि प्रसङ्गादिति भावः । कथमत्र भेदाभेदयोः प्रामाणिकत्वमित्यत आह **प्रमाणं चेति** । **वक्ष्यत इति** । 'दृष्टिप्रमाणतश्चे'त्युत्तरग्रन्थ इति शेषः । ननु तस्मिन्सत्यप्यसत्त्वस्यानित्यद्रव्याश्रितैक-त्वादिगुणेष्वनैकान्त्यान्न भेदप्रमाणत्वमिति शङ्कते **नन्विति** । उक्तोत्तरत्वादित्येतद्विशदयति **उक्तं चैतदिति** । 'न चेन्महत्त्वतश्चैव दीर्घत्वादपि नो भवेदि'त्येतद्ग्रन्थव्याख्यानावसरे यद्यपि परिणामवादिनां नायं पन्था इत्यादिनेति शेषः । ततश्च द्रव्यतद्गुणयोः समानकालीनत्वात् कार्यकारणभावाभावेन तस्मिन्सत्यप्यसत्त्वस्य तत्राभावान्नानैकान्त्यमिति युक्तं तस्य भेदप्रमाणत्वमिति भावः ।

वा०र०— भवेत्तथेतीति । तथेत्येतद्ग्रन्थेन कृतो यो भेदाभ्युपगमस्तेनेति योजना । व्यपदेश-भेदादिरूपसाधारणकार्यस्यैवेति पाठः । व्यपदेशादीति तु लेखकप्रमादात् । साधारणासाधारणभेदेन भिन्नं यद्भेदकार्यं तन्मात्रेत्यर्थः । **यद्यदत्यन्ताभिन्नेनेति** । एतच्च संयोगाद्याश्रयानेकद्रव्यभेद इति मूलटीकास्थयद्य-दत्यन्ताभिन्नेनेति व्याप्तिप्रदर्शनपरटीकाव्याख्यावसरे स्पष्टीकरिष्यामः । **इति तु निरस्तमिति** मूले । ननु नेदं भेदासाधारणकार्यम् । यावदाश्रयभाविषु अवयविगुणक्रियादिषु अवयवादीनां परस्परमभेदाभावस्य विशेषेणैव दृष्टत्वेन प्रकृतेऽप्याश्रयाणां परस्परमभेदाभावस्य तेनैवोपपत्त्यङ्गीकारे विशेषस्य साधारणकार्यकारित्वानापत्तेर्नास्य निरस्तत्वोक्तिः युक्तेति चेदत्र ब्रूमः । तस्मिन्सत्यपि असत्त्वरूपासाधारणकार्यनिर्वाहाय अवश्यमङ्गीकार्येण भेदेनैव

आश्रयाणां परस्परं भेदस्याप्युपपत्तौ किं तत्र विशेषबलस्वीकारेण, विशेषकार्यं तु व्यपदेशे भेदादिकमन्यदेव भविष्यतीति भावेन अस्य मूलस्य प्रवृत्तेरिति । यद्वैतदस्वरसादेवाह **किं च प्रमाणेति** मूलम् । भेदाभेदयोर्विरोधपरिहाराय प्रवृत्ता अपि प्रामाणिकत्वोक्तिः तदुभयाङ्गीकारे निमित्तभूतेति तात्पर्यं मूले । **प्रमाणसिद्धत्वाच्च तदभ्युपगम इति** । चोऽवधारणेऽपि । तथा च प्रमाणसिद्धत्वादेवेति पूर्वावधारणसम्बन्धः । चशब्दस्तु प्रागुक्तस्मिन्सत्यपि असत्त्वरूपप्रमाणान्तरसमुच्चयार्थ इति वा ।

स०व्र०— निरस्तमिति । सकलभेदकार्यकारित्वे विशेषो भेद एव, न तत्प्रतिनिधिरित्यादिनेति शेषः ।

विट्ठल०— आश्रयाणामपीति । यद्येनात्यन्ताभिन्नं तदत्यन्ताभिन्नस्य तदत्यन्ताभिन्नतेति व्याप्तेरिति भावः । **निरस्तमिति** । सकलभेदकार्यकारित्वे विशेषो भेद एव न तत्प्रतिनिधिरिति निरस्तमित्यर्थः । **वक्ष्यत इति** । दृष्टिप्रमाणतश्चैवेत्यर्थः । ननु यावद्द्रव्यभाविगुणादीनामाश्रयेणाभेदकार्यद्रव्यगतानामपि एकत्वादीनामाश्रयेणाभेद एव स्यात् । तेषामप्ययावद्द्रव्यभावित्वात् । उत्पन्नं द्रव्यं क्षणमगुणं तिष्ठति द्वितीयपक्षे एकत्वादिगुणोत्पादाङ्गीकारादित्याशयेन शङ्कते **नन्वनित्येति** । **उक्तं ह्येतदिति** । 'न चेन्महत्त्वतश्चैव दीर्घत्वादपि नो भवेदि'त्येतद्व्याख्यानावसरे उपादानानि स्वगुणयुक्तानि तथाविधकार्यतामापद्येत इत्युक्तमित्यर्थः । तथा चैकत्वादीनां धर्मिणा सहोत्पन्नत्वेनानित्यद्रव्यतद्गुणयोर्न कार्यकारणभाव इति भावः ।

चषक— व्यपदेशादीनां व्यवहारादीनाम् ।

॥ इति भेदाभेदस्यापि विशेषेणैव वैयर्थ्यशङ्का, तत्समाधानं च ॥

* * *

॥ अथ तत्रान्ते 'भेदाभेदयोरेकत्र विरुद्धत्व'शङ्का, विशेषबलाच्च तन्निरासः ॥

१८३ सु०— ननु भेदाभेदावेकत्र विरुद्धौ । तत्कथमयावदाश्रयभाविनामवयविगुणकर्मसामान्यानामवयवादिभिर्भेदाभेदाभ्युपगम इत्यत आह विशेषमेवेति ।

अनु०— विशेषमेव संश्रित्य

भेदाभेदावेकत्र भवत इति सम्बन्धः । अवधारणं कालादिभेदव्यावृत्त्यर्थम् ।

वं०प०— कालादीति । उत्पत्तेः प्राक् भेदः अनन्तरं अभेद इति कालभेदेत्यर्थः ।

कं०रा०— अवधारणमिति । विशेषमेवेत्यत्रावधारणं भेदाभेदेन कालभेदेन भेदाभेदौ भवतः न तु एकस्मिन् देशे एककालावच्छेदेनेत्यस्य व्यावृत्त्यर्थमित्यर्थः ।

शे०वा०— ननु 'विशेषमेव संश्रित्ये'त्युत्तरवाक्यमनर्थकम् । न चैतदयावदाश्रयभाविष्ववयव्यादिषु विशेषसद्भावप्रतिपादनार्थमिति वाच्यम् । भेदेन तस्मिन्सत्यप्यसत्त्वस्येव व्यपदेशभेदादेरपि निर्वाहसम्भवेन निष्प्रयोजनतया तत्र विशेषस्यानपेक्षितत्वेन तत्प्रतिपादनस्याप्यनर्थकत्वादित्यतो नेदं व्यपदेशभेदादिनिर्वाहार्थं विशेषनिरूपणं किन्तु भेदाभेदयोरविरोधोपपादनार्थमेवेति न तत्परोत्तरग्रन्थवैयर्थ्यमिति भावेन तदविरोधोपपादकतया तद्योजयितुं किं तदुपपादनेनापीत्यतो विरुद्धत्वप्रयुक्तानभ्युपगमनीयत्वशङ्कानिरासस्तत्प्रयोजनमिति भावेन तच्छङ्कामुत्थापयति **नन्विति** । साकाङ्क्षतया प्रसक्तां वाक्याभासतां भेदो भवेत्तथेत्यपेक्षितपूरणेन परिहरति **भेदेति** । विशेषमेवेत्येवकारवैयर्थ्यमाशङ्क्य परिहरति **अवधारणमिति** । कदाचिद्भेदः कदाचिदभेद इति कालभेदस्य क्वचिद्भेदः क्वचिदभेद इति देशभेदस्य किञ्चित्प्रतियोगिको भेदः अभेदस्त्वन्यप्रतियोगिक इति प्रतियोगिभेदस्य च व्यावृत्त्यर्थमवधारणमित्यर्थः । अन्यथा कालादिभेदेनैव विरुद्धयोर्भेदाभेदयोरेकत्रावस्थानसम्पत्तेस्तत्र विशेषाङ्गीकारवैयर्थ्यप्रसङ्गादिति भावः ।

वा०र०— भेदेनेति । सत्यप्रभेदे उक्तकार्यनिर्वाहाय स्वीकृतेनेत्यर्थः । **भेदो भवेत्तथेतीति** । भेदस्तथाशब्दसमुच्चितो अभेदश्च भवेदित्यर्थकत्वं पूर्वोक्तरीत्या अस्य विज्ञेयम् ।

* * *

॥ अथ तत्रादौ विशेषबलाद्विरोधनिरासे विशेषस्य बलिष्ठत्वमेव हेतुः ॥

१८४ **सु०— कथं विशेषाश्रयणे विरोधशान्तिरित्यत आह विशेष इति ।**

अनु०— विशेषो बलवान्यतः ।

बलवान् भेदकार्यकरण इति शेषः । ततो **विशेषं समाश्रित्य** एकत्र भेदाभैदौ भवत इत्यन्वयः ।

अयमर्थः । भेदो हि विरोधशान्तिहेतुः । तथा हि । क्वचिदाश्रयभेदो यथा मधुरायां देवदत्तसद्भावः, सुघ्ने तदभावः । क्वचित्कालभेदो यथा मधुरायामेव देवदत्तस्य भावाभावौ । क्वचित्प्रतियोगिभेदो यथा गवयो गोघटाभ्यां सदृशो विसदृशश्चेति । भेदप्रतिनिधिश्च विशेष इत्युक्तम्, अतः कथमसौ भेदाभेदावेकदैवैकत्रैव नावस्थापयेदिति ।

परि०— सुघ्न इति । पुरविशेषस्य सुघ्न इति नाम ।

यादु०— सुघ्न इति । परिष्कृतभूम्यामित्यर्थः ।

श्रीनिधि०— सुघ्ने देशविशेषे ।

शे०वा०— तथाऽपि 'विशेषो बलवान्यत' इति विशेषस्य भेदकार्यकरणे समर्थत्ववर्णनमनर्थकमित्याशङ्क्य विशेषस्य विरोधशान्तिहेतुत्वोपपादनार्थत्वान्न तदिति भावेन तद्धेतुत्वोपपादकतया तद्योजयितुं तद्धेतुत्वानुपपत्तिशङ्कामुत्थापयति **कथमिति** । नन्वत्र विशेषस्य समर्थत्वमात्रमुच्यते न तु भेदकार्यकरणे समर्थत्वमिति कथमनेनोक्ताकाङ्क्षानिवृत्तिरित्यतोऽत्रापेक्षितं शेषमाह **बलवानिति** । ननु भेदकार्यकरणे समर्थत्वेन विशेषस्य तत्कार्यकारित्वमेव स्यान्न तु विरोधशान्तिहेतुत्वमपि । तस्या भेदकार्यत्वासिद्धेः । तत्कार्यत्वेऽपि वा तस्याः, विशेषस्य तद्धेतुत्वे नियामकाभावादित्यतो विरोधशान्तेर्भेदकार्यत्वोपपादनपूर्वकं विशेषस्य तद्धेतुतायां नियामकं स्मारयितुमाह **अयमर्थ इति** । **सुघ्न इति** । परिष्कृतभूम्यामित्यर्थः ।

वा०र०— तत्कार्यत्वेऽपि वेति । तस्यास्तत्कार्यत्वेऽपि वेति सम्बन्धः ।

विट्ठल०— सुघ्न इति । पुरुषविशेषस्य संज्ञेत्याहुः परिष्कृतभूम्यामित्यप्याहुः ।

चषक— सुघ्ने नगरविशेषे । **नान्यथेति** । **अयावद्द्रव्यभाविनि भेदाभेदसमर्थनम् ॥**

* * *

॥ अथ तत्रापि 'तथात्वे सर्वत्र विशेषमाश्रित्य विरोधस्योत्सादयितुं शक्यत्वं' इत्यतिप्रसङ्गशङ्का, तन्निरासश्च दृष्टिप्रमाणतः ॥

१८५ **सु०— 'एवं तर्ह्यतिप्रसङ्गः, सर्वत्र विशेषमाश्रित्य विरोधस्योत्सादयितुं शक्यत्वादि'त्यत आह दृष्टीति ।**

अनु०— दृष्टिप्रमाणतश्चैव

दृष्टिश्च तत्प्रमाणं च । प्रमाणभूता दृष्टिरित्यर्थः । ततो भेदाभेदौ न विरुद्धाविति सम्बन्धः । चशब्दो विशेषेण सह दृष्टेः समुच्चये । न स्वेच्छामात्रेण भेदाभेदावित्युपेत्य विशेषेण विरोधाभावोऽभिधीयते येनातिप्रसङ्गः स्यादिति एवशब्दः । उक्तं तावदवयवावय-

व्याद्यभेदग्राहिणी दृष्टिरस्ति, सम्बद्धवस्तुबुद्धितो विलक्षणतयाऽनुव्यवसायात्; अस्ति च भेदग्राहिणी, सत्यपि तस्मिन्नसत्त्वादिति हेतुजनिता दृष्टिरिति । न चैते बाध्यबाधके, अन्यतराननुवृत्तिप्रसङ्गात् । नापि प्रतिपक्षभूते, प्रतिपत्तृणामुभयोदासीनतापत्तेः । न चैवम्, अतो द्वयोरपि प्रामाण्यमेषितव्यम् । प्रमाणतश्च भेदाभेदयोरवगतयोर्न विरोधः । तदिदमुक्तं प्रमाणत इति ।

परि०— उक्तं तावदिति । 'अभेदेन प्रतीतिश्चे'त्यत्राभेदग्राहिणी दृष्टिरस्तीति 'भेदो नाशो भवेत्तथे'त्यत्र भेदग्राहिहेतुजदृष्टिरस्तीत्युक्तमित्यर्थः । **सम्बद्धवस्त्विति** । कुण्डबदरादिवस्तुबुद्धित इत्यर्थः । **एते इति** । दृष्टी इत्यर्थः । **अन्यतरेति** । इदं रूप्यं नेदं रूप्यमिति दृष्ट्योर्बाध्यबाधकभावापन्नयोर्मध्ये बाध्यदृष्टेरनुवृत्त्यभावदर्शनादिति भावः ।

यादु०— उक्तं तावदिति । 'अभेदेन प्रतीतिश्चे'त्यत्रेति शेषः ।

वं०प०— अतिप्रसङ्गः घटतदभावयोरपि विरोधाभावरूपः । **समुच्चय इति** । न केवलं भेदाभेदौ विशेषेणाविरुद्धौ, किन्नाम दृष्टिप्रमाणतश्चेत्यर्थः । **हेतुजनिता दृष्टिरिति** । अनुमानजनिता प्रतीतिरित्यर्थः । **एते** प्रतीती । **अवगतयोः** सतोः । अवगतत्वादिति यावत् ।

कं०रा०— सम्बन्धवस्तुबुद्धित इति । सम्बन्धकुण्डबदरादिविषयबुद्धित इत्यर्थः । **एते इति** । भेदाभेददर्शने इत्यर्थः ।

श्रीनिधि०— अतिप्रसङ्ग इति । सर्वत्र भेदाभेदप्रसक्त्या स्यादिति शेषः । **दृष्टीति** । एवशब्दसहितस्येदं प्रतीकग्रहणं द्रष्टव्यम् । एवञ्चावतारिकानुगुण्यं सम्भवति । चशब्दान्यथानुपपत्त्या ततो भेदाभेदौ न विरुद्धौ इत्यध्याहृत्य सम्बन्धः कृतः । एवशब्दान्यथानुपपत्त्या एवं तर्ह्यतिप्रसङ्ग इत्याद्यवतारिका च दत्ता । तर्हि एवेत्यनुक्त्वा दृष्टीति प्रतीकग्रहणं किमर्थमिति चेत् तदंशस्य तत्राप्युपयोगादिति दृष्टिप्रमाणत इत्यस्य फलितकथनम् । **प्रमाणभूता दृष्टिरिति** । विशेषणविशेष्यभावस्य कामचारित्वादेवं प्रयोग इति भावः ।

शे०वा०— ननु 'दृष्टिप्रमाणतः' इति भेदाभेदयोः प्रामाणिकत्ववर्णनमनर्थकम् । न च तयोरेकत्राविरुद्धत्वसमर्थनार्थमेतदिति वाच्यम् । विशेषेण तयोरविरुद्धस्य सिद्धत्वेन तस्यामपेक्षितत्वादित्यतः प्रमाणसहकृतस्यैव विशेषस्य तत्साधकत्वेन केवलस्य तस्यासाधकतया तत्प्रामाणिकत्ववर्णनस्यार्थवत्त्वादिति भावेन तत्प्रामाणिकत्ववर्णनपरतया उत्तरग्रन्थं योजयितुं विशेषमात्रस्य प्रयोजकतामतिप्रसङ्गेन दूषयितुं तच्छङ्कामुत्थापयति **एवं तर्हीति** । घटपटादावपि भेदाभेदौ स्यातामित्यतिप्रसङ्ग इत्यर्थः । दृष्टेः प्रमाणत्वमप्युपपाद्यमिति

भावेनाह **प्रमाणभूतेति** । चशब्दस्येतरसङ्ग्राहकत्वात् एवशब्दस्य च तद्व्यावर्तकत्वाद्भाष्ये चैवशब्दयोर्विरोधमाशङ्क्य चशब्दसङ्ग्राह्यस्य एवशब्देनाव्यावर्तितत्वात् तद्व्यावर्तितस्य च चशब्देनासङ्ग्रहान्न तयोर्विरोध इति भावेन तत्सङ्ग्राह्यव्यावर्त्ये दर्शयति **चशब्द इत्यादिना** । नन्ववयवावयव्यादिषु भेदाभेदग्राहिणी दृष्टिरेव तावदसिद्धा कुतस्तस्याः प्रामाण्यं येन तन्मूलकत्वाद्भेदाभेदाभ्युपगमस्य स्वेच्छामात्रमूलकत्वाभावादतिप्रसङ्गपरिहारः स्यादित्यतोऽभेदग्राहिणीं दृष्टिं तावदाह **उक्तं ह्येतदिति** । 'अभेदेन प्रतीतिश्चे'त्यादिनेति शेषः । अवयवावयव्यादिप्रतीतेरत्यन्तभिन्नघटपटादिप्रतीतितो वैलक्षण्याननुभवस्य प्रतीत्यपलापानुपपत्तिपराहतत्वात् तद्वैलक्षण्यानुभवस्य चाभेदविषयत्वं विनाऽनिर्वाहात् तत्प्रतीतेरभेदग्राहकत्वमिति भावः । ननु च सम्बन्धविषयत्वमात्रेणाप्यसम्बद्धघटपटादिबुद्धितो वैलक्षण्योपपत्तेर्न तदर्थमभेदविषयत्वं तस्याः कल्पनीयमित्यतस्तावता घटपटादिबुद्धिवैलक्षण्यसिद्धावपि सम्बद्धकुण्डबदरादिबुद्धितो वैलक्षण्यानुभवानिर्वाहात् तन्निर्वाहाय अभेदविषयत्वमेव कल्पनीयमित्याशयवानाह **सम्बद्धेति** । एवमभेदग्राहिणीं दृष्टिमुपदर्श्य भेदग्राहिणीं दृष्टिमप्युपदर्शयति **अस्ति चेति** । नन्वस्तु भेदाभेदग्राहकं दृष्टिद्वयं, तत्प्रामाण्यं तु कुत इत्यतः किमत्र दृष्टिद्वयस्य बाध्यबाधकभावापन्नत्वान्न प्रामाण्यमित्यभिमतं प्रतिपक्षभूतत्वाद्वेति विकल्पद्वयं मनसि निधाय पक्षद्वयमप्यनूद्य दूषयति **न चेत्यादिना** । उभयत्रापीष्टापत्तिं परिहरति **न चैवमिति** । पक्षद्वयनिराकरणेन सिद्धमर्थं दर्शयति **अत इति** । प्रकारान्तराभावादित्यर्थः । प्रामाण्यसमर्थनस्य प्रयोजनमाह **प्रमाणतश्चेति** ।

वा०र०— प्रमाणत्वमुपपाद्यमितीति । न चैते बाध्यबाधिकेत्यादिना तदुपपादनादिति भावः । कुतस्त्वस्या इति पाठः । **अभेदविषयत्वं विनेति** । सम्बन्धादिविषयत्वेन निर्वाहस्य दूषितत्वादिति भावः । प्रागुक्तप्रमेयं स्मारयितुं मूले सम्बन्धेति वाक्यं प्रवृत्तम् । अतः तदनुसारेण अवतारमाह **ननु च सम्बन्धेति** । उपलक्षणया अन्यदपि ग्राह्यं मूले । **इष्टापत्तिं परिहरतीति** । एवं तु नास्ति नात इष्टापत्तिरिति तत्परिहारप्रतीतेरिति भावः ।

विट्ठल०— उक्तं तावदिति । अभेदेन प्रतीतिश्चेत्यत्राभेदग्राहिणी दृष्टिरस्तीत्युक्तमित्यर्थः । **अन्यतरेति** । बाध्यस्यात्यन्तोच्छेदेन नेदं रजतमित्यादावनुवृत्य भावदर्शनादिति भावः । भवतामित्यस्य स्यातामित्यर्थः ।

* * *

॥ अथ तत्र च दृष्टिप्रमाणतायाः विरोधशामकत्वोपपादनम् ॥

१८६ सु०— ननु भ(व)वेतां भेदाभेदावेकत्रैवैकदेव प्रमितौ, तथाऽपि कथं विरोधशान्तिरित्यत आह विरोध इति ।

अनु०— **विरोधो दर्शने कथम् ।**

सहदर्शने सति कथं विरोधो वक्तुं शक्यते । सहदृष्टौ विरुद्धौ चेति विप्रतिषिद्धमिति भावः ।

एतदेव विवृणोति **विरोधो हीति** ।

विरोधो ह्यविरोधश्च यतो दर्शनमानकौ ।
ततो दृष्टे विरोधस्तु सद्भिरापाद्यते कथम् ॥

सर्वत्र परस्परपरिहारेणैव सत्त्वदर्शनं सहानवस्थानलक्षणविरोधे प्रमाणम्, क्वचित्सहदर्शनं चाविरोधे, अन्यस्यानिरूपणात् । अतः सहदृष्टे भेदाभेदलक्षणे वस्तुद्वये विरोधः कथम् उच्येत । सहदर्शने ह्यविरोधः स्यात्, पुनर्विरोधकथने व्याघातानिवारणादिति । **हि**शब्देन शीतोष्णादौ रूपरसादौ च विरोधाविरोधयोर्दर्शनैकप्रमाणत्वं निदर्शयति । **तु**शब्दस्य **दृष्टे तु** इति सम्बन्धः । **सद्भिः** विद्वद्भिरित्युपहासः । वैशेषिकादयो हि संयोगविभागशब्दात्मविशेषगुणानां तत्रैव तदैव भावाभावावुपेत्य सहदर्शनाद्विरोधो नास्तीति वदन्तः पुनरत्र सहदर्शनेऽपि विरोधमुद्भावयन्तः स्वव्याहतभाषिणः स्वोक्तविस्मरणशीलाः स्वदृष्टिपक्षपातिनः कथं सन्तः स्युः । सर्वत्रासहदृष्टयोर्यदि कश्चिदाग्रहमात्रेण सहावस्थानं मन्यते तं प्रत्येव विरोधोद्भावनं क्रियते **नान्यथेति** ।

परि०— 'ननु भवतामि'त्यत्र भवतामिति क्रियापदं न तु भवच्छब्दस्य आमित्यर्थः । संयोगश्च विभागश्च शब्दश्चात्मविशेषगुणाश्च तेषामित्यर्थः । तेषामव्याप्यवृत्तित्वोपगमादिति भावः । एवं तर्हि विरोधोद्भावनं क्वापि न स्यादित्यत आह **सर्वत्रेति** । **अयावद्द्रव्यभाविनि भेदाभेदसमर्थनम् ॥**

वं०प०— निदर्शयतीति । शीतोष्णादौ विरोधः परस्परपरिहारेणैव सत्त्वदर्शनप्रमाणकः । रूपरसादावविरोधः सहदर्शनप्रमाणक इत्यर्थः । यदि विरुद्धत्वेन प्रतीतावपि भेदाभेदौ न विरुद्धौ तर्हि विरोधोद्भावनं कुत्र कार्यमित्यत आह **सर्वत्रेति** ।

कं०रा०— संयोगविभागेति । संयोगविभागयोः शब्दस्यात्मविशेषगुणानां च स्वात्यन्ताभाव-समानाधिकरण्यरूपाव्याप्तिवृत्तित्वं वैशेषिकेनाङ्गीकृतत्वादिति भावः ।

शे०वा०— नन्ववयवावयव्यादौ भेदाभेदयोः प्रमितत्वेनाविरोधस्य समर्थितत्वात् प्रमितयोर्विरुद्धत्वस्य व्याहतत्ववर्णनमनर्थकमिति तत्परोत्तरवाक्यमित्यतः प्रमितत्वेऽपि भेदाभेदयोर्विरुद्धत्वमस्त्विति शङ्काया व्याहत-त्वेनानुदयोपपादनार्थत्वान्न तदिति भावेन तदुपपादकतयोत्तरग्रन्थं योजयितुमुक्तानुमाने अप्रयोजकताशङ्कामुत्था-पयति **नन्विति** । सहदृष्टयोर्विरुद्धत्वस्य व्याहतत्ववर्णनेनाप्रयोजकताशङ्काया अनुदयात् तस्य विरोधदर्शने कथमित्यनेनैव सिद्धेः तत्प्रतिपादकस्य 'विरोधो ह्यविरोधश्चे'त्यादेर्गतार्थतामाशङ्क्य परिहरति **एतदेवेति** । **स्वव्याहतभाषिण इति** । सहदर्शने विरोधोद्भावना स्वव्याहतभाषित्वम् । तच्च सहदर्शने ह्यविरोधः स्यात् पुनर्विरोधकथने व्याघातादित्युक्तप्रकारेण द्रष्टव्यम् । **स्वोक्तेति** । संयोगादौ सहदर्शनस्य विरोधपरिहारकत्व-मुक्त्वा अत्र पुनस्तदुद्भावनात् स्वोक्तविस्मरणशालित्वम् । स्वकीयसहदर्शनस्य विरोधपरिहारकत्वमभ्युपगम्य संयोगतदभावौ एकत्राभ्युपगम्यात्र पुनर्विरोधमुद्भावयतां स्वकीयसहदर्शने सहदर्शनत्वाभिमानात् स्वदृष्टिपक्ष-पातित्वमिति द्रष्टव्यम् । ननु चैवं सति संयोगतदत्यन्ताभावादौ सहावस्थाने विरोधोद्भावनं सिद्धान्ते-ऽनुपपन्नं स्यात् । अवयवावयव्यादौ भेदोभेदावुपेत्य सहदर्शनाद्विरोधो नास्तीति चाभिधाय अत्र पुनः सहदर्शने विरोधोद्भावनस्य स्वव्याहतभाषित्वापादकतया असम्भवादित्यत आह **सर्वत्रेति** । इतीत्यनन्तरं न सिद्धान्ते व्याहतभाषित्वप्रसङ्ग इति शेषः ।

वा०र०— यद्यपि सहदर्शने विरोधो नास्तीति वैशेषिकैरभ्युपगतत्वात्पुनः सहदर्शनेऽपि विरोध-माशङ्कमानानां स्ववचनविरोध इति स्वोक्तविस्मरणशीलत्ववत् व्याघातनिरूपणं च कर्तुं शक्यं तथापि तत्स्पष्टत्वाच्छिष्यैरेवोह्यतामिति भावेन ततोऽप्यन्तरङ्गमूलोक्तं स्वव्याघातमाह **सहदर्शनेऽपि** । अत एव सर्वत्रे-त्यस्यावतारे प्रकारान्तरेणैव व्याघात उपपादित इति ध्येयम् ।

विट्ठल०— कथमुच्येतेति । सहदर्शनेऽपि विरोध इत्युक्ते व्याघाताभावः । व्याघातमेवोपपादयति **सहदर्शने हीति** । **संयोगविभागेति** । संयोगश्च विभागश्च शब्दश्चात्मविशेष गुणाश्च तेषामित्यर्थः । तेषाम-व्याप्यवृत्तित्ववृत्तित्वाभ्युपगमादिति भावः । एवं तर्हि विरोधोद्भावनं क्वापि न स्यादित्यत आह **सर्वत्रेति** ।

॥ इति दृष्टिप्रमाणतायाः विरोधशामकत्वोपपादनम् ॥

॥ इति 'तथात्वे (विशेषबलाद्विरोधनिरासे विशेषस्य बलिष्ठत्वमित्येव यदि हेतुः तर्हि) सर्वत्र विशेषमाश्रित्य विरोधस्योत्सादयितुं शक्यत्वं' इत्यतिप्रसङ्गशङ्का, तन्निरासश्च दृष्टिप्रमाणतः ॥

॥ इति विशेषबलाद्विरोधनिरासे विशेषस्य बलिष्ठत्वमेव हेतुः ॥

* * *

॥ अथ तत्र ततो 'धर्मधर्मिणोर्भेदाभेदयोः' व्यवस्थाविवरणम् ॥
॥ अथ तत्रादौ यावद्द्रव्यभाविधर्मैर्भेदाभेदाभावः ॥

१८७ **सु०**— धर्मधर्मिणोर्भेदाभेदौ क्वचिदिति सङ्क्षेपेणोक्तम्, तत्किं सर्वेष्वपि द्रव्येषूत केषुचिदेवेत्यपेक्षायामाह **अभिन्न इति** ।

अनु०— अभिन्नो भगवान् स्वेन तदन्येन विभेदवान् ।

भगवान् इति चेतनमात्रोपलक्षणम् । **स्वेन** स्वावयवगुणक्रियादिभिः । **तदन्येन** प्रकृतिजीवजडात्मना प्रपञ्चेनेत्येवं व्यवस्थितावेव भेदाभेदौ न त्वेकविषयावित्यर्थः ।

अ(?)यावद्द्रव्यभाविधर्मैः भेदाभेदौ कुतो न स्यातामित्यत आह **नित्या इति** ।

नित्या धर्मास्तदीयास्तु सर्वेऽस्मान्नैव भेदिनः ।

तुशब्दोऽवधारणे । **अस्मात्** कारणात् । **अस्मात्** भगवतः । द्वित्वादिसङ्ख्या-व्यतिरिक्ता इति शेषः ।

परि०— 'भेदो नाशे भवेत्तथे'त्यत्र क्वचिदिति पदस्यानुवृत्तिमुपेत्य तथाशब्देनाभेदसमुच्चयं चोपेत्य भेदो नाश इति पदस्य निर्गलितार्थमनुवदति **भेदाभेदौ क्वचिदिति सङ्क्षेपेणोक्तमिति** । **न त्वेकविषयाविति** । एकनिरूपितावित्यर्थः । 'समुदायमृते क्वचिदि'ति वक्ष्यमाणानुरोधेनाह **द्वित्वादिसङ्ख्येति** ।

यादु०— **न त्वेकविषयाविति** । न त्वेकप्रतियोगिकावित्यर्थः ।

वं०प०— **न स्यातामिति** । चेतनानामपीति शेषः । **इत्यत आहेति** । इत्याशङ्कायां चेतन-स्वरूपेऽयावद्द्रव्यभाविनो धर्मा एव न सन्ति सर्वेषां नित्यत्वादित्युत्तरमाहेत्यर्थः । ननु सर्वेऽपि धर्मा नित्या एव तैश्चात्यन्ताभेदे द्वित्वेनाप्यभेदप्राप्त्या आश्रययोरप्यभेदः स्यादत आह **द्वित्वादीति** ।

कं०रा०— आत्मनिष्ठानां सङ्ख्यादिसामान्यगुणानामव्याप्यवृत्तित्वस्य तैरनङ्गीकृतत्वाद्विशेषग्रहणस्य भगवत इवेतरेषामपि चेतनानां स्वावयवगुणादिभिरभिन्नत्वस्याविशेषाद्भगवत्पदं चेतनमात्रोपलक्षकत्वेन व्याचष्टे

भगवानिति । सर्वस्मादित्यत्रास्मादित्यस्यावृत्तिमभिप्रेत्य व्याचष्टे **अस्मात्कारणादिति** । ननु भगवद्गत-द्वित्वादिसङ्ख्यानामपेक्षाबुद्धिजन्यानां भगवता सह भिन्नाभिन्नत्वादनित्यत्वाच्च 'नित्या धर्मास्तदीयास्तु सर्वस्मान्नैव भेदिन' इत्येतत्कथमित्यत आह **द्वित्वादिसङ्ख्येति** ।

शो०वा०— 'अभिन्नो भगवान् स्वेने'त्यादेर्धर्मधर्मिणोरत्यन्ताभेदः क्वचित्क्वचिद्भेदाभेदाविति व्यव-स्थोपदर्शनपरग्रन्थस्य प्रकृतेन सङ्गत्यप्रतीतेरसङ्गतिमाशङ्क्याव्यवहितपूर्वेणासङ्गतावपि 'भेदो नाशो भवेत्तथे'-त्युक्तार्थविवरणरूपत्वेन तत्सङ्गतत्वान्नासङ्गतिरित्यभिप्रेत्य तद्विवरणरूपतया तद्योजयितुमुक्तार्थानुवादपूर्वकं तत्प्रयोजकीभूतामाकाङ्क्षामुत्थापयति **धर्मधर्मिणोरित्यादिना** । यद्यपि सत्येव धर्मिणि धर्माणां च यत्र नाश-स्तत्र भेदाभेदाविति युक्तैर्नेयं सङ्क्षेपेणोक्तिः तथाऽपि सत्येव धर्मिणि धर्मिणां नाशोऽत्रैवोत सर्वत्र द्रव्य इत्यन-भिधानाभिप्रायेणेयं सङ्क्षेपोक्तित्वोक्तिः । अत एवापेक्षाप्रकारप्रदर्शनं तथैव करिष्यत इत्यवधेयम् । नन्वीश्वरस्येव जीवस्यापि स्वावयवगुणक्रियादिभिरत्यन्ताभिन्नत्वेन भिन्नाभिन्नत्वाभावात् किं सर्वेष्वपि द्रव्येषूत केषुचि-देवेत्यपेक्षापूरके वाक्ये तत्पूरणाय जीवेश्वरसाधारण्येनैव तदत्यन्ताभेदस्य प्रतिपादनीयतयेश्वरमात्रासाधारण्येन तदभिधानमनुपपन्नमित्यतोऽत्र वाक्ये भगवत्पदस्य चेतनमात्रोपलक्षणत्वादीश्वरमात्रपरत्वाभावादस्य वाक्यस्य जीवेश्वरसाधारण्येनैव तदत्यन्ताभेदबोधकत्वेनेश्वरमात्रासाधारण्येन तदभिधायकत्वाभावान्नानुपपत्तिरिति भावेन भगवत्पदं चेतनमात्रपरतया व्याचष्टे **चेतनमात्रोपलक्षणमिति** । ननु भगवान् स्वेनाभिन्न इत्यनेन भगवतः स्वेनाभेद उच्यते, न तु गुणाक्रियादिभिरिति नानेन धर्मधर्मिणोर्भेदाभेदौ सर्वत्र द्रव्येषूत केषुचिदेवेत्युक्ता-काङ्क्षाया निवृत्तिरित्यतोऽत्र स्वशब्दस्य स्वीयपरत्वेन स्वपरत्वाभावान्नानुपपत्तिरिति भावेन स्वपदार्थमाह **स्वेनेति** । प्रकृतिजीवजडात्मनेत्युपलक्षणम् । ईश्वरप्रकृतिजडात्मनेत्यपि द्रष्टव्यम् । **व्यवस्थिताविति** । भिन्नप्रतियोगिकावित्यर्थः । **न त्वेकेनेति** । न त्वेकप्रतियोगिकावित्यर्थः । न च भगवति द्वित्वादिना जीवे च चिन्तादिनाऽपि भेदाभेदसद्भावादेकविषयावपि भेदाभेदौ स्त एवेति न तन्निषेधो युक्त इति वाच्यम् । वक्ष्यमाणानुसारेणेहापि तदुभयव्यतिरिक्तत्वस्य ज्ञातुं शक्यतया तदतिरिक्ते एकविषयकभेदाभेदाभावाभिप्रायात् । **अयावद्द्रव्यभावीति** । जीवेश्वरयोरिति शेषः । द्वित्वादिसङ्ख्याव्यतिरिक्ता इत्युपलक्षणम् । चिन्तादिव्यतिरिक्ता इत्यपि द्रष्टव्यम् । ततश्च जीवेश्वरयोरयावद्द्रव्यभाविभिर्द्वित्वादिभिश्चिन्तादिभिश्च भेदाभेदसद्भावेऽपि तदुभयव्यति-रिक्तानां सर्वेषां धर्माणां नित्यतया यावद्द्रव्यभावित्वान्न तैर्भेदाभेदावित्युक्तं भवति ।

वा०र०— **अत्रैवोत सर्वत्रेति** । अयं च वक्ष्यमाणमूलीयापेक्षाप्रकारानुसारेणानुवाद इति न दोषः । अर्थे भेदात् । अत्र हि वाशब्दार्थको न शब्दस्येत्यनभिधानेत्यत्रत्येतिशब्दसम्बन्धात् तद्बलेनात्रैवास्तीति सर्वत्र द्रव्येति वा अनभिधानेत्येव टीकार्थप्रतीतेः । एतेन पूर्ववाक्येऽन्यतरस्यानभिधानमात्रस्यावश्यकत्वेऽप्यपेक्षा-प्रकारानुसारेणाभिधानार्थमिति तत्प्रकारेणानभिधानयोग इति निरस्तम् । **करिष्यत इति** । तत्किमित्युत्तरवाक्य इति शेषः । अजहत्स्वार्थलक्षणायां चेतनत्वेन भवतोऽपि लक्ष्यत्वमित्याशयेन विवक्षायां तु तदन्येनेत्यस्येश्वरो

वेश्वरातिरिक्तचेतनविवक्षाया वाह **भगवत्पदस्येति** । युगपद्वृत्तिद्वयविरोधस्तु न दूषणमिति मूलाशय इति भावः । अत एव सादृश्येन विवक्षायां तु तदन्येनेत्यस्येश्वरप्रकृतिजडैरिति व्याख्येयमित्याह **प्रकृतजीवेति** । प्रपञ्चात्मनेतितु न सम्बध्यत इति भावः । उत्तरमूलानुसारेण **द्वित्वादिनेति** । .....धिकरणीयमूलानुसारेण **चिन्तादिनेति** । वक्ष्यमाणस्थलं चोक्तमूलद्वयम् । **अतिरिक्त इति** । तत्स्थल इत्यर्थः । मूलानुसारेणाह **चिन्तादीति** ।

विट्ठल०— एकविषयाविति । एकनिरूपितावित्यर्थः ।

चषक— चेतनमात्रोपलक्षणं चेतनसामान्योपलक्षणम् ।

॥ इति यावद्द्रव्यभाविधर्मैर्भेदाभेदाभावः ॥

* * *

॥ अथ च तत्रान्ते अयावद्द्रव्यभाविधर्मैश्च भेदाभेदः ॥

१८८ **सु०— क्व तर्हि भेदाभेदावित्यत आह सामस्त्येति** ।

अनु०— सामस्त्योच्छेदिनोऽन्यत्र धर्मा उभयरूपिणः । भावे

अन्यत्र परमेश्वरात् । 'जडे वस्तुनी'ति यावत् । सत्येव धर्मिणि **सामस्त्येनोच्छेदवन्तो ये धर्माः ते उभयरूपिणः** भिन्नाभिन्ना इत्यर्थः ।

अभिभवव्यावृत्त्यर्थं **सामस्त्यत्युक्तम्** । यद्वा **सामस्त्ये** द्रव्यस्याविकलत्वे नाशाभावेऽपि **ये उच्छेदिन** इति व्याख्येयम् ।

किं स्वसद्भाववेलायामभेदिनोऽसद्भाववेलायां भेदिन इत्येवं कालभेदेन भेदाभेदावित्यत उक्तं **भाव इति** । स्वसद्भावदशायामेवोभयरूपका इत्यर्थः, विनष्टस्यासत्त्वेन भेदचिन्तानवकाशात्, प्रागत्यन्ताभेदे विनाशासम्भवाच्च ।

कुतो भिन्नाभिन्ना इत्यत आह **त एवेति** ।

अनु०— त एव चोच्छेदात्तदन्ये च समस्तशः ।

प्रत्यक्षबलेन, त एव धर्मिस्वरूपभूता एव, उच्छेदात् सत्येव धर्मिण्यसत्त्वाद्धेतोः, तदन्ये । चशब्दौ मिथः समुच्चयार्थौ । समस्तश इत्ययावद्द्रव्यभाविविवक्षयोक्तम् ।

परि०— अभिभवेति । महारजनाद्यभिभूतपटादिगतशुक्लादिरूपैर्भेदाभावात्तद्व्यावृत्त्यर्थमित्यर्थः । **यद्धेति** । अस्मिन् पक्षे सति धर्मिणीति नाध्याहार इति भावः । स्वसद्भावदशायामेवोभयरूपका इत्येतद्व्यनक्ति **विनष्टस्येति** । **मिथ इति** । तत एव च तदन्ये चेति समुच्चय इत्यर्थः । **अभेदभेदाभेदस्थलोक्तिः ॥**

यादु०— अभिभवेति । सौरालोकादिना दीपादिप्रभाया अभिभवरूपोच्छेदसत्त्वेऽपि दीपादिना तस्या भेदाभेदाभावात् तद्व्यावृत्त्यर्थं सामस्त्येत्युक्तमित्यर्थः । नन्वभिभवो नोच्छेदः किन्तु बलवत्सजातीयग्रहणकृतमग्रहणमतः सामस्त्येति व्यर्थमित्यरुचेराह **यद्धेति** । **विनष्टस्यासत्त्वेनेति** । भेदस्य धर्मिस्वरूपत्वाद्धर्मिनाशानन्तरं तत्र भेदोऽस्तीति चिन्तायाः कर्तुमशक्यत्वात् सद्भावदशायामेव भेदोऽङ्गीकार्य इति भावः । एवमसद्भाववेलायां भेदिन इत्यत्र बाधकमुक्त्वा सद्भावदशायामभेदिन इत्यत्र बाधकमाह **प्रागत्यन्ताभेद इति** । विनाशात्प्राक् सद्भावदशायामित्यर्थः ।

वं०प०— अभिभवेति । सति धर्मिणि ये उच्छेदवन्तो धर्माः ते भिन्नाभिन्ना इत्युक्ते दीपप्रकाशो दीपात्यन्ताभिन्नोऽपि यदा सौरप्रकाशेनाभिभूतोऽस्ति तदा सति धर्मिणि दीपे तत्प्रकाशेऽभिन्नेऽभिभवत्वरूपोच्छेदसद्भावेन दीपेन भिन्नाभिन्नः प्रसज्येतेत्यर्थः । **अभिभवो** अभिभूतं वस्तु । **सामस्त्योच्छेदिनः** समूलोच्छेदिनः । अत एवास्वरसात् पक्षान्तरमाह **यद्धेति** । धर्माः स्वासद्भावदशायां भेदिन इत्येतदयुक्तमित्यत आह **विनष्टस्येति** । धर्मस्यैवाभावे कस्य धर्मिणः सकाशाद्भेदश्चिन्त्यत इत्यर्थः । स्वसद्भावदशायामभेदिन इत्युक्ते तदानीं भेदाभावेनात्यन्ताभेद एवोक्तः स्यात् । ओमिति चेत् तत्राह **प्रागिति** । धर्माणां विनाशात्प्राग्धर्मिणाऽत्यन्ताभेदेऽङ्गीक्रियमाणे सति धर्मिणि धर्माणां विनाशो न सम्भवतीत्यर्थः । **मिथो** भेदाभेदयोरित्यर्थः ।

कं०रा०— अभिभवेति । महारजन्याद्यभिभूते पटीयशुक्लरूपादावुच्छिन्नत्वव्यवहारदर्शनेन तस्य सत्येव धर्मिण्युच्छेदवत्वेऽपि भिन्नाभिन्नत्वरूपोभयरूपकत्वाभावात् तद्व्यावृत्त्यर्थं सामस्त्येत्युक्तम् । अभिभूतस्य पटीयशुक्लरूपादेः सामस्त्येनोच्छेदित्वाभावात्कृते तद्ग्रहणे तद्व्यावृत्तिरिति भावः । अभिभूते पटीयशुक्लरूपादावुच्छिन्नत्वव्यवहारसत्त्वेऽपि वस्तुत उच्छेदित्वाभावेनोच्छेदित्वग्रहणेनैव तद्व्यावृत्तेः सामस्त्यग्रहणं

व्यर्थमित्यरुचेनाह **य इति** । ननु धर्मिणि सत्येव ये धर्मा विनश्यन्ति तेषां स्वसत्तादशायामेव भेदाभेदाविति कुतः विनाशानन्तरं भेदः पूर्वं त्वभेद इत्येव किं न स्यादित्यत आह **विनष्टस्येति** ।

श्रीनिधि०— किमर्थमेवं व्याख्यानमिति चेदुच्यते **अन्यत्र परमेश्वरादिति** । इदं पूर्ववदुपलक्षणपरम् । भगवानिति निर्देशानुसारेण परमेश्वरादिति निर्देश इति द्रष्टव्यम् । **जडे वस्तुनीति यावदिति** । पूर्वमुत्तरं वा खण्डित इति शेषः । अत एव वक्ष्यति **समस्तश इत्ययावद्द्रव्यभाविविवक्षयोक्तमिति** ।

शे०वा०— अन्यत्र परमेश्वरादित्युपलक्षणम् । जीवादित्यपि द्रष्टव्यम् । एतदेव चाभिप्रेत्य तात्पर्यमाह **जडवस्तुनीति यावदिति** । **अभिभवेति** । सौरालोकादिना दीपादिप्रभाया अभिभवरूपोच्छेदसत्त्वेऽपि दीपादिना तस्या भेदाभेदाभावात् तद्व्यावृत्त्यर्थं सामस्त्येत्युक्तमित्यर्थः । नन्वभिभवो नोच्छेदः । किन्तु बलवत्सजातीयग्रहणकृतमग्रहणमतः सामस्त्येति व्यर्थमित्यरुचेराह **यद्वेति** । नन्वसद्भाववेलायां भेदिनः सद्भाववेलायां चाभेदिन इत्येवं कालभेदेनैव भेदाभेदौ किन्न स्यातामित्यतोऽसद्भाववेलायां भेदिन इत्यत्र तावद्बाधकमाह **विनष्टस्येति** । भेदस्य धर्मिस्वरूपत्वेन धर्मिनाशे तन्नाशेन धर्मिनाशानन्तरं भेदोऽस्तीति चिन्तायाः कर्तुमशक्यत्वादित्यर्थः । नन्वस्य 'तस्मात्प्रध्वस्तभेदादी'त्युत्तरानुव्याख्यानव्याख्यानरूपोत्तरग्रन्थेन विरोधः । तत्र 'नष्टानामपि वस्तूनां भेदो नैव विनश्यति' इति वाक्यं प्रमाणीकृत्य नष्टधर्मिकभेदस्य सत्त्वाभिधानादत्र पुनस्तन्निषेधादिति चेन्न । यथा न विरोधस्तथा तद्वाक्यव्याख्यानावसर एव वक्ष्यमाणत्वात् । सद्भावदशायामभेदिन इत्यत्रापि बाधकमाह **प्रागिति** । विनाशादिति शेषः । सद्भावदशायामिति यावत् । त एवेति पुनर्भेदाभेदाभिधानानर्थक्यमाशङ्क्योभयरूपत्वे धर्माणां प्रमाणाभिधायकत्वान्न तदिति भावेन तत्र प्रमाणसमर्पकतया तद्योजयितुं तच्छङ्कामुत्थापयति **कुत इति** । त एवेति प्रतिज्ञातधर्मिस्वरूपतायां प्रमाणस्यानुपन्यासेन प्रसक्तां मूले न्यूनतामपेक्षितपूरणेन परिहरति **प्रत्यक्षबलेनेति** । एकेनैव समुच्चयसिद्धेरितरवैयर्थ्यमित्यत उक्तं **मिथ इति** । ननु जडे वस्तुनि सर्वधर्माणां सत्येव धर्मिण्यसत्त्वाभावेन कथं भागासिद्धस्य हेतोः सर्वधर्मभेदसाधकत्वमित्यतः समस्तश इत्यस्य सत्यप्याश्रयेऽसत्त्वहेतुविश्रान्त्यधिकरणमात्रपरत्वेन सर्वधर्मपरत्वाभावेन भागासिद्ध्यप्रसक्त्या युक्तैव तस्य भेदसाधकतेत्याशयेन तत्तात्पर्यमाह **समस्तश इतीति** ।

वा०र०— **सर्वधर्माणां सत्येवेति** । केषाञ्चित्तादृशसत्त्वसद्भावादिति भावः ।

विट्ठल०— ईश्वरवाचिपदस्य चेतनमात्रोपलक्षणत्वेन प्रागुक्तत्वादाह **जडे वस्तुनीति यावदिति** । अभिभवेदिति सौरालोकादिना नक्षत्रादिप्रभाया अभिभवरूपोच्छेदस्य सत्त्वेऽपि नक्षत्रादिना भेदाभेदभावात्तद्व्यावृत्त्यर्थं सामस्त्यतीत्युक्तमिति भावः । अभिभवस्योच्छेदशब्दार्थत्वाभावात् सामत्स्येति व्यर्थमित्यतः पक्षान्तरमाह **यद्वेति** । अस्मिन्पक्षे सामस्त्यपदस्य विनाशाभावो न मुख्यार्थ इति पूर्वव्याख्यानं स्वसद्भाववेलायामभेदिनः स्वासद्भावदशायां भेदिन इत्युभयरूपकत्वं किं न स्यादित्यत आह **विनष्टस्येति** । भेदस्य

धर्मिस्वरूपत्वाद्भेदिनाशे तत्र नष्टे नष्टे भिदिति भेदसद्भावचिन्तायाः कर्तुमशक्यत्वात् स्वसद्भावदशायामेव भेदाभेदावङ्गीकार्यादिति भावः । स्वसद्भाववेलायामत्यन्ताभेद एव कस्मान्न स्यादित्यत आह **प्रागत्यन्ताभेद इति** । धर्मनाशात्प्राग्धर्मिणात्यन्ताभेदे सति धर्मिणि धर्मविनाशायोगात् । धर्माणां धर्मितन्मात्रत्वात् । धर्म्यत्यन्ताभिन्नस्यापि धर्मस्य विशेषबलेन विनाश इति न वाच्यम् । उत्पत्त्यविनाशयोर्भेदसाधारणकार्यत्वस्योक्तत्वादिति भावः । **मिथः समुच्चय इति** । त एव तदन्ये चेति भेदाभेदयोर्मिथः समुच्चय इत्यर्थः ।

॥ इति अयावद्द्रव्यभाविधर्मैश्च भेदाभेदः ॥
॥ इति 'धर्मधर्मिणोर्भेदाभेदयोः' व्यवस्थाविवरणम् ॥

* * *

॥ अथ च तत्र ततो भेदाभेदयोरनया व्यवस्थया अन्यचोद्यस्यापि परिहारः ॥
॥ अथ तत्रादौ 'अंशतः संयोगः' इत्युक्तेरनवस्थामूलकायुक्तताशङ्का, छलत्वेन तन्निरासश्च ॥

१८९ **सु०—** यदुक्तं 'यावदवयवभाविनोऽवयविनोऽवयवैरत्यन्ताभेदः, अयावदवयवभाविनस्तु भेदाभेदाविति, तेनान्यदपि चोद्यं परिहृतमित्याह **अंशांशिनोरिति** ।

अनु०— अंशांशिनोरभेदेन त्वंशसंयोग एव हि ।
अंशिनो नानवस्थाऽतो यद्यप्यंशेष्वविश्रमः ॥

तथा हि । 'सर्वदिक्ष्वपि सम्बन्धादि'ति यदंशतः संयोग इत्युक्तं तदयुक्तम्, अनवस्थापत्तेः । घटसंयोगो हि घटांशसंयोगपूर्वकः, सोऽपि तदंशसंयोगपूर्वकः । न चेयं निरंशे परम्परा विश्राम्यतीति वाच्यम्, अंशपरम्पराया अविश्रमस्याप्यङ्गीकृतत्वात् । अतः पूर्वपूर्वसंयोगानुत्पत्तावुत्तरोत्तरानुत्पत्तिप्रसङ्गादंशतः संयोग इति नियमो नोपपद्यत इति । तदिदमसङ्गतम् । यद्यप्यंशत एव संयोगो यद्यपि चांशेष्वंशपरम्पराया अविश्रमः; तथाऽपि **अंशांशिनोरभेदेनैवांशसंयोग एव हि** यस्मात् **अंशिनः संयोगः** अतो नानवस्थेति ।

परि०— 'एकस्मिञ्जात एवे'त्युत्तरमूलानुरोधेन चोद्यं तावद्व्यनक्ति **सर्वदिक्ष्विति** । अंशिन इति मूलार्थविवरणेन परिहारं व्यनक्ति **तदिदमसङ्गतमित्यादिना** । तुशब्दः एवार्थ इत्युपेत्याह **अभेदेनैवेति** ।

वं०प०— तेनेति । अयावदवयवभाविनामभेदस्यापि कथनेनेत्यर्थः । **घटसंयोगो हीति** । घटनिष्ठः संयोगो घटांशसंयोगजन्यः, यथा हस्ततरुसंयोगजन्यः कायतरुसंयोग इत्यर्थः ।

श्रीनिधि०— पूर्वपूर्वसंयोगानुपपत्ताविति । कारणीभूत तत्तत्संयोगानुत्पत्तावित्यर्थः । तर्हि परमाणोरंशित्वाभावेन अंशा च । निरंशस्य त्विति द्रव्य एवेति चेत् तर्हि परमाण्वोः समानदेशत्वं स्यात् । तथा एकेन परमाणुना संयुज्यमानानां सर्वेषामपि परमाणूनां तथात्वापत्त्या द्व्यणुकोत्पत्तिर्न स्यादिति ।

शे०वा०— 'अंशांशिनोरभेदेन' इत्यादेः प्रकृतासङ्गतत्वादानर्थक्यमित्याशङ्क्याव्यवहितग्रन्थेन सङ्गत्यभावेऽप्यवयवावयव्याद्यभेदाभिधानस्योक्तानुपपत्तिपरिहाररूपप्रयोजनाभिधायकत्तया तदभेदप्रतिपादकव्यवहितग्रन्थसङ्गतिसम्भवान्नानर्थक्यमिति भावेन व्यवहितसङ्गततयोत्तरग्रन्थं योजयति **यदुक्तमिति** । 'अभेदेन प्रतीतिश्चे'त्यादिनेति शेषः । कोऽसावुक्तोऽर्थः का तत्रानुपपत्तिर्यत्परिहारोऽवयवावयव्यभेदोक्तिप्रयोजनमित्यत उक्तार्थोपदर्शनपूर्वकं तत्रानुपपत्तिं तावदुद्भावयति **तथा हीत्यादिना** । **अङ्गीकृतत्वादिति** । अन्यथा अंशपरम्पराया यत्रैव विश्रमः तत्रैवापकर्षतारतम्यस्य विश्रान्तत्वापत्त्या तस्यानवधिकत्वं प्रागुक्तं बाधितं स्यादित्यर्थ इति भावः । **अत इति** । अंशसंयोगस्यांशिसंयोगं प्रति कारणत्वात् तदभावे तदनुपपत्तिप्रसङ्गादित्यर्थः । उक्ताक्षेपस्य मूलारूढतासिद्ध्यर्थं यद्यपीत्यस्यांशतः संयोग इत्यस्य चावृत्तिमभिप्रेत्य वाक्यं योजयति **यद्यपीत्यादिना** ।

वा०र०— अवयवावयव्याद्यभेदाभिधानस्येत्यादि । अयमर्थः । 'अभेदेन प्रतीतिश्चे'ति पूर्वत्रावयवावयव्यादीनामभेदप्रतिपादनं कृतम् । तस्य भेदप्रतिपादनस्य ततः प्राक् 'सर्वदिक्ष्वपि सम्बन्धादि'त्यनेनोक्तेऽर्थे प्राप्ताया अनुपपत्तिरनवस्थारूपात्तत्परिहाररूपं यत्प्रत्ययोजनं प्रयोजनं तमिति यावत् । तत्प्रतिपादकत्वमंशांशिनोरेवेत्युत्तरग्रन्थेऽस्यास्तीतीत्युत्तरग्रन्थस्यावयव्यादीनामभेदप्रतिपादकाभेदेन प्रतीतिश्चेति पूर्वग्रन्थेन सङ्गतिसम्भवान्नानर्थक्यमितीति । स्पष्टश्चायमर्थः एतदुत्तरग्रन्थे । **उक्ताक्षेपस्येति** । यावदुक्ताक्षेपस्येत्यर्थः । **अंशतः संयोग इत्यस्येवेति** । यद्यप्यनुव्याख्याने अंशसंयोगेत्येवास्ति तथाप्यावृत्तस्य पञ्चमीसमासाश्रयणेन एवकारस्य भिन्नक्रमत्वाश्रयणेन च तदर्थानुवादोऽयं मूलानुसारेण कृत इत्यवधेयम् ।

विट्ठल०— सर्वदिक्ष्वपि सम्बन्धादितीति । एकस्य परमाणो दिदशादिकसम्बन्धस्य विद्यमानत्वाद्दशांशत्वमिति हि तदभिप्रेतम् । तथा चैकांशेनैकैकदिक्सम्बन्धे शतः संयोग इत्युक्तप्रायमेवेति भावः । **घटसंयोगो हीति** । घटस्य पटादिसंयोग इत्यर्थः । **घटांशसंयोगपूर्वक इति** । संयोगस्यांशवृत्तित्वादिति भावः । मूलक्षयकरसंयोगस्याप्यनुत्पत्तिप्रसङ्गाद्घटादेरंशसंयोगपूर्वकरूपमूलक्षतिरिति भावः ।

चषक— यावदवयवभाविनः । स्वावयवनिरूपितकालिकसम्बन्धावच्छिन्नाधिकरणतात्वावच्छिन्नव्यापकतावच्छेदकस्वनिरूपितसम्बन्धावच्छिन्नाधिकरणतात्वकस्य । **अभेदस्य भेदाभेदयोश्च स्थलसङ्कीर्तनम्** ।

॥ अथ तत्राप्यादौ उक्तार्थस्पष्टीकरणम् ॥

१९० सु०— अयमभिसन्धिः । स्यादियमनवस्था यदि सर्वत्रांशत एव संयोग इति वदतामस्माकमंशिनः संयोगः अंशसंयोगेनैव जायत इत्यभिप्रायः स्यात् । न चैवम्, किन्तु यो यस्य अंशिनः संयोगः स तदंशे वर्तते, निरंशस्य तु संयोगः क्व नाम वर्तताम् । अतः परमाण्वोः संयोगे सति तद्वत्त्यर्थमंशोऽङ्गीकरणीय इति । न ह्येवं सति काचिदनवस्थाऽस्ति, अनवस्थितकार्यकारणभूतासिद्धसंयोगपरम्पराश्रयणाभावात् ।

एतावत्तु भवेत् । घटसंयोगो घटांशवृत्तिरित्यप्ययुक्तम्, अतिप्रसङ्गात् । तथा सति हि पटवृत्तिरपि घटसंयोगः स्यात्, प्रमाणविरोधाच्च । घटसंयोगो घटवृत्तिस्तद्गुणत्वात् तद्रूपवदिति, घटांशवृत्तिः संयोगो न घटसंयोगः तदन्यवृत्तित्वात् पटसंयोगवदिति ।

एतदप्यनवकाशम्, अंशांशिनोरभेदस्य साधितत्वात् । अतिप्रसङ्गो हि तदा स्याद्यदि पटवद्घटांशोऽपि घटादत्यन्तभिन्नः स्यात्, अभेदे तु क्वातिप्रसङ्गः ।

अनुमानस्याप्याद्यस्य सिद्धसाधनता, अंशवृत्तेरेव घटवृत्तित्वात्, अंशावृत्तित्वे सति घटवृत्तित्वसाधने दृष्टान्तः साध्यविकलः स्यात् । द्वितीयस्तु हेतुः स्वरूपासिद्धोऽन्यथासिद्धो वेति । यदि घटसंयोगो घटांशे वर्तते तर्हि घटांशसंयोगः क्व वर्तत इति चेत्, अनेन (एव) न्यायेन तदंशे सोऽपि तदंश इति ब्रूमः । न चैवमनवस्था, सर्वेऽप्यंशिसंयोगास्तत्तदंशावृत्तय इत्यत्रेतरेतरापेक्षाया अभावात् ।

एवं तर्हि परमाणुवृत्तिरपि संयोगो घटसंयोगः स्यादिति चेत् । को नेत्याहेति ।

परि०— सर्वदिक्ष्विति प्रागुक्तस्याभिप्रायोक्तिपरमिदं मूलमिति तात्पर्यार्थमाह **अयमभिसन्धिरिति** । प्रमाणविरोधाच्चेत्युक्तं विरोधिप्रमाणं व्यनक्ति **घटसंयोग इति** । पटसंयोगवदितीतिशब्दस्येतिप्रमाणेति पूर्वेणान्वयः । **साध्यविकल इति** । घटतदंशानामभेदेन घटरूपादेरपि तदंशवृत्तित्वादिति भावः । **स्वरूपासिद्धोऽन्यथासिद्धो वेति** । तदन्येत्यत्र अत्यन्तभिन्नवृत्तित्वविवक्षायामसिद्धिः, अंशांशिनोर्भेदाभेदेनांशवृत्तेः संयोगस्यांशिसंयोगत्वेऽपि तदन्यवृत्तित्वस्योपपत्तेर्भेदाभेदेनान्यथासिद्धमित्यर्थः । यद्वा संयोगस्योभयवृत्तित्वेन घटवृत्तितयाऽप्युपपत्त्या तदन्यवृत्तित्वमन्यथासिद्धमित्यर्थः । **अंशांशिसंयोगैक्यम्** ॥

गु०दी०— अन्यथासिद्धो वा इत्यत्र घटतदंशयोरभेदेन घटसंयोगत्वसम्भवाद्विवक्षितसाध्यादन्यथैव सिद्धिरित्यर्थः । सूच्यग्रसंयोगः परमाणुप्रमाणघटांशे तिष्ठतीति भावेन शङ्कते **एवं तर्हीति** ।

यादु०— तदन्यवृत्तित्वादित्यत्र यद्यत्यन्तभेदो विवक्षितस्तदा स्वरूपासिद्धिर्यदि च भेदमात्रं विवक्षितं तदाऽन्यथासिद्धिः । साध्याभावेऽप्यभेदेन हेतोरुपपत्तेरित्याह **द्वितीयस्तु हेतुरिति । इतरेतरापेक्षाया इति** । तथा च मूलक्षयकारित्वं नास्तीति भावः । न च सामान्यानवस्थावदप्रामाणिकस्वीकाररूपा । प्रामाणिकत्वादित्याशयात् ।

वं०प०— घटांशे वृत्तिरित्यपीति । घटादत्यन्तभिन्नघटांशेत्यर्थः । अत्यन्तभेदेऽप्येकसंयोगस्यापरसंयोगत्वेऽतिप्रसङ्गमेवोपपादयति **तथा सति हीति** । प्रमाणविरोधमेवोपपादयति **घटेत्यादिना । साध्यविकल इति** । रूपस्य व्याप्यवृत्तित्वेनांशावृत्तित्वघटितं साध्यं नास्तीत्यर्थः । हेतौ तदन्येत्यत्रात्यन्तभेदविवक्षायामाह **स्वरूपासिद्ध इति** । घटतदंशयोरभेदेन तदन्यत्वाभावादिति भावः । भेदमात्रविवक्षायामाह **अन्यथासिद्धो वेति** । घटांशवृत्तिसंयोगस्य तदन्यवृत्तित्वेऽपि घटसंयोगत्वं सम्भवति । अभेदस्यापि सत्त्वादित्येवं भेदाभेदाभ्यामन्यथासिद्धो वेत्यर्थः । **न्यायेनेति** । घटसंयोगो घटांशे वर्तत इति न्यायेन । **अभावादिति** । जन्यजनकभावानङ्गीकारादिति भावः । **एवं तर्हीति** । यद्यंशांशिनोरभेदेनांशसंयोग एवांशिनस्संयोगः तर्हि परमाणोरपि घटांशत्वात् तत्संयोगोऽपि घटसंयोगः स्यादित्यर्थः ।

कं०रा०— द्वितीयस्त्विति । घटांशवृत्तिः संयोगो न घटसंयोगः तदन्यवृत्तित्वादिति द्वितीयहेावन्यशब्देनात्यन्ताभेदविवक्षायां घटतदंशयोरभेदस्यापि सत्त्वेन हेतुः स्वरूपासिद्धं भेदमात्रविवक्षायां तु संयोगस्य घटान्यतदंशवृत्तित्वेऽप्यंशांशिनोरभेदस्यापि सत्त्वेनांशसंयोगस्यांशिसंयोगत्वोपपत्तेर्हेतुरन्यथासिद्ध इत्यर्थः ।

श्रीनिधि०— असिद्धसंयोगपरम्पराश्रयणेति । अप्रामाणिकसंयोगाश्रयणेनेत्यर्थः । **एतावत्तु भवेदिति** । मच्चेतसि बाह्येन्द्रियविशेषगुणोपलक्षितं गुणत्वमेव तथा । अवच्छिन्नपरिमाणोपलक्षितं परिमाणत्वमेव च प्रवृत्तिनिमित्तमिति भावः ।

शे०वा०— अंशांशिनोरभेदस्यानवस्थापरिहारोपयोगितया नात्रोपन्यासः किन्त्वनुपपत्त्यन्तरनिरासार्थतयैवेत्यभिप्रेत्य तदनपेक्षयैवानवस्थां परिहर्तुमुक्तनियमाभिप्रायमाह **अयमभिसन्धिरिति** । इतीत्यतःपरं अभिप्राय इति वर्तते । तर्हि किमर्थमत्र तदुपन्यास इत्यतोऽनुपपत्त्यन्तरनिरासार्थतां तस्य दर्शयितुमनुपपत्त्यन्तरं तावदुद्भावयति **एतावत्त्विति** । अतिप्रसङ्गमेव विशदयति **तथा सति हीति** । अविशेषादिति भावः । प्रमाणविरोधमेव दर्शयति **घटसंयोग इति** । मूलविघटनेनातिप्रसङ्गं परिहरति **अतिप्रसङ्गो हीति** । किमत्र घटवृत्तित्वमात्रं साध्यं किंवा अंशावृत्तित्वे सति घटवृत्तित्वमिति विकल्पद्वयं मनसि निधायाद्यं दूषयति **अनुमान-**

स्यापीति । सिद्धसाधनत्वमेव प्रथयति **अंशवृत्तेरेवेति** । द्वितीयमनूद्य दूषयति **अंशावृत्तित्वे सतीति** । **साध्यविकल इति** । घटरूपस्यापि घटांशवृत्तित्वाङ्गीकारेण तत्र घटांशावृत्तित्वस्य परं प्रत्यसिद्धेरिति भावः । तदन्यवृत्तित्वं किं तदत्यन्तभिन्नवृत्तित्वमभिमतं तद्भिन्नवृत्तित्वमात्रं वेति विकल्पद्वयं मनसि निधायाद्यं दूषयति **द्वितीयस्त्विति** । अंशांशिनोर्भेदाभेदवादिनं प्रति तदत्यन्तभिन्नवृत्तित्वस्यासिद्धेरिति भावः । द्वितीयं दूषयति **अन्यथासिद्धो वेतीति** । घटभिन्नवृत्तित्वरूपहेतुं प्रति घटसंयोगत्वाभावो न प्रयोजकः । अंशस्य घटाभिन्नत्वेन तत्संयोगस्य घटसंयोगत्वेऽपि तस्यैवांशस्य घटभिन्नत्वस्यापि सत्त्वेन घटभिन्नवृत्तित्वस्य चोपपन्नत्वात् । तथा चांशस्य घटभिन्नत्वमेवोक्तहेतुं प्रति प्रयोजकमित्यन्यथासिद्ध इत्यर्थः । इतीत्यस्यायमिति पूर्वेण सम्बन्धः । अनवस्थाप्रसङ्गरूपविपक्षे बाधकसद्भावान्नाप्रयोजकत्वमित्यभिप्रेत्य गूढाभिसन्धिः पृच्छति **यदीति** । अनवस्थितकार्यकारणभूतासिद्धसंयोगपरम्पराया अभावान्नानवस्थेत्यभिप्रेत्य गूढाभिसन्धिरेव परिहरति **अनेनैवेति** । पूर्वपक्षी स्वाशयमुद्घाटयति **न चेति** । सिद्धान्त्यपि तमुद्घाटयति **सर्वेऽपीति** । **इतरेतरापेक्षाया इति** । तथा च मूलक्षयकारित्वं नास्तीति भावः । न च सामान्यानवस्थावदप्रामाणिकस्वीकाररूपा । प्रामाणिकत्वादित्याशयात् । विपक्षे बाधकान्तरमाशङ्कते **एवं तर्हीति** । इष्टापत्तेस्तर्काभासोऽयमित्याशयेन परिहरति **क इति** ।

वा०र०— अंशाशिनोरभेदेत्यादेरवस्थेति पाठो मूलकोशस्थः । अन्यादृशस्तु लेखकप्रमादात् ।

विट्ठल०— अनवस्थापरिहारं व्यञ्जयितुमाह **अयमभिसन्धिरिति** । **क्व नामेति** । संयोगस्य प्रदेशवर्तितायाः सर्वप्रत्यक्षसिद्धत्वादिति भावः । **एवं सतीति** । अपर्यवसितांशसंयोगेषु जातेष्वेव परमाण्वादिसंयोग इति न किन्तु परमाण्वादिः स्वैकदेशेन संयोगवान् भवतीत्येवं सतीत्यर्थः । अंशांशिनोरभेदेनेत्येतदभिप्रायं वक्तुं शङ्कान्तरमुत्थापयति **एतावत्तु भवेदिति** । प्रमाणविरोधाच्चेत्युक्तमुपपादयति **घटसंयोग इति** । तदव्यावृत्तित्वादिति द्वितीयहेतौ तदन्येत्यन्तभेदो विवक्षितः उताभेदसहितो भेदः आद्ये स्वरूपासिद्धिः द्वितीयेऽशांशिनो भेदेनांशसंयोगस्यांशिसंयोगत्वेऽपि भेदेन तदन्यवृत्तित्वोपपत्तेरन्यथासिद्धिरित्याह **द्वितीयस्त्विति** । यद्वा पररीत्या संयोगस्य द्विनष्टत्वेन तदन्यवृत्तित्वेऽपि तद्विवृत्तित्वोपपत्तेरिति भावः । रीत्यन्तरेणानवस्थामाशङ्क्य परिहर्तुं पृच्छति **यदीति** । उत्तरमाह **अनेनैव न्यायेनेति** । घटसंयोगन्यायेनेत्यर्थः । सर्वेऽप्यंशिसंयोग इति घटपटकुड्यादिसर्वांशिगतावित्यर्थः । न त्वेकस्मिन्घटादावंशिसंयोगबाहुल्यमिहविवक्षितम् । एक एवांशिसंयोगस्तदंशे वर्तत इति वक्ष्यमाणत्वात् । **इतरेतरापेक्षाया इति** । एकैकस्मिन् घटादावनेकसंयोगाभावेनांशसंयोगतीति परम्परा तेषामितरेतराक्षाभावादिति भावः । **यथा हस्ततरुसंयोगादिति** । कार्यकारणस्य हस्तस्य तदु कारणनतरुणसंयोगाद्धस्तकार्यस्य कार्यस्य तदकार्येण तरुणासंयोगो भवतीत्यर्थः । तरुसंयोग इतीतिशब्दस्य इत्येतदपि निरस्तमिति पूर्वेण सम्बन्धः । तत्कथमित्यत आह **न हीति** । **अत एवेति** । हस्तकार्ययोरभेदादेवेत्यर्थः । **अशुचिसंयोग इति** । अशुचिस्वानादिसंयोग इत्यर्थः ।

चषक— दृष्टान्तः तद्रूपलक्षणः । **साध्यविकल इति** । घटरूपस्यापि तदभिन्नतदंशवृत्तित्वादिति भावः । तत्प्रतियोगिकात्यन्तभेदो हेतुतावच्छेदकघटक इत्यभिप्रेत्य स्वरूपासिद्ध इति । तदविशेषितभेद-निवेशाशयेनान्यथासिद्धो वेति । घटतदंशयोर्भेदाभेदोपगमेन साध्यमन्तरेणापि हेतुसत्त्वोपपत्तेरिति भावः । **अंशांशिसंयोगैक्यसमर्थनम् ॥**

१९१ **सु०—** 'अंशसंयोग एव ह्यंशिनः संयोगः, अतो नानवस्थे'त्युक्तमनवस्थापरिहारं विवृणोति **एकस्मिन्निति** ।

अनु०— एकस्मिञ्जात एवान्यः संयोगो जायते यदि ।
अनवस्था तदैव स्यात्संयोगैक्ये भवेत्क्व सा ॥

अवयवपरम्पराया अविश्राममभ्युपगम्य **एकैकस्मिन्** अवयवसंयोगे जात **एवान्यः** अवयव**संयोगः** जायत इति **यदि** अङ्गीकुर्मः **तदैव अनवस्था स्यात्** । **संयोगैक्ये** 'अवयविसंयोगः क्रियातो जातः तदवयवे वर्तते, अवयववृत्तेः संयोगादपरोऽवयविनः संयोगो नास्ती'ति वादे तु, **क्व सा** अनवस्थेति ।

शे०वा०— एकस्मिन्नित्युत्तरवाक्यस्य पूर्वेण गतार्थतामाशङ्क्य परिहरति **अंशेति** ।

॥ इति उक्तार्थस्पष्टीकरणम् ॥

* * *

॥ अथ ततस्तत्र अवयवावयविगतसंयोगैक्योक्त्या संयोगत्रित्वनिरासः ॥

१९२ **सु०—** एतेनैतदपि निरस्तम् । यदाहुः, 'संयोगस्त्रिविधोऽन्यतरकर्मजोभयकर्मज-संयोगजभेदात् । तत्रान्यतरकर्मजो यः क्रियावता निष्क्रियस्य, यथा स्थाणोः श्येनेन । उभयकर्मजस्तु विरुद्धदिक्क्रिययोः सन्निपातो, यथा मल्लयोः । संयोगजस्तु संयोगः कारणा-कारणसंयोगात् कार्याकार्यसंयोगो, यथा हस्ततरुसंयोगात् कायतरुसंयोग' इति ।

न हि हस्ततरुसंयोगातिरिक्तः कायतरुसंयोगोऽस्ति येनासौ तज्जन्यः स्यात्, प्रमाणाभावात् । किन्तु हस्तकर्मणा जनितो हस्तवृत्तिः संयोग एव हस्तकाययोरभेदात् कायसंयोगो भवति ।

अत एव हस्तस्याशुचिसंयोगे कायक्षालनादिविधयोऽप्युपपद्यन्ते ।

परि०— एतेनेति । अंशांशिसंयोगस्यैक्यकथनेनेत्यर्थः । **विरुद्धदिक्क्रिययोरिति** । दिक् च क्रिया च दिक्क्रिये । विरुद्धे दिक्क्रिये ययोस्तौ विरुद्धदिक्क्रियौ तयोरित्यर्थः । तरुसंयोग इतीतिशब्दस्येत्येतदपि निरस्तमिति पूर्वेणान्वयः । कथमित्यत आह **न हीति** । **कायक्षालनादीति** । 'नारं स्पृष्ट्वा अस्थि सस्नेहं सवासा जलमाविशेदि'त्यादिविधय इत्यर्थः ।

वं०प०— अत एव हस्तकाययोरभेदादेव । **उपपद्यन्ते** न ह्यत्यन्तभेदे एकस्याशुचिसंयोगेऽपरस्य क्षालनं युक्तम् । देवदत्तस्याशुचिसंयोगे यज्ञदत्तस्य क्षालनादर्शनादित्यर्थः ।

शे०वा०— अनवस्थापरिहारार्थं भाष्यकारैरुपन्यस्तं संयोगैक्यं न तत्परिहारमात्रप्रयोजनकं किन्तु परोक्तसंयोगत्रैविध्यनिरासप्रयोजनकमपि भवतीत्याशयेन तदर्थतयाऽपि तद्द्योजयति **एतेनेति** । संयोगैक्यवचनेन तत्त्रैविध्यमपि निरस्तमित्यर्थः । कास्तास्तिस्रो विधा इत्यतस्तं दर्शयति **अन्यतरेति** । अयं चान्यतरकर्मज उभयकर्मजः संयोगजश्च संयोग इति तत्सूत्रस्यार्थानुवादः ।

अन्यतरकर्मजं लक्षयति **तत्रेति** । **तत्र** तेषु मध्ये । **क्रियावता** चलता । **निष्क्रियस्य** तदभिमुखक्रियारहितस्येत्यर्थः । तत्संयोगानुकूलक्रियाशून्यत्वमेव च निष्क्रियत्वमत्र विवक्षितम् । तेन यत्रैकः स्वाभिमुखीं दिशं गच्छत्यन्यश्च तत्पृष्ठमनुगच्छति तत्र सक्रियस्यापि सक्रियेणान्यतरकर्मजसंयोगस्य दर्शनेन सर्वथा निष्क्रियत्वस्य बाधितत्वादिति भावः । तमुदाहरति **यथेति** ।

उभयकर्मजं लक्षयति **उभयेति** । विरुद्धे दिशौ प्राचीप्रतीच्यौ अर्वाच्युदीच्यौ वा । दृश्यादृश्ये इति यावत् । एकदिगभिमुखेनापरस्य अप्रत्यक्षत्वस्यैव दिशो विरुद्धत्वात् । ययोः क्रिययोस्तौ विरुद्धदिक्क्रियौ तयोः सन्निपातोऽभिघात इत्यर्थः । तमुदाहरति **यथेति** । यद्यपि कर्मणः कर्मत्वेनैव संयोगं प्रति कारणत्वात् प्रत्येकमेव कर्मणोः संयोगजनकत्वमिति संयोगद्वयमेवोत्पत्तुमर्हति । तथाऽपि संयोगद्वयस्याननुभवात् कर्मभ्यां सम्भूय एक एव संयोगो जन्यते । अत एव नैककर्मणाऽन्यथासिद्धिः । विनिगमकाभावेनोभयोरप्यारम्भकत्वादिति भावः । ननु तथाऽपि कर्मत्वेनैव संयोगजनकत्वात् कपालद्वयजन्यघटवदवान्तरजातिभेदाभावात् कथं त्रैविध्यमिति चेत् । अत्राहुः । जातिभेदाभावेऽप्यन्यतरकर्मजत्वाद्युपाधिभेदात् तत्पुरस्कारेणैवायं विभाग इति । यद्वा कस्यचित्संयोगस्य यावत्स्वाश्रयं विभागविरोधित्वं कस्यचिन्नत्यवान्तरभेदस्यावश्यकत्वात् तत्र चान्यतरकर्मोभयकर्मणामेव प्रयोजकत्वमिति तदभिप्रायेणायं विभाग इति । वस्तुतस्तु ययोः सामान्ययोः कार्यकारणभावः, बाधकं विना तयोर्विशेषयोरपि स इति न्यायात्कर्मत्वेन संयोगजनकत्वबलादेवान्यतरकर्मत्वेनोभयकर्मत्वेन च तत्कारणतासिद्ध्या तज्जन्यतावच्छेदकत्वेन जातिविशेषस्याप्यवश्यं स्वीकर्तव्यत्वसिद्ध्या तमादायैव त्रैविध्या-

नुसरणस्यौचित्यादित्यवधेयम् । कथात्वेन वादादीनामेकत्वसम्भवेऽपि तद्भेदवत् स्वतन्त्रेच्छाया अपर्यनुयोज्यत्वादेवायमपि भेदो निर्वाह्य इत्यप्याहुः ।

संयोगजं लक्षयति **संयोगजस्त्विति** । तमुदाहरति **यथेति** । अत्र हस्तस्य कार्यकारणत्वात् तयोश्च तदकारणत्वात् संयोगस्य कारणाकारणसंयोगत्वम् । कार्यस्य हस्तकार्यत्वात् तरोश्च तदकार्यत्वात् तत्संयोगस्य कार्याकार्यसंयोगत्वं बोध्यम् । न च तत्र मानाभावः । करतरुसंयोगे सति शरीरं तरुसंयुक्तमिति प्रतीतेरेव तत्र प्रमाणत्वात् । ननु नायं संयोगजः संयोगोऽन्यतरकर्मजत्वात् । तथा हि । करतरुसंयोगः किं करमात्रकर्मणः किंवा तरुमात्रकर्मण आहोस्विदुभयकर्मणः । नाद्यः । करकर्मकाले शरीरकर्मणोऽप्यावश्यकतया तस्मादेव शरीरतरुसंयोगोत्पत्तिसम्भवे करतरुसंयोगस्यापि तत्र हेतुत्वे मानाभावात् । न द्वितीयः । तरुकर्मणा करतरुसंयोगजनिकाले शरीरं किं हस्तपिहितं येन तरुकर्मणैव शरीरतरुतसंयोगमुपेक्ष्य करतरुसंयोगस्य शरीरतरुसंयोगकारणत्वमङ्गीकर्तुमुद्यतोऽसि । अत एव न तृतीयः । अथ करतरुसंयोगः करमात्रकर्मण एव । न च तर्ह्युक्तदोषः । अवयविकर्मणो यावदवयवकर्मानियतत्वेन करमात्रकर्मकाले शरीरे कर्माभावादिति चेत् । अस्त्वेतद्यथातथा । करकर्मण एव कायतरुसंयोगे कारणता भविष्यति । करतरुसंयोगजनकतया क्लृप्तत्वात् । न च करगतकर्मणस्तत्रासमवायिकारणत्वं न सम्भवति । समवायिकारणप्रत्यासत्त्यभावादिति वाच्यम् । तन्तुरूपस्येव कारणैकार्थप्रत्यासत्त्यैव तत्सम्भवादिति चेन्मैवम् । सामानाधिकरण्यलाघवेन सजातीयत्वलाघवेन च करतरुसंयोगस्यैव कारणत्वं न तु कर्मणः सजातीयसमानाधिकरणकारणसम्भवे विजातीयासमानाधिकरणकल्पनस्याप्रामाणिकत्वादिति । इतीत्यस्येत्येतदपीति पूर्वेण सम्बन्धः । एतेनेत्युक्तमेव विशदयति **न हीति** । कुतो नास्तीत्यत आह **प्रमाणेति** । संयोगद्वैताप्रतिभासादिति भावः ।

अत एवेति । अवयवसंयोगस्यैवावयविसंयोगत्वादेवेत्यर्थः । अयं भावः । हस्तस्याशुचिसंयोगे कायक्षालनादिकर्तव्यता तावद्बिधीयते । न चेयं निर्निमित्ता सम्भवति अतिप्रसङ्गादिति निमित्तं वाच्यम् । तच्च न तावद्धस्ताशुचिसंयोग एवेति वक्तुं शक्यम् । अन्यनिष्ठसंयोगस्यान्यक्षालननिमित्तताया अतिप्रसङ्गपराहतत्वात् । नापि हस्ताशुचिसंयोगजन्यकायाशुचिसंयोगस्तत्र निमित्तम् । हस्ताशुचिसंयोगातिरिक्तकायाशुचिसंयोगस्यैवाप्रामाणिकतया तन्निमित्तताया दूरनिरस्तत्वात् । तस्मादवयवावयविनोरभेदेनावयवसंयोगस्यैवावयविसंयोगत्वमिति संयोगद्वयैक्येनैव तदुपपत्तिर्न प्रकारान्तरेणेति ॥ तातचरणास्तु प्रमाणाभावेन हस्ततरुसंयोगातिरिक्तकायतरुसंयोगाभावादित्युक्तम् । तत्र प्रमाणाभावोऽसिद्धः । हस्तस्याशुचिसंयोगे सति कायक्षालनादिविध्यन्यथाऽनुपपत्त्या तस्य सिद्धत्वादित्यत आह **अत एवेति** । हस्तकर्मणा जनितस्य हस्तवृत्तिसंयोगस्यैव हस्तकाययोरभेदेन कायसंयोगत्वादेवेत्यर्थः । ततश्चाभेदेनैव कायक्षालनादिविधेरुपपन्नत्वेन तदन्यथाऽनुपपत्त्यभावान्न तयाऽप्यतिरिक्तकायसंयोगसिद्धिरिति भाव इत्याहुः ॥ संयोगभेदमादाय हि कायक्षालनादिविधिः परेणोपपादितः । तत्र यदि संयोगभेदो न स्यात् तदा तन्निमित्तककायक्षालनादिविधेरनुपपत्तिः स्यादित्यत आह **अत एवेति** । संयोगैक्यादेवेत्यर्थ इत्यप्याहुः ।

वा०२०— संयोगैक्यवचनेनेति । अंशिसंयोग एवांशसंयोग इत्यवयवावयवीत्यादि गुणकिरणावल्यनुसारेणाह **अन्यतरकर्मजमित्यादि** । वर्धमानानुसारेण निष्क्रियत्वं निरूपयति **तत्संयोगानुकूलेति** । **यत्रैक इति** । धावन्निति शेषः । अन्यश्चेत्यत्रापि उक्तशेषः । अत एवोक्तम् । **सूत्रोपस्कारे संक्रियस्यापि धावतस्तथा धातवेति** । अनेन हि यत्राभिमानपूर्वकं वा निमित्तान्तरेण वा एको धावति अन्यश्च तां स्प्रष्टुं पृष्ठतोऽनुधावति धावंश्च तं स्पृशति । तत्र तत्संयोगनियमाभिप्रायेणैतत् इत्युक्तं भवति । किरणावल्यनुसारेणाह **उभयकर्मजमित्यादिना इत्यर्थ इत्यन्तेन** । तत्र विरोधोपपादनपरवर्धमानानुसारेण विरोधमुपपादयति । अत्रापरस्य अप्रत्यक्षत्वस्यैवेति पाठः स्वरसः । वर्धमानानुसारित्वे तु अपरस्य दिग्विशेषस्येति दिगस्यन्तरस्ये वा व्याख्या द्रष्टव्या । तेन स्त्रीलिङ्गाभावोपपत्तिरिति बोध्यम् । वर्धमानानुसारेण उभयकर्मजसंयोगसाधनपूर्वकमन्यतरकर्मजोभयकर्मजयोः पार्थक्यानुपपत्तिमाशङ्क्य तत्परिहारद्वयमाह **यद्यपीत्यादिना अयं विभाग इतीत्यन्तेन । तत्र कस्यचिदिति** । विरुद्धदिक्क्रियमलूरूपाश्रयगतसंयोगस्य मलूद्वयगतकर्माभ्यां विभागे सति नाशात् तत्संयोगस्य यावत् स्वाश्रयः तन्निष्ठविभागविरोधित्वं श्येनस्य स्थाणुना संयोगस्य तु श्येनमात्रकर्मणा जातस्य न विनष्टविभागनाश्यत्वात् यत्किञ्चिदाश्रयगतविभागविरोधित्वम् । प्रकारान्तरासम्भवादेवं विरोधित्वं वाच्यमिति प्रतिभाति । कस्यचित्संयोगस्य यावत्स्वाश्रयविभागविरोधित्वमित्यादि वर्धमानोक्तिर्व्याख्येयास्ति । .....सारेणाह **वस्तुतस्तु ययोरित्यादिना अवधेयमित्यन्तेन** । मुरारिभट्टमतमाह **कथात्वेनेत्यादिना आहुरित्यन्तेन** । मुरारिणोक्तप्रकारेणाशङ्क्य निराकरोति । **ननु नायमित्यादि प्रामाणिकत्वादितीत्यन्तेन** । **कायक्षालनादीति** । कायक्षालनादिकर्तव्यताविधिश्च नारं स्पृष्ट्वा अस्थि सस्नेहं संवासा जलमाविशेत् इत्यादिरूपो द्रष्टव्यः । अतिप्रसङ्गादितीत्यत्रेतिशब्दो हेतौ । अतो निमित्तं वाच्यमित्यर्थः ।

स०व्र०— अत एवेति । हस्तसंयोगकायसंयोगयोरभेदादेवेत्यर्थः । ननु भेदेऽपि कायप्रक्षालनमुपपन्नम् । हस्ताशुचिसंयोगेन कायस्याशुचिसंयोगोत्पादनादिति चेन्न । हस्तस्याशुचिसंयोगातिरिक्तस्य कायाशुचिसंयोगस्यैवाप्रामाणिकत्वात् । तथा च हस्तस्याशुचिसंयोगेन कायस्याशुचिसंयोगोत्पादनानुपपत्तेः हस्तसंयोगे तस्यैव प्रक्षालनादिकं विधेयम् । न तु कायस्य । तस्मादन्यथानुपपत्त्या तयोरैक्यसिद्धिरिति ।

चषक— एतेन अंशांशिसंयोगैक्यसमर्थनेन । **विरुद्धदिक्क्रिययोरिति** । कृतेतरद्वन्द्वादिक्रियापदस्य विरुद्धपदेन बहुव्रीहिरिति व्याकुर्वन्ति । कृतकर्मधारयविरुद्धदिक्पदेन सप्तमीद्विवचनान्तेन क्रियापदस्य व्यधिकरणबहुव्रीहिरित्यपि व्याचक्षते । इतीति निरस्तमित्यनेनान्वेति ।

॥ इति तत्र अवयवावयविगतसंयोगैक्योक्त्या संयोगत्रित्वनिरासः ॥

* * *

॥ अथ च ततस्तत्र अवयवावयविगतविभागैक्योक्त्या च विभागद्वैविध्यनिरासः ॥
॥ अथ तत्रापि चादौ निरसनीयस्य विभागद्वैविध्यस्य निरूपणम् ॥

१९३ **सु०— अत एव विभागजोऽपि विभागो निरस्तः ।**

द्विविधं हि तमाचक्षते, कारणाकारणविभागात् करणविभागाच्चेति । तत्राद्यो यथा हस्ततरुविभागात् कायतरुविभागः । द्वितीयो यथा 'द्वितन्तुकावयवे तन्तौ कर्मोत्पन्नं तस्य तन्त्वन्तराद्विभागं करोति । विभागात्तन्त्वोः संयोगो नश्यति । ततो द्वितन्तुकविनाशः । तत इदानीं तन्त्वोर्वर्तमानो विभागः सक्रियस्यावयवस्य द्वितन्तुकसंयुक्ताकाशादिदेशाद्विभागं करोती'ति ।

परि०— अत एवेति । अवयवावयविनोरभेदादेवेत्यर्थः । **द्वितन्तुकेति** । द्वितन्तुकं यत्कार्यं तदवयवभूते तन्तावित्यर्थः । **आकाशादिदेशादिति** । तथा च द्वितन्तुको यः पटः तत्कारणीभूतयोस्तन्त्वोर्विभागाज्जातो विभागः इति ज्ञेयम् । अत एवेति हस्तकर्मणेत्यादि-पूर्ववाक्योक्तस्य परामर्शः ।

यादु०— द्वितन्तुकावयव इति । द्वितन्तुकस्य पटस्यावयवभूते तन्तावित्यर्थः ।

शे०वा०— अत एवेति । अवयवावयविनोरभेदेनावयवविभागस्यैवावयवविविभागत्वात् अवयव-विभागातिरिक्तस्यावयवविविभागस्य प्रमाणाभावेनासत्त्वादेवेत्यर्थः । **कारणविभागाच्चेति** । कारणमात्रविभागा-च्चेत्यर्थः । **हस्तेति** । हस्तकर्मजनिताद्धस्ततरुविभागाज्जातः कायतरुविभागो हस्तस्य कायकारणत्वात् तरोश्च तदकारणत्वात् कायस्य च हस्तकार्यत्वात् तरोश्च तदकार्यत्वात् भवति कारणाकारणविभागजः कार्याकार्य-विभाग इत्यर्थः । **द्वितन्तुकावयवे तन्ताविति** । द्वितन्तुकस्य पटस्यावयवभूते तन्तावित्यर्थः । **तन्त्व-न्तरादिति** । आरम्भकद्रव्यादित्यर्थः । **संयोगो नश्यतीति** । द्रव्यारम्भकसंयोगो नश्यतीत्यर्थः । विभागस्य संयोगविरोधित्वात् तेन तन्नाश इत्यर्थ इति भावः । **तत इति** । असमवायिकारणनाशे कार्यनाशस्यावश्यकत्वादिति भावः । एवं कर्मविशेषाद्विभागविशेषः ततो द्रव्यारम्भकसंयोगनाशः तस्मादवयवविनाश इत्यस्तु, विभागजविभागस्य तु न काऽपि वार्तेत्यत आह **तत इति** । **सक्रियस्येति** । यस्मिंस्तन्तौ कर्मोत्पन्नं तस्येत्यर्थः । **आकाशादिति** । अनारम्भकदेशादित्यर्थः ।

वा०र०— कारणाकारणविभागादिति मूलम् । यद्यपि कारणविभागात् कारणाकारणविभागश्चेत्यादि प्रशस्तदेवाचार्यादिकथितविभागे कारणविभागे कारणविभागस्यैव प्रथमतो निर्देशोऽस्ति । तथापि प्रथमत्वेनोक्ते

विचारबाहुल्या सूचीकटाहन्यायेन मूले अन्यथानिर्देशादिकमिति ज्ञेयम् । कारणमात्रविभागेत्यादि किरणावली-गङ्गापुर्यनुसारेण मात्रपदान्तर्भविन व्याचष्टे **कारणमात्रविभागाच्चेत्यर्थ इति** । अत्र **द्वितन्तुकावयव** इत्यादि मूलग्रन्थः । अवयवकर्मावयवान्तरादेव विभागमारभतो पटावयवकर्मपटावयवान्तरादीत्यादि प्रशस्तपादभाष्या-द्यनुसारेण ज्ञेयः । अवयवान्तरादित्यारम्भकद्रव्यमभिप्रैतीति किरणावल्यनुसारेण व्याचष्टे **आरम्भकद्रव्यादित्यर्थ इति** । किरणावल्यां द्रव्यसामान्यस्य प्रकृतत्वेन तदनुसारेणारम्भकद्रव्यादित्येव व्याख्यानस्यावश्यकत्वेऽपि मूले तन्त्वन्तरादित्युक्तेः तन्त्वन्तररूपात् आरम्भकद्रव्यादित्येतावतोऽर्थस्यावश्यं वक्तव्यतया मूलगततन्त्वन्तरा-दित्येतन्मेलनेनैव तन्वन्तररूपादारम्भकद्रव्यादिति टीकायामर्थकथनमभिप्रेतमिति ज्ञातव्यम् । द्रव्यारम्भसंयोग-विनाश इति प्रशस्तदेवोक्त्यनुसारेण व्याख्याति **द्रव्यारम्भकेति** । पटरूपद्रव्यारम्भकेत्येवार्थोऽत्राभिमतः । द्वितन्तुकपटस्येव प्रकृतत्वेन द्रव्यमात्रस्य प्रकृतत्वादिति ज्ञेयम् । **एवमिति** । उक्तरीत्येत्यर्थः ।

विठ्ठल०— द्वितन्तुकावयव इति । द्वितन्तुकस्य तन्तुद्वयाख्यस्य पटविशेषस्यावयवभूत एकस्मिन् तत्त्वावित्यर्थः । **तस्येति** । कर्मवतस्तन्तोरित्यर्थः । **सक्रियस्येति** । कर्मानधिकरणस्य तन्तोस्तद्वशाद्विभागा-योगादेव मुक्तमिति ज्ञेयम् । अतः द्वितन्तुको यः पटस्तत्कारणयोस्ततोर्विभागात्सक्रियस्य तन्तोराकाशादि भागा जायत इति विभागजो विभाग इति भावः ।

चषक— द्वितन्तुकावयव इति । बहुव्रीहिगर्भः षष्ठीतत्पुरुषः । **सक्रियस्येति** बहुव्रीहिः । स्वजनक-(स्व=विभाग)क्रियाविशिष्टस्येत्यर्थः ।

॥ इति निरसनीयस्य विभागद्वैविध्यस्य निरूपणम् ॥

* * *

॥ अथ च ततो विभागस्य प्रथमविधायाः अनुपपन्नत्वम् ॥

१९४ सु०— तत्राद्यस्तावदनुपपन्नः, हस्ततरुविभागातिरिक्तस्य कायतरुविभागस्यानुप-लम्भात् । हस्तकर्मणा जनितो हि विभागो हस्तकाययोरभेदाद्धस्तकायगुणो भवति । अत एव विवादाध्यासितो विभागो न कर्मासमवायिकारणकः कर्मैकार्थासमवेतत्वात् शब्दव-दित्यसिद्धतया निरस्तम् ।

परि०— विवादाध्यासितो विभाग इति । कारणविभागाज्जातत्वेनोक्तो विभाग इत्यर्थः । **कर्मैकेति** । कर्मणा सहैकस्मिन्नर्थेऽसमवेतत्वादित्यर्थः ।

गु०दी०— कर्मैकार्थासमवेतत्वात् इत्यत्र कर्मणा सहैकार्थे गगनेऽसमवेतत्वादिति परस्याभिप्रायः । भेर्याकाशसंयोगासमवायिकारणके शब्दासमवायिकारणके च शब्दे कर्मणा सहैकार्थे गगनेऽसमवेतत्वान्न कर्मासमवायिकारणक इति साध्यं चास्तीति परस्य हृदयम् । तत्र दृष्टान्तस्तावद्विषमः । संयोगजनकीभूतभेर्याकाशयोर्द्वयोरपि कर्माभावाद्युक्तस्तत्र कर्मासमवायिकारणत्वाभावः । पक्षे तु तन्त्वाकाशयोर्मध्ये एकस्मिन्नेव कर्मैकार्थासमवेतत्वम् । न तु द्वयोः । तथा चैकार्थे कर्मणा सह समवेतत्वात् कर्मासमवायिकारणकत्वमपि स्यात् । किं च सकर्मकाकर्मकस्थाणुश्येनविभागे उक्तविधया कर्मैकार्थासमवायित्वेऽपि कर्मासमवायिकारणकत्वस्य त्वयैवाङ्गीकाराद्व्यभिचारश्चेत्यपि दूषणं ग्राह्यम् ।

वं०प०— अत एवेत्युक्तं विशदयति **हस्ततरुविभागातिरिक्तस्येत्यादिना । भवतीति** । तथा चाभेदेन हस्ततरुविभागस्यैव कायतरुविभागत्वात् तत्र च हस्तकर्मण एवासमवायिकारणत्वं न विभागस्येति भावः । **विवादाध्यासित इति** । कायतरुविभाग इत्यर्थः । **न कर्मासमवायिकारणक इति** । किन्तु हस्ततरुविभागसमवायिकारणक इत्यर्थः । **कर्मैकार्थेति** । कर्मणो हस्तनिष्ठत्वाद्विभागस्य च कायवृत्तित्वान्न कर्मैकार्थसमवेतत्वं कायतरुविभागस्येत्यर्थः । तथा च विभागासमवायिकारणकत्वमेव वक्तव्यमित्यर्थः । **शब्दवदिति** । आद्यशब्दस्य संयोगविभागासमवायिकारणकत्वात् द्वितीयादिशब्दस्य पूर्वशब्दासमवायिकारणत्वेन साध्यमस्तीति ध्येयम् । अत एवेत्युक्तं विशदयति **असिद्धतयेति** । हस्तकाययोरभेदात् कायतरुविभागस्यैव हस्ततरुविभागत्वेन कर्मणश्च हस्तनिष्ठत्वात् कायविभागस्यापि हस्तनिष्ठत्वात् कर्मैकार्थसमवेतत्वमस्तीति स्वरूपासिद्धिरित्यर्थः ।

कं०रा०— विवादाध्यासित इति । विवादाध्यासितः कायतरुविभागः कर्मासमवायकारणको न भवति कर्मणा सहैकस्मिन्नर्थे असमवेतत्वात् कर्मणो हस्तनिष्ठत्वेन कायतरुविभागपक्षे कर्मैकार्थासमवेतत्वरूपहेतुरस्ति तेन च कायतरुविभागस्य कर्मासमवायिकारणकत्वाभावसाधनेऽन्यस्यासमवायिकारणत्वाप्रसक्तेर्हस्ततरुविभागासमवायिकारणकत्वमेव सिद्ध्यतीति विभागजविभागसिद्धिरिति भावः । **असिद्धतयेति** । हस्तकाययोरभेदेन हस्तनिष्ठकर्मणः कायकर्मतया कायतरुविभागस्य कर्मणः सहैकस्मिन्नर्थे समवेतत्वात् कर्मैकार्थासमवेतत्वस्य पक्षे स्वरूपासिद्धत्वमिति भावः ।

श्रीनिधि०— अनुपपन्नतर इति । अध्यस्तव्यपदेशभेदादिना हस्तकायोर्भेदभ्रमे शङ्कापदवीं वा रोहति । अयं तु शङ्कापदवीमेव नारोहति । आभासस्य वा अनाभासस्य वा तद्धेतोरभावात् । दूरे स्वाङ्गीकारपदवीमिति भावेनेतरप्रयोगः । तथा हि विभागस्य विभागासमवायिकारणत्वं वदता वक्तव्यम् । किं अन्यथानुपपत्त्या एवं कल्प्यते । आहोस्वित् अकल्पने बाधकसत्त्वाद् कल्पने बाधकाभावात् । द्वितीयेऽपि किं प्रमाणबाधादुत तर्कबाधादिति विकल्पं मनसि निधाय आद्यं तावन्निराकरोति **तन्तुकर्मणैवेति** । **अन्यथेति** । अन्यथा उपपत्तावपि कारणत्वकल्पन इत्यर्थः । **आकाशादिदेशात्तु विभागादेवेति स्यादिति** । परेणाङ्गुलिकर्मणाङ्गुलेरङ्गुल्यन्तरविभागः । तत्संयुक्ताकाशादिदेशाच्च तत एव विभाग इत्यङ्गीकृतम् । तन्न स्यात्

न्यायसाम्यादित्यर्थः । अन्यथा अत्रापि तन्न स्यादिति भावः । अङ्गुलीतन्तुकर्मणोर्वैषम्यं शङ्कते **नन्वङ्गुलिकर्मेति** । **संयोगविभागजननाभ्युपगमादिति** । पूर्वदेशविभागः । उत्तरदेशसंयोगश्च एतस्मादेव कर्मणो भवत इति हि तदभ्युपगमः । संयोगविभागौ च विरुद्धाविति भावः । **तन्तुकर्मणेति** । द्वितन्तुकं यदोत्पद्यते तदा तन्तुक्रियया तन्त्वन्तरेणाकाशादिदेशेन संयोगो युगपत् अङ्गीकृतः । तौ च संयोगो विरुद्धावुक्तरीत्येत्यर्थः । **अन्यथेति** । द्रव्यारम्भकत्वानारम्भकत्वरूप विरुद्धधर्मवतोरेककर्मासमवायिकारणत्वानङ्गीकारे । **कारणमात्रसंयोगजोऽपि संयोगः स्वीकरणीय इति** । तन्तुकर्मणा तन्त्वन्तरसंयोगः उत्पद्यते तेन च संयोगेन आकाशादिदेशसंयोग इत्यपि स्वीकारः स्यादित्यर्थः ।

शे०वा०— हस्तकर्मणेति । हस्तकर्मणा जनितो हस्तवृत्तिर्विभाग एव हस्तकाययोरभेदात् कायवृत्तिर्भवतीत्यर्थः । **अत एवेति** । प्रमाणाभावेनावयवविभागातिरिक्तस्यावयविविभागस्यासत्त्वादेवेत्यर्थः । **असिद्धतयेति** । हस्तकर्मणा सहैकार्थसमवेतस्य हस्तविभागस्यैव हस्तकाययोरभेदेन कायविभागतया कर्मैकार्थसमवेतत्वेन तदसमवेतत्वस्यासिद्धत्वादित्यर्थः ।

विष्ठल०— विवादाध्यासित इति । कायतरुविभाग इत्यर्थः । **अत एवेति** । हस्तकाययोरभेदादेवेत्यर्थः । कर्मैकेति कर्मणा सहैकस्मिन् धर्मणि समवेतत्वादित्यर्थः । कर्मणो हस्तगतत्वाद्धस्तकाययोश्चात्यन्तभिन्नत्वात् । परमते च कार्ये कार्यप्रत्यासत्तेरावश्यकत्वादिति भावः ।

॥ इति विभागस्य प्रथमविधायाः अनुपपन्नत्वम् ॥

* * *

॥ अथ च तत्रान्ते विभागस्य द्वितीयविधायाः अनुपपन्नतरत्वम् ॥

१९५ सु०— द्वितीयस्त्वनुपपन्नतरः, तन्तुकर्मणैव तन्तोस्तन्त्वन्तरादाकाशादिदेशाच्च विभागोत्पत्त्युपपत्तौ क्रमकल्पनानुपपत्तेः । अन्यथाङ्गुलिकर्मणाङ्गुलेरङ्गुल्यन्तरादेव विभागो भवति आकाशादिदेशात्तु विभागादेवेति स्यात् ।

नन्वङ्गुलिकर्म अङ्गुलिविभागमाकाशादिविभागं च करोति, तयोर्विभागयोरविरुद्धत्वात्; तन्तुकर्म तु तन्त्वन्तरविभागमाकाशादिविभागं (च) न कर्तुमर्हति, तयोर्विभागयोः द्रव्यारम्भकसंयोगविरोधित्वाविरोधित्वरूपविरोधात् । न ह्यविरुद्धात्कारणाद्विरुद्धकार्योत्पत्तिः सम्भवतीति । मैवम् । एकस्मादेव कर्मणः संयोगविभागजननाभ्युपगमात्, तन्तु-

कर्मणा द्रव्यारम्भकानारम्भकतन्त्वराकाशसंयोगजन्माङ्गीकाराच्च । अन्यथा कारणाकारण-संयोगजसंयोगवत् कारणमात्रसंयोगजोऽपि संयोगः स्वीकार्यः स्यात् ।

परि०— संयोगविभागजननेति । उत्तरदेशसंयोगपूर्वदेशविभागयोर्जननाभ्युपगमादित्यर्थः । **तन्त्वन्तराकाशसंयोगेति** । तन्त्वन्तरसंयोगाकाशसंयोगयोर्जन्म इत्यर्थः । **अन्यथा कारणा-कारणेति** । कारणमात्रविभागजन्योऽपि विभागोऽस्तीति स्वीकार्य इत्यर्थः ।

यादु०— अन्यथा कारणाकारणेति । एवं तन्तुकर्मणैवोभयविभागोत्पत्तिसम्भवेऽपि यदि क्रम-विरोधभयेन कल्पनया कारणविभागजोऽपि विभागः स्वीक्रियत इत्यर्थः । **कारणमात्रसंयोगजोऽपीति** । तन्तोः कर्मणा आदौ तस्य तन्त्वन्तरसंयोगस्तेन च संयोगेन सक्रियस्य तन्तोस्तन्त्वन्तरावच्छिन्नाकाशसंयोगो जायत इत्यपि स्वीकार्यमित्यर्थः । अत्राप्येकेन कर्मणा विरुद्धयोः संयोगयोर्युगपदुत्पत्त्यसम्भवेन क्रमः कल्प्यत इति भावः ।

वं०प०— द्वितीयः कारणमात्रविभागजविभागः । **क्रमेति** । तन्तुकर्मणा सक्रियस्य तन्तोः तन्त्व-न्तरान्निष्क्रियाद्विभागः, तस्मात् कारणमात्रविभागात् सक्रियस्य तन्तोस्तन्त्वन्तरावच्छिन्नाकाशविभाग इति क्रमेत्यर्थः । **अन्यथा** उक्तरीत्या क्रमकल्पने । आकाशादिदेशात् सक्रियस्याङ्गुलेर्निष्क्रियाङ्गुल्यवच्छिन्नाकाश-देशाद्विभाग इत्यर्थः । **विभागात्** अङ्गुलिद्वयविभागात् । **इति स्यादिति** । तथा च कारणमात्रविभागजोऽपि विभागः स्वीकार्य इति भावः । **अविरुद्धत्वादिति** । अङ्गुलिद्वयसंयोगस्य वाऽङ्गुल्याकाशसंयोगस्य वा द्रव्या-नारम्भकत्वेनाङ्गुलिद्वयविभागाकाशविभागयोरपि द्रव्यानारम्भकसंयोगविरोधित्वेन वक्ष्यमाणविरुद्धत्वाभावादिति भावः । **न ह्यविरुद्धात्कारणादिति** । तन्तुकर्मरूपादविरुद्धात्कारणात् उक्तप्रकारेण विरुद्धं यत्कार्यं तन्त्वन्तर-विभागाकाशविभागरूपं तन्न भवतीत्यर्थः । अविरुद्धात्कारणाद्विरुद्धकार्यद्वयं न हि भवतीति नियमस्य स्थलद्वये व्यभिचारमाह **एकस्मादेवेत्यादिना** । **द्रव्यारम्भकेति** । तन्तुकर्मणा जातस्तन्त्वन्तरसंयोगः पटरूपद्रव्यारम्भक इत्यर्थः । **संयोगविभागेति** । तद्रूपविरुद्धकार्येत्यर्थः । द्रव्यारम्भकानारम्भकेति कार्ये विरुद्धत्वं दर्शयितुमुक्तम् ।

कं०रा०— द्रव्यारम्भकेति । एकस्य तन्तोस्तन्त्वन्ताद्विभागस्य द्वितन्तुकावयव्यारम्भकतन्तुद्वय-संयोगविरोधित्वादेकस्य तन्तोर्द्वितन्तुकावष्टब्धाकाशादितो विभागस्य तन्तुत्वाकाशादिसंयोगस्य द्रव्यारम्भक-त्वाभावेन द्रव्यारम्भकसंयोगाविरोधित्वात् तयोर्विभागयोर्द्रव्यारम्भकसंयोगविरोधित्वाविरोधित्वरूपं वैलक्षण्यं तथाप्येकस्य तन्तुकर्मणस्तादृशविभागद्वयजनकत्वं किं न स्यादित्यत आह **न हीति** । **तन्तुकर्मणेति** । तन्तुकर्मणा द्रव्यारम्भकतन्त्वन्तरसंयोगजन्मनः । द्रव्यानारम्भकाकाशसंयोगजन्मश्चाङ्गीकारादविरुद्धात्कारणा-द्विरुद्धकार्योत्पत्तिः न इत्येतदयुक्तमिति भावः । **अन्यथेति** । कारणाकारणविभागजविभागवत्कारणमात्रविभागज-विभागस्याप्यङ्गीकार इत्यर्थः ।

शे०वा०— तन्तुकर्मणैवेति । तन्त्वन्तरविभागजनकतन्तुकर्मणैवेत्यर्थः । **क्रमकल्पनेति** । द्वितन्तुकावयवे तन्तौ कर्मोत्पन्नं तस्य तन्त्वन्ताराद्विभागं करोतीत्यादिना प्रागुपदर्शितक्रमकल्पनेत्यर्थः । तन्तुकर्मणस्तन्त्वन्तरादेव विभागजनकत्वं नाकाशादिदेशादिति विप्रतिपद्यमानं प्रत्यनिष्टमाह **अन्यथेति** । विशेषहेत्वभावादिति भावः ।

प्रतिबन्दीमूलभूतमविशेषं वैषम्योपदर्शनेन विघटयंस्तत्परिहारमाशङ्कते **नन्विति** । किमत्र कर्मणो विरुद्धकार्यद्वयमात्राजनकत्वमभिमतं किंवा विरुद्धविभागद्वयाजनकत्वमिति विकल्पद्वयं मनसि निधायाद्यं प्रत्याचष्टे **एकस्मादिति** । क्रिया, क्रियातो विभागो, विभागात्पूर्वदेशसंयोगनाश उत्तरदेशसंयोगोत्पत्तिरिति तदभियुक्तोक्तेरिति भावः । एकस्यापि तन्तुकर्मणो विरुद्धसंयोगद्वयजनकत्ववद्विरुद्धविभागद्वयजनकत्वस्याप्युपपत्तेर्न द्वितीयोऽपीति भावेनैकस्य कर्मणो विरुद्धसंयोगद्वयजनकतायाः परेणाङ्गीकृततामाह **तन्तुकर्मणेति** । तन्तुकर्मणो द्रव्यारम्भकानारम्भकतन्त्वन्तराकाशसंयोगजनकत्वाङ्गीकारं विपक्षे बाधकोपदर्शनेनोपपादयति **अन्यथेति** । तन्तुकर्मणः संयोगजनकत्वाभाव इत्यर्थः । अयं भावः । यथा हि हस्तकर्मणो हस्ततरुसंयोगजनकत्वेऽपि कायतरुसंयोगाजनकत्वात् त्वन्मते कायतरुसंयोगो न कर्मजः किन्तु हस्तकर्मजनितहस्ततरुसंयोगजन्यतया कारणाकारणसंयोगजन्यकार्याकार्यसंयोगरूपत्वात् संयोगजसंयोग एव । तथा तन्तुकर्मणस्तन्तोस्तन्त्वन्तरसंयोगजनकत्वेऽपि तन्त्वाकाशसंयोगजनकत्वाभावात् तन्त्वाकाशसंयोगोऽपि न कर्मजः । किन्तु तन्तुकर्मजन्यो यस्तन्तोस्तन्त्वन्तरेण संयोगस्तज्जन्यतया कारणमात्रसंयोगजन्यकारणाकारणसंयोगरूपत्वात् संयोगजसंयोग एवेति विभागजविभागवत् संयोगजसंयोगस्याप्युक्तरूपेण द्वैविध्यप्रसक्त्या तदैकविध्यसिद्धान्तभङ्गप्रसङ्गात् । तत्संरक्षणाय तन्त्वन्तरसंयोगस्येव तन्त्वाकाशसंयोगस्यापि तन्तुकर्मजन्यत्वमेवाङ्गीकर्तव्यमिति युक्तमेव तत्प्रतिबन्धा तन्तुकर्मण एव विरुद्धविभागद्वयजनकत्वमिति ।

वा०र०— अभियुक्तोक्तेरिति भाव इति । पूर्वदेशसंयोगनिवर्तकविभागं प्रति उत्तरदेशसंयोगं प्रति च कर्मण एव कारणत्वं एतद्वाक्येऽभिप्रेतम् । अन्यथा योजनायां विभागज एवोत्तरदेशसंयोगः स्यादिति भावः । द्रव्यारम्भकसंयोगेत्यादिमूले कारणमात्रविभागजविभागनिराकरणपरक्रियावैलक्षण्यादित्यादिवाचस्पतिव्याख्यानरूपतयापि चाक्रिया द्रव्यानारम्भकसंयोगप्रतिद्वन्द्विनं विभागमारम्भ इत्यादि निबन्धग्रन्थोऽप्यनुसृतोऽस्ति ।

विट्ठल०— विभागादेवेति स्यादिति । परेणाङ्गुलैराकाशादिदेशविभागस्य कर्मसमवायिकारणकत्वाभ्युपगमादिदमापादनमिति ज्ञेयम् । **तयोर्विभागयोरिति** । तन्त्वन्तरविभागस्य द्वितन्तुकद्रव्यारम्भकतन्तुद्वयसंयोगविरोधितत्वम् । द्वितन्तुकसंयुक्ताकाशविभागस्य तु तदविरोधित्वमित्येवंरूपविरोधित्वात् । अङ्गुल्यन्तराकाशादिदेशविभागयोरविरोधित्वादिति भावः । अविरुद्धत्वेऽपि विभागयोरेकस्य कर्मजत्वमपरस्य विभागजत्वं किं न स्यादित्यत आह **न हीति** । कारणवैचित्र्ये कार्यवैचित्र्यस्याकस्मिकत्वप्रसङ्गादिति भावः । **एकस्मादिति** । विरुद्धयोरपि संयोगविभागयोरेककारणजन्यताङ्गीकारादविरुद्धात्कारणाद्विरुद्धकार्योत्पत्तिः न सम्भवतीति

नियमोऽनुपपन्नमिति भावः । नियमभङ्गमन्यत्रापि दर्शयति **तन्तुकर्मणेति** । द्वितन्तुकारम्भतन्तुद्वयमध्ये एकस्य ततोः कर्मणा द्वितन्तुकद्रव्यारम्भकत्वतदनारम्भकत्वरूपविरोधयुक्तयोस्तन्त्वन्तराकाशसंयोगयोजिनं नाङ्गीकारा चोक्तनियमभङ्ग इति भावः । तन्तुकर्मणैव तन्त्वदाकाशादिदेशाच्च विभागस्योत्पत्तिरित्यनङ्गीकृत्य कारण-विभागजोऽपि विभास्तीत्यङ्गीकारे बाधकान्तरमाह **अन्यथेति** । यथा कायकारणहस्तसंयोगजः कायसंयोगी क्रियते तद्वत् । कारणमात्रसंयोगजोऽपि तन्तोः कर्मणा आदौ तस्य तन्त्वन्तरसंयोगः तेन संयोगेन सक्रियस्य तन्तोः तन्त्वन्तरावच्छिन्नाकाशसंयोगो जायत इत्यपि स्वीकार्यमित्यर्थः । अत्राप्येकेन कर्मणा विरुद्धयोः संयोगयोः युगपदुत्पत्त्यसम्भवेन क्रमस्य कल्पनीयत्वादिति भावः ।

१९६ सु०— ननु संयोगस्य न स्वरूपतो विरोधोऽस्ति, यतो द्रव्यानारम्भकद्रव्यसमवेत एव संयोगो द्रव्यानारम्भकः । द्रव्यानारम्भकं च द्रव्यं सप्तविधम् । आरब्धद्रव्यम्, अन्त्यावयवि, स्पर्शरहितं, विनश्यदवस्थं, विनश्यदवस्थसंयोगं, निष्फलारम्भं विजातीयं चेति । ततः कर्मणैव संयोगद्वयजन्मोपपत्तिरिति ।

एवं तर्हि विभागयोरपि को विरोधः, द्रव्यारम्भानारम्भप्रयुक्तत्वाद्विरोधप्रतीतेः । तन्तुद्वयविभागजनकं तन्तुकर्म न तन्त्वाकाशविभागजनकं द्रव्यारम्भकसंयोगविरोधि-विभागजनककर्मत्वात् द्रव्यान्तरारम्भकसंयोगविरोधिविभागजनककर्मवत् इत्याभास-समानयोगक्षेमम् । तन्तुकर्म न तन्त्वन्तरविभागजनकं कर्मत्वात् सम्प्रतिपन्नकर्मवदित्यपि प्रयोगसम्भवात् । तत्र प्रमाणबाध इति चेत्, सममन्यत्रापि; विभागद्वययौगपद्यानुभवात्, तन्तुकर्म आकाशविभागजनकं कर्मत्वादिति प्रतिपक्षश्च । आकाशविभागे विभागेन कर्तव्ये कर्मणो निमित्तत्वाभ्युपगमात्सिद्धसाधनमिति चेन्न, जनकशब्दस्यासमवाय्यर्थ-त्वात् ।

परि०— आरब्धद्रव्यमिति बहुव्रीहिः । **निष्फलारम्भमिति** । कपालद्वयेनैव घटारम्भे तृतीयकपालो निष्फलारम्भद्रव्यम् । द्वाभ्यामेव परमाणुभ्यां द्व्यणुकोत्पत्तौ तृतीयपरमाणुर्निष्फला-रम्भद्रव्यमित्येवं ज्ञेयम् । **विजातीयमिति** । आप्यपरमाण्वादिकं पार्थिवद्व्यणुकानारम्भकमिति ज्ञेयम् । एवं चाकाशस्य निःस्पर्शकत्वेन द्रव्यानारम्भकत्वात् तन्त्वन्तरसंयोगाकाशसंयोगयो-रारम्भकत्वानारम्भकत्वरूपविरोधस्य आरम्भकानारम्भकद्रव्यसमवेतत्वेन सोपाधिकतया स्वाभाविक-त्वाभावात् तदुभयजन्माङ्गीकारो न युक्तः विभागद्वयजन्माङ्गीकारस्तु युक्त इति शङ्काभिप्रायः । तन्तुद्वयेति कर्मान्तं पक्षः । न तन्त्वित्यादि साध्यम् । **द्रव्येति** । द्रव्यारम्भको यः संयोगः तद्विरोधी

यो विभागः तज्जनककर्मत्वादित्यर्थः । अदृष्टादावव्यभिचाराय कर्मपदम् । तन्त्वन्तरसंयोगजनके तन्त्वाकाशविभागजनके तन्तुकर्मण्यव्यभिचाराय द्रव्यारम्भकसंयोगविरोधीति विशेषणम् । **द्रव्यान्तरेति** । घटारम्भक इत्यर्थः । **इत्याभासेति** । इति परकीयानुमानं वक्ष्यमाणाभाससमानमित्यर्थः । आभासप्रयोगमेवाह **तन्तुकर्मेति** । **सम्प्रतिपन्नकर्मवदिति** । घटकर्मवदित्यर्थः । सममित्युक्तं बाधकप्रमाणं दर्शयति **विभागद्वयेति** । तन्त्वन्तराकाशादिभागद्वयेत्यर्थः । **कर्मत्वादिति** । कर्ममात्रस्य स्वाश्रयवस्तुन आकाशप्रदेशाद्विभागजनकत्वेन सिद्धोऽनुबन्ध इति दृष्टान्तानुक्तिः । **विभागेनेति** । प्रागुक्तकारणविभागे(नाङ्गीक)न कर्तव्ये सतीत्यर्थः ।

यादु०— ननु यः क्रमकल्पको विरोधः स स्वाभाविक एव विवक्षितः नोपाधिकः । प्रकृतसंयोगयोश्च न स्वाभाविको विरोधः किन्त्वौपाधिकोऽतस्तयोर्न क्रमेणोत्पत्तिर्येन कारणमात्रसंयोगजोऽपि संयोगः स्वीकार्य इत्याशङ्कते **ननु संयोगस्येति** । **स्वरूपत इति** । स्वभावत इत्यर्थः । द्रव्यानारम्भकेत्युपलक्षणमेतत् । यतो द्रव्यारम्भकद्रव्यमात्रसमवेत एव संयोगो द्रव्यारम्भक इत्यपि ग्राह्यम् । तथा च तन्तोस्तन्त्वन्तराकाशसंयोगयोर्द्रव्यारम्भकत्वानारम्भकत्वे द्रव्यारम्भकद्रव्यमात्रसमवेतत्वद्रव्यानारम्भकद्रव्यसमवेतत्वरूपोपाधिप्रयुक्ते इत्युक्तं भवति । ननु द्रव्यानारम्भकद्रव्यत्वं कथमाकाशस्योच्यतेऽन्त्यावयविन एव तथात्वप्रसिद्धेरित्यत आह **द्रव्यानारम्भकं चेति** । तथा चाकाशस्यापि स्पर्शरहितत्वात् द्रव्यानारम्भकत्वमुपपन्नमिति भावः । **निष्फलारम्भमिति** । यथा आदिकार्यारम्भकत्वं न तृतीयस्य परमाणोर्द्वाभ्यामेव परमाणुभ्यामादिकार्यारम्भसम्भवात् । तत्परिमाणस्य च ह्रस्वत्वरूपस्य परमाणुद्वित्वसङ्ख्ययैवोत्पत्तेरतस्तत्र तृतीयस्य परमाणोरारम्भकत्वकल्पनं निष्फलमिति ज्ञातव्यम् । **विजातीयमिति** । पार्थिवाप्यपरमाणुद्वयं नैककार्यारम्भकं जातिसाङ्कर्यापत्तेरिति भावः । **को विरोध इति** । तथा चासिद्धिरिति भावः । **द्रव्यारम्भानारम्भेति** । द्रव्यारम्भकसंयोगविरोधित्वतदनारम्भकसंयोगविरोधित्वरूपविरुद्धोपाधिद्वयप्रयुक्तत्वादित्यर्थः । **द्रव्यारम्भकेति** । तन्त्वन्तरासंयुक्ततन्तुकर्मणि तन्त्वाकाशविभागजनके व्यभिचारवारणाय द्रव्यारम्भकसंयोगविरोधीति विभागविशेषणम् । **द्रव्यान्तरेति** । घटारम्भकेत्यर्थः ।

वं०प०— **नन्विति** । तन्त्वन्तरसंयोगाकाशसंयोगयोरुभयोरपि निष्क्रिये तन्तौ सहावस्थानदर्शनादिति भावः । **को विरोध इति** । सक्रियतन्त्वन्तरनिष्ठविभागाकाशविभागयोरुभयोरपि निष्क्रिये तन्त्वन्तरेऽपि द्विष्ठत्वेन सहदर्शनेन स्वरूपतोऽविरोध इत्यर्थः । नन्वेवमुक्तविभागयोरविरोधे तत्र विरोधप्रतीतिः कथमित्यतो विरुद्धोपाधिद्वयनिबन्धनैवेत्याह **द्रव्यारम्भेति** । तथा च तन्तुकर्मणैव सक्रियस्य तन्तोस्तन्त्वन्तराकाशविभागौ युगपदेव भवतः नोक्तक्रमेण, येन कारणमात्रविभागजोऽपि विभागः स्वीकार्यः स्यादित्याशयः । तन्तुकर्मणो नोभयविभागजनकत्वं किन्त्वेकविभागजनकत्वमेवेत्याशङ्कते **तन्तुद्वयेत्यादिना** । **तन्त्वाकाशविभागेति** । तन्तु-

विभागाकाशविभागेत्यर्थः । अत्र पक्षे विशेषणबलात् तन्तुद्वयविभागजनकत्वे सत्यप्याकाशविभागजनकत्वाभाव एव एकसत्त्वे द्वयमिह नास्तीति प्रतीत्या साध्यत इति ज्ञेयम् । **द्रव्यान्तरं** घटादि । तदारम्भको यः संयोगः कपालद्वयसंयोगः तद्विरोधिविभागजनकं यत्कपालगतं कर्म तद्वदित्यर्थः । **इति** अनुमानम् । आभाससमानयोगक्षेमत्वमेव दर्शयति **तन्त्विति** । **सम्प्रतिपन्नकम** घटादिकर्म । **तत्र** प्रयोगे । **अन्यत्र** त्वदनुमाने । तदेवोपपादयति **विभागद्वयेति** । तन्तुद्वयविभागाकाशविभागेत्यर्थः । कर्मत्वादित्यत्र अङ्गुलिकर्मवदिति शेषः । **विभागेन** तन्तुद्वयरूपकारणमात्रविभागेन । **कर्मणः** तन्तुनिष्ठस्येति शेषः । **सिद्धसाधनं** सत्प्रतिपक्षानुमानमिति शेषः ।

कं०रा०— तत इति । यतस्तन्तोस्तन्त्वन्तरसंयोगो द्रव्यारम्भकद्रव्यसमवेतस्तस्याकाशसंयोगस्तु द्रव्यानारम्भकद्रव्यसमवेत इत्येतत्कुत एव विरोधो न स्वरूपतः ततस्तन्तुकर्मणैव तन्त्वन्तरसंयोगाकाशसंयोगयोर्जन्मोपपद्यतोस्तन्तोस्तन्त्वन्तरादाकाशादितश्च यौ विभागौ तयोस्तु स्वरूपत एव विरोधान्न तन्तुकर्मणैवोत्पत्तिर्युक्तेति भावः । **विभागयोरपीति** । तन्तोस्तन्त्वन्तरादाकाशादितश्च यौ विभागौ तयोरपि कः स्वरूपतो विरोधः न कोऽपीत्यर्थः । कुत इत्यत आह **द्रव्यारम्भेति** । उक्तयोर्विभागयोर्विरोधप्रतीतेः द्रव्यारम्भकसंयोगविरोधित्वतदनारम्भकसंयोगविरोधित्वप्रयुक्तत्वान्न स्वरूपतो विरोधोऽस्तीति भावः । **द्रव्यान्तरारम्भकेति** । घटाद्यारम्भककपालादिसंयोगविरोधिविभागजनककपालादिनिष्ठकर्मणि द्रव्यारम्भकसंयोगविरोधिविभागजनककर्मत्वरूपहेतोः तन्त्वाकाशविभागजनकत्वाभावरूपसाध्यस्य सत्त्वात् तस्य दृष्टान्तत्वमिति भावः । आभाससमानयोगक्षेमत्वं दर्शयति **तन्तुकर्मेति** । **विभागद्वयेति** । तन्त्वन्तरविभागाकाशंविभागयोर्यौगपद्यानुभवात् युगपज्जायमानयोश्च तयोः कारणान्तराभावेन तन्तुकर्मण एव तत्र कारणत्वनिश्चयात् तन्तुकर्म न तन्त्वाकाशविभागजनकमित्यत्रापि प्रमाणबाधः सम इति भावः ।

श्रीनिधि०— न स्वरूपतो विरोधोऽस्तीति । अन्यथा गोत्वाश्वत्ववत् सहावस्थानमेव न स्यादिति भावः । कुतो न स्वरूपतो विरोध इत्यत आह **यत इति** । प्रसङ्गात् द्रव्यानारम्भकद्रव्यविभागमाह **द्रव्यानारम्भकं चेति** । प्रकृते च निस्पर्शगगनसमवेत इति भावः । **आरब्धद्रव्यमिति** । आरब्धं द्रव्यं येन तदारम्भद्रव्यम् । **अन्त्यावयवीति** । यस्यावयव्यन्तरं नास्ति तदन्त्यावयवि । **निष्फलारम्भमिति** । निष्फलः आरम्भो येन तत्तथोक्तं यस्य येनारम्भे फलं नास्ति तन्निष्फलारम्भमित्युच्यते । द्वितीयं शङ्कते **तन्तुद्वयविभागजनकं तन्तुकर्मेति** । कर्ममात्रस्य पक्षत्वे यत्किञ्चित्कर्मादाय सिद्धसाधनं स्यात् । अतस्तन्तुपदं तावत्येवोक्ते बाधः स्यात् । एकस्य तन्तोर्वातादिना कर्मोत्पत्तौ तन्त्वाकाशविभागस्यापि जननात् हेतोरसिद्धिश्च स्यात् । अत उक्तं **तन्तुद्वयविभागजनकमिति** । जनकं न भवतीति साध्यनिर्देशे प्रतिज्ञाव्याहतिः । अतो विभागपदम् । एवमपि बाधः । तन्त्वन्तरविभागजनकत्वात् । अत उक्तं **तन्त्वाकाशेति** । **द्रव्यारम्भकसंयोगविरोधिभागजनककर्मत्वादिति** । विरोधीत्यादि पदं विहाय व्यस्ते समस्ते चोक्ते असिद्धिः स्यादत उक्तं

विरोधिपदम् । विरोध्यन्तस्य च स्वरीत्या व्यभिचारः स्यात् । तन्त्वन्तरविभागस्य द्रव्यारम्भकसंयोगविरोधित्वात् । तन्त्वाकाशविभागासमवायिकारणत्वेन साध्याभावाच्चातः जनकान्तम् । तस्य च तन्तौ व्यभिचारः । तथा हि । तन्तोर्विभागद्वयं प्रत्यपि समवायिकारणत्वेन हेतोः सत्त्वात् । साध्यस्य च अभावादत उक्तम् **कर्मेति** । **सम्प्रतिपन्नकर्मवदिति** । पटादिकर्मवदित्यर्थः । प्रमाणबाधमुपपादयति **विभागद्वययौगपद्यानुभवादिति** । **कर्मत्वादिति** । वातादिजन्यैकतन्तुकर्मवदिति दृष्टान्तोऽत्र ऊह्यः ।

शे०वा०— ननु तन्तुकर्मणः संयोगद्वयजनकत्वप्रतिबन्धा विभागद्वयजनकत्वमुपपादयितुमशक्यम् । संयोगद्वयस्य स्वरूपतोऽविरुद्धत्वेन तज्जनकत्वस्य कर्मणि विरुद्धत्वानापादकतयोक्तविभागद्वयस्य च विरुद्धत्वेन तज्जनकत्वस्य तदापादकतया वैषम्येण प्रतिबन्दीमूलभूताविशेषासिद्धिरित्याशयेन वैषम्यमाशङ्कते **नन्विति** । **स्वरूपत इति** । स्वभावत इत्यर्थः । **द्रव्यानारम्भकेति** । उपलक्षणं चैतत् । द्रव्यारम्भकद्रव्यसमवेत एव संयोगो द्रव्यारम्भक इत्यपि द्रष्टव्यम् । ततश्च तन्तोस्तन्त्वन्तरेण संयोगस्य द्रव्यारम्भकद्रव्यसमवेतत्वप्रयुक्तमेव द्रव्यारम्भकत्वं, न स्वाभाविकम् । आकाशसंयोगस्य च द्रव्यानारम्भकद्रव्यसमवेतत्वप्रयुक्तमेव द्रव्यानारम्भकत्वं न स्वाभाविकमिति न संयोगस्य स्वरूपतो विरोध इति भावः । नन्वनारब्धद्रव्यत्वादिविशिष्टेऽपि तन्त्वादौ वर्तमानो न सर्वः संयोगो द्रव्यारम्भक इति संयोगविशेषत्वेन द्रव्यारम्भकत्वम् । अनारम्भकसमवेतमात्रस्य व्यभिचारित्वात् । स च विशेषो जातिरूप एवेति संयोगयोर्वैजात्यात् तज्जनककर्मणोरविरुद्धजातीयत्वमावश्यकमिति नैकस्य कर्मणो द्रव्यारम्भकानारम्भकसंयोगजनकत्वम् । अतः कारणमात्रसंयोगजन्यः कारणाकारणसंयोगः स्यादेवेति चेन्न । सहकारिभेदसमवधानादेव तदुपपत्तौ वैजात्ये मानाभावात् । तथा च कर्मणो वैजात्यमसिद्धमिति एकस्यैव कर्मणस्तदुभयजनकत्वान्नोक्तविधसंयोगप्रसङ्ग इति । ननु भवेदाकाशसंयोगस्य द्रव्यानारम्भकद्रव्यसमवेततया द्रव्यानारम्भकत्वं, यद्याकाशस्य द्रव्यानारम्भकता स्यात् । सैव तु कुत इत्यतः स्पर्शरहितत्वादिति भावेन द्रव्यानारम्भकद्रव्यविभागमाह **द्रव्येति** । **आरब्धद्रव्यमिति** । कार्यव्यापृतं तन्त्वादीत्यर्थः । **अन्त्यावयवीति** । पटादीत्यर्थः । **स्पर्शरहितमिति** । आकाशादिपञ्चकमित्यर्थः । **विनश्यदवस्थमित्यादि** । एतदुभयरूपं तन्त्वादिकमेव द्रष्टव्यम् । **निष्फलारम्भमिति** । एतादृशं च द्रव्यं परमाणुद्वयारब्धे आदिकार्ये तृतीयः परमाणुः । द्व्यणुककार्ये च चतुर्थं द्व्यणुकम् । तत्र परमाणुद्वयारब्धे तत्कार्येश्वरापेक्षाबुद्धिजन्यपरमाणुगतद्वित्वसङ्ख्ययैव ह्रस्वत्वाणुत्वरूपपरिमाणस्य द्व्यणुककार्ये चेश्वरापेक्षाबुद्धिजन्यद्व्यणुक-गतत्रित्वसङ्ख्ययैव महत्त्वदीर्घत्वरूपपरिमाणस्यारम्भसम्भवेन परमाणुकार्ये तृतीयपरमाणोः द्व्यणुककार्ये च चतुर्थस्य द्व्यणुकस्यारम्भकताकल्पनस्य व्यर्थत्वादिति द्रष्टव्यम् । **विजातीयमिति** । पार्थिवाप्यपरमाण्वोर्नैककार्यारम्भकत्वम् । तथा सति तत्कार्यस्य निर्गन्धत्वादिप्रसङ्गात् । पृथिवीत्वादिजातिसङ्करप्रसङ्गाच्चेति भावः । **तत इति** । संयोगद्वयस्य स्वरूपतोऽविरुद्धत्वादित्यर्थः ।

एवं विभागयोरपि स्वरूपतोऽविरुद्धत्वेन तन्तुकर्मणैव तन्तोस्तन्त्वन्तरविभागस्येवाकाशादिदेशादपि तद्विभागस्य जननसम्भवात् क्व विभागजो विभाग इत्याशयेन प्रतिबन्दीमूलभूतमविशेषमेवोपपादयति **एवं**

तर्हीति । **को विरोध इति** । न स्वरूपतो विरोधः किन्त्वौपाधिक एवेत्यर्थः । तत्कथमित्यत आह **द्रव्येति** । द्रव्यारम्भकसंयोगविरोधित्वतदनारम्भकसंयोगविरोधित्वरूपविरुद्धोपाधिद्वयप्रयुक्तत्वादित्यर्थः । द्वितन्तुकावयवे तन्तावुत्पन्नस्य कर्मणो विवक्षितविभागद्वयजनकत्वाभावस्यानुमानेन सिद्ध्या न तन्तुकर्मणैव तदुत्पत्त्युपपत्तिरिति युक्तैव क्रमकल्पनेत्याशङ्कते **तन्त्विति** । द्रव्यारम्भकसंयोगविरोधिविभागजनकमित्यर्थः । **नेति** । नानारम्भकसंयोगविरोधिविभागजनकमित्यर्थः । अत्र तन्तुकर्मणो द्रव्यारम्भकसंयोगविरोधिविभागजनकत्वे सति तदनारम्भकसंयोगविरोधिविभागजनकत्वाभावो न साधयितुं शक्यते । परं प्रति दृष्टान्ताभावात् । अनारम्भकसंयोगविरोधिविभागजनकत्वाभावमात्रसाधने च न विभागद्वयजनकत्वाभावसिद्धिः इत्यत उभयजनकत्वाभावसिद्ध्यर्थं तन्तुद्वयविभागजनकत्वस्य साध्यकोट्यनन्तभावमङ्गीकृत्य पक्षविशेषणत्वमाश्रितम् । ततश्च पक्षतावच्छेदकसामानाधिकरण्येन साध्यसिद्ध्या तन्तुकर्मणो विवक्षितविभागद्वयजनकत्वाभावसिद्धिरिति द्रष्टव्यम् । **द्रव्येति** । अत्र द्रव्यानारम्भकसंयोगविरोधिविभागजनकतन्तुकर्मणि आकाशादिविभागजनके व्यभिचारवारणाय द्रव्यारम्भकसंयोगविरोधीति विभागविशेषणम् । **द्रव्यान्तरेति** । घटादीत्यर्थः । दूषयति **आभासेति** । तदेवोपपादयति **तन्तुकर्मेति** । **सम्प्रतिपन्नेति** । द्रव्यान्तरारम्भकसंयोगविरोधिविभागजनककर्मवदित्यर्थः । बाधितत्वाबाधितत्वाभ्यां वैषम्येणाविशेषासिद्धेः कथं साम्यमित्याशङ्कते **तत्रेति** । **सममिति** । तथा चात्रापि प्रमाणबाधादविशेष एवेति भावः । प्रमाणबाधमेवोपपादयति **विभागद्वयेति** । **तन्तुकर्मेति** । अत्रापि तन्तुद्वयविभागजनकमिति पक्षविशेषणं द्रष्टव्यम् । ततश्च पक्षतावच्छेदकसामानाधिकरण्येन साध्यसिद्ध्या द्वितन्तुकावयवतन्तुकर्मण एव तन्त्वन्तरादाकाशादिदेशाच्च विभागजनकत्वप्राप्तेरुद्देशसिद्धिविरोधित्वात् युक्तमस्य सत्प्रतिपक्षत्वमिति भावः । कर्मत्वादित्यतःपरं अङ्गुलीकर्मवदिति शेषः । सिद्धसाधनताग्रस्तत्वेनातुल्यबलत्वान्न सत्प्रतिपक्षत्वमिति शङ्कते **आकाशेति** ।

वा०र०— द्रव्यानारम्भकेतीति प्रतीकोपादानम् । वर्धमानानुसारेणाशङ्क्य निषेधति **नन्वित्यादिना** । **अनारब्धद्रव्यत्वादिविशिष्टेऽपीति** । आरब्धद्रव्यत्वासप्तविधानारम्भकत्वशून्येऽपीत्यर्थः । तन्त्वादावित्यादिपदेन कपालादिपरिग्रहः । **सर्वः संयोग इति** । द्रव्यारम्भात्पूर्वं तन्त्वादौ विद्यमानत्वेनानुभवसिद्धः सर्वोऽपि संयोग इत्यर्थः । कुविन्दादिव्यापारसाध्यासंयोगविशेषस्यैव द्रव्यारम्भत्वादिति भावः । **संयोगविशेषत्वेनेति** । तन्त्वादिगतनानाविधसंयोगेषु आरम्भकद्रव्यसमवेतत्वसत्त्वेऽपि द्रव्यारम्भकत्वाभावेन द्रव्यारम्भकद्रव्यसमवेतत्वस्य व्यभिचारतया द्रव्यारम्भकत्वप्रयोजकत्वानुपपत्तेरिति भावः । ननु तथापि द्रव्यानारम्भकासमवेतत्वमात्रस्यैव तत्प्रयोजकत्वोपपत्तेर्न संयोगविशेषत्वस्य तत्र प्रयोजकत्वमित्यतस्तस्यापि उक्तस्थल एव व्यभिचारान्न तत्र प्रयोजकत्वं युक्तमित्याह **अनारम्भकासमवेतमात्रस्येति** । तदसमवेतत्वमात्रस्येत्यर्थः । अत्र त्वप्रत्ययप्रयुक्तः पाठः स्वरसः । **सहकारिभेदेति** । परोत्पादकसहकारी विशेषसमवधितस्य तन्त्वादिसंयोगमात्रस्यैव द्रव्यारम्भकत्वोपपत्तौ तद्वैजात्यकल्पने मानाभावादित्यर्थः । तन्त्वादिगतनानासंयोगेषु सहकारिसमवहितत्वाभावादेव विशिष्टसंयोगत्वाभावान्न व्यभिचारः । सहकारिविशेषसमवहितत्वे सति द्रव्यारम्भकसमवेतत्वस्यैव द्रव्या-

रम्भकताप्रयोजकत्वादिति भावः । **अनारम्भकं च द्रव्यं सप्तविधमिति** मूलम् । .....वात्स्यायन-भाष्यानुसारेण । किरणावल्यां तत्त्रैविध्याभिधानादिति बोध्यम् । तन्तुद्वयविभागजनकं कर्मेत्यादौ निबन्धादिकमनुसृत्य विचारष्टीकायां तन्तुद्वयविभागजनकमित्येतावद्व्याचष्टे **द्रव्यारम्भकेति** । पुञ्जस्थले हि द्रव्यानारम्भकेऽपि तन्तुद्वयसंयोगोऽस्ति । तद्विरोधितन्तुद्वयविभागजनकतन्तुकर्मणांश्चाङ्गुलिविभागजनकतत्कर्म-तुल्यतया तन्त्वाकाशविभागजनकत्वेन तदभावे साध्ये बाधप्रसङ्ग इत्यतः इदं व्याख्यानम् । एवं च तत्कर्मणो द्रव्यारम्भकसंयोगविरोधिविभागजनकत्वाभावान्नापेक्षतेति न बाध इति भावः । उक्तार्थस्पष्टीकरणायैव अवतारि-कायां द्वितन्तुकावयव इति विशेषणम् । इदं च विवक्षितसाध्यान्तर्गतभागसङ्ग्रहाय तन्तुद्वयविभागस्य द्रव्या-रम्भकसंयोगविरोधित्वेनोपादानम् । न तु सम्पूर्णविशेषणार्थोऽयम् । अन्या विशेषणासिद्धिप्रसङ्गः । तन्तुकर्मणि घटारम्भसंयोगविरोधिविभागजनकत्वादेरभावादिति द्रष्टव्यम् । **नानारम्भकेति** । अत्र विवक्षितसाध्यालाभाय तन्त्वाकाशविभागस्य द्रव्यानारम्भकसंयोगविरोधिविभागत्वेन कीर्तनमात्रे तात्पर्यम् । न तु सम्पूर्णसाध्या-र्थोऽयम् । तथा सति तन्तुद्वयविभागजनककर्मण इव घटाद्यारम्भककपालादिद्वयविभागजनककर्मणोऽपि उक्त-विभागजनकत्ववादिनं प्रति तदभावस्यासिद्ध्या दृष्टान्तस्य साध्यवैकल्यप्रसङ्गात् । अत एव वक्ष्यति **परं प्रति दृष्टान्ताभावादिति** । एवं च पररूपद्रव्यारम्भकतन्तुद्वयसंयोगविरोधितन्तुद्वयविभागजनकतन्तुकर्मपक्षः । द्रव्या-नारम्भकसंयोगविरोधितन्त्वाकाशविभागजनकं नेति प्रतिज्ञार्थ उक्तो भवतीति ज्ञातव्यम् ।

अत्र तन्तुकर्मण इत्यादि । अत्र सत्यन्तस्याभावविशेषणाताङ्गीकारेण जनकत्वविशिष्टजनकत्वा-भावरूपं साध्यं न साधयितुं शक्यमित्यर्थः । न तु जनकत्वविशेषणताङ्गीकारेणोभयभावसाधनस्य कर्तुमशक्य-त्वमित्यर्थः । तथा सति तादृशसाध्याभावस्य कपालद्वयविभागकारणकर्मण्यपि सत्त्वेन तस्यैवोभयसम्प्रतिपन्न-दृष्टान्ततया तदभावासिद्धिप्रसङ्गात् । किञ्च मूलकृतो जनकत्वात् **तं** जनकत्वाभावम् । तं चेत्यनयोरेव साध्यं तत्राभिप्रेतम् । तदुभयजनकत्वाभावरूपविशिष्टाभावसाध्यकस्य प्रयोगस्य विमतं कर्मेत्यनेनोत्तरत्र पृथगेव निराकरणात् । अत एवोत्तरानुमाने कर्मत्वमात्रस्यैव हेतताङ्गुलीकर्मैवोभयाभाववद्दृष्टान्तः । विमतत्वेनैव पक्षीकारः कर्मणः । अत्र चानुमाने आरम्भकेत्यादि हेतुरङ्गुलिकर्म व्यावृत्त एव । दृष्टान्तश्च तादृशहेतुना माने वेत्यादि वैषम्यम् । मूलं च भावविशेषणत्वमेवाङ्गीकृत्य व्याख्यानं कार्यम् । तदर्थं च विभागद्वयजनकत्वाभावसिद्धि-रित्यादौ पर्यवसानगतिरेव वक्ष्यमाणरीत्या ध्येयेति ध्येयम् । **अत्र द्रव्यानारम्भकेति** । यस्तन्तुराकाशे घटादिसंयुक्तस्तस्मिन्कर्मणि तूत्पन्ने तेन कर्मणा आकाशादि विभागो भवति । सः द्रव्यानारम्भकसंयोगविरोधीति तत्र व्यभिचार इत्यर्थः । अन्यथा कर्मणस्तन्त्वाकाशविभागजनकत्वस्वीकारे अनुमानवैयर्थ्यम् । विरुद्धार्थत्वं चेत्यादि दोषप्रसङ्गः । यद्वा उत्तरविभागे कर्मणो निमित्तत्वमस्तीति वक्ष्यमाणरीत्या तत्र व्यभिचारो बोध्यः । अन्यथाख्यात्युक्तं च एतेन निरस्तमिति ध्येयम् । **आकाशविभाग इति** । ननु यद्याकाशविभागः कर्मोत्पन्नेन विभागेन कारितः तर्हि अन्यथासिद्धत्वेन कारणत्वमात्रमिति । तद्विशेषनिमित्तता दूरनिरस्ता । अथ निमित्तशब्दो न निमित्तकारणपरोऽपि तु प्रयोजकपरः तर्हि परिहारे अन्यथासिद्धिघटितकारणत्वमात्रस्यैव कर्मव्यावृत्त्यर्थतया

विवक्षणीयताया वक्तव्यत्वेनासमवायित्वपर्यन्तं धावनानर्थक्यप्रसङ्गादिति चेत् सत्यम् । तथा कारणत्व-मात्राभावस्य स्पष्टत्वाच्छिष्यैरेव ऊह्यतामिति भावेन वस्तुगत्या प्रकृते विवक्षितार्थाभिधानं मूलकृता कृतमित्यदोषः । स्पष्टश्चायमवशिष्टोऽर्थः । उत्तरविभागो निमित्तं कारणमित्याद्याशङ्कासमाधानाभ्यां मूल इति ध्येयम् ।

विट्ठल०— ननु स्वाभाविकविरोधवतोः संयोगयोरेव युगपदुत्पत्त्यसम्भवः । न त्वौपाधिकविरोधवतोः प्रकृते च सक्रियस्य तन्तोस्तन्त्वन्तरसंयोगस्य चाकाशसंयोगस्य च न स्वाभाविकविरोधोऽस्तीति । तन्त्व-न्तरस्य पटरूपद्रव्यारम्भकत्वेन तत्संयोगस्यापि द्रव्यारम्भकत्वं तत्प्रयुक्तमेव आकाशस्य स्पर्शरहितत्वेन द्रव्यानारम्भकत्वात् तत्प्रयुक्तं तत्संयोगस्य द्रव्यारम्भकत्वम् । अतस्तन्त्वन्तराकाशसंयोगयोः स्वाभाविकस्य द्रव्यारम्भकत्वतदनारम्भकत्वरूपस्य विरोधस्याभावेन युगपदुत्पत्तिसम्भवात्क्रमस्य चाकल्पनीयतया न कारण-मात्रसंयोगजः संयोगः स्वीकार्य इत्याशयेन शङ्कते **ननु संयोगस्येति** । अत एवेत्यस्य द्रव्यारम्भकद्रव्यमात्र-समवेतः संयोगो द्रव्यानारम्भक इति नेत्यर्थः । नन्वन्त्यावयविद्रव्यमात्रस्यैव द्रव्यानारम्भकत्वेनान्यस्याकाशादेः सम्भवात्कथमियमाशङ्केत्यत आह **द्रव्यानारम्भकत्वं चेति** । तथा चाकाशादेः स्पर्शरहितत्वादिना द्रव्या-नारम्भकत्वमुपपन्नमिति भावः । **आरब्धद्रव्यमिति** । बहुव्रीहिः यथोत्पादितपटं तन्त्वादिनिष्फलारम्भमिति । यथा परमाणुद्वयेन द्व्यणुकोत्पत्तौ तृतीयस्य परमाणोर्द्व्यणुकोत्पादकतारूपफलाभावेन द्रव्यानारम्भकमित्यादि । विनश्यदवस्थासंयोगमिति क्रियाविशेषण विनश्यदवस्थः संयोगो यस्य तदिति ज्ञेयम् । **विजातीयमिति** । यथाप्यपरमाणुर्न पार्थिवद्रव्यारम्भकमित्यादि । **को विरोध इति** । तथा चोक्तविरोधरूपहेत्वसिद्धिरिति भावः । तदुपपादयति **द्रव्यारम्भेति** । तन्त्वन्तरविभागाकाशदेशविभागयोरपि न स्वरूपतो विरोधोऽस्ति । किं तु द्रव्यारम्भकसंयोगविरोधित्वाविरोधित्वरूपविरोधप्रतीतेरपि तन्त्वाकाशगत इत्यारम्भानारम्भप्रत्युक्तत्वेनास्वाभा-वित्वात् तन्तुकर्मणैव विभागद्वयोत्पत्त्युपपत्तिरिति भावः । **द्रव्यारम्भकेति** । द्रव्यारम्भको यः संयोगः तद्विरोधी यो विभागस्तज्जनककर्मत्वादित्यर्थः । अत्रादृष्टादौ व्यभिचारवारणाय कर्मपदम् । तन्त्वन्तरसंयोगाजनके तन्त्वाकाशविभागजनके तन्तुकर्मणि वारणाय द्रव्यारम्भकसंयोगविरोधीति विभागविशेषणम् । **द्रव्यान्तरेति** । घटादिद्रव्यान्तरम्भककपालद्वयसंयोगविरोधीत्यर्थः । अभाससमानत्वमुपपादयति **तन्तुकर्मेति** । **प्रमाणबाध इति** । तन्तुकर्मणस्त्वन्तरविभागजनकतायाः प्रत्यक्षसिद्धत्वादिति भावः । **प्रतिपक्षश्चेति** । न केवलमाभास-समानयोगक्षेमत्वमिति चशब्दार्थः । **आकाशविभाग इति** । तन्त्वाकाशविभागे तन्त्वन्तरविभागेन कर्तव्य इत्यर्थः ।

चषक— आरब्धद्रव्यमिति बहुव्रीहिः । **विजातीयमिति** । जातिसाङ्कर्यापत्त्या पार्थिवजलीय-परमाणुद्वयं नैककार्यारम्भकमिति भावः । **तन्तुद्वयेत्यादि** । तन्त्वाकाशविभागजनकतन्तुकर्मण्यनैकान्त्य-मपहस्तयितुं हेतुतावच्छेदकघटकविभागो विरोधीत्यन्तेन विशेषितः । अदृष्टादौ तद्व्युदासाय कर्मपदोपादानम् ।

इत्याभासेति । इत्यन्यदीयानुमानमनुपदं दर्शयिष्यमाणाभाससमानयोगक्षेममित्यर्थः । **सम्प्रतिपन्नेति** । पटादिनिष्ठकर्मवदित्यर्थः । **प्रमाणबाधः** तन्तुकर्मधर्मिकतन्त्वन्तरप्रतियोगिकविभागजनकत्वे अनुमित्यौपयिकप्रत्यक्षादिबाधः । **विभागद्वययौगपद्यानुभवात्** तन्त्वन्तरानुयोगिकविभागाकाशानुयोगिकविभागद्वयानुभवात् । **कर्मत्वादिति** । कर्मत्वावच्छेदेन स्वाश्रयवस्तुप्रतियोगिकाकाशप्रदेशानुयोगिकविभागजनकताया अवधृततया निदर्शनाप्रदर्शनम् ।

॥ इति विभागस्य द्वितीयविधायाः अनुपपन्नतरत्वम् ॥
॥ इति तत्र ('अंशतः संयोगः' इत्युक्तेरनवस्थामूलकायुक्तताशङ्कायाः छलत्वेन निरासे) अवयवावयविगतविभागैक्योक्त्या च विभागद्वैविध्यनिरासः ॥

* * *

॥ अथ च तत्रान्ते संयोगविभागयोरवान्तरभेदनिरासः ॥

१९७ सु०— एतेन 'विमतं कर्म द्रव्यारम्भकसंयोगविरोधितदविरोधिविभागजनकं न भवति कर्मत्वादि'ति निरस्तम्, विमतं 'कर्म द्रव्यारम्भकानारम्भकसंयोगारम्भकं न भवति कर्मत्वात् श्येनकर्मवदि'त्याभासतुल्यत्वात्, सत्प्रतिपक्षत्वाच्च । यदाकाशविभागजनकं कर्म न तद्द्रव्यारम्भकसंयोगविरोधिविभागजनकं यथाङ्गुलिकर्मेति व्याप्तेस्तन्तुकर्मणो गगनविभागजनकत्वे तन्त्वन्तरविभागजनकत्वं न स्यादिति चेन्न, यद्यत्प्रदेशविभागजनकं न भवति न तत्तत्प्रदेशस्थद्रव्यविभागजनकमिति व्याप्तेराकाशदेशविभागाजनकत्वे तन्त्वन्तरादपि विभागजनकं न स्यादिति प्रतिप्रसङ्गसम्भवात् ।

किञ्च तन्तोराकाशविभागो यदि विभागजो न तु कर्मजः तदा सकर्मकस्येवाकर्मकस्यापि कुतो न स्यात्, विभागस्योभयत्रापि साम्यात् । उत्तरविभागे कर्म निमित्तकारणमित्यतो नेति चेन्न । आद्यविभागजननेनैवोपक्षीणस्य कारणत्वानवधारणात् । अवधारणे वाऽसमवायित्वस्य अनिवारणात् । अन्यथा तल्लक्षणस्यातिव्याप्तेरित्यलं विस्तरेण ॥

परि०— एतेनेत्युक्तं व्यनक्ति **विमतं कर्म द्रव्यारम्भकानारम्भकेत्यादिना** । परेण हि तन्तुकर्मणस्तन्त्वन्तरसंयोगमाकाशसंयोगं च प्रत्यसमवायिकारणत्वमङ्गीकृतम् । तादृशविभागद्वयं प्रति तु तथात्वं नोपेतम् । तथा च विभागद्वयाजनकत्ववत् संयोगद्वयाजनकत्वस्यापि सुसा(धन)-

ध्यत्वादाभाससाम्यमित्यर्थः । **सत्प्रतिपक्षत्वाच्चेति** । विमतं कर्म प्रागुक्तविभागद्वयजनकं द्वितन्तुकपटावयवकर्मत्वात् तादृशसंयोगद्वयजनककर्मवदित्यपि प्रयोगसम्भवादिति भावः । प्रतिपक्षानुदयमाशङ्कते **यदाकाशेति** । **इति व्याप्तेरिति** । यथाङ्गुलिकर्मेति दृष्टान्तसम्भवादिति भावः । **सकर्मकस्येवाकर्मकस्यापीति** । सक्रियस्येवाक्रियस्यापीत्यर्थः । तन्तोरिति विशेष्यानुकर्षः । **विभागस्येति** । तन्त्वाकाशविभागस्य तन्तुकर्मणि सत्यसति चोभयत्र साम्यादित्यर्थः । यद्वा तन्तुद्वयविभागजनकस्य तन्त्वाकाशविभागजनने कर्मसत्त्वासत्त्वयोः साम्यादित्यर्थः । **उत्तरविभाग इति** । तन्त्वाकाशविभाग इत्यर्थः । यद्वा सकर्मकस्य श्येनस्येवाकर्मकस्यापि स्थाणोरित्यर्थः । **उभयत्र** श्येने स्थाणौ चेत्यर्थः । **नेति चेदिति** । अकर्मकस्यापि कुतो न स्यादिति दोषो न चेदित्यर्थः । असमवायित्वस्येति पदच्छेदः । समवायिकारणप्रत्यासन्नत्वादिलक्षणसम्भवादिति भावः । **संयोगविभागयोरवान्तरभेदनिरासः ॥**

गु०दी०— सकर्मकस्येवाकर्मकस्यापि कुतो न स्यात् इत्यत्र सकर्मकस्य विभक्ततन्त्वोरिवाकर्मकस्याविभक्ततन्त्वोरपि गगनविभागो न स्यादित्यर्थः । **विभागस्य** विभागकारणीभूतविभागस्य ।

यादु०— सत्प्रतिपक्षत्वाच्चेति । द्रव्यारम्भकसंयोगविरोधिविभागजनकं तन्तुकर्म तदविरोधिविभागजनकं कर्मत्वादङ्गुलिकर्मवदिति सत्प्रतिपक्षत्वाच्चेत्यर्थः । अत्र पक्षतावच्छेदकसामानाधिकरण्येन साध्यसिद्धेः पुर्वानुमानसाध्यविपरीतविषयकत्वात् तत्सत्प्रतिपक्षतेति ज्ञातव्यम् । एवं च तन्तुकर्मणि द्रव्यारम्भकसंयोगविरोधितदविरोधिविभागद्वयजनकत्वं पूर्वसाध्यविपरीतं न साधयितुं शक्यं, परं प्रति दृष्टान्ताभावादतः कथं सत्प्रतिपक्षतेति शङ्कानवकाशः । सकर्मकस्येवेत्यत्र तन्तोरिति वर्तते ॥ एवमग्रेऽपि अकर्मकस्येत्यत्रापि तन्तोरिति ज्ञातव्यम् । **उत्तरविभाग इति** । सक्रियस्य तन्तोर्द्वितन्तुकसंयुक्ताकाशदेशविभाग इत्यर्थः । तथा च क्रिये तन्तौ नाकाशविभागो विभागेन जायते । निमित्तकारणरूपकर्माभावादिति भावः ।

वं०प०— विमतं कर्मेति । तन्तुकर्मेत्यर्थः । एकसत्त्वे द्वयमिह नास्तीति द्वित्वावच्छिन्नाभावाङ्गीकारेण तन्तुकर्मणो द्रव्यारम्भकसंयोगभूततन्तुद्वयसंयोगविरोधिभूततद्विभागजनकत्वेऽप्याकाशसंयोगस्य द्रव्यानारम्भकत्वेन द्रव्यारम्भकसंयोगाविरोध्याकाशविभागजनकत्वं नास्तीति तदुभयविभागजनकं न भवतीति साध्यं युक्तमिति ज्ञेयम् । अत्राङ्गुलिकर्मदृष्टान्तस्तत्राङ्गुलिद्वयसंयोगस्य द्रव्यानारम्भकत्वेन द्रव्यारम्भकसंयोगविरोधिविभागजनकत्वाभावात् तदनारम्भकाकाशसंयोगविरोधितद्विभागजनकत्वाभावाच्च उभयजनकत्वाभावोऽस्तीति तत्र साध्यं ज्ञेयम् । **विमतं कम** तन्तुकर्म श्येनकर्मवदिति दृष्टान्तो ज्ञातव्यः । अत्रापि तन्तुकर्मणो द्रव्यारम्भकतन्तुद्वयसंयोगारम्भकत्वेऽपि द्रव्यानारम्भकाकाशसंयोगजनकत्वाभावेन उभयारम्भकत्वाभावोपपादनं ज्ञेयम् । श्येनकर्मणि दृष्टान्तेऽपि द्रव्यानारम्भकश्येनस्थाणुसंयोगारम्भकत्वे सत्यपि द्रव्यारम्भकसंयोगारम्भकत्वं नास्ती-

त्युभयारम्भकत्वाभावो ज्ञेयः । आभासतुल्यत्वादित्यनेन एतेनेत्युक्तं विवृतं भवति । तर्कपराहतिमाशङ्कते **यदिति** । तर्केऽप्रयोजकतापरिहाराय यदाकाशेत्यादिना व्याप्तिरुच्यत इति व्याख्येयम् । **अङ्गुलिकर्मवदिति** । तत्र अङ्गुल्यन्तरावच्छिन्नाकाशविभागजनकत्वमस्ति । तथाऽङ्गुलिद्वयसंयोगस्य द्रव्यानारम्भकत्वेन तदारम्भक-संयोगविरोधिविभागजनकत्वाभावेन साध्यमस्तीति ज्ञेयम् । **तन्त्वन्तरविभागेति** । द्रव्यारम्भकसंयोगविरोधि-भूतेत्यर्थः । अनेनैव न्यायेनोत्तरवाक्यमपि व्याख्येयम् । **अजनकत्वे** तन्तुकर्मण इति वर्तते । तन्त्वन्तरात् तत्प्रदेशस्य द्रव्यभूतात् । **तन्तोरिति** । द्वितन्तुकावयवभूतस्य तन्तोरित्यर्थः । **आकाशविभाग इति** । द्वितन्तुकसंयुक्ताकाशदेशविभाग इत्यर्थः । **विभागजः** सक्रियतन्तुनिष्ठविभागजः । **न कर्मजः** तन्तुकर्मजो न भवतीत्यर्थः । **सकर्मकस्येति** । सकर्मकस्य तन्तोराकाशविभागो यथा सक्रियतन्तुनिष्ठविभागाद्भवति, तथाऽकर्मकस्य यस्तन्तुराकाशसंयुक्तः सन् तथैवास्ते तस्याक्रियस्यापि तन्तोराकाशाद्विभागः कस्मान्न भवतीत्यर्थः । नन्वसमवायिकारणभूतविभागस्य सक्रिये तन्तावेव सत्त्वेन तत्रैवाकाशदेशविभागो जायते, न निष्क्रिये तन्तौ, तत्रासमवायिकारणविभागस्याभावादिति चेत्तत्राह **विभागस्येति** । **उभयत्रापि** सक्रिये निष्क्रिये च तन्तावित्यर्थः । एतद्दोषपरिहारं शङ्कते **उत्तरविभागेति** । सक्रियस्य तन्तोर्द्वितन्तुकसंयुक्ताकाश-देशविभागे तन्तुकर्मणो निमित्तकारणत्वादित्यर्थः । तथा चाक्रिये तन्तौ द्वितन्तुकसंयुक्ताकाशविभागो न सक्रिय-तन्तुनिष्ठविभागेन जायते । निष्क्रिये तन्तौ निमित्तकारणीभूतकर्माभावादिति भावः । कर्मणो निमित्तकारणत्वं न सम्भवति । अनन्यथासिद्धनियतपूर्ववृत्तित्वेन कारणत्वावधारणं वाच्यम् । तदिह न सम्भवति । तन्तुकर्मण आद्यो यो विभागस्तन्त्वन्तरविभागः तज्जनकत्वेनान्यथासिद्धत्वेनाकाशविभागे कारणत्वानवधारणादित्याह **आद्यविभागेति** । **अनवधारणादिति** । तथा च निमित्तकारणत्वं दूरोत्सारितमिति भावः । **अनिवारणा-दिति** । तन्तुकर्मण आकाशविभागेऽसमवायिकारणत्वस्यैव सम्भवेन निमित्तं कारणमित्येतदयुक्तमित्यर्थः । **अन्यथेति** । असमवायिकारणलक्षणस्य सत्त्वेऽप्यसमवायित्वाभाव इत्यर्थः । **अतिव्याप्तेरिति** । उत्तरविभाग-समवायिकारणे सक्रिये तन्तौ, कर्मणः प्रत्यासन्नत्वात् कारणत्वाच्च तन्तुकर्मण्यतिव्याप्तिरित्यर्थः ।

कं०रा०— सत्प्रतिपक्षत्वाच्चेति । तन्तुकर्म आकाशविभागजनकं कर्मत्वादिति प्रतिपक्षग्रस्त-त्वाच्चेत्यर्थः । **सकर्मकस्येति** । सत्क्रियस्य तन्तोरिवाक्रियास्यापि तन्तोर्द्वितन्तुकसंयुक्ताकाशप्रदेशाद्विभागः कुतो न स्यादाकाशप्रदेशविभागजनकत्वेनाङ्गीकृतस्य तन्तुद्वयविभागस्य सक्रिये तन्ताविवाक्रियेऽपि सत्त्वादित्यर्थः । **उत्तरविभाग इति** । उत्तरस्मिन्विभाग इत्यर्थः । **अवधारणे वेति** । उत्तरस्मिन् तन्त्वाकाशविभागे तन्तुकर्मणः कारणत्वावधारणे वेत्यर्थः । **अन्यथेति** । तन्तुगतकर्मण उत्तरस्मिन् तन्त्वाकाशविभागे कारणत्वमात्रमङ्गीकृत्य असमवायिकारणत्वस्यानङ्गीकारः तन्तुगतकर्मणस्तन्त्वाकाशविभागसमवायिकारणे तन्तौ प्रत्यासन्नत्वादवधृत-सामर्थ्यत्वाच्च समवायिकारणलक्षणस्य तत्रातिव्याप्तिप्रसङ्गादित्यर्थः ।

श्रीनिधि०— द्रव्यारम्भकसंयोगविरोधितदविरोधीति । अन्यतरजनकत्वस्य प्रमितत्वेन बाधा-दुभयाजनकत्वेन न साध्य पर्यवसानम् । किन्त्वन्यतराजनकत्वे वेति द्रष्टव्यम् । **कर्मत्वादीति** । आदिपदेन

द्रव्यारम्भकसंयोगविरोधितदविरोधिविभागौ न तन्तुकर्मजन्यौ विरुद्धत्वात् । द्रव्यान्तरसंयोगविरोधितदविरोधिविभागवदित्यादि गृह्यते । **श्येनकर्मवदिति** । उपलक्षणमिदं तन्तोस्तन्त्वन्तराकाशसंयोगौ तन्तुकर्मजन्यौ न भवतः । विरुद्धत्वात् द्रव्यान्तरसंयोगद्वयवदित्याद्यपि द्रष्टव्यम् । **सत्प्रतिपक्षत्वाच्चेति** । विमतं कर्म द्रव्यारम्भकसंयोगविरोधितदविरोधिविभागजनकं तन्त्वन्तरविभागजनकत्वात् तन्तुवदिति सत्प्रतिपक्षोऽत्र द्रष्टव्यः । द्वितीयस्य द्वितीयमाशङ्क्य परिहरति **यदाकाशविभागजनकं कर्मेत्यादिना** । तृतीयस्त्वसिद्ध इत्याह **किञ्चेति** । **सकर्मकस्येवाकर्मकस्यापीति** । सक्रियस्येव निष्क्रियस्यापीत्यर्थः । **उत्तरविभागे** विभागजविभागे । **कर्मनिमित्तकारणमिति** । तच्च नान्यतरतन्तौ वर्तते । समवायिकारणप्रत्यासन्नस्यैव च निमित्तत्वमन्यथातिप्रसङ्ग इति भावः । **असमवायिकारणत्वस्यानिवारणादिति** । असमवायिकारणं चात्र तन्त्वन्तरविभागोऽस्तीति न कर्मापेक्षयेति भावः ।

शे०वा०— विमतं कर्मेति । द्वितन्तुकावयवे तन्तावुत्पन्नं कर्मेत्यर्थः । अत्राप्यङ्गुलीकर्मवदिति शेषो द्रष्टव्यः । **आभासतुल्यत्वादिति** । ततश्च तन्तुकर्मणस्तन्त्वाकाशसंयोगाजनकत्वात् तन्तुकर्मजन्यतन्त्वन्तरसंयोगजन्यतया कारणमात्रसंयोगजन्यकारणाकारणसंयोगोऽपि स्यादिति भावः । **सत्प्रतिपक्षत्वाच्चेति** । द्व्यारम्भकसंयोगविरोधिविभागजनकं तन्तुकर्म तदविरोधिविभागजनकं कर्मत्वादङ्गुलीकर्मवदिति सत्प्रतिपक्षत्वाच्चेत्यर्थः । अत्र च पक्षतावच्छेदकसामानाधिकरण्येन साध्यसिद्ध्या पूर्वानुमानसाध्यविपरीतविषयकत्वलाभात् सत्प्रतिपक्षत्वमित्यवधेयम् । तर्कपराहतत्वापराहतत्वाभ्यामनुमानद्वयस्य वैषम्यान्न प्रतिपक्षत्वमित्याशयेन विभागद्वयजनकत्वसाधकानुमानस्य तर्कपराहतिमाशङ्कते **यदितिप्रतिप्रसङ्गेति** । ततश्च विभागजनकत्वाभावसाधकानुमानस्यापि तर्कपराहतत्वाद्युक्तमस्य सत्प्रतिपक्षत्वमिति भावः ।

तन्त्वाकाशविभागस्य द्वितन्तुकावयवतन्तुकर्मजन्यत्वेऽतिप्रसङ्गपरिहारं वदन्नेव तन्तुद्वयविभागजन्यत्वे तस्यातिप्रसङ्गमप्याह **किञ्चेति** । **तन्तोरिति** । द्वितन्तुकावयवतन्तोरित्यर्थः । **विभागज इति** । तन्तुकर्मोत्पन्नतन्तुद्वयविभागज इत्यर्थः । **न त्विति** । न तु तन्तुकर्मज इत्यर्थः । **सकर्मकस्येवेति** । यस्मिंस्तन्तौ कर्मोत्पन्नं तस्येवेत्यर्थः । **अकर्मकस्यापीति** । यस्मिंस्तन्तौ कर्मद्वयविभागजनकं कर्म नोत्पन्नं तस्यापीत्यर्थः । **विभागस्येति** । तथा च कर्मजन्यत्वे तस्य जनकीभूतकर्मण एकमात्रवृत्तितयोभयावृत्तित्वादेकमात्रवृत्तित्वसम्भवेऽपि विभागजत्वे तस्योभयवृत्तितया तज्जन्याकाशविभागस्याप्युभयवृत्तित्वावश्यम्भावादिति भावः । **उत्तरविभाग इति** । सक्रियस्य तन्तोर्द्वितन्तुकसंयुक्ताकाशदेशविभाग इत्यर्थः । तथा च निमित्तकारणीभूतकर्मसद्भावात् सकर्मके तन्तौ विभागेन विभागोत्पत्तावपि अकर्मके तन्तौ निमित्तकारणकर्माभावेन विभागेन नाकाशविभागजननप्रसङ्ग इति भावः । **आद्यविभागजननेनैवेति** । तन्तुद्वयविभागजननेनैवेत्यर्थः । **अनवधारणादिति** । अन्यथासिद्धत्वादिति भावः । नन्वेवं सत्युत्तरदेशसंयोगोत्पत्तावपि तस्य हेतुत्वं न स्यात् । विभागजनकतयाऽन्यथासिद्धस्तत्रापि वक्तुं शक्यत्वात् । यदि च न तस्य विभागजननेनोपक्षयस्तर्हि नोत्तरविभागेऽपि तस्योपक्षय इति कथं न कारणत्वं तत्रेत्यत आह **अवधारणे वेति** । एतच्च विभागद्वयस्य पौर्वापर्यमभ्युपे-

त्योक्तम् । वस्तुतस्तु विभागद्वययौगपद्यानुभवात् तत्पौर्वापर्यमेवासिद्धिमिति नाद्यविभागजनकतया तस्योपक्षीणत्वमिति द्रष्टव्यम् । **असमवायित्वस्येति** । तल्लक्षणाक्रान्तत्वादिति भावः । तल्लक्षणाक्रान्तस्याप्यसमवायित्वाभावे दूषणमाह **अन्यथेति** । ननु कर्मविशेषव्यावृत्तस्यैव तल्लक्षणस्य करणान्न तस्य तत्रातिव्याप्तिरित्यत आह **अलमिति** । तथा सत्यन्योन्याश्रयः स्यादिति भावः ।

वा०र०— तल्लक्षणस्य करणादिति । तादृशकर्मान्यत्वविशेषणे सति तद्व्यावृत्तिसम्भवादिति भावः । **अन्योन्याश्रय इति** । तादृशकर्मणः समवायिकारणत्वाभावे सिद्धे । तद्व्यावृत्त्यर्थतया तदन्यत्वविशेषणं लक्षणे । अस्मिन्सिद्धे च लक्षणाभावादसमवायिकारणत्वाभावसिद्धिरन्यान्याश्रय इत्यर्थः ।

स०व्र०— सकर्मकस्येवेति । यस्मिन् तन्तौ कर्मोत्पन्नं तस्येवेत्यर्थः । **अकर्मकस्येति** । यस्मिन् तन्तौ कर्म नोत्पन्नं तस्येत्यर्थः ।

विट्ठल०— विमतं कर्मेति । एकस्मिन् तन्तौ विद्यमान कर्म द्वितन्तुकद्रव्यारम्भकसंयोगविरोधी यो विभागस्तन्त्वन्तरविभागः यश्च तदविरोधी द्वितन्तुकावच्छिन्नाकाशदेशविभागः तदुभयजनकमित्यर्थः । मिलितोभयजनकत्वाभावः साध्यतया परस्याभिप्रेत इति न बाध इति ज्ञेयम् । अङ्गुलिकमिव वदिति दृष्टान्तोऽत्र ग्राह्यः । एतेनेत्युक्तं दर्शयति **विमतं कर्मत्वात् श्येनकर्मवदिति** । सत्प्रतिपक्षत्वाच्चेत्यर्थः । अत्र पक्षतावच्छेदकसामानाधिकरण्येन साध्यसिद्धेः पूर्वानुमानसाध्यविपरीतविषयकत्वप्राप्त्या प्रतिपक्षत्वं ज्ञेयम् । पूर्वसाध्ये वैपरीत्यस्यैव साध्यत्वे दृष्टान्ताभावात् । ननु यदि तन्तुकर्मद्रव्यारम्भकसंयोगाविरोध्याकाशविभागजनकः स्यात्तर्हि द्रव्यारम्भकसंयोगविरोधि त्वन्तरविभागजनकं न स्यात् यदाकाशविभागजनकं न तद्द्रव्यारम्भकसंयोगविभागजनकं यथाङ्गुलिकर्मेति तर्कपराहतं प्रतिपक्षानुमानमित्याशयेन शङ्कते **यदाकाशेति** । एवं तर्हि त्वदुक्तानुमाने प्रतितर्कपराहतिः त्वदभिमततन्त्वन्तरविभागजनकत्वाभावस्याप्यापादयितुं शक्यत्वादित्याशयेन परिहरति **न यद्यत्प्रदेशेति । सकर्मकस्येति** । सक्रियस्य तन्तोरिवाक्रियस्यापीत्यर्थः । **विभागस्येति** । तन्तुद्वयविभागसक्रिये अक्रियेव साम्यादित्यर्थः । यद्वा सकर्मकस्य तस्येवाकर्मस्य स्थाणोरित्यर्थः । उभयत्रेत्यस्य श्येने स्थाणौ चेत्यर्थः । **उत्तरविभाग इति** । सक्रियस्य तन्तोस्तन्त्वन्तरविभागोत्तरकालीन द्वितन्तुकावच्छिन्नाकाशदेशविभागेत्यर्थः । तथाक्रियस्य तन्तोराकाशविभागो न तन्त्वन्तरविभागेन जायते । निमित्तकारणकर्माभावादिति भावः । **असमवायित्वस्यानिवारणादिति** । समवायिकारणप्रत्यासन्नत्वे सत्यवधृतसामर्थ्यरूपलक्षणस्य विद्यमानत्वात् । तथापि निमित्तकारणत्वाभ्युपगमे । असमवायिकारणलक्षणस्यातिव्याप्तिप्रसङ्गादिति भावः ।

चषक— एतेन समनन्तरमभिधास्यमानाभासतुल्यत्वेन । कृतैकशेषविभागपदं विरोध्यविरोधिपदाभ्यां समस्यते । **सत्प्रतिपक्षत्वात्** विमते कर्मणि द्वितन्तुकावयवगतकर्मत्वेन हेतुना दर्शितविभागद्वयजनकत्वस्य

तादृशसंयोगद्वयजनककर्मनिदर्शनेन सुसाधतया सत्प्रतिरोधत्वात् । बाधकप्रसञ्जनेन प्रतिरोधोदयमाशङ्कते **यदाकाशेति** । **सकर्मकस्य** सक्रियस्य । **अकर्मकस्य** निष्क्रियस्य । **उभयत्रापीति** । विभागस्य कर्मजन्यत्वोररीकारे तज्जनककर्मण एकव्यक्तिमात्रगतत्वेन दर्शितसकर्मकाकर्मकोभयावृत्तित्वसम्भवेऽपि विभागजत्वे तस्योभयवृत्तितया तज्जनिताकाशविभागस्याप्युभयवृत्तित्वावश्यम्भावादिति भावः । **उभयत्र** श्येने स्थाणौ चेत्यपि स्थितम् । **संयोगविभागयोः परोदीरितवैलक्षण्यनिरासः ॥**

॥ इति संयोगविभागयोरवान्तरभेदनिरासः ॥

॥ इति 'अंशतः संयोगः' इत्युक्तेरनवस्थामूलकायुक्तताशङ्का, छलत्वेन तन्निरासश्च ॥

* * *

॥ अथ अन्यचोद्यपरिहारे 'अंशतः संयोगः' इत्युक्तेरनवस्थामूलकायुक्तताशङ्कायाः प्रकारान्तरेण निरासः ॥

॥ अथ तत्रादौ तदनवस्थारूपतर्कस्य विपर्यायापर्यवसायित्वेन तर्काभासत्वम् ॥

१९८ **सु०—** एवं छलत्वेनानवस्थाप्रसङ्गं निराकृत्य प्रकारान्तरेण निराकरोति **अंश इति** ।

अनु०— अंशो संयोगदृष्टेश्च

अंशिसंयोगस्यांशावृत्तित्वदृष्टेश्च नानवस्थादोष इत्यर्थः ।

दृष्टत्वे कथमदोषत्वमित्यत आह दृष्ट इति ।

अनु०— दृष्टे का साऽनवस्थितिः ।

आपादकेऽर्थे **दृष्टे** सति **सा अनवस्थितिः का,** न दूषणमिति यावत् ।

एतदुक्तं भवति । **'यद्यंशतः संयोगः स्यात् तदा अनवस्था स्यात्, ततश्च संयोगाभाव एवापद्येत, न चासौ युक्तः, तस्मान्नांशतः संयोग' इति हि विपर्यये पर्यवसानं कर्तव्यम्; अनवस्थायास्तर्कत्वात्, विपर्ययापर्यवसायिनश्च तर्काभासत्वनियमात् ।**

परि०— एवं छलत्वेनेति । 'सर्वदिक्ष्वपि सम्बन्धादि'त्युक्तस्यैकस्मिन् जात एवेत्यादिनाऽनूदितमभिप्रायान्तरं ग्रन्थकृदनभिमतमेव प्रकल्प्योक्तो योऽनवस्थाप्रसङ्गस्तं छलोत्तरमेतदिति 'अंशांशिनोरभेदेन तु' इत्यादिग्रन्थेन निराकृत्येत्यर्थः ।

यादु०— छलत्वेनेति । अंशतस्संयोगो भवतीत्यस्मद्वाक्यस्यांशसंयोगपूर्वकता अंशसंयोगस्येत्यनभिप्रेतार्थकल्पनयाऽनवस्थाया उक्तत्वादिति भावः ।

वं०प०— छलत्वेनेति । यो यस्यांशिनः संयोगः स तदंशे वर्तते । निरंशस्य तन्तुसंयोगः क्व वर्ततामतः परमाणोः संयोग सति तद्वृत्त्यर्थमंशोऽङ्गीकरणीय इत्यभिप्रायेणोक्तस्यांशतः संयोगो भवतीत्यस्मद्वाक्यस्यांशिनः संयोगो अंशसंयोगेन जायत इत्यस्मदनभिप्रेतार्थान्तरं कल्पयित्वाऽनवस्थारूपदूषणस्य छलत्वादिति भावः । 'कञ्चिदर्थमभिप्रेत्य प्रयुक्ते वचने पुनः । अनिष्टमर्थमारोप्य तन्निषेधः छलं मतमि'ति वचनादिति द्रष्टव्यम् । **ततश्च संयोगाभाव एवेति** । तथा च तत्रैव कालपर्यवसानापत्त्या प्रकृतघटसंयोगरूपकार्यस्योत्पत्तुमवकाशाभावेन मूलक्षयादिति भावः ।

कं०रा०— छलत्वेनेति । अंशिसंयोगोंऽशवृत्तिरिति सिद्धान्तिप्रयुक्तस्यांशिनः संयोगोंऽशसंयोगेन जायत इत्यभिप्रायान्तरं परिकल्प्यानवस्थाप्रसञ्जनस्य पूर्वपक्षिणा कृतत्वाच्छलत्वमिति भावः ।

श्रीनिधि०— छलत्वेनानवस्थाप्रसङ्गमिति । छलत्वेनापादितमनवस्थाप्रसङ्गमित्यर्थः । तर्हि कथं अंशभेदेनैव भावाभावाविति भवतां निर्णयः ।

शे०वा०— ननु 'संयोगैक्ये भवेत्क सा' इत्यनवस्थायाः पूर्वमेव परिहृतत्वात् किमुत्तरेण ग्रन्थेनेत्यतस्तस्य प्रकारान्तरेण तन्निराकरणार्थत्वान्नानर्थक्यमिति भावेन वृत्तानुवादपूर्वकं तत्परतयोत्तरग्रन्थं योजयति **एवमिति** । **छलत्वेनेति** । अंशतः संयोगो भवतीत्यस्मद्वाक्यस्यांशिसंयोगस्यांशसंयोगपूर्वकत्वमित्यनभिमतार्थकल्पनयाऽनवस्थाया उक्तत्वादिति भावः । किं तत्प्रकारान्तरमित्यतस्तत्सूचयन्नेव तदुपपादयति **एतदुक्तं भवतीति** ।

विट्ठल०— एवं छलत्वेनेति । सर्वदिक्ष्वपि सम्बन्धादित्यंशतः संयोगप्रतिपादकास्मद्वाक्यस्यांशसंयोगपूर्वकत्वमंशिसंयोगस्येत्यनभिप्रेतमेव प्रकल्प्यानवस्थाप्रसङ्गे परेण चोदिते छलोत्तरमेतदिति अंशांशिनोरभेदेनेत्यादिना निराकृत्येत्यर्थः । प्रकारान्तरेण निराकरोतीत्युक्तं प्रकारं व्यनक्ति **एतदुक्तं भवतीति** । **ततश्चेति** । संयोगस्यांशगतत्वनियमाङ्गीकारेऽनवस्थाप्रसङ्गादित्यर्थः । **न चासाविति** । संयोगप्रत्यक्षसिद्धत्वादसौ संयोगाभावो न युक्त इत्यर्थः । **तर्केति** । तर्कविपर्यये पर्यवसानलब्धस्य अंशतः संयोगो न भवतीत्यस्य कोऽर्थ इत्यर्थः ।

चषक— छलत्वेनेति । अंशतः संयोगो भवतीत्यस्मदीयवाक्यस्यांशिसंयोगपूर्वकत्वरूपानभिप्रेतार्थकल्पनयाऽनवस्थाया उक्तत्वादिति भावः ।

* * *

॥ अथ तत्र 'अंशतः संयोगो न भवति' इति विपर्ययस्य अर्थविकल्पः तद्योगश्च ॥
॥ अथ तत्रापि संयोगस्य पराभिप्रेताव्याप्यवृत्तित्वाद्यर्थकत्वनिरासः ॥

१९९ **सु०—** अत्रांशतः संयोगो न भवतीति कोऽर्थः यद्यंशिसंयोगस्यांशसंयोगपूर्वकता-नियमो नास्तीति, तर्ह्योमिति वदामः ।

यद्यंशिसंयोगोंऽशावृत्तिर्न भवतीति; तन्न घटाद्यंशिसंयोगस्य तदंशावृत्तितायाः प्रत्यक्षदृष्टत्वेन विपर्ययपर्यवसानस्य बाधितत्वात् ।

घटसंयोगो घट एव वर्तते, किन्त्वव्याप्यवृत्तित्वात्तदंशावृत्तिरिवावभासत इति चेत् । केयमव्याप्यवृत्तिता नाम अन्या अंशावृत्तित्वात् । स्वाभावसमानाधिकरणत्वमिति चेन्न, विरुद्धत्वात् । दृष्टत्वादविरोध इति चेन्न, किमंशभेदेन भावाभावौ दृश्येते उत घट एवेति सन्देहात् । न ह्यविरुद्धविषयत्वे सति विरुद्धविषयताऽङ्गीकर्तुमुचिता । उपाधि-भेदादविरोध इति चेत्, के त उपाधयः । अंशा एवेति चेत्, त एव सन्तु तर्हि संयोग-भावाभावाश्रयाः किमं(शि)शावृत्तित्वेन विरुद्धेन अङ्गीकृतेन, अंशांशिनोरभेदेनातिप्रसङ्ग-स्या-पास्तत्वादिति ।

परि०— इति सन्देहादिति । तथा च दृष्टत्वादिति हेतुः सन्दिग्धासिद्ध इति भावः । भवतामपि तर्ह्यंशावृत्तित्वानिर्णय एवेत्यत आह **न ह्यविरुद्धेति** । भिन्नांशावृत्तित्वेनेति योज्यम् । ननूक्तमत्र घटांशसंयोगः यदि घटवृत्तिः तर्हि पटवृत्तिरपि स्यादित्यत आह **अंशांशिनोरभेदेनेति** । **संयोगस्य पराभिप्रेताव्याप्यवृत्तित्वनिरासः ॥**

यादु०— दृष्टत्वादिति । भावाभावयोरेकस्मिन्घटे सामानाधिकरण्यस्य दृष्टत्वादित्यर्थः । **अंश-भेदेनेति** । अंशद्वयाश्रितत्वेनेत्यर्थः । **सन्देहादिति** । तथा च दृष्टत्वादिति हेतुः सन्दिग्धासिद्ध इति भावः । निश्चितासिद्धिमप्याह **न ह्यविरुद्धेति** । **अतिप्रसङ्गस्येति** । घटसंयोगो यदि घटांशावृत्तिः तर्हि पटवृत्तिरपि किन्न स्यादुभयोर्घटभिन्नत्वाविशेषादित्यतिप्रसङ्गस्येत्यर्थः ।

वं०प०— अत्रेति । विपर्ययपर्यवसान इत्यर्थः । **घट एवेति** । अंशिन्येवेत्यर्थः । एकत्रैव न स्वाभावसामानाधिकरण्यं विरुद्धत्वात् किन्त्वंशभेदेनैवेति वाच्यम् । कुत इति चेत् अविरुद्धविषयत्व-सम्भवादित्याह **न हीति** । **उपाधिभेदादिति** । अंशिन्येवेत्यर्थः ॥ ननु यद्यंशानामेव संयोगाभावाधिकरणत्वं

तर्ह्यंशवृत्तिः संयोगो न घटसंयोगः स्यात् । अन्यथा पटवर्तिनोऽपि संयोगस्य घटीयत्वापत्तेरित्यत आह **अंशांशिनोरिति** । **अपास्तत्वात्** 'अंशांशिनोरभेदेने'त्यादिनेत्यर्थः ।

कं०रा०— अंशिवृत्तित्वेनेति । संयोगभावाभावयोरिति शेषः । ननु संयोगस्यांशवृत्तित्वे अंशिधर्मत्वं न युक्तमन्यवृत्तेरन्यधर्मत्वेति प्रसङ्गादित्यत आह **अंशांशिनोरिति** ।

श्रीनिधि०— नियामकाभावादित्यत आह **न ह्यविरुद्धविषयत्वे सतीति** । नियामकाभावोऽसिद्ध इति भावः । **अंशा इति** । अवयवा इत्यर्थः । **किं अंशिवृत्तित्वेन विरुद्धेनाङ्गीकृतेनेति** । अन्ततोऽप्यंशभेदे अभ्युपगन्तव्ये आदावेव तन्निष्ठत्वेनाविरोधः परिह्रियताम् । किमर्थं पङ्कं स्पृष्ट्वा हस्तं क्षालयसीति भावः । नन्वंशवृत्तित्वाभ्युपगमेति प्रसङ्गदोष इति सपक्षो नाभ्युपगम्यत इत्यत आह **अंशांशिनोरभेदेनातिप्रसङ्ग-स्यापास्तत्वादिति** । घटांशवृत्तिसंयोगस्य घटवृत्तित्वे कुड्यकुसूलसंयोगोऽपि घटवृत्तिः स्यादित्यतिप्रसङ्गस्य एतावत्तु भवेदित्यादिना ग्रन्थेनापास्तत्वादित्यर्थः ।

शे०वा०— तर्ह्योमिति वदाम इति । अंशांशिनोरभेदेनांशसंयोगस्यैवांशिसंयोगतया तस्यांशसंयोग-पूर्वकत्वाभावस्य अस्मत्सम्मतत्वादिति भावः । **तदंशवृत्तिरेवेति** । तथा चांशवृत्तित्वदर्शनस्य भ्रमत्वेनाप्रमाण-त्वान्न विपर्यये पर्यवसानस्य प्रमाणबाधितत्वमिति भावः । **अन्या अंशवृत्तित्वादिति** । ततश्चांशवृत्तित्वाति-रिक्ताया अव्याप्यवृत्तिताया दुर्निरूपत्वेनाव्याप्यवृत्तित्वेनाप्यंशवृत्तित्वप्राप्त्या तस्य वास्तवतालाभेन तद्दर्शनस्य प्रमाणत्वप्राप्तेर्विपर्यये पर्यवसानस्य प्रमाणबाध एवेति भावः । नन्वव्याप्यवृत्तित्वं नाम नांशवृत्तित्वं, किं तर्ह्यन्यदेवेति न तद्दर्शनस्य प्रमाणत्वप्राप्तिरित्याशङ्कते **स्वाभावेति** । स्वप्रतियोगिकात्यन्ताभावसामानाधि-करण्यमित्यर्थः । अन्यथा प्राग्ध्वंसाभावसामानाधिकरण्याद्रूपादेरप्यव्याप्यवृत्तिप्रसङ्गादिति भावः । न संयोगस्य स्वात्यन्ताभावसामानाधिकरण्यं युक्तम् । भावाभावयोः स्वाभाविकविरोधात् । अन्यथा घटस्यापि स्वात्यन्ता-भावसामानाधिकरण्यप्रसङ्गादित्याशयेन परिहरति **नेति** । प्रतियोगितदत्यन्ताभावयोः सामानाधिकरण्यस्येति शेषः । नन्वत्यन्ताभावः प्रतियोगिसमानाधिकरणोऽभावत्वात्प्रागभाववदिति चेन्न । भावाभावयोर्हि विरोध-परिहारो द्वेधा सम्भवति । कालभेदेन देशभेदेन वेति । तत्र प्रागभावप्रध्वंसाभावयोः कालभेदेन विरोधपरिहारा-त्प्रतियोगिसामानाधिकरण्याङ्गीकारेऽपि न विरोधः । अन्यन्ताभावस्य तु नित्यत्वेन कालाभेदेन विरोधपरिहारा-सम्भवेन देशभेदेनैव तस्य परिहरणीयत्वात् कथं प्रतियोगिसामानाधिकरण्यम् । अथ नित्योऽप्यन्योन्याभावः प्रतियोगिसमानाधिकरणो दृश्यते । घटवत्येव भूतले घटान्योन्याभावानुभवात् । ततः कथं तत्र विरोधपरिहार इति चेत् । इत्थम् । अभावो हि प्रतियोगितावच्छेदकावच्छिन्नेन प्रतियोगिना विरुध्यते, न पुनः प्रतियोगि-मात्रेण । तथा सत्यदण्डिनि पुरुषे विद्यमाने दण्डी पुरुषो नेति निषेधाभावप्रसङ्गात् । तत्र प्रतियोगितावच्छेदकावच्छिन्नपुरुषस्यासत्त्वेऽपि प्रतियोगिभूतपुरुषमात्रस्य सत्त्वात् । एवं च अन्योन्याभावोऽपि यद्यपि प्रतियोगिसमानाधिकरणः तथाऽपि प्रतियोगितावच्छेदकतादात्म्यावच्छिन्नेन प्रतियोगिना न समानाधिकरणः ।

न हि भूतले घटो भूतलात्मना वर्तते । तेन नान्योन्याभावोऽपि प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिसमानाधिकरणः । तथा च प्रयोगः । अत्यन्ताभावः, प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिसमानाधिकरणत्वे सति तादृशप्रतियोगिसमानकालीनो न, अभावत्वात् सम्मतवदिति ।

ननु सर्वत्र परस्परपरिहारेणैव सत्त्वदर्शनं सहानवस्थानलक्षणविरोधे प्रमाणम् । क्वचित्सहदर्शनं च अविरोधे । अन्यस्यानिरूपणात् । ततश्चान्यत्र भावाभावयोरेकत्र विरोधेऽपि न संयोगतदत्यन्ताभावयोरेकत्र विरोधः । दर्शनबलेनैव संयोगतदत्यन्ताभावयोः सामानाधिकरण्यसिद्धेरिति भावेन शङ्कते **दृष्टत्वादिति** । न च दर्शनमात्रं वस्तुतत्वव्यवस्थापकमतिप्रसङ्गात् । किं तर्हि प्रमारूपमेव । तत्प्रामाण्यं च विरोधपरिहारे । विरुद्धार्थप्रतिपादकयोरन्यतराप्रामाण्यावश्यम्भावात् । विरोधपरिहारश्च प्रमाणबलादेवेत्यन्योन्याश्रयात् । तस्माद्युक्त्या विरोधं परिहृत्य पश्चात्प्रतीतेः प्रामाण्यं निश्चेतव्यम् । तच्चात्र नास्तीति नैतद्युक्तमिति परिहारे सत्येव सन्दिग्धासिद्ध्याऽपि हेतुं दूषयति **किमंशभेदेनेति** । किमंशद्वयाश्रितत्वेनेत्यर्थः । निश्चितासिद्ध्याऽपि तं दूषयति **न ह्यविरुद्धेति** । ननु भावाभावावेकत्र न विरुद्धौ किन्त्वेकावच्छेदेनैव । ततश्च यदवच्छेदेन घटे संयोगस्तदवच्छेदेन तत्र संयोगाभावस्य यदवच्छेदेन संयोगाभावस्तदवच्छेदेन च तत्र संयोगस्य विरुद्धत्वप्राप्तावप्यवच्छेदकभेदेनैकत्रैव घटे संयोगतदत्यन्ताभावावप्यविरुद्धावेवेति युक्तं तयोः सामानाधिकरण्यमिति शङ्कते **उपाधीति** । उपाधिभेदादिति वदतः किमंशातिरिक्तोपाधिभेदोऽभिमतः किं वा अंशभेद इति विकल्पद्वयं मनसि निधायांशातिरिक्तोपाधीनामनिरूपणान्न तद्भेदो युक्त इत्याशयेनाद्यं प्रत्याह **के त इति** । अस्तु तर्ह्यंशभेद एवेति द्वितीयो निरवद्यत्वादिति शङ्कते **अंशा एवेति** । **त एवेति** । संयोगतदत्यन्ताभावयोरेकाश्रितत्ववादिनाऽपि तदवच्छेदकतया अंशानामवश्याश्रयणीयत्वात् अंशद्वयाश्रितत्वेन संयोगभावाभावदर्शनानुकूलत्वाच्चेति भावः । **किमिति** । अविरुद्धविषयत्वे सति विरुद्धविषयताया अङ्गीकर्तुमनुचितत्वादिति भावः । घटांशवृत्तित्वे घटसंयोगस्य पटवृत्तित्वमपि स्यादविशेषादित्यतो भवेदयमतिप्रसङ्गो यदि पटवद्घटांशोऽपि घटादत्यन्तभिन्नः स्यात् । न चैवम् । ततश्च घटाभिन्नत्वाद्घटांशस्य तद्वृत्तित्वेऽपि तद्भिन्नत्वात् पटस्य न तद्वृत्तित्वं घटसंयोगस्येति वैषम्येणाविशेषासिद्धेर्नातिप्रसङ्ग इत्याह **अंशांशिनोरभेदेनेति** । **अपास्तत्वादिति** । एतावत्तु भवेदित्यादिनेति शेषः । इतीत्यस्यैतदुक्तं भवतीति पूर्वेणान्वयः ।

वा०र०— नन्वत्यन्ताभावः प्रतियोगिसमानाधिकरणः अभावत्वात्प्रागभाववदित्यादिसम्मतवदितीत्यन्तं मन्दारमञ्जर्यानुसारेण उपयुक्तं व्याख्येयमस्ति । ननु सर्वत्र परस्परपरिहारेणैवेत्यादिकं न दर्शनमात्रमित्यादिकं चोक्तानुसारेणैव । **प्रतियोगितावच्छेदकतादात्म्येति** । घटात्यन्ताभावस्य तदन्योन्याभावस्य च घटप्रतियोगिकत्वाविशेषेऽपि संसर्गावच्छिन्नप्रतियोगिताकोऽत्यन्ताभावः । तादात्म्यावच्छिन्नप्रतियोगिताकोऽन्योन्याभाव इत्यादि परप्रक्रियानुसारेणान्योन्याभावप्रतियोगिनः प्रतियोगितावच्छेदकं तादात्म्यमेव प्राप्नोतीति भावः । कुतः उक्तप्रतियोगिना अन्योन्याभावस्य न सामानाधिकरण्यमित्यतस्तदुपपादयति **न हि भूतल इति** ।

ननु घटप्रतियोगिकान्योन्याभावस्य इत्यादि प्रक्रियानुसारेणान्योन्याभावप्रतियोगिनः प्रतियोगितावच्छेदकतादात्म्यमेव प्राप्नोति इति भावः । कुतः उक्तः प्रतियोगिना अन्योन्याभावघटात्मकत्वं प्रतियोगितावच्छेदकम् । भूतलप्रतियोगिकान्योन्याभावस्य तु भूतलात्मकत्वव्यवस्थायाः सिद्धत्वात् भूतलनिष्ठघटान्योन्याभावस्य घटाख्यप्रतियोगिसामानाधिकरण्यशङ्कापरिहाराय प्रतियोगितावच्छेदकावच्छिन्न तत्समानाधिकरण्याभावमुपपादयितुं प्रवृत्तेन भूतलात्मकतया घटस्य भूतले सत्त्वाभावप्रतिपादनमुक्तम् । घटान्योन्याभावप्रतियोगिताया भूतलात्मकतयावच्छिन्नमानत्वानभ्युपगमात् । प्रत्युत तत्प्रतियोगिताया घटात्मकत्वेनैव अवच्छेद्यतया तदवच्छिन्नस्य च प्रतियोगिनो घटस्य भूतले सत्ताया अविप्रतिपन्नतया विशिष्टप्रतियोगिसामानाधिकरण्यमेव प्राप्तमिति विरोधाभाव एव प्राप्नोति । एवं वक्ष्यमाणानुमानमपि प्रकृतान्योन्याभावेनैकान्त्येन दुष्टमिति । मैवं भूतलं घटो नेति प्रतीत्यनुसारेण घटात्मकत्वस्येव घटो भूतलं नेति प्रतीत्यनुसारेण भूतलात्मकत्वस्यैव च भूतलं भूतलघटौ नेति प्रतीत्यनुसारेणोभयात्मकत्वस्यापि प्रतियोगितावच्छेदकतया प्राप्तत्वेन तदवच्छिन्नप्रतियोग्यभावे ऽप्रतियोगिसामानाधिकरण्याभावोपपत्तेः । नन्वेतदयुक्तम् । यदुभयात्मकत्वमेव प्रतियोगितावच्छेदकमिति । तथा हि । एकसत्त्वे द्वयमिह नास्तीति प्रतीतेर्व्यासज्यवृत्तिद्वित्वावच्छिन्नात्यन्ताभाववदेकस्य घटस्य घटात्मकत्वेऽपि भूतलात्मकत्वाभावेनोभयात्मकत्वाद्भूतलं भूतलघटो नेति प्रतीत्याकारमालम्ब्योभयात्मकताया प्रतियोगितावच्छेदकताप्राप्तेरुभयात्मकत्वरूपप्रतियोगितावच्छेदकावच्छिन्नान्योन्याभावोऽपि सिद्ध्यतीति तत्रोभयात्मकत्वं प्रतियोगितावच्छेदकं भवतु । भवतु च तत्प्रतीतिपक्षे भूतले घटस्य सत्त्वेऽप्युक्तावच्छेदकावच्छिन्नस्य तस्याभावेन भूतलनिष्ठान्योन्याभावस्योक्तविधप्रतियोगिसामानाधिकरण्याभावः । न चैतावतान्योन्याभावमात्रस्य प्रतियोगिसामानाधिकरण्याभावसिद्धिः । भूतलं घटो नेत्यादि पृथक् पृथगन्योन्याभावप्रतीतिस्थले अन्योन्याभावस्य उक्तविधतत्सामानाधिकरण्यस्यावर्जनीयत्वात् । भूतलघटो परस्परं नेति प्रतीतिपक्षेऽपि नोभयात्मकत्वमेकमवच्छेदकं लभ्यते । तथा सति तदवच्छेदकोभयोरङ्गीकारे तयोः परस्परात्मकत्वस्यैवापत्तेः । व्यासज्यवृत्तिधर्माङ्गीकारेण प्रतीतिविषयकल्पनायां च उक्तस्थलीयतत्सामानाधिकरण्यन्यायेन अस्त्वत्रापि सामानाधिकरण्याभावः । तस्मात् भूतले घटाभेदस्य घटे च भूतलाभेदस्य शङ्कायां तयोः परस्परभेदप्रतीतिमुपादाय तन्तौ परस्परं नेत्येवं सामान्यरूपेणोक्तावपि प्रतीतिविषयपर्यालोचनाया भूतलं घटो नेति घटो वा भूतलं नेत्येव प्रतीत्याकारपर्यवसानेन प्रत्येकमेकैकात्मकत्वस्यैव न तदवच्छेदकतालाभः ।

अत एव संयोगादिषु धर्म्येष्वन्योन्यप्रतियोगेनेत्यादिभाष्यव्याख्यानमूले भिन्नौ संयुक्तौ विभक्तावित्यादिप्रतीतीनां शुक्ला इत्यादिदृष्टान्तेन भिन्नभिन्नाद्यविषयकतेत्याद्युपपादयिष्यते । आकाशेश्वरौ न परस्परं संयुज्यते युतसिद्धिरहितत्वादित्येतत्परोक्तानुमानस्याप्युक्ताशयेनैवोत्तरटीकायामनुवादः । तथा चोक्तविधप्रतियोगिसामानाधिकरण्यं भूतलनिष्ठान्योन्याभावस्यावर्जनीयमिति चेत् मैवम् । अभिप्रायानवबोधात् । अस्त्यत्र टीकाकृतो अभिप्रायविशेषः । घटवत्येव भूतले घटान्योन्याभावानुभवसद्भावेनान्योन्याभावस्याप्यस्ति प्रतियोगिसामानाधिकरण्यमिति । शङ्कायाः सामान्यतः प्रवृत्त्योदाहरणविशेषमादाय सामानाधिकरण्यशङ्काविषयं पर्यवस्य

तत्र प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिसामानाधिकरण्याभावोपपादनप्रकारो न हि भूतल इत्यादिनोक्तो ज्ञेयः । यदि च भूतलं घटो नेत्यादि प्रतीतिमालम्ब्य अन्योन्याभावस्य प्रतियोगिसामानाधिकरण्यशङ्का-विषयपर्यवसानम् । तदोक्तप्रकारेण तत्सामानाधिकरण्याभावोपपादनमिदं न भवत्येव । किन्तु अन्योन्याभावस्य तादात्म्यावच्छिन्नेन प्रतियोगिना विरोध इत्यस्य प्रतियोगितावच्छेदकतादात्म्येन विरोध इत्यर्थपर्यवसानं विवक्षित्वाऽन्योन्याभावस्य स्वविरोधिप्रतियोगितावच्छेदकसामानाधिकरण्याभावस्य न्यायप्रक्रियानुसारेण प्राप्तेः प्रतियोगितावच्छेदकाख्यविरोधिसामानाधिकरण्यस्यैवानिष्टतया तस्य चाप्राप्तेर्न दोष इत्येव प्रकारान्तरेण तदुप-पादनं शिष्यैरेवोह्यमिति । तथा च यथा सत्यपि पुरुषमात्रे पण्डितेति प्रतिषेधः स्वविरोध्यभावात् । सत्यपि चैकमस्मिन्घटे घटपटौ न स्त इति प्रतिबन्धोऽपि द्वित्वावच्छिन्नस्य विरोध्यभावात् । न चैतावतात्यन्ता-भावस्य प्रतियोगी विरोध्येव नेति वक्तुं शक्यम् । घटवति भूतले तदत्यन्तभावाभावात् । एवं भूतलं घटो नेत्येवंरूपप्रतीतिसिद्धभूतलनिष्ठघटान्योन्याभावस्य प्रतियोगिसामानाधिकरणत्वे अन्योन्याभावे तद्विरोधस्य विव-क्षिताया तत्सामानाधिकरण्यस्याप्यनिष्टत्वाभावेन प्रतियोगितावच्छेदकरूपस्वविरोध्यभावात् । भूतलं घटो नेति प्रतिषेधोऽपि युज्यत एव । तथा च तस्य स्वविरोधिसामानाधिकरण्याभाव एव विवक्षितः । न चैतावता सर्वत्र प्रतियोगिसामानाधिकरण्यमेवान्योन्याभावस्याप्रतियोगितावच्छेदकं तु तद्विरोधीति प्राप्त्या प्रतियोगि-तावच्छेदकावच्छिन्नस्य प्रतियोगिनोऽन्योन्याभावविरोधित्वमित्युक्तपरित्यागः सर्वथा प्राप्नोति । भूतलं भूतलघटौ नेति प्रत्ययस्थले उभयात्मकतायाः प्रतियोगितावच्छेदकतया तदवच्छिन्नप्रतियोगिनश्च । तत्राभावोऽन्योन्या-भावस्योक्तप्रतियोगिसामानाधिकरण्याभावेनात्यन्ताभावे विशिष्टप्रतियोगिनो विरुद्धस्य क्लृप्ततया तदनुसारेणैव विशिष्टप्रतियोगिनोऽन्योन्याभावविरोधिताया अपि कल्पयितुं शक्यत्वात् । तदेव टीकाग्रन्थस्य स्थलविशेषा-भिप्रायेण प्रतियोग्यसामानाधिकरण्योपपादनपरत्वादन्यत्र च प्रकारान्तरस्यासम्मतत्वान्न कश्चिद्दोषः । मन्दार-मञ्जर्यामप्ययमेवाशयः । पुनः परामृश्य लेखनीयमेतत् । अस्तु वान्योन्याभावः प्रतियोगिसामानाधिकरणः । न तावतात्यन्ताभावे तत्सामानाधिकरण्यकल्पनावकाशः । घटात्यन्ताभावे तत्सामानाधिकरण्याभावस्य सिद्ध-त्वेन संयोगतदत्यन्ताभावयोरपि देशभेदेनैवावस्थानस्य वाच्यत्वे उक्तेऽन्योन्याभावस्य तद्दर्शनेनात्रापि तथात्व-मिति शङ्काया एवानुदयात् । न हि क्वचिदन्योन्याभावस्य तत्सामानाधिकरण्याभावो विरोधेन दृष्टः । येनान्य-त्राविरोधस्यापि दर्शनेन दृष्टान्तीकरणं युक्तं स्यात् । घटे घटान्योन्याभावघटयोरदृष्टत्वेऽपि न तयोर्विरोधं कल्पयितुं शक्यः । घटे प्रतियोग्याभावेन तदन्योन्याभावसम्भवस्य कैरप्यप्रतिपादनात् । ततश्च प्रतियोगिना सम्भव-द्विरोधस्याभावस्यैवात्र तत्सामानाधिकरण्यानुपपत्तेर्वक्तव्यतया मूलाभिप्रेतत्वात्प्रागभावादौ तथात्वदर्शनाच्च तथात्वभूतोऽन्योन्याभावस्यानुदाहरणीयत्वमेवेति समाध्यन्तरमिति टीकायामुपलक्षणया ज्ञातव्यम् ।

विठ्ठल०— घटसंयोगस्य घटवृत्तित्वे तदंशवृत्तिताग्राहिप्रत्यक्षस्य का गतिरिति पृच्छति **किन्त्विति** । उत्तरमाह **अव्याप्यवृत्तित्वादिति** । **केयमिति** । अंशवृत्तित्वादन्या अव्याप्यवृत्तितानामकेत्यर्थः । **दृष्टत्वा-दिति** । संयोगतदभावयोरेकस्मिन्नेव पटादौ सामान्याधिकरणस्य दृष्टत्वादित्यर्थः । **अंशभेदेनेति** । अंश-

द्वयाश्रितत्वेनेत्यर्थः । **उत घट एवेति** । अंशभेदे विना घटतन्मात्र इत्यर्थः । तथा च वृष्टत्वादिति हेतुः सन्दिग्धासिद्धिरिति भावः । निश्चितासिद्धिमप्याह **न हीति** । अंशांशिनोरभेदेनांशवृत्तिसंयोग एवांशिसंयोग इत्यंशसंयोगदृष्टे विरुद्धविरुद्धविषयत्वे सतीत्यर्थः । तथा च संयोगतदभावयोरेकस्मिन् घटे अंशभेदेनैव सामानाधिकरण्यं दृष्टमिति स्वात्यन्ताभावसमानाधिकरणत्वेन दृष्टत्वस्य निश्चितासिद्धिरिति भावः । ननु उपाधिकृतभेदभिन्नेंऽशिन्येव घटसंयोगतदभावयोरङ्गीकारान्न विरोध इति शङ्कते **उपाधीति** । अंशानामेवोपाधित्वे एकस्मिन्नंशे संयोगाभावोऽन्यस्मिन्नभाव इत्येवोचितं न त्वंशिन्येव भावाभावौ विरुद्धत्वाभावात् । न चौपाधिकभेदभिन्नेंऽशिन्येव संयोगभावाभावौ न विरुद्धाविति वाच्यम् । उपाधीनामंशिभेदापादकत्वस्य कुत्राप्यदृष्टत्वात् घटपटाद्युपाधीनामाकाशेंऽशभेदे ज्ञापकता एव वृष्टत्वादित्याशयेनाह **त एव तु सन्तु तर्हीति** । ननु यदि घटसंयोगो घटांशवृत्तिस्तर्हीति पटवृत्तिरपि किं न स्यादुभयोर्घटापेक्षया भिन्नत्वस्याविशेषादित्यतिप्रसङ्गापत्तेरित्यत आह **अंशांशिनोरभेदेनेति** ।

चषक— दृष्टत्वादिति । कपिसंयोगतदभावयोरेकत्र सामानाधिकरण्यस्य दृष्टत्वादित्यर्थः । निश्चितासिद्धिमप्याह **न हीति** ।

॥ इति संयोगस्य पराभिप्रेताव्याप्यवृत्तित्वाद्यर्थकत्वनिरासः ॥
॥ इति 'अंशतः संयोगो न भवति' इति विपर्ययस्य अर्थविकल्पः तद्योगश्च ॥
॥ इति तदनवस्थारूपतर्कस्य विपर्ययापर्यवसायित्वेन तर्काभासत्वम् ॥

* * *

॥ अथ तच्छङ्कायाः प्रकारान्तरेण निरासे तदनवस्थारूपतर्कस्य प्रतितर्कपराहतत्वम् ॥

२०० **सु०— प्रतितर्कपराहतत्वाच्चाप्रसङ्गोऽयमित्याह यदीति ।**

अनु०— यद्यंशगो न संयोगः कार्येषु प्रथिमा कथम् ।

यदि कारणानां संयोगः तद् अंशवृत्तिः न स्यात् तदा तदारब्धेषु कार्येषु कारणापेक्षया **परिमाणोत्कर्षो न स्यादित्यर्थः ।**

अयमभिसन्धिः । कारणपरिमाणापेक्षया कार्ये परिमाणोत्कर्षस्तावत् सर्वत्र प्रचयजन्यः, द्वितूलके तथा दर्शनात्, प्रचयहीनतूलद्वयजन्यरज्जुद्रव्ये तदभावोपलम्भाच्च । प्रचयश्च कारणयोः प्रशिथिलः संयोगः । प्रशिथिलता च संयोगस्य केषुचिदंशेषु वृत्तिः

केषुचिदवृत्तिरेव; नान्या, अनिरूपणात् । ततः संयोगस्यांशावृत्तित्वाभावे प्रचयोऽसौ न भवतीति कारणाभावादुत्कृष्टपरिमाणोत्पादो न स्यादिति ।

परि०— अप्रसङ्गोऽयमिति । **अयं** परोक्तानवस्थाप्रसङ्गस्तर्काप्रतिहतिरूपाङ्गहीनत्वात् अप्रसङ्गः तर्काभास इत्याहेत्यर्थः । **द्वितूलक इति** । प्रशिथिलावयवसंयोगोपेततूलपिण्डद्वयारब्धसूत्र इत्यर्थः ।

श्रीनिधि०— अप्रसङ्गः प्रसङ्गाभावः । **द्वितूलक इति** । अल्पपरिमाणात् तूलपिण्डद्वयारब्धे स्थूल-परिमाणे एकस्मिन् तूलपिण्ड इत्यर्थः । कारणबहुत्वेनान्यथासिद्धिं वारयितुं द्विग्रहणम् । अन्वयं उक्त्वा व्यतिरेकमाह **प्रचयहीनेति** । **तदभावोपलम्भादिति** । प्रचयहीनतूलद्वयस्य यावतिदेशेऽवस्थानं तावत्येव देशे तदारब्धरज्जुद्रव्यस्याप्येव स्थानं दृश्यते । परिमाणोत्कर्षे च तन्न स्यादिति भावः । सप्रचयतूलद्वयारब्धे परि-माणोत्कर्षाभावे कारणदेशपरिमितदेश एवावस्थानं स्यादिति च द्रष्टव्यम् । **केषुचिदंशेषु वृत्तिः केषुचिदंशे-ष्ववृत्तिरिति** । द्वितूलकांशाः स्वसमीपवर्तिभिः । कैश्चन परस्परं संयुज्यन्ते कैश्चनांशैर्नेत्यर्थः । प्रचयहीना-रब्धांशास्तु स्वसमीपवर्तिभिः सर्वैरपि असंयुज्यन्त इति द्रष्टव्यम् ।

शे०वा०— ननु 'यद्यंशग' इत्युत्तरभाष्यमनर्थकम् । न च कारणसंयोगस्य तदंशावृत्तित्वाभावे तदारब्धकार्ये परिमाणोत्कर्षानुपपत्तिप्रतिपादनार्थं तदिति वाच्यम् । तत्प्रतिपादनस्य प्रकृतोपयोगादर्शना-दित्यतोऽनवस्थाप्रसङ्गस्य प्रतितर्कपराहतिप्रतिपादनेनाप्रसङ्गत्वप्रतिपादनार्थत्वान्न तदिति भावेन तत्परतयोत्तरग्रन्थं योजयति **प्रतितर्केति** । न केवलं विपर्ययापर्यवसायित्वादप्रसङ्ग इति चार्थः । नन्वत्र संयोगस्यांशावृत्तित्वाभावे कार्येषु प्रथिमा न स्यादित्येवोच्यते, न तु कारणसंयोगस्य तदंशावृत्तित्वाभावे तदारब्धकार्ये परिमाणोत्कर्षानुप-पत्तिरिति । ततश्च कथमस्य प्रतितर्कपराहतिपरत्वमित्यतोऽपेक्षितपूरणेन प्रतितर्कपराहतिपरतया मूलं व्याचष्टे **यदित्यादिना** । ननु कारणसंयोगस्यांशावृत्तित्वाभावेऽपि तदारब्धे कार्ये कारणपरिमाणापेक्षया परिमाणोत्कर्षो नानुपपन्नः । तस्यांशावृत्तिकारणसंयोगजन्यत्वासिद्ध्या अकारणाभावेन कार्याभावापादनतया अप्रयोजकत्वेनानु-त्थानादित्यत आह **अयमभिसन्धिरिति** । कुतस्तस्य प्रचयजन्यत्वमित्यतोऽन्वयव्यतिरेकाभ्यामिति भावेनान्वयं तावद्दर्शयति **द्वितूलक इति** । व्यतिरेकमप्याह **प्रचयहीनेति** । अस्त्वेवं कारणपरिमाणापेक्षया कार्ये परिमाणो-त्कर्षस्य प्रचयजन्यत्वं, तावताऽपि कथं तस्य तत्संयोगजन्यत्वमित्यत आह **प्रचयश्चेति** । नन्वस्तु कार्ये परिमाणोत्कर्षाय कारणयोः प्रशिथिलसंयोगरूपप्रचयापेक्षा, तथाऽपि कथं कारणसंयोगस्यांशावृत्तितायास्तत्रोप-योगो येन तदभावात् तदभावापादनमित्यत आह **प्रशिथिलता चेति** । कुतो नान्येत्यतः सा किं स्वाभावसमानाधिकरणताऽभिमता तदन्या वा काचित् । नाद्यः । विरुद्धत्वादित्यादिना निरस्तत्वादित्यभिप्रेत्य द्वितीयं दूषयति **अनिरूपणादिति** । इतीत्यस्येत्ययमिति पूर्वेण सम्बन्धः ।

वा०र०— तत्संयोगेति । अंशवृत्तिकारणसंयोगेत्यर्थः ।

विट्ठल०— अप्रसङ्गोऽयमिति । प्रसङ्गाभासोऽयमनवस्थापादनमिति भावः । प्रतितर्के व्याप्त्युपपादनायाह **अयमभिसन्धिरिति** । **द्वितूलक इति** । प्रशिथिलावयवसंयोगोपेतमूलपिण्डद्वयारब्धद्रव्य इत्यर्थः ।

॥ इति तच्छङ्कायाः प्रकारान्तरेण निरासे तदनवस्थारूपतर्कस्य प्रतितर्कपराहतत्वम् ॥

* * *

॥ अथ तच्छङ्कायाः प्रकारान्तरेण निरासे 'परमाणोरणौ महत्त्वं ने'त्यस्य व्याहतिः प्रमाणविरोधश्च ॥

२०१ सु०— अस्त्वन्यत्र संयोगो यथातथा, प्रस्तुते परमाणौ संयोगस्यांशवृत्तित्वाभावे नातिप्रसङ्ग इति चेन्न; अन्वयव्यतिरेकाभ्यां कारणपरिमाणोत्कृष्टस्य कार्यपरिमाणस्य प्रचयाख्यांशवृत्तिसंयोगजत्वावधारणात्, कारणाभावे च कार्याभावनियमात्, परमाणुसंयोगस्यांशवृत्तित्वाभावे तत्कार्ये द्व्यणुके परमाणुपरिमाणादुत्कृष्टपरिमाणं नोत्पद्येतेत्यस्यैव बाधकस्य सत्त्वात् ।

'नन्विदमिष्टापादनं परमाणुतो द्व्यणुके परिमाणोत्कर्षाभावादि'त्यत आह परमाणोरिति ।

अनु०— परमाणोरणोर्नास्ति महत्तेत्यद्भुतं वचः ।

परमाणुपरिमाणात् अणोः द्व्यणुकस्य महत्ता परिमाणोत्कर्षो नास्तीति वचोऽद्भुतं स्वव्याहतं प्रमाणविरुद्धं चेत्यर्थः । 'अयमाढ्योऽयं परमाढ्य' इतिवदणुपरमाणुशब्दाभ्यामेव परिमाणतारतम्यावगतेस्तदभाववचनं स्वव्याहतं भवति । द्वितन्तुकपरिमाणवद(संमृदि)-समुदितावयवजन्यद्रव्यपरिमाणत्वेन द्व्यणुकपरिमाणस्य परमाणुपरिमाणादुत्कर्षस्यानुमानावगतत्वाच्चेति ।

परि०— स्वव्याहतिं प्रमाणविरोधं च क्रमेण दर्शयति **अयमाढ्य इति द्वितन्तुकेति च** ।

गु०दी०— असम्मृदितावयवजन्यद्रव्यपरिमाणत्वेन इत्यत्र शलाकया विमृद्य सूक्ष्मीकृततन्तुजन्यावयविनि परिमाणोत्कर्षाभावादसम्मृदितेत्युक्तम् ।

यादु०— प्रमाणविरोधं दर्शयति **द्वितन्तुकेत्यादिना** । अत्र द्व्यणुकपरिमाणं स्वकारणपरिमाणादुत्कृष्टं असम्मृदितावयवजन्यद्रव्यपरिमाणत्वाद् द्वितन्तुकपरिमाणवदिति प्रयोगो द्रष्टव्यः । अत्र सम्मृदितदुकूलद्वयजन्यरज्जुद्रव्यपरिमाणे व्यभिचारवारणाय असम्मृदितावयवजन्येति विशेषणमिति द्रष्टव्यम् ।

श्रीनिधि०— **कारणपरिमाणोत्कृष्टस्येति** । कारणपरिमाणापेक्षया उत्कृष्टस्येत्यर्थः । स्वव्याहतं प्रमाणविरुद्धं चेत्युक्तम् । तत्र स्ववचनव्याहतं तावदुपपादयति **अयमाढ्य इति** । प्रमाणविरोधं दर्शयति **द्वितन्तुपरिमाणवदिति** । द्वौ तन्तु यस्योपादानत्वेन सः द्वितन्तुः । असम्मृदितद्वितन्तुद्वयजन्यद्रव्यपरिमाणवदित्यर्थः । अयमत्र प्रयोगः । द्व्यणुकपरिमाणं परमाणुपरिमाणापेक्षया उत्कृष्टम् । असम्मृदितावयवजन्यद्रव्यपरिमाणत्वात् द्वितन्तुपरिमाणवदिति । अत्र यदसम्मृदितावयवजन्यद्रव्यपरिमाणं तत् कारणपरिमाणापेक्षयाधिकमिति सामान्यव्याप्तिः । व्यापके कारणपदेनैककारणं विवक्षितम् । अन्यथा यावत्कारणपरिमाणापेक्षयाधिक्याभावेन बाधापत्तेः । द्रव्यपरिमाणत्वादित्येवोक्ते परमाणुपरिमाणे व्यभिचारः स्यात् । अतो जन्यविशेषणम् । असम्मृदितपदं विहायोक्ते तन्त्वोः परस्परं सम्मर्दे सति उत्पन्न द्वितन्तुपरिमाणे व्यभिचारः स्यात् । तत्रैकतन्तुपरिमाणापेक्षया अधिकपरिमाणाभावात् । अतो सम्मृदितपदम् । न च परमाण्वोः सम्मर्दो युज्यते । सम्मर्दो नाम तदवायवानां एतदवयवानां च परमघनतरः संश्लेषः । न च परमाणोरवयवा अङ्गीकृताः । अस्मन्मते तु विशेषाभावेन तदभावः । अन्यथा पाषाणपिण्डयोरपि परस्परसम्मर्दः स्यादिति द्रष्टव्यम् । अत्र तन्त्वारब्धद्रव्यपरिमाणवदित्येव दृष्टान्ते उक्ते बह्ववयवारब्धद्रव्यवृत्तित्वमुपाधिरिति परो ब्रूयादपि अतो द्विग्रहणम् ।

शे०वा०— गूढाभिसन्धिराशङ्कते **अस्त्वन्यत्रेति** । गूढाभिसन्धिरेव परिहरति **अन्वयेति** । पूर्ववादी स्वाशयमुद्घाटयति **नन्विति** । सिद्धान्त्यपि स्वाशयोद्घाटनपरतया मूलं व्यापारयति **अत आहेति** । तत्र स्वव्याहतत्वमुपपादयति **अयमाढ्य इति** । प्रमाणविरोधमुपपादयति **द्वितन्तुकेति** । द्व्यणुकपरिमाणं स्वकारणपरिमाणादुत्कृष्टम् असम्मृदितावयवजन्यद्रव्यपरिमाणत्वात् द्वितन्तुकपरिमाणवदित्यत्र प्रयोगो द्रष्टव्यः । सम्मृदितदुकूलद्वयजन्यरज्जुद्रव्यपरिमाणे व्यभिचारवारणायासम्मृदितावयवेति विशेषणमिति द्रष्टव्यम् । इतिशब्दः प्रतिज्ञातदोषद्वयोपपादनसमाप्तौ ।

विट्ठल०— **नातिप्रसङ्ग इति** । बाधकसद्भावरूपातिप्रसङ्गो नेत्यर्थः । प्रमाणविरुद्धत्वं चोपपादयति **द्वितन्तुकेति** । अत्र द्व्यणुकपरिमाणं स्वकारणपरमाणुपरिमाणादुत्कृष्टम् । असमुदितावयवजन्यद्रव्यपरिमाणत्वात् । **द्वितन्तुकपरिमाणवदिति** । प्रयोगोऽभिप्रेतः अत्र समुदिततूलद्वयजन्यरज्जुद्रव्यपरिमाणे व्यभिचारवारणायासम्मृदितावयवजन्येति विशेषणम् । द्रव्येति स्वरूपसङ्कीर्तनम् ।

चषक— **अयमाढ्य इति** । अयं धनीत्यर्थः । **अन्यदीयानवस्थित्युक्तेस्तर्कपराहतिप्रदर्शनम् ॥**

* * *

॥ अथ तत्र उक्तस्य प्रमाणविरोधस्य उपपादनम् ॥

२०२ **सु०—** 'ननु यत् कारणपरिमाणजन्यमुत्कृष्टपरिमाणं तदेव प्रचयजन्यम् । त्र्यणुकपरिमाणवद् द्व्यणुकपरिमाणमपि कारणपरिमाणजन्यं न भवति, किन्तु कारणसङ्ख्याजन्यमेव । तत्कथं परमाणोः प्रचयाभावे द्व्यणुके परिमाणोत्कर्षानुत्पादापादनम्' इत्यत आह **अणूनामिति** ।

अनु०— अणूनां प्रथिमापेक्षां विनैव त्र्यणुकेऽपि सः ।
परमाणोर्महत्त्वं च विनेत्येतद्वचः कथम् ॥

द्व्यणुकानां परिमाणोत्कषपिक्षां विनैव सङ्ख्यामात्रेण **त्र्यणुके स** परिमाणोत्कर्षो जायते । तथा **परमाणोर्महत्त्वं** परिमाणोत्कर्षं **विना** केवलसङ्ख्यया, द्व्यणुके परिमाणोत्कर्षो जायत, **इत्येतद्वचः कथं** घटते । 'महद्दीर्घवद्वे'ति निरस्तत्वादिति भावः । **चापि**शब्दावितरेतरसमुच्चये । अत्र परिमाणमात्रग्रहणे कर्तव्ये **प्रथिमेति महत्त्वमिति** चोक्तिर्विसदृशपरिमाणत्वस्यानपेक्षाहेतोः निराकरणं स्मारयितुमिति ।

परि०— विसदृशपरिमाणत्वस्यानपेक्षाहेतोरिति । द्व्यणुकत्र्यणुकपरिमा(णे स्वोत्पत्तौ पर)णोत्पत्तौ स्वकारणपरमाणुद्व्यणुकगतपरिमाणे नापेक्ष्येते । विसदृशत्वात् । विजातीयत्वादित्यस्य पराभिमतहेतोः 'महत्त्वं च परमाणावणावपी'त्यादिना कृतं निराकरणं स्मारयितुमित्यर्थः । **परोक्तानवस्थायास्तर्कपराहत्युक्तिः** ।

गु०दी०— विसदृशपरिमाणत्वस्यानपेक्षाहेतोः इत्यत्र अनपेक्षाहेतोः कारणपरिमाणानपेक्षाहेतोरित्यर्थः ।

वं०प०— अनपेक्षाहेतोरिति । 'अणूनां प्रथिमापेक्षां विनैवे'त्युक्तानपेक्षाहेतोरित्यर्थः । **निराकरणम्** अणुत्वं च महत्त्वं चेत्यादिना कृतम् ।

श्रीनिधि०— महद्दीर्घवद्वेत्यादिना निरस्तत्वादिति । परिमाणत्वसाम्येन न ह्रस्वत्वपरिमाण्डल्ययोरपि परिमाणारम्भकत्वं स्यात् अन्यथा महत्त्वदीर्घत्वयोरपि न स्यादिति निरस्तत्वादित्यर्थः । द्व्यणुकत्र्यणुकपरिमाणयोः स्वोत्पत्तौ कारणाकारणपरिमाणापेक्षा नास्तीत्युक्ते परमाणुपरिमाणं द्व्यणुकपरिमाणं

चानपेक्ष्य कथं द्व्यणुकत्र्यणुकयोः परिमाणमुत्पद्येतेत्येव वक्तव्यम् । किं तद् विशेषग्रहणेनेत्यत आह **अत्रेति** । अनपेक्षाहेतोः विसदृशपरिमाणत्वस्येति सामानाधिकरण्येनानन्वयः । **निराकरणं स्मारयितुमिति** । महत्त्वं च परमाणावणावपीत्यादिरूपमित्यर्थः ।

शे०वा०— नन्वणूनां प्रथिमापेक्षामित्युत्तरकारिकायां द्व्यणुकादिपरिमाणस्य परमाण्वादिपरिमाणजन्यत्वमुपपाद्यते, तदनर्थकमित्याशङ्क्य द्व्यणुकपरिमाणस्य प्रचयजन्यत्वसम्भावनेन परमाणोः प्रचयाभावे द्व्यणुके परिमाणोत्कर्षानुत्पादापादनोपपादनार्थत्वान्न तदिति भावेन तदापादनोपपादकतया तद्योजयितुं द्व्यणुकपरिमाणस्य सङ्ख्याजन्यत्वेन प्रचयजन्यत्वव्यापकस्य कारणपरिमाणजन्योत्कृष्टपरिमाणत्वस्याभावव्युत्पादनेन तद्व्याप्यस्य प्रचयजन्यत्वस्यापि व्यावृत्तिमुपपादयन्नेव परमाणोः प्रचयाभावे द्व्यणुके परिमाणोत्कर्षानुत्पादापादनानुपपत्तिमाशङ्कते **नन्विति** । **न भवतीति** । सजातीययोरेव तन्तुपटपरिमाणयोः कार्यकारणभावदर्शनात् विजातीययोर्द्व्यणुकत्र्यणुकपरिमाणयोरिव परमाणुद्व्यणुकपरिमाणयोरपि न कार्यकारणभाव इति भावः । तत्किं द्व्यणुकादिपरिमाणमसमवायिकारणजन्यमेव न भवतीति पृच्छति **किन्त्विति** । तथात्वे भावकार्यस्य कारणत्रितयजन्यत्वसिद्धान्तव्याकोपादिति भावः । परिहरति **कारणेति** । ईश्वरापेक्षाबुद्धिजन्यद्व्यणुकगतत्रित्वसङ्ख्यया त्र्यणुकपरिमाणमिव तदपेक्षाबुद्धिजन्यपरमाणुगतद्वित्वसङ्ख्ययैव द्व्यणुकपरिमाणं जन्यत इति नोक्तदोष इति भावः । चापिशब्दयोरन्यतरेणैव समुच्चयसिद्धेरन्यतरवैयर्थ्यमाशङ्क्याह **चापिशब्दाविति** । **अत्र परिमाणेति** । तावतैव प्रचयजन्यत्वव्यापककारणपरिमाणजन्योत्कृष्टपरिमाणत्वप्राप्त्या तद्व्याप्यप्रचयजन्यत्वनिर्वहिण परमाणोः प्रचयाभावे द्व्यणुके परिमाणोत्कर्षानुत्पादापादनसमर्थनादिति भावः ।

वा०र०— द्व्यणुकादिपरिमाणस्येत्येव पाठो मूलकोशानुसारी । तत्रापिपदेन द्व्यणुकपरिमाणपरिग्रहः । परमाण्वादीत्यादिपदेन द्व्यणुकपरिग्रहः । **द्व्यणुकपरिमाणस्येति** । उपलक्षणं चैतत् । अणुकपरिमाणस्यापि प्रचयाद्यजन्यसम्भावनेन दृष्टान्तस्यैवासिद्ध्या न तद्दृष्टान्तेन द्व्यणुकपरिमाणस्यापि प्रचयजन्यत्वाभावेऽप्युत्कर्षः सम्भवतीति अप्रयोजकताशङ्कानवकाशेनापादनोपपादनार्थत्वादित्यापि द्रष्टव्यम् । **द्व्यणुकपरिमाणस्येति** । अणुकपरिमाणदृष्टान्तेनेति शेषः । **व्याकोपादीति** । व्याकोपः स्यादितीत्यर्थः । मूले कोशे व्याकोप इति पाठः । अत्रानुव्याख्याने एक एव समुच्चयोऽभिप्रेतः । पूर्वोत्तरार्धयोश्चापिशब्दौ समुच्चयद्वयार्थौ विद्यते । अत एकस्य वैय्यर्थ्यमिति मत्वा शङ्कमानं प्रति चापिशब्दाविति मूलं प्रवृत्तिमित्याशये न चापीति वाक्यमवतारयति । **चापिशब्दयोरिति चापिशब्दावितरेतरसमुच्चय इति** मूले । इतरश्चेतरच्चेतरेतरयोः समुच्चये चशब्दापिशब्दौ क्रमेण वर्तते इत्यर्थः । तत्र महत्त्वं चेति चशब्दो अणूनां प्रतिमापेक्षां विनेतीतरेण समुच्चयार्थः । न केवलमणूनां प्रथिमापेक्षां विनाऽपि तु परमाणोर्महत्त्वं च विनेति । त्र्यणुकेऽपीत्यपिशब्दस्तु इतरस्य द्व्यणुकस्य समुच्चयार्थः । न केवलं त्र्यणुकेऽपि तु द्व्यणुकेऽपीति । तथा चात्रेतरेतरसमुच्चयो भिन्न एव व्याख्येय इति द्रष्टव्यम् । टीकावाक्यं आशङ्क्येत्यनन्तरं समुच्चेयान्तरसङ्ग्रहार्थत्वान्नानर्थक्यमितीति पूरणीयम् ।

विष्ठल०— ननु द्व्यणुकपरिमाणस्य कारणपरिमाणजन्यत्वे कारणे परिमाणविशेषलाभार्थमसम्मृदितावयवत्वमङ्गीकार्यम् । न चैव किन्तु कारणसङ्ख्याजन्यत्वमेव तथा च कारणे प्रचयाभावेनासम्मृदितावयवजन्यत्वरूपविशेषणासिद्धिरिति भावेन शङ्कते **नन्विति** । **विसदृशपरिमाणत्वस्येति** । द्व्यणुकत्र्यणुकपरिमाणेत्यतो स्वकारणपरमाणुद्व्यणुकगतपरिमाणापेक्षा नास्तीत्यत्र हेतुभूतस्थविदृशपरिमाणत्वस्य महत्वं च परमाणावणावपीत्यादिना कृतं निराकरणं ज्ञापयितुमित्यर्थः ।

॥ इति उक्तस्य प्रमाणविरोधस्य उपपादनम् ॥
॥ इति 'परमाणोरणौ महत्त्वं ने'त्यस्य व्याहतिः प्रमाणविरोधश्च ॥
॥ इति 'अंशतः संयोगः' इत्युक्तेरनवस्थामूलकायुक्तताशङ्कायाः प्रकारान्तरेण निरासः ॥
॥ इति भेदाभेदयोरनया व्यवस्थया अन्यचोद्यस्यापि परिहारः ॥
॥ इति 'भेदाभेदयोरेकत्र विरुद्धत्व'शङ्का, विशेषबलाच्च तन्निरासः ॥
॥ इति उक्तार्थस्पष्टीकरणम् ॥
॥ इति अपवादकप्रमाणशून्यत्वेन प्रसक्तं यदभेदस्यात्यन्तिकत्वं तदपवादकत्वेन क्वचिद् भेदाभेददर्शनम् ॥
॥ इति अनुव्याख्यानोक्तार्थस्पष्टीकरणम् (अभेदस्याप्यप्रामाणिकत्वमितिशङ्कानिरासः) ॥
॥ इति अभेदपक्षाङ्गीकारे अवयवावयव्यादिभेदाप्रामाणिकत्वस्यापि कारणत्वम् ॥

* * *

॥ अथ समवायस्य स्वरूपतो निराकरणे अंशांशिनोरत्यन्ताभेदो भेदाभेदौ चेत्यस्य विशदनम् ॥
॥ अथ तत्रादौ उक्तार्थस्य विवरणम् ॥

२०३ **सु०**— 'अंशांशिनोरत्यन्ताभेदो भेदाभेदौ चे'ति यदुक्तं तद्विशदयति **अंशिन इति** ।

अनु०— अंशिनोऽशैरभेदोऽयमंशेन तु भिदाभिदा ।

यथा गगनादेर्यावदंशभाविनः **अंशिनः स्वांशैः** अत्यन्ताभेदः तथा पटादेः **अंशिनः** अपि सर्वैः **अंशैः** अत्यन्ताभेदः । **एकैकांशेन तु भिदाभिदा** । **'अयम्'** इत्युत्तरवाक्येन सम्बध्यते ।

नन्वेतदयुक्तम् । सर्वतन्तुभावेऽपि कदाचित्पटस्याभावात्, खण्डिते भेदाभेदस्वीकारात्; अत एकेनेव सर्वैरपि तन्तुभिः पटस्य भेदाभेदावेवोचितौ । तथा चोक्तं ब्रह्मतर्के, 'तन्तुभ्योऽन्यः पटः साक्षात्कस्य दृष्टिपथं गतः । अनन्यश्चेत् तन्तुभावे पटाभावः

कुतो भवेदि'ति । उच्यते । 'व्यतिषङ्गविशिष्टा हि तन्तवोऽवगम्यन्ते, न च तद्भावे कदाऽपि पटाभावः; तस्माद्व्यतिषङ्गविशेषविशिष्टैः सर्वतन्तुभिः पटस्यात्यन्ताभेद एव । अविवक्षितव्यतिषङ्गैः सर्वतन्तुभिस्तु भेदाभेदावेवे'ति न कश्चिद्विरोधः ।

नन्वेवं तर्हि व्यतिषक्ततन्तुव्यतिरेकेण पटाभावे परमाणुपुञ्जवादापत्तिरिति । मैवम् । यथा हि गुणानां द्रव्याभेदे(ऽपि) न द्रव्यं निर्गुणम्, यथा च परेषां सामान्यादावतिरिक्तसत्ताभावे(ऽपि) नासत्त्वम्; तथा व्यतिषक्ततन्तव एव पटस्तथाऽपि न पटाभावः, किन्तु सन्ति व्यतिषक्तास्तन्तवः पटश्च । स च तेभ्यो न भिद्यत इति । कथमेतदिति चेत्, विशेषशक्त्यैवेति ब्रूमः ।

परि०— उत्तरवाक्य इति । सर्वप्रत्यक्षेति वाक्य इत्यर्थः । **उक्तं ब्रह्मतर्क इति** । भेदाभेदावित्येतत्प्रमेयमेकादशाध्यायगीतातात्पर्योदाहृतब्रह्मतर्के पूर्वार्धेऽभेदस्य, उत्तरार्धे भेदस्य च प्रतीत्योक्तमित्यर्थः । तन्तुभाव इत्यस्य तन्तूनां भावे सत्त्व इत्यर्थः । **व्यतिषङ्गेति** । तिर्यगूर्ध्वरूपेण संश्लेषविशेषविशिष्टेत्यर्थः । **अवगम्यन्त इति** । प्रत्यक्षसिद्धा इत्यर्थः । तन्तुभ्योऽन्य इति पूर्वार्धेऽनुपपत्तिमाशङ्क्याभिप्रायमाह **नन्वेवं तर्हीति** । न द्रव्यमिति नासत्त्वमिति च पदच्छेदः । **पटश्चेति** । अस्तीति योज्यम् । **विशेषशक्त्यैवेति** । विशेषशब्दितवस्तुसामर्थ्येनैवेत्यर्थः ।

यादु०— ब्रह्मतर्कवचने पूर्वार्धे पटे सर्वतन्त्वभेदसाधनमुत्तरार्धे तत्रैव सर्वतन्तुभेदसाधनमिति ज्ञातव्यम् । **तन्तुभाव** इत्यस्य सर्वतन्तुभाव इत्यर्थः । **व्यतिषङ्गविशिष्टा इति** । व्यतिषङ्गे सति विशिष्टा इत्याशयोऽत्र विवक्षितः । एवं व्यतिषङ्गविशेषविशिष्टैरिति व्याख्येयम् । अतो व्यतिषङ्गे सति यत्तन्तूनां विशिष्टं रूपमित्यग्रेतनग्रन्थविरोधो नेति द्रष्टव्यम् । आशयमविद्वांस्तन्तुव्यतिषङ्ग एव पट इति मत्वा शङ्कते **नन्वेवमिति** । **व्यतिषक्ततन्तुव्यतिरेकेणेति** । तन्तुव्यतिषङ्गव्यतिरेकेणेत्यर्थः । अनयैव नीत्या व्यतिषङ्गविशेषविशिष्टपरमाणुष्वेव गोघटादिबुद्ध्युपपत्तावतिरिक्तावयविकल्पनं न स्यादिति भावः । भ्रान्तप्रतीतमर्थमभ्युपेत्यैव तावदुत्तरमाह **यथा हीत्यादिना** ।

वं०प०— तद्भावे व्यतिषङ्गविशिष्टतन्तूनां भावे । एवं तर्हीत्यस्य विशदनं **व्यतिषक्तेति** । **परमाणुपुञ्जेति** । तद्वादेऽप्युपादानसमूहव्यतिरेकेण कश्चनातिरिक्तोऽवयवी नास्तीत्यर्थः ।

कं०रा०— कथमेतदिति । व्यतिषक्तस्तन्तव एव पटः तथापि न पटाभावः । किन्तु सन्ति व्यतिषिक्तास्तन्तवः पटश्चास्तीत्येतत्कथमित्यर्थः ।

श्रीनिधि०— उत्तरवाक्येन सम्बध्यत इति । 'सर्वप्रत्यक्षविषयः' इत्यत्र सम्पद्यत इत्यर्थः । **कदाचिदिति** । तन्तूनां पीडितत्वावस्थायामित्यर्थः । **तन्तुभ्योऽन्य इति** । अत्र पूर्वार्धेनाभेद उत्तरार्धेन भेद इति भेदाभेदा उपपादितौ द्रष्टव्यौ । **तन्तुभावे** पटोपयुक्तसर्वतन्तुभावे । **व्यतिषङ्गविशिष्टा हि तन्तव इति** । व्यतिषङ्गो नाम तिर्यग् ऊर्ध्वभावापन्नत्वेन सम्बन्धविशेषः । **अवगम्यन्ते** पटत्वेनेति शेषः । **विशेषशक्त्यैवेति** । ननु पदार्थद्वये तयोरभेदे च प्रमिते विशेषकल्पना प्रकृते च व्यतिषिक्ततन्त्वतिरिक्तपदार्थाभावात् केन सविशेषाभेदः स्यादिति चेन्न । व्यतिषिक्तपदेन सम्बन्धविशेषापन्नतन्त्वभिधानात् पटपदेन सम्बन्धविशेषापन्नतन्त्वभिधानात् पटपदेन च सम्बन्धसमानकालीनविशिष्टरूपस्य तस्य खण्डितत्वं नास्तीति न कश्चित् दोषः । **अविवक्षितव्यतिषङ्गैरिति** । विवक्षितव्यतिषङ्गरहितैरित्यर्थः । **न कश्चिद्विरोध इति** । खण्डितत्वयुक्तिविरोधो वा ब्रह्मतर्कविरोधो वा नास्ति । **अंशिनः** अंशिरित्यस्य तयोश्च भिन्नविषयत्वादित्यर्थः । **कथमेतदिति** कारणप्रश्नः ।

शे०दा०— अवयवावयविनोरत्यन्ताभेदस्य 'अभेदेन प्रतीतिश्चे'त्यादिना भेदाभेदयोश्च 'भेदो नाशे भवेत्तथे'त्यादिनैव प्रतिपादनादंशिनोऽशैरित्यादितत्प्रतिपादकोत्तरग्रन्थानर्थक्यमाशङ्क्य परिहरति **अंशांशिनोरिति** । मूले अंशिनोऽशैरभेद इत्यस्यावृत्तिमंश्यादिशब्दानां चार्थविशेषपरतां यथातथाशब्दयोरध्याहारं चाश्रित्य तद्व्याचष्टे **यथेत्यादिना** । अंशिनोऽशैरभेदोंऽशेन तु भिदाभिदेत्येतावतैव पूर्तेरयमित्यस्य वैयर्थ्यमाशङ्क्याह **अयमितीति** । उत्तरवाक्ये तत्सम्बन्धप्रकारश्च 'उक्तोऽयमर्थः सर्वप्रत्यक्षविषयो यस्मादि'त्युत्तरग्रन्थादेव स्पष्टप्रतिभासः ।

एतत् पटस्य सर्वैस्तन्तुभिरत्यन्ताभेद इत्येतत् । तत्कुत इत्यतो भेदाभेदसाधकप्रमाणोपन्यासपूर्वकं भेदाभेदयोरौचित्यमुपदर्शयति **सर्वेति** । **एकेनेवेति** । दृष्टन्ततया तस्योपादानमन्यथैकेनापि तन्तुना पटस्यात्यन्ताभेदप्रसक्त्या भेदाभेदौ न स्यातामविशेषादित्यतिप्रसङ्गसूचनार्थमिति ज्ञेयम् । न केवलं पटस्य सर्वैस्तन्तुभिर्भेदाभेदयोर्न्यायप्राप्तत्वादौचित्यं किन्त्वागमसिद्धत्वादपि । अन्यथा भेदाभेदप्रतिपादकागमविरोधापत्तेरिति भावेनाह **तथा चोक्तमिति** । तथोक्तं चेत्यन्वयः । तद्वाक्यं पठति **तन्तुभ्य इति** । यद्यप्येतद्गीतातात्पर्यनिर्णयटीकायामेकैकतन्तोः पटेन भेदाभेदोपपादकतया व्याख्यातम् । यद्येकैकतन्तोः पटोऽत्यन्तभिन्नः स्यात् तर्हि व्यतिषङ्गविशेषविशिष्टैकैकतन्तुभ्यः पटः पृथग्दृश्येत । न चैतदस्ति नाप्येकैकतन्तुना पटोऽत्यन्ताभिन्नो व्यतिषङ्गविशेषरहितैकैकतन्तुभावे पटाभावानुपपत्तेः । अतः पटस्यैकैकेन तन्तुना भेदाभेदाविति । ततश्च न पटस्य सर्वैस्तन्तुभिर्भेदाभेदोपपादकतयाऽत्रास्योपन्यासः सङ्गतः तथाऽपि यदि सर्वतन्तुभ्यः पटोऽत्यन्तभिन्नः तर्हि व्यतिषङ्गविशेषविशिष्टसर्वतन्तुभ्यः पटः पृथग्दृश्येत । न चैतदस्ति । नापि सर्वतन्तुभिः पटोऽत्यन्ताभिन्नो व्यतिषङ्गविशेषरहितसर्वतन्तुभावे पटाभावानुपपत्तेरिति । तन्तुभ्य इति बहुवचनप्रयोगाद्यावत्तन्तुभ्य इति प्रतीतिबलेन न्यायसाम्येन च लब्धयोजनान्तरमभिप्रेत्य सर्वतन्तूनामपि पटेन भेदाभेदप्रतिपादकत्वस्यापि सम्भवात् तत्त्वेनात्रोदाहरणमिति द्रष्टव्यम् । एकस्य तन्तोरपि पटेन कुतो भेदाभेदौ येन तद्दृष्टान्तेन सर्वतन्तूनामपि

पटेन भेदाभेदौ स्यातामित्याशङ्कानिरासायैकस्य तन्तोः पटेन भेदाभेदोपपादकतयैवात्रोपन्यासो न तु सर्वतन्तूनां पटेन तयोरुपपादकतयेति न योजनान्तरपरिकल्पनाक्लेश इत्यप्याहुः । यादृशैस्तन्तुभिरत्यन्ताभेदोऽभिहितो न तत्र खण्डितत्वं यत्र च खण्डितत्वं न तत्राभेदोऽभिधीयत इति नानुपपत्तिरिति भावेन सिद्धान्तयति **उच्यत इति** । **व्यतिषङ्गविशिष्टा इति** । व्यतिषङ्गे सति विशिष्टा इत्यर्थः । **तस्मादिति** । व्यतिषङ्गविशिष्टतन्तुभावे कदाचिदपि पटाभावाभावादित्यर्थः । **व्यतिषङ्गेति** । व्यतिषङ्गे सति विशिष्टैरित्याशयः । अन्यथा व्यतिषङ्गे सति यत्तन्तूनां विशिष्टं रूपमित्यग्रिमग्रन्थविरोधप्रसङ्गादिति द्रष्टव्यम् । **न कश्चिद्विरोध इति** । खण्डितेत्यभेदाभेदाङ्गीकारप्रयुक्तसिद्धान्तविरोधरूपो ब्रह्मतर्कविरोधरूपो वेत्येवं न कश्चिदित्यर्थः ।

आशयमजानानो व्यतिषक्तास्तन्तव एव पट इति सम्भ्रान्तश्चोदयति **नन्वेवमिति** । **व्यतिषक्ततन्तुव्यतिरेकेणेति** । तन्तुव्यतिषङ्गव्यतिरेकेणेत्यर्थः । अनेनैव न्यायेन व्यतिषङ्गविशिष्टपरमाणुष्वेव गोघटादिबुद्ध्युपपत्तावतिरिक्तावयविकल्पने मानाभावादिति भावः । भ्रान्तप्रतीतमर्थमभ्युपेत्यैव तावदुत्तरमाह **यथा हीत्यादिना** । यथेत्यतःपरं यद्यपीति पूरणीयम् ।

वा०र०— ऋष्यादिकथनप्रसङ्गे जडानामंशतो भेदः समुदायेन चोभयमित्येतद् ऋग्भाष्यवाक्यव्याख्यानरूपजडानां पटादीनामवयविनामंशतः एकैकांशेन संस्थानविशेषरहितांशसमुदायेन चोभयं भेदाभेदौ । समुदायेन संस्थानविशेषविशिष्टैः **सर्वांशैरभेद** इत्यावृत्त्या योज्यमिति ग्रन्थानुसारेणात्रापि भेदाभेदस्थले उपलक्षणादिना भाष्ययोजनाऽभिप्रेतेति न प्रतीतार्थेऽनुपपत्तिशङ्का बाधिकेति वक्तुमंशिनोंशैरित्येतद्भाष्यसामुग्धेन व्याकुर्वन्नेव तत्रानुपपत्तिं चाशङ्क्य तत्परिहारत्वेन व्यतिषङ्गविशिष्टा हीत्यादिकमुक्तवान् मूलकार इति ज्ञेयम् । तथा हि । अंशिनोंशैरित्यत्रांशिनः पटस्य संस्थानविशेषसहितैरिव संस्थानविशेषरहितैरपि मिलितैः सर्वैरंशैरत्यन्ताभेदः प्रत्येकं सर्वैस्तु भेदाभेदाविति प्रतिपादितमिति मन्वानः शङ्कते मूले **नन्वेतदिति** । सर्वतन्तुभावे संस्थानविशेषरहितमिलितेति शेषः । उदाहृतऋग्भाष्यानुसारात् । **कदाचिदिति** । व्यतिषङ्गाभावदशायामित्यर्थो मूले । सर्वैस्तन्तुभिरिति टीकामिलितैरिति शेषः । **प्रमाणोपन्यासेति** । तस्मिन्सत्यप्यसत्त्वरूपेत्यर्थः । **एकेनापीति** । एकैकेनापीत्यर्थः । प्रत्येकं सर्वैस्तन्तुभिरिति यावत् । **सर्वैरिति** । मिलितैरिति योज्यम् । **एकैकेति** । प्रत्येकं सर्वतन्तूनामित्यर्थः । **एवमेवोत्तरत्रैकैकेति** । सर्वेति च यत्रोच्यते मूले वा टीकायां वा तत्र प्रत्येकं सर्वत्वमिलितं सर्वत्वं च व्याख्येयम् । **एतेन तन्तुनेति** । एकैकेनेत्यर्थः । **न्यायसाम्येन चेति** । प्रत्येकं सर्वतन्तूनां भेदाभेदसाधकस्यात्यन्ताभिन्नत्वात्यन्ताभिन्नत्वपक्षयोर्दूषणस्य मिलितसर्वतन्तुपक्षेऽपि साम्यादित्यर्थः । आहुरित्यस्वरसोद्भावनं तद्बीजं तु अंशिनोंशैरभेदांशे न तु भेदांशे न तु भिदाभिदेति मूलोपरि शङ्कमानेनांशेन भेदाभेदपक्षं मूलोक्तमङ्गीकृत्य तद्दृष्टान्तेनांशैरपि भेदाभेदावापादयता ब्रह्मतर्कवाक्यस्य स्वेनापादितार्थ एव प्रमाणतयोपन्यासेन दृष्टान्तसिद्ध्यर्थतयाऽनुपन्यासात् । न ह्यत्र सिद्धान्त्यनुक्तांशे प्रत्येकं भेदाभेदं दृष्टान्तीकृत्य मिलितांशानां भेदाभेदापादनं क्रियत इति द्वितीयतत्रेत्यस्य खण्डिततन्तुष्वित्यर्थः । अत्रानुव्याख्याने विशिष्ट इत्याशय इति पाठः । **इति भावेनेति** । भावोद्घाटनेनेत्यर्थः । **ब्रह्मतर्कविरोधरूपो वेति** । ब्रह्मतर्के

हि गीतातात्पर्यटीकोक्तरीत्या वा योजनान्तररीत्या वा प्रत्येकं वा मिलितानां वा सर्वतन्तूनां पृथगदर्शनादित्युक्तिविरोधोऽस्ति । आद्ययुक्तेरनङ्गीकारपराहतत्वात् । द्वितीयायास्तु इष्टापादनतया आभासत्वादिति तद्वाक्योक्तन्यायविषयत्वात्तद्विरोधो नास्तीत्यर्थः । **आशयमजानान इति** । व्यतिषङ्गे सति तन्तूनां यद्विशिष्टं रूपं तस्यैव पटत्वमित्याशयमजानान इत्यर्थः । यद्यपि उत्तरत्रैतच्छङ्कापरिहारतया नाश य उक्तरीत्या वर्ण्यते अपि तु तत्प्रतीतार्थमङ्गीकृत्यैव परिहारोऽभिधीयते । तथापि शङ्कान्तरनिरासाय प्रवृत्तानुव्याख्यानव्याख्यारूपोत्तरमूले 'जायतां नामे'त्यादिना आशयस्य वर्णितत्वेन तन्न्यायेनैतच्छङ्कापरिहारस्याप्यनुषङ्गस्य सिद्धेस्तदभिप्रायेणाजानान इत्युक्तम् । अत एव सम्भ्रान्त इत्यपि युक्तम् । परिहारे भ्रान्तेरनिराकरणेऽपि उत्तरत्र व्याख्याने तन्निराकरणेनानुषङ्गेनैतन्निरासस्यापि प्राप्तेरिति बोध्यम् । **व्यतिरिक्तास्तन्तव एवेति** । तन्तूनां व्यतिषङ्गे एवेत्यर्थः । **तन्तुव्यतिषङ्गव्यतिरेकेणेत्यर्थ इति** । भ्रान्तेरपि उत्तरत्र निराकरणात् तावदित्युक्तम् ।

स०व्र०— व्यतिषङ्गविशेषविशिष्टैः सर्वतन्तुभिः पटस्यात्यन्ताभेद एवेति । अत्रेदं तत्त्वम् । तन्तूनां विशिष्टाकारेण पटस्यात्यन्ताभेद एवेत्यर्थः । अत एव 'न हि तन्तुव्यतिषङ्गं पटमाचक्ष्महे । किं तु व्यतिषङ्गे सति यत्तन्तूनां विशिष्टं रूपम्' इत्युत्तरग्रन्थः सङ्गच्छते ।

ननु न विशिष्टाकारातिरिक्तः पटोऽस्ति । व्यतिषक्तानां तन्तूनां विशिष्टाकारो ह्यसौ इत्यादिनोत्तरत्र विशिष्टाकारस्यैव पटत्वोक्तेः । अन्यथा तद्विरोधादिति चेन्न । तत्रापि विशिष्टाकाराभिन्नः पट इत्यभिप्रायात् । अन्यथा विशिष्टाकारस्य तन्त्वाश्रितत्वं न स्यात् पटवत् । न च पटस्यापि तदाश्रितत्वम् । तन्तुषु पट इति प्रतीत्यसिद्धेरित्यादिग्रन्थानानुगुण्यात् । न च विशिष्टाकारोऽपि न तदाश्रित इति तस्यैव पटत्वेऽपि नानुपपत्तिरिति वाच्यम् । विशिष्टं च विशेष्याश्रितं द्रव्यान्तरमिति अन्यथाख्यातिस्थलीयसूत्रानुसारेण तस्य तन्त्वाश्रितत्वावश्यम्भावात् । अन्यथा तद्विरोधापत्तेरिति । विशिष्टाकाराभिन्नस्यापि पटस्य तदनाश्रितत्वं च घटाभिन्नस्यापि रूपादेः जलाहरणाद्यसामर्थ्यवत् विशेषशक्त्यैवोपपद्यत इति ।

स०ना०— तथा पटादेरिति । .....नः स्वांशैः गगनस्य स्वांशैरिवात्यन्ताभेदः । उपादानभूतैः सर्वैः तन्तुभिः एकैकेन च भेदाभेदाविति । अयं भावः । पट उत्पद्यमानः सांश एवोत्पद्यते । ततश्च पटस्य द्विविधा अंशाः उपादानीभूताः तद्विपरीताश्च तत्र आद्याः तन्तवः । तैः पटस्य भेदाभेदः । द्वितीयास्तु पटेन सहैव तन्तुपरिणामाः तैस्तु पटस्यात्यन्ताभेदः । अत एव प्राक् यथा गगनादेः यावदंशभाविनोंशिनः स्वांशैरत्यन्ताभेद इत्युक्तम् । वक्ष्यति च पटस्य च यादृशेन तन्तुसमुदायेनात्यन्ताभेदोऽभिहितः स एक एव व्यतिषक्तानां तन्तूनां विशिष्टाकारो ह्यसौ स चागन्तुकत्वात् तन्तुभ्यो भिन्नाभिन्न एव । एकैकेन तन्तुना सर्वैश्चाभेदेऽपि भेदस्यापि विद्यमानत्वात् नान्योन्याभेदप्रसक्तिरिति स्वयमेवोह्यतामिति नोक्तमिति, आशयमविद्वान् शङ्कते **नन्विति** । **व्यतिषङ्गविशिष्टा इति** । व्यतिषङ्गविशिष्टास्तन्तवः प्रत्यक्षतोऽवगम्यन्ते । तत्र नास्माभिस्तन्तुभिः पटस्यात्यन्ताभेद उक्तः । किन्तु व्यतिषङ्गशब्दाभिधेयतन्तुविकारैरभेद उक्त इति भावः । **अविवक्षितव्यतिषङ्गैरिति** ।

विवक्षितव्यतिषङ्गातिरिक्तैस्तदुपादानैः सर्वतन्तुभिर्भेदाभेदावित्यर्थः । संयुक्तास्तत एव पट इति मन्वानः शङ्कते **नन्वेवमिति** । गूढाभिसन्धिरुत्तरमाह **यथा हीति** । **तेभ्यो न भिद्यत इति** । सविशेषणे विधिनिषेधाविति न्यायेन व्यतिषङ्गविशिष्टैस्तन्तुभिर्न भिद्यत इत्यर्थः ।

विठ्ठल०— सर्वतन्तुभाव इति । एतत्पठकारणीभूतभायावे तन्तुसद्भाव इत्यर्थः । **तथा चोक्तमिति** । न केवलं खण्डित्वयुक्त्येति चार्थः । अत्र पूर्वार्धे पटे सर्वतन्त्वभेदसाधनमुत्तरार्धे तन्तुभेदसाधनमिति ज्ञेयम् । तन्तुभाव इत्यस्य सर्वतन्तुभाव इत्यर्थः । **व्यतिषङ्गविशिष्टा इति** । व्यतिषङ्गेन निमित्तेन विशिष्टाः पटत्वप्राप्त्या इत्यर्थः । अत्र व्यतिरिक्ततन्तूनां पटत्वेऽपि सविशेषभेदादित्ययुक्तिः । एवं व्यतिषिक्ततन्तूनां पटाभेदमङ्गीकृत्योक्तमभिप्रायमविद्वान् शङ्कते **नन्वेवमिति** । यथा परमाण एव तथा पूजीभूता गोघटादिबुद्धिमुत्पादयन्ति । न गवादिपदार्थो नामान्यो वर्तत इति तैरुच्यते । तथा व्यतिषङ्गविशेषेण पुञ्जीभूतं तन्तुष्वेव पटबुद्धिर्न पटो नाम वस्त्वस्तीत्यापन्नमिति शङ्काभिप्रायः । तथापीत्यतःपरं व्यतिषिक्तसर्वतन्तुव्यतिरेकेणेति शेषः । तथापि न भेदः शङ्कनीय इत्याह **स चेति** ।

॥ इति उक्तार्थस्य विवरणम् ॥

* * *

॥ अथ उक्तार्थे प्रमाणप्रदर्शनं च ॥

२०४ सु०— ननु व्यतिषक्तसर्वतन्तुभ्योऽपि पटस्य भेदोऽङ्गीकार्यः, तन्तुव्यतिषङ्गानन्तरं पटस्य जायमानत्वात् । कथं चैकैकतन्तुनाऽभेदः एकैकत्र पटबुद्ध्यभावादित्यत आह सर्वेति ।

अनु०— सर्वप्रत्यक्षविषयः कथमेव ह्यपोद्यते ।

उक्तः **अयमर्थः सर्वप्रत्यक्षविषयो** यस्मात् तस्मात् **कथमेवापोद्यते** ।

एतदुक्तं भवति । अस्ति तावद्व्यतिषक्तसर्वतन्तूनां पटस्य चाभेदे प्रत्यक्षम्, तत्प्रतीतेः सम्बद्धवस्तुद्वयप्रतीतिवैलक्षण्यस्य साक्षिसिद्धत्वात् । न च भेदे प्रमाणमस्ति, येन सोऽपि स्वीकरिष्यते । जायतां नाम तन्तुव्यतिषङ्गानन्तरं पटस्तथाऽपि न विवक्षितार्थहानिः; न हि तन्तुव्यतिषङ्गं पटमाचक्ष्महे, किन्तु व्यतिषङ्गे सति यत्तन्तूनां विशिष्टं रूपम् । न चैकैकतन्तुपरित्यागे सर्वतन्तवो नाम सन्ति, अतस्तत्राप्य-

स्त्येवाभेदप्रतीतिः । एकैकत्र पटबुद्ध्यभावस्तु भेदमाक्षिपति, न तु प्रत्यक्षसिद्धमभेदमपवदतीति ।

परि०— अत्रारम्भवादी शङ्कते **ननु व्यतिषक्तेति** । एकैकतन्तुना भेदाभेदावित्यत्राभेदांशमाक्षिपति **कथं चैकैकेति** । अभेद इति पदच्छेदः । अयमिति पूर्वस्मादिहान्वितस्यार्थः **उक्तोऽयमर्थ इति** । **सम्बद्धेति** । कुण्डबदररूपवस्तुद्वयेत्यर्थः । विशिष्टं पदार्थान्तरं विशेष्याभिन्नमिति मतमुपेत्याह **जायन्तां नामेति** । अन्यथा कस्तदा पटोऽवशिष्यत इति तत्त्वप्रकाशिकावाक्यविरोधादित्यन्ये । कथं चैकैकेत्युक्ताक्षेपं प्रत्याह **न चैकैकेति** । अपवदतीतिशब्दस्यैतदुक्तमिति पूर्वेणान्वयः । **अभेदभेदाभेदस्थलोक्तिः ॥**

यादु०— भ्रान्त एव पुनः शङ्कते **ननु व्यतिषक्तेति** । **उक्तोऽयमर्थ इति** । अत्रायमित्युत्तरवाक्येन सम्बध्यत इत्युक्तत्वादयमित्यनूद्योक्तोऽर्थ इति व्याख्यानं कृतमिति द्रष्टव्यम् । इदानीं परभ्रान्तिं खण्डयन् स्वाशयमुद्घाटयति **न हि तन्तुव्यतिषङ्गमित्यादिना** । **विशिष्टं रूपमिति** । ननु पटस्तन्त्वनाश्रित इति सिद्धान्तः । तन्तुषु पट इति प्रतीत्यसिद्धेरित्यन्यत्रोक्तत्वात् । तन्तुविशिष्टाकारश्च तन्त्वाश्रित एव वक्तव्यः । विशिष्टं च विशेष्याश्रितं द्रव्यान्तरमिति पूर्वाध्याये उक्तत्वात् । अतः कथं तयोरभेद इति चेन्न । अभेदेऽपि विशेषशक्त्यैव तन्त्वाश्रितत्वानाश्रितत्वयोरुपपत्तेः । कथमन्यथा त्वग्ग्राह्याग्राह्ययोः पटरूपयोरभेद इति । कथं चैकैकतन्तुनाऽभेद इत्यस्य समाधानमाह **न चैकैकेति** । समुदायस्य समुदाय्यभिन्नत्वादिति भावः । तथा च सर्वतन्तूनां पटाभेदस्य पूर्वमुक्तत्वात् तदभिन्नस्यैकैकस्यापि तन्तोः पटाभेद आवश्यक इति समाधानमुक्तं भवतीति ज्ञातव्यम् । नन्वेवं व्यतिषङ्गे सति ये विशिष्टास्तन्तवः तेषां पटेनात्यन्ताभेदस्य पूर्वमुक्तत्वात् तदभिन्नस्यैकैकस्यापि तन्तोः पटेनात्यन्ताभेदापत्तिरिति चेन्मैवम् । एकैकस्य तन्तोर्विशिष्टतन्तुभिरत्यन्ताभेदे हि तथा स्यान्न चैवम् । किन्तु भेदाभेद एव । तत्र विशिष्टतायाः खण्डितत्वात् । अतो यत्किञ्चिदेतत् ।

वं०प०— ननु व्यतिषङ्गानन्तरं पटस्य जायमानत्वादिति भेदे प्रमाणमुक्तमिति चेत् तत्राह **जायतां नामेति** । **विवक्षितेति** । व्यतिषक्ततन्त्वभिन्नः पट इति विवक्षितार्थस्य । **आचक्ष्महे** । तथा च व्यतिषङ्गस्य कुविन्दव्यापारत्वेन तदनन्तरं जायमानत्वेन लिङ्गेन व्यतिषङ्गाद्भेदसाधनमिष्टमिति भावः ।

कं०रा०— विशिष्टं रूपमिति । तदेव पटमाचक्ष्महे इति शेषः । **अत इति** । यत एकैकतन्तुपरित्यागेन सर्वतन्तवो नाम न सन्ति तेषु पटाभेदबुद्धिरप्यस्ति । अत एकैकतन्तावप्यभेदप्रतीतिरस्तीत्येकैकतन्तुनापि पटस्याभेदो युक्त एवेति भावः । नन्वेकैकत्र तन्तौ पटबुद्ध्यभावात् पटस्येकैकतन्त्वभेदो न युक्त इत्युक्तमित्यत आह **एकैकत्रेति** ।

श्रीनिधि०— सम्बन्धवस्तुद्वयप्रतीतिवैलक्षण्यस्येति । कुण्डबदरादिप्रतीतिवैलक्षण्यस्येत्यर्थः । अङ्गीकृत्याप्याह **जायतां नामेति** । व्यतिषङ्गविशिष्टा हि तन्तवः पटत्वेनावगम्यन्त इति सिद्धान्तपक्षः । अत्यन्ततन्तुसंयोगे सति कस्तदा पटोऽवशिष्यत इति तत्त्वप्रकाशिकासंवादात् । अत एव यद्वेत्यनुक्त्वा जायतां नामेत्याह । तथैवानुभावोऽपि । व्यतिषङ्गसमानकालीनत्वेन पटबुद्धेरस्साक्षिसम्बन्धत्वात् । तस्मात् जायतां नामेत्याद्यभ्युपगमवाद इति द्रष्टव्यम् । **न विवक्षितार्थहानिरिति** । नन्विदमयुक्तं अत्र विशिष्टरूपस्य पटत्वमङ्गीकृतम् । विशिष्टशुद्धयोश्च भेदाभेदौ । यथोक्तं विशिष्टशुद्धयोश्चैवेति । तथा चांशिनोऽशैरिति विवक्षितस्य हानिरेवेति । अत्रोच्यते । अस्मिन्पक्षे न व्यतिषिक्ततन्तवोऽशपदेनोच्यन्ते किन्तु महापटांशभूताः खण्डपटा एव । तेषां च न खण्डितत्वं पटस्य तत्समानकालीनत्वात् व्यतिषिक्ततन्तूनां पटस्य च कार्यकारणभावेन भेदाभेदावेव कार्यकारणयोश्चैवेत्युक्तः । न च मूले अंशविशेषोऽस्ति । किन्त्वंशैरिति सामान्यत एव उपादानम् । तथा च न विवक्षितार्थहानिरित्युक्तिरनवद्यैवेति । एकैकतन्तुना अभेदो नोपपद्यत इति वदतः कोऽभिप्रायः । किं अभेदसत्त्वे अभेदबुद्धिः प्रमाणं तदभावान्नाभेद इति उत एकत्रपटबुद्ध्यभावादिति । आद्यं निराकरोति **न चैकैकतन्तुपरित्याग इति** । एवञ्च सर्वतन्तुभिरभेदप्रतीतिरेव एकतन्तुना अभेदप्रतीतिरिति भावः । न द्वितीयः । अन्यथासिद्धेरित्याह **एकत्र पटबुद्ध्यभावस्त्विति** । भेदापवादकत्वमेव किं न स्यादित्यत आह **न त्विति** ।

शे०वा०— ननु 'सर्वप्रत्यक्षविषय' इत्युत्तरवाक्ये पटस्य व्यतिषङ्गविशिष्टतन्तुभिरभेदस्यैकैकतन्तुनाऽप्यभेदस्य प्रत्यक्षसिद्धत्वमुच्यते, तदनर्थकमित्याशङ्क्य 'अंशिनोऽशैरभेदोऽयमंशेन तु भिदाभिदे'ति पूर्ववाक्योक्तस्य व्यतिषङ्गविशिष्टतन्तुभिरत्यन्ताभेदस्यैकैकेन तन्तुना च भेदाभेदस्य भेदाभेदशङ्कानिरासेन अत्यन्तभेदशङ्कानिरासेन चोपपादनार्थत्वान्नानर्थक्यमिति भावेन पूर्ववाक्योक्तदुभयोपपादकतयोत्तरवाक्यं योजयितुं व्यतिषङ्गविशिष्टतन्तुभिः पटस्य भेदाभेदाशङ्कामेकैकतन्तुना चात्यन्तभेदशङ्कां तद्बीजमुपदर्शयन्नेवोत्थापयति **नन्विति** । यद्यपि व्यतिषङ्गविशिष्टैस्तन्तुभिरेवात्यन्ताभेदोऽभिहितः, न तु तन्तुव्यतिषङ्गेणेति न तन्तुव्यतिषङ्गेण पटस्य भेदोपपादनसङ्गतिः, तथाऽपि तद्ग्रन्थस्योक्तमाशयमजानानस्य तन्तुव्यतिषङ्गेण पटस्यात्यन्ताभेद इति भ्रान्तस्येयमाशङ्का । अत एवोत्तरग्रन्थे तदाशयवर्णनमिति ध्येयम् ।

उक्तोऽयमर्थ इति । अत्रायमित्यनुवादेनोक्तार्थ इति तद्व्याख्यानं कृतम् । कथमनेनोक्ताक्षेपद्वयपरिहार इत्यत आह **एतदुक्तं भवतीति** । **वैलक्षण्यस्येति** । तस्याभेदविषयत्वं विनाऽनुपपत्तेरभिहितत्वादिति भावः । **साक्षिसिद्धत्वादिति** । विलक्षणप्रतीत्यपलापानुपपत्तेरिति भावः । ननु तन्तुव्यतिषङ्गानन्तरं पटस्य जायमानत्वादेव पटस्य तद्भेदः सिद्ध इति कथं भेदे प्रमाणाभाव इत्यतस्तावता व्यतिषङ्गेण सह भेदप्राप्तावपि न हानिरस्माभिस्तदत्यन्ताभेदानङ्गीकारात् । येन चात्यन्ताभेदोऽभ्युपगतः तद्भेदस्य चानेनाप्राप्तेरिति भावेन स्वाशयमुद्घाटयति **जायतामित्यादिना** । **विशिष्टं रूपमिति** । तदत्यन्ताभिन्नमेव पटमाचक्ष्महे इति पूर्वेण सम्बन्धः । ननु पटस्तन्त्वनाश्रित इति सिद्धान्तः । तन्तुषु पट इति प्रतीत्यसिद्धेरिति पूर्वग्रन्थानुसारात् । तन्तुविशिष्टाकारश्च

तन्त्वाश्रितः । विशिष्टं च विशेष्याश्रितं द्रव्यान्तरमित्यन्यथाख्यातिस्थलीयग्रन्थानुरोधात् । अतः कथं तयोरभेद इति चेन्न । अभेदेऽपि विशेषशक्त्यैव पटविशिष्टाकारयोस्तन्त्वाश्रितत्वानाश्रितत्वसम्भवात् । कथमन्यथा त्वग्ग्राह्याग्राह्ययोः पटरूपयोरभेद इति तदेतदभिप्रेत्योक्तं पूर्वत्र 'कथमेतदिति चेत् । विशेषशक्त्यैवेति ब्रूमः' इत्यादिनेति । कथञ्चैकैकतन्तुना पटस्याभेद इत्याक्षेपस्य समाधानमाह **न चैकैकेति** । समुदायस्य समुदाय्यभिन्नत्वादिति भावः । ततश्च सर्वतन्तूनां पटाभेदस्य पूर्वमुक्तत्वात् तदभिन्नस्यैकैकस्यापि तन्तोः पटाभेद आवश्यकः । अन्यथैकैकतन्तुव्यतिरेकेण सर्वतन्तूनामभावात् सर्वेषामपि तद्भेदः स्यादिति समाधानमुक्तं भवति । नन्वेवं व्यतिषङ्गे सति ये विशिष्टास्तन्तवस्तेषां पटेनात्यन्ताभेदस्य पूर्वमुक्तत्वात् तदभिन्नस्याप्येकैकस्य तन्तोः पटेनात्यन्ताभेदापत्तिरिति चेन्न । एकैकस्य तन्तोर्विशिष्टतन्तुभिरत्यन्ताभेदे हि तथा स्यात् । न चैतदस्ति । किन्तु भेदाभेद एव । तत्र विशिष्टतायाः खण्डितत्वादिति न किञ्चिदेतत् । नन्वेकैकत्र तन्तौ पटबुद्ध्यभावेन तदभेदाभावसिद्धेः कथमेकैकस्य तन्तोः पटेनाभेद इत्यतो भेदमात्रेण पर्यवसन्नस्य बुद्ध्यभावस्य भेदमात्राक्षेपकत्वान्नाभेदापवादकत्वमित्याह **एकैकत्रेति** । ननु भेदेनेवाभेदाभावेनापि तत्पर्यवसानसम्भवात् भेदाक्षेपकत्ववदभेदाभावाक्षेपकत्वमप्यस्त्वित्यत आक्षेप्यस्य प्रमाणाविरुद्धताया आक्षेपसामग्रीत्वात् प्रकृते चाभेदस्य प्रत्यक्षसिद्धत्वेन तदभावस्य प्रमाणबाधितत्वेनाक्षेपसामग्रीविरहान्न तदाक्षेपकत्वमित्याशयेनोक्तं 'न तु प्रत्यक्षसिद्धमभेदमपवदती'ति ।

वा०र०— सम्भ्रान्तस्येयमाशङ्केति । यद्यपि पूर्वशङ्कापि सम्भ्रान्तस्यैव । एकभ्रान्त्यैव दूषणद्वयप्रवृत्तेस्तथा च एकत्रैव शङ्काद्वयस्य सम्भ्रान्तीयत्वमभिधाय पूर्वशङ्कापरिहारस्य मूलकारस्याभ्युपेत्य परिहारत्वमभिधाय अथाशयं वक्तुं सम्भ्रान्तीयदूषणान्तरमाशङ्क्य तदुभयनिरासकतयोत्तरानुव्याख्यानमवतारयतीत्येकवाक्य-तयैव योजना कर्तुं शक्या । तथापि उत्तरानुव्याख्यानस्य 'अंशिनोंशैरि'त्यादिना प्रागुक्तोपपादकत्वेन द्वितीयशङ्कानिरासकत्वेऽपि पूर्वशङ्कानिरासकत्वाप्रतीतेः तच्छङ्काद्वयनिरासकत्वेनावतारयोगात् । प्रथमशङ्कापरिहारो मूलकृता अभ्युपेत्यैव स्वयं कृतः वस्तुतः परिहारस्तु शङ्कान्तरनिरासार्थप्रवृत्तोत्तरव्याख्यानादेव भविष्यतीति किं तन्निरासकत्वस्याप्यभ्युपगमे चेति भावेनोक्तफलावतारं पृथगेव प्रवर्त्य तत्र शङ्कानुपपत्तिपरिहारोऽयं कृतः । अत एवाशयोद्घाटनस्थले उत्तरशङ्कानिरासपरत्वेनैव तदवतारोऽभिहित इत्यवधेयम् । **व्यतिषङ्गविशिष्टतन्तुभिरिति** । मिलितसर्वतन्तुभिरित्यर्थः । **एकैकेति** । प्रत्येकं व्यतिषङ्गविशिष्टसर्वतन्तुभिरित्यर्थः । एवमुत्तरत्रापि । नन्वत्र परप्रतीतार्थमङ्गीकृत्य परिहाराभिधानेन न प्रयोजनम् । वास्तवपरिहारान्तरसम्भवे तदङ्गीकारानुपपत्तेः । किं च तुष्यतु दुर्जन इति न्यायेन परोक्ताङ्गीकारेऽपि विशेषशक्तेरुपन्यासायोगस्तस्याः यथार्थनिर्वाहाय स्वीकारेऽपि सिद्धान्तेऽवास्तवनिर्वाहकत्वानङ्गीकारादिति चेन्न । उभयत्रापि तुष्यत्विति न्यायानुसारादित्यदोषः । ननु अंशिनोंशैरित्यनुव्याख्याने अंशिनः पटस्यांशैरत्यन्ताभिधानं कृतमिति व्याख्यानं न युक्तम् । तथा सति 'भेदो नाशो भवेत्तथे'त्यारभ्य एतत्पर्यन्तं अवयवावयव्यादीनां भेदाभेदाय यत्तदुपपादनं तस्य सङ्गतत्वापातात् । अत एव तत्तदनुव्याख्यानव्याख्यावसरे मूले विवेकेन भेदाभेदोपपादनं कृतम् ।

न च तौ कालभेदेनेति न विरोध इति वाच्यम् । सामस्त्योच्छेदिनोऽन्यत्रेत्यादिभाष्यव्याख्यानावसरे भाव इत्येतत्स्वारस्यं वर्णयता मूलकृता स्वसद्भाववेलायामेवोभयरूपका इत्यर्थ इति उक्ताविनष्टस्यासत्त्वेन भेदचिन्तानवकाशात् । प्रागत्यन्ताभेदे विनाशसम्भवाच्चेति व्युत्पादितत्वेन कालभेदेनेति विशेषस्यावक्तुमशक्यत्वात् । न च व्यतिषङ्गविशिष्टैरत्यन्ताभेदः तदविशिष्टैश्च भेदाभेदाविति वाच्यम् । तथा सति अविशिष्टतन्तुभिः पटस्य तस्मिन्सत्यप्यसत्त्वयुक्त्या भेदस्यैव प्राप्त्या भेदावगाहिप्रत्यक्षस्य तेषु प्रसक्त्यभावापातेनोक्तप्रत्यक्षेणावशिष्टतन्तूनां पटेनाभेदासिद्ध्यापत्त्या च भेदाभेदौ न स्यातामेव विशिष्टतन्तुभिस्तु न भेदप्रसक्तिरिति यावद्द्रव्याभाव्यंशिन इवायावद्द्रव्यान्नांशिनोऽपि अत्यन्ताभेद एवापतेत् । तस्या विशिष्टतन्त्वाख्यकारणीभूतांशावियोगात् । अन्यथा गुणादावप्युक्तप्रकारेण स्वसद्भाववेलायामन्त्यताभेदोऽङ्गीकार्यः स्यादिति पूर्वविरोध एव । तस्मादस्य पूर्वग्रन्थविरोधो दुष्परिहरः । तथैवांशांशिनोरपीति तत्त्वविवेकटीकायाम् अंशांशिशब्दयोः कार्यकारणादिति रिक्तांशांशपरत्वोपपादनेन तयोः कार्यकारणपरत्वेन व्याख्याने तद्विरोधश्च तत्कथमेतदिति चेदत्र ब्रूमः । भेदो नांशे भवेत्तथेत्यादिना पूर्वमुक्तौ भेदाभेदाविति यदुक्तं तत्सत्यमेव । परन्तु तत्र यादृशावयवैरवयविनो भेदाभेदावुक्तौ न तैरत्यन्ताभेदः । येन चात्यन्ताभेदो न तेन भेदाभेदावित्यङ्गीकारात् । अत एव व्यतिषङ्गविशिष्टा हीत्यादिवाक्यावतारे टीकाकृतैवमेवोक्तम् । अथ पटोत्पत्तेः प्राक् पश्चाच्च पटस्य तन्तुभिर्भेदवत् पटकालेऽपि भेदोऽस्तीति भग्नम् । तदात्यन्ताभेदस्वीकारात् तन्तुव्यतिरिक्तव्यतिषङ्गविशिष्टसमुदायपदोक्तपदार्थान्तरेणात्यन्ताभेदाङ्गीकारे च तन्तुरभेदो न स्यादेवेत्युक्तमिति चेन्न । तन्तूनां व्यतिषङ्गविशिष्टरूपपदार्थाभेदे प्रत्यक्षसत्त्वेन व्यतिषङ्गविशिष्टस्य तन्त्वभेदेऽपि खण्डितत्वेन भेदस्यापि सत्त्वाद्भिन्नाभिन्नं तावद्विशिष्टतन्तुभिरिति सिद्धम् । तथा च पटस्य विशिष्टेनात्यन्ताभिन्नत्वेऽपि विशिष्टेन भिन्नाभिन्नं तन्तुभिर्भेदाभेदौ युक्तमेव । अत एव विशिष्टस्यैकत्वं तन्तूनां चानेकत्वमिति विशेषादेव विशिष्टान्त्यताभिन्नत्वेन अनेकत्वप्रसङ्गो नास्तीति परिहारः सिद्धान्ते । अथैव मन्यसे । विशिष्टाकारः तन्त्वाश्रितोऽभ्युपगम्यते विशिष्टं च विशेष्याश्रितं द्रव्यान्तरमित्यन्यथाख्यातिस्थलीयमूलानुसारात् । नरगुणाद्याश्रयस्य भेदे प्रमाणमस्ति । विशिष्टयोर्भेदेऽपि न तद्गुणाद्याश्रयः । किन्तु गुणाद्याश्रयाश्रितं वस्त्वन्तरमित्यन्यथाख्यातिस्थविवरणनिरासावसरे मूले **विशिष्टयोरिति** । सिद्धान्तेऽपि यत्र भेदप्रतीतिसूत्रैव विशिष्टयोरभेदोऽन्यत्र तु भेद एवेति भाव इति टीका च । वियदधिकरणे तु पराधीनविशेषाप्तिरूपो प्रति विचारावसरे पूर्वविशेषो यजने हि विशिष्टाकारो यजनोऽवश्यंभावी विशिष्टाकारश्च स्वरूपाभिन्न इति तस्यैवासावुपजनो भवति । देवदत्तः शरीरजातो विद्वान् जात इत्यवस्थितस्वरूप एव वस्तुनि विशेषावाप्तिमात्रेण जननव्यवहारो दृश्यत एवेत्युक्तम् । एकवाक्यता योज्या । तथाऽस्मत्पक्षेऽपि विशेषस्येत्युत्तरानुव्याख्यानमूले विशिष्टादिनिरूपचक्षुष्कुलतया योज्यम् । पटश्च तदनाश्रितः तन्तुषु पट इति प्रतीत्या सिद्धेरिति प्रागभिधानात् । अतः कथं विशिष्टेनात्यन्ताभेद इति । सत्यं परं विशेषशक्त्या आश्रयाश्रयिभावोऽप्युपपद्यते । अथ विशिष्टसर्वतन्तूनामिवैकैकस्यापि विशिष्टस्य तन्तोः पटात्यन्ताभेदप्रसक्तिरिति चेन्न । एकैकस्य तन्तोर्विशिष्टतन्तूत्पत्तिरत्यन्ताभेदाभावेन भेदाभेदयोरेव च सद्भावेन विशिष्टतायाः खण्डितत्वात् पटे वाप्यत्यन्ताभेदाप्राप्त्युपपत्तेः ।

सम्मतश्चायमर्थो मूलकृतः । अनेकावयववाद्यात्मकतया अवयव्यादीनामनेकत्वप्रसङ्गशङ्कायां गुणसामान्ययोरनुव्याख्याने तत्परिहारेऽप्यवयविनि तत्परिहाराभावेन प्राप्तन्यूनतापरिहाराय स्पष्टत्वादनुक्तिं व्याचक्षाणेन स्वयमवयविन्यनेकत्वपरिहारोऽभिहितोऽवयविनस्तु एकत्वेनेत्यादिना तत्र पटस्य च यादृशेन तन्तुसमुदायेनात्यन्ताभेदोऽहितः स एक एव । व्यतिषिक्तानां तन्तूनां विशिष्टाकारो ह्यसौ । स चागन्तुकत्वात् तन्तुभ्यो भिन्न भिन्न एवेत्यनेनोक्तस्यार्थस्य स्पष्टप्रतीतेः । टीकायामपि व्यतिषङ्गविशिष्टा हीत्येतदवतारे जायतां नामेत्येतद्वाक्यव्याख्यानावसरे न चैकैकतन्तुपरित्याग इत्येतद्व्याख्यानावसरे च तत्रतत्रोक्तस्यार्थस्यास्पष्टं प्रतीतेः । 'अंशो नानाव्यपदेशादि'त्यधिकरणीयपरोक्तानुवादावसरे टीकायामंशत्वमारम्भकत्वखण्डत्वपदत्वं चेत्युक्तं भवति । 'अत एव चोपमे'त्येतत्सूत्रीय 'यद्येकता स्वत' इत्येतदनुभाष्यमूले अंशिशब्दो हि तदेकदेशार्थस्तत्सादृश्यार्थमूले उक्तम् । तत्रैवोपयोगो विचार्योऽस्ति ।

ननु तर्ह्यंशिनोंशैरित्यत्रत्यांशैरित्यस्यायोगः विशिष्टाकारस्यैकत्वात् । एकमेव गुणादिष्वप्यत्यन्ताभेदभेदाप्रसङ्गाच्चेति चेत् । अत्रविचारणीयम् । अत्रायं निष्कर्षः । तन्तूनां पटेन प्रागुक्तरीत्या भेदाभेदावेव । यदा पट इति प्रत्ययो ज्ञायते तदा तन्तवोऽवस्थान्तरापन्नास्तथा च तेन विशिष्टाकारेणात्यन्ताभेद एव उभयत्र परस्परव्यावृत्तनिमित्तसद्भावात् । भेदाभेदोक्तेरनुव्याख्यानकारीयाया चामूलकारीया वाचा अत्रैव तात्पर्यम् । अत एव भेदाभेदौ चेति यदुक्तं तद्विशदयतीति मूलकृतावतारोऽभिहितः । विशदनेन च सामवस्त्योच्छेदिन इत्यादि सामान्योक्तेः । सङ्कोचनम् । अत एव यथा गगनादेरित्यादिना विशिष्टाकारांशे यावदवयवाभाविन एव दृष्टान्तीकरणम् । एवं च तस्मिन् सत्यप्यसत्त्वादिभेदसाधकयुक्तेरभेदेनोपलम्भरूपाभेदसाधकस्य च सत्त्वेन तन्तूनां पटे न भेदाभेदौ यावद्विशिष्टभाविनोऽवयवयिनस्तु उक्तभेदसाधकशून्यत्वात् तादृग्गगनादिवदत्यन्ताभेद एव विशिष्टाकार एव एकैकतन्तोस्तु विशिष्टतायाः खण्डनाद्भेदाभेद एव । गुणादौ तु नैवम् । तेषां नानागुणक्रियादिभिर्विशिष्टतन्त्वादेर्विशिष्टाकारेण पटव्यवहारस्य परस्परमात्रत्वेनाप्रतीत्या तत्रात्यन्ताभेदाभावोपपत्तेः । तर्हि सर्वगुणक्रियादिविशिष्टाकारेण सर्वगुणक्रियादीनां अत्यन्ताभेदप्रसङ्ग इति चेदिष्टापत्तिं गृहाण अत एवावयवतुल्यता प्रत्येकं गुणादीनामस्तीति भावेनांशांशिनोरत्यन्ताभेदो भेदाभेदौ चेति यदुक्तमिति विशिष्य सङ्कीर्तनमिति । अत्र तथैवांशांशिनोरपीत्युक्त्वा विवेकव्याख्यानरूपजयतीर्थ्यनुसारेण तद्व्यासतीर्थ्यनुसारेण च मूलेऽपि खण्डपटानां महापटावयवत्वादिप्रतिपादनस्य सत्त्वेऽपि न तत्तदनुसारेण अंशांशिशब्दौ खण्डमहापटपराविति वक्तुं शक्यमिति विषयो वाऽयं सर्वोऽपि ग्रन्थो योज्यः । उपपादनं तु प्रायः पूर्ववदेवेति बोध्यम् । **ब्रूम इतीत्यादिना** इतीतिशब्दः शङ्कापरिहारसमाप्तौ ।

स०व्र०— कथं चैकतन्तुनाऽभेद इत्येतत्परिहरति **न चैकैकेति** । तथा च एकैकस्य तन्तोः पटात् भेदे एकैकतन्तुव्यतिरेकेण सर्वतन्तूनामभावात् सर्वेषामपि भेद एव स्यादिति एकैकस्यापि तन्तोः पटेन अभेदस्याप्यावश्यकत्वादित्यर्थः । न चैवमेकैकस्य तन्तोः पटेन भेदाभेदाभ्युपगमे सर्वेषामपि भेदाभेदापत्त्या अत्यन्ताभेदोपपत्त्यर्थम् एकैकस्याप्यत्यन्ताभेदाभ्युपगमापत्तिरिति वाच्यम् । सर्वैरपि तन्तुभिरत्यन्ताभेदस्या-

नभ्युपगतत्वात् विशिष्टाकारेणैवात्यन्ताभेदस्याभ्युपगमात् । न चैवं तन्तूनामपि पटेनात्यन्ताभेद एवास्तु । विशिष्टाकारस्यैव पटाभेदसम्भवादिति वाच्यम् । केनापि रूपेणाभेदासहिष्णुभेदस्यैव अत्यन्तभेदत्वात् । तन्तूनां च पटेनात्यन्तभेदे केनापि रूपेण पटेन भेदासहिष्णुभेदो वाच्यः न चासौ युक्तः । तन्तूनामेव विशिष्टाकार-लक्षणरूपेण पटाभेदसद्भावेन तत्सहिष्णुभेदस्यैव सद्भावेन तदसहिष्णुभेदस्यानुपपन्नत्वात् । न चैवं पटस्य विशिष्टाकारेणात्यन्ताभेदाभ्युपगमात् तन्तूनां पटस्य च भेदाभेदानुपपत्तिः । यस्य येनात्यन्ताभेदः तस्य केनापि रूपेण भेदस्याभावो हि अत्यन्ताभेदः । तथा च विशिष्टाकारेण पटस्यात्यन्ताभेदेऽपि तेन सह केनापि रूपेण भेदाभावात् । विशिष्टाकारस्य तन्तुरूपत्वेऽपि तन्तूनां विशिष्टाकाररूपत्वाभावादिति दिक् ।

स०ना०— तन्तुसंयोगाभेदः पटस्योक्त इति मत्वा शङ्कते **नन्विति** । **व्यतिषक्तसर्वतन्तूनामिति** । तन्तूनां परिणामस्येत्यर्थः । **न हि तन्तुव्यतिषङ्गमिति** । तन्तुसंयोगमित्यर्थः । **विशिष्टं रूपमिति** । तस्यापि व्यतिषङ्गशब्दवाच्यत्वादित्यर्थः ।

विठ्ठल०— आरम्भवादाश्रयणेन शङ्कते **ननु व्यतिषिक्तेति** । एवं पटस्य व्यतिरिक्तसर्वतन्तुभि-रभेदमाक्षिप्यैकैकांशिन भिदाभिदेत्युक्तमाप्याक्षिपति **कथं चैकैकेति** । **उक्तोऽयमर्थ इति** । अयमित्युत्तरवाक्येन सम्बध्यत इति प्रागुक्तमनेन विवृतं भवति । पटस्य व्यतिरिक्तसर्वतन्तुभिरत्यन्ताभेदः एकैकतन्तुना भेदाभेदावि-त्युक्तोऽयमर्थ इत्यर्थः । उक्तशङ्कापरिहारापूर्तेराह **एतदुक्तं भवतीति** । **सम्बन्धवस्तुद्वयेति** । कुण्डबदरादि-रूपवस्तुद्वयेत्यर्थः । नन्वस्त्येव भेदे प्रमाणम् । सर्वतन्तुव्यतिषङ्गसमनन्तरं पटस्य जायमानत्वादित्यनुमान-मित्यत आह **जायतां नामेति** । यद्यपि चरमतन्तुव्यतिषङ्गसमानकालीनैव पटोत्पत्तिस्तथानुभवात् तत्त्वप्रका-शिकायामन्यतन्तुसंयोगेकपटोऽवशिष्यत इत्युक्तत्वाच्च । तथाप्यङ्गीकारवादोऽयमिति ज्ञेयम् । यद्वा तन्तुव्यति-षङ्गानन्तरं पट इत्यस्य अन्यतन्तुसंयोगानन्तरं पटो जायत इति नाभिप्रायः । किन्त्वन्त्यतन्तुसहितयाव-त्तन्तुव्यतिषङ्गस्य पटं प्रति निमित्तत्वमस्तीत्येव अन्त्यतन्तुसंयोगकाल एव यावत्तन्तुव्यतिषङ्गलाभान्निमित्तत्वं चोपपाद्यत । अत एव व्यतिषङ्गे सति यत्तन्तुना विशिष्टरूपमित्युच्यत इति । **न विवक्षितेति** । व्यतिषिक्त-सर्वतन्तूनां पटेनाभेद इति विवक्षितार्थस्येत्यर्थः । ननु तन्तुव्यतिषङ्गस्य पटं प्रति निमित्तत्वे पटाभेदोऽनुपपन्न इत्यत आह **न हीति** । तन्तुव्यतिषङ्गस्य पटाभेदोक्तौ हि निमित्तत्वानुपपत्तिः स्यात् । तन्तुव्यतिषङ्गनिमित्तकस्य व्यतिषिक्तसर्वतन्तुरूपस्य विशिष्टस्य पटाभेदोक्तौ तु नानुपपत्तिरिति भावः । कथं च एकैकतन्तुना पटस्याभेद इत्यस्योत्तरमाह **न चैकैकेति** । यावत्समुदायिव्यतिरिक्तसमुदायाभावादिति भावः ।

॥ इति उक्तार्थे प्रमाणप्रदर्शनं च ॥

॥ इति अंशांशिनोरत्यन्ताभेदो भेदाभेदौ चेत्यस्य विशदनम् ॥

* * *

॥ अथ समवायस्य स्वरूपतो निराकरणे उक्तस्य गुणगुण्याद्यभेदस्य उपपादनम् ॥
॥ अथ तत्र अवयवावयव्यादीनां परस्परभेदानुपपत्तिशङ्का तन्निरासश्च ॥

२०५ **सु०**— "अथापि स्यात् । अवयव्यादीनामवयवादिभिरभेदो नोपपद्यते, एको ह्यवयव्यनेके चावयवाः; तदभेदेऽवयवानामप्यभेदोऽवयविनो वा भेदः प्रसज्येत । तथा गुणाश्च केचिदनेकाश्रिताः, एकैव हि संयोगव्यक्तिर्द्वयोर्द्वयोर्वर्तते; तथा विभागव्यक्तिरपि । सङ्ख्या च द्विविधा, एकत्वानेकत्वभेदात्; तत्रैकत्वस्यैकद्रव्यगतत्वेऽपि द्वित्वादिकमनेकाश्रितम् । एवं पृथक्त्वमपि द्विविधम्, एकपृथक्त्वमनेकपृथक्त्वं च; तत्रैकपृथक्त्वस्यैकद्रव्यवृत्तित्वेऽपि द्विपृथक्त्वादिकमने(कद्रव्याश्रि)काश्रितमेव । एवञ्च गुणानां गुणिनैक्ये संयोगाद्याश्रयानेकद्रव्याभेदो वा संयोगादिभेदो वाऽऽपद्येत ॥ सामान्यं चैकमनेकाश्रितम्, तस्य व्यक्त्यभेदे व्यक्तीनामप्यभेदः सामान्यस्य वा भेदः प्रसज्येत" इत्यतः संयोगविभागपृथक्त्वानां तावदनेकाश्रितत्वं नास्तीत्याह **संयोगश्चेति** ।

अनु०— संयोगश्च विभागश्च भेदश्चैव पृथक् पृथक् ।

भेद इति पृथक्त्वमुच्यते । **चशब्दा** इतरेतरयोगे । **पृथक्पृथगेव** एकैकद्रव्याश्रिता एवेत्यर्थः । ततश्चैकेन गुणेनाभिन्नत्वे द्रव्ययोरप्यभेदः स्यादित्यतिप्रसङ्गस्यापादकासिद्धिः, अनेकद्रव्याभिन्नत्वे गुणस्यापि भेदः स्यादित्यस्येष्टापत्तिर्दूषणमित्युक्तं भवति ।

परि०— संयोगविभागपृथक्त्वानां तावदिति । नरत्वादिकमप्येवमिति सामान्यस्यानेकवृत्तित्वं नास्तीति वक्ष्यतीति तावच्छब्दार्थः । एवकारान्वयेनानूद्यार्थमाह **पृथक्पृथगेवैकैकद्रव्याश्रिता एवेत्यर्थ इति** । **एकेन गुणेनेति** । संयोगेनेत्यर्थः ।

यादु०— इतरेतरयोग इति । ननु संयोगादिष्वेकद्रव्याश्रितत्वरूपपृथक्त्वसमुच्चय एव कुतो न चशब्दो व्याख्यात इति चेत् । उच्यते । स्यादेतदेवं यद्येकाश्रितत्वमात्रमत्र विधेयं स्यात् । न चैवम् । पृथक् पृथगित्युक्तत्वात् । किन्त्वेकैकाश्रितत्वम् । तत्सम्बन्धश्च न प्रत्येकं संयोगादौ सम्भवति किन्तु मिलित एव । अतः साहित्यप्रतियोगिनामेककार्यसम्बन्धे इतरेतरयोगस्य विहितत्वादितरेतरयोग एव व्याख्यात इति द्रष्टव्यम् । **गुणेनेति** । संयोगादिनेत्यर्थः ।

वं०प०— तदभेदे एकेनावयविनाऽनेकेषामवयवानामभेदे । **अभेदो** यद्यदभिन्नाभिन्नं तत्तेनाभिन्नमिति व्याप्तेरिति भावः । एतद्व्याप्तिबलादेवोत्तरत्राप्यभेदोपपादनं द्रष्टव्यम् । **भेदः** अनेकावयवाभिन्नत्वादित्यर्थः ।

एवमुत्तरत्रापि भेदोपपादनं ज्ञेयम् । **भेदः** अनेकत्वम् । **एकद्रव्यगतत्वेऽपीति** । तथा च तेनाभेदो युक्त उक्तदोषाभावादिति भावः । एवमुत्तरवाक्यभावोऽपि ज्ञेयः । **द्रव्याभेदः** द्रव्याणामभेदः । **तस्य** सामान्यस्य । द्रव्यगुणकर्माणि व्यक्तय उच्यन्ते । द्रव्ययोरिति पूर्वोत्ताभ्यां सम्बद्धयते । **आपादकासिद्धिरिति** । संयोगादेर्गुणस्यानेकत्वेनैकेन गुणेनाभिन्नत्वं नास्तीत्यापादकासिद्धिरित्यर्थः ।

कं०रा०— अनेकपृथक्त्वमिति । 'पृथगिमौ पृथगिमे' इत्यादिरूपेण प्रतीयमानं पृथक्त्वमनेकपृथक्त्वमिति भावः ।

श्रीनिधि०— अवयवानामप्यभेद इति । यद्यदभिन्नेनाभिन्नं तत्तेनाभिन्नमिति नियमादिति भावः । तदभिन्नेनाभिन्नमप्रयोजकं विपक्षे बाधकाभावादित्यत आह **अवयविनो वा भेद इति** । तदभिन्नभेदस्य तद्भेदानतिरेकादिति भावः । **एवं पृथक्त्वमिति** । अयं पृथगिति एकनिष्ठतया प्रतीयमानं पृथक्त्वं एकपृथक्त्वम् । इमौ पृथगिमे पृथगिति अनेकनिष्ठतया प्रतीयमानमनेकपृथक्त्वमिति द्रष्टव्यम् । **सामान्यं चैकमनेकाश्रितमिति** । ननु संयोगादिभिः सहास्यानेकाश्रितत्वमुक्त्वा एकविधया एतेषां व्यक्तयभेदे दूषणं वक्तव्यम् । तत्किं सामान्यं चेति पृथगुच्यत इति चेत् मूले नरत्वादिकमप्येवमिति पृथगेव बाधकपरिहारो तदनुरोधेनेति ब्रूमः । तत्रापि किमर्थं पृथग्ग्रहणमिति चेत् वक्ष्यमाणत्वात् । ननु भेदस्य व्यासज्यवृत्तित्वं परेणापि नाङ्गीकृतं तत्किमर्थं भेदग्रहणमित्यत आह **भेद इति पृथक्त्वमुच्यत इति** । पृथक्त्वव्यापकत्वात् तस्य न शक्यसम्बन्धाभावदोष इति ।

शे०वा०— ननु संयोगविभागादेरेकैकद्रव्याश्रितत्ववर्णनस्य पूर्वेण सङ्गत्यभावात् तत्परोत्तरग्रन्थानर्थक्यमाशङ्क्याव्यवहितपूर्वेण तस्य सङ्गत्यभावेऽपि 'अभेदेन प्रतीतिश्च कार्यकारणपूर्वक' इत्यादिव्यवहितपूर्वग्रन्थोक्तगुणगुण्याद्यभेदे प्राप्तानुपपत्तिपरिहारेण तदुपपादकतया तत्सङ्गतिसम्भवान्न तत्परोत्तरग्रन्थानर्थक्यमिति भावेन तत्सङ्गततया उत्तरग्रन्थं योजयितुं तद्वाक्यार्थमाक्षिपति **अथापि स्यादिति** । **अवयवानामप्यभेद इति** । नीलतन्त्वभिन्नपटाभिन्नस्य पीततन्तोर्नीलतन्त्वभेदः स्यात् । यद्यदत्यन्ताभिन्नेनात्यन्ताभिन्नं तत्तेनात्यन्ताभिन्नमिति नियमादिति भावः । **अवयविनो वा भेद इति** । अत्यन्तभिन्नानेकावयवात्मकत्वादिति भावः । **तथेति** । एकैव विभागव्यक्तिर्द्वयोर्वर्तत इत्यर्थः । **संयोगाद्याश्रयानेकद्रव्याभेद इति** । घटभिन्नपटस्यापि घटाभेदः स्यादित्यर्थः । यद्यदत्यन्ताभिन्नेनात्यन्ताभिन्नं तत्तेनात्यन्ताभिन्नमिति व्याप्तेरिति भावः । **संयोगादिभेदो वेति** । अत्यन्तभिन्नानेकद्रव्याभिन्नत्वादिति भावः । **व्यक्तीनामप्यभेद इति** । घटाभिन्नद्रव्यत्वाभिन्नपटस्यापि घटाभेदः स्यादुक्तव्याप्तेरिति भावः । **सामान्यस्य वेति** । अत्यन्तभिन्नानेकद्रव्याभिन्नत्वादिति भावः । नरत्वादिकमप्येवमित्यादिना सामान्यस्यापि तन्निरूपणात् तावदित्युक्तम् । **पृथक्त्वमुच्यत इति** । ननु च परेण द्विपृथक्त्वस्यैवानेकाश्रितत्वेनाङ्गीकारात् तस्यैवानेकाश्रयत्वाभावोपपादनार्थं प्रवृत्तेऽत्रवाक्ये भेद इति द्विपृथक्त्वमुच्यत इत्येव व्याख्यातत्वात् पृथक्त्वमुच्यत इति कथं व्याख्यानमिति चेन्न । प्रसङ्गात्

पृथक्त्वमात्रस्य अनेकाश्रयत्वाभावोपपादनार्थं प्रवृत्तमूलगतभेदशब्दानुसारेण तथा व्याख्यानसम्भवात् । अत एव घटाद्भिन्नः पट इत्युदाहरणमप्युपपन्नम् अन्यथैकपृथक्त्वस्यैकैकाश्रयत्वपरतादृशोदाहरणासङ्गतेरिति ध्येयम् । **इतरेतरयोग इति** । ननु चात्र संयोगादिष्वेकद्रव्याश्रितत्वरूपपृथक्त्वसमुच्चयार्थतयैव चशब्दाः कुतो न व्याख्याताः इति चेत् । उच्यते । स्यादेतदेवं यद्येकाश्रितत्वमात्रमत्र विधेयं स्यात् । न चैवम् । पृथगित्येवाश्रवणात् । किन्त्वेकैकद्रव्याश्रितत्वमेव पृथक् पृथगित्युक्तत्वात् । तत्सम्बन्धश्च न प्रत्येकं संयोगादौ सम्भवति । किन्तु मिलितेष्वेव । ततश्च साहित्यप्रतियोगिनां संयोगादीनां परस्परानपेक्षाणामेककार्यसम्बन्धाभावेन समुच्चयस्य बाधितत्वान्न समुच्चयार्थत्वं युक्तं, किन्तु तेषां परस्परसापेक्षाणामेककार्यसम्बन्धादितरेतरयोगस्यैव न्यायप्राप्तत्वात् तदर्थतया व्याख्यानमित्याशयात् । **एकेन गुणेनेति** । एकेन संयोगादिनेत्यर्थः ।

वा०र०— यद्यदत्यन्ताभिन्नेति । न चात्र दृष्टान्ताभावः । यावद्द्रव्यभाविरूपादिना अत्यन्ताभिन्नेन पटादिद्रव्येणात्यन्ताभिन्नस्य पटादेरेवोक्तरूपादिनात्यन्ताभेदसत्त्वात्तत्र व्याप्तिग्रहोपपत्तेः । अवयविनस्त्वेकत्वेऽपि न कश्चिद्दोषः । आकाशस्य स्वावयवैरभेदवदवयवानामप्यभेदस्याङ्गीकृतत्वादिति तत्रैकवचनं यत्तद्विप्राणामिति उत्तरानुव्याख्यानमूले उक्तेराकाशावयवानां वा दृष्टान्तत्वं उक्तं च तत्रैकवचनं 'तद्विप्राणां भोजनं यथे'त्येतद्भाष्यमूलेऽवयविनस्त्वेकत्वेऽपि न कश्चिद्दोषः । आकाशस्य स्वावयवैरभेदवदवयवानामप्यभेदस्याङ्गीकृतत्वादिति । ईश्वरगुणक्रियादीनं वा । 'सर्वे सर्वगुणात्मनः सर्वे कर्तार' इति 'परमतः सेतून्माने'त्यधिकरणानुव्याख्यानमूलानुसारात् । अव्याकृतब्राह्मणे गुणानां परस्परात्मकत्वोक्तेश्च । 'इन्द्रा याहि चित्रभानो' इत्येतदृग्भाष्यस्थाभिधेत्येतट्टीकायाम् । 'ननु चितोरतत्वादीनां भगवद्धर्माणां कथं ज्ञानतेजोधर्मत्वमि'त्यत उक्तम् **अभिधेति** । ज्ञानतेजसोः परमेश्वरेण अभिधाकारणेनोक्तं युक्तमित्यर्थः इति उक्तेश्च । नन्वेवं व्याप्तो घटादिरूपादिषु व्यभिचारः । यद्रूपं येन रसेनात्यन्ताभिन्नेन पटेनात्यन्ताभिन्नं भवति तत्तेन रसेनान्त्यताभिन्नं नेति व्याप्यस्य व्यापकाभाववति वृत्तेरिति चेद् अत्र ब्रूमः । यावद्द्रव्याभाविषु रूपादिषु परस्परात्यन्ताभेदस्यापि सत्त्वेन व्यभिचाराभावात् । तत्रापि व्याप्तिग्रहसम्भवाच्च । अयावद्द्रव्यभाविषु तु अयन्ताभेदस्यैवाभावेन व्याप्यविरहादेव व्यभिचाराभावः । उक्तं चान्यथाख्यातिस्थलीय एवं खण्डो गौ शुक्लः पट इत्यादय इत्येतद्विवरणोक्तोऽतिप्रसङ्गनिरासावसरे ।

ननु च गुणादीनामाश्रयेण परस्परं चाभेदो भगवतो मुनेः सिद्धान्तः । कचिद्भेदाभेदौ चेत्यादि सविशेषत्वाङ्गीकारादिति परिहारश्च । उक्तं च तट्टीकायाम् । क्वचिदित्ययावद्द्रव्यभाविगुणादिस्थले गुणादीनामाश्रयेण परस्परसविशेषाभेदाङ्गीकारानुपपत्तिरित्याह । सविशेषत्वेतीति ज्ञेयम् । क्वचिदयावद्द्रव्यभाविगुणस्थादिस्थले गुणादीनामाश्रयेण तत्तत्स्थले एतेषां दृष्टान्तानुपयोगो ज्ञेयः । सिद्धान्तिनं प्रति शङ्कित्रा एतत्प्रकरणेऽवयवानामभेदादिकमापद्यते । तदनुसारेणैतेषु दृष्टान्तेषु मध्ये स्वपरसम्मतो अस्मन्मात्रसम्मतो वा दृष्टान्तो ज्ञेयः । एवमवयवादिष्वपि व्यभिचाराभावो बोध्य इति । तथा विभागेत्यत्रत्यं तथेत्येतदुपादत्ते **तथेतीति** । **सामान्यस्यापि तन्निरूपणादिति** । अवयवसङ्घयोस्त्वनेकाश्रितत्वेऽपि नाश्रयाभेदप्रसक्तिरिति तु वक्ष्यत इति भाव इति

शेषः । अन्यथा संयोगविभागपृथक्त्वसामान्यानामनेकाश्रितत्वनिरासेनाश्रयाभेदाप्रसङ्गेऽप्यवयविसङ्ख्ययोस्तदनिरासे प्रयुक्तन्यूनताशङ्का स्यात् । अत्रायं विवेकः । यत्सङ्ख्याश्रयाभेदनिरासकरणमुत्तरत्र क्रियते । तत्तु मूलात्तल्लाभ आनुषङ्गिकः । तन्मात्रेणोक्तशङ्कापरिहारस्यापि सिद्धेरिति भावेन । न तु स्वतन्त्रतया । अत एव सामान्येनोक्त-निराकरणपरग्रन्थस्येदानीं सामान्यस्येत्यादिरूपेणावतारकरणेऽपि सङ्ख्यायां तन्निराकरणपरस्य तथावताराभावः । अवयविनि तन्निराकरणं त्वदनुभाष्यासंस्पृष्टतायामेव मूलकृता क्रियत इति । भेदशब्दस्य स्वरूपभेदादिपरता-व्युदासाय पराभिमतपृथग्व्यवहारासाधारणरूपपृथक्त्वालाभाय तदर्थकतया तं व्याचष्टे **भेद इतीति** मूलम् । द्विपृथक्त्वादेरेवेत्यर्थः । एवमुत्तरत्र । **पृथक्त्वमात्रस्येति** । एकपृथक्त्वसाधारण्येन समस्तपृथक्त्वस्येत्यर्थः । **उदाहरणमपीति** । उत्तरत्रेति शेषः । उपलक्षणं चैतत् । अत एव एकपृथक्त्वे पार्थक्यमङ्गीकृत्य द्विपृथक्त्वादौ पार्थक्याभावशङ्कापरिहाराय भिन्न इत्युत्तरभाष्यं प्रवृत्तमित्यपि ज्ञेयम् । समुच्चयपक्षमङ्गीकृत्य मूलकृताऽभ्युपगत-मितरेतरयोगपक्षं समुच्चयपक्षे बाधकोपदर्शनपूर्वकं स्पष्टयितुं समुच्चयपक्षमाशङ्कते **ननु चेति** । **एकद्रव्या-श्रितत्वेति** । एकमात्रद्रव्याश्रितत्वरूपेत्यर्थः । ततश्च न केवलं संयोगः पृथगपि तु विभागोऽपि । यथा न केवलं विभागोऽपि तु भेदोऽपीति समुच्चयार्थतयैव व्याख्यानं कुतो न कृतमित्यर्थः । **एकाश्रितत्वमात्रमिति** । एकैकमात्राश्रितत्वमात्रमित्यर्थः । यद्वक्ष्यति **एकैकद्रव्यमात्राश्रितत्वसाधनमिति** । **तत्सम्बन्धश्चेति** । एकैक-द्रव्याश्रितरूपकार्यसम्बन्धश्चेत्यर्थः । एतत्स्पष्टनीयमस्ति ।

विठ्ठल०— द्विपृथक्त्वमिति । द्वयोरन्यस्मात्पृथक्त्वमित्यर्थः । संयोगविभागपृथक्त्वानां तावदिति सामान्यस्यानेकाश्रितत्वे नास्तीति । नरत्वादिकमप्येवमित्युत्तरत्र वक्ष्यत इति वाशब्दः पृथक् पृथगेवेत्यनूदित-स्यार्थमाह **एकैकद्रव्याश्रिता एवेत्यर्थ इति** । संयोगश्चैकद्रव्याश्रित एव न त्वेकस्य संयोगस्य द्विष्टत्वम् । एवं विभागश्चेत्यादिरर्थ इत्यर्थः । **एकेन गुणेन** संयोगादिनेत्यर्थः ।

चषक— ब्रह्मतर्कवचने पूर्वदले पटे निखिलतन्त्वभेदसाधनं दलान्तरे तत्रैव तावद्भेदसाधनं द्रष्टव्यम् **संयोगविभागपृथक्त्वानां तावदिति** । 'नरत्वादिकमप्येवं तत्तद्धर्मतये'ति सामान्यानेकवृत्तित्वस्य प्रतिविधास्य-मानतया तदवधिकप्राथम्यद्योतनार्थस्तावच्छब्दः ।

* * *

॥ अथ तत्रापि उक्तार्थसमर्थनम् ॥
॥ अथ संयोगादीनामेकैकाश्रितत्वम् ॥

२०६ सु०— ननु घटपटसंयोगविभागभेदा घटपटसम्बन्धितयाऽनुभूयन्ते, तत्कथ-मेकैकाश्रिताः, तथात्वे चैकैकस्मिन्नेव संयुक्तादिप्रत्ययप्रसङ्गः; इत्यत आह अन्योन्येति ।

अनु०— अन्योन्यप्रतियोगेन ह्युभयोरपि दृश्यते ।

प्रतियोगः = प्रतियोगित्वम् । अन्योन्यस्य प्रतियोगः = अन्योन्यप्रतियोगः । यत्संयोगादिः उभयोरपि दृश्यते तदन्योन्यप्रतियोगेन हि निमित्तेन । अत्र उभयोरपि इत्यनेकोपलक्षणम्, भेदस्य बहुसम्बन्धितयाऽपि प्रतीतेः ।

एतदुक्तं भवति । घटप्रतियोगिकः संयोगादिः पटेऽस्ति, तथा पटप्रतियोगिको घटेऽस्ति । तस्मादुभयसम्बन्धितया प्रतिभासोऽतिप्रसङ्गाभावश्च युज्यत इति ।

परि०— भेदस्य बहुसम्बन्धितयेति । एते पृथगिति बहुसम्बन्धितया पृथक्त्वस्य प्रतीतेरित्यर्थः । **अतिप्रसङ्गाभावश्चेति** । एकस्मिन्नेव संयुक्तादीत्युक्तातिप्रसङ्गस्याभावश्चेत्यर्थः ।

यादु०— अतिप्रसङ्गाभावश्चेति । एकस्मिन्नेव संयुक्तादिप्रत्ययप्रसङ्ग इत्यतिप्रसङ्गश्च नेत्यर्थः ।

वं०प०— सम्बन्धितयेति । घटपटयोः संयोग इति घटपटोभयाश्रितत्वेनेत्यर्थः । **तथात्वे** एकैकाश्रितत्वे । ननु तर्ह्येकैकाश्रितत्वे एकस्मिन्संयुक्तादिप्रत्ययः स्यादित्यतिप्रसङ्ग इति चेत् तत्राह **अतिप्रसङ्गाभावश्चेति** । एकैकाश्रितत्वेऽपि प्रतियोगिनिरूप्यत्वात् तदप्रतीतौ धर्मिभूतैकैकमात्रप्रतीतौ तत्र संयोगो न प्रतीयत इत्यर्थः ।

श्रीनिधि०— संयोगविभागभेदा इति । अत्र भेद इति मूलपदानुवादेन पृथक्त्वमभिप्रैतीति द्रष्टव्यम् । **प्रतियोगेनेति** । प्रतियोगः प्रतियोगित्वं उपलक्षणतया व्याख्यानस्य नियामकमाह **भेदस्य बहुसम्बन्धतयापीति** ।

शे०वा०— अन्योन्यप्रतियोगेनेत्युत्तरग्रन्थानर्थक्यमाशङ्क्य संयोगादीनामनेकाश्रितत्वसाधकप्रमाणस्यैकाश्रयत्वबाधकस्य चान्यथासिद्धिव्युत्पादनेन निरासार्थत्वान्न तदिति भावेन तत्परतया तद्योजयितुमनेकाश्रित-त्वसाधकमेकाश्रयत्वे बाधकं चाशङ्कते **नन्विति** । **भेदस्य बहुसम्बन्धितयाऽपीति** । अत्र भेदस्येत्युपलक्षणम् । संयोगादेरित्यपि द्रष्टव्यम् । अत एवोत्तरत्र संयोगस्यापि संयुक्ताविमौ संयुक्ता इमे इति बहुसम्बन्धितया प्रतीत्युदाहरणमिति ध्येयम् । कथमनेन परोक्तसाधकस्य बाधकस्य चान्यथासिद्धिसमर्थनमित्यत आह **एतदुक्तं भवतीति** । **अतिप्रसङ्गाभावश्चेति** । एकस्मिन्नेव संयुक्तादिप्रत्ययप्रसङ्गरूपातिप्रसङ्गाभावश्चेत्यर्थः ।

वा०र०— 'संयोगश्च विभागश्च भेदश्चे'त्यस्यावृत्तिमाश्रित्याह **यत्संयोगादिरिति** मूलम् । वक्ष्यति च अन्यथाधर्मीति टीकायाम् ।

स०व्र०— अतिप्रसङ्गाभावश्चेति । एकस्मिन्नेव संयुक्तादिप्रत्ययः स्यादित्यतिप्रसङ्गश्च नेत्यर्थः ।

विठ्ठल०— भेदस्य बहुसम्बन्धितयेत्यर्थः । संयोगादिरेकैकाश्रितत्वे अनेकसम्बन्धितया प्रतिभासानुपपत्तिः एकैकस्मिन्नेव संयुक्तत्वादि प्रत्ययप्रसङ्ग इत्यतिप्रसङ्गश्चेत्याक्षेपस्य कथं परिहार इत्यत आह **एतदुक्तं भवतीति** ।

* * *

॥ अथ तत्र च उक्तार्थे प्रमाणम् ॥

२०७ सु०— स्यादेतद्यदि संयोगादीनामेकैकवृत्तित्वे प्रमाणं स्यात्, तदेव नास्तीत्यत आह अन्योन्येति । 'पृथक् पृथगेवे'त्यनुवर्तते । अन्योन्यप्रतियोगेन हेतुना संयोगादिकमुभयोरपि पृथक् पृथगेव हि दृश्यते ।

अयमर्थः । पटो, घटेन संयुक्तो, घटाद्विभक्तो, घटाद्भिन्न, इति पटधर्मः संयोगादिः, घटप्रतियोगिकतया प्रतीयते । यश्च यत्प्रतियोगिको नासौ तद्धर्मः, यथा स्थविरप्रतियोगिकमपरत्वं न स्थविरधर्मः । तस्मान्नायं संयोगादिर्घटधर्मः । एवं घटधर्मः संयोगादिः पटप्रतियोगितयोपलभ्यमानो न पटधर्मो भवितुमर्हति । तथा च पृथक् पृथगेव संयोगादिरनेकधर्मोऽवगम्यत इति ।

परि०— अन्योन्येतिवाक्यमन्यथापि व्याचष्टे **स्यादेतदित्यादिना । घटाद्भिन्न इति** । घटात्पृथगित्यर्थः । **न स्थविरधर्म इति** । किन्तु युवधर्म इति भावः । उभयोरपि दृश्यत इत्येतदानुमानिकज्ञप्तिपरतया व्याचष्टे **अनेकधर्मोऽवगम्यत इति** ।

वं०प०— घटधर्म इति । प्रतियोगिभूतघटेत्यर्थः । **पटधर्मः** प्रतियोगिभूतधर्म इत्यर्थः । **पृथक् पृथगेवेति** । एकप्रतियोगिकमपरनिष्ठं चेत्यर्थः ।

शे०वा०— ननु 'संयोगश्च विभागश्चे'त्यादिना संयोगादीनामेकैकाश्रयत्वं प्रतिज्ञातं तन्मात्रं च न साधकम् । विपरीतप्रतिज्ञया विपर्ययस्यापि सिद्धिप्रसङ्गादित्यतः 'अन्योन्यप्रतियोगेनेत्ये'तन्न केवलं परोक्तसाधकबाधकान्यथासिद्धिप्रतिपादनेन तन्निरासमात्रपरं किन्तु स्वपक्षे साधकप्रमाणप्रदर्शनपरं चेति नातिप्रसङ्ग इति भावेन तत्परतया तद्योजयितुं साधकाभावशङ्कामुत्थापयति **स्यादेतदिति** । एकैकद्रव्यमात्राश्रितत्वरूपसाध्यस्यानुक्त्या प्रसक्तां तदनुवृत्तिकथनेन परिहरति **पृथक् पृथगित्यनुवर्तत इति** । उपलक्षणं चैतत् ।

संयोगश्चेत्यादिकमनुवर्तत इत्यपि द्रष्टव्यम् । अन्यथा धर्म्यनिर्देशप्रयुक्ततत्तादवस्थ्यात् । अत एव संयोगादिकमिति संयोगाद्यन्तर्भविणैव योजनाप्रदर्शनमुत्तरत्रेत्यवधेयम् । **अन्योन्यप्रतियोगेन हेतुनेति** । अन्योन्यप्रतियोगिकत्वेन हेतुनेत्यर्थः ।

ननु भवेद्घटपटसंयोगादेरन्योन्यप्रतियोगिकत्वेनैकैकद्रव्यमात्राश्रितत्वसाधनं, यद्यन्योन्यप्रतियोगिकत्वमेव तस्य सिद्धं स्यात् । न च तदस्ति । तत्साधकमानाभावात् । तथा च हेत्वसिद्धेर्नानुमानसम्भवः । दृष्टान्ताभावेन व्याप्त्यसिद्ध्या व्याप्यत्वासिद्धेश्चेत्यत आह **अयमर्थ इति** । घटप्रतियोगिकत्वसाधकप्रतीतिमेवाभिनयेनोपदर्शयति **पटो घटेनेत्यादिना** । विशेषव्याप्तौ दृष्टान्ताभावेन तदसम्भवेऽपि सामान्यव्याप्तिरविकलैव तत्र दृष्टान्तस्य सत्त्वादिति भावेन तामाह **यश्चेति** । **अयमिति** । पटधर्म इत्यर्थः । **पटप्रतियोगिकतयोपलभ्यमान इति** । घटः पटेन संयुक्तः पटाद्विभक्तः पटाद्भिन्न इति पटप्रतियोगिकतयोपलभ्यमान इत्यर्थः । उभयोरपीत्यनेकोपलक्षणमिति पूर्वोक्तं मनसि निधायाह **अनेकधर्म इति** । इतीत्यस्यायमिति सम्बन्धः ।

विट्ठल०— उक्तार्थे प्रमाणोक्तिपरतयाऽप्येतन्मूलं व्याख्यातुमाह **स्यादेतदिति** । किमनेन प्रमाणमुक्तं भवतीत्यत आह **अयमर्थ इति** । **घटाद्भिन्न इति** । घटात्पृथगित्यर्थः । न स्थविरधर्म किन्तु युच पुरुषधर्म इत्यर्थः ।

* * *

॥ अथ तत्र चापि अस्मिन्विषये पृथक्त्वस्य संयोगविभागात्पार्थक्यशङ्का तन्निरासश्च ॥

२०८ सु०— "नन्वस्तु संयोगविभागयोरियं गतिः, न तु पृथक्त्वे । यद्धि 'घटात्पटः पृथक्', 'पटाच्च घटः पृथगि'त्यन्योन्यप्रतियोगिकतया प्रतीयते, तदेकपृथक्त्वं पृथक् पृथगेवाभ्युपगम्यते । यत्तु 'भिन्नाविमौ', 'भिन्ना इमे' इति प्रतीयते तदनेकपृथक्त्वमनेकाश्रितमेव, प्रतियोग्यनिरूप्यस्यैकाश्रित(श्रय)त्वे मानाभावादि"त्यत आह भिन्ना इति ।

अनु०— भिन्ना इति तु भेदानां समुदायो हि दृश्यते । यथैव च पदार्थानाम्

इमे भिन्ना इति आदिप्रतीतौ **भेदानां समुदायः** अनेकत्वं **हि दृश्यते** । कथम् । **यथैव च पदार्थानाम्** ।

एतदुक्तं भवति । यथा हि 'शुक्ला इमे पटा' इत्यादिप्रतीतावनेके पटा अनेकानि च तद्विशेषणानि शौक्ल्यान्यवभासन्ते, तथा 'भिन्ना इमे' इत्यादिप्रतीतावप्यनेके पदार्था अनेके च भेदाः प्रकाशन्ते इत्यभ्युपगन्तव्यम् । न च विशेषप्रमाणमस्ति, येनात्रान्यो विधिर्भविष्यतीति । एतेन 'संयुक्ताविमावि'त्यादिप्रतीतिरपि व्याख्याता वेदितव्या ।

परि०— भिन्नाविमाविति । भेदशब्दोऽत्र पृथक्त्वपरो ज्ञेयः । **मानाभावादिति** । यश्च यत्प्रतियोगिक इति प्रागुक्तयुक्तेरत्रापि सत्त्वादिति भावः । **एतेनेति** । पृथक्त्वप्रतीतिव्याख्यानेन । संयु(क्ताविति)क्तौ विभक्ताविति धीरपि संयोगादिसमुदायविषयतया व्याख्यातेत्यर्थः । अत्र प्रकरणेऽसकृदुपात्तो भेदशब्दः पृथक्त्वपर इत्युपेत्य पृथक्त्वमुपलभ्यत इत्युक्तम् । **इत्यादिप्रतीतिरपीति** । तत्राप्यस्यामुना संयोगोऽस्य विभाग इत्यनेन संयोगादिविषया धीरिति व्याख्यातेत्यर्थः ।

वं०प०— अनेकाश्रितत्वमुपपादयति **प्रतियोगीति** । यो यत्प्रतियोगिको नासौ तद्धर्म इति व्याप्तिबलादेकाश्रितत्वं वक्तव्यम् । न हीमौ भेदवन्ताविति्यादौ प्रतियोगिनिरूपितत्वं प्रतीयते । अत एकाश्रितत्वे न मानमस्तीत्यर्थः । **शुक्ला इम इति** । अनेन 'यथैव च पदार्थानामि'त्येतदुक्तार्थम् । ननु भिन्ना इम इत्यादिप्रतीतावप्येकस्यैव भेदस्यानेकाश्रितत्वं प्रतीयत इति चेत् तत्राह **न च विशेषप्रमाणेति** । एकस्यैवानेकनिष्ठत्वे विशेषप्रमाणं नास्तीत्यर्थः । **अन्यो विधिः** भेदवन्ताविमाविति्यत्रानेकाश्रित एक एव भेद इति त्वयोच्यमानः प्रकारः ।

श्रीनिधि०— प्रतियोग्यनिरूप्यस्यैकाश्रयत्व इति । तदवृत्तित्वे तत्प्रतियोगित्वं प्रमाणमुक्तम् । न चात्र तदस्तीत्यर्थः । **शुक्ला इम इति** । अत्र पदार्थपदेन शुक्लोपादानं भिन्ना इति पदानुरोधेन, तेन विशेषणविशेष्ययोः समुदायस्य प्रतीतेरिति द्रष्टव्यम् । **विधिः** प्रकारः । **एतेनेति** । भिन्नाविमाविति्यादिप्रतीतेर्भेदानेकत्वविषयत्वप्रतिपादनेन । न्यायसाम्येनात्रापि संयोगानेकत्वविषयकत्वमिति भावः ।

शे०वा०— इयं गतिरिति । इदं च गुडजिह्विकामात्रम् । पृथक्त्वदृष्टान्तेनैव पटो घटेन संयुक्तः घटाद्विभक्त इति घटः पटेन संयुक्तः पटाद्विभक्त इति चान्योन्यप्रतियोगिकतया प्रतीयमानसंयोगविभागयोरेकैकमात्रवृत्तित्वस्य तावता प्राप्तावपीमौ संयुक्ताविमे संयुक्ता इति च प्रतीयमानसंयोगादेरनेकाश्रितत्वस्यैव, प्रतियोग्यनिरूप्यस्यैकाश्रयत्वे मानाभावेन, शङ्कितुं शक्यत्वात् । अत एव 'एतेन संयुक्ताविमाविति्यादिप्रतीतिरपि व्याख्याता वेदितव्ये'ति तुल्यन्यायत्वोक्तिः सिद्धान्ते सङ्गच्छत इत्यवधेयम् । **यत्तु भिन्नाविमाविति्यादि** । इमौ द्वाविति्यादौ द्वित्वस्येवेमौ भिन्नाविति्यादौ भेदस्यैकत्वमेव विषयः । अन्यथा द्वित्वस्यापि तथात्वापत्तेरिति भावः ।

'यथैव च पदार्थानामि'त्यभिहितदृष्टान्तव्युत्पादनपूर्वकं दार्ष्टान्तिकं व्युत्पादयितुमाह **एतदुक्तं भवतीति** । नन्विमे भिन्ना इत्यादेरिमे शुक्ला इत्येतत्साम्यमेव कुतो वक्तव्यम् । इमेऽनेके इत्येतत्साम्यस्यापि वक्तुं शक्यत्वादित्यत आह **न चात्रेति** । भेदस्यैकत्वे प्रमाणाभावाद् द्वित्वस्य चैकत्वे तत्सत्त्वान्न भिन्ना इत्यस्येमेऽनेके इत्येतत्साम्यं, किन्तु इमे शुक्ला इत्येतत्साम्यमेवेति भावः । इमौ भिन्नाविमे भिन्ना इति प्रतीतिव्याख्यानमन्यत्राप्यतिदिशति **एतेनेति** । यथा हि शुक्ला इमे पटा इत्यादिप्रतीतावप्यनेके पटाः अनेकानि च तद्विशेषणानि शौक्ल्यान्येव भासन्ते, तथा इमे संयुक्ताः इत्यादिप्रतीतावपि अनेके पदार्था अनेके च संयोगाः प्रकाशन्त इत्यभ्युपगन्तव्यम् । न चात्र विशेषप्रमाणमस्ति । येनात्रान्यो विधिर्भविष्यति । अन्यथेमे शुक्ला इत्यादिप्रतीत्या अनेकाश्रितैकशौक्ल्यादिसिद्धिप्रसङ्गादिति व्याख्याता वेदितव्येत्यर्थः ।

वा०र०— वक्तुं शक्यत्वादिति । ततश्च तद्दृष्टान्तेनेमे भिन्ना इत्यस्याप्येकभेदविषयत्वमेवेति भावः ।

विष्टल०— प्रतियोग्यनिरूप्यस्येति । संयोगादेः ह्येकप्रतियोगितया परानुयोगिकतया प्रतीयमानत्वादेरैकैकाश्रितत्वं युक्तम् । अनेकपृथक्त्वं त्वनेकानुयोगितयैव प्रतीयते । न हि घटपटौ पृथगित्यत्रान्यतरप्रतियोगिकतया भानमस्ति किन्तूभयोरप्यनुयोगिकतयैव पृतीति तस्मात् द्विपृथक्त्वादेरनेकाश्रितत्वमेव युक्तमिति भावः । यथैव च पदार्थमित्युक्तम् । विवृण्वन्नस्त्विमे शुक्ला इत्यत्रानेकानि शौक्ल्यान्यवभासन्त इति तथापीमे भिन्नमित्यत्र पृथक्त्वानेकत्वं कुतः सर्वत्रैकप्रकारेण भाष्यमिति नियमाभावादित्यत आह **एतदुक्तं भवतीति** । **अनेकानि चेति** । अत्र प्रतियोग्यनुयोगिभावेनाप्रतिभासेऽपि इमे इति प्रतीतावनेकानि शौक्ल्यान्यवभासन्ते तथा तथा भिन्ना इति । प्रतीतावप्यनेकपृथक्त्वानेकत्वान्यवभासन्त इत्यङ्गीकार्यं विशेषहेत्वाभावादिति भावः ।

* * *

॥ अथ तत्रापि च 'अनयोर्भेदः', 'अमीषां भेदः' इत्यादिप्रतीतौ भेदस्य द्विधर्मिकत्वेन उक्तार्थानुपपत्तिशङ्कानिरासः ॥

२०९ सु०— ननु 'अनयोर्भेदः', 'अमीषां भेदः' इति प्रतीतावनेकाश्रितं पृथक्त्वमुपलभ्यते, तत्कथमेतदिति चेत्; किमत्रानेकस्य धर्मितयाऽवभासं प्रमाणयसि, उत धर्मस्यैकत्वावभासम्, उतोभयावभासम् । पक्षत्रयेऽप्युत्तरमाह अनयोरिति ।

अनु०— अनयोर्भेद इत्यपि ।
इतोऽमुष्यामुतोऽमुष्य भेदो दृष्टो द्विधर्मिकः ॥

अस्यामपि प्रतीतौ इतो घटात् अमुष्य पटस्य अमुतः पटात् अमुष्य घटस्य भेद इत्येवं द्विधर्मिको भेदो दृष्टः । तथा चानेकस्य धर्मित्वेऽपि धर्मस्यैकत्वावभासासम्मतेर्ननेनाभिमतार्थसिद्धिरित्युक्तं भवति । अनेनैव 'अनयोः संयोग' इत्यादिप्रतीतिरपि व्याख्याता द्रष्टव्या ।

यादु०— एकत्वावभासेति । एकवचनस्यान्यथासिद्धेर्वक्ष्यमाणत्वादिति भावः । अनेन मूलेऽनेक इति पदमध्याहार्यमिति सूचयति ।

वं०प०— अत्रेति । एकस्यानेकाश्रितत्व इत्यर्थः ।

श्रीनिधि०— अनेनैवेति । अनयोर्भेद इति प्रतीतिव्याख्यानेन न्यायसाम्येनेत्यर्थः ।

शे०वा०— अनेकाश्रितं पृथक्त्वमुपलभ्यत इति । उपलक्षणं चैतत् । अनयोः संयोगोऽमीषां संयोग इत्यादिप्रतीतौ संयोगादेरप्यनेकाश्रितत्वोपलम्भात् संयोगादेरपि नैकैकाश्रितत्वमित्यपि द्रष्टव्यम् । **एकत्वावभासासम्मतेरिति** । एकवचनस्यान्यथासिद्धेर्वक्ष्यमाणत्वादिति भावः । अनेन मूलेऽनेकपदाध्याहार्यमिति सूचयति । अत एवानेकधर्मिकानेकभेदविषयत्वमित्युत्तरत्रानुवादः सङ्गच्छत इति द्रष्टव्यम् । **व्याख्याता द्रष्टव्येति** । अस्यामपि प्रतीतौ घटस्य पटेन संयोगः पटस्य घटेन संयोग इत्येवं द्विधर्मिकः संयोगो दृष्टः । तथा चानेकस्य धर्मित्वेऽपि धर्मस्यैकत्वावभासासम्मतेर्ननेनाभिमतार्थसिद्धिरिति व्याख्याता द्रष्टव्येत्यर्थः ।

वा०र०— अनेकपदमध्याहार्यमिति । अनेको भेदो दृष्ट इत्यध्याहार्यमित्यर्थः ।

विट्ठल०— विधिप्रकारः विशेषप्रमाणमाशङ्कते **नन्वनयोरिति** । **एकत्वावभासेति** । एकवचनस्य समुदायपरत्वेनान्यथासिद्धेर्वक्ष्यमाणत्वादित्यर्थः ।

* * *

॥ अथ च तद्विधर्मिकभेदपदोक्तैकवचनस्य 'विप्राणां भोजनं' इतिवद्व्यवस्थया अनुपपत्तिनिरासः ॥

२१० सु०— 'ननु वचनलिङ्गा हि वक्तुरभिप्रायाः । भेद इति चैकवचनं प्रयुज्यते । तेन अनुमीयतेऽस्यां प्रतीतावेक एव भेदो द्विधर्मिको दृष्ट इति । तस्मादन्योन्यप्रतियोगिकानेकधर्मिकानेकभेदविषयत्वं प्रतीतेर्न वक्तुं शक्यमि'त्यत आह तत्रेति ।

अनु०— तत्रैकवचनं यत्तद्भिप्राणां भोजनं यथा ।

तत्र 'अनयोर्भेद' इत्यादिवाक्ये, भेदद्वये वा । 'भोजनम्' इत्येकवचनम्, यथा तथेत्यर्थः । एतेन एकवचनेन प्रतीतेरेकार्थविषयत्वानुमानेऽनैकान्तिकत्वं समुदायविषयत्वेनान्यथासिद्धिश्चेत्युक्तं भवति । अवयविनस्त्वेकत्वेऽपि न कश्चिद्दोषः, आकाशस्य स्वावयवैरभेदवदवयवानामप्यभेदस्य अङ्गीकृतत्वात् । पटस्य च यादृशेन तन्तुसमुदायेनात्यन्ताभेदोऽभिहितः स एक एव । व्यतिषक्तानां तन्तूनां विशिष्टाकारो ह्यसौ । स चागन्तुकत्वात् तन्तुभ्यो भिन्नाभिन्न एव । एकैकेन तन्तुना सर्वैश्चाभेदेऽपि भेदस्यापि विद्यमानत्वान्नान्योन्याभेदप्रसक्तिरिति स्वयमेवोह्यतामिति नोक्तम् ।

परि०— वचनलिङ्गा इति बहुव्रीहिः । **तेनानुमीयत इति** । अनयोर्भेद इत्यादिवाक्ये प्रतीतं पृथक्त्वादिकमप्येकैकमेव भवितुमर्हति एकवचनान्तया आप्तोक्तत्वात् । घटोऽस्तीत्यादिवाक्यप्रतीतघटादिवदित्यनुमीयत इत्यर्थः । यदुक्तं प्राक् 'एको ह्यवयवी अनेके चावयवाः तदभेदेऽवयवानामप्यभेदः अवयविनो वा भेदः प्रसज्यत' इति तदुद्धरति **अवयविनस्त्वेकत्वेऽपीति** । अवयविपदेनाकाशादिरकार्योऽभिमतः, अथ कार्यो घटादिरुभयत्रापि क्रमेण समाधिमाह **आकाशस्येत्यादिना** । एकेन पटेनाभेदे तन्तूनामन्योन्याभेदापादनं किं व्यतिषङ्गदशायामथान्यदा । आद्ये नानिष्टमित्याह **यादृशेनेति** । अन्त्ये आह **स चेति** । **तन्तुभ्य इति** । अव्यतिषक्तेभ्य इति भावः । तावता कथमुक्तदोषनिरास इत्यत आह **एकैकेनेति** । **नोक्तं** ग्रन्थकृतेति योज्यम् ।

यादु०— मूलमुपलक्षणपरमित्यभिप्रेत्याह **अवयविनस्त्विति** । उक्तो दोषः किमत्राकाशादावखण्डितेऽवयविन्युताखण्डिते पटादाविति विकल्पमभिप्रेत्याद्यं दूषयति **आकाशस्येति** । तथा चावयविन एकत्वेऽवयवानामभेदापादनं तत्रेष्टमेवेति भावः । द्वितीये त्वाह **पटस्य चेति** । **स एक एवेति** । तथा च तत्रैक्यापादनमिष्टमेवेति भावः । ननु न व्यतिषङ्गविशिष्टे तन्तुसमुदाये ऐक्यमापाद्यते, येनेष्टापादनं स्यात् । किन्त्वविवक्षितव्यतिषङ्गेष्वेव सर्वतन्तुष्विति शङ्कायां तत्र पटेनात्यन्ताभेदरूपतापादकमेवासिद्धमित्याह **व्यतिषक्तानामित्यादिना** । नन्वथाऽप्ययं तन्तुस्तन्त्वन्तराभिन्नस्तदभिन्नपटाभिन्नत्वात् । सर्वतन्तवो वाऽन्योन्याभिन्ना अन्योन्याभिन्नपटाभिन्नत्वादिति तन्तूनामेवान्योन्याभेदप्रसक्तिरित्यत आह **एकैकेनेत्यादिना** । ततश्च यत् यदभिन्नाभिन्नं तत्तदभिन्नमिति व्याप्तिरत्यन्ताभेदस्थलमात्रनिष्ठेति भावः । अत एवाकाशावयवानां पूर्वमन्योन्याभेद उक्त इति ज्ञातव्यम् ।

वं०प०— वचनलिङ्गा वचनरूपलिङ्गेनानुमेयाः । **अनुमाने** अयं षुरुष एकार्थविषयप्रतीतिमान् एकवचनप्रयोक्तृत्वादित्यनुमानेऽनैकान्तिकत्वम्, विप्राणां भोजनमित्यत्रैकवचनप्रयोग एकार्थविषयप्रतीतिं विना समुदायविषयत्वेनाप्युपपन्न इत्यन्यथासिद्धिः । नन्वेकेन संयोगादिनाऽभिन्नत्वात् तदाश्रयाणामप्यभेदः स्यादिति दूषणं यद्यपि नास्ति, संयोगस्यानेकत्वेनापादकासिद्धेः । तथाऽप्येकेनावयविनाऽभिन्नत्वादवयवानामभेदः स्यादिति यद्दूषणं 'अथापि स्या'दित्यादिना ग्रन्थेनोक्तं तदपरिहार्यमेव । तत्र संयोगादिन्यायासम्भवादित्यत आह **अवयविनस्त्विति** । नन्वेकावयव्यभिन्नत्वेऽवयवानामप्यन्योन्यमभेदः स्यादुक्तव्याप्त्या इत्यस्ति दोष इति चेत् तत्राह **आकाशस्येति** । **अभेदवत** अत्यन्ताभेदवत् । **अङ्गीकृतत्वात्** तथा चेष्टापत्तिर्गगनाद्यवयविविषये इति भावः । ननु तर्हि तत्र माऽस्तु । तथाऽप्येकेन पटरूपेणावयविनाऽभिन्नतन्तूनां परस्परमभेदः स्यादित्यापाद्यत इति चेत्तत्राह **पटस्येति** । **यादृशेन** व्यतिषङ्गविशेषविशिष्टतन्तुसमुदायेन । **स एक एवेति** । तथा च तत्रावयवभूतस्य विवक्षिततन्तुसमुदायस्यैकत्वेनावयवाभेदः स्यादित्यापादनमिष्टमित्यर्थः । ननु तन्तूनां विशिष्टाकारस्यैव पटत्वात् तदभिन्नानां विवक्षितविशेषतन्तूनामपि परस्परमभेदः स्यादुक्तव्याप्त्येत्यत आह **व्यतिषक्तानामिति** । **असौ** पटः । **स चेति** । तन्तुनिष्ठः पटरूपो विशिष्टाकारः । भिन्नाभिन्नत्वे उक्तामुक्तिं स्मारयति **आगन्तुकत्वादिति** । केवलतन्तुषु सत्स्वपि पटरूपविशिष्टाकारस्यासत्त्वादित्यर्थः । **तन्तुभ्यः** व्यतिषङ्गविशेषरहिततन्तुभ्यः ।

कं०रा०— वचनलिङ्गेति । वचनरूपं यल्लिङ्गं तस्यादिः कारणं वक्तुः प्रत्ययः वक्ता चानयोर्भेद इत्याद्येकवचनं प्रयुज्यते । तेनैकवचनप्रयोगरूपकार्यलिङ्गेन प्रयोगहेतुभूतवत्कनिष्ठप्रतीतावनेकधर्मिक एक एव भेदोऽनुभात इत्यनुमीयत इत्यर्थः । यदुक्तमवयविनोरभेदेऽवयविन एकत्वात् तदभिन्नानामवयवानामप्यभेदः प्रसज्यत इत्यादि तत्राह **अवयविनस्त्विति** । ननु व्यतिषक्तानां तन्तूनां विशिष्टाकाररूपसमुदायस्य तन्तुभिरभिन्नत्वे तस्यैकत्वात् तन्तूनामप्यभेदः प्रसज्यत इत्यत आह **स चेति** ।

श्रीनिधि०— वचनलिङ्ग इति । वचनलिङ्गज्ञापकं यस्य स वचनलिङ्ग इत्यर्थः । **अनेयोर्भेद इत्यादि वाक्य इति** । प्रतीयमानमिति शेषः । **भेदद्वये वेति** । विषयसप्तमीयम् । **एतेनैकवचनेन प्रतीतेरिति** । अनयोर्भेद इति वाक्ये भेदपदजन्या भेदप्रतीतिः एकार्थविषया । एकवचनजन्यत्वात् । अयं घट इति वचनजन्यप्रतीतिवदित्यनुमानेऽनैकान्तिकम् । **विप्राणां भोजनम्** इत्यत्र भोजनमित्येकवचनजन्यप्रतीताविति्यर्थः । **यादृशेनेति** । व्यतिषिक्तेनेत्यर्थः । **व्यतिषिक्तानां तन्तूनां विशिष्टाकारो ह्यसाविति** । व्यतिषङ्गसमानकालीनो विशिष्टाकार इत्यर्थः ।

शे०वा०— तत्रैकवचनमिति भेद इत्येकवचनगतिकथनानर्थक्यमाशङ्क्य प्रतीतिकार्यव्यवहारे एकवचनप्रयोगात् कारणीभूतप्रतीतेरेकार्थविषयत्वसिद्ध्या पूर्वोक्तस्य प्रतीतेरन्योन्यप्रतियोगिकानेकधर्मिकानेकभेदविषय-त्वस्यानुपपत्तिशङ्कानिरासार्थत्वान्न तदिति भावेन तत्परतया तद्द्योजयितुमुक्तानुपपत्तिशङ्कामुत्थापयति

नन्विति । एक एव भेदो द्विधर्मिको दृष्ट इति । उपलक्षणं चैतत् । संयोगो विभाग इति चैकवचनं प्रयुज्यते, तेनानुमीयते अस्यां प्रतीतावेक एव संयोगादिर्द्विधर्मिको दृष्ट इत्यपि द्रष्टव्यम् । भेदेत्युपलक्षणम् । अन्योन्यप्रतियोगिकानेकधर्मिकानेकसंयोगादिविषयत्वं प्रतीतेर्न वक्तुं शक्यत इत्यपि द्रष्टव्यम् । **अनैकान्तिकत्वमिति** । सत्यपि भोजनमित्येकवचनप्रयोगे व्यवहारकारणीभूतभोजनप्रतीतेरेकार्थविषयत्वाभावादिति भावः । **समुदायविषयत्वेनेति** । भवेत् प्रतीतिकार्यव्यवहारे एकवचनप्रयोगात् तत्कारणप्रतीतेः एकार्थविषयत्वानुमानं, यदि प्रतीतेरेकार्थविषयत्वं विना तत्कार्ये व्यवहारे एकवचनमनुपपन्नं स्यात्, न चैतदस्ति । प्रतीतेरेकार्थविषयत्वाभावेऽपि समुदायविषयतामात्रेणैकवचनप्रयोगनिर्वाहादन्यथासिद्धिश्चेत्यर्थः । गुणगुण्याद्यभेदानुपपत्तिपरिहारवत् अवश्यवक्तव्यस्यावयवावयव्यभेदानुपपत्तिपरिहारस्य मूलेऽनुक्त्या प्रसक्तां न्यूनतां तदनुक्तौ निमित्तकथनेन परिहरिष्यन्नेव स्वयं तां परिहरति **अवयविनस्त्विति** । अवयवैरिति शेषः । **न कश्चिदिति** । अवयवानामभेदप्रसङ्गरूपो वाऽवयविनो भेदप्रसङ्गरूपो वेत्येवं न कश्चिदित्यर्थः । तत्कथमित्यत उक्तो दोषः किमाकाशादावभिप्रेतः किंवा पटादाविति विकल्पद्वयं मनसि निधायाद्यं प्रत्याह **आकाशस्येति** । **अवयवानामपीति** । परस्परमिति शेषः । तथा च तत्रावयवाभेदापादनमिष्टापादनमिति भावः । द्वितीये त्वाह **पटस्य चेति । स एक एवेति** । तथा च तत्राप्यैक्यापादनमिष्टापादनत्वादनुपपन्नमिति भावः । यादृशेन समुदायेनेत्युक्तमेव विशदयति **व्यतिषक्तानामिति** । **असाविति** । समुदाय इत्यर्थः । ननु विशिष्टाकारेणैव पटस्याभेदेन तन्तुभिरभेदस्यानभ्युपगमात् पटैक्येन तन्तूनामभेदापादनासम्भवेऽप्येकस्य विशिष्टाकारस्यानेकतन्त्वभेदाद्विशिष्टाकारैक्येणैव तन्तूनां परस्परमभेदापादनमनिवार्यमेवेत्यतो भवेदेतदेवं यदि विशिष्टाकारस्य तन्तुभिरत्यन्ताभेदः स्यान्न चैतदस्तीत्याह **स चेति** । आगन्तुकत्वादिति विशिष्टाकारस्य तन्तुभ्यो भिन्नत्वे खण्डितत्वरूपहेतुकथनम् । ननु पटैक्येन न विशिष्टाकारैक्यमापादयामो, येनेष्टापादनं स्यात् । किन्त्वयं तन्तुस्तन्त्वन्तराभिन्नस्तदभिन्नपटाभिन्नत्वात् । सर्वतन्तवो वा परस्परमभिन्ना अन्योन्याभिन्नपटाभिन्नत्वादिति तन्तूनामेवान्यन्योन्याभेदमेवेति नेष्टापत्तिरित्यतो भवेदेतदेवं यदि पटस्यैकैकेन तन्तुनाऽविवक्षितव्यतिषङ्गैः सर्वतन्तुभिर्वाऽत्यन्ताभेदः स्यान्न चासावस्तीति न तदापत्तिरिति पूर्वोक्तमेव परिहारं स्मारयति **एकैकेनेति** । ततश्च यत् यदभिन्नाभिन्नं तत्तेनाभिन्नमिति व्याप्तिरत्यन्ताभेदस्थलमात्रनिष्ठेति भावः । अत एवाकाशावयवानां पूर्वमन्योन्याभेद उक्त इति ज्ञातव्यम् । **स्वयमेवोह्यतामिति** । स्पष्टत्वाच्छिष्यैरिति शेषः । **नोक्तं** भाष्यकृतेति शेषः ।

स०व्र०— 'संयोगश्च विभागश्च भेदश्चैव' इत्यादिना संयोगविभाग-भेदानामेकद्रव्याश्रितत्वोपपादनेन गुणगुणिनोरैक्य एव मूलकारेणानुपपत्तिरपरिहारः कृतः । स चोपलक्षणमित्यभिप्रायेण 'एको हि अवयवी,अनेके चावयवाः । तदभेदे अवयवानामप्यभेदः, अवयविनो वा भेदः प्रसज्येतेत्युक्तानुपपत्तिं परिहर्तुं प्रतिजानीते **अवयविनस्त्विति । तन्तूनां विशिष्टाकारो हीति** । तद्विशिष्टाकाराभिन्न इत्यर्थः । **नान्योन्याभेदप्रसक्तिरिति** । तदभेदे अवयवि(वा)नामप्यभेदः अवयविनो वा भेद इत्यन्योन्याभेदप्रसक्तिर्नेत्यर्थः ।

विट्ठल०— वचनलिङ्गं हीति । वचनलिङ्गं यस्य स तथोक्तः । वचनरूपलिङ्गेनानुमेय इत्यर्थः । मूलमुपलक्षणपरमित्यभिप्रेत्याह **अवयविनस्त्विति । न कश्चिद्दोष इति** । अवयवानामवयवाभेदे अवयवानां परस्परमभेदापत्तिरवयविनावनेकत्वमित्युक्तदोषमध्ये न कश्चिद्दोष इत्यर्थः । तथा हि तत्रादौ किमाकाशादावखण्डितेऽवयविनि तदवयवानामभेद आपाद्यते । उत पटादौ खण्डिते तदवयवानामिति विकल्पं मनसि निधायाद्यं दूषयति **आकाशस्येति** । तथा चाखण्डितस्थले अवयवानामभेदापादनं तवेष्टमिति भावः । पटस्य तु व्यतिषङ्गविशेषविशिष्टतन्तुसमुदायेनात्यन्ताभेदसत्त्वेऽपि न तदवयवानां तन्तूनामभेदापादनं युक्तम् । व्यतिषङ्गविशेषविशिष्टतन्तुसमुदायव्यतिरेकेण तन्तूनामभावात् । ये वा व्यतिषिक्ततन्तुसमुदायात्मकस्य यावत्तन्त्रात्मकः पट एक एव अतो नोक्तदोष इत्याह **पटस्य चेति** ।

ननु व्यतिषिक्ततन्तुसमुदायात्मकस्य पटस्येकत्वेऽपि व्यतिषिक्तानामपि तन्तूनां व्यतिषङ्गाविवक्षया खण्डितत्वादभेदापादनं क्रियत इति द्वितीयपक्षे त्वाह **व्यतिषिक्तानामिति** । व्यतिषिक्तानां तन्तूनां व्यतिषङ्गविवक्षायां न पटेनात्यन्ताभेदोऽस्ति । अविविक्षितव्यतिषङ्गानां सर्वतन्तूनां कारणत्वेन तत्कार्यस्य पटस्य तन्तुव्यतिषङ्गविशिष्टाकारत्वेन तन्तुभ्यो भिन्नाभिन्नत्वात् । भिन्नाभिन्नत्वेऽपि तन्तूनामभेदापादनयोगः कुत इति चेत् किमेकैकतन्तूना पटाभेदस्तन्तूनां परस्पराभेदस्यापादकः किं वा सर्वैस्तन्तुभिः पक्षद्वयेऽपि एकैकतन्तुसर्वतन्तुव्यतिरेकेण पटस्यादर्शनादेकैकतन्तुना सर्वैश्च तन्तुभिरभेदेऽपि एकैकतन्तौ पटबुद्ध्यभावेन सर्वतन्तूनामायणे विद्यमानत्वेऽपि पटाभावेन च भेदस्यापि विद्यमानत्वात्केवलाभेदस्यैव पादाकत्वेन प्रकृते तदभावान्न तन्तूनां अन्योन्याभेदापादनं युज्यत इति भावः । यदुपतीये त उक्तो दोषः किमाकाशादावखण्डितेऽवयविनि उत खण्डिते पटादाविति विकल्पमभिप्रेत्याद्यं दूषयति **आकाशस्येति** । तथा चावयविन एकत्वेऽवयवमभेदापादनं तवेष्टमिति भावः । ननु न व्यतिषङ्गविशेषविशिष्टतन्तुसमुदाये ऐक्यमापाद्यते । येनेष्टापादनं स्यात् किं त्वविवक्षितं व्यतिषङ्गेष्वेव सर्वतन्तुष्विति शङ्कायां तत्र पटेनात्यन्ताभेदरूपमापादकमेवासिद्धमित्याह **व्यतिषिक्तानामित्यादिना इति** ।

नन्वथाप्ययं तन्तुस्त्वन्तराभिन्नस्तदभिन्नपटाभिन्नत्वात् । सर्वतन्तवो वाऽन्योन्याभिन्नाः स्वभिन्नपटाभिन्नत्वादिति तन्तूनामेवान्योन्याभेदप्रसक्तिरित्यत आह **एकैकेत्यादिना** । ततश्च यद्यभेदभिन्नं तत्तेनाभिन्नमिति व्याप्तिरत्यन्ताभेदस्थलमात्रनिष्ठेति भाव इति । **ऊह्यताम्** इत्यत्र मूलमुपलक्षणमत्वेति शेषः ।

चषक— वचनलिङ्गा हीति । वचनं परिभाषणं लिङ्गमनुमापकं येषामिति बहुव्रीहिरतो न पुंस्त्वानुपपत्तिः ।

* * *

॥ अथ च तत्रापि समन्यायेन
संयोगादेरप्येकैकाश्रितत्वोक्त्यनुपपत्तिशङ्का तत्समाधानं च ॥
॥ अथ तत्रादौ संयोगादेरेकैकाश्रितत्वस्य वस्तुस्थित्युक्तितया समाधानम् ॥

२११ सु०— नन्वेवं तर्हि संयोगादेरप्येकैकाश्रितत्वं न वक्तव्यम्, अयावद्द्रव्यभावित्वेन भेदाभेदाभ्यामेवोक्ताक्षेपसमाधानादिति । सत्यम् । तथाऽपि वस्तुस्थितिरियमुक्तेत्यदोषः ।

परि०— उक्ताक्षेपेति । संयोगिनोरप्यैक्यापादनरूपेत्यर्थः । नायं समाधिरिति पदच्छेदः ।

वं०प०— नन्वेवमिति । एकस्यैवावयविनः पटादेरनेकावयवैर्भेदाभेदाङ्गीकारेणावयवानामप्यभेदापत्तिरूपदोषो यदि परिहियत इत्यर्थः । **उक्ताक्षेपेति** । एकेन संयोगादिनाऽभिन्नयोर्घटपटयोरपि परस्परमभेदापत्तिः, यत् यदभिन्नाभिन्नं तत्तेनाभिन्नमिति व्याप्तेरित्युक्तस्याक्षेपस्य संयोगादिना भेदाभेदाङ्गीकारेणोक्तदोषाभावात् उक्तव्याप्तेश्चात्यन्ताभेदस्थलविषयत्वादिति समाधानं सम्भवतीत्यर्थः । संयोगस्यैकस्यैवानेकाश्रितत्वं नास्तीति वस्तुस्थितिः ।

कं०रा०— अयावद्द्रव्यभावित्वेनेति । संयोगादेरयावद्द्रव्यभावितया स्वाश्रयेण भिन्नाभिन्नत्वात् संयोगादेरैक्येऽपि तदाश्रययोर्न परस्पराभेदप्रसक्तिरिति समाधानसम्भवादित्यर्थः ।

श्रीनिधि०— उक्ताक्षेपसमाधानादिति । संयोगादिभिरैक्ये संयोगाद्याश्रयानेकद्रव्याभेदः स्यादिति उक्त्वा आक्षेपस्येत्यर्थः । कथं समाधानमिति चेदुच्यते । आश्रिताभिन्नानां भेदे आश्रितस्य स्वेन भेदः स्यादिति हि दूषणं परेण उक्तम् । तत्रेष्टापत्त्या समाधीयते । तथा हि स्वेनेति स्वस्वरूपमुच्यते । आश्रयाणि च स्वस्वरूपमभेदात् तैश्च भेदः स्वीकृत एव । भेदाभेदस्वीकारात् । संयोगादेः संयोगत्वादिनावच्छिन्नेन भेदः स्यादित्यापादकशून्यम् । संयोगत्वाद्यवच्छिन्नानां स्वेनस्वेनात्यन्ताभेदस्वीकारादिति । आश्रयाणां परस्परं भेदे आश्रितस्यापि तैर्भेद एव स्यादित्याद्यापाद्यत इति चेन्न । अभेदप्रत्यक्षविरोधेनाभासत्वात् । कथमेतदिति चेत् विशेषशक्त्यैवेति उक्तं मा विस्मार्षीरिति । सर्वमनवद्यम् ।

शे०वा०— संयोगश्चेत्यादिभाष्यानर्थक्यमाशङ्कते **नन्विति** । **एवं तर्हीति** । यदि अवयवावयव्यभेदपक्षोक्ताक्षेपस्य तद्भेदाभेदाभ्यामेव समाधानं तर्हीत्यर्थः । कथं तर्हि गुणानां गुणिनैक्ये संयोगाद्याश्रयानेकद्रव्याभेदो वा संयोगादिभेदो वा आपद्येतेति गुणगुण्यभेदपक्षोक्ताक्षेपसमाधानमित्याशङ्क्य एवं तर्हीति सूचितमेव प्रपञ्चयति **अयावद्द्रव्यभावित्वेनेति** । **तथाऽपीति** । अनेन नोक्ताक्षेपपरिहारकतया ग्रन्थो योज्यः किन्त्वेवमाक्षेपपरिहारे सत्येव स्वयं वस्तुस्थितिमाहेत्येवेति सूचयति ।

विट्ठल०— भेदाभेदाभ्यामेवेति । संयोगस्यानेकाश्रितत्वेऽपि न संयोगिनोरभेदः संयोगस्यायावद्द्रव्यभावितया भेदस्यापि सद्भावादिति भेदाभेदाभ्यां ससमाधावित्यर्थः ।

॥ इति संयोगादेरेकैकाश्रितत्वस्य वस्तुस्थित्युक्तितया समाधानम् ॥

* * *

॥ अथ तत्रान्ते अजसंयोगे वैलक्षण्यम् ॥
॥ अथ तत्राप्यादौ परमाणोराकाशादिसंयोगे वैलक्षण्यम् ॥

२१२ सु०— अपि चाजसंयोगे नायं समाधिः सम्भवति । स एव नास्ति प्रमाणाभावादिति चेन्न, परमाणोः आकाशादिसंयोगाङ्गीकारात् । सोऽपि परमाणुकर्मज इति चेन्न, प्रागसंयोगप्रसङ्गात् । अंशभेदान्नेति चेन्न, स्वाभाविकस्यानभ्युपगमात्, औपाधिकस्य च निराकरिष्यमाणत्वात् ।

परि०— निराकरिष्यमाणत्वादिति । 'यद्यस्यौपाधिको भेदः कुत एकत्वमिष्यत' इत्यादिनाऽत्रैव समवायनिरासप्रकरणे निराकरिष्यमाणत्वादित्यर्थः ।

गु०दी०— परमाणोराकाशादिसंयोगाङ्गीकारात् इत्युपलक्षणम् । कालाकाशादिसंयोगोऽपि ग्राह्यः ।

यादु०— निराकरिष्यमाणत्वादिति । 'नानिर्वाच्यं हि तेनेष्टमत औपाधिकान्ययोः । सत्यत्वात् को विशेषः स्यादि'त्यत्रेति शेषः ।

वं०प०— अजेति । यः कालाकाशयोर्नित्यः संयोगस्तस्यैकस्यैवाश्रयेणाभेदे उक्तव्याप्तिबलादाश्रयाणामप्यभेदः स्यात् इत्याशङ्कायामयावद्द्रव्यभावित्वेन भेदाभेदयोः सत्त्वान्नोक्तदोष इति समाधानं न सम्भवति । अजत्वादेव तस्यायावद्द्रव्यवृत्तित्वाभावात् । अतस्तत्र संयोगो द्विष्ठ एव न भवतीत्यापादकासिद्धिरित्येव समाधानं वाच्यमिति भावः । **स एव** अजसंयोग एव । **प्रमाणाभावादिति** । संयोगस्यान्यतरकर्मोभयकर्मजत्वनियमात् कालाकाशयोश्च कर्माभावान्नाजसंयोगोऽस्तीति भावः । **प्राक्** कर्माभावदशायाम् । ननु नायं दोषः परमाणुकर्मणा यस्मिन्नाकाशांशे संयोगो जायते, तस्य परमाणुसंयोगस्य पूर्वं कर्माभावदशायां तस्मिन्नेवाकाशांशेऽसत्त्वेऽपि आकाशांशानां भेदाद्बहुत्वाङ्गीकारात् तदंशभिन्नाकाशांशान्तरेण परमाणोः संयोगोऽस्त्येव, अतः प्रागसंयोगप्रसङ्गादित्येतदयुक्तमित्याशयेन शङ्कते **अंशभेदान्नेति चेदिति** । स्वाभाविकस्याकाशे अंशस्येति शेषः ।

कं०रा०— अजसंयोग इति । अजो यः संयोगस्तत्र अयावद्द्रव्यभावित्वेनेत्याद्युक्तं समाधानं न सम्भवतीति अजसंयोगस्य यावद्द्रव्यभावित्वादिति भावः । **प्रागिति** । परमाण्वाकाशसंयोगस्य परमाणुकर्मजत्वे कर्मोत्पत्तेः प्राक् परमाण्वाकाशयोरसंयोगप्रसङ्गादित्यर्थः । **अंशेति** । आकाशस्यांशभेदसत्त्वादेकस्मिन्नंशे परमाणुकर्मणा संयोगस्योत्पत्त्यजानत्वेऽपि कर्मोत्पत्तेः प्रागंशान्तरे परमाणुसंयोगस्य सत्त्वान्न तदुत्पत्तेः प्राक् तयोरसंयोगप्रसङ्ग इति भावः । **स्वाभाविकस्येति** । आकाशे स्वाभाविकांशभेदस्यानभ्युपगमादित्यर्थः । आकाशे स्वाभाविकांशभेदाभावेऽप्यौपाधिकांशभेदोऽस्त्वित्यत आह **औपाधिकस्येति** । आकाशमीश्वरेण संयुज्यत इति आकाशेश्वरयोर्विभुत्वेन निष्क्रियतया तत्संयोगस्यान्यतरकर्मजत्वाद्यभावेनाजसंयोगसिद्धिरिति भावः ।

श्रीनिधि०— अजसंयोग इति । अजश्चासौ संयोगश्चेति विग्रहः । **अंशभेदान्नेति चेदिति** । प्रागेकेनांशेन संयुक्तः परमाणुः स्वस्मिन् कर्मोत्पत्तौ पुनरंशान्तरेण संयुज्यते । अतः कर्मोत्पत्तेः प्रागसंयोग-प्रसङ्गो नेत्यर्थः । **निराकरिष्यमाणत्वादिति** । 'यद्यस्योपाधिको भेदः कुत एकत्वमिष्यत' इत्यत्र न्याय-साम्यनेति भावः ।

शे०वा०— अस्मिन्पक्षे भाष्यस्य वस्तुस्थितिकथनपरतया भवतीत्यपरितोषादाह **अपि चेति** । तत्र यावद्द्रव्यभावित्वेन भेदाभेदयोरनुपपत्त्या ताभ्यामेवोक्ताक्षेपसमाधानानुपपत्तेः तत्समाधानार्थमेकैकाश्रितत्वस्यैव वक्तव्यतया तत्परभाष्यस्यार्थवत्त्वमित्याशयः । **अङ्गीकारादिति** । आकाशस्य निष्क्रियत्वेन तत्कर्मजन्यत्वस्य निरवयवतया संयोगजस्य च संयोगस्यासम्भवात् परमाण्वाकाशसंयोगस्याजन्यत्वमिति भावः । आकाशस्य विभुत्वेन निष्क्रियत्वात् तत्कर्मजन्यत्वासम्भवेऽपि परमाणोः सक्रियत्वेन तत्कर्मजन्यत्वादन्यतरकर्मजन्यत्व-मिति न तत्संयोगस्याजन्यत्वमिति शङ्कते **सोऽपीति** । **प्रागसंयोगेति** । अप्राप्तिपूर्वकप्राप्तेरेव संयोगतया प्रागसंयोगं विना संयोगासम्भवादित्यर्थः । न चेष्टापत्तिः । व्यापकत्वादाकाशस्य प्राक् परमाणुभिरसंयोगा-नुपपत्तेरिति भावः । ननु च परमाणौ वर्तमाना क्रिया संयुक्तेनाकाशप्रदेशेन स्वाश्रयं विभज्यासंयुक्तेन तेन संयुनक्तीति न लक्षणानुपपत्तिरिति शङ्कते **अंशभेदादिति** । किमत्राकाशप्रदेशः स्वाभाविकोऽभिमतः किं वौपा-धिक इति विकल्पं मनसि निधायाद्यं प्रत्याचष्टे **स्वाभाविकस्येति** । तथा चापसिद्धान्त इति भावः । द्वितीयं प्रत्याह **औपाधिकस्य चेति** । **निराकरिष्यमाणत्वादिति** । 'नानिर्वाच्यं हि तेनेष्टमत औपाधिकान्ययोः । सत्यत्वात् को विशेषः स्यादि'त्यादिनेति शेषः ।

वा०र०— नास्त्यजः संयोगेति सपारिमाण्डल्यवत् पृथगनभिधानादिति प्रशस्तदेवोक्तिव्याख्यानानन्तर विभूनां त्विति तदुक्तिव्याख्यावसरे किरणावल्यां न चासौ कर्मजः तेषां निष्क्रियत्वादित्युक्तं तदनुसारेणाह **आकाशस्य निष्क्रियत्वेनेति** ।

विठ्ठल०— अजसंयोग इति । अजसंयोगस्य यावद्द्रव्यभावित्वेन संयोगिभ्यामत्यन्ताभेदप्रसक्त्या तत्र संयोगिनोरभेदप्रसंक्त्याक्षेपे प्राप्तेनायं समाधिः युज्यते । तत्रैकैकाश्रितत्वमेवोच्यत इत्यर्थः । **स्वाभाविकस्येति** । स्वाभाविकस्यांशभेदस्य त्वन्मतेनाभ्युपगमादित्यर्थः । **निराकरिष्यमाणत्वादिति** । 'यद्यस्योपाधिको भेदः कुत एकत्वमिष्यते । नानिर्वाच्यं हि तेनेष्टमतं औपाधिकान्ययोः । सत्यत्वात्' इत्यादिना समवाय-निराकरणप्रस्ताव इत्यर्थः ।

चषक— अजसंयोगे उत्पत्तिशून्यसंयोगे । **नायं समाधिः** अयावद्द्रव्यभावित्वेन भेदाभेदाभ्यामेवोक्ताक्षेपसमाधानम् । **निराकरिष्यमाणत्वात्** । 'नानिर्वाच्यं हि तेनेष्टमत औपाधिकान्ययोरि'त्यादिना प्रत्याख्यास्यमानत्वात् ।

॥ इति परमाणोराकाशादिसंयोगे वैलक्षण्यम् ॥

* * *

॥ अथ तत्रान्ते आकाशेश्वरसंयोगे च वैलक्षण्यम् ॥

२१३ सु०— किञ्चाकाशमीश्वरेण संयुज्यते द्रव्यत्वाद्घटवत् । न च मूर्तत्वमुपाधिर्विशेषणवैयर्थ्यात् । परिच्छिन्नपरिमाणवत्त्वं हि मूर्तत्वम्; तत्र परिमाणवत्त्वेनैवालम्, परिच्छिन्नत्वविशेषणं तु व्यर्थमेव ।

आकाशमीश्वरेण न संयुज्यते अमूर्तत्वाद्रूपवदिति चेन्न, अद्रव्यत्वस्योपाधित्वादिति ।

परि०— व्यर्थमेवेति । न च साधनाव्यापकत्वार्थं तदर्थवदिति वाच्यम् । व्याप्तिग्रहौपयिकस्यैव त्वन्मतेऽर्थवत्त्वात् । साध्यसमव्याप्त उपाधिरिति मते परिमाणवत्त्वेनैव साध्यव्याप्यत्वस्येव साध्यव्यापकत्वस्य च ग्रहणसम्भवेन गुरुधर्मावच्छेदेन तयोरग्रहणे साध्यव्यापकत्वाद्यभावापत्तेः । तदिदमाह **व्यर्थमेवेति** । **संयोगादेरयुगधर्मत्वोक्तिः ॥**

यादु०— परिच्छिन्नविशेषणं त्विति । न च साधनाव्यापकतानिर्वाहाय तत्सार्थकमिति वाच्यम् । तथात्वेऽपि प्रतिपक्षोन्नयनेऽसिद्धिवारकत्वप्राप्त्या वैयर्थ्यानिस्तारादित्याशयात् ।

कं०रा०— अद्रव्यस्येति । एतच्चोपलक्षणं अमूर्तत्वं हि परिच्छिन्नपरिमाणत्वाभावः तत्र च परिमाणवत्त्वाभावमात्रस्य प्रकृतसाध्यव्याप्यत्वसम्भवे परिच्छिन्नत्वविशेषणं व्यर्थमित्यपि द्रष्टव्यम् । न च वाच्यमसिद्धिवारणार्थं तदिति यन्निष्ठा यन्निरूपिता व्याप्तिर्येन विशेषणेन विना गृहीतुं न शक्यते । तत्तत्र सार्थकमिति वदतः तव मते असिद्धिवारणार्थत्वेन सार्थक्यायोगादिति ।

श्रीनिधि०— विशेषणवैय्यर्थ्यादित्युक्तमुपपादयति **परिच्छिन्नपरिमाणवत्त्वं हीति** ।

शे०वा०— एवं परमाणोराकाशादिना संयोगस्य परमाणुकर्मजन्यत्वानुपपत्तेरजन्यत्वमेवेत्युक्तम् । इदानीं विभूनां परस्परं संयोगोऽप्यजसंयोग इत्यभिप्रेत्य तत्साधकमनुमानमुपन्यस्यति **किञ्चेति** । न चायं कर्मजन्यः सम्भवति विभूनां निष्क्रियत्वात् । नापि संयोगजस्तेषां निरवयवत्वादतः परिशेषादज एवायं संयोग इति भावः । घटेश्वरसंयोगाश्रयत्वस्य घट इवेश्वरेऽपि वृत्त्या तत्र च मूर्तत्वविरहेण न साध्यव्यापकत्वमिति सत्येव दोषे दोषान्तरमाह **विशेषणेति** । तद्वैयर्थ्यमेवोपपादयति **परिच्छिन्नेति** । **परिच्छिन्नविशेषणं त्विति** । न च साधनाव्यापकतानिर्वाहाय तत्सार्थकमिति वाच्यम् । तथात्वे पतिपक्षोन्नयनेऽसिद्धिवारकत्वप्रसङ्गेन वैयर्थ्यानिस्तारात् । **आकाशमिति** । यद्यपि मूर्तत्वोपाधौ व्यर्थविशेषणत्वोक्त्या तदुन्नेयप्रतिपक्षानुमानेऽसिद्धिवारकतया विशेषणवैयर्थ्यसूचनात् प्रतिपक्षानुमानमपि दूषितप्रायमेवेति न पुनः प्रतिपक्षमाशङ्क्य निराकरणं युक्तम् । तथाऽपि दूषणान्तरविवक्षया पुनराशङ्क्येयमिति द्रष्टव्यम् । **अद्रव्यत्वस्योपाधित्वादिति** । यद्यपि सत्प्रतिपक्षे नोपाध्युद्भावनं युक्तम् । पूर्वानुमानस्यैव तत्र सत्प्रतिपक्षतया तस्य वैयर्थ्यात् । तथाऽपि स्वपक्षसाधनार्थमेकं परसाधनप्रतिरोधनार्थमपरमिति द्वयोरप्यर्थवत्त्वात् । अन्यायो ह्येकेन बहूनां प्रतिरोधः । उक्तं च 'द्विविधं बलवत्त्वं च बहुत्वाच्च स्वभावत' इत्यादिना । नन्वेवमप्याकाशेश्वरौ परस्परं न संयुज्येते युतसिद्धिरहितत्वात् । अवयवावयविवदित्यनेन प्रतिपक्ष इति चेन्न । युतसिद्धिमात्राभावस्यासिद्ध्या परस्परयुतसिद्ध्यभावस्य च प्रतियोग्यसिद्ध्याऽयोगेन तदनवकाशात् । यदत्रोक्तं वर्धमानेनाकाशं नेश्वरसंयोगि, ईश्वरसंयोगप्रागभावशून्यत्वाद्रूपवदित्यत्रोक्तानुमानस्य तात्पर्यमिति । तन्न । अद्रव्यत्वस्यात्राप्युपाधित्वेनासमानबलत्वात् ।

वा०र०— तत्साधकमनुमानमिति । उक्तव्याख्यानावसरे उदयनोक्तमेवेत्यर्थः । न ह्ययं कर्मजन्यादि इत्यादिकं टीकोक्तोदयनवाक्यशेषानुवादः । कालवृत्तिसंयोगाश्रयत्वस्य कालेऽपि वृत्तेः साध्याव्यापकत्वादिति वर्धमानानुसारेणोपाधिदूषणान्तरमाह **घटेश्वरेति** । **तत्र परिमाणत्वेनैवेति** मूलम् । परिच्छिन्नं परिमाणस्येति बहुव्रीहिलब्धमत्वर्थान्तर्भावेन लक्षणैकदेशानुवादोऽयं परिमाणत्वेनैवेत्यर्थ इति न दोषः । **प्रतिपक्षेति** । आकाशमित्युत्तरत्राशङ्क्ष्यमाणरूपेत्यर्थः । **असिद्धीति** । परिमाणवत्वरूपविशेष्यस्याकाशेऽपि सत्त्वादिति भावः । **द्वयोरप्यर्थवत्वादिति** । बाहुल्यप्रयुक्तप्रबले त्वसम्पादकत्वादस्येति भावः । भवेदेवं यदि बाहुल्यं प्राबल्यनिमित्तं स्यान्न चैवम् । नियामकाभावेन वैपरीत्यस्यापि सुवचत्वादित्यतो युक्तिरूपवैपरीत्ये बाधकमाह

अन्यथा हीति । स्वपक्षे साधकमाह **उक्तं चेति** । ब्रह्मतर्क इति शेषः । एतदङ्गीकृत्य न वस्तुतः । अत एव पराङ्गीकारवादोऽयमिति प्रागुक्तमिति ध्येयम् । विभूनां त्वित्येतत्सम्बन्ध्युदयनोक्तमनुमानमाशङ्कते **नन्वेवमपीति** । यद्यपि युतसिद्धिमात्राभावोऽसिद्ध इत्यादि वर्धमानानुसारेणाह **युतसिद्धीत्यादिना** ।

विट्ठल०— व्यर्थमेवेति । न च साधनाव्यापकतासिद्ध एतत्सार्थकमिति वाच्यं, व्याप्तिग्रहोपयुक्तस्यैव त्वन्मते स्वीकार्यत्वात् । प्रतिपक्षोन्नयने चासिद्धिवारकत्वप्राप्त्या वैय्यर्थ्यप्राप्तेश्चेति ।

चषक— व्यर्थमेवेति । अत्र व्याकर्तारः 'न च साधनाव्यापकतानिर्वाहाय तदिति वाच्यमिति शङ्कमानाः तथात्वे प्रतिपक्षोन्नयनेऽसिद्धिवारकत्वप्रसङ्गेन वैयर्थ्यानिस्तारादि'ति समादधति । व्याप्तिग्रहौपयिकस्यैव तन्मतेऽर्थवत्त्वात् । साध्यसमव्याप्त उपाधिरिति मते परिमाणवत्वेनैव साध्यव्याप्यत्वस्येव साध्यव्यापकत्वस्य च ग्रहसम्भवेन गुरुधर्मावच्छेदेन तयोरग्रहणे साध्यव्यापकत्वाद्यभावापत्तेरित्यपि समादधते । **संयोगादेः प्रातिस्विकत्वसमर्थनम् ॥**

॥ इति आकाशेश्वरसंयोगे च वैलक्षण्यम् ॥
॥ इति अजसंयोगे वैलक्षण्यम् ॥
॥ इति समन्यायेन संयोगादेरप्येकैकाश्रितत्वोक्त्यनुपपत्तिशङ्का तत्समाधानं च ॥
॥ इति द्विधर्मिकभेदपदोक्तैकवचनस्य 'विप्राणां भोजनं' इतिवद्व्यवस्थया अनुपपत्तिनिरासः ॥
॥ इति 'अनयोर्भेदः', 'अमीषां भेदः' इत्यादिप्रतीतौ
भेदस्य द्विधर्मिकत्वेन उक्तार्थानुपपत्तिशङ्कानिरासः ॥
॥ इति अस्मिन्विषये पृथक्त्वस्य संयोगविभागात्पार्थक्यशङ्का तन्निरासश्च ॥
॥ इति उक्तार्थे प्रमाणम् ॥
॥ इति संयोगादीनामेकैकाश्रितत्वम् ॥

* * *

(उर्वरितभागः अग्रिमसम्पुटे)

* * *

श्रीमन्न्यायसुधा-परिमळ-प्रशंसनम्

प्रतिवाक्यं प्रतिपदमनेकाकूतगर्भिता ।
प्रतिभाति सुधाऽथापि ग्रन्थाल्पत्वाय नोच्यते ॥

ये तु न्यायसुधापानकामुका रसिका बुधाः ।
आघ्रायेमं परिमळं सेवन्तां ते सुधामिमाम् ॥

— श्रीराघवेन्द्रतीर्थाः

श्रीकरोऽयं ग्रन्थः । तत्र वयमेव साक्षिणः ॥

— श्रीवादिराजतीर्थाः

यदुतापसलभ्यमनन्तभवैः तदुतोपरतत्त्वमिहैकपदात् ।
जयतीर्थकृतौ प्रवणो न पुनर्भवभाग् भवतीति मतिर्हि मम ॥

— श्रीविष्णुतीर्थाः

सुधा वा पठनीया । वसुधा वा पालनीया ॥

धीर श्रीराघवेन्द्र त्वदतुलरसनारङ्गनृत्यत्स्वयंभू-
योषाधम्मिल्लभारश्लथकुसुमततीस्त्वद्गिरस्सङ्गिरामः ।
याभिस्सम्मिश्रिताभिर्निरवधिवसुधा विश्रुता सा सुधाऽपि
क्षोणीगीर्वाणगम्यं परिमलमतुलं साम्प्रतं संप्रपेदे ।

— श्रीवादीन्द्रतीर्थाः

Printed at : Sudha Mudrana, Bangalore.